SANSKRIT SERIES

A

EXTRAORDINARY SANSKRIT WORK

NO. 186.

गादाधरी ।

श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचिता ।

श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या

श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता

GADADHARI,

A COMMENTARY ON DIDHITI THE COMMENTARY OF TATTVA CHINTAMANI,

BY

Gadadhara Bhattacharya Chakravartin. With

Edited by, *Pandit Vindhyeshvari Prasada De*
Librarian, Government Sanskrit College, Ben

and Nyayacharya Vamacharana Bhattach
Professor, Government Sanskrit College, B

FASCICULUS 1.

PUBLISHED AND SOLD BY THE SECR

CHOWKHAMBA SANSKRIT BOOK DEPOT
BENARES

AGENTS:- OTTO HARRASSOWITZ LEIPZIG
PANDITA JYESHTHARAMA MUKUNDAJI BOMBA
PROBSTHAIN & CO. BOOKSELLERS LONDO

Printed by Jai Krishna Dasa Gupta,
AT THE VIDYA VILASA PRESS.
BENARES.

Price Rupee one

श्रीगणेशाय नमः ।

—:०:—

गादाधरी ।

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिकृता ।

श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता ।

(गा०) अभिवन्द्य मुहुः समादरात् पदपाथोजयुगं मुरद्विषः (१)।
विवृणोति गदाधरः सुधीरतिदुर्बोधगिरः शिरोमणेः ॥

प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहव्यूहविध्वंसपटीयसीं परमेश्वरप्रणतिमादौ निबध्नाति ओमित्यादि—

(दी०) ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमयिचिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥
परजुष्टनयाभिवर्तमाना मननास्वाधरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥
न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः ॥
मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो
भूयो विधाय विनयं विनिवेदयामि ।

---

(१) मुरद्विष —पा० २ पु०। किन्तु मुरद्विष इत्येव साधु "नत्वा नन्दतनूजसुन्दरपदं" मिति ग्रन्थसमाप्त्यर्थं वर्तमानत्वात्। "श्रीकृष्णचरणद्वन्द्वं नत्वे" ति मोदापिकारणादर्थं वर्तमानत्वाच ।

दृष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविदितो न दुनोति दोषः ॥

(गा०) समस्तैरकारोकारमकारैः सन्धिवशेन प्रणवभावमापद्यद्भिरव्ययतया लुप्तचतुर्थीकैः प्रत्येकशक्त्योपस्थापितस्य वासुदेवादित्रयस्याभेदेन परमात्मनो विशेषणत्वमत्राभिहितम् । अत्र च जगत्पालनादिकर्तृत्वं नाकारादिपदार्थतावच्छेदकम् । उद्देश्यतावच्छेदकस्य परमपदार्थोत्कर्षस्यापि तद्रूपतयाऽन्वयानुपपत्तेः(१) अपि तु विग्रहविशेषवत्त्वमेव ओंपदार्थस्य परमात्मन एकत्वेऽपि पदार्थतावच्छेदकानां नारायणादिशरीराणां भेदो द्वन्द्वस्य साधुतामुपपादयति । यद्यपि जातिविशेषाद्यवच्छिन्नशरीराणां स्वनिष्ठचेष्टानुकूलप्रयत्नवत्त्वरूपपरम्परासम्बन्धेन(२) प्रवृत्तिनिमित्ततापेक्षया धर्मान्तराविशेषितानां शरीरनिष्ठजातिविशेषाणामेव समवायेन तथात्वमुचितं तथापि सर्वं वेत्ति विष्णुरित्यादिप्रामाणिकप्रयोगानुरोधेन विष्ण्वादिपदस्यात्मनि शक्तेर्निरूढलक्षणाया वा आवश्यकत्वात् तत्पर्यायस्याकारादेरपि शरीरविशेषावच्छिन्नात्मपरता युज्यत एव । न तूक्तस्थले शरीरपरत्वे योग्यता कथञ्चिन्निर्वहति शरीरस्य समवायेन ज्ञानाश्रयत्वविरहात् ईश्वरबुद्धेर्व्याप्यवृत्तितयावच्छेदकत्वस्याख्यातार्थतास्वीकारेऽप्यप्रतीकारात् । स्वसमानाधिकरणप्रयत्नासाधारणकारणकचेष्टाश्रयतादेराख्यातार्थत्वे गौरवात्(३) । शरीरविशेषा एव प्रणवार्थाः तेषाञ्च निपातार्थतया भेदान्वय एव परमात्मनीति तु न साधु ओमित्यस्याद्रव्यपरतायामेव चादयोऽसत्त्व इत्यादिना निपातत्वसम्भवात् । अनि

---

(१) घटो घट इति वत् शाब्दबोधस्य तद्धर्मावच्छिन्नाभेदसम्बन्धावच्छिन्नप्रकारता निरूपितविशेष्यताव[illegible]च्छेदकतासम्बन्धेन शाब्दबुद्धौ तद्धर्मभेदस्य कारणत्व[illegible] प्रकृते च तदभावा[illegible] शाब्दबोधानुपपत्तिरिति भावः ।

(२) [illegible]

(३) [illegible]



पातत्वेऽव्ययत्वमेव कुत इति चेत् स्वराद्यन्तर्गतत्वोपगमात् विगृहीतस्याकारादेरनव्ययत्वेऽपि समस्तस्य तथात्वं कल्प्यते बाधकविरहात् । ईश्वरस्य सर्गादिकर्तृत्वे ब्रह्मादीनां तथात्वबोधकानामागमानामपि प्रामाण्यमित्येतत्सूचयितुं तस्य ब्रह्माद्यभेदाभिधानमिति न तद्वैयर्थ्यमाशङ्कनीयम्। वस्तुतस्तु शरीरविशेषानवच्छिन्न एव भगवत्योमितिपदस्य रूढिः । ओं तत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृत इति समस्तं व्यस्तं त्वां शरणद गृणात्योमितिपदमित्यादिबहुतरतत्साधकसत्त्वात् । रूढेश्चावच्छेदकं जगत्कर्तृत्वमेव । एवं च(१) ओमित्येव विशेष्यपदं तदन्यानि च चतुर्थ्यन्तपदानि सर्वाण्येव विशेषणपराणि । नमःपदं स्वापकर्षबोधकप्रयोक्तृव्यापारार्थकं तदेकदेशीभूतापकर्षान्वयि अवधित्वमवधिमत्त्वं वा नमःस्वस्तीत्यादिसूत्रानुशिष्टचतुर्थ्यर्थः क्रियान्विततादृशार्थविवक्षायामेवापादानपञ्चमीप्रसक्त्या नमः पदार्थघटकापकर्षान्विततादृशार्थविवक्षायां शेषषष्ठ्येव प्रसज्यत इति सर्वा ह्युपपदविभक्तयः षष्ठ्यपवादिका इति न विरुध्यते । वस्तुतस्तु(२) स्वावधिकोत्कर्षवत्तया ज्ञापनं नमस्कारः तदेकदेशज्ञानान्वयि विषयत्वं विषयित्वं वा चतुर्थ्यर्थः । गुरुं प्रणमतीत्यादौ तादृशज्ञानविषयतया गुरुप्रभृतेः कर्मत्वेऽपि प्रकृते ज्ञानस्य धात्वनुपस्थाप्यतया न भगवतः कर्मता । नारायणं नमस्कृत्येत्यादौ नारायणादेः कर्मत्वं प्रयत्नेनोपपादनीयम्(३)। नमस्करोति प्रणमतीत्यादौ समभिव्याहृतस्य कर्तुरेव स्वावधिकोत्कर्षबोधको व्यापारः प्रतीयते न तूच्चारयितुरेव प्रकृते च केवलान्नमःपदात् प्रयोक्तुरेव तादृशव्यापारः प्रतीयत इति स्वावधिकोत्कर्षवत्तया भगवज्ज्ञानानुकूलो मदीयो व्यापार इत्याकारकः शाब्दबोधः । विष्टभ्येति । विष्टम्भो धृतिः सा च पतनविरोधिव्यापारः स च ईश्वरप्रयत्न ईश्वरसंयोगो वा । यथा विहायसि भ्राम्यतां विहङ्गमादीनां शरीरधारकप्रयत्नाधिष्ठानाच्च पतनं तथा

(१) यत्र रूढपदं यौगिकपदं च वर्तते तत्र रूढपदमेव विशेष्यबोधकं भवतीत्याशयः ।

(२) गुरुं प्रणमतीत्यादौ गुरोर्धात्वर्थतावच्छेदकफलाश्रयत्वविरहात् द्वितीयानुपपत्तिरत आह वस्तुतस्त्विति ।

(३) नारायणं नमस्कृत्येत्यत्र नम पद तात्पर्यग्राहक प्रयोक्तुरेव तादृशव्यापारोऽर्थ इत्येव स्वीकरणीयमिति ।

भूरादिलोकानां गुरुतराणामपि प्रयत्नवदीश्वरसंयोगादेव न पतन-
मिति निरुक्तधृतिकर्तृत्वं भगवतोऽव्याहतमेव । पतनविरोधित्व-
पतनानुत्पादप्रयोजकत्वम् एव च धात्वर्थतावच्छेदकपतनानुत्पाद-
कतया भूतानां कर्मता मुखं व्यादाय स्थापितत्वेनैव समानकालीन-
त्वमेव कर्मत्वपर्याप्तं न तूत्तरकालीनत्वं । भगवतो भूतधारकत्वम्
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत । यो लोकत्रयमाविश्य बि-
भर्त्यव्यय ईश्वर इत्युपनिषदोऽपि प्रमापयन्ति । अखण्डेति । अत्र
नित्यसुखज्ञानरूपे इति नित्यसुखज्ञानात्मकार्येति वा व्याख्यानं वेदा-
न्तिकानामेव शोभते न तु नैयायिकानां तैर्नित्यसुखस्यात्मनि ज्ञान-
सुखाभेदस्य चानभ्युपगमात्तन्मते अखण्डो दुःखासम्भिन्न
आनन्दो यस्मात् सोऽखण्डानन्दः एव भूत उपासनारूपो बोधो
यस्येत्येव व्याख्येयम् । अथवा अन्यकृता नित्यसुखाभिव्यक्तिर्मुक्ति-
रितिमतमतस्य परिष्कृतत्वात्तदनल्पस्यैतदभिहितं तथा चाख-
ण्डस्य नित्यस्यानन्दस्य बोधः साक्षात्कारो यस्मादिति व्युत्पत्त्या
भगवत उपासनाविषयतया मुक्तिप्रयोजकत्वमखण्डेत्यादिना
प्रतिपादितम् । पूर्णाय भूताय वृत्तिश्च स्वीयसुखेच्छाजन्यत्वमिति १)
कुसुमाञ्जलिप्रकाशे भगवतोऽक्षरद्वयव्याख्यानावसरे वर्धमानोपा-
ध्यायैरभिहितम् । परमेति । परमत्वमुत्कर्षः स चात्मान्तरावधिक-
सर्वविषयकनित्यज्ञानादिमत्त्वमीश्वरस्य एव चार्थत एव तस्यात्मत्व-
लाभेऽपि आत्मपदसमभिव्याहारेणैव कथं परत्वलाभ इति न तद्वै-
यर्थ्यम् । वस्तुतस्तु आत्मपदं ज्ञानावच्छिन्नस्य वाचकं न तु सुखा-
दिसमवायिकारणतावच्छेदकमूर्तद्रव्यत्वव्याप्यजातिविशेषावच्छि-
न्नस्य सुखादिसमवायिकारणतारहितस्येश्वरस्य तादृशजातिमत्त्वे
मानाभावात् सुखाद्यवच्छिन्नप्रत्यासत्त्या हेतुतया अनभ्युपगमे-
ऽपि धर्मादिनिरूहणाना मानि सुखाद्युत्पादकत्वेन तादृशज्ञानानेव
पुनर्दुर्लभ याव । एव च यथा परमसुन्दर इत्यादौ पदार्थतावच्छे-
दकसौन्दर्यादिगत उत्कर्षः परमपदेन प्रत्याय्यते तथात्रापि आत्मप-
दार्थतावच्छेदकज्ञानादिगतः सर्वविषयकत्वादिरूप उत्कर्षस्तत्पदेन बो-
ध्यत इति । एव च भगवत उत्कर्षप्रतिपादकत्वेन स्तुतिरूपतया
अस्यापि श्लोकस्य मङ्गलरूपत्वमिति ध्येयम् ॥

(१) [illegible] ।

नन्वेकानन्तरमपराभिधाने सङ्गतिसत्त्वमपेक्षितं न तु तत्प्रदर्शनं तथा च प्रत्यक्षोपजीवकत्वादित्यादिना कार्यत्वरूपसङ्गतिप्रदर्शनमफलं न च प्रत्यक्षानन्तरमनुमानं निरूप्यत इत्यभिधाने तत्पूर्वमेव किमेतन्न निरूपितमित्याकाङ्क्षोदयान्निरूपणपौर्वापर्यनियामकस्य प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावस्य प्रदर्शनमावश्यकमिति वाच्यं निरूप्ययोरुपजीव्योपजीवकभावस्य निरूपणक्रमनियामकतायाः स्वयं दूषणीयतया स्वमते क्रमनियामकाकाङ्क्षया तदभिधानासङ्गतेरित्याशङ्कां परिजिहीर्षुः सङ्गतिप्रदर्शनस्य प्रत्यक्षानुमानग्रन्थैकवाक्यताप्रतिपत्तिप्रयोजनकत्वं निरूपणप्रतिज्ञाया निष्फलत्वशङ्कानिराचिकीर्षया तस्याः शिष्यावधानफलकत्वं च दर्शयति पूर्वापरेति ॥

(दी०) पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च सङ्गतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षेत्यादि ।

(चि०) प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते ।

(गा०) एकवाक्यत्वं साकाङ्क्षत्वे सति एकार्थप्रतिपत्तिपरत्वं तथा च जैमिनिसूत्रम् अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति । एकार्थप्रतिपादकयोर्घटोऽस्तिकलशोऽस्तीत्यादिवाक्ययोरेकवाक्यतावारणाय साकाङ्क्षत्वनिवेशः तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतरत्वमेव तत्साकाङ्क्षत्वं प्रकृते च प्रत्यक्षग्रन्थोत्थाप्यायाः किमस्योपजीवकमित्याकारिकाया उपजीवकज्ञानविषयिण्या आकाङ्क्षाया विषयसिद्धिसम्पादनेन निवर्तकत्वमनुमानग्रन्थस्येति निरुक्तसाकाङ्क्षतानिर्वाहः भूतलं घटवदित्युक्ते को घट इत्याकाङ्क्षया प्रयुक्तस्य कम्बुग्रीवादिमानित्युत्तरस्य तदेकवाक्यतावारणायार्थैक्यनिवेशः यद्यपि तादृशवाक्ययोरपि यं कं चिदर्थमादायार्थैक्यमस्ति तथापि परस्परसहकारेण विशिष्टैकार्थप्रतिपादकत्वं दलद्वयार्थः प्रकृते च प्रत्यक्षपरिच्छेदानुमानपरिच्छेदयोर्मिलित्वा विशिष्टैकार्थविषयकशाब्दबोधाजनकत्वेपि चत्वारि प्रमाणानीत्यप्रामाण्यशङ्कानास्कन्दितनिश्चयं प्रति परिच्छेदचतुष्टयस्यैव कथञ्चिदुपयोगितया तादृशप्रतिपत्तिप्रयोजकत्वाभिप्रायविषयत्वरूपमर्थैक्यं निराबाधमे-

च । एतादृशैकवाक्यताघटकसाकाङ्क्षताज्ञानं सङ्गतिज्ञानाद्भवति यद्यदर्थसङ्गतार्थकं भवति तत्तत्साकाङ्क्षमितिव्याप्तेः सङ्गतिज्ञानस्य साकाङ्क्षत्वानुमितिसामग्रीघटकत्वात् प्रत्यक्षोपजीवकमित्यनभिधाय उपजीवकत्वादिति पञ्चम्यन्ताभिधानमुपजीवकत्वस्य सङ्गतित्वलाभाय प्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपपरम्परया प्रयोजकत्वस्य हेतुपञ्चम्यर्थतया प्रत्यक्षानन्तरानुमानाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपानुमानसङ्गतित्वस्य लाभात् । वस्तुतो दर्शितपञ्चम्यर्थस्य जिज्ञासाघटितत्वात्साकाङ्क्षतालाभायैव पञ्चम्यभिधानम् अत एव सङ्गतित्वेन सङ्गतेरेकवाक्यताव्याप्यत्वे उपजीवकत्वत्वरूपतद्धर्मान्तररूपेणापि तद्व्याप्यतायाः आवश्यकत्वात् सङ्गतित्वज्ञानं विनाप्येकवाक्यताप्रतिपत्तिसम्भवात्सङ्गतित्वलाभाय पञ्चम्यन्ताभिधानमनर्थकमित्यपि निरस्तं न च पञ्चम्यर्थान्वयबलात्प्रत्यक्षोपजीवकत्वज्ञानजन्यजिज्ञासाया अनुमानाभिधानप्रयोजकत्वलाभेपि जिज्ञासायां प्रत्यक्षग्रन्थोत्थाप्यत्वस्यानुमानग्रन्थनिवर्तनीयत्वस्य चालाभादभिरुक्तसाकाङ्क्षत्वलाभो न सम्भवत्येवेतिवाच्यं जिज्ञासायां प्रत्यक्षोपजीवकत्वज्ञानजन्यत्वलाभे तादृशज्ञानप्रयोजकीभूतप्रत्यक्षग्रन्थप्रयोज्यत्वस्यानुमानाभिधानप्रयोजकत्वलाभे ऽनुमानप्रतिपादकग्रन्थनिवर्त्यत्वस्य चार्थतो लाभात् । अनुमानग्रन्थे प्रत्यक्षग्रन्थैकवाक्यताप्रतिपत्तिश्च उभयोरेकग्रन्थान्तर्गतत्वज्ञानसम्पादनेन समस्तचिन्तामणिग्रन्थज्ञानाधीनप्रत्यक्षादिचतुष्टयधर्मिकप्रमाणेतरभेदपरिच्छेदरूपफलविशेषेच्छावतोऽधीतप्रत्यक्षपरिच्छेदस्य शिष्यस्य तादृशफलोपयोग्यनुमानपरिच्छेदाध्ययनप्रवृत्तावुपयुज्यते । केचित्तु एकवाक्यत्वं निःश्रेयसरूपैकफलप्रयोजकत्वं तत्प्रतिपत्तिश्चानुमानग्रन्थज्ञानधर्मिकनिःश्रेयसरूपेष्टसाधनताज्ञानरूपा शिष्यप्रवृत्तावुपयुज्यते ज्ञायते च सा सङ्गतिमदर्थप्रतिपादकत्वरूपहेतुमत्ताज्ञानजनकात्सङ्गतिप्रदर्शनादिति व्याकुर्वन्ति । तदसत् उक्तहेतोस्तादृशैकवाक्यताशून्यनिःश्रेयसानुपयोगिशास्त्रसाधारणतया व्यभिचारित्वात् । निःश्रेयसत्वं परित्यज्य फलत्वरूपेण फलप्रवेशे फलस्योत्कटेच्छाप्रयोजकरूपाविशेषाज्ञानात्प्रेक्षावत्प्रवृत्त्यनुपयोगितापत्तेः एकफलकत्वस्य एकवाक्यतापदार्थताविरहाच्च । शिष्याणामिति यथाधानमनुमाननिरूपणात्मकस्य तत्र व्याप्तिविशिष्ट्यादि-

प्रकृतशब्दस्य विशिष्य शुश्रूषा । अनुमाननिरूपणत्वेन सामान्यतस्तादृशशब्दे प्रमाणतत्त्वप्रतिपादकज्ञानविषयत्वावगतावपि विशिष्य तच्छ्रवणे बुभुत्सितार्थप्रतिपादकत्वाग्रहाद्विशिष्य तच्छुश्रूषा न सम्भवतीति अनुमानमिदानीं निरूप्यत इति प्रतिज्ञाय तदभिधाने च विशिष्य प्रकृतनिरूपणेऽनुमानविषयकत्वग्रहेण बुभुत्सितप्रमाणतत्त्वप्रतिपादकता प्रकृतशब्दश्रवणे विशिष्य गृह्यत इति तादृशशुश्रूषारूपावधानं निर्वहतीति तत्फलकत्वं प्रतिज्ञायाः । तादृशावधानं च विशिष्य तच्छ्रवणे शिष्यप्रवृत्तावुपयुज्यते विरोधिन्याश्चाक्षुषादिसामग्र्या विघटनेन शब्दश्रवण एव वा । न च सङ्गतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रत्येकमुक्तप्रयोजनद्वयान्वये चकारासङ्गतिरिति वाच्यं प्रत्यक्षोपजीवकत्वादित्यादिसमुदितवाक्यस्यैव प्रतिजानीत इति प्रतिज्ञापदेन विवक्षितत्वात् । अन्यथा प्रत्यक्षवित्यादीतिक्रियाविशेषणान्वयायोगादेकपदार्थे एव तदुभयान्वयेन तत्सङ्गतेः एकदेशस्य एकवाक्यताप्रतिपत्त्यादिफलकत्वेनापि समुदाये तत्फलकत्वाबाधात् सङ्गतिभिन्नांशप्रतिपादनद्वारा नैकवाक्यताप्रतिपादकत्वमुक्तप्रतिज्ञावाक्यस्य किन्तु सङ्गत्यंशप्रतिपादनद्वारेति तस्य सङ्गतिप्रदर्शनरूपताप्रतिपत्तये सङ्गतिं प्रदर्शयन्नित्यभिहितं धातुसम्बन्धे प्रत्यया इत्यनेन समभिव्याहृतक्रियासमानकालीनतायामनुशिष्टशतृप्रत्ययात्सङ्गतिप्रदर्शनप्रतिज्ञयोरेककालीनत्वलाभेनार्थतस्तदभेदप्रतीतेः । प्रतिजानीत इति अव्यवहितोत्तरकालकर्तव्यतया बोधयतीत्यर्थः लट्प्रत्ययस्यात्र वर्तमानसामीप्यार्थकत्वादितिभावः ॥

प्रत्यक्षोपजीवकत्वादितिपञ्चम्या ज्ञापकत्वरूपहेतुत्वपरताभिमानेन निरूपणक्रमनियामकाकाङ्क्षया उपजीव्योपजीवकभावप्रदर्शनमिति साम्प्रदायिका वर्णयन्ति तन्मतमेव प्रथमतोऽनुवर्तमानः फलीभूतप्रत्यक्षानुमितिप्रमयोः प्रत्यक्षानुमानप्रमाणयोश्च कार्यकारणभावस्य प्रमातत्करणनिरूपणक्रमनियामकतामाह अत्रेति ।

(दी०) अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेऽपि न सर्वा प्रत्यक्षमितिस्तथा अनुमितयस्तु सर्वाः साक्षात्परम्परया वा व्याप्त्यादिप्रत्यक्षोपजीविकाः पुरस्कृतश्चायमुपजीवकतोत्कर्षः ।

(गा०) यत्र प्रत्यक्षानुमानग्रन्थपौर्वापर्ये इत्यर्थः नियामक इति शेषः नियामकत्वेन वा सप्तम्यर्थः। फलतः फलयोः प्रत्यक्षप्रमानुमिति-प्रमयोरितिवावत्। स्वरूपतः स्वरूपयोः प्रत्यक्षप्रमाणानुमानप्रमाण-योरिति यावत्। यत्रानयोः प्रत्यक्षानुमानयोरित्यर्थः फलतः फलद्व-यित्वपरम्परासम्बन्धेन स्वरूपतः साक्षात्सम्बन्धेन वर्तत इति शेषः तथा चोभयथैव स निरूपणक्रमनियामक इति भाव इति केचित्। अन्ये तदिदं पदं प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थपरं सप्तम्यर्थः प्रति पाद्यत्वं तथा च फलयोः प्रमाणयोश्च उपजीव्योपजीवकभावः क्रम-नियामकतया एतद्ग्रन्थप्रतिपाद्य इत्यर्थः उपजीव्यत्वस्य शब्दतः साक्षादलाभेऽपि उपजीवकतानिरूपकत्वेनार्थतस्तल्लाभान्न विरोध इत्यपरे। ननु प्रत्यक्षानुमित्योरुपजीव्योपजीवकभावस्य तन्निरूपण-पौर्वापर्यनियामकता तदैव सम्भवति यद्युपजीवकत्वमानन्तर्याभि-धानव्याप्यमेव स्यात् व्याप्तिश्च यत्प्रत्यक्षोपजीवकं भवति तत्प्रत्यक्ष-निरूपणाव्यवहितोत्तरनिरूपणविषय इति विशेषतो यद्यदुपजीवकं भवति तत्तन्निरूपणाव्यवहितोत्तरनिरूपणविषय इति सामान्यतो वा ग्राह्या उभयत्र प्रत्यक्षानन्तरमनिरूपिते तदुपजीवकपदार्थान्तरे व्य-भिचारः तदव्यवहितोत्तरनिरूपणविषयत्वे सतीति विशेषणं हेतौ निवेश्य तादृशव्यभिचारवारणेऽपि प्रथमे दृष्टान्ताभावः व्यतिरेकि-दृष्टान्तः सुलभ इति चेत् तदाऽनुमानत्वमेव प्रत्यक्षनिरूपणानन्त-रनिरूपणनियामकं निर्वाच्यते अप्रयोजकत्वशङ्का पुनस्तुल्यैवेति द्वितीय एव पक्ष आदरणीयः तथापि अनुमित्युपजीवकस्तदनुव्यव-सायतदात्मकशोपनयादिजन्योपनीतप्रत्यक्षादेस्तन्निरूपणाव्यवहितोत्त-रमनिरूपणेन व्यभिचारो दुर्वार इति शङ्कां निराचिकीर्षुः प्रत्यक्षान-मानिष्ठानुमित्युपजीवकतातो अनुमितिनिष्ठप्रत्यक्षोपजीवकताया आ-नन्तर्याभिधानव्याप्यतावच्छेदकं विशेषमाह प्रत्यक्षफलस्येति। तथा अनुमित्युपजीविका अनुमितिरस्ति इति। शाब्दानुमितिकारणज्ञानम-नुमित्यादिरूपमेव तत्र साक्षात्प्रत्यक्षोपजीवकत्वासम्भवात्परम्परया चेति। तथा चोपजीवकत्वमत्र जन्यजन्यादिव्यावृत्तं कार्यत्वरूपं न विवक्षितमपि तु तत्साधारणं प्रयोजकत्वरूपमेवेति न दोषः अथ निरू-पणविषयतावच्छेदकप्रमाविभाजकधर्मावच्छिन्नप्रत्यक्षोपजीवकता-मिष्ठ उत्तरं पुरस्कृत्य आनन्तर्याभिधानप्रयोजकतया आह इत्य-

र्थः त्वर्थेन चकारेणाविभाजकावान्तरधर्मावच्छिन्नत्वस्य पुरस्कृतत्वं व्यवच्छिन्नं तथा च प्रत्यक्षत्वावच्छेदेन प्रत्यक्षे नानुमित्युपजीवकत्वमस्तीति प्रत्यक्षं प्रागेव निरूपितं तथाविधानुमितित्वावच्छेदेन चानुमितौ प्रत्यक्षोपजीवकत्वमस्तीति सा पश्चान्निरूपितेति भावः ॥

प्रत्यक्षेऽपि निरूप्यतावच्छेदकफलविभाजकधर्मावच्छेदेनादृष्टद्वाराऽनुमितिप्रयोज्यत्वमस्तीत्याशङ्कते यद्यपीति ।

(दी०) यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननीं समयमत्कर्तव्यतादि(१)परिच्छेदिकामनुमितिम् ईश्वरप्रत्यक्षन्तु न फलं तथापि दृष्टद्वारकमिह तथात्वमादरणीयम् इतरस्याविनिगम्यत्वात्। सर्वं चानुमितिकरणमिन्द्रियापेक्षोत्पत्तिकम् । अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्करणतानिर्वाहकप्रत्यासत्तिविरहेणातत्त्वात् । सर्वं पुनरिन्द्रियं नानुमानाधीनजन्म मनःश्रवणयोरजन्यत्वात् । दृष्टद्वारा वा तथात्वमादरणीयम् । न चोत्पत्तिमदपीन्द्रियं दृष्टद्वारकमनुमानमपेक्षते ॥

(गा०) यदृष्टजननीं स्वजनकादृष्टप्रयोजिकां समयः पदसङ्केतः मत्कर्तव्यता स्वकृतिसाध्यता तत्परिच्छेदिकां तद्विषयिणीं शब्दाधीनायामदृष्टजनकयागादिगोचरप्रवृत्तौ प्रवृत्तिरत्याकरणाधीनयाक्यार्थबोधो ऽपेक्षितः तत्र च इदं पदमस्यार्थे शक्तं(२) शक्तिग्रमाजन्यलक्षणाप्रहाजन्यतद्विषयकशाब्दबोधजनकत्वादित्यनुमानाधीनशक्तिग्रहो ऽपेक्षितः अन्यत्र(३) च इदं मत्कर्तव्यं मत्कृतिं विनाऽनुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्यनुमानाधीनकृतिसाध्यताधीरपेक्षितेति प्रवृत्तिद्वारा ऽदृष्टप्रयोजिकाऽनुमितिर्जन्यमात्रं प्रत्येव प्रयोजिका अदृष्टस्य कार्यमात्रं प्रति हेतुत्वादिति भावः । नन्वेवमपि प्रमाविभाजकप्रत्यक्षत्वावच्छिन्नस्य भगवत्प्रत्यक्षस्य नित्यतयाऽनुमित्यनुपजीवकत्वान्निरूप्यतावच्छेदकधर्मावच्छेदेन प्रत्यक्षे नान-

(१) [illegible]

(२) [illegible]

[illegible]

(३) [illegible]

मित्युपजीवकत्वसम्भव इत्यत आह ईदृशेति । न फलमिति तथा च तत्साधारणप्रत्यक्षत्वं न फलविभाजकमतिप्रसक्तत्वादपि तु तद्व्यावृत्त जन्यप्रत्यक्षत्वमेव तदेव च निरूप्यतावच्छेदकं तदवच्छेदेन चादृष्टद्वारा ऽनुमित्युपजीवकत्वमक्षतमेवेति भाव(१)। इष्टद्वारक इष्टमात्रद्वारकं अदृष्टद्वारकमिति यावत् तेन दृष्टस्य यागादेरनुमितिद्वारकत्वेऽपि न क्षति अदृष्टद्वारकत्वं च स्वजनकादृष्टजनकज्ञानिरूपितत्व स्व हेतुमत्तया ऽभिमत तथात्वमुपजीवकत्वम् इह आनन्तर्याभिधाने आदरणीय नियामकतया स्वीकरणीय तथा च(२) यत्स्वजनकादृष्टजनकयत्किञ्चिद्रूपितनिरूपणाविषयतावच्छेदकप्रमितिविशेषक धर्मावच्छिन्नोपजीवकतावत्तन्निरूपणाव्यवहितोत्तरनिरूपणविषय इत्येव व्याप्तिरादरणीया तत्र च न व्यभिचारावकाश इति भाव । नन्वदृष्टद्वारकोपजीवकताया आनन्तर्याभिधाननियामकत्वमङ्गीकृत्य प्रत्यक्षमेव किं पश्चान्न निरूप्यत इत्यत आह इतरस्येति । अदृष्टद्वारकोपजीवकत्वस्येत्यर्थः अविनिगम्यत्वात् विनिगमनाया अविषयत्वात् । तथा चादृष्टद्वारा प्रवृत्त्यादिविषयकोपादानप्रत्यक्षोपजीवकताया अनुमितौ सत्त्वेनादृष्टद्वारकोपजीवकत्वस्य तुल्यतया आनन्तर्याभिधाननियामकत्वं न सम्भवतीति भाव । प्रत्यक्षप्रमाणस्य चक्षुरादेरप्यदृष्टद्वारा समयादिपरिच्छेदकानुमानोपजीवकत्वात् स्वरूपनिष्ठोपजीवकताया च यमानन्तर्याभिधाननियामकत्वमित्याशङ्का परिजिहीर्षुरनुमाननिष्ठोपजीवकताया विशेषं दर्शयति सर्वमिति । यत्तु प्रमाण

स्वनिष्ठप्रामाण्यग्रहार्थं प्रमाणान्तरमपेक्षते तदपि तदुपजीवकमुच्यते प्रकृते च तादृशमुपजीवकत्वं न विवक्षितं नित्येनापीन्द्रियेण प्रामाण्यग्रहार्थमनुमानापेक्षणादिति स्वोत्पत्तौ तदपेक्षितत्वरूपमुपजीवकत्वमेवेति स्फुटीकर्तुम् इन्द्रियोपजीवकमित्यनभिधाय इन्द्रियापेक्षोत्पत्तिकमित्यभिहितम् । एतावता एतदेव परीक्षाकृता शङ्कोत्तरभावेन यदभिहितं तत्स्वाभिधानसौष्ठवमादर्शितम् । एवं च निरूपणीयतावच्छेदकानुमितिकरणत्वादिरूपप्रमाणविभाजकरूपावच्छेदेनोपजीवकत्वमेवानन्तर्याभिधाननियामकं वाच्यमित्याशयः । नन्वनुमितिं प्रति भगवज्ज्ञानस्य उपादानप्रत्यक्षत्वेन(१) व्याप्तिज्ञानत्वेन च कारणत्वात् तदप्यनुमितिकरणम् अथ च नित्यतया न प्रत्यक्षोपजीवकमिति कथमनुमितिकरणत्वावच्छेदेन प्रत्यक्षोपजीवकतेत्याशङ्क्य तस्यानुमित्यसाधारणकारणत्वाभावं व्यवस्थापयति अनुमितिमिति । भावयतोऽपि उपादानप्रत्यक्षविधया जनयतोऽपि तत्करणतेति अनुमितित्वावच्छिन्ननिरूपितकरणतानिर्वाहकतत्समवायिसमवेतत्वरूपप्रत्यासत्तिविरहेणेत्यर्थः अतत्त्वात् अनुमितित्वावच्छिन्नाकरणत्वात् । अयमभिप्रायः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्यत्रात्मशरीरादिव्यावृत्तं प्रमित्यसाधारणकरणत्वमेव प्रमाणपदेन विवक्षितं तच्च प्रमितिविभाजकधर्मावच्छिन्नकरणत्वम् एवं चानुमानपदेनापि अनुमितित्वावच्छिन्नकरणत्वमेव विवक्षितं तदेव विभाजकम् । ईश्वरज्ञानं च न तथा तथाहि फलायोगव्यवच्छिन्नव्यापारवत्कारणत्वं करणत्वं न तु कारणत्वमात्रं तथा सति छिदानुपधायककुठारादिव्यक्तेरपि तत्करणताप्रसङ्गेन तत्कुठारेण छिनत्तीतिप्रयोगापत्तेः तदर्थश्च स्वनिरूपककार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे तत्कार्योपधायकव्यापाराव्यवहितप्राक्क्षणावच्छेदेन स्वावच्छेदकसम्बन्धेन वर्तते यत्तद्वृत्तित्वविशिष्टकारणत्वं(२) स्वं कारणता ।

---

(१) समवायसम्बन्धेन कार्यमात्रं प्रति विषयतासम्बन्धेन ज्ञानत्वावच्छिन्नं कारणमेवमीश्वरोपादानप्रत्यक्षविधया ईश्वरप्रत्यक्षमपि हेतुरिति भाव ।

(२) अव्यवहितपूर्वत्वसम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति कालिकसम्बन्धेन चक्षुरादेः कारणत्वमभ्युपेत्येदम् अव्यवहितपूर्वत्वञ्च स्थूलकालसाधारणं तदुत्पत्तिचणोत्पत्तिकध्वंसप्रतियोगित्वं वाच्यमतश्चक्षुरादौ चक्षुरादेः संयोगात्मकव्यापाराव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणेऽसत्त्वेऽपि न करणत्वहानिः । एवं कुठारेण छिनत्तीत्यादावपि बोध्यम् ।

त्वेन तज्जन्यताविरहान्नातिप्रसङ्गः एवं चादृष्टाद्वारकस्य प्रवर्तकानुमानस्यान्यथासिद्धतया चक्षुराद्यहेतुत्वेऽपि परमेश्वरीयव्याप्तिज्ञानरूपानुमाननिरूपितचक्षुरादिनिष्ठजन्यतावारणायैव स्वजनकादृष्टाजनकनिरूपितत्वात्मकमदृष्टाद्वारकत्वमुपजीवकताविशेषणमुपात्तमितिध्येयम् । अथवा पुरस्कृतश्चायमिति ग्रन्थ एवं व्याख्येयः अयं निरूप्यतावच्छेदकावच्छिन्नत्वरूपः उत्कर्षः पुरस्कृतः फलस्य स्वरूपस्य चानन्तर्याभिधानप्रयोजकतावच्छेदकतया आदृतः एवं च प्रमितिविभाजकधर्मावच्छिन्नत्वस्य विशिष्यानिवेशान्न दृष्टान्तसौलभ्यमपि बोध्यं। निरूप्यतावच्छेदकं च सर्वत्र विभाजकरूपमेव येन रूपेण विभागः कृतस्तद्रूपावच्छिन्नस्यैव लक्षणादेराकाङ्क्षितत्वात् । यद्यपीत्यादि पूर्ववत् । ननु फलस्यानुमितेर्निरूप्यतावच्छेदकानुमितित्वावच्छेदेन प्रत्यक्षफलोपजीवकत्वेऽपि स्वरूपेऽनुमितिकरणे तादृशप्रत्यक्षप्रमाणोपजीवकत्वमसिद्धमीश्वरज्ञानस्यापि ज्ञानत्वेनानुमितिकरणत्वात्तस्य च नित्यतयाऽनुपजीवकत्वादतः प्रमाणस्यानन्तराभिधाने विभाजकधर्मसमानाधिकरणमुपजीवकत्वमेव नियामकं वाच्यं तच्च न संभवति चक्षुरादौ दीपदानादिगोचरप्रवृत्त्यौपयिकानुमानोपजीवकताया अदृष्टाद्वारकत्वविशेषणेन व्यावृत्तावपि खण्डचक्षुरादिनिष्ठायाश्चक्षुर्घर्षणादिप्रवृत्त्यौपयिकानुमाननिरूपितमहाचक्षुर्नाशादिद्वारकोपजीवकताया अदृष्टाद्वारकतया अनन्तराभिधानव्यभिचारित्वादित्याशङ्कामनुमितिं प्रतीश्वरज्ञानस्य करणत्वनिराकरणेनानुमितिकरणत्वावच्छिन्ने प्रत्यक्षप्रमाणोपजीवकत्वं व्यवस्थापयन्निराकुरुते सर्वमित्यादिना । अनुमितिमित्यादेः पूर्वोक्त एवार्थः तथा च निरूप्यतावच्छेदकरूपावच्छिन्नोपजीवकत्वमेव सर्वत्रानन्तराभिधानप्रयोजकमितिभावः । एतादृशोपजीवकत्वस्य प्रत्यक्षेऽसत्त्वं दर्शयन् शङ्कितव्यभिचारविरहं स्पष्टयति सर्वं पुनरिन्द्रियमिति । मनःश्रवणयोरजन्यत्वादिति तथा च प्रत्यक्षप्रमितिकरणत्वावच्छेदेनाविशेषितमुपजीवकत्वमेव नास्ति सुतरामदृष्टाद्वारकत्वविशेषितं तत् तादृशस्य जन्येऽपि इन्द्रिये क्वचिदेव सत्त्वादिति भावः। यदि परमेश्वरज्ञानस्यापि स्वरूपयोग्यतामात्रेण करणत्वमुपेयते तदा स्वरूपेऽवच्छेदकावच्छेदेनोपजीवकमसिद्धमिति अन्यादृशमेवोपजीवकत्वमनन्तराभिधाननियामकं वाच्यं तच्चानुमाननिरूपितम-

दृष्टद्वारा प्रत्यक्षेऽक्षतमिति व्यभिचार इत्यत आह दृष्टद्वारा वेति। स्वरूपनिष्ठमदृष्टाद्वारकं प्रयोज्यव्यावृत्तं कार्यत्वरूपमुपजीवकत्वमेवादरणीयमित्यर्थः। चक्षुर्घर्षणादिप्रवृत्त्यौपयिकानुमानस्यान्यथासिद्धया चक्षुरादिषु न तत्कार्यत्वमिति भावः॥

एतावतोपजीवकत्वस्यानन्तर्याभिधाननियामकतापक्षं किञ्चित्परिष्कृत्य तं परित्यक्तुकामो दर्शितसामान्यनियमे व्यभिचारमाशङ्कते अथेति।

(दी०) अथोपजीव्यं निरूप्यैवोपजीवकं निरूप्यत इति न नियमः कचित् कार्यं निरूप्यापि कारणनिरूपणादितिचेत् किं चातः न हि सङ्गतिरनन्तराभिधानव्याप्ता। आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः सङ्गतिः जायते च कार्ये कारणे वा ज्ञाते कारणत्वस्य कार्यत्वस्य वा ज्ञानात् किमस्य कारणं कार्यं वेति जिज्ञासा अतस्तयोर्द्वयोरपि सङ्गतित्वमित्यश्चोपजीवकतायास्तुल्यत्वेऽपि न क्षतिरिति मन्तव्यम्।

(गा०) उपजीवकमुपजीव्यनिरूपणानन्तरनिरूपणविषय एवेति नियमो नेत्यर्थः कार्यं निरूप्यापीति कारणनिरूपणात्प्रागेव कार्यनिरूपणादित्यर्थः यथाऽत्रैवानुमानग्रन्थे ऽनुमानात् पूर्वमेवानुमितिर्निरूपितेति भावः। व्यभिचारस्यान्ततस्तत्तदुपजीवकताभेदात्मकविशेषणान्तरप्रक्षेपेण वारणसम्भवेऽप्यप्रयोजकत्वं दुर्वारमेव अनुमानात् पूर्वमनुमितेरिव बाधकाभावेन प्रत्यक्षात्प्रागेवानुमानस्य निरूपणसम्भवात्तावतापि निरूपणीययोस्तयोरुपजीव्योपजीवकभावान्याघातादिति हृदयम्। ज्ञापकत्वरूपहेतुतायाः प्रत्यक्षोपजीवकत्वादितिपक्षस्यर्थतोपगम एव दर्शितनियमाभावे विरुध्यते स्वज्ञानजन्याजिज्ञासाद्वारा प्रयोजकत्वरूपं हेतुत्वञ्च नियमाभावेऽप्यविरुद्धमेवेत्याशयेन समाधत्ते किं चात इति। अतो दर्शितनियमाभावात्किमनिष्टं न किञ्चिदपीत्यर्थः। नन्वेवमुपजीवकत्वस्य सङ्गतित्वानुपपत्तिः सामान्यतोऽनन्तराभिधानव्याप्यस्यैव सङ्गतित्वादित्यत आह न हीति। सङ्गतित्वम् अनन्तराभिधाननिरूपितदर्शितप्रकारसामान्यव्याप्तिनियतं यतो नेत्यर्थः। अत्र एतद्

घ कुतं इत्याशङ्कायां यद्यदुपजीवकं भवति तत् तन्निरूपणानन्तरनिरूपणविषय इति व्याप्तिविरहेऽपि उपजीवकतायाः सङ्गतित्वमभिधास्यमानस्तस्यां सङ्गतित्वाभावस्वीकारनिराकरणाय तत्साधारणसङ्गतिलक्षणमाह आनन्तर्येति । हि हेतौ अनन्तरमेवानन्तर्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् यन्निरूपणाव्यवहितोत्तरनिरूपणप्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयो यो धर्मः स तन्निरूपितसङ्गतिरित्यर्थः। उपजीवकत्वादावेतल्लक्षणसङ्गमनप्रकारो ग्रन्थकृताग्रे दर्शयिष्यते। प्रयोजकान्तानुपादाने सङ्गतित्वस्य निरूपकविशेषनियन्त्रितत्वानुपपत्तिः कथञ्चित्तदुपपादने यथाऽस्य किमुपजीवकमित्यादिजिज्ञासां प्रति उपजीवकत्वादिज्ञानं हेतुः घटादिजिज्ञासायां घटत्वादिधीस्तथेति तद्विषयघटत्वादेः प्रत्यक्षादिसङ्गतित्ववारणाय प्रयोजकान्तम्। अथ यत्र प्रत्यक्षादौ निरूपिते स्वसामग्रीवशात्को घट इति कस्यचिज्जिज्ञासया केनचिद्घटो निरूपितस्तादृशनिरूपणप्रयोजकतथाविधजिज्ञासामादाय घटत्वादावपि प्रत्यक्षादिसङ्गतित्वप्रसङ्गः प्रयोजकान्तमुपादायापि न शक्यते वारयितुं यदि चैवं सति तत्र घटत्वादेः सङ्गतित्वमिष्टमेव प्रसङ्गमध्ये तस्यान्तर्भावनीयत्वाच्च न सङ्गतेः षोढात्वव्याघातः अन्यथा तत्र सङ्गत्यन्तराभावेन . तादृशनिरूपणस्यासम्बद्धप्रलापतापत्तेः न ह्याकाङ्क्षिताभिधानं तथेत्युच्यते तदा प्रयोजकान्तमनर्थकमितिचेन्न । यन्निरूपणानन्तरं कदाचिदपि कस्यचिद्यद्धर्मावान्तरधर्मप्रकारकज्ञानेच्छा न जाता अपि तु कालान्तरे जायते तदा तस्य सङ्गतित्ववारणायैव प्रयोजकान्तोपादानात् न च कालस्यानवधित्वात्पुंसां चासंख्यत्वात् तादृशधर्म, एव दुर्लभ इति वाच्यं तादृशधर्मसम्भावनया ऽतिव्याप्तिसन्देहेन तद्वारकविशेषणदानौचित्यात् । वस्तुतस्तु जिज्ञासुमेकं पुरुषं प्रति सङ्गतमपि अतादृशमन्यं प्रत्यसङ्गतमिति यं प्रतिपादयितुमानन्तर्याभिधानं तादृशाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थस्तं प्रति सङ्गतिरिति पुरुषविशेषनियन्त्रितमेव सङ्गतित्वं निर्वाच्यं तथा च यन्निरूपणानन्तरं यद्धर्मावच्छिन्नस्य विशेषजिज्ञासा यस्य पुंसो न जाता ऽपि तु अन्याभिधानानन्तरमेव तस्य धर्मस्य तं प्रति सङ्गतित्ववारणाय तदुपादानमावश्यकम्। आनन्तर्याभिधानप्रयोज-

कज्ञानविषयत्वस्य निवेशने घटादिकं निरूप्य प्रतिपाद्यस्य *जिज्ञासामन्तरेणैव यत्रासम्बद्धघटाद्यभिधानं केनचित्कृतं तत्रास्य घटज्ञानं भवत्वित्याकारकेच्छाजनकीभूतवक्तृघटादिज्ञानविषयघटत्वादावतिप्रसङ्गः तादृशज्ञानस्यापि घटादिबुबोधयिषाद्वारा घटाद्यभिधानानन्तरघटाभिधानप्रयोजकत्वाद्तस्तत्प्रयोजकजिज्ञासाजनकेति(१)। परकीयज्ञानगोचरेच्छा च न जिज्ञासा ज्ञातुमिच्छा जिज्ञासेति व्युत्पत्त्या स्वीयज्ञानगोचरेच्छाया एव तत्त्वात् जिज्ञासाया आनन्तर्याभिधानप्रयोजकत्वं च शब्दप्रयोगात्मकाभिधानानुकूलवक्तृबुबोधयिषानुकूलं यत्प्रतिपाद्यज्ञानस्यासिद्धत्वज्ञानं तत्सम्पादकीभूतस्यासिद्धत्वव्याप्येच्छाविषयत्वप्रतिपादकस्य किं प्रत्यक्षोपजीवकमित्यादिप्रश्नवाक्यस्य व्यवहर्तव्यज्ञानविधया निर्वाहकं यज्जिज्ञासाप्रत्यक्षं विषयविधया तदानुकूल्येन । न च जिज्ञासाजनकत्वोपादानेऽपि उक्तस्थले कथञ्चिद्वक्तृघटादिज्ञानानुकूलघटजिज्ञासाजनकज्ञानविषयेऽतिप्रसङ्गो दुर्वार एवेति वाच्यं प्रतिपाद्यपुरुषीयजिज्ञासाया एव तल्लक्षणघटकत्वात्। अथैवमपि अनुमानाद्यनन्तरोपमानादिनिरूपणे यथा उपमानजिज्ञासायाः प्रयोजकत्वं तथा तादृशजिज्ञासानुकूलानुमानादिज्ञानसम्पादनेनानुमानादिजिज्ञासाया अपीति तज्जनकज्ञानविषयानुमानादिनिष्ठप्रत्यक्षोपजीवकत्वादेरप्यनुमानादिनिरूपितसङ्गतित्वापत्तिरिति चेन्न । जिज्ञासामद्वारीकृत्य प्रयोजकत्वस्यैव विवक्षणीयत्वात् प्रतिपाद्यपुरुषज्ञानविषयिणी वक्तुरिच्छा च न जिज्ञासा अतस्तस्याः प्रतिपाद्यजिज्ञासाद्वारत्वेऽपि न क्षतिः। यदभिधानानन्तर्याभिधानप्रयोजकजिज्ञासायां तदभिधानप्रयोज्यत्वमपि निवेश्यम् अन्यथा घटपटनिरूपणानन्तरं यत्र घटसम्बन्धेन दण्डादिस्मरणे को दण्ड इत्यादिजिज्ञासया दण्डादिनिरूपणं तत्र तादृशजिज्ञासाजनक-

---

(१) अथात्र आनन्तर्याभिधानप्रयोजकज्ञाने प्रतिपाद्यपुरुषीयत्वनिवेशनादेवोक्तदोषव्युदाससम्भवे जिज्ञासापदवैयर्थ्यमिति चेन्न । यत्र वक्तुर्घटज्ञानं प्रतिपाद्यपुरुषीयघटादिज्ञानजनकत्वबोधयिषयैव तत्र घटाभिधानानन्तरघटाभिधानप्रयोजकीभूत वक्तृबुबोधयिषानुकूलघटज्ञानं तादृशपटज्ञानजनकत्वमिति तस्य तत्त्वापत्तेः । न च तथापि आनन्तर्याभिधानप्रयोजकप्रतिपाद्यपुरुषीयघटज्ञानानुकूलजिज्ञासाजनकघटत्वादावतिव्याप्तिरिति वाच्यं जिज्ञासया अनिरूपितत्वस्य प्रयोजकत्वे तस्य विशेषणत्वादिति ध्येयम् ।

ज्ञानविषयस्य पटनिरूपितसङ्गतित्वप्रसङ्गात् (१)जिज्ञासाजनकसुखा-
दिरूपफलेच्छाविषयेऽतिव्याप्तिवारणाय ज्ञानपदम् । अथैवमपि ज्ञान-
निष्ठेष्टसाधनत्वस्यापि जिज्ञासाजनकज्ञानविषयत्वात्तत्रातिव्याप्तिः
न च तस्य कारणतारूपसङ्गतित्वेन लक्ष्यतैवेति वाच्यं निरू-
प्यनिष्ठकारणत्वादीनामेव सङ्गतित्वादनुमानादिज्ञाननिष्ठेष्टसाधन-
तायाः प्रत्यक्षानुमानादिसङ्गतित्वविरहात् न च जिज्ञासां प्रत्यसा-
धारणकारणत्वमेव निवेशनीयम् इष्टसाधनताज्ञानं तु उपायेच्छामा-
त्रं प्रत्येव जनकमिति नैतस्य जिज्ञासायामसाधारण्यमिति न त-
ज्जनकतामादायेष्टसाधनत्वेऽतिव्याप्तिरिति वाच्यं जिज्ञासायामसा-
धारणकारणत्वं हि जिज्ञासात्वघटितधर्मावच्छिन्ननिरूपितकारणत्वं
तच्च ज्ञानगोचरेष्टसाधनताज्ञानस्याप्यक्षतमेव ज्ञानगोचरेच्छात्वस्यैव
तज्जन्यतावच्छेदकत्वात् एकोपायधर्मिकेष्टसाधनताज्ञानादन्योपाय-
विषयकेच्छानुदयादुपायविशेषविषयकत्वमन्तर्भाव्यैव इष्टसाधनता-
धिय उपायेच्छाहेतुत्वकल्पनात् यदि च समानविशेष्यताप्रत्यास-
त्त्यैवेच्छां प्रति इष्टसाधनताज्ञानस्य हेतुत्वकल्पनेनोक्तातिप्रसङ्गवार
णसम्भवाद्विशिष्य ज्ञानादिरूपोपायविषयकत्वमिष्टसाधनताधीजन्य-
तावच्छेदककोटौ न निवेश्यते तथा च जिज्ञासात्वघटितधर्मो नेष्ट-
साधनताज्ञानजन्यतावच्छेदकः फलसमानविषयकान्यवृत्तित्वस्य
जनकताविशेषणत्वाद्वा इष्टसाधनताज्ञानजनकताव्यावृत्तिरित्युच्यते
तदाऽसम्भवः इष्टसाधनताज्ञानानात्मकस्य उपजीवकत्वादिप्रकारक-
ज्ञानस्योपजीवकत्वजिज्ञासाजनकतायां प्रमाणाभावेन निरुक्तजनक-
ताया एवाप्रसिद्धेः न च सामान्यधर्मज्ञानस्य विशेषजिज्ञासां प्रति
कारणत्वान्तरमन्वयव्यतिरेकसिद्धमशक्यापह्नवमेव घटत्वादिज्ञानं
विना को घट इत्यादिप्रश्नमूलीभूताया अवान्तरधर्मप्रकारेण घटा-
दिज्ञानेच्छाया अनुत्पादस्यानुभवसिद्धत्वादिति वाच्यं विशेष-
धर्मप्रकारेण घटज्ञानं भवत्वित्याकारकतादृशजिज्ञासाजनकतादृश-
ज्ञानत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानस्य घटत्वादिरूपसामान्यधर्म-
प्रकारकतानियमात् सामान्यधर्मप्रकारकज्ञानाभावस्थले तादृशेष्ट-
साधनताज्ञानाभावनियमात् तत एव तथाविधेच्छानुत्पादापत्ते-

(१) जिज्ञासायां तदभिधानमयोग्यत्वनिवेशपक्षे जिज्ञासामङ्गीकृत्येति विशेषणं नास्तीति बोध्यम् ।

दित्युक्त्या सामान्यधर्मप्रकारकज्ञानस्य कारणत्वान्तरासिद्धेरिति
चेन्न । जनकज्ञानविषयेत्यनेन जनकीभूतेष्टसाधनताज्ञानीयज्ञाननिष्ठ
विशेष्यतायां विषयितासम्बन्धेन यदवच्छेदकत्वं तन्निरूपितावच्छे-
दकविषयताविशेषस्य विवक्षितत्वात् तादृशविषयताविशेषलाभार्थं
धर्मपदं किमस्योपजीवकमित्यादिजिज्ञासाप्रयोजकीभूतोपजीवक-
त्वाद्येकदेशोत्तरवर्तित्वादिवारणाय तादृशविषयतापर्याप्त्यधि
करणत्व निवेशस्य तल्लाभायैव वा तत् । यद्यपि जिज्ञासानिरूपितज्ञा
ननिष्ठविशेष्यतावच्छेदकतावच्छेदकत्वविशेषस्यापि लघोर्लक्षणत्व
सम्भवति तथाप्यत्र लक्षणे तदनिवेशान्न वैयर्थ्यावकाशः इच्छादीना
माचितमण्डनन्यायेन जनकज्ञानविषयतयैव सविषयकत्वमिति प्रा
चीनमताभिप्रायेणैव वा जनकज्ञाननिवेशेन विषयनिष्ठधर्मितावच्छे
दकतया येन सम्बन्धेनावच्छेदकीभूतो यो धर्मस्तेन सम्बन्धेन तद्व-
त्त्वमेव सङ्गतित्वव्यवहारनियामकं तेन स्वरूपादिसम्बन्धेनोपजीव
कत्वादिप्रकारिका या उपजीवकज्ञानं भवतीत्याकारकजिज्ञासा त
द्विषयीभूतोपजीवकत्वादेः कालिकादिसम्बन्धेनाधिकरणे काला-
दौ नातिप्रसङ्गः । जायते चेति । कार्ये ज्ञाते कारणत्वस्य ज्ञाना
त्कारणज्ञानमिष्टसाधनमित्याकारककारणत्वविषयकज्ञानात् किमस्य
कारणमिति प्रश्नप्रयोजिका कारणे ज्ञाते कार्यत्वस्य ज्ञानात् कार्य
ज्ञानमिष्टसाधनमिति कार्यत्वविषयकज्ञानात् किमस्य कार्यमिति
प्रश्नमूलीभूता जिज्ञासा जायते अत कार्यकारणाभिधानानन्तरं
तत्कारणकार्याभिधानप्रयोजकतादृशतादृशजिज्ञासाजनकज्ञानविषय
त्वात् कारणत्वस्य कार्यत्वस्य च सङ्गतित्वं न तु कार्यत्वस्यैवे-
त्यर्थः । प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा । निर्वाहकैककार्यैक्ये
षोढा सङ्गतिरिष्यते इति सङ्गतिपरिगणने हेतुतापदमजहत्स्वा
र्थवृत्त्या कार्यत्वकारणत्वोभयसाधारणेन केनचिद्रूपेण तदुभयपर
मिति नाधिक्यमिति भावः । अत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग इति
प्रसङ्गलक्षणं तत्र स्मृतस्य पूर्वाभिहितवस्तुसम्बन्धेन स्मृतस्य उपे
क्षानर्हत्वं द्वेष्यज्ञानविषयताविरोधिरूपं जिज्ञासाविषयतावच्छेदक
रूपमिति यावत् स्मृतत्वस्याभिधाने जिज्ञासाया आनन्तर्याभिधा-
नप्रयोजकताऽभावे उपोद्घातादिपञ्चकभिन्नत्वे सतीति पूरणीय त
था, उपोद्घातादिपञ्चकभिन्ना सङ्गतिः प्रसङ्ग इति पर्यवसितार्थः तें

नाधेयत्वाधिकरणत्वघटत्वादीनामपि स्थलविशेषे सङ्गतिसामान्यलक्षणाक्रान्ततया प्रसङ्गाद्यनन्तर्भावे उक्तसङ्गतिपरिगणनविरोध इति निरस्तं तेषां सर्वेषामेव यथाव्याख्यातप्रसङ्गसङ्गतिलक्षणाक्रान्ततया तत्रैवान्तर्भावात् उक्तरूपं च विभाजकमात्रमतस्तथाविधरूपेण तादृशधर्माणां निरूपणप्रयोजकजिज्ञासाविषयतावच्छेदकत्वविरहेऽपि न क्षतिः एवं सङ्गत्यन्तरेऽपि बोध्यं यद्यपि भेदमनिवेश्य सर्वा सङ्गतिः प्रसङ्ग एवान्तर्भावयितुं शक्यते तथापि विभाजकस्य स्वतन्त्रेच्छतया न पर्यनुयोगावसरः उपोद्घातश्च प्रकृतोपपादकत्वं तदुक्तं चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा इति प्रकृतसिद्ध्यर्थां प्रकृतोपपादकविषयिणीं किमस्योपपादकमिति चिन्ताम् उपोद्घातमुपोद्घातसङ्गतिनिर्वाहिकां विदुरित्यर्थः तादृशजिज्ञासामादायैवोपपादकत्वे सङ्गतिलक्षणसमन्वयादिति भावः उपपादकत्वं च निर्वाहकत्वं तच्च क्वचित्प्रकृतघटकसाधकतया क्वचिदन्यथापि तत्र विशिष्टपरामर्शत्वस्यानुमितिजनकतावच्छेदकत्वम् अनुमितिलक्षणघटकं तेषां तदुपपादकत्वं तेन विना तद्घटितलक्षणानिर्वाहादिति युक्त्यभिधानरूपतद्व्यवस्थापनेन उपोद्घातसङ्गतिः क्वचित्प्रकृतघटकत्वमेव तद् यथा आचारप्रयोजकत्वं वेदस्य साक्षादप्रवर्तकस्य वाक्यार्थज्ञानजनकत्वगर्भमिति प्रवर्तकज्ञानमाचारप्रयोजकताघटकत्वेन प्रकृतोपपादकमित्युपोद्घातसङ्गत्या विधिवादे प्रवर्तकज्ञाननिरूपणं सामान्यप्रत्यासत्तेरनुमितिपूर्वे नियमतो विशिष्टपरामर्शनिर्वाहकतया विशिष्टपरामर्शत्वावच्छिन्नानुमितिकारणतानिर्वाहकत्वादेव तद्घटितानुमितिलक्षणोपपादकत्वं न तु तादृशलक्षणाघटकतया एवमन्यत्रापि द्विविधमुपपादकत्वं यथा सम्भवमूह्यम् । अवसरसङ्गतिरग्रे विचारणीया हेतुता विवेचितैव । निर्वाहकैक्यम् एकनिर्वाहकनिर्वाह्यत्वं तदन्यत्वे सति तन्निर्वाहकनिर्वाह्यत्वमिति यावत् कार्यैक्यम् एककार्यप्रयोजकत्वं तदन्यत्वे सति तत्प्रयोज्यकार्यप्रयोजकत्वमिति यावत् निर्वाहकैककार्यत्वे इति पाठे निर्वाहकत्वमेकनिर्वाह्यनिर्वाहकत्वं निर्वाहकत्वं च प्रयोजकत्वम् एककार्यत्वम् एककारणकार्यत्वम् । एतेन यथाश्रुतनिर्वाहकत्वस्योपपादकतारूपत्वे उपोद्घातेन गतार्थत्वात्प्रयोजकतारूपत्वे हेतुत्वान्तर्भाव इति परास्तं सर्वत्र तत्तत्प्रकारकजिज्ञासामादाय लक्षणसमन्वयः कार्य इत्यलं विस्तरेण । इदं त्ववधातव्यं किं प्रत्यक्षो-

पजीवकमिति जिज्ञासया नानुमानमत्र निरूपितमपि तु किमनुमान-मिति जिज्ञासयैव तथा सत्यं चानुमानत्वरूपलक्ष्यतावच्छेदकविशिष्ट-लक्षणप्रतिपादकस्य तत्करणमनुमानमित्युक्तस्य सङ्गतेः अन्य-यार्थान्तरप्रसङ्गात् किं प्रत्यक्षोपजीवकमिति जिज्ञासायाः प्रत्य-क्षोपजीवित्वविशिष्टेऽनुमितिकरणत्वरूपविशेषधर्मबोधकवाक्याद-वनिवृत्तेः तथा चानन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्व-रूपसङ्गतिरत्र प्रकृते नोपजीवकत्वे सम्भवतीति तादृशजिज्ञासाजनकनि-रूपकतावच्छेदकधर्मप्रकारकस्मरणप्रयोजकनिरूप्यनिष्ठ सम्बन्ध सङ्गतिरित्येव लक्षणं युक्तं प्रत्यक्षानुमानपदार्थयोरुपजीव्योपजीवक-भावरूपसम्बन्धमात्रादनुमानपदार्थत्वरूपप्रकृतलक्ष्यतावच्छेदकप्रका-रेणानुमानस्मरणादनुमानपदार्थः क इति जिज्ञासयाऽनुमितिकरण-मनुमानपदार्थ इति निरूपणादुपजीवकत्वे सङ्गतित्वनिर्वाहात् एव सर्वत्र पूर्वापरनिरूपणविषययोः सम्बन्ध एव सङ्गतिर्न तु निरूप्यता-वच्छेदकधर्मः एतदनुसारेणैव प्रसङ्गादिस्वरूपाण्यूह्यानीति । इत्थ-ञ्चोपजीवकत्वस्यानन्तर्याभिधानाव्याप्यस्यापि सङ्गतित्वे च तुल्य-त्वेऽपि प्रत्यक्षसाधारण्येऽपि न व्यभिचार इति केचित् ॥

ननु न्यूनतापरिहारायानुमानोपमानयोरपि सङ्गतिप्रदर्शनमुचि-तमिति बहुवादिसम्मतत्वादुपमानात्प्रागित्यपि सङ्गतिप्रदर्शनपरमेव भविष्यति सा च कथमुपमानग्रन्थ एव न प्रदर्शितेत्याशङ्कायामाह लाघवायेति ॥

(दी०) लाघवायैवोपमानस्य सङ्गतिं दर्शयति बहुवादीति । सुगमिद्धरूपा निरभ्रीयाल्पत्वादिविप्रतिपत्तिकत्वेन सुप्रतिपद-तया चानुमान एव व्युत्पित्सोः प्रथम जिज्ञासा नोपमानेऽप्रसि-द्धत्वात् निरभ्रीयत्वहुत्वादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च । अन्ययोगिनां रीतिमनुरुध्य चेदं तेन प्रथमं कस्यचित् दुरूहे जि-ज्ञासोदयेऽपि न क्षतिः । तथा चावसरसङ्गत्योपमाननिरूपण-मिति भावः । यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे ॥

(गा०) अनुमानस्येवोपमानस्यापि प्रत्यक्षसम्भवतया प्रत्यक्षनिरूप-णानन्तर्योनोपमानस्य किं न निरूपितमुपमाननिरूपणानन्तरमप्यनु-

माननिरूपणसम्भवादिति क्रमनियामकाकाङ्क्षाया इदानीमुदयात्तन्निवृत्तये क्रमनियामकमभिधातव्यं तावतैव सङ्गतिलाभोऽपि भवतीति ग्रन्थान्तरे सङ्गतिप्रदर्शनापेक्षया अत्र क्रमनियामकाभिधानस्य सङ्गतिपरत्वे लाघवमिति भावः । बहुवादिसम्मतत्वस्य प्राथमिकजिज्ञासानिर्वाहकत्वेन प्राङ्निरूपणप्रयोजकत्वं घटयति सुप्रसिद्धतयेति सुप्रसिद्धत्वसुप्रतिपदत्वे जिज्ञासाप्राथम्ये हेतू विप्रतिपत्तिकत्वेनेत्यन्तं सुप्रतिपदत्वे हेतुः अनुमान एवेति स्वोक्तैवकारार्थं विवृणोति नोपमान इति अप्रसिद्धत्वदुरूहत्वे प्रथमतो जिज्ञासानुत्पादे हेतू विप्रतिपत्तिकत्वेनेत्यन्तं दुरूहत्वे हेतुः सुप्रसिद्धार्थस्य बहुधा प्रस्तावो भवति अतस्तज्ज्ञानस्य भूयानुपयोगः न त्वप्रसिद्धार्थज्ञानस्येति तज्ज्ञानस्य बह्वायासानुबन्धित्वेन प्रथमतो बलवान् द्वेषो भवति सूचीकटाहन्यायादिति तेन तत्सामग्र्या या प्रतिबन्धात्र तादृशार्थे प्रथमतो जिज्ञासेति भावः। औत्सर्गिकीं प्रायिकीम् इदं दुरूहत्वज्ञानस्य बलवद्द्वेषसम्पादकतया जिज्ञासाविरोधित्वं। कस्यचिदिति तज्ज्ञानाधीनसुखदुःखयोर्न्यूनाधिकभावज्ञानरहितस्येत्यादिः । नन्वेतावता क्रमनियामकत्वलाभेऽपि सङ्गतिर्न लब्धैव उक्तरूपस्य सङ्गतित्वविरहादित्याकाङ्क्षायामाह तथा चेति । अनुमाने उपमानापेक्षया प्राथमिकजिज्ञासाविषयत्वप्रयोजकबहुवादिसम्मतत्वकथनेन विरोधिभूतानुमानजिज्ञासाया विषयसिद्ध्या निवृत्तौ सत्यामुपमानं निरूपणीयमिति सूचनादिति भावः। ननु विरोधिजिज्ञासानिवृत्तिरवसरः स च नोपमानाभिधानप्रयोजकजिज्ञासाविषयतावच्छेदक इति कथं तत्र दर्शितसङ्गतिलक्षणसमन्वय इत्यत आह यथा चेति । तथा व्यक्तमिति आकरे मूलसूत्रे। अयमाशयः विरोधिजिज्ञासानिवृत्तिर्नावसरः अपितु तन्निवृत्तौ सत्यामवश्यवक्तव्यत्वमेव तत्र च किमिदानीं वक्तव्यमिति जिज्ञासाजनकज्ञानविषयतामादाय लक्षणसमन्वयः यद्यपि तादृशजिज्ञासाविषयताया जिज्ञासानिवृत्तिघटितं नावच्छेदकमिति तेन रूपेण सङ्गतित्वं नास्ति अपि तु निवृत्त्युपलक्षिततत्तत्कालवक्तव्यत्वरूपेणैव तथापि न क्षतिः यादृशस्य सङ्गतित्वं तादृशस्यैव विभाजकत्वमित्यनियमात् जिज्ञासानिवृत्तेर्विभाजकधर्मघटकत्वे बाधकाभावादिति ॥

सार्वभौमानां मतमाह शब्दान्तरेति ।

(दी०) शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्तकत्वबोधकं सामान्यतो दृष्टमन्ततो ऽदृष्टजनकप्रवृत्त्यौपयिकं चानुमानमपेक्षते निखिलमेवोपमानमितीहाप्युपजीवकत्वमेव सङ्गतिरित्यपि केचित्।

(गा०) द्वितीयान्तस्यानुमानमित्यस्य प्रथमोक्त तथाविधत्रय विशेषण शब्दान्तरसमयग्राहकमिति अतिदेशवाक्यस्थस्योपमानग्राह्यशक्तिकगवयादिपदैर्भिन्नगवादिपदस्य शक्तिग्राहक गोपद गोत्वविशिष्टवाचक तद्विशिष्टविषयकशक्तिप्रमाश्रयजन्यशाब्दबोधजनकत्वादित्याकारकमित्यर्थं तादृशानुमान विना शक्तग्रहेणातिदेशवाक्यजन्यशाब्दबुद्धेरनुत्पत्त्या उपमानानवतारात्तस्योपमाने ऽपेक्षणायतेति भाव सप्रवृत्तिनिमित्तकत्वेति । गवयपद सप्रवृत्तिनिमित्तक साधुपदत्वादिति सामान्यतो गवयत्वप्रवृत्तिनिमित्तकत्वसाधकमित्यर्थं ईदृशानुमानेनैवोपमानाप्रामाण्यवादिनस्तत्फल विशेषत प्रवृत्तिनिमित्तपरिच्छेदमुपपादयन्ति गोसादृश्यगवयत्वजातेश्च प्रत्यक्षत उपस्थितौ सादृश्यस्य प्रवृत्तिनिमित्तत्वे गौरव जातिविशेषस्य तथात्वे लाघवमिति लाघवप्रतिसन्धानेन सामान्यत सप्रवृत्तिनिमित्तकत्वस्य व्याप्यतया गृहीतादपि लिङ्गाद्विशेषतो जातिविशेषप्रवृत्तिनिमित्तकत्वानुमितिसम्भवात्। सिद्धान्तिभिस्तु व्यापकतावच्छेदकेनैव रूपेण साध्यमनुमितौ भासत इति नियममवलम्ब्य उपमानप्रामाण्यव्यवस्थाप्यते उपमानेन च गवयादिपदे विशेषतो गवयत्वादिप्रवृत्तिनिमित्तकत्वग्रह गवयत्वादिप्रकारकसादृश्यज्ञानात्तद्रूपेण पदवाच्यत्वे गृह्यमाणे तदवच्छेदेनैव ग्रहात्सादृश्यग्रहेऽपि गवयपदशक्तिस्तस्य किञ्चिद्धर्मावच्छिन्ना तत्रानतिप्रसक्तस्य गोसादृश्यादेस्तद्व्यक्तित्वानां वावच्छेदकत्वे गौरव जातिविशेषस्य तथात्वे लाघवमित्याकारकस्तर्कोऽपेक्षित अन्यथा तद्व्यक्तित्वादिप्रकारेणापि सादृश्यज्ञानसम्भवात्तेषामपि प्रवृत्तिनिमित्तता सिद्धिप्रसङ्गात्तादृशलाघवज्ञानसपादनेन दर्शितसामान्यतो दृष्टस्यापि तथाविधोपमानोपजीव्यत्वमित्यवधेयम्। उक्तानुमानयो सादृश्यज्ञानरूपोपमानस्वरूपानुपजीव्यतया तस्याप्युपजीव्यमनुमानमाह अन्तत इति। अदृष्टेति अदृष्टजनिका विहितक्रियादिगोचरप्रवृत्तिस्तत्प्रयोजक समयादिपरिच्छेदक मनुमानमित्यर्थं उपमानस्याप्यदृष्टजन्यत्वादिति भाव । निखिलोपमानस्यैव निरूपणीयतया

सङ्गतिमत्त्वमपेक्षितमतो निखिलमित्युक्तम्। अनुमानेऽप्यदृष्टद्वारा समयपरिच्छेदकोपमानोपजीवकतायाः क्वचित्सत्त्वादुपमाननिष्ठोपजीवकतायास्ततो विशेषप्रदर्शनाय निखिलमिति तु न सत्। अनादौ संसारेऽतिपरम्परया कदाचित्कस्यचित् शक्तिपरिच्छेदकोपमानस्य मूलतासम्भवेन तादृशविशेषासम्भवात् यत्र प्रत्यक्षादिरूपकृतिसाध्यताज्ञानात् प्रवृत्तिरुपमानजनकीभूतादृष्टजनिका तत्रानुमानोपजीव्यताया अपि उक्तरीत्यैवोपपादनीयत्वात् केचिदित्यस्वरससूचनाय स च बहुवादिसम्मतत्वकथनस्य उपजीवकत्वसङ्गतिलाभासम्पादकतया तस्यानुपयोगितापातात् न चोपमानापेक्षया ऽनुमानस्य बहुवादिसम्मतत्वोक्तावुपमानं कणादादिभिरनुमान एवान्तर्भावितमिति लभ्यते तावता तन्मतनिराकरणायानुमानाभिन्नत्वेनोपमानं निरूपणीयमित्यस्य लाभेनानुमाननिरूपणोपजीवकताया उपमाननिरूपणे लाभ इति तदुक्तेरुपजीवकत्वसङ्गतिलाभोपयोगितेतिवाच्यं निरूपणयोरुपजीव्योपजीवकभावस्यासङ्गतित्वात् क्रमानियामकलाभायैव तदुक्तिर्न तु सङ्गतिलाभायेति चेत् तथापि उपमानसङ्गत्यप्रदर्शनेन मूले न्यूनताया दुर्वारत्वात्॥

स्वमते सङ्गतेर्निरूपणपौर्वापर्यानियामकतया तन्नियामकापेक्षायां निरूपणयोः कार्यकारणभावं दर्शयति सम्भवति चेति॥

(दी०) सम्भवति चेह निरूपणयोरपि कार्यकारणभावः अथ तत्पूर्वकमित्यादिसूत्रे प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणात् तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शात् अत्रापि सहचारप्रत्यक्षजन्यत्वादिना तन्निरूपणात् तस्य च प्रत्यक्षनिरूपणाधीनत्वात्। एवमनुमानभिन्नत्वेनोपमाननिरूपणमप्यनुमाननिरूपणापेक्षमिति सङ्क्षेपः॥

(गा०) इह प्रत्यक्षानुमानयोः सप्तम्यर्थो निरूपणान्वयि विषयत्वं निरूपणयोः निरूपणपदार्थघटकज्ञानयोः अथ तत्पूर्वकमित्यादीति। अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं चेति विभाजकसूत्रमित्यर्थः। तत्र च पूर्ववदित्यादेः कारणलिङ्गकं कार्यलिङ्गकं तदन्यलिङ्गकं चेत्यर्थः। तस्य चेति प्रत्य-

ज्ञघटितविशेषणपुरस्कारेणानुमाननिरूपणस्येत्यर्थः । प्रत्यक्षनिरूपणे ति । विशिष्टज्ञानस्य विशेषणज्ञानाधीनत्वादिति भावः । अनुमानमि ध्यत्वेनेति वैशेषिकादिमतनिराकरणाय तेन रूपेणैवोपमानस्य निरू- पणीयत्वादितिभावः ॥

(दी०) तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरू- पणीये करणस्य क्रियाभेदभिन्नमूर्तिकतया क्रियालक्षणपूर्वकं तल्लक्षणमाह व्याप्तीत्यादिना ॥

(चि०) तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते ॥

(गा०) तत्रेत्यादिराहेत्यन्त एको ग्रन्थः । तत्र प्रतिज्ञाया सप्तम्यर्थो निरूपणान्वयि विषयत्वं । लक्षणेनेति लक्षणमितरभेदानुमापकरूपं स्वरूपं लक्षणप्रदोपयोगि अनुमितिकरणतावच्छेदकरूपं तच्च लिङ्गपरामर्शत्वं प्रामाण्यं प्रत्यक्षाद्यतिरिक्तप्रमितिकरणत्वम् आदिपदा द्विभागस्वरूपपरिग्रहः निरूपणार्थे प्रतिपादनीये तल्लक्षणं अनुमान लक्षणम् आहेत्यत्रास्यान्वयः सतिसप्तम्या प्रयोजकत्वमर्थः लक्षणाभि धानस्य निरूपणात्मकतया प्रयोज्यप्रयोजकभावासम्भवेऽपि सवि षयत्वे इत्यादिन्यायान्निरूपणघटकप्रतिपत्त्यर्थे लक्षणाभिधानस्य प्रयोज्यप्रयोजकभावे तात्पर्यं स्वरूपादिप्रतिपत्त्यापि तदभिधानप्र योजकत्वाल्लोप्यापकतया लक्षणाभिधानस्य प्रयोजकत्वं बोध्यम् । नतु प्रमाणलक्षणात् प्रागेव कथं प्रमा लक्षिता न च प्रमाणलक्षणस्य प्रमाघटिततया सामर्थ्यविज्ञाय प्रमाज्ञानं तु शक्यत इति प्रमालक्षणमा वश्यं वाच्यं तथा चानुमितिलक्षणघटकव्याप्त्यादेरपि प्रथमं नि- रूपणीयत्वेऽपि अनुमितिलक्षणमात्रस्य बीजान्तरमाह कर- णस्येति । अनुमानस्यापि क्रियाया अनुमितेर्भेदः प्रत्यक्षादिज्ञा नादिव प्रत्यक्षकरणताभिन्न प्रमा णान्तरपदार्थोऽपि प्रमित्यन्तरकरणात्मकः स्वरूपं तल्लक्षणं तथा च प्रत्यक्षानन्तरमनुमानं निरूप्यत इति भावः । प्रत्यक्षतो ऽनुमानं प्रमाणान्तरमिति लाभात् तत्र कपर्दानिरूपणं तत्प्रमा-

णान्तरतानिर्वाहकप्रमितिवैलक्षण्यलाभाय तल्लक्षणाभिधानमेव प्रथमतः कृतमिति भावः(१) ॥

केचित्तु तत्रेति मूलपाठधारणं लक्षणेत्यादि निरूपणीय इत्यन्तं तस्य व्याख्येति तत्रानुमाने निरूपणीये इत्युपाध्यायव्याख्यामालोच्य वदन्ति । तदसत् लक्षणस्वरूपप्रामाण्यादिप्रकारकत्वेन निरूपणस्याप्रक्रान्ततया व्याख्यामध्ये तृतीयान्तभागकथनविरोधात्। न च पूरणसंवलितैवेयं व्याख्येति युज्यते तत्पदोपस्थाप्यैकदेशे निरूपणे पूरणीयतृतीयार्थान्वयायोगात् पूरणस्यानुपयुक्तत्वाच्च न च सप्तम्यर्थोऽनुमित्यन्वयि तद्विषयकनिरूपणप्रकारत्वं तल्लाभाय पूरणमुचितमिति वाच्यं तादृशार्थे क्वचिदपि सप्तम्यदर्शनात् मूलस्थतत्पदस्यानुमानपदार्थपरतया घटकन्वस्य निरूपणविषयत्वस्य वा तत्रत्यसप्तम्यर्थत्वात् ॥

यत्तु सतिसप्तम्येवेयं तदर्थः प्रयोजकत्वम् एवं चानुमाननिरूपणानुमितिनिरूपणयोः प्रयोज्यप्रयोजकभावलाभायैव पूरणमिति । तदत्यन्तमसत् निरूपणस्य तत्पदोपस्थाप्यत्वे क्रियात्वाभावेन यस्य च भावेनेति सूत्राविषयतया सतिसप्तम्यनुपपत्तेः न च निरूपणीय इत्यपि पूरणीयमतो नेयमनुपपत्तिरिति वाच्यम् एवमप्यनुमितिनिरूपणस्यानुपस्थिततया तत्र प्रयोजकत्वान्वयासम्भवात् न च मूलेऽनुमितिरित्यनन्तरं निरूप्यत इत्यपि पूरणीयमतो नेयमनुपपत्तिरिति वाच्यं तदकथनेन दीधितिकृतो न्यूनतापातात् लक्षणमध्ये निरूपणप्रतिज्ञान्तरासङ्गतेश्चेत्यलमसदाग्रहेण ॥

उपाध्यायव्याख्यामुपन्यस्यति अत्रेत्यादिना आहुरित्यन्तेन ।

(दी०) अत्र व्याप्तिविशिष्टत्वपक्षधर्मत्वसामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः । कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वात् । ज्ञानपदोपसन्दानेन च बाधिताबाधितसाधारणज्ञानलाभान्न भ्रान्तानुमितावव्याप्तिरित्याहुः ॥

(गा०) अत्र पक्षलक्षणे अर्थ इत्यनेनान्वयः पक्षलक्षणवाक्यप्रतिपा-

(१) क्वचित्त्विति भार० प० १ पु०।

थार्थ इत्यर्थः अथवा व्याचक्षत इत्यर्थकेनाहुरित्यनेनान्वयः। व्याप्तीति व्याप्तिविशिष्टत्वसमानाधिकरणपक्षधर्मत्वावगाहिज्ञानजन्यत्वमित्यर्थः। प्रकृत्यर्थतावच्छेदकरूपमात्रार्थ एव तत्प्रत्ययस्यानुशिष्टत्वात् सामानाधिकरण्यस्यातथाभूतस्य प्राधान्येन ज्ञानान्वयासम्भवाद्यथाश्रुतासङ्गतेः उक्तार्थेऽपि सामानाधिकरण्यान्तं नोपलक्षणं किं तु विशेषणमतो ज्ञानेन समं तस्यान्वयात्केवलपक्षधर्मताविषयकधीनिरासः। अत्रोभयसामानाधिकरण्यावगाहित्वमेकधर्मिण्युभयसम्बन्धावगाहित्वं सम्बन्धसम्बन्धस्यापि विशिष्टज्ञानविषयतायाः प्राचीनैरुपगमात् अनुमितिजनकविशिष्टपरामर्शे व्याप्त्यादिसम्बन्धतया भासमानस्यापि तत्सम्बन्धस्य सम्बन्धो हेतौ भासत इति व्याप्तिवैशिष्ट्यपक्षधर्मत्वयोः सामानाधिकरण्यावगाहिता निर्वहतीति लक्षणसमन्वयः पक्षधर्मता च पक्षानुयोगिको हेतुतावच्छेदकसम्बन्धः न तु पक्षवृत्तित्वं पक्षविशेष्यकपरामर्शस्य पक्षवृत्तितानवगाहित्वात् तत्रापि सम्बन्धतया पक्षनिरूपिताधेयत्वभानोपगमे पक्षस्य प्रकारतापत्तेः न च पक्षानुयोगिकहेतुतावच्छेदकसम्बन्धविषयस्यापि पक्षविशेष्यकपरामर्शे तादृशसम्बन्धस्य सम्बन्धः पक्ष एव भासते व्याप्तिसम्बन्धस्य सम्बन्धश्च हेताविति नैकधर्मिण्युभयसम्बन्धावगाहित्वरूपसामानाधिकरण्यावगाहितानिर्वाह इति शङ्क्यं विशिष्टबुद्धौ विशेष्ये सम्बन्धस्यानुयोगित्वरूपसम्बन्धो विशेषणे च तस्य प्रतियोगित्वरूपसम्बन्धो भासत इति सिद्धान्तात् पक्षविशेष्यकपरामर्शेऽपि हेतौ व्याप्तिप्रतियोगिकसम्बन्धानुयोगित्वस्य पक्षानुयोगिकसम्बन्धप्रतियोगित्वस्य च भानेन एकत्रोभयसम्बन्धावगाहिताया अक्षतत्वात्। न चैवं व्याप्यविशेष्यकपरामर्शासंग्रहस्तत्र हि हेतौ पक्षानुयोगिकसंयोगादिरूपहेतुतावच्छेदकसम्बन्धो न पक्षरूपविशेषणस्य सम्बन्धतया भासते विशेष्ये सम्बन्धानुयोगित्वस्य विशेषणे च तत्प्रतियोगित्वस्य भाननियमात् तादृशज्ञानस्य हेतुपक्षयोर्बाधितसंयोगाद्यनुयोगित्वप्रतियोगित्वावगाहित्वे भ्रमत्वप्रसङ्गात् तद्वैपरीत्ये च विशेष्यविशेषणभाववैपरीत्यप्रसङ्गात् भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वयोरेव विशेषणत्वविशेष्यत्वात्मकत्वात् परं तु स्यानुयोगिकसंयोगादिप्रतियोगित्वरूपमाधेयत्वमेव तथा भासते स च न हेतुतावच्छेदकसम्बन्धः न वा पक्षानुयो-

गिक इति वाच्यं सम्बन्धसम्बन्धतया तत्र संयोगादिरूपहेतुतावच्छेदकसम्बन्धप्रतियोगित्वस्य हेतावभानेऽपि विशेषणीभवत्पक्षसम्बन्धतया तत्र तद्भानादेव एकत्र व्याप्तिवैशिष्ट्यानुयोगित्वपक्षानुयोगिकहेतुतावच्छेदकसम्बन्धप्रतियोगित्वभानेनोभयसामानाधिकरण्यावगाहितानिर्वाहात् । अथवा एतन्मते पक्षविशेष्यकपरामर्श एव सर्वत्रानुमितिहेतुर्लाघवात् । नन्वेवमपि वह्निव्याप्यो धूमः द्रव्यवान् पर्वत इति ज्ञानजन्येऽतिव्याप्तिः तादृशज्ञानस्यापि धूमात्मकैकहेतौ तदुभयसम्बन्धावगाहित्वात् एकविषयतानिरूपितोभयसम्बन्धविषयतापर्यन्तस्य लक्षणवाक्यतोऽलाभात् तद्विवक्षणे च तथाविधव्याप्तिवैशिष्ट्यपक्षसम्बन्धविषयतानिवेशेनैवोपपत्तौ मिश्रोक्तद्वन्द्वोपेक्षाया निर्बीजत्वापत्तेः न चोभयसामानाधिकरण्यमेकनिष्ठापरसामानाधिकरण्यं तथा च पक्षसम्बन्धनिष्ठव्याप्तिवैशिष्ट्यवत्सम्बन्धावगाहिज्ञानजन्यत्वमर्थः तत्सम्बन्धस्तत्प्रतियोगिकत्वमेव उक्तसमूहालम्बनस्य केवलपक्षधर्मतादिज्ञानस्य च वस्तुगत्या यो व्याप्तिवैशिष्ट्यवान् धूमादिः पक्षसम्बन्धनिष्ठतत्प्रतियोगिकत्वावगाहित्वेऽपि न क्षतिः तल्प्रत्ययान्तेन यादृशविशिष्टमुपस्थाप्यते तादृशविशिष्टस्यैव वैशिष्ट्यमवगाहित्वे विवक्षणीयमिति कथितज्ञानस्य च व्याप्त्यादिघटिततादृशविशिष्टनिरूपितविषयिताशून्यत्वेन लक्षणाघटकत्वादिति वाच्यं व्याप्तिविशिष्टहेतुमान् पक्ष इत्येतादृशपरामर्शे संयोगांशे भासमानहेतुप्रतियोगिकत्वनिरूपितविषयितया व्याप्तिवैशिष्ट्यवत्प्रतियोगिकत्वरूपविशिष्टविषयनिरूप्यत्वेऽपि पक्षसम्बन्धनिष्ठत्वस्य विशेषणकोटावप्रविष्टत्वेन तद्घटितोक्तविशिष्टविषयनिरूपितत्वाभावेन तदसंग्रहात् पक्षसम्बन्धनिष्ठत्वस्योपलक्षणत्वे च तदविषयकज्ञानवारणासम्भवात् भावप्रत्ययेन वा अवगाहित्वविशेषणतया एकपदार्थतावच्छेदकनिष्ठापरतत्सामानाधिकरण्यं कथं प्रतिपादनीयं भावरूपार्थ एव तदनुशासनात् प्रकृत्यर्थासाधारणधर्मस्यैव भावार्थत्वात् न हि नीलोत्पलत्वमित्यादौ उत्पलत्वादिनिष्ठनीलिमादिसामानाधिकरण्यं प्रकृत्यर्थासाधारणधर्मः तस्य नीलोत्पलादिरूपप्रकृत्यर्थेऽघर्तमानत्वात् । न चैकपदार्थनिष्ठापरपदार्थतावच्छेदकसम्बन्ध एव पदार्थतावच्छेदकद्वयसामानाधिकरण्यं प्रकृते च पक्षसम्बन्धप्रतियोगिनिष्ठव्याप्तिवै-

शिष्टत्वानुयोगित्वमेव तथा तच्च प्रकृत्यर्थासाधारणधर्मं एवेति वा-
च्यं पृथिवीत्वमित्यादितो गन्धाद्यभानात प्रकृत्यर्थतावच्छेदकधर्मस्यैव
भावार्थत्वमौदारेण कथितस्य प्रकृत्यर्थधर्मत्वेऽपि प्रकृतिजन्यबोधे
प्रकारतावरहेण भावार्थत्वानुपपत्तेः न च कृत्तद्धितसमासेभ्यः स-
म्बन्धाभिधानमत्वतलभ्यामित्यनुशासनात्तद्धार्थभिन्नोऽप्युक्तसम्बन्ध-
स्त्वप्रत्ययार्थ एवेति वाच्यं तथा सति घटोत्पत्तत्व भासतीत्या-
दिवाक्यजन्यबोधे प्रामाण्यानवगाहितया स्वतो विरोधित्वानु-
पपत्तेः अनुमानविरोधित्वापत्तेश्च । परामर्शविषयव्याप्तिवैशिष्ट्यानु-
योगिनस्य विशेषणकाले पक्षसम्बन्धप्रतियोगिनिष्ठत्वाभानात् त-
स्य निरुक्तवैशिष्ट्यविषयकत्वाभावेन तत्प्रत्ययेन शाब्दवैशि-
ष्ट्यप्रत्यायनसम्भवेऽप्यप्रतीकाराच्च । अथ सामानाधिकरण्यान्वे-
न व्याप्तिवैशिष्ट्यसामानाधिकरण्यावच्छिन्न पक्षधर्मत्वमेव विव-
क्षितं पदार्थतावच्छेदकसमानाधिकरणापरपदार्थतावच्छेदकबोधक-
त्वादिन्यैवार्थं इत्यभिप्राय उक्तं च पक्षधर्मतोपाध्यायैरेव तदुक्तल-
क्षणस्य व्याप्तिविशिष्टत्वे भाति पक्षधर्मत्वं भासमानमिति। एवं च सा-
मानाधिकरण्यान्वयेन न भावप्रत्ययार्थेन नीलोत्पलत्वमित्यादि-
ना उत्पलादौ नीलाभेदान्वयेन नीलाभिन्नोत्पलादेः प्रतीतेर-
लाभात् तादृशोत्पलादिनिष्ठवृत्तित्वसहितमवच्छेदकनीलोत्पलवृत्ति-
त्वेन चान्वलभ्यप्रकृत्यर्थं परित्यज्य रूपवदौ शक्त्या भावप्रत्य-
येन बोधनात् नीलाभिन्नोत्पलादिवृत्तित्वरूपनीलिमादि सामानाधि-
करण्यस्योत्पलत्वादौ लाभनिर्वाहात प्रकृते च तदितरात्वित्वांश-
सामर्थ्यांशयोः उपलक्षणत्वेन विवक्षितो न तु ज्ञानान्वयविषयविशे-
षणतया अत परामर्शस्य तद्विषयकत्वेऽपि न क्षतिः व्याप्तिवैशि-
ष्ट्यसामानाधिकरण्यं च व्याप्तिविशिष्टप्रतियोगिकत्वमेव पक्षध-
र्मपदस्य प्रतियोगितासंसर्गेण पक्षानुयोगिकसमभिव्याहृतव्याप्तिविशि-
ष्टैकदेशसम्बन्धावच्छेदकत्वतया प्रकृत्यर्थतावच्छेदकतावच्छेदकसम्ब-
न्धेन च प्रकृत्यर्थवृत्तितायां भावप्रत्ययेन बोधनात् प्रतियोगिता-
सम्बन्धेन प्रकृत्यर्थवृत्तितायां एव तत्पदोत्तरभावप्रत्ययतो लाभात्
तस्या एव च तत्प्रतियोगिकत्वरूपत्वात् सम्बन्धविषया भासमा-
ने सर्वोगादौ तत्प्रतियोगिकत्वस्य तदीयसम्बन्धविषया भानाद्व्या-
प्तिविशिष्टप्रतियोगिकत्वमपि सम्बन्धविषयतया अवच्छेदकमिति

व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षधर्मपदार्थतावच्छेदकपक्षसम्बन्धविषयताकत्वरूपं विशिष्टविषयकत्वं परामर्शे ऽक्षतमिति चेत् । एवमपि व्याप्तिविशिष्टो यः पक्षधर्मः तस्य तत्त्वेन तत्प्रतियोगिकत्वरूपसम्बन्धविशेषणतया तादृशपक्षधर्मत्वावच्छिन्नविशेषिततत्प्रतियोगिकत्वावच्छिन्नविषयताया एव विशिष्टान्वयबलेन लाभात् । परामर्शे च पक्षधर्मत्वावच्छिन्नस्य पक्षांशे ऽप्रकारतया तदवच्छिन्नप्रतियोगिकत्वावच्छिन्नसम्बन्धविषयताकत्वविरहेण तदसंग्रहात् । यदि च पक्षधर्मत्वमप्युपलक्षणमुच्यते तदाप्यभेदसम्बन्धेन पक्षधर्मत्वावच्छिन्नांशे प्रकारीभवतो व्याप्तिविशिष्टत्वावच्छिन्नस्य उपलक्षणत्वे तदन्तर्गतव्याप्तेरपि तथात्वेन तदविषयकज्ञानाद्यावृत्तेस्तस्य विशेषणत्वप्रौच्यात् पक्षांशे प्रकारीभवति हेतौ व्याप्तिप्रकारकपरामर्शस्यासंग्रहः अभेदेन व्याप्तिविशिष्टस्य हेतुविषयतानवच्छेदकत्वात् एवं भावप्रत्ययार्थप्रविष्टं सकलतद्वृत्तित्वं तन्निष्ठभेदप्रतियोगितानवच्छेदकत्व साकल्यघटितस्य तस्यान्यादृशस्य दुर्वचत्वात् नानाव्यक्तिकस्य गुरुत्वादेर्यत्र प्रकृत्यर्थतावच्छेदकता प्रत्येकं तत्र प्रकृत्यर्थनिष्ठभेदप्रतियोगितावच्छेदकस्यापि तस्यानुगततदवच्छेदकावच्छिन्नस्य तादृशभेदप्रतियोगितानवच्छेदकत्वमभ्युपेयते नातस्तदसंग्रहः अन्यथा यथाश्रुते अनिस्तारात् । कस्याश्चिदपि गुरुत्वादिव्यक्तेः सकलगुरुत्वादिमदवृत्तित्वात् न चैवं गुरुत्वमित्यादितो गन्धादेरपि बोधापत्तिः तस्यापि गुणत्वावच्छिन्नस्य गुर्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वादिति वाच्यं गुणत्वावच्छिन्ने तदितरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वरूपतदितरावृत्तित्वासत्त्वेन तदापत्त्ययोगात् तदितरत्वव्यापकभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नतन्निष्ठभेदप्रतियोगितानवच्छेदकत्वस्य च भावप्रत्ययप्रवृत्तिनिमित्तत्वात् तदितरावृत्तित्वं तु न यथाश्रुतं प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन वृत्तेर्विवक्षणीयतया सत्त्वमित्यादौ सदितरसमवेतत्वाप्रसिद्धेः महानसीयवह्नित्वमित्यादौ शुद्धवह्नित्वाद्यनतिरेकिणो महानसीयवह्नित्वादेर्महानसीयवह्न्यादिरूपप्रकृत्यर्थेतरपर्वतीयवह्न्यादिवृत्तित्वेन तदितरावृत्तित्वबोधासम्भवाच्च तथा च कर्मधारयोत्तरभावप्रत्ययेन विशेष्यपदार्थतावच्छेदके विशेषणपदार्थतावच्छेदकसामानाधिकरण्यं कथं बोधनीयं प्रकृत्यर्थताव-

च्छेदकनिष्ठाया वृत्तेस्तदर्थान्वयेऽभानादिति महदसमञ्जसम् । उच्यते निरुक्तनदितरावृत्तित्वसहितसकलतद्वृत्तिधर्मस्य शक्त्यानन्त्यभयेन प्रकृत्यर्थमनन्तर्भाव्य मात्रप्रत्ययप्रवृत्तिनिमित्तत्वे सामान्यत इतरत्वव्यापकत्वस्य केवलान्वयिमात्रनिष्ठतया घटत्वावच्छिन्नभेदसाधारण्यविरहेण घटत्वादौ प्रथमदलस्य बाध वृत्तिमद्भेदप्रतियोगितानवच्छेदकत्वरूपद्वितीयदलमपि प्रमेयत्वाद्यनवच्छिन्ने तत्र बाधित घटेतरत्वव्यापकत्वादेश्चाशक्यतया न बोधनिर्वाह अतो लाघवाद्य धर्मत्वमेव तत्प्रवृत्तिनिमित्तमुच्यते धर्मत्वं च प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन सम्बन्धित्वमेव घटत्वमित्यादितो द्रव्यत्वादिबोधप्रसङ्गो रूपादिबोधप्रसङ्गश्च भवतामपि समान द्रव्यत्वादेरपि घटत्वविशिष्टतया घटेतरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वात् घटरूपादेरपि घटरूपत्वाद्यवच्छिन्नस्य घटादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वात् एव गुरुत्वमित्यादितोऽपि गुरुत्वादिसमनियतरसादिबोधो भवतामपि दुर्वार तदितरावृत्तित्वादिना भासमाने धर्मे तत्प्रकृत्यर्थतावच्छेदकनिष्ठाधेयतासम्बन्धेन प्रकृत्यर्थस्यान्वयमुपगम्य तद्वारणे च धर्मत्वेन शक्तिमतेऽपि धर्मत्वे प्रकृत्यर्थतावच्छेदकनिष्ठत्वसहितनिरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वयमुपगम्य तत्तत्पदार्थतावच्छेदकनिष्ठाधेयतया धर्मान्तरेऽसत्त्वेन तादृशातिप्रसङ्गो वारणीय एव च व्याप्तिविशिष्टाभिन्नपक्षधर्मप्रतियोगिकत्वेन पक्षसम्बन्धे व्याप्तिविशिष्टपक्षधर्मतापदेन बोध्यमानेऽभेदेन पक्षधर्मान्वयिनि व्याप्तिविशिष्टे विशेषणतापन्नव्याप्तिवैशिष्ट्यस्यापि पक्षधर्मे विशेषणतया भानमुपेयम् एकविशेषणतया उपस्थितस्य पदार्थतावच्छेदकस्य स्वातन्त्र्येणेतरविशेषणतया ऽभानात् अन्यथा घटं जानातीत्यादौ घटत्वादिविशिष्टनिरूपितविषयिताश्रयज्ञानपर्यन्तस्य तात्पर्यविषयत्वेऽपि लाभासम्भवात् पदार्थतावच्छेदकघटत्वादेः स्वावच्छिन्ननिरूपितत्वसम्बन्धेन विषयितायामन्वयेनैव तल्लाभनिर्वाहात् एव च व्याप्तिवैशिष्ट्याविशेषितव्याप्तिविशिष्टाभिन्नत्वोपलक्षितपक्षधर्मप्रतियोगिकत्वमेव विषयतावच्छेदकतया विवक्षितमिति पक्षधर्मे व्याप्तिविशिष्टभेदानवगाहिपरामर्शस्यापि सङ्ग्रहः वह्निव्याप्यधूमवानिति ज्ञाने व्याप्तिवैशिष्ट्यस्य धूमांशे प्रकारत्वेऽपि तदंशे सम्बन्धतया भानादेव धूमनिष्ठावच्छेदक

तारूपविषयतायामवच्छेदकत्वसम्भवात् तद्घटितव्याप्तिविशिष्टधूमप्रतियोगिकत्वविशिष्टहेतुतावच्छेदकसम्बन्धविषयकत्वमव्याहतं न च व्याप्तिविशिष्टस्य हेतोः संयोगादिरूपसम्बन्धांशे सम्बन्धतया भासमाने तत्प्रतियोगिकत्वे तादृशहेतोः सम्बन्धान्तराभानात्तस्यापि च संयोगादौ सम्बन्धान्तराभानात् तदीयसम्बन्धान्तरघटितव्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टसंयोगादिविषयकत्वं वह्निव्याप्यधूमवानित्यादिबुद्धेर्दुरुपपादमेवेति वाच्यं तदवच्छिन्नविषयताकत्वरूपतद्विशिष्टविषयकत्वस्य तदीयसम्बन्धाभानेऽप्यव्याहतेश्च अन्यथा गुरुमते ज्ञानस्य विशिष्टविषयकत्वानुपपत्तेः तैर्विशिष्टबुद्धौ सम्बन्धभानानुपगमात् न च वैशिष्ट्यांशे विशेषणीभवन्त्या व्याप्तेर्व्याप्तिविशिष्टेत्यादिवाक्यजन्यबुद्धौ सम्बन्धसम्बन्धोऽप्येतन्मते विषय इति तद्घटितमेव विशिष्टं व्याप्तिविशिष्टपक्षधर्मतापदार्थः एवं व्याप्ति विशिष्टस्य हेतोः संयोगादिसम्बन्धांशे भासमानतत्प्रतियोगिकत्वांशेऽपि सम्बन्धान्तरभानमावश्यकं तथा च तद्घटितव्याप्तिविशिष्टप्रतियोगिकत्वस्य पक्षसम्बन्धनिष्ठविषयतावच्छेदकत्वं लक्षणवाक्यलभ्यमिति तादृशविशिष्टस्य च व्याप्तेः संसर्गतया तद्वैशिष्ट्यावगाहिपरामर्शीयविषयतावच्छेदकत्वात् तत्र वैशिष्ट्यांशे व्याप्तिप्रतियोगिकत्वमात्रस्य तत्सम्बन्धतया भानेन तत्र तदीयसम्बन्धान्तराभानादिति वाच्यं लक्षणवाक्यजन्यबोधे वैशिष्ट्यांशे व्याप्तिसम्बन्धसम्बन्धस्याधिकस्य भानेऽपि तस्य वैशिष्ट्यनिष्ठविषयतावच्छेदकत्वाविवक्षणसम्भवेन सामञ्जस्यात् न हि यस्मिन् विषये यस्य यत्सम्बन्धभानं तन्निष्ठविषयतायां तदीयतत्सम्बन्धावच्छिन्नत्वं विशिष्टवैशिष्ट्यबोधे भासत एवेति नियमः प्रामाणिकः घटं जानातीत्यादिवाक्यजन्यघटत्वादिविशिष्टवैशिष्ट्यबोधे घटादिविषयतायां समवायानुयोगित्वावच्छिन्नत्वभानस्यापि नियमेनानभ्युपगमात् । अथ व्याप्तिघटकहेतुसम्बन्धावच्छिन्नबोधकपक्षधर्मपदोत्तरभावप्रत्ययस्य उक्तरीत्या प्रकृतयर्थतानवच्छेदकसम्बन्धान्तरव्यावृत्तहेतुप्रतियोगिकत्वबोधकतया सम्बन्धान्तरस्याघट्टत्वेन तत्संसर्गकहेतुमत्ताज्ञानवारणेऽपि हेतुतावच्छेदकसम्बन्धसंसर्गकनिर्धर्मितावच्छेदकज्ञानवारणमशक्यमेव तस्यापि व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नतादृशसम्बन्धविषयकत्वात् न च

पक्षपदस्य धर्मितावच्छेदकविशिष्टार्थकतया पक्षधर्मतापदेन धर्मितावच्छेदकविशिष्टधर्म्यनुयोगिकत्वावच्छिन्नसंसर्गबोधनात् तदवच्छिन्नसंसर्गावगाहिज्ञानमेव ज्ञानान्तार्थ इति निर्धर्मितावच्छेदकज्ञानव्यावृत्तिरिति वाच्यं पक्षधर्मतापदेन पक्षधर्मप्रतियोगिकत्वेनैव पक्षसम्बन्धबोधनात् पक्षानुयोगिकत्वेन सम्बन्धस्य तदबोध्यत्वात्। एवम् यतः संशयवारणाय ज्ञानपदस्य निश्चयार्थकत्वमावश्यकं निश्चयत्वं च विपरीतकोटिधर्मितावच्छेदकनानापक्षधर्मावच्छिन्नविशेष्यताकज्ञानत्वं तथा च तादृशविशेष्यताकत्वावच्छेदेन व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नसम्बन्धावगाहित्वस्य विवक्षणात् हेतुमत्त्वादौ निर्धर्मितावच्छेदकज्ञानं न लक्षणघटकमिति यत्र पक्षपदस्यानुपादानेऽपि सामञ्जस्यात्तदुपादानं धर्मपदस्य हेतुतावच्छेदकसम्बन्धप्रतियोगिपरत्वलाभायेति दिक्। अथवा धर्मान्तरविशिष्टावच्छिन्नबोधकप्रकृतिकभावप्रत्ययः प्रकृत्यर्थतावच्छेदकधर्मान् ताद्रूप्येणैव प्रत्याययति गुरुत्वमेकत्वमित्यादौ जातिविशेषपुरस्कारेणैव गुरुत्वैकत्वादिगुणबोधनात् उक्तं च गुणदीधितौ प्रतीतिस्तु ताद्रूप्येण धर्मत्वेन चेति न च शक्त्यानन्त्यप्रसङ्गाभाव पक्षे साधुरिति वाच्यं तदादीनामुपलक्षणीभूतबुद्धिविषयतावच्छेदकत्वेन प्रवृत्तिनिमित्तघटनायनुगमेन शक्त्यैक्यवत्प्रकृतेऽपि प्रकृत्यर्थतावच्छेदकतावच्छेदकत्वरूपोपलक्षणेन प्रकृत्यर्थतावच्छेदकजातिविशेषादीनामनुगमेन शक्त्यैक्यसम्भवात् विशेषरूपेण लक्षणाया एव चोपगन्तव्यत्वात् तादृशभावप्रत्ययार्थे च प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकताघटकसम्बन्धेन सम्बन्धत्वं संसर्गतया भासते तथा च प्रकृते पक्षानुयोगिकसम्बन्धावच्छिन्नबोधकपक्षधर्मपदोत्तरभावप्रत्ययस्य पक्षानुयोगिकसम्बन्धत्वेनैव तादृशसम्बन्धबोधकतया पक्षपदस्य धर्मितावच्छेदकविशिष्टार्थकतया धर्मितावच्छेदकविशिष्टानुयोगिकत्वावच्छिन्नव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नसम्बन्धावगाहिज्ञानलाभात्सामञ्जस्यम्। सम्बन्धांशे विशेषणप्रतियोगिकत्वं यथा विशेषणस्य सम्बन्धतया भासते तथा विशेष्यानुयोगिकत्वमपि विशेष्यस्य सम्बन्धतया भासते अत एव पक्षे हेतुसम्बन्धविधया भासमानस्य संयोगादेर्विषयता हेतुप्रतियोगिकत्वेनैव पक्षतावच्छेदकावच्छिन्नानुयोगिकत्वेनाप्यवच्छिन्नेति न किञ्चिदनुपपन्नम्। व्याप्तिवै

शिष्ट्य(१)सामानाधिकरण्यं व्याप्तिविशिष्टसम्बन्धत्वं तत्प्रतियोगिकत्वपर्यवसितं पक्षधर्मत्वं पक्षानुयोगिकसम्बन्धः पक्षधर्मपदस्य प्रतियोगितया पक्षसम्बन्धावच्छिन्नमात्रबोधकत्वात् प्रतियोगित्वानुयोगित्वयोः सम्बन्धसम्बन्धतया विशेषणविशेष्यांशे भानोपगमसम्भवात् प्रतियोगित्वादेर्ज्ञानान्वयित्वेऽपि पक्षव्याप्ययोः सम्बन्धसंसर्गविधयाऽवगाहमानस्य परामर्शस्य नासंग्रहः व्याप्तिविशिष्टप्रतियोगिकत्वादेः सम्बन्धविशेषणतया तन्निष्ठविषयताया अवच्छेदकतया ज्ञानेनान्वयो न तु विषयतया साक्षादेव तथा सति विशृङ्खलतावत्समूहालम्बनजन्ये ऽतिप्रसङ्गात् विषयांशे सम्बन्धविधया यद्भासते प्रकार इव तत्रापि विषयतावच्छेदकत्वं विषयतानिरूपितविषयतापर्यवसितमक्षतमेवेति सम्बन्धविषयतायाः व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नत्वानिर्वाहः। यदि च तादृप्येणैव पक्षसम्बन्धः स्वावच्छिन्नबोधकपदोत्तरतल्प्रत्ययार्थः प्रकृत्यर्थस्य तत्प्रतियोगिकत्वं तु संसर्ग एव न तु प्रकारस्तथा च व्याप्तिविशिष्टप्रतियोगिकत्वस्य विषयत्वान्वयिपक्षसम्बन्धविशेषणताविरहेण तत्पारतन्त्र्येण विषयत्वान्वयासम्भवात् सम्बन्धविषयतायां न तदवच्छिन्नत्वलाभसम्भव इति मन्यते तदा व्याप्तिविशिष्टस्यैव सम्बन्धविषयतायामवच्छेदकतयाऽन्वयो विवक्षणीयः तस्यैव सम्बन्धविशेषणतया लक्षणार्थे प्रवेशात् यद्यपि कर्मधारयलभ्यस्याभेदेन व्याप्तिविशिष्टविशिष्टस्य पक्षधर्मस्यैव पक्षसम्बन्धांशे विशेषणतया तादृशस्यैव ज्ञानान्वयो दर्शितदिशा स्वीकार्यः तथा च यादृशपरामर्शः पक्षधर्मे व्याप्तिविशिष्टाभेदमवगाहते तस्यैव संग्रहो न तु तत्र व्याप्तिसम्बन्धावगाहिन इति तज्जन्ये ऽव्याप्तिः एवं लक्षणवाक्यजबुद्धौ व्याप्तिवैशिष्ट्यस्य पदार्थतावच्छेदकतया प्रकारत्वे तत्सम्बन्धसम्बन्धस्यापि भानमावश्यकं सम्बन्धसम्बन्धस्य नियमेन विशिष्टबुद्धौ भानवादिनां तथा च विशिष्टपदार्थघटकस्य तस्यापि ज्ञानान्वयध्रौव्य विशेषणान्तर्गतस्योपलक्षणत्वायोगादिति व्याप्तिवैशिष्ट्यं यत्र संसर्ग एव तादृशपरामर्शस्य दुःसंग्रहतैव तादृशपरामर्शस्य संसर्गसंसर्गीयसंसर्गान्तरभानस्य निर्युक्तिकतया ऽनवस्थाभयेन च केनाप्यनभ्युपगमात्

(१) पाठोऽयं १।३।४ पुस्तके न दृश्यते।

तथापि व्याप्तिवैशिष्ट्ये धर्मिणि प्रकारतया भासमाने वैशिष्ट्यवि-शेषणतापन्ना व्याप्तिरपि तेन संसर्गेण तत्प्रकारतया भासते एक-विशेषणतया उपस्थितस्य स्वातन्त्र्येणैवान्यत्र विशेषणत्वानुपगमात् एव व्याप्यविशेषितस्य प्रतियोगितया सम्बन्धविशेषणत्वे इतर-पदार्थविशेषणतापन्नस्य व्याप्यस्यापि प्रतियोगितया सम्बन्धवि-शेषणत्वमिति स्वीकृत्यैवं व्याख्यातम् एवं च सति व्याप्तिविशेषि-तधर्मिणो ज्ञानान्वयमाप्नुवाने सम्बन्धे विशेषणत्वं व्याप्तिवैशिष्ट्य-विशेषितधर्मिणोऽभेदेन व्याप्यविशेषितस्य पक्षसम्बन्धविशिष्टस्य चोपलक्षणत्वमित्यतः सर्वसामञ्जस्यात् । इत्थमेव दण्डांशे लौ-हित्यप्रकारकज्ञाने विशिष्टविषयान्वयपरस्य लौहित्यविशिष्टदण्डं जानातीति वाक्यस्य प्रामाण्यनिर्वाह इत्यलमतिसूक्ष्मानुधावनेन । पदार्थतावच्छेदकद्वयेति । अन्वयबलेन एकपदार्थतावच्छेदकवि-शिष्टधर्मिसंसर्गोपरागेणापरपदार्थतावच्छेदकबोधकत्वादित्यर्थः । ननु कर्मधारयलभ्यव्याप्तिविशिष्टाभिन्नपक्षधर्मरूपप्रकृत्यर्थान्वितप-क्षसम्बन्धरूपतत्प्रत्ययान्तार्थस्य लक्षणवाक्यार्थघटकस्याप्रसिद्ध्या ह्रदो वह्निमानित्यादिभ्रमानुमितावव्याप्तिरित्याशङ्कायां समाधत्ते ज्ञान-पदेति । ज्ञानपदोपसन्धानेन ज्ञानबोधकपदसमभिव्याहारमियन्नि-तव्युत्पत्तिविशेषेण बाधिताबाधितसाधारणतज्ज्ञानलाभात् पक्षध-र्मतांशे बाधिताबाधितसाधारणस्य व्याप्तिवैशिष्ट्यसामानाधिकर-ण्यस्य ज्ञानलाभात् । अयं भावः । ज्ञानवाचकपदसमभिव्याहृतस्य विषयविशेषणतया स्वार्थबोधकस्यापि पदस्य विषये स्वार्थान्व-यनिश्चयदशायां विषयाविशेषणतयैव ज्ञानविषयतावच्छेदकतया स्वार्थबोधकत्वं व्युत्पत्तिसिद्धं कथमन्यथा विशेषदर्शिनो भ्रान्तिज्ञा लोहितद्रव्हिज्ञानवानयमित्यादिवाक्यं प्रयुङ्क्ते तथा च वह्निव्याप्ति-विशिष्टप्रतियोगिकत्वविषयतानिरूपितह्रदसम्बन्धविषयताशालिज्ञा-नत्वेन भ्रमात्मकपरामर्शस्यापि उक्तलक्षणवाक्याल्लाभः(१) एवं च गु-

---

(१) अथ लोहितदण्डं जानातीत्यादौ लोहितदण्डादिपदार्थयोरभेदेनान्वये तात्पर्यानुपगमे समासमप्युक्तेन तात्पर्यस्याबाधकत्वेऽपि तद्वाक्यप्रामाण्यनिर्वाहाय लोहितपदस्य तत्र लौहित्या-दिमत्सम्बन्धार्थकत्वमुपेयते तत्र तत्पदस्य विशिष्टे ज्ञानविषयबोधकतत्पदार्थकपदस्य तत्त्वेन समभिव्याहृतत्वोपगमात् । तेन रूपेण समभिव्याहृतत्वाद् तत्प्रकारतानिरूपकविषयताशालित्व त-दवच्छिन्नत्वादेरेव च बहुपदैर्विषयतानिरूपकत्वं विशेषितबोधकविशेषिसमभिव्याहारात् प्रतीत-

णादिरूपपक्षानुयोगिकहेतुतावच्छेदकसंयोगादिसम्बन्धाप्रसिद्धावपि गुणादिरूपपक्षे संयोगादिना हेतुमत्ताभ्रमजन्यानुमितौ नाव्याप्तिः पक्षानुयोगिकत्वविषयतानिरूपितसंयोगादिविषयताशालित्वेन तादृशभ्रमस्यापि लक्षणवाक्यतो लाभात् । इदं त्वापाततः पदार्थद्वयाभेदविवक्षायामेव कर्मधारयस्य साधुतया अत्र पक्षधर्मे व्याप्तिविशिष्टभेदाविवक्षायां कर्मधारयानुपपत्तिः तद्विवक्षायां च भ्रमस्थले विवक्षितलक्षणवाक्यार्थाप्रसिद्ध्याऽव्याप्तिः स्फुटैव एतदभिप्रेत्यैव भ्रमानुमित्यव्याप्त्या मतमेतदग्रे दूषयिष्यति उक्तवाक्यस्य चाप्रामाण्यमिष्टमेव किं तु लोहितं वह्निं जानातीत्यस्यैव प्रमाणत्वम् ॥

सांसर्गिकावगाहितायाः सम्बन्धान्तरावच्छिन्नत्वं निर्युक्तिकमित्याशयेन दूषयति परामर्शेनेति ॥

(दी०) तत्र परामर्शेन नियमतो व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रहे मानाभावात् गौरवेण तद्विषयत्वेनाहेतुत्वात् । सम्बन्धसम्बन्धाग्रहेऽपि विशिष्टज्ञानत्वस्योपपादितत्वात् भ्रमस्थले

यते । अतो वह्नौ शुक्ल इत्यादिभ्रमाया लोहितो वह्निरित्यादिज्ञानात्तरीयलौहित्यादिप्रकारताक-पक्षकविषयताद्वह्न्यादिविषयकत्वेऽपि न तज्ज्ञानपरीक्षकवाक्यस्य प्रामाण्यापत्तिः लौहित्यादिविशेष्यतापन्नवह्न्यविषयकवह्न्यादिज्ञाननिष्ठतद्विषयिताया लौहित्यादिविशेष्यतापन्नानिरूपितत्वात् इयत्यादिनिष्ठपक्षानुयोगिकाधिकरणतानिरूपकत्वे पक्षाद्याधेयभावच्छेदकतायां यादृशावच्छेदकत्वविषयतानात्मकमपि विषयतायामविरुद्धमेव । एवं च प्रकृतेऽपि व्याप्तिविशिष्टपदं व्याप्तिप्रकारेण भासमानपरं तस्य पक्षधर्मेऽभेदेनान्वयः । तस्य भावप्रत्ययार्थे पक्षसम्बन्धे स्वप्रतियोगिकत्वेन भासमानत्वसम्बन्धः यस्य विशेषणस्य येन सम्बन्धेन विशेष्येऽन्वयः ज्ञानविषयतया भासमाने विशेष्ये स्वीयतत्सम्बन्धोपरागेण भासमानत्वस्यैव तद्विशेषणसम्बन्धतया भानमिति व्युत्पत्तेः अराजकीये धननिष्ठस्वत्वे राजकीयत्वभ्रमरूपज्ञानपरे राज्ञो धनं जानातीत्यादिविशेषदर्शी, वाक्ये षष्ठ्यर्थस्वत्वे निरूपितत्वसम्बन्धेन राज्ञोऽन्वये योग्यतानुपपत्त्या निरूपितत्वेनैव भासमानत्वस्य तत्र तत्सम्बन्धताया उपगन्तव्यत्वात् । तथा च व्याप्तिप्रकारेण यद्भासते तत्प्रतियोगिकत्वेन भासमानपक्षसम्बन्धावगाहिज्ञानजन्यत्वलाभाच्च भ्रान्तानुमित्यव्याप्तिर्न वा तत्र लक्षणवाक्यलक्षणबोधानुपपत्तिरिति चेन्न । एवमपि पक्षधर्मपदस्य यथाश्रुतार्थपरतायां आवश्यकत्वाद्वह्निव्याप्यजलवान् ह्रद इत्यादिपरामर्शजन्यभ्रमानुमितेसंग्रहेऽपि वह्निव्याप्यधूमवान् ह्रद इति भ्रमजन्यानुमितेर्दुःसंग्रहत्वात् । तत्र व्याप्तिप्रकारेण भासमानधूमे वास्तवपक्षधर्मत्वाविरहात् पक्षधर्मपदस्य पक्षधर्मत्वेन भासमानार्थकत्वे पक्षसम्बन्धस्य प्रकृत्यर्थतावच्छेदकतया तदुत्तरभावप्रत्ययेन बोधनासम्भवात् तेन रूपेण भासमानत्वरूपप्रकृत्यर्थतावच्छेदकस्य भावप्रत्ययेन विवक्षणे परामर्शस्य तदनवगाहितया असामञ्जस्यादिति २ पुस्तके अधिकः पाठः ।

तादृशसामानाधिकरण्याप्रसिद्ध्या तज्ज्ञानस्यासम्भवात् असत्-ख्यातिनिरासात् अवान्तरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थ-ज्ञानानुदयात् विषाणे शशसम्बन्धाभावनिश्चयदशायां शशवि-षाणजन्यमिदं कार्मुकमिति शाब्दबुद्धेर्भ्रमणापि दुरुपपादत्वात्

(मा०) परामर्शत्वस्य व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यग्रह-त्वव्याप्यत्वे मानाभावादित्यर्थः । व्याप्तिविशिष्टधूमसंयोगी वह्निव्या-प्यधूमवांश्च पक्ष इत्यादिपरामर्शस्य व्याप्तिसम्बन्धपक्षसम्बन्धप्रकार-कतया तत्सम्बन्धावगाहित्वप्रामाणिकमेवेति नियमत इत्युक्तं तथा च यत्र व्याप्तिवैशिष्ट्य पक्षधर्मता च संसर्गतयैव भासते तज्जन्या-नुमितावव्याप्तिर्यथाश्रुतलक्षण इति भावः । ननु तादृशज्ञानादनु-मितिर्न भवत्येव तादृशसामानाधिकरण्यविषयकत्वेनैव परामर्श-स्यानुमितिहेतुत्वात् तथा च काऽव्याप्तिरित्यत आह गौरवे-ण चेति । व्याप्तिविशिष्टहेतुविशिष्टपक्षज्ञानत्वेनैव लाघवेन हेतु-त्वात् व्याप्तिवैशिष्ट्यादिसामानाधिकरण्यविषयकत्वेन हेतुत्वे सामानाधिकरण्यविषयकत्वस्याधिकस्य निवेशात् तथा च तदुभ-यसामानाधिकरण्यानवगाहिनोऽपि विशिष्टज्ञानादनुमित्युत्पत्तिर्नि-ष्प्रत्यूहैवेति भावः । ननु सम्बन्धसम्बन्ध्यवगाहिज्ञानत्वमेव वि-शिष्टज्ञानत्वं न तु सम्बन्धज्ञानत्वमेव दण्डपुरुषसंयोगा इत्यादिस-मूहालम्बनस्यापि तथात्वापातात् तथा चानुमितिजनकज्ञाने विशे-षणीभूतव्याप्तिसाधनयोः संसर्गसंसर्ग्यनवगाहित्वे तद्विशिष्टज्ञानत्व-मेव तस्य नोपपद्यत इति कथमनुमितिजनकत्वमित्यत आह सम्बन्धे-ति । अग्रहेऽपि अविषयीकरणेऽपि । विशिष्टज्ञानत्वस्येति । अयमाशयः सम्बन्धसम्बन्ध्यवगाहिज्ञानत्वमपि न विशिष्टज्ञानत्वं सम्बन्धसम्ब-न्धिमादायापि समूहालम्बनसम्भवात् अपि तु तत्प्रकारकधीत्वमेव तद्विशिष्टधीत्वं प्रकारत्वं च विषयताविशेषः न च प्रकारतात्वं सांसर्गिकविषयतानिरूपितविषयतात्वं यदि तदा विशेष्यताया अपि तथात्वादतिप्रसङ्गः अपि तु सम्बन्धविषयतानिरूपितप्र-तियोगित्वविषयतानिरूपितविषयतात्वमेव विशेष्यविषयता च तादृशानुयोगित्वविषयतानिरूपितैव न तु तादृशप्रतियोगित्वावि-

विषयतानिरूपिता विशेषणांश एव संसर्गप्रतियोगितामानादिति नातिप्रसङ्गः एवं प्रतियोगित्वस्थानेऽनुयोगित्वं निवेश्य विशेष्यतात्वं निर्वाच्यमिति संसर्गीयप्रतियोगित्वानुयोगित्वरूपसंसर्गान्तरभानं विशिष्टबुद्धावावश्यकमिति वाच्यं संसर्गतात्ववत्प्रकारतात्वविशेष्यतात्वयोरपि स्वरूपसम्बन्धविशेषात्मकत्वादिति विशिष्टबुद्धेः संसर्गसंसर्गावगाहितानियमेऽपि भ्रमानुमितावव्याप्तिर्निष्प्रत्यूहैवेत्याशयेनाह भ्रमस्थले चेति। तज्ज्ञानासम्भवादिति व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मत्वज्ञानासम्भवादित्यर्थः। तथा च तादृशविशिष्टज्ञानजन्यत्वं लक्षणवाक्यार्थस्तस्य भ्रमानुमितिसाधारण्यमशक्यमेव भ्रमस्य व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मत्वाविषयत्वासम्भवेन लक्षणवाक्यार्थानन्तर्भावादिति भावः। ननु भ्रमेऽसदेव वैशिष्ट्यं भास इति टीकाकारानुमतं तथा च वह्निव्याप्यधूमवान् ह्रद इत्यादिभ्रमस्य व्याप्तिविशिष्टधूमादिप्रतियोगिकह्रदानुयोगिकासद्वैशिष्ट्याविषयकत्वमव्याहतमेवेति कथं तादृग्ज्ञानासम्भव उच्यते इत्यत आह असदिति। असतः ख्यातिनिरासात् ज्ञानविषयत्वनिरासात् ज्ञानविषयताव्यापकत्वस्य सत्त्वे व्यवस्थापनादिति यावत्। यदि चासतो ज्ञानविषयतासत्त्वेऽपि अभावाधिकरणताया अपसिद्धान्तत्वात् ज्ञानविषयत्वसमानाधिकरणाभावाप्रतियोगित्वरूपं तद्व्यापकत्वं सत्त्वेऽक्षतमेवेति नार्थतोऽसत्ख्यातिनिरासस्सम्भव इति मन्यते तदा सद्वृत्तित्वे तादृशज्ञानविषयतात्वव्यापकत्वमेव विवक्षणीयमसत्ख्यातिवादिनामसद्वैशिष्ट्यज्ञानविषयत्वस्य परमार्थत्वात् न च भ्रमस्य सन्मात्रविषयकत्वे भ्रमत्वव्याघात इत्याशङ्क्यं तथात्वेऽपि व्यधिकरणप्रकारकत्वेन भ्रमत्वस्य निर्वाहात् इदं च वस्तुगतिमनुरुध्याभिहितं वस्तुतोऽसद्वैशिष्ट्यभानेऽपि न प्रकृते निस्तारः अलीकस्य संसर्गतयैव ज्ञानादिविषयताया वाचस्पत्यनुमतत्वात् तन्मतानुसरणेऽपि असत्याः व्याप्तिवैशिष्ट्यसमानाधिकरणपक्षधर्मतायास्तल्प्रत्ययान्तेन प्रतिपादनासम्भवात् अपारमार्थिकधूमप्रतियोगिकह्रदानुयोगिकवैशिष्ट्यावगाहिभ्रमात्मकपरामर्शजन्यत्वस्य लक्षणवाक्यतोऽलाभात् लक्षणस्यासद्घटितत्वेनाभ्रान्तस्य तत इतरभेदानुमानासम्भवाच्च भ्रान्तपुरुषीयानुमानस्यातिप्रसक्तादिनापि सम्भवात्। ननु व्याप्तिविशिष्टपक्षधर्मयोरभेदो

लक्षणवाक्यतः प्रतीयते तथापि न तदंशस्य लक्षणघटकत्वमुपगम्यते अतिव्याप्त्याद्यवारकत्वात् अवश्यविवक्षणीयव्याप्तिविशिष्टप्रतियोगिकत्वादिविषयतानिरूपितसंसर्गीयविषयतामात्रनिवेशेनैव सामञ्जस्यात् लक्षणवाक्यप्रतिपाद्यताया लक्षणघटकतानियतत्वे ज्ञानान्तकर्मधारयपक्षेऽपि अवश्यविवक्षणीयस्य ज्ञानविशेषणव्याप्तिप्रकारकत्वांशे पक्षधर्मताविषयकत्वावच्छिन्नत्वस्य निवेशेनैव सामञ्जस्याल्लक्षणवाक्यलभ्यस्य ज्ञानांशे पक्षधर्मताविषयकत्वविशेषणस्य वैयर्थ्येन लक्षणदोषात् एवं च भ्रमानुमितौ न लक्षणाव्याप्तिराङ्केत्याशयेनायोग्यताज्ञानाद्विशेषदर्शिनां नोक्तवाक्याद्भ्रमानुमितौ लक्षणग्रहः सम्भवतीति विशेषदर्शिनं प्रति प्रकृतवाक्यानर्थक्यमिति दूषणान्तरमाह अथान्तरेति । पक्षधर्मांशे ऽविशेषणस्य व्याप्तिवैशिष्ट्यादेर्न स्वातन्त्र्येण ज्ञानान्वयसम्भवः व्युत्पत्तिविरोधात् अपि तु तद्विशेषणतापन्नस्यैवेति तत्र तदनन्वयनिश्चयो ऽवान्तरवाक्यार्थायोग्यतानिश्चयः तस्मिन् सति समुदायलक्षणवाक्यजन्यमहावाक्यार्थज्ञानासम्भवादित्यर्थः । महावाक्यार्थयोग्यताज्ञानस्यावान्तरवाक्यार्थविषयकत्वनैयत्येनावान्तरवाक्यार्थधीविरोधिनोऽयोग्यताज्ञानस्य महावाक्यार्थयोग्यताज्ञानविरोधित्वादिति भावः । एतदेव दृष्टान्तेन द्रढयति विषाण इति । शशसम्बन्धाभावेति । शशस्य विषाणजन्यमिति वाक्यजन्यसम्बन्धप्रकारकबोधाभिप्रायेणेदं शशविषाणजन्यमिति वाक्यजन्यबोधस्य विषाणादौ ऽभेदेन शशपदलक्ष्यशशसम्बन्धिप्रकारकतया सम्बन्धिभेदनिश्चयस्यैव तद्विरोधित्वात् समासव्यासयोः समानप्रकारकानुभवजनकत्वानुरोधेन षष्ठीतत्पुरुषस्थले सम्बन्ध एव लक्षणा समासे व्युत्पत्तिवैचित्र्येण नामार्थयोरपि भेदान्वयबोधाभ्युपगमादित्याशयेनेदमिति कश्चित् । शशसम्बन्धविशिष्टविषाणपरसर्वनामघटितवाक्यजन्यबोधपरतया व्याख्यानं पुनरसत् तथा सति विषाणे शशसम्बन्धस्य पदार्थतया ऽवान्तरवाक्यार्थत्वायोगात् ॥

भ्रमानुमितेरलक्ष्यतया नाव्याप्तिप्रसक्तिरित्याशङ्कते न चेति ।

(दी०) न चात्र प्रमाणप्रस्तावात् प्रमैव लक्ष्या । यदि च लिङ्गपरामर्शादपि भ्रान्तानुमितिस्तदा चरमज्ञानपदं प्रमापर-

मिति वाच्यम् ॥

(गा०) प्रमाणप्रस्तावात् प्रमाणतत्त्वमत्र विविच्यत इत्युपक्रमेण प्रमाणस्य निरूपणीयत्वात् तन्निरूपणोपयोगितया प्रमैवानुमितिर्लक्षणीया। यद्यपि ह्रदो वह्निमानित्याद्यनुमितेरपि ह्रदत्वाद्यंशे प्रमात्वमेव विधेयांशे प्रमात्वविवक्षणे लिङ्गोपधानमतेऽपि धूलीपटलादौ व्याप्यत्वावगाहिज्ञानजन्यायां पर्वतादिपक्षकवह्न्याद्यनुमितौ प्रमात्वस्याक्षततया लिङ्गोपहितेत्याद्यग्रिमग्रन्थानुत्थितेः यावद्भ्रमभेदकूटविवक्षणे तु ह्रदो वह्निमान् पर्वतश्च वह्निमानित्यादिसमूहालम्बनानुमितौ अलक्ष्यतापातेनातिप्रसङ्गः तथापि भ्रमान्यवृत्तिविषयितात्वमेव प्रमात्वं विवक्षणीयम्। उक्तसमूहालम्बनज्ञानीयवह्निमत्पर्वतादिविषयिता समूहालम्बनात्मिकायां पर्वतो वह्निमानित्यनुमितावपि वर्तते ज्ञानव्यक्तिभेदेन विषयिताभेदानुपगमात् अतस्तस्यालक्ष्यतैव ह्रदो वह्निमानित्याद्यनुमितिनिष्ठाया ह्रदादिविषयिताया अपि भ्रमत्वघटकतया भ्रमत्वनैयत्यमेवातो न तस्यालक्ष्यत्वं यद्यप्यत्रापि लिङ्गोपहितेत्याद्यग्रिमग्रन्थासङ्गतिरस्ति तथाहि लिङ्गोपधानमतेऽपि शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रकारतायास्तादृशप्रकारताशालिसंशयनिवृत्त्यर्थं तादृशसिद्धिप्रतिबन्धकत्वार्थं च स्वीकरणीयत्वात् तादृश्याश्चोक्तरूपत्वात्तादृशानुमितेर्लक्ष्यत्वं दुष्परिहरमेवेति तथापि तादृशविषयितायां परामर्शजन्यतावच्छेदकत्वमपि विवक्षणीयम् अन्यथा ह्रदत्वादिविषयितामादाय भ्रान्तानुमितेरपि लक्ष्यतापातात् तथा च तादृश्याश्च बाधाभावादेर्जन्यतावच्छेदकत्वादिति ध्येयम्। ननु गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्याद्यसङ्कीर्णबाधस्थले या पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहिन्यनुमितिस्तत्रैवातिव्याप्तिस्तादृशानुमितेः साध्यस्य पक्षतावच्छेदकावच्छिन्नत्वांशे भ्रमरूपतया लक्ष्यत्वात् विशिष्टेऽपि पक्षे गन्धव्याप्यतया पृथिवीत्वादिरूपहेतुमत्त्वावगाहिनः परामर्शस्य प्रमात्वेन व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वादुक्तलक्षणस्याक्षतत्वादित्यत आह यदि चेति। सर्वत्रानुमाने पक्षधर्मताबलात्पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमेव भासते न तु तयोरवच्छेद्यावच्छेदकभावोऽपि तेन विनापि हेतोर्व्याप्तिपक्षधर्म-

स्योपपत्तेस्तद्भासकयत्नाभावादित्यभिसन्धाय उक्तबाधासङ्करस्य
तस्य पक्षपातिना दूषितत्वात् तन्मते च न सल्लिङ्गपरामर्शाद्भ्रमानुमि-
तिरपि तु मिथ्याग्निमत एवेत्यतो यदि चेत्युक्तम्। न च बाधितव-
ह्नौ लाघवज्ञानसत्त्वे सल्लिङ्गपरामर्शादपि बाधितो वह्निः पक्षे भा-
सत इति सर्वेषामेवानुमतं परं तु तादृशानुमितेर्व्यापकतानवच्छे-
दकविशेषधर्मप्रकारकत्वं प्राचीना न मन्यन्ते अत एव सामान्य-
धर्मावच्छिन्ननिरूपितव्याप्तिबलात्प्रवृत्तानुमाने विशेषबाधस्यादो-
षत्वं समानप्रकारकत्वेन विरोधित्वं व्यवस्थाप्य व्युत्पादितमुपा-
ध्यायैर्बाधग्रन्थे तावतापि च बाधितविषयलाघवज्ञानजन्यानुमि-
तेस्तदभाववति तत्प्रकारकत्वरूपभ्रमत्वावच्छिन्नभेदघटितप्रमात्वं
दुरुपपादमेवेति यदि चेत्यसङ्गतमेवेति वाच्यं तदवच्छिन्नाभा-
ववति तदवच्छिन्नप्रकारकत्वावच्छिन्नभेदघटितप्रमात्वस्य ल-
क्ष्यताप्रयोजकत्वोपगमेन पर्वतादौ वह्नित्वादिना बाधितवह्न्यादि-
विषयकानुमितेर्लक्ष्यतासम्भवेन तत्सङ्गतेः न चोक्तप्रमात्वस्य ल-
क्ष्यतानियामकत्वे जलपर्वतो वह्निमान् पर्वतो जलवह्निमानित्याद्य-
नुमितौ स्वरूपतो भासमानविषयांशे भ्रमरूपायां विशिष्टपक्षाद्य-
प्रसिद्ध्याऽव्याप्तिर्दुर्वारैव तथापि तादृशप्रमात्वसत्त्वादिति वा-
च्यम्। तदभाववति स्वरूपतस्तत्प्रकारकभ्रमभेदमपि प्रमात्व-
शरीरे निवेश्य तद्वारणसम्भवात्। केचित्तु यत्किञ्चिद्विधेयता-
वच्छेदकावच्छिन्नवत्पक्षावगाहित्वलक्षणपारिभाषिकप्रमात्वेनैव ल-
क्ष्यताया विवक्षितत्वात् लाघवज्ञानाधीनोक्तानुमितौ महानसीय-
त्वादिः प्रकारत्ववादिमतेऽपि वह्नित्वस्यैव विधेयतावच्छेदकतया
पक्षस्य तदवच्छिन्नवत्त्वमेव तादृशप्रमात्वानपायात्। गन्धप्राग-
भावकालावच्छिन्नो घटो गन्धवानित्यादौ नव्यनये तादृशकालाव-
च्छिन्नसमवायस्य सम्बन्धत्वात्तेन सम्बन्धेन च पक्षे विधेयाभावान्न
लक्ष्यता न चेदृशप्रमात्वस्य लक्ष्यतानियामकत्वे लिङ्गोपधानमते-
ऽप्यव्याप्यादिलिङ्गकानुमितेरलक्ष्यत्वाप्रसक्त्या लिङ्गोपहितेत्याद्य-
ग्रिमग्रन्थो नावतरतीति वाच्यम् इदानीं लाघवज्ञानजन्यानुमिते-
रलक्ष्यतायां क्षतिविरहात् प्रमान्यवृत्तिविषयतावत्त्वमेव लक्ष्यता-
नियामकं वक्तव्यमित्याशयात्तथोक्तिसङ्गतेरिति वदन्ति। प्रमापरमि-
ति। अत्रापि लक्ष्यतानियामकं यादृशं प्रमात्वं तदेव विपक्षणी-

यम् अतः किञ्चिदंशे प्रमात्वमादाय नातिप्रसङ्गस्य दुर्वारता ॥

(दी०) अव्याप्यापक्षधर्मयोस्तत्त्वादिना परामर्शेन जनितायां वस्तुतः साध्यवत्पक्षावगाहितया प्रमायामव्याप्तेः लिङ्गोपहितलैङ्गिकभाननिरासेनांशिकभ्रमत्वस्याप्ययोगात् परमेश्वरतादृशज्ञानजन्यत्वस्य चातिप्रसञ्जकत्वात् । अत एव व्याप्तिविशिष्टे पक्षधर्मता तज्ज्ञानं वेत्यादिकमपास्तम् ।

(गा०) अव्याप्यापक्षधर्मयोरिति । अव्याप्ये धूलीपटलादौ व्याप्यत्वावगाहिना अपक्षधर्मे च महानसत्वादौ पक्षधर्मत्वावगाहिना परामर्शेन जनितायां वस्तुतो वह्न्यादिमति पर्वतादौ वह्निमत्त्वावगाहिन्यां प्रमानुमितावव्याप्तेरित्यर्थः तज्जनकपरामर्शस्य व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धानवगाहित्वात् धूलीपटलादिसम्बन्धस्य व्याप्यप्रतियोगिकत्वात् महानसत्वादिसम्बन्धस्य पक्षाननुयोगिकत्वादिति भावः । नन्वनुमितौ पक्षांशे व्याप्यत्वेन लिङ्गभानोपगमादुक्तानुमितेर्यथायोगं व्याप्तिपक्षधर्मतांशे भ्रमरूपतया ऽलक्ष्यत्वैवेति कथमव्याप्तिरत आह लिङ्गोपहितेति । लिङ्गविशिष्टपक्षे साध्यभानस्य मणिकृता निराकार्यत्वेनोक्तानुमितेर्व्याप्त्याद्यंशे भ्रमत्वस्याप्ययोगादित्यर्थः । लिङ्गांशहितलैङ्गिकभाने परामर्शजन्यतावच्छेदककोटावव्यवहितोत्तरत्वादि न निवेश्यते लिङ्गविषयताया जन्यतावच्छेदकत्वोपगमेनैव व्यभिचारवारणसम्भवादितिरीत्या लाघवसत्त्वेऽपि मणिकृतां तत्रासम्मतेस्तदीयलक्षणं तन्मतमवलम्ब्य व्याख्यातुमुचितमिति भावः । ननूक्तानुमितिष्वपि व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धावगाहिभगवज्ज्ञानजन्यत्वसत्त्वान्नाव्याप्तिरित्यत आह परमेश्वरेति । तादृशेति । व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहीत्यर्थः अतिप्रसञ्जकत्वात् प्रत्यक्षादावतिव्याप्तत्वात् तथा चातिप्रसङ्गवारणाय तादृशसम्बन्धावगाहिनिश्चयत्वावच्छिन्नकारणता जन्यतानवच्छिन्नकार्यता वा निवेशनीया तथा चोक्तभ्रमजन्यानुमितौ भगवज्ज्ञानस्य उपादानप्रत्यक्षविधयैव कारणत्वं तस्याश्च जन्यत्वेनैव तज्जन्यतेति नाव्याप्तिनिरासस्सम्भव इति भावः । न च भगवज्ज्ञानस्य परामर्शत्वेनापि

जनकता नित्यस्येत्यादिव्याप्त्यभ्युपगमात् परामर्शहेतुतायां जन्यत्वस्याधिकस्यानिवेशादिति तादृशजनकतानिरूपितजन्यतामादायैव कूटलिङ्गकभ्रमानुमितावव्याप्तिवारणसम्भव इति वाच्यं तादृशानुमित्यव्यवहितपूर्वं तदधिकरणात्मनि व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धावगाहिनिश्चयासत्त्वेन व्यभिचारप्रसक्त्या तादृशनिश्चयत्वावच्छिन्नजन्यतावच्छेदकस्य तादृशानुमितितो व्यावर्तनीयतया तद्रूपावच्छिन्नजन्यतामादाय लक्षणसमन्वयासम्भवादिति भावः । इदमत्रावधेयम् वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्यापि न व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वेन हेतुता धूमत्वादिना धूलीपटलाद्यवगाहितदाकारभ्रमासंग्रहात् तथा च तद्रूपावच्छिन्नकारणताघटितलक्षणस्य भ्रमस्थलविशेषाव्याप्तिवारणायोपगमेऽसम्भव एव स्यात्कथमुक्ताव्याप्त्यभिधानं यदि किञ्चिल्लिङ्गसाध्यकानुमितिः प्रमात्मकपरामर्शादेव तदा तत्रोक्तरूपेण हेतुतासम्भवान्नासम्भव इत्युच्यते तदा तादृशानुमितिजनकपरामर्शकारणताघटितजातिघटितलक्षणोपगमेनोक्ताव्याप्तेरपि नापाकारः । वस्तुतस्तु विषयतायां विशिष्टान्वयबलादुक्तवाक्यतो व्याप्यवच्छिन्नहेतुनिष्ठावच्छेदकताकपक्षसम्बन्धविषयताकत्वेनापि परामर्शसामान्यतद्रूपस्यैव कारणतावच्छेदकत्वविवक्षया नासम्भव उक्तस्थलाव्याप्तिर्वा तद्रूपस्य भ्रमसाधारणत्वात् वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धस्य लक्षणवाक्यजन्यबोधे ऽवश्यं भानेन तद्विषयकत्वेन परामर्शोपस्थितावपि न तस्य कारणतावच्छेदकत्वम् अपि तु कारणतासामानाधिकरण्यमेव कूटलिङ्गकपरामर्शसाधारणोक्तरूपावच्छिन्नकारणतायां भ्रमभिन्नज्ञाने वास्तवव्याप्यप्रतियोगिकतादृशसम्बन्धावगाहित्वसामानाधिकरण्यसत्त्वेन कूटलिङ्गकभ्रमानुमितिपरलक्षणवाक्ये नावान्तरवाक्यार्थयोग्यत्वमपीति लक्षणवाक्यतो व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वेन कारणत्वे भासमाने व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वेनापि तद्भासेत तथा च व्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वोपलक्षितव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छि[illegible]पितजनकताया लक्षणघट-

कत्वादीश्वरज्ञानवृत्तिजनकतायाश्च तादृशत्वात् तादृशानुमितौ लक्षणसमन्वयः प्रत्यक्षादावतिव्याप्तिवारणञ्च सम्भवतीति ध्येयम् । अत एव व्रजमन्यानुमिताव्याप्तेरेव व्याप्तिविशिष्टे यः पक्षधर्मता इति सप्तमीतत्पुरुषेण वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वरूपकर्मधारयपर्यायार्थ एव पर्यवसानात् व्याप्तिविशिष्टे यत्पक्षधर्मताज्ञानमिति ज्ञानान्तेन विषयत्वार्थकसप्तमीतत्पुरुषसमासेन वास्तवव्याप्तिविशिष्टविषयकपक्षसम्बन्धज्ञानस्य लाभात् वह्निव्याप्यधूलीपटलवान्पर्वत इत्यादिज्ञानासंग्रहादिति भावः । आदिपदाद् व्याप्तिविशिष्टा व्याप्तिसमानाधिकरणा या पक्षधर्मता इत्यादिसमासस्य परिग्रहः । यद्यपि वक्ष्यमाणज्ञानान्तकर्मधारयपक्षे प्रकारितारूपस्येव तत्प्रकारकज्ञानाविषयत्वरूपस्य वैज्ञानिकस्य वैशिष्ट्यस्य विवक्षया ज्ञानान्तसप्तमीतत्पुरुषपक्षे ऽपि व्याप्तिविशेष्यतापन्नहेतुविषयत्वावच्छेदेन पक्षधर्मताविषयकज्ञानपर्यवसानादुक्ताव्याप्तिपरीहारः सम्भवति यत्र व्याप्तेरप्रसिद्धिस्तत्रापि व्याप्तिपदस्य वक्ष्यमाणकल्पे विलक्षणप्रकारितायामिव एतत्कल्पेऽपि विलक्षणप्रकारतानिरूपिताविशेष्यतायां लक्षणामुपगम्याव्याप्तिपरीहारसम्भवः पक्षधर्मत्वाप्रसिद्धिस्थलेऽपि वक्ष्यमाणैव गतिः तथापि व्याप्तिपदलक्षणाया आवश्यकत्वे तत्पुरुषमुपेक्ष्य लाघवात्कर्मधारय एव आश्रयितुमुचित इत्याशयेन तत्पुरुष उपेक्षितः ॥

मिश्रोक्तं द्वन्द्वपक्षं दूषयितुमुपन्यस्यति व्याप्तीति ।

(दी०) व्याप्तिविशिष्टश्च पक्षधर्मश्चेति द्वन्द्वाश्रयणाद्व्याप्तिविशिष्टत्वपक्षधर्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रेऽन्यत्र च द्वन्द्वस्य दर्शनात् । पदार्थद्वयाभेदबोधकाच्च कर्मधारयाद्भेदाभेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वन्द्वस्य भेदात् । विशिष्टपदस्य धर्मपरतया वा व्याप्तिवैशिष्ट्यपक्षधर्मत्वयोर्लाभात् । न चैवमालोको वह्निव्याप्यौ धूमवान् पर्वत इति ज्ञानजन्येऽतिप्रसङ्गः एकत्र तदुभयावगाहित्वस्योक्तत्वादिति केचित् ।

(गा०)व्याप्तिविशिष्टत्वपक्षधर्मत्वावगाहीति व्याप्तिसम्बन्धपक्षसम्ब-

जनकता नित्यस्येत्यादिव्याप्त्यनभ्युपगमात् परामर्शहेतुतायां अन्यतरस्याधिकस्यानिवेशादिति तादृशजनकतानिरूपितजन्यतामादायैव कूटलिङ्गकप्रमानुमितावव्याप्तिवारणसम्भव इति वाच्यं तादृशानुमित्यव्यवहितपूर्वं तदधिकरणात्मनि व्याप्तिविशिष्टप्रतियोगिकपक्षानुयोगिकसम्बन्धावगाहिनिश्चयासत्त्वेन व्यभिचारप्रसक्त्या तादृशनिश्चयत्वावच्छिन्नजन्यतावच्छेदकस्य तादृशानुमितितो व्यावर्तनीयतया तद्रूपावच्छिन्नजन्यतामादाय लक्षणसमन्वयासम्भवादिति भावः । इदमत्रावधेयम् वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्यापि न व्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धावगाहित्वेन हेतुता धूमत्वादिना धूलीपटलाद्यवगाहितदाकारभ्रमासङ्ग्रहात् तथा च तद्रूपावच्छिन्नकारणताघटितलक्षणस्य प्रत्यक्षविशेषाद्यतिव्याप्तिवारणायोपगमेऽसम्भव एव स्यात्कथमुक्ताव्याप्त्यभिधानं यदि किञ्चिल्लिङ्गसाध्यकानुमिति प्रमात्मकपरामर्शादेव तदा तत्रोक्तरूपेण हेतुतासम्भवान्नासम्भव इत्युच्यते तदा तादृशानुमितिजनकपरामर्शकारणताघटितजातिघटितलक्षणोपगमेनोक्ताव्याप्तेरपि नावकाशः । वस्तुतस्तु विषयतायां विशिष्टान्वयबलादुक्तवाक्यतो व्याप्त्यवच्छिन्नहेतुनिष्ठावच्छेदकताकपक्षसम्बन्धविषयताकत्वेनापि परामर्शलाभात्तद्रूपस्यैव कारणतावच्छेदकत्वविवक्षया नासम्भव उक्तस्थलाव्याप्तिर्वा तद्रूपस्य भ्रमसाधारणत्वात् वास्तवव्याप्तिविशिष्टप्रतियोगिकपक्षसम्बन्धस्य लक्षणवाक्यजन्यबोधे ऽन्वयभानेन तद्विषयकत्वेन परामर्शोपस्थितावपि न तस्य कारणतावच्छेदकत्वम् अपि तु कारणतासामानाधिकरण्यमेव कूटलिङ्गकपरामर्शसाधारणोक्तरूपावच्छिन्नकारणताया भगवज्ज्ञाने वास्तवव्याप्यप्रतियोगिकतादृशसम्बन्धावगाहित्वसामानाधिकरण्यसत्त्वेन कूटलिङ्गकप्रमानुमितिपरलक्षणवाक्ये नानान्तरवाक्यार्थयोग्यत्वमपीति लक्षणवाक्यतो व्याप्तिविशिष्टप्रतियोगिकत्वाविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वेन कारणत्वे भासमाने व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वेनापि तद्भासते तथा च व्याप्तिविशिष्टप्रतियोगिकत्वाविशिष्टपक्षसम्बन्धावगाहिज्ञानवृत्तित्वोपलक्षितव्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षसम्बन्धावगाहिज्ञानत्वावच्छिन्नत्वविशेषितजनकताया लक्षणघट-

पदार्थयोरिति । पदार्थयोः पदजन्यप्रतीतिविशेष्यतयाऽभिप्रेतयोः । पदार्थतावच्छेदकभेदेनेति । तथा च पदजन्यप्रतीतिविषयतयाऽभिप्रेतत्वरूपपदार्थतावच्छेदकादिसाधारणपदार्थत्वाश्रयस्य भेद एव द्वन्द्वनियामक इति भावः । एतेन नानार्थतरसरूपैकशेषस्थलेऽपि विशेष्यघटादिव्यक्तिभेदेन द्वन्द्वप्रसक्त्या सरूपैकशेषस्य द्वन्द्वापवादकताप्रवादसङ्गतिः । घटत्वेनैकघटतात्पर्यकघटकलसपदयोः प्रतिपाद्यघटघटत्वयोर्भेदेऽपि न द्वन्द्वः एकपदप्रतिपाद्येऽपरपदप्रतिपाद्यत्वावच्छिन्नभेदस्यापेक्षितत्वात् । वस्तुतः पदार्थयोर्भेदः पदार्थवैलक्षण्यं एकपदप्रतिपाद्यविशिष्टार्थस्यापरपदप्रतिपाद्यविशिष्टार्थापर्याप्तविषयताश्रयत्वं पर्यवसितं द्वन्द्वनियामकम् । एतेन मेयवाच्ययोरभेद इत्यादौ मेयपदप्रतिपाद्ये वाच्यादिपदप्रतिपाद्यत्वावच्छिन्नभेदासत्त्वेऽपि न क्षतिः गगनाकाशयोरभेद इत्यादौ च गगनादिपदं तद्वाच्यत्वावच्छिन्नपरमिति पदार्थतावच्छेदकभेदेन द्वन्द्वः । अथ द्वन्द्ववाधार्थं सरूपैकशेषानुशासनमित्ययुक्तं समस्यमानपदानामानुपूर्वीभिद्रूपवैरूप्यस्य द्वन्द्वनियामकतां स्वीकृत्यैव सरूपाणां द्वन्द्ववारणसम्भवादिति चेन्न न हि द्वन्द्ववाध एव सरूपैकशेषफलं किं तु तदननुशासने घटा इत्यादौ बहुत्वान्वयानुपपत्तिः सकृदुच्चरितः शब्दः सकृदर्थं प्रत्याययतीति व्युत्पत्तेरेकघटपदेन बहुघटबोधनासम्भवात् सकृदर्थं प्रत्याययतीत्यस्यानेकशक्तिविषयाबोधकत्वार्थकत्वेऽपि इन्द्रोपेन्द्रचन्द्रपरे हरय इत्यादावगतिः एकशेषानुशासने तु तत्र बहुपदेभ्य एव बहूनां बोधो बहुपदाश्रवणं च इतरेषां लोपात् एकशेषस्य इतरलोपपर्यवसितत्वात् । अत्राहुः सरूपैकशेषः कृतद्वन्द्वानामेव न तु द्वन्द्वापवादकता तस्य तथा सति सविभक्तिकानामेव द्वन्द्वसम्भवात् सविभक्तिकानामेव एकशेषस्य वाच्यतया श्रूयमाणपदोत्तरं सुब्विभक्तेरवस्थानापत्तेः लुप्तपदानां श्रूयमाणबहुवचनाप्रकृतितया तदर्थान्वितस्वार्थबहुत्वबोधकतायास्तत्रानुपपत्तेश्च समासोत्तरं बहुवचनोपगमे च समासान्तर्गतसकलपदानामेव समासोत्तरविभक्तिप्रकृतितया सामञ्जस्यात्(१) वस्तुतस्तु नेष्यत

(१) न च कृतद्वन्द्वानामेकशेषोपगमे पादा मसका इत्यादौ द्वन्द्वस्य मातापितृपूर्वसेनाद्वानां [illegible] इत्यादिपूर्वपदस्य [illegible] प्रसक्त्या बहुवचनानुपपत्तिरिति वाच्यम् । तत्र द्वन्द्वपदस्य एक-

न्धविषयकेऽयर्थं द्वन्द्वहरार इत्यादिन्यायेन भावप्रत्ययार्थेन व्याप्ति
विशिष्टव्याप्यन्वयादिति भावः । एवं च सम्बन्धविधया व्याप्ति
वैशिष्ट्यावगाहिज्ञानस्य तत्सामानाधिकरण्यानवगाहित्वेऽपि त
दवगाहित्वस्याक्षतत्वान्नासंग्रह । यद्यपि व्याप्तिवैशिष्ट्यादेर्ज्ञानवि
षयत्वान्वये व्याप्त्यादेरुपलक्षणत्वेऽतिप्रसङ्गात् विशेषणतैवोप
गन्तव्या तथा च तद्विशिष्टस्य वैशिष्ट्यादेर्ज्ञानविषयतान्वये वै
शिष्ट्यानुयोगिकविशेषणवैशिष्ट्यस्यापि तदन्वय आवश्यक
इति संसर्गतया व्याप्त्यादिवैशिष्ट्यावगाहिज्ञानं तु संग्रहमेव विशे
षणसंसर्गस्य तदन्वयोपगमे च उपाध्यायमतेऽपि नोक्तपरामर्शासंग्र
ह उक्तयुक्त्या लक्षणवाक्यजन्यबोधे व्याप्तिवैशिष्ट्यादिसामाना
धिकरण्यस्य तत्संसर्गतयैव भानात् तथापि संसर्गभानोपग
मे एतन्मते सकलपरामर्शासंग्रह उपाध्यायमते च व्याप्त्यादिवै
शिष्ट्यं यत्र संसर्गतया भासते तस्य तावता संग्रहेऽपि भ्रमस्थले
उभयसामानाधिकरण्याप्रसिद्ध्याऽव्याप्तिर्दुर्वारैवेति विशेषः । अ
थाभ्युपगम्यतां संसर्गे विशेषणप्रतियोगित्वस्य संसर्गतया भानं
तथापि तद्विषयताया अनुमितिकारणतावच्छेदककोटिनिवेशो मा-
नाभाव इति वक्ष्यमाणातिप्रसङ्गस्य वारणाय येन रूपेण परा
मर्शस्य लक्षणवाक्याद्भासमानस्य जनकतावच्छेदकता
या विलक्षणीयतया संसर्गानुयोगिकसम्बन्धविषयत्वघटितल
क्षणवाक्यप्रतिपाद्यतावच्छेदकरूपस्य चानुमितिजनकतानव
च्छेदकतयाऽसम्भव इति चेन्न प्रकारतात्वस्य स
संसर्गप्रतियोगित्वविषयतानिरूपितविषयतात्वरूपतया प्रकारता
त्वेन व्याप्तिप्रकारतानिवेशने संसर्गप्रतियोगित्वविषयताया
अपि कारणतावच्छेदकगर्भे निवेशात् वैशिष्ट्यानुयोगिकसंसर्ग
विशेषानवच्छिन्नत्वेनोपस्थितव्याप्तिविषयताघटितसमुदायं तादृश
सम्बन्धानवच्छिन्नत्वस्योपलक्षणत्वोपगमेन तद्वा परित्यज्य इत
रथा कारणतावच्छेदकत्वविवक्षणसम्भवाच्च । ननु पदार्थयोरभेदे न
द्वन्द्वस्य साधुता एकघटादिपद[illegible]द्वादिपदे तददर्शनात् तथा
च प्रकृते व्याप्तिविशिष्टपदपक्षधर्मपदयोर्द्वन्द्वसाधुत्वानुरोधेन वि
भिन्नधर्मिपरत्वापत्तेः एकधर्मिनिष्ठव्याप्तिवैशिष्ट्यपक्षधर्मत्वावगा
हिपरामर्शासंग्रह इत्याशङ्क्य एकधर्मिपरत्वेऽपि द्वन्द्वमुपपादयति

च व्याप्तिवैशिष्ट्यावगाहितावच्छेदकविषयितानिरूपकधर्मिविषयिताकत्वावच्छेदेन पक्षधर्मत्वावगाहित्वं पर्यवसितम् । एतादृशार्थस्य लक्षणवाक्ये एकत्रेति पदपूरणादिना लाभो बोध्यः।

(दी०) तदप्यसत् । एवमपि धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीतिज्ञानजन्येऽतिप्रसङ्गात् । एकरूपेण तदुभयावगाहित्वस्योक्तौ च मीमांसकमतानुप्रवेशात् । मिथस्तदुभयोपश्लेषावगाहित्वस्य च परामर्शाव्यापकत्वात् । न च तदुभयविषयत्वानियतधर्मावच्छिन्नकारणतामतियोगिककार्यताशालित्वमर्थः पक्षधर्मतापदोपादानवैयर्थ्यात् ।

(गा०) एवमपि एकत्रोभयावगाहिताविवक्षणेऽपि ननु एकधर्मावच्छिन्नधर्मिण्युभयावगाहित्वविवक्षणान्न धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञानजन्ये ऽतिप्रसङ्ग इत्यत आह एकरूपेणेति । मीमांसकमतानुप्रवेशादिति मीमांसकैर्यथा वह्निव्याप्यवानयमित्यादिव्याप्यतावच्छेदकरूपानवगाहिपरामर्शादनुमितिरपलप्यते धूमो वह्निव्याप्यो धूमवान् पर्वत इत्यादिसमूहालम्बनाच्चानुमितिरभ्युपेयते तेषामेकरूपेण व्याप्तिपक्षधर्मताज्ञानस्यानुमितिहेतुत्वात् तयोक्तरीत्या लक्षणं व्याचक्षाणेनापि तत्र तत्रानुमितिरपलपनीया स्वीकार्या च अन्यथाऽव्याप्त्यतिव्याप्त्योः प्रसङ्गादित्यर्थः तथा च विशिष्टपरामर्शत्वेनानुमितिहेतुतावादिनां नैयायिकानां नोक्तरूपावच्छिन्नकारणताया लक्षणे प्रवेशसम्भव इति न्यायमते ऽव्याप्त्यादिदोष आवश्यक एवेति भावः । यद्यपि धर्मिनिरूपितैकविषयितावच्छिन्नतदुभयविषयिताविवक्षणे न समूहालम्बनजन्ये ऽतिप्रसङ्गः न वा व्याप्यतावच्छेदकानवगाहिपरामर्शजन्यानुमित्यसंग्रहः तथापि व्याप्तिपक्षधर्मत्वाप्रसिद्धिस्थले ऽव्याप्तिरेवैतत्कल्पोपेक्षाबीजमित्यवधेयम् । ननु परस्परोपश्लेषेणोभयावगाहित्वविवक्षणान्न समूहालम्बनजन्ये ऽतिप्रसङ्गः तत्त्वैकतरसम्बन्धविषयकत्वावच्छेदेनापरावगाहित्वं सम्बन्धः सामानाधिकरण्यमित्यत आह मिथ इति । परामर्शाव्यापकत्वादिति । सम्बन्धावगाहिताया विशिष्टबुद्धय-

पदैकदेशः उक्तव्युत्पत्तेरप्रामाणिकत्वात् सति तात्पर्ये युगपदनेकार्थबोधस्येष्टत्वादिति । अन्यत्र नीलघटयोरभेद इत्यादौ अत्र पदार्थतावच्छेदकगतमेव द्वित्वादिकं द्विवचनादिना प्रत्याय्यते साधुत्वार्थकमेव वा द्विवचनादिकं उर्वश्यप्सरस इत्यादौ बहुवचनवत् तत्रापि प्रकृत्यर्थगतगुणादिकमादाय बहुत्वबोधकत्वमिति तु न युक्तं गुणादेरप्रकृत्यर्थत्वात् तत्साधारणबहुत्वबोधोपगमे ऽतिप्रसङ्गात् अजहत्स्वार्थलक्षणया गुणादीनामपि प्रकृत्यर्थत्वोपगमे मुख्यार्थपरपदोत्तरबहुवचनस्य पदसाधुत्वमात्रार्थतायामविवादादित्यलमप्रस्तुतानल्पजल्पनेन । नन्वेकधर्मिबोधकपदयोरपि द्वन्द्वोपगमे द्वन्द्वस्य कर्मधारयभेदानुपपत्तिः तादृशपदद्वयसमासस्यैव कर्मधारयत्वात् इत्यत आह पदार्थेति । तथा च वस्तुनोऽभिन्नधर्मिबोधकपदद्वयकसमासत्वं न कर्मधारयलक्षणमपि तु एकपदार्थे ऽपरपदार्थाभेदबोधकसमासत्वमेवेति भावः । भेदाभेदोदासीनत्वं भेदाभेदज्ञानाविषयत्वं भिन्नतया ऽभिन्नतया वा ऽभासमानत्वमेवेतिभावः । भेदोपादानं दृष्टान्तविधया अभेदभानव्यवच्छेदेनैव कर्मधारयविशेषोपपत्तेः कर्मधारयस्थलेऽभेद इव इतरेतरद्वन्द्वस्थलेऽपि पदार्थस्य तत्तावच्छेदकस्य वा भेदो यथायोगं भासत इति भ्रमनिराकरणाय वा तदुपादानं आस्तां वा पदार्थभेदेनैव द्वन्द्वः तथापि तत्प्रत्ययान्तेन विशिष्टान्तस्य द्वन्द्वोपगमादुक्तार्थतासम्भव इत्याशयेनाह विशिष्टपदस्येति । भावक्तान्ततोपगमेनेतिशेषः । केचित्तु व्याप्तिविशिष्टपदपक्षधर्मपदयोर्द्वन्द्वे पक्षधर्मपदस्याल्पाच्तरत्वेन पूर्वनिपातापत्तितः पक्षधर्मतापदेन द्वन्द्वमाहेत्यवतारयन्ति । धर्मपरतया वैशिष्ट्यपरतया ज्ञानजन्ये अनुव्यवसायादौ अतिप्रसङ्ग इति तादृशसमूहालम्बनस्यापि व्याप्तिवैशिष्ट्यपक्षधर्मत्योभयावगाहितायाः अक्षतत्वादिति भावः। एवं च यथाश्रुताभिप्रायेण तत्त्वेन जनकताविवक्षणे इयसम्भवो बोध्यः । अनुमित्यजनकोपदर्शितसमूहालम्बनसाधारणस्य तदुभयावगाहिज्ञानत्वस्य तज्जनकतानवच्छेदकत्वात् । एकत्रेति एकधर्मिविषयकत्वावच्छेदेनेत्यर्थः तथा

हेत्वित्यत्र वा दृष्टान्तत्वेनापगमय । इति १ पुस्तके अधिकः पाठः ।

रेव तद्व्यक्तित्वेनैव हेतुत्वात् । न च योगिनां तद्विषयकज्ञानस्यावश्यं सत्त्वात् तत्साधारणतद्विषयकत्वेन हेतुत्वं कल्पनीयं तच्चोभयत्रैरयपीति वाच्यम् । यत्र भ्रमरूप एव तादृशपरामर्शस्तत्र तद्व्यक्तित्वेनैव हेतुत्वादव्याप्तेर्दुर्वारत्वादिति तत्र जातिघटितलक्षणमेव शरणीयम् । पक्षधर्मताविषयकत्वमात्रनियतधर्मावच्छिन्नकारणताप्रवेशे साधारणधर्मवत्ताज्ञानजन्यतामादाय संशये प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानजन्यतामादाय च धूमवत्पर्वतो नास्तीत्यभावप्रत्यक्षे घटवानित्यादिविशिष्टवैशिष्ट्यबोधे चातिव्याप्तेर्व्याप्तिवैशिष्ट्यविषयकत्वोपादानमावश्यकमित्याशयेन पक्षधर्मतांशवैयर्थ्यमाह पक्षेति । न च व्याप्तिवैशिष्ट्यविषयकत्वनियतधर्मावच्छिन्नकारणताप्रवेशे वह्निव्याप्यो धूमो द्रव्यं न वेत्याकारकसंशयं व्याप्तिविषयकधर्मिज्ञानजन्यतामादायातिप्रसङ्गः इति वाच्यं पक्षधर्मतापदोपादानेऽपि तद्दोषतादवस्थ्यात् तादृशधर्मिज्ञानादेरपि धर्मिवृत्तित्वावगाहित्वात् न च स्वधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नवृत्तित्वावगाहित्वानिवेशान्न दोष इति वाच्यं तादृशसंशयधर्मितावच्छेदकावच्छिन्ने कोटिद्वयसहचरितधर्मवत्ताज्ञानस्य तथात्वाद्व्याप्तिविषयकत्वाच्च तज्जन्यतामादायातिप्रसङ्गस्य दुर्वारत्वात् न च तादृशदोषवारणाय विशेषणान्तरप्रक्षेप आवश्यकः तथा च व्याप्तिवैशिष्ट्यविषयकत्वघटितलक्षणे व्याप्यविषयकत्वस्य चरमज्ञाने व्याप्यविषयकवृत्तित्वस्य जन्यतायां वा निवेशेनैव पक्षधर्मताघटितलक्षणेऽपि यदंशे पक्षधर्मतावगाहिज्ञानं जनकं तदंशे पक्षधर्मतानवगाहित्वस्य चरमज्ञाने तदनवगाहिवृत्तित्वस्य जन्यतायां वा निवेशनेन प्रतीकारः सम्भवति धूमवत्पर्वतो नास्तीत्याद्यभावप्रत्यक्षादौ धूमाद्यंशे पक्षधर्मताज्ञानत्वेन जनकत्वेऽपि तादृशप्रत्यक्षादेरपि तदंशे पक्षधर्मत्वावगाहित्वात् साधारणधर्मांशे पक्षधर्मतावगाहिज्ञानजन्ये संशयेऽपि सामग्रीवशेन साधारणादिधर्मांशे पक्षधर्मताभानात्प्रत्यक्षे उपस्थितवस्तुमानसामग्र्या नियतत्वात् चरमज्ञानपदस्य निश्चयपरत्वात् संशयत्वस्यार्थसमाजग्रस्ततया कार्यतानवच्छेदकत्वमते च न संशयातिव्याप्तिरिति पक्षधर्मतोपादानवैयर्थ्यादिन्द-

प्रामाणिकतया व्याप्तिवैशिष्ट्यावगाहित्वप्रकारकपरामर्शस्य तत्सामानाधिकरण्यानवगाहित्वादिति भावः । यद्यप्युभयसामानाधिकरण्यावगाहितायाः परामर्शाव्यापकत्वस्य प्रागेवाभिहिततया इदानीम् उक्तशङ्का नावतरितुमर्हति तथापि पूर्वमुपाध्यायमते भ्रान्तानुमित्यव्याप्तेरेव निर्भरस्य कृतत्वात् सम्बन्धसम्बन्धावगाहित्वाभ्युपगमेन शङ्कासम्भवो बोध्यः परामर्शाव्यापकत्वादित्युपलक्षणम् । उक्तार्थस्य लक्षणवाक्यादलाभोऽपि दोषो बोध्य उभयविषयकत्वविशिष्टस्य निरूपितत्वेन जन्यतायामन्वयो विवक्षित इत्युभयविषयकत्वस्य जनकतावच्छेदककोटिप्रविष्टत्वस्य लाभाज्ज्ञानुव्यवसायादावतिव्याप्तिरिति शङ्कते न चेति । तदुभयविषयकत्वे तद्विशिष्टज्ञानत्वे चाऽवच्छेदकत्वपर्याप्तिनिवेश ऽसम्भव सहायान्यत्वादेरधिकस्यानुमितिजनकतावच्छेदककुक्षिनिवेशादतस्तत्पर्याप्त्यनिवेशसूचनाय घटितार्थकं नियतपदम् एतेनोभयविषयकत्वनियतत्व यदि तद्व्याप्यत्व तदा व्याप्तिवैशिष्ट्यविषयकत्वपक्षधर्मत्वविषयकत्वोभयाभाववद्वृत्तिस्वरूपायां उभयविषयकत्वव्याप्तौ केवलव्याप्तिवैशिष्ट्यविषयकत्वाभावपदवृत्तित्वाघटितस्योभयत्वावच्छिन्नाभावस्य निवेशाद्भिन्नपक्षधर्मत्वांशवैयर्थ्यप्रदर्शनासङ्गतिः यदि च ज्ञानत्वस्य तदुभयाभाववद्वृत्तितया विशेषणान्तरविशिष्टज्ञानत्वरूपपरामर्शत्वे तदभावो दुर्घट इति स्वव्यापकतत्त्वरूपव्याप्तिरेव निवेशनीयेत्युच्यते तदाप्युभयत्वावच्छिन्नविशेषणतया व्यापकतायाः प्रवेशे व्याप्तिवैशिष्ट्यविषयकत्वत्वावच्छिन्नविशेषणतया तदप्रवेशाद्वैयर्थ्यं दुर्वारमेव । एतदुभयविषयकत्वनियतकारणतानिवेशेनापि उपपत्तेस्तन्नियतधर्मावच्छिन्नत्वनिवेशनमप्यफलं नियतत्वांशस्य लक्षणवाक्यादनुपस्थित्या तद्घटितलक्षणालाभश्चेति दूषणमप्यपास्तम् एव कयाचिदुभयविषयकत्वव्याप्यतद्व्यक्तित्वावच्छिन्नविषयादिकारणतामादाय परामर्शानुव्यवसायादावतिव्याप्तिवारणायानेकवृत्तित्व विषयिताघटितधर्मावच्छिन्नत्वं वा कारणतायामधिकं निवेश्यमित्यप्यनुपादेयमेव यत्रान्तरिक्षसाध्यकस्थले एक एव परामर्शस्तत्रानेकवृत्तित्वस्य उभयविषयकत्वावच्छिन्नत्वस्य च कारणताविशेषणत्वेऽव्याप्ति-

दोषः विशृङ्खलरीत्या भासमानपदार्थविषयतयोरवच्छेद्यावच्छेदकभावविरहात् पक्षधर्मताविषयताकत्वावच्छिन्ने ज्ञानरूपोद्देश्ये व्याप्तिप्रकारकत्वस्य विधेयतया तयोरवच्छेद्यावच्छेदकभावलाभोऽपि व्युत्पत्तिसिद्ध एवेति चेत् । एवमपि वह्निव्याप्यकालीनधर्मवानित्यादिज्ञानव्यावर्तनमशक्यं येन सम्बन्धेन यस्य प्रकारता तत्सम्बन्धविषयकत्वेनैव तत्प्रकारकत्वस्यावच्छेद्यावच्छेदकभावोपगमे पक्षानुयोगिकसम्बन्धस्यानुमितिजनकज्ञाने व्याप्यस्यैव सम्बन्धतया भानात् तद्विषयकत्वेन व्याप्यप्रकारकत्वस्यैवावच्छेद्यावच्छेदकभावः स्यान्न तु व्याप्तिप्रकारकत्वस्येत्यसम्भव एव । एवं यत्र अन्यानुयोगिक एव सम्बन्धो व्याप्यस्य पक्षांशे भातस्तादृशभ्रमजन्यानुमितावव्याप्तिरपि दुर्वारा तादृशभ्रमे वास्तवपक्षानुयोगिकसम्बन्धस्य पक्षधर्मतापदार्थस्याभानात् पक्षांशे हेतुतावच्छेदकसम्बन्धेन हेतुप्रकारकज्ञानपर्यन्तं च पक्षधर्मताया ज्ञानमिति समासेनाशक्यप्रतिपादनमिति न तस्य पक्षधर्मताज्ञानशब्दार्थता शब्दव्युत्पत्त्यनादरे चालं समासविशेषमादृत्य व्यात्ययेति । अत्राहुः पक्षे धर्मतया हेतुतावच्छेदकसम्बन्धेन ज्ञानमिति तृतीयासमासगर्भसप्तमीसमासादरात् पक्षविशेष्यकत्वावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारताकत्वविशिष्टज्ञानं पक्षधर्मताज्ञानपदार्थः पक्षधर्मतयेत्यत्र तृतीयाया एवावच्छिन्नप्रकारताकत्वार्थकत्वात् तत्र व्याप्तिप्रकारताकत्वान्वये च हेतुनिष्ठनिरुक्तप्रकारकत्वावच्छिन्नव्याप्तिप्रकारकत्वयज्ज्ञानलाभः व्याप्तिहेत्वोः साक्षाद्विशेष्यविशेषणभावेन तद्विषयकत्वयोरनुमितिजनकपरामर्शेऽवच्छेद्यावच्छेदकभावो ऽक्षत एवेति सर्वत्रानुमितौ लक्षणसमन्वयः । एवमपि व्याप्तिपदप्रतिपाद्यविशिष्टार्थाप्रसिद्धिस्थले ऽव्याप्तिरित्याशङ्कते यद्यपीति । वह्निव्याप्येन्धनवानित्याकारकज्ञानविषयसाध्याभाववद्वृत्तित्वाभावरूपव्याप्तिरपि हेत्वन्तरे प्रसिद्धैवातो हेतुसमानाधिकरणेत्यादिव्याप्तेर्विशेषशब्देनोल्लेखः अखण्डेत्यनेन व्याप्तिघटकहेत्वादिपदार्थानां खण्डशः प्रसिद्धिमात्रमिति सूचितं तावतैव समाधानमभ्युपपत्स्यत इत्यपि । अत्र व्याप्यप्रसिद्धिः साध्यतावच्छेदके स्वविशेषणहेतुसमाना-

भिधानमेवोचितमिति वाच्यम् । एवमपि सादृश्यादौ स्वविषयधर्मि वृत्तिताज्ञानजन्याया तत्र तदनवगाहिन्यामुपमितावतिव्याप्तेः । ननु व्याप्तिवैशिष्ट्यघटितलक्षणेऽपि वह्निव्याप्यधूमवत्पर्वतसदृशं महानसमित्यतिदेशवाक्यार्थज्ञानजन्यायामुपमितावतिव्याप्तिर्दुर्वारैवेति चेन्न । एतादृशातिव्याप्तेरुभयपददानेऽपि सत्त्वात्केवलपक्षधर्मताघटितलक्षणे धूमवत्पर्वतसदृशं महानसमितिज्ञानजन्योपमितावतिव्याप्तेर्दुर्वारत्वात्तदुपेक्षितम् । केचित्तु साधारणज्ञानजन्यतामादाय सत्तायातिव्याप्तिवारणमेव पक्षधर्मताघटितलक्षणोपेक्षाबीजमित्याहुः । एतन्मते व्याप्तिवैशिष्ट्यघटितलक्षणेऽपि वह्नितदभावोभयसहचरितधर्मव्याप्यधूमवान् पर्वत इति ज्ञानजन्यसत्तायेऽतिव्याप्तिर्दुर्वारैवेति बोध्यम् ।

मिश्रास्तूक्तज्ञानान्तकर्मधारयपक्षमवलम्ब्य समाधातुमुपक्रमन्ते व्याप्तिविशिष्टमिति ।

(दी०) व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमिति तु स्यात् । यद्यप्यत्रापीन्धनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणेन्धनवानित्यादिपरामर्शजन्येऽव्याप्तिरखण्डव्याप्तेरप्रसिद्धेः प्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौ सुतरां तथा तथापि तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वं विवक्षितम् । न च व्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् ॥

(गा०) व्याप्तिविशिष्टस्य यदि व्याप्याश्रयस्य तदाऽनुमितिजनकज्ञानमात्रस्य न तथात्वमपि तु लिङ्गस्यैवेत्यसङ्गतिरतस्तद्व्याचष्टे व्याप्तिप्रकारकमिति । व्याप्तिविशिष्टपदेन प्रकारिताख्यवैशिष्ट्यस्य व्याप्तिपदेन वा लक्षणया व्याप्तिप्रकारिता वा विवक्षितत्वादिति भावः । अन्यथा व्याप्तेः पक्षधर्मताया वा भ्रमेणानुमितावव्याप्तिपरीहारेऽपि धूमो वह्निव्याप्यो द्रव्यवान् पर्वत इत्यादिज्ञानजन्येऽतिव्याप्तिर्दुर्वारैव । अथ व्याप्तिप्रकारकपक्षधर्मताविषयकयोरप्यवच्छेदकत्वाभावाविषयकज्ञानाव

ऽनिवेश्य विशिष्टव्याप्त्यादेरेव विषयितया ऽनुमितिजनकतावच्छेदकत्वोपगमात् तादृशजनकताघटितलक्षणस्य व्याप्तिपदार्थघटितस्य निष्प्रत्यूहत्वात् न च प्रमेयत्वकेवलसामानाधिकरण्यत्वादिना व्याप्त्याद्यवगाहिज्ञानवारणाय तादृशानुमितिजनकतायामपि हेत्वादिपदार्थानां परस्परोपश्लेषावगाहित्वमेवावच्छेदकमुपगन्तव्यमिति वाच्यं प्रमेयत्वाद्यवच्छिन्ननिरूपितविषयितया अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणहेत्वादिसाध्यसामानाधिकरण्यान्तपदार्थस्तोमघटितविशिष्टपदार्थप्रति यौगिकसम्बन्धत्वविरहेण विषयितासम्बन्धेन तादृशविशिष्टविषयस्य प्रमेयत्वादिना व्याप्त्याद्यवगाहिज्ञानव्यावर्तकतया ततोऽनुमित्यप्रसङ्गात् स्वरूपतो येषां व्याप्तिघटकता रूपान्तरेण तदवगाहितावत्पदार्थस्तोमात्मकव्याप्तिज्ञानवारणाय स्वरूपतस्तत्प्रकारकत्वनिवेशनस्यावश्यकत्वाच्च विशिष्टव्याप्तिनिवेशासम्भव इत्यपि न वाच्यं विशेषणानवच्छिन्नतत्तत्पदार्थघटितविशिष्टनिरूपिताविलक्षणविषयितया एव विषयितात्वेन जनकतावच्छेदकतापर्याप्त्यधिकरणतादृशविशिष्टविषयसम्बन्धतया तादृशविषयेणोक्तज्ञानव्यावृत्तेः अत एव दीधितिकारोऽपि परामर्शग्रन्थे अन्यथाख्यात्यनभ्युपगन्तृमते व्यापकताघटकपदार्थानां खण्डशः परस्परोपश्लेषावगाहित्वमनिवेश्यापि विशिष्टविषयपुरस्कारेण व्यापकताज्ञानहेतुता सम्भवतीति अवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमतिरिच्यत इत्यनेन दर्शयिष्यति । विशिष्टविषयस्य प्रमानिष्ठजनकतावच्छेदकत्वाभिप्रायेणैव च व्याप्त्यादिप्रकारकत्वमनभिदधानो वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणतेत्यादिना जातिघटितलक्षणमभिधास्यते तत्र च वह्न्यादिपदं दर्शितसाध्यविशेषपरमित्यलं पल्लवितेन । *तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमिति* । साधनाधिकरणादिपदार्थानाम् अधिकरणाधेयत्वादिपदार्थांशे तत्तत्सम्बन्धावगाहित्वमित्यर्थः । तदंशे तेन सम्बन्धेन तत्तत्प्रकारकत्वमितियावत् तेनात्मादीनां समवायसम्बन्धाप्रसिद्धावपि नोक्तप्रमानुमित्यसंग्रहः हेत्वादिप्रकारतापि हेतुतावच्छेदकावच्छिन्नत्वेनैव निवेश्या अतो धूमत्वादिना धूलीपटलादिभ्रमसंग्रहः । यद्यप्येवम-

धिकरणाभावप्रतियोगितानवच्छेदकत्वाभावेन । अत्र हेतुव्यापकतावच्छेदकत्वस्येन्धनत्वादौ वह्नित्वावच्छिन्नसामानाधिकरण्यस्य प्रकृतहेतावपि प्रसिद्धा व्याप्तिविशिष्टत्वनेन साध्यतावच्छेदक प्रकृतहेतुव्यापकतावच्छेदकत्वावगाहित्वे सति प्रकृतहेतौ साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यावगाहित्वविवक्षया न दोष इत्यतो व्यापकत्वादिघटकपदार्थानामपि खण्डशो निवेशाय अवृत्तिसाध्यहेतुकस्थले ऽव्याप्तिं शङ्कते प्रमानुमितेरिति । भ्रमस्य पूर्ववदलक्ष्यत्वसम्भवादुक्तं लक्ष्यत्वे चेति । भावसाध्यकानुमितौ साध्यस्य नियमतो विशेषणतया इदमाकाशवदित्याकारिकैवानुमितिर्वाच्या प्रतिज्ञाजन्यबोधस्यानुमितिसमानप्रकारकत्वाद्यनियमेन शब्दलाघवादपि आकाशमात्मन इत्युक्तं पुनरा हेतुव्यापकत्व साध्यसामानाधिकरण्ययो खण्डश उपादानेऽपि तथा अव्याप्ति र्हेत्वधिकरणसाध्याधिकरणयोरप्रसिद्धा हेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरप्रसिद्धेरिति भाव । अत्र भ्रमानुमितेरलक्ष्यत्वेऽपि वास्तवव्यापकत्वावगाहित्वनिवेशे धूमवत्त्वादिना पदार्थान्तरावगाहिधूमव्यापकवह्निसमानाधिकरणधूमवानयमित्यादिज्ञानजन्याया प्रमानुमितावव्याप्ति धूमाधिकरणाद्यनवगाहनेन तादृशज्ञानस्य वास्तवधूमाधिकरणादिधर्मितव्यापकत्वाद्यनवगाहित्वादिति तु न शङ्क्य तथा सति तादृशभ्रमजन्यानुमितावपि प्रमात्मकस्य वह्निव्याप्य धूमवान् पर्वत इत्याकारकवास्तवव्यापकत्वाद्यवगाहिपरामर्शस्य स्वरूपयोग्यतया लक्षणगमनसम्भवात् इदं च जातिघटितयथाश्रुत-लक्षणाभिप्रायेण जातिघटितनिष्कृष्टलक्षणस्य प्रमारूपपरामर्शाजन्यानुमितिवृत्तिजातिमादाय सर्वत्र लक्षणसमन्वयात् न च परामर्शानुव्यवस्था यादृशव्याप्तिनिरासाय व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वा-वच्छिन्ननिरूपितजन्यतायां विवक्षणीयतया धूमादिलिङ्गकपरामर्शस्यापि उक्तभ्रमसाधारण्याय व्याप्त्यादिघटकतावत्पदार्थानां परस्परोपरक्तावगाहिनिश्चयत्वेनैव जनकत्वस्योपगन्तव्यत्वात् न वास्तवव्याप्त्याद्यवगाहिनामघटितलक्षणसमन्वय इत्यपीति वाच्यं सर्वत्र विषये भ्रमस्य भ्रमजन्यानुमितेश्चाप्रामाणिकतया यत्साध्यलिङ्गपक्षकपरामर्शा अनुमितिजनकपरामर्शो वा प्रमारूप एव तत्साध्यपक्षलिङ्गकानुमितौ लाघवेन व्याप्तिघटकतत्तत्पदार्थानां खण्डशो

ऽनिवेश्य विशिष्टव्याप्त्यादेरेव विषयितया ऽनुमितिजनकतावच्छेदकत्वोपगमात् तादृशजनकताघटितलक्षणस्य व्याप्तिपदार्थघटितस्य निष्प्रत्यूहत्वात् न च प्रमेयत्वकेवलसामानाधिकरण्यत्वादिना व्याप्त्याद्यवगाहिज्ञानवारणाय तादृशानुमितिजनकतायामपि हेत्वादिपदार्थानां परस्परोपश्लेषावगाहित्वमेवावच्छेदकमुपगन्तव्यमिति वाच्यं प्रमेयत्वाद्यवच्छिन्ननिरूपितविषयिताया अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणहेत्वादिसाध्यसामानाधिकरण्यान्तपदार्थस्तोमघटितविशिष्टपदार्थप्रतियोगिकसम्बन्धत्वविरहेण विषयितासम्बन्धेन तादृशविशिष्टविषयस्य प्रमेयत्वादिना व्याप्त्याद्यवगाहिज्ञानव्यावर्तकतया ततोऽनुमित्यप्रसङ्गात् स्वरूपतो येषां व्याप्तिघटकता रूपान्तरेण तदवगाहितावत्पदार्थस्तोमात्मकव्याप्तिज्ञानवारणाय स्वरूपतस्तत्प्रकारकत्वनिवेशनस्यावश्यकत्वाच्च विशिष्टव्याप्तिनिवेशासम्भव इत्यपि न वाच्यं विशेषणानवच्छिन्नतत्तत्पदार्थघटितविशिष्टनिरूपिताविलक्षणविषयिताया एव विषयितात्वेन जनकतावच्छेदकतापर्याप्त्यधिकरणतादृशविशिष्टविषयसम्बन्धतया तादृशविषयेणोक्तज्ञानव्यावृत्तेः अत एव दीधितिकारोऽपि परामर्शग्रन्थे अन्यथाख्यात्यनभ्युपगन्तृमते व्यापकताघटकपदार्थानां खण्डशः परस्परोपश्लेषावगाहित्वमनिवेश्यापि विशिष्टविषयपुरस्कारेण व्यापकताज्ञानहेतुता सम्भवतीति प्रवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमतिरिच्यत इत्यनेन दर्शयिष्यति । विशिष्टविषयस्य प्रमानिष्ठजनकतावच्छेदकत्वाभिप्रायेणैव च व्याप्त्यादिप्रकारकत्वमनभिदधानो वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नप्रकारणतेत्यादिना जातिघटितलक्षणमभिधास्यते तत्र च वह्न्यादिपदं दर्शितसाध्यविशेषपरमित्यलं पल्लवितेन । तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमिति । साधनाधिकरणादिपदार्थानाम् अधिकरणाधेयत्वादिपदार्थांशे तत्तत्सम्बन्धावगाहित्वमित्यर्थः । तदंशे तेन सम्बन्धेन तत्तत्प्रकारकत्वमिति यावत् तेनात्मादीनां समवायसम्बन्धाप्रसिद्धावपि नोक्तप्रमानुमित्यसंग्रहः हेत्वादिप्रकारतापि हेतुतावच्छेदकावच्छिन्नत्वेनैव निवेश्या अतो धूमत्वादिना धूलीपटलादिभ्रमसंग्रहः । यद्यप्येवम-

धिकरणाभावप्रतियोगितानवच्छेदकत्वासत्त्वेन । अत्र हेतुव्यापकतानवच्छेदकत्वस्येन्धनत्वादौ वह्नित्वावच्छिन्नसामानाधिकरण्यस्य प्रकृतहेतावपि प्रसिद्धा व्याप्तिर्विशिष्टेत्यनेन साध्यतावच्छेदके प्रकृतहेतुव्यापकतावच्छेदकत्वावगाहित्वे सति प्रकृतहेतौ साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यावगाहित्वविवक्षया न दोष इत्यतो व्यापकत्वादिघटकपदार्थानामपि खण्डशो निवेशाय अवृत्तिसाध्यहेतुकस्थलेऽव्याप्तिं शङ्कते प्रमानुमितेरिति । प्रमस्य पूर्वदलस्यत्वत्प्रसङ्गादुक्तं लक्ष्यत्वे चेति । भावसाध्यकानुमितौ साध्यस्य नियमतो विशेषणतया इदमाकाशवदित्याकारिकैवानुमितिर्नोव्या प्रतिज्ञाजन्यत्वे तस्यानुमितिसमानप्रकारकत्वादिति यमेन शब्दवत्तयाकाशमात्मन इत्युक्तं सुतरां हेतुव्यापकत्वसाध्यसामानाधिकरण्ययो खण्डश उपादानेऽपि तथा अव्याप्तिर्हेत्वधिकरणसाध्याधिकरणयोरप्रसिद्ध्या हेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरप्रसिद्धेरिति भाव । अत्र प्रमानुमितेरलक्ष्यत्वेऽपि धाकतव्यापकत्वावगाहित्वनिवेशे धूमवत्त्वादिना पदार्थान्तरावगाहिधूमव्यापकवह्निसमानाधिकरणधूमवानयमित्यादिज्ञानजन्यायां प्रमानुमितावव्याप्ति धूमाधिकरणावगाहनेन तादृशज्ञानस्य वास्तवधूमाधिकरणादिघटितव्यापकत्वाद्यनवगाहित्वादिति तु न शङ्क्यं तथा सति तादृशभ्रमजन्यानुमितावपि प्रमात्मकस्य वह्निव्याप्यधूमवान् पर्वत इत्याकारकतत्तद्व्यापकत्वाद्यवगाहिपरामर्शस्य स्वरूपयोग्यतया लक्षणगमनसम्भवात् इदं च तात्पर्यघटितयथाश्रुतलक्षणाभिप्रायेण जातिघटितनिष्कृष्टलक्षणस्य प्रमारूपपरामर्शजन्यानुमितिवृत्तिजातिमादाय सर्वत्र लक्षणसमन्वयात् न च परामर्शानुव्यवसायादावतिव्याप्तिवारणाय व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्ननिरूपितजन्यताया विवक्षणीयतया धूमादिलिङ्गकपरामर्शस्यापि उक्तभ्रमसाधारण्याय व्याप्यादिघटकतावत्पदार्थानां परस्परोपदर्शनावगाहिनिश्चयत्वेनैव जनकत्वस्योपगन्तव्यत्वात् न वास्तवव्याप्यत्वाद्यवगाहितादिघटितलक्षणसमन्वयः क्वापीति वाच्यं सर्वत्र विषये भ्रमस्य भ्रमजन्यानुमितेश्चाप्रामाणिकतया तत्साध्यलिङ्गकपक्षपरामर्शः अनुमितिजनकपरामर्शो यः प्रमारूप एव तत्साध्यपक्षलिङ्गकानुमितौ लाघवेन व्याप्तिघटकतत्तत्पदार्थान् खण्डशो

ऽनिवेश्य विशिष्टव्याप्त्यादेरेव विषयितया ऽनुमितिजनकतावच्छेदकत्वोपगमात् तादृशजनकताघटितलक्षणस्य व्याप्तिपदार्थघटितस्य निष्प्रत्यूहत्वात् न च प्रमेयत्वकेवलसामानाधिकरण्यत्वादिना व्याप्त्याद्यवगाहिज्ञानवारणाय तादृशानुमितिजनकतायामपि हेत्वादिपदार्थानां परस्परोपश्लेषावगाहित्वमेवावच्छेदकमुपगन्तव्यमिति वाच्यं प्रमेयत्वाद्यवच्छिन्नज्ञाननिरूपितविषयिताया अनुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणहेत्वादिसाध्यसामानाधिकरण्यान्तपदार्थस्तोमघटितविशिष्टपदार्थप्रतियोगिकसम्बन्धत्वविरहेण विषयितासम्बन्धेन तादृशविशिष्टविषयस्य प्रमेयत्वादिना व्याप्त्याद्यवगाहिज्ञानव्यावर्तकतया ततोऽनुमित्यप्रसङ्गात् स्वरूपतो येषां व्याप्तिघटकता रूपान्तरेण तदवगाहितावत्पदार्थस्तोमात्मकव्याप्तिज्ञानवारणाय स्वरूपतस्तत्प्रकारकत्वनिवेशनस्यावश्यकत्वाच्च विशिष्टव्याप्तिनिवेशसम्भव इत्यपि न वाच्यं विशेषणानवच्छिन्नतत्तत्पदार्थघटितविशिष्टनिरूपिताविलक्षणविषयिताया एव विषयितात्वेन जनकतावच्छेदकतापर्याप्त्यधिकरणतादृशविशिष्टविषयसम्बन्धतया तादृशविषयेणोक्तज्ञानव्यावृत्तेः अत एव दीधितिकारोऽपि परामर्शग्रन्थे अन्यथाख्यात्यनभ्युपगन्तृमते व्यापकताघटकपदार्थानां खण्डशः परस्परोपश्लेषावगाहित्वमनिवेश्यापि विशिष्टविषयपुरस्कारेण व्यापकताज्ञानहेतुता सम्भवतीति अवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमतिरिच्यत इत्यनेन दर्शयिष्यति । विशिष्टविषयस्य प्रमानिष्ठजनकतावच्छेदकत्वाभिप्रायेणैव च व्याप्त्यादिप्रकारकत्वमनभिदधानो . वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वावच्छिन्नकारणतेत्यादिना जातिघटितलक्षणमभिधास्यते तत्र च वह्न्यादिपदं दर्शितसाध्यविशेषपरमित्यलं पल्लवितेन । तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमिति । साधनाधिकरणादिपदार्थानाम् अधिकरणाधेयत्वादिपदार्थांशे तत्तत्सम्बन्धावगाहित्वमित्यर्थः । तच्चदंशे तेन सम्बन्धेन तत्तत्प्रकारकत्वमितियावत् तेनात्मादीनां समवायसम्बन्धाप्रसिद्धावपि नोक्तभ्रमानुमित्यसंग्रहः हेत्वादिप्रकारतापि हेतुतावच्छेदकावच्छिन्नत्वेनैव निवेश्या अतो धूमत्वादिना धूलीपटलादिभ्रमसंग्रहः । यद्यप्येवम-

पि अधिकरणं धूमवत् वृत्तिरधिकरणीयेत्यादिविशृङ्खलरीत्या तावत्पदार्थपासिमवगाहमाना धीर्न व्यावृत्ता तथापि धूमादिप्रकारतानिरूपितविशेष्यतावच्छिन्ना या अधिकरणप्रकारता तन्निरूपितविशेष्यतावच्छिन्ना या वृत्तित्वप्रकारता इत्यादिरीत्या साध्याधिकरणवृत्तित्वप्रकारतापर्यन्तनिवेशात्तद्व्यावृत्ति उक्तसमूहालम्बनतो विशिष्टप्रकारकधियो वैलक्षण्याय तत्रान्तराभासमानाधिकरणादिपदार्थविशेषणनिरूपितविशेष्यत्वविशेष्यान्तरनिरूपितप्रकारत्वयोरवच्छेद्यावच्छेदकभावोपगमात् । केचित्तु एकविशेष्यतापक्षस्य यत्रापरांशे प्रकारता तत्र तन्निष्ठप्रकारताविशेष्यत्वयोरभेद एव तथा च धूमादिप्रकारतानिरूपिता या अधिकरणप्रकारता तन्निरूपिता या वृत्तित्वप्रकारता एव रीत्यैव निवेश एव च एकपदार्थनिष्ठावच्छेद्यावच्छेदकभावापन्नविषयतात्रयनिवेशापेक्षया एकविषयता निवेश्य कारणतावच्छेदकनिर्वचने लाघवमित्यपि वदन्ति । तच्चिन्त्यं तथा सति रक्तदण्डवत्पुरुषवानयमित्यादिज्ञानानां पुरुषादिप्रकारतानिरूपितदण्डादिविशेष्यताकत्वेन पुरुषाभाववान् दण्ड इत्यादिनिश्चयप्रतिबध्यताप्रसङ्गात् तत्र गत्यन्तरानुसरणे गौरवादिति ।

इदं तु बोध्यं व्याप्तिघटकसाधनतावच्छेदकादिसकलपदार्थानां विषयताविशेषणत्वेन खण्डशो निवेशो न सर्वत्र जात्यघटितलक्षणस्य साध्यादिभेदेन भिन्नत्वात् सल्लिङ्गजायां कूटलिङ्गजायां वा यल्लिङ्गकयत्साध्यकानुमितौ व्यापकताघटकसाधनतावच्छेदकमारभ्य यद्विशेषणपर्यन्तांशे प्रमात्मक एव परामर्शो हेतुस्तद्विशेषणविशिष्टपर्यन्तविषयस्य विशिष्टत्वेनैव विषयिताविशेषणतया कारणतावच्छेदकताया लाघवेनोचितत्वात् सकलपदार्थविषयितानां कारणतावच्छेदकतया तद्घटितधर्मावच्छिन्नकारणताया लक्षणे निवेशासम्भवात् तथा च तादृशविशिष्टविषयिताघटितधर्मावच्छिन्नकारणताघटितमेव लक्षणं यत्र च व्यापकताघटकसाधनतावच्छेदकांशे भ्रमादप्यनुमितिस्तत्रैव च सकलपदार्थानां खण्डशो निवेश इति मूलस्थव्याप्तिपदमपि लक्षणया निरुक्तप्रकारताविशेषपरं निरूपकत्वमेव च तद्वैशिष्ट्यमतो नोपदर्शितस्थले व्याप्तिपदार्थघटितलक्षणासङ्ग

ति अथवा इत आरभ्य यथाश्रुतशब्दार्थपरित्याग एवारब्धः विवक्षणीयस्य व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्नजनकताकत्वस्य मूलस्थशब्दव्युत्पत्त्यलभ्यतया तत्परित्यागस्याप्रे आवश्यकत्वात् । न च ज्ञानपदस्य लक्षणया निश्चयत्वावच्छिन्नरूपविशेषपरतया निश्चयत्वावच्छिन्नलाभः । निश्चयत्वेन ज्ञानलाभेऽपि निश्चयत्वावच्छिन्नजनकताया अलाभात् यदि च विशिष्टवैशिष्ट्यविवक्षया तादृशनिश्चयत्वविशिष्टनिरूपितजन्यतालाभेन सामञ्जस्यादित्युच्यते ज्ञानविशेषणतया व्याप्तिप्रकारकत्वादीनामेव लाघवेन जनकतावच्छेदकत्वादभेदसम्बन्धेन व्याप्तिप्रकारकादेरेव च ज्ञानविशेषणतया मूलोक्तशब्दतो लाभेन विवक्षणीयालाभादिति जात्यघटितयथाश्रुतलक्षणे व्यतिरेकिलिङ्गकानुमितावव्याप्तिमाशङ्कते न चेत्यादिना । अव्याप्तिरिति व्यतिरेकिणि चिन्तामणिकारमते व्यतिरेकयोर्व्याप्यव्यापकभावस्यैव गमकतया तत्र व्याप्तिप्रकारेण हेतुमत्ताज्ञानस्य विवक्षणे चान्वयिन्यव्याप्तिर्द्रष्टव्या । व्यभिचारधीति । साध्याभाववद्वृत्तित्वधीप्रतिबन्धकतावच्छेदकविषयतात्वेन धूमव्यापकवह्निसमानाधिकरणधूमत्ववन्ह्याद्यभावव्यापकतावच्छेदकानुयोगितानिरूपितप्रतियोगितावच्छेदकधूमत्वविषयत्वे ऽनुगमय्य तादृशविषयताशालिपक्षधर्मतानिश्चयस्य निवेशनीयत्वादित्यर्थः । यथाश्रुतविषयानुगमो नादरणीयः भ्रमासंग्रहात् रूपान्तरेण व्याप्तिविषयकज्ञानजन्येऽतिप्रसङ्गाच्च प्रतिबन्धकतावच्छेदकविषयताशालिज्ञानस्य तादृशविषयताशालिविषयकत्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वाच्च । व्याप्यवच्छिन्नहेतुविषयतैव वा व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वेन निवेशनीया तत्प्रतिबन्धकत्वेन पक्षधर्मताज्ञानमेव न कथं निवेश्यत इति चेन्न तथा सति वह्निव्याप्यो धूमो द्रव्यवान् पर्वत इति ज्ञानाव्यावृत्तेः प्रतिबन्धकतावच्छेदकविषयतानिरूपितविशेष्यतावच्छिन्ना या हेतुविषयता तन्निरूपितपक्षविषयताशालित्वेन प्रतिबन्धकतावच्छेदकहेतुविषयतावच्छिन्नतत्प्रकारतानिरूपितपक्षविषयताशालित्वेन वा ज्ञाननिवेशस्यावश्यकत्वात् ।

अत्र व्यापकताज्ञानस्य कथञ्चिद्व्यभिचारधीविरोधित्वेऽपि साध्याभावव्यापकाभावप्रतियोगित्वज्ञानस्य तद्विरोधित्वे माना-

भाव ग्राह्याभावावगाहित्वात् हेत्वभावप्रतियोगिकाभावत्वेन हेतौ साध्याभावसामानाधिकरण्यावगाहिनीं हेत्वभावे साध्याभावसमानाधिकरणाभावप्रतियोगित्वमवगाहमानां धियं प्रति तस्यातथात्वात् हेत्वभावाभावत्वेन हेतुधर्मिकव्यभिचारधीनिषेधे च हेतुव्यापकसाध्यसामानाधिकरण्यज्ञानासम्भवे हेत्वभावाभावत्वेन हेतुविषयकतत्समानाधिकरणाभावप्रतियोगित्वग्रहे तेनैव तद्विषयकतत्समानाधिकरणाभावाप्रतियोगित्वज्ञानस्य प्रतिबन्धकत्वादित्याशङ्क्य मणिमन्त्रादिन्यायेन एकविधव्यभिचारधियं प्रति उभयज्ञानस्य प्रतिबन्धकत्वव्यवस्थापकं तत्सत्त्वे फलानुत्पादनियममाह भवति हीति ॥

(दी०) भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधीप्रतिरोधः तथाविधधूमसमानाधिकरणत्वादिकं तु न तथा रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् । व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा । न च भ्रमसंशयोत्तरभत्यक्षं प्रति विशेषदर्शनस्य हेतुतामते तत्रातिव्याप्तिः तथाविधनिश्चयत्वेन हेतुताया विवक्षितत्वात् विशेषदर्शनस्य च भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात् ॥

(गा०) रासभादौ धूमव्यापकवह्निसामानाधिकरण्यग्रहेऽपि वह्निव्यभिचारग्रहाद्वह्निसमानाधिकरणधूमत्वग्रहानुधावन वह्निव्यभिचारधीप्रतिरोध तद्ग्रहसमानधर्मिकव्यभिचारज्ञानानुत्पाद । नन्वत्र प्रतिबन्धकतावच्छेदकस्य न स्वरूपसम्बन्धविशेष व्यापकसामानाधिकरण्यघटकसाधनाधिकरणांशस्य व्यभिचाराविघटकतया व्यापकताविषयकत्वस्यैव तद्धियो व्यभिचारधीविरोधितानीजत्वात् सामानाधिकरण्यविषयताया प्रतिबन्धकतावच्छेदकशरीरे ऽनन्तर्भावेन प्रतिबन्धकताव

च्छेदकतया धूमव्यापकत्वविषयतायास्तदवच्छिन्नवह्निविषयताया वा उपादेयतया तादृशविषयतया च समं पक्षविशेषणतापन्नहेतुविषयत्वादेर्निरूप्यनिरूपकभावविरहेण दर्शितरूपेण परामर्शनिवेशासम्भवात् अतोऽत्र यादृशविषयताकनिश्चयत्वव्यापकं प्रतिबन्धकत्वं तादृशत्वमेव प्रतिबन्धकतावच्छेदकत्वं वाच्यं तथा च धूमव्यापकवह्निसमानाधिकरणधूमसामानाधिकरण्यादिविषयकनिश्चयत्वस्यापि धूमधर्मिकव्यभिचारधीप्रतिबन्धकताव्याप्यतया तद्विषयताया अपि तथात्वमक्षतमेवेति वह्निव्याप्यधूमसमानाधिकरणरासभवानितिज्ञानजन्येऽतिप्रसङ्गः न च पक्षविशेषणतया भासमानो यादृशो धर्मस्तादृशधर्मांशे व्यभिचारज्ञानमेव विवक्षितमतो नायं दोष इति वाच्यं तादृशरासभवान् धूमवांश्च पक्ष इति समूहालम्बनस्य तावताप्यवारणादित्याशङ्क्य पक्षविशेषणतापन्नहेतोर्यादृशविषयता प्रतिबन्धकतावच्छेदिका प्रतिबन्धकतावच्छेदकविषयतानिरूपिता या स्वावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकविषयतात्वेन तादृशप्रतिबन्धकतावच्छेदकविषयतानिरूपितत्वेन वा सैव निवेश्येत्याशयेन समाधत्ते तथाविधधूमेति । वह्निव्याप्यधूमसामानाधिकरण्याद्यवच्छिन्नरासभादिविषयत्वं तु न स्वावच्छेदकावच्छिन्नधर्मिकव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वादिमदित्यर्थः एवमपि धूमव्यापकवह्निसमानाधिकरणरासभसमानाधिकरणधूमवानित्यादिज्ञानाव्यावृत्तिरत आह व्यतिरेकेति । ननु वह्नित्वाद्यवच्छिन्नधर्मिकधूमत्वाद्यवच्छिन्नव्यापकताग्रहत्वेनैव धूमो वह्निव्यभिचारीत्यादिव्यभिचारज्ञानप्रतिबन्धकता लाघवात् आवश्यकत्वाच्च न तु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तिज्ञानत्वेन गौरवात् मानाभावाच्च तथा च तादृशव्याप्तिविषयता न व्यभिचारग्रहप्रतिबन्धकतावच्छेदिका । अथ इदन्त्वाद्यवच्छिन्ने तादृशधूमत्वादिरूपव्याप्तिग्रहे तदवच्छिन्ने व्यभिचारग्रहानुदयात् समानधर्मिकव्यभिचारज्ञानं प्रति तादृशधूमत्वादिरूपव्याप्तिज्ञानत्वेनापि मणिमन्त्रादिवत्पृथक् प्रतिबन्धकता वाच्या तथा च तादृशव्याप्तिविषयताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वमक्षतमे-

चेति न च धर्मितावच्छेदकतानिरूपकविशेष्यतानिरूपक-विरोधिप्रकारताया एव प्रतिबन्धकतावच्छेदकतया धूमव्यापक-वह्निसमानाधिकरणवृत्तिधूमत्ववत्वान् पक्ष इत्याकारकतादृशधूमत्वात्मकव्याप्यतो निर्धर्मितावच्छेदककज्ञानीयतादृशव्याप्तिप्रकारताया व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वासम्भवात्तादृशपरामर्शासंग्रहः। प्रतिबन्धकतावच्छेदकीभूतप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रकारताशालिपक्षधर्मताज्ञाननिवेशे च धूमत्वादिना पदार्थान्तरानवगाहिपरामर्शासंग्रहः तादृशप्रकारतावच्छेदकतापर्याप्त्यधिकरणस्य वास्तवधूमादिघटितव्याप्तित्वस्य तादृशप्रकारतानवच्छेदकत्वादिति वाच्यम् धर्मिविशेष्यतानिरूपितव्यभिचारधीप्रतिबन्धकतावच्छेदकतायां निरूपितत्वसम्बन्धेन यत्प्रकारताया अवच्छेदकत्वं तदवच्छेदकतापर्याप्त्यधिकरणरूपाश्रयीभूतप्रकारताशालित्वेन सकलपरामर्शसंग्रहसम्भवादिति चेत्। तर्हि वह्निव्याप्यधूमसामानाधिकरण्यादिविषयत्वेन किमपराद्धं दर्शितव्याप्तिवत्तद्घटितधर्मान्तराणामपि व्यापकत्वघटितत्वाविशेषात् किमपराद्धं वा धूमत्वाद्यसहितेन धूमव्यापकवह्निसामानाधिकरण्यत्वादिना तत्तद्विषयिताया अपि व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वोपगमे वह्निव्याप्यधूमसमानाधिकरणरासभवानयं धूमव्यापकवह्निसमानाधिकरणरासभवानयमित्यादिज्ञानजन्ये ऽतिप्रसङ्गो दुर्वार इत्याशङ्का मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वान्तरकल्पनमप्यनुभवानुरोधेनैव धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्यत्वग्रहे तद्धर्मितावच्छेदकावच्छेदे व्यभिचारधीर्नोत्पद्यत इति निर्विवादानुभवात्तद्ग्रहस्य समानधर्मितावच्छेदकव्यभिचारधीप्रतिबन्धकत्वमावश्यकं वह्निव्याप्यधूमसमानाधिकरणो रासभ इत्यादिज्ञानदशायां च रासभादौ वह्निव्यभिचारग्रहस्यैवानुभवात् तथाविधधूमसामानाधिकरण्यज्ञानत्वेनापि प्रतिबन्धकत्वान्तरमिति विशेषमाह भवति हीत्यादिना रासभादौ तद्ग्रहे ऽपि व्यभिचारग्रहादित्यन्तेन। ननु धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषये यदि व्यभिचारज्ञानानुत्पादोऽनुभवसिद्धस्तदा वाह्निधूमव्यापक इत्यादिज्ञानकालीनकेवलधूमत्वादिग्रहवि-

षयेऽपि तदनुत्पादस्तथा सामानाधिकरण्यांशस्याकिञ्चित्करत्वा-
दिति साध्ये धूमादिव्यापकताग्रहकालीनधूमत्वादिग्रहत्वेनैव
प्रतिबन्धकत्वमुचितम् वस्तुतो वह्न्यादौ धूमत्वाद्यवच्छिन्नव्याप-
कताग्रहदशायां धूमत्वाद्यवच्छेदेन वह्न्यव्यभिचारस्यापि सुग्र-
हतया धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषये ऽव-
च्छेदकधर्मदर्शनरूपप्रतिबन्धकवशादेव न व्यभिचारग्रह इति न
तादृशधूमत्वादिग्रहविषयतया व्यभिचारग्रहप्रतिबन्धकतावच्छे-
दकत्वमिति नोक्तानुगमः साधीयान् अत आह व्यतिरेकसह-
चारेणेतीति व्याचक्रुः । व्यतिरेकसहचारेण अन्वयसहचारग्रहनिर-
पेक्षव्यतिरेकसहचारग्रहेणापि । अन्वयेति अन्वयव्याप्तिर्गृह्यत इत्या-
चार्यमताश्रयणादित्यर्थः । तथा च व्यतिरेकिण्यपि अन्वयव्याप्तेरेव
गमकतया अनुगमासम्भवेऽपि नाव्याप्तिरिति भावः । यद्यप्येतन्मतं
न विचारसहमित्युपेक्ष्य मणिकृता व्यतिरेकव्याप्तेरनुमित्यौपयिक-
त्वं व्यवस्थापितं तथापि जातिघटितलक्षणादरेणाननुगमनिबन्ध-
नाव्याप्तेः परिहरणीयतया आपाततस्तन्मतावलम्बनेन समाहितम् ।
ननु विपरीतभ्रमानन्तरं ग्राह्यसंशयानन्तरं च विना ग्राह्यव्याप्य-
वत्ताज्ञानं पुरुषत्वादिनिश्चयो नोत्पद्यते सति तु तस्मिन्
जायते अतो ऽन्वयव्यतिरेकाद्विपरीतज्ञानानन्तरप्रत्यक्षनिश्चयत्वाव-
च्छिन्नं प्रत्यपि ग्राह्यव्याप्यवत्तानिश्चयत्वेन हेतुता कल्प्यते न च
ग्राह्याभावज्ञानेन प्रतिबन्धादेव विपरीतभ्रमाद्यनन्तरम् प्रत्यक्ष-
निश्चयानुत्पत्तिनिर्वाहे किं विशेषदर्शनस्य हेतुतयेति वाच्यं
विपरीतभ्रमादिसत्त्वेऽपि सति विशेषदर्शने प्रत्यक्षनिश्चयोत्पत्त्या
प्रत्यक्षनिश्चये ग्राह्याभावग्रहस्याप्रतिबन्धकत्वात् विपरीतनिश्चय-
काले ऽनुमित्यादेर्वारणाय विपरीतनिश्चयस्य विशिष्टधीविरो-
धित्वकल्पनाया आवश्यकत्वेऽपि प्रत्यक्षनिश्चयान्यत्वस्य तत्प्रति-
बध्यतावच्छेदकत्वोपगमात् । न च प्रत्यक्षनिश्चयं प्रति विपरी-
तज्ञानस्याप्रतिबन्धकत्वे शङ्खो न श्वेत इत्यादिपित्तादिदोषजन्य-
विपरीतनिश्चयकाले श्वैत्यव्याप्यशङ्खत्वादिदर्शनाच्छङ्खः श्वेत इ-
त्यादिचाक्षुषापत्तिः तादृशदोषस्यैव श्वैत्यादिग्रहप्रतिबन्धकत्वात्
यदि च विनष्टेऽपि दोषे तादृशविपरीतनिश्चयसत्त्वे न श्वैत्या-
दिप्रत्यक्षं तदास्तु प्रत्यक्षे समानेन्द्रियजन्यदोषविशेषाजन्योपनी-

न्मानमिश्रविपरीतनिश्चयस्य प्रतिबन्धकत्वम् । एवं शङ्खः श्वेत इति ज्ञाने चाक्षुषनिश्चयोत्पत्तौ सत्यां यत्र दोषसमवधानं तत्र तादृशनिश्चयसत्त्वे यदि दोषात् शङ्खो न श्वेत इति चाक्षुषनिश्चयस्तदा तादृशमानसेऽपि समानेन्द्रियजन्यविपरीतनिश्चयस्य प्रतिबन्धकत्वादेव अत एव मानसाहार्यभ्रमसाधारणविशेषदर्शनमेव विरोधीत्यनेन मणिकृता दोषविशेषजन्यभ्रमे समानेन्द्रियजन्यलौकिकप्रत्यक्षमात्रस्य विरोधिता नान्यविपरीतज्ञानस्येत्यभिधानं सङ्गच्छते चक्षुषा वंशे उरगत्वभ्रमेऽपि त्वचा तत्र तदभावग्रहात् समानेन्द्रियजन्यत्वविशेषणं शङ्खो न श्वेत इत्यादिनिश्चयानन्तरं सति विशेषदर्शने चाक्षुषसामग्रीविगमे शङ्खः श्वेत इत्यादिमानसज्ञानमिष्यत एव विशेषदर्शनेन तन्निश्चयनाशे विशेषदर्शनेन प्रतिबन्धात्तादृशनिश्चयान्तरस्य चानुत्पत्त्या तादृशमानसोत्पादस्यावश्यकतया तत्पूर्वक्षणे तदुत्पादोपगमे अनुभवविरोधविरहात् । अस्तु वा तादृशमानसादिसाधारणलौकिकनिश्चयान्यज्ञानत्वमेवानुमित्यादिसाधारणविपरीतनिश्चयप्रतिबध्यतावच्छेदकं यत्र सत्यपि चक्षुषः सन्निकर्षे करादर्शनसहितदूरत्वादिदोषादयं स्थाणुरित्यादिभ्रमस्तत्र करादिदर्शने नायं स्थाणुरित्यादिलौकिकनिश्चयस्तत्रैव भ्रमोत्तरप्रत्यक्षे विशेषदर्शनहेतुना । अथ तत्र भ्रमोत्पत्तिक्षणे न कथं तादृशलौकिकज्ञानं विपरीतज्ञानोत्तरप्रत्यक्षं एव विशेषदर्शनहेतुतया तदुत्पत्तिक्षणे प्रत्यक्षापत्तेः विशेषदर्शनहेतुताविरहेऽपि दुर्वारत्वात् । यदि च दूरत्वादिदोषेण प्रतिबन्धान्न तदा तदुत्पादापत्तिरिति तदा भ्रमोत्तरं विशेषदर्शनात्कथं तदुत्पत्तिः तदापि तद्दोषसत्त्वादिति चेन्न विशेषदर्शनसहितस्यैव दूरत्वादेः प्रतिबन्धकत्वेनोपगमात् । अस्तु वा तादृशदोषसमवधानकालीनभ्रमेऽपि विशेषदर्शनस्य हेत्वन्तरं विपरीतज्ञानसत्त्वात्तादृशदोषाणां चाप्रतिबन्धकत्वमिति मतं प्रत्यक्षानुमानयोरतिव्याप्तिमाशङ्क्य निराकरोति न चेत्यादिना । भ्रमो विपरीतनिश्चयः । एतच्च मतं मिश्राणामतानुमतं न तु रत्नकोषकाराणां तैर्विशेषदर्शनाभाववैशिष्ट्यस्य साधारण्येन विपरीतज्ञानप्रतिबन्धकतामुपगम्य संशयानुत्तरं प्रत्यक्षनिश्चयस्वीकारात् । न च विशेषदर्शनाभाववैशिष्ट्यप्रामाण्यग्रहानन्तरं विशिष्टबुद्धिप्रतिबन्धकत्वे बाधनिश्चयकाले लिङ्गपरामर्शकपविशेषद

र्शनादनुमित्यापत्तिर्विशिष्टाभावसत्त्वादेवं निश्चयत्वानिवेशात् संशयोत्तर संशयानुपपत्तिः योग्यतासंशयस्य शाब्दबोधप्रतिबन्धकतापत्तिश्च प्रतिबध्यतावच्छेदके निश्चयत्वप्रवेशेन संशयोत्तरसंशयोपपादने बाधनिश्चयोत्तरमपि संशयापत्तेरिति वाच्यम् । परोक्षज्ञाने बाधनिश्चयस्य प्रतिबन्धकत्वान्तरकल्पनेन बाधनिश्चयदशायामनुमित्यापत्तिवारणात् प्रत्यक्षनिश्चयत्वस्यैव च संशयादिसाधारणविपरीतधीप्रतिबध्यतावच्छेदकतया ग्राह्यसंशयोत्तरं संशयशाब्दबोधाद्युपपत्ते । न चैवं बाधनिश्चयोत्तरं संशयस्यापत्तिः । अनुमित्यादिसाधारणबाधनिश्चयप्रतिबध्यतावच्छेदकगर्भे प्रत्यक्षनिश्चयान्यत्वस्य प्रवेशनीयतया संशयस्य बाधनिश्चयप्रतिबध्यतोपपत्तेः । न च प्रत्यक्षनिश्चयान्यबुद्धौ विपरीतनिश्चयत्वेन प्रतिबन्धकत्वान्तरस्यैतन्मतेऽप्यावश्यकत्वेन प्रत्यक्षनिश्चये विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावहेतुताकल्पनापेक्षया विशेषदर्शनस्य लघोर्हेतुत्वकल्पनमेवोचितमिति वाच्यम् । व्याप्तेः सम्बन्धादिभेदेन भिन्नतया व्याप्यदर्शनस्याननुगमेन व्यभिचाराच्चद्धेतुताकल्पनासम्भवात् । नानाविधविशेषदर्शनाभावकूटविशिष्टविपरीतज्ञानाभावस्य चाननुगतत्वाच्च । अन्यथा अत्रैवान्यत्रापि उत्तेजकहेतुतयातिप्रसङ्गवारणसम्भवेन सर्वत्रोत्तेजकविलयप्रसङ्गात् एवमसत्यपि विशेषदर्शने विपरीतज्ञानासत्त्व इव विपरीतज्ञानसत्त्वेऽपि सामग्रीबलात्प्रत्यक्षसामान्यापत्तिर्दुर्वारैवेति विपरीतज्ञानानुत्तरप्रत्यक्षे संशयसाधारणविपरीतज्ञानाभावस्य विशेषसामग्रीत्वमावश्यकमिति गौरवं न च नानाविधविशेषदर्शनाभावानां विपरीतधीप्रतिबन्धकतावच्छेदकगर्भनिवेशे एकाभावविशिष्टत्वेनैवापराभावस्य निवेशनीयतया तावदभावानां परस्परम् अप्रामाण्यग्रहाभावादिभिश्च समं विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यमिति तादृशतादृशविशेषदर्शनानन्तरप्रत्यक्षे तादृशविशेषदर्शनानां विपरीतज्ञानानुत्तरप्रत्यक्षे तदभावस्य च पृथक्कारणत्वं युक्तमिति वाच्यम् । आनन्तर्यस्य स्वत्वघटितत्वेन कार्यकारणभावस्य तद्व्यक्तिविश्रामापत्तेः यदि च नानाविधविशेषदर्शनानां विपरीतज्ञानविरोधित्वेनानुगमान्नैकविशेषदर्शनस्यान्यविशेषदर्शनजन्यप्र-

स्यक्षे व्यभिचार इति न तज्जन्यतावच्छेदककोटावानन्तर्यनिवेशनम् । अत एवावच्छेदकधर्मदर्शनस्यापि संग्रह इत्युच्यते तदाऽपि विपरीतज्ञानानुत्तरप्रत्यक्ष विशेषदर्शनस्य व्यभिचारवारणाय विपरीतज्ञानाव्यवहितोत्तरत्वस्य विशेषदर्शनजन्यतावच्छेदकगर्भे ऽवश्य निवेशनीयतया विशेषदर्शनजन्यतावच्छेदकस्य तत्तद्व्यक्तिविश्रामो दुर्वार एव विपरीतज्ञानप्रतिबध्यतावच्छेदकशरीरेऽव्यवहितोत्तरत्वप्रवेशस्यावश्यकतया तदननुगमात्तदभावजन्यतावच्छेदकस्य तत्तद्विपरीतज्ञानाव्यवहितोत्तरत्वाभावकूटगर्भत्वाद्गौरव दुर्वारमेव । यत्तु विशेषदर्शनजन्यप्रत्यक्ष व्याप्यधर्मविशिष्टधर्मिविशेष्यकमेव तदनुत्तर तु न तथा तथा च तथात्वातथात्वयोर्विशेषदर्शनविपरीतज्ञानाभावजन्यतावच्छेदकप्रवेशनैव व्यभिचारवारणे नानन्तर्यप्रवेश इति । तदपि न करादिमान् पुरुष इत्यादिनिश्चयकालीनकरादिमत्त्वनिश्चयरूपावच्छेदकधर्मनिश्चयस्य पुरुषत्वादिनिश्चायकतया तज्जन्यनिश्चये विपरीतज्ञानाभावव्यभिचारस्यानन्तर्यमनिवेश्य दुर्वारत्वात् करादिमत्त्वावच्छिन्नविशेष्यकत्वस्य विपरीतज्ञानाभावजन्यतावच्छेदकत्वे करादिमान् पुरुष इत्यादिनिश्चयशून्यकालीनकरादिमत्ताग्रहोत्तरजातस्य करादिमानयं पुरुष इत्यादिप्रत्यक्षस्यासंग्रहप्रसङ्गात् । यत्तु विपरीतज्ञानविरोधित्वेनैव विशेषदर्शनादीनां हेतुता तत्त्व च विपरीतज्ञानाव्यवहितपूर्वत्वशून्यक्षणवृत्तित्वविशिष्टत्वम् । तदवच्छिन्न च निश्चयपूर्वं सर्वत्रैव सुलभमिति सामान्यतो निश्चयत्वमेव तज्जन्यतावच्छेदकमिति विपरीतज्ञानानुत्तरप्रत्यक्षे तदभावहेतुनापि नास्ति । न चैवं विशेषदर्शनोत्पत्तिकाले संशयाद्यनुत्पत्त्या तत्पूर्वक्षणेऽपि उक्तकारणसत्त्वाद्विशेषदर्शनानन्तरमिव तदुत्पत्तिक्षणेऽपि निश्चयो जायतामिति वाच्यम् । इष्टत्वात् । न च यत्र संशयाद्यनन्तरम् असत्यपि विशेषदर्शने न संशयादिस्तत्र तन्निश्चयापत्तिरिति वाच्य विपरीतकोटिभाननियतकविशेषदर्शनाद्यसत्त्वे उपस्थिततत्कोटिज्ञानोत्पत्तेर्बाधकविरहेणावश्यकत्वादिति । तदप्यसत् । अव्यवहितपूर्वत्वस्य तत्तद्व्यक्तिघटिततया गौरवादिति । एवं विशेषदर्शनानां हेतुत्वं दीधितिकाराणामप्यननुमतं संशयोत्तर विशेषदर्शनासत्त्वे संशयजनककोट्युपस्थिति धर्मिज्ञानादिघटितसामग्रीबलात्संशयस्यैवोत्पादेन संशयान्यज्ञानत्व-

रूपनिश्चयत्वावच्छिन्नापत्त्ययोगात् । तत्सामग्र्यभावसहितज्ञानसामान्यसामग्र्या एव तज्ज्ञानान्यज्ञानत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् । अथैवं संशयसामग्र्यभावस्य निश्चयोत्पत्तावपेक्षणे संशयप्रयोजकविशेषदर्शनस्याभावो विशेषदर्शनं तन्निश्चये हेतुरित्यायातमितिचेन्न । तत्प्रयोजकाभावस्य तदन्यत्वावच्छिन्नाजनकस्यापि तदन्यत्वावच्छिन्नोत्पत्तिप्रयोजकत्वात् । अन्यथा पटज्ञानान्यघटज्ञानत्वावच्छिन्नोत्पत्तावपेक्षितस्य पटादिज्ञानसामग्र्यभावस्य पटज्ञानान्यज्ञानत्वावच्छिन्नहेतुताप्रसङ्गात् विपरीतनिश्चयानन्तरं च तेन प्रतिबन्धादेव न प्रत्यक्षं विपरीतनिश्चयस्य प्रत्यक्षसाधारणलौकिकसन्निकर्षाद्यजन्यविशिष्टबुद्धित्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वात् विपरीतनिश्चयानन्तरं विशेषदर्शनेऽपि तन्नाशानन्तरमेव प्रत्यक्षं जायते यत्तु भूतले घटो नास्तीतिशाब्दादिनिश्चयानन्तरं लौकिकसन्निकर्षवशाद्धटावगाही तत्संशयः कथं नोत्पद्यते लौकिकसन्निकर्षाजन्यतज्ज्ञानस्यैव तदभावनिश्चयप्रतिबध्यत्वादतो लौकिकीनर्णयान्यतद्वत्ताज्ञानत्वं तदभावनिश्चयाभावजन्यतावच्छेदकं वाच्यम् । एवमपि यादृशसामग्रीबलाल्लौकिकप्रत्यक्षे घटो भासते तत्सहितघटाभावोपस्थित्यादिसहितघटाभावभानसामग्रीतो बाधकाले संशयापत्तिर्दुर्वारैवेति निश्चयेऽपि विशेषसामग्र्यन्तरं कल्पनीयम् । तच्च निरुक्तविपरीतज्ञानविरोधित्वावच्छिन्नमेवेति विशेषदर्शनस्यापि तेन रूपेण हेतुत्वमायातीति । तदसत् लौकिकसामग्र्या बलवत्या विपरीतकोटिभानप्रतिबन्धकत्वात् उक्तसंशयापत्त्ययोगात् । तत्प्रतिबन्धकत्वाकल्पने उक्तबाधनिश्चयानन्तरलौकिकसन्निकर्षाद्यत्र वास्तवो घटादिनिश्चयस्तत्र घटाभावभानप्रतिबन्धकासत्त्वेन तज्ज्ञानापत्त्या संशयापादनस्य ब्रह्मणोऽपि दुर्वारत्वादिति विशेषदर्शनहेतुतायां विवादान्मत इत्युक्तम् । संशयोत्तरप्रत्यक्षानिश्चये विशेषदर्शनहेतुत्वे घटादिप्रकारकमानसेच्छाविरहविशिष्टघटाभावादिशाब्दसामग्र्या योग्यतासंशयात्मकघटादिसंशयघटिताया घटादिमानसं प्रति प्रतिबन्धकत्वं न कल्प्यत इति लाघवं तदानीं घटाभावादिमानसे तादृशशाब्दसामग्र्याः प्रतिबन्धकतया मानसघटादिसंशयस्य विशेषदर्शनरूपकारणविरहेणैव च घटादिमानसनिश्चयस्य च वारणसम्भवात् विशेषदर्शनसत्त्वे च

तस्य विपरीतकोटिशाब्दधीप्रतिबन्धकत्वात् सामग्र्यभावाज्जायत एव मानसमिति केचित् मिश्रमत परिष्कुर्वन्ति। ननु दीधितिकारमतेऽपि व्याप्यवद्धर्मिनिश्चयस्य विशेषणज्ञानादिविधया तदुत्तरप्रत्यक्षे हेतुतया तथाविधनिश्चयत्वेन हेतुत्वाविवक्षादशाया ताहशप्रत्यक्षेऽतिव्याप्तेरावश्यकत्वाद्विशेषदर्शनस्य हेतुतामत इत्यभिधानमयुक्तमिति चेन्न निश्चयत्वेन हेतुत्वविवक्षणे मिश्रान्यमते नातिव्याप्तिर्मिश्रमते च तादृशनिश्चयत्वेनापि प्रत्यक्षविशेष हेतुतेत्याशयेन तथाभिधानात्। अत्र च तादृशनिश्चयत्वेन हेतुताविवक्षामात्रेण न समाधानम्। अपि तु तद्विवक्षया प्रत्यक्षे तादृशनिश्चयत्वेन हेतुताविरहप्रदर्शनेन चेति सामञ्जस्यात्। अथवा तादृशनिश्चयजन्यतावच्छेदकानुभवव्याप्यजातिमत्त्वविवक्षणे नान्यमतेऽतिव्याप्तिरित्याशयेन विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छिन्न प्रति विशेषदर्शनहेतुतामते ऽतिव्याप्त्यभिधानम्। विशेषदर्शनस्य चेति। चस्त्वर्थे भ्रमादिविरोधित्वेन ग्राह्याभावविरोधित्वेन। तत्त्वम् प्रत्यक्षविशेषहेतुत्वम्। उक्तत्वादिति। विशेषदर्शनत्वरूपेण हेतुत्वे अन्धकारे घटसंशये आलोकसमवधानात्तन्निश्चयानुपपत्ति। एव कुङ्कुमादौ तैलसयोगादिरूपव्यञ्जकविरहाधीनसौरभादिसन्देहानन्तर व्यञ्जकसमवधानेऽपि तन्निश्चयानुपपत्ति। न चालौकिकत्वस्य विशेषदर्शनजन्यतावच्छेदकत्वोपगमान्नेयमनुपपत्ति। तत्र तत्र घटसौरभादेर्लौकिकप्रत्यक्षस्यैव विशेषदर्शन विनोत्पत्तेरिति वाच्यम्। लौकिकसन्निकर्षेऽपि यत्र विशेषादर्शनसहितदूरत्वादिदोषप्रयुक्त पुरुषत्वादिसंशय तत्र विशेषदर्शने सत्येव लौकिकप्रत्यक्षोत्पत्तेर्विशेषदर्शनजन्यतावच्छेदकरूपेण लौकिकस्यापि प्रत्यक्षस्य सग्राह्यत्वात्। अत एव विशेषदर्शनामनुमितिसामग्रीसत्त्वादनुमितिरेव भविष्यति न प्रत्यक्षमिति कथ तस्य प्रत्यक्षहेतुतया क्षिप्य समानविषये प्रत्यक्षसामग्र्या बलवत्त्वमिति प्रत्यक्षमेव जायते नानुमितिरिति मणिकारेण समाहितमुपत्तिवादे। विशेषदर्शनस्यालौकिकप्रत्यक्षमात्रहेतुत्व तादृशप्रत्यक्षसामग्र्या अनुमितिसामग्र्यपेक्षया हीनबलत्वासङ्गते। यदि च विपरीतज्ञानोत्तरप्रत्यक्षनिष्ठविशेषदर्शनजन्यतावच्छेदकशरीरे लौकिकत्वनिवेशोऽपि

न क्षतिः । दूरस्थे धर्मिणि पुरुषत्वादिसन्देहोत्पत्तिक्षण एव लौकिकसन्निकर्षात्तन्निश्चयवारणाय दूरत्वादिदोषसमवधानकालीनप्रत्यक्षेऽपि विशेषदर्शनहेतुताया आवश्यकत्वं तत एव दूरस्थे धर्मिणि संशयोत्तरमपि विशेषदर्शनं विना पुरुषत्वादिनिश्चयवारणसम्भवादित्युच्यते तदापि सम्बन्धादिभेदभिन्ननानाविधव्याप्यवगाहिविशेषदर्शनावच्छेदकधर्मदर्शनसाधारणविशेषदर्शनत्वस्यानुगतस्याभावाच्च तेन रूपेण हेतुतासम्भव इति विपरीतज्ञानाविरोधित्वमेवानुगमकं वाच्यमिति भावः । अथ यदि आलोकसंयोगादिसाधारण्यं विपरीतज्ञानाविरोधित्वस्य तदा तत्कथमुपपद्यतां घटवद्भूतलादावालोकसंयोगसत्त्वेऽपि तत्र चक्षुःसंयोगाद्यसत्त्वे तत्सत्त्वेऽपि च दूरत्वादिदोषाद्घटादिसंशयोत्पत्त्या आलोकसंयोगत्वेन विपरीतज्ञानाविरोधित्वात् । यत्तु वा लौकिकप्रत्यक्षकारणान्तरसहितालोकसंयोगत्वेन तथात्वं तथापि तस्यात्मनिष्ठोऽन्यः सम्बन्धो ऽन्यश्च विशेषदर्शनस्येति उभयोरनुगतकारणतावच्छेदकसम्बन्धो दुर्वच इति चेन्न । लौकिकप्रत्यक्षकारणालोकसंयोगादिसमवहितात्ममनोयोगस्यैवात्मनिष्ठप्रत्यासत्तेस्य विपरीतज्ञानविरोधित्वोपगमेन तत्साधारणतद्रूपावच्छिन्नस्य विशेषदर्शनस्य समवायसम्बन्धेनैव हेतुतासम्भवादित्यलमधिकेन ॥

तथाविधनिश्चयत्वेन हेतुताविवक्षणस्य प्रयोजनान्तरमपि दर्शयति अत एवेति ।

(दी०) अत एव लिङ्गवत्त्वादिलक्षणातिदेशवाक्यार्थज्ञानजन्योपमितौ नातिव्याप्तिः तथाविधवाक्यार्थमतिसन्धानत्वेन तस्य हेतुत्वात् । न चोपनयार्थज्ञानजन्यन्यायार्थज्ञाने तच्छब्देन सङ्केतितशब्दान्तरेण वा व्याप्त्यादिविशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः व्युत्पादयिष्यते च महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तदादेश विशेषरूपेणोपस्थापकत्वमिति वाच्यं । तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशान्निश्चयत्वस्यामवेशाच ॥

(गा०) लिङ्गवत्त्वादिलक्षण. वह्निव्याप्यधूमवत्त्वादिघटितो योऽतिदेशवाक्यार्थः सादृश्यविशिष्टे पदविशेषवाच्यत्वादिबोधकवाक्यप्रतिपाद्यो योऽर्थः तद्विषयकं यज्ज्ञानं वह्निव्याप्यधूमवत्पर्वतसदृशो महानसपदवाच्य इत्यादिज्ञानं तज्जन्यायामयं महानसपदवाच्य इत्याद्युपमितौ वस्तुगत्या साध्यव्याप्यत्वावच्छिन्नहेतुप्रकारकपक्षविशेष्यकं यत्तादृशं ज्ञानं तज्जन्यत्वेऽपि नातिव्याप्तिरित्यर्थः । तथाविधवाक्यार्थेति । महानसपदवाच्यत्वविशिष्टवह्निव्याप्यधूमवत्पर्वतसादृश्यावच्छिन्नधर्मिज्ञानत्वेनेत्यर्थः । यद्यपि भ्रमसाधारण्याय तादृशविशिष्टवाक्यार्थघटकतत्तत्पदार्थानां परस्परोपदर्लेपावगाहिज्ञानत्वेनैवोपमितिविशेषे हेतुताया वक्तव्यतया पक्षांशे व्याप्तिप्रकारेण हेतुमत्तावगाहिज्ञानत्वरूपमुपमितिजनकतावच्छेदकं तथापि पक्षांशे व्याप्याभावानवगाहितादृशहेतुमत्तावगाहिज्ञानत्वरूपमनुमितिजनकतावच्छेदकव्याप्यवत्पक्षनिश्चयत्वं नोक्तोपमितिजनकतावच्छेदकम् । अतिदेशवाक्यार्थज्ञाने व्याप्यवत्त्वस्य धर्मितावच्छेदककोटिनिविष्टतया भासमानधर्मितावच्छेदकघटकांशे च संशयस्यानभ्युपगमात् उपमितिजनकतायां तादृशनिश्चयत्वानिवेशस्यानर्थक्यादतो न तादृशरूपावच्छिन्नजनकताकत्वरूपानुमितिलक्षणस्य तत्रातिव्याप्तिः अत एव निश्चयत्वनिवेशनमप्यर्थवत् । अन्यथा निश्चयत्वेनानुमितिजनकत्वे ऽप्यधिक त्वित्यादिन्यायादनुमितिजनकताया पक्षविशेष्यकव्याप्यवत्ताज्ञानत्वावच्छिन्नत्वात् तादृशज्ञानत्वावच्छिन्नजनकताकत्वनिवेशमात्रेण भ्रमादिविरोधित्वावच्छिन्नहेतुताकप्रत्यक्षविशेषे ऽतिव्याप्तिवारणसम्भवेन तदानर्थक्यमापद्येत । वस्तुतस्तु वह्निव्याप्यवत्त्वेन पर्वतसदृशो महानसपदवाच्य इत्यतिदेशवाक्यार्थज्ञानसहकृतव्याप्यवत्ताघटितसादृश्यज्ञानजन्यायामुपमितौ जनकतावच्छेदककोटौ व्याप्यांशे पर्वतादिवृत्तित्वावगाहित्वस्याधिकस्य निवेशोऽपि धर्म्यंशे व्याप्यवत्त्वावगाहिनिश्चयत्वरूपानुमितिजनकतावच्छेदकावच्छिन्नहेतुताकत्वस्य तादृशोपमितावक्षतत्वादतिव्याप्तेर्वारणाय तादृशनिश्चयत्वपर्याप्तहेतुतावच्छेदकताकत्वपर्यन्तविवक्षणमावश्यकम् । तथा चानुमितिजनकतावच्छेदकता यादृशसमुदाये पर्याप्ता तादृशसमुदा

यस्यैव लक्षणे निवेशनमावश्यकम् । अन्यथा समुदायपर्याप्तावच्छेदकताया एकदेशापर्याप्ततया असम्भवापातात् । अत एवोक्तनिश्चयत्वघटकाभावदलस्यापि सार्थकता । एवं चाप्रामाण्यज्ञानानास्कन्दितत्वस्य कारणतावच्छेदकतामते तदंशोऽपि लक्षणे निवेशनीयः । न च सादृश्यज्ञानस्योपमितिहेतुतायां पर्वतादिवृत्तित्वावच्छिन्नव्याप्यादिविषयता पर्वतादिवृत्तित्वावच्छिन्नविषयतात्वेनैव निवेश्या न तु व्याप्यादिविषयतात्वेन प्रयोजनाभावात् । तथा चानुमितिजनकतावच्छेदकधर्मस्योक्तोपमितिजनकतावच्छेदककोटिनिवेशोऽपि नास्ति किं पर्याप्तिनिवेशेनेति वाच्यम् । व्याप्यवत्त्वघटितसादृश्यावच्छिन्नधर्मिकातिदेशवाक्यार्थज्ञानस्य तद्घटितसादृश्यज्ञानसहकारेण फलजनकतयोभयत्र सादृश्यात्मकधर्माणां विशिष्यावश्यं निवेशनीयत्वात् । न च पर्याप्तिविवक्षायामपि धूमव्यापकवह्निमत्सादृश्यात्मकतादृशवह्निमद्वृत्तिधूमवत्तानिश्चयजन्योपमितावतिव्याप्तिर्न शक्यते वारयितुमिति वाच्यं । सादृश्यघटकभेदविषयताया अपि प्रवेशेन विवक्षितनिश्चयत्वे तत्कारणतावच्छेदकतापर्याप्तिविरहात् । लाघवाद्भेदाघटितसादृश्यज्ञानमेवोपमितौ कारणमिति तु न शङ्क्यम् । तथा सति गवादावपि तादृशसादृश्यनिश्चयसत्त्वेन गवयादिपदवाच्यत्वोपमित्यापत्तेः । यदि च वैधर्म्यज्ञानादप्युपमितिः स्वीक्रियते वैधर्म्यस्य चेतरवैधर्म्यत्वेन ज्ञानं नापेक्ष्यते तदा व्याप्यधर्मरूपवैधर्म्यज्ञानजन्योपमितावतिव्याप्तिः कारणतावच्छेदकतापर्याप्तिनिवेशोऽपि दुर्वारैवेति तद्वारणप्रकारश्चिन्त्यः । महावाक्यार्थविषयकशाब्दबोधे ऽवान्तरवाक्यार्थविषयकनिश्चयस्य तादृशनिश्चयत्वेनैव हेतुता । एवं विशिष्टपदार्थगोचरशाब्दबोधेऽपि विशिष्टपदार्थोपस्थितेस्तद्विषयकनिश्चयत्वेनैव हेतुता न तु विशेषणान्तरप्रवेश इत्यभिमानेन शाब्दबोधविशेषेऽतिव्याप्तिं शङ्कते न चेत्यादिना । उपनयार्थज्ञानेति । उपनयवाक्यप्रतिपाद्यसाध्यव्याप्यहेतुमत्पक्षरूपावान्तरवाक्यार्थज्ञानेत्यर्थः । न्यायार्थज्ञान इति । निगमनसहकृतोपनयजन्ये वह्निव्याप्यधूमवानयं धूमज्ञानज्ञाप्यवह्निमानित्यादिमहावाक्यार्थज्ञान इत्यर्थः । तेन प्रतिज्ञादिपञ्चवाक्यात्मकन्यायस्य विशिष्टैकार्थज्ञानजनकतायाः स्वयं दूषणीयत्वेऽपि न क्षतिः । यद्यपि वह्नि-

व्याप्यधूमवांश्चायमित्याद्युपनयजन्यबोधे व्याप्यरत एवाभेदो धर्मिणि भासते न तु व्याप्यस्य व्याप्यतावच्छेदकसम्बन्धः नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात् । तथा च नातिव्याप्तेरवसरः पक्षांशे व्याप्यप्रकारकज्ञानस्यैव लक्षणघटकत्वात् । यत्र तादात्म्यसम्बन्धेन धर्मिणो हेतुना तत्र व्याप्यस्य पक्षांशे तेन सम्बन्धेनोपनयप्रतिपाद्यत्वेऽपि व्याप्याभेदस्यैव हेतौ भानात्तदंशे व्याप्तिप्रकारकत्वाभावेन नातिव्याप्त्यवसरः तथापि तादात्म्यसम्बन्धावच्छिन्नव्याप्तिविशिष्टधर्मिरूपहेतुपरतच्छब्दघटितस्य स चायमितिवाक्यस्य प्रतिपाद्ये विशिष्टार्थे निगमनार्थस्यान्यस्य वा कस्यचिदर्थस्यान्वयबोधस्तत्रातिव्याप्तिपरोऽयं ग्रन्थः साध्यव्याप्यहेतुविशिष्टपक्षपर्यन्तपरतच्छब्दजन्यबोधातिव्याप्तिपरश्च तच्छब्देनेत्यग्रिमग्रन्थ इति न पौनरुक्त्यम् । व्याप्यविशिष्टपक्षरूपवाक्यार्थज्ञानजन्यतामादाय तद्घटितमहावाक्यार्थबोधे संयोगादिसम्बन्धेन पक्षांशे व्याप्यप्रकारकज्ञानकारणताघटितलक्षणस्यातिव्याप्त्यसम्भवादेव च व्याप्यविशिष्टपक्षात्मकपदार्थज्ञानजन्यतामादाय तद्घटितमहावाक्यार्थबोधे संयोगादिसम्बन्धेन पक्षांशे व्याप्यप्रकारकज्ञानकारणताघटितलक्षणस्यातिव्याप्त्यसम्भवादेव च व्याप्यविशिष्टपक्षात्मकपदार्थज्ञानजन्यबोधेऽतिव्याप्तिमाह तच्छब्देनेति । तादृशविशिष्टार्थवाचकपदान्तराभावात्सर्वनामानुधावनम् । सर्वनाम्नो विशेषरूपेण पदार्थोपस्थापकतामते एव तज्जन्योपस्थिते पक्षविशेष्यकव्याप्तिविशिष्टहेतुप्रकारकनिश्चयरूपत्वासम्भव न तु पक्षबुद्धिस्थत्वेनोपस्थापकतामत इत्यभिप्रायादाह सङ्केतितशब्दान्तरेण चेति । व्याप्तिविशिष्टहेतुविशिष्टपक्षे आधुनिकसङ्केतशालिना घटादिपदेनेत्यर्थः । इदमुपलक्षणम् । विशिष्टपक्षलाक्षणिकपर्वतादिपदे चेत्यपि बोध्यम् । व्याप्त्यादिविशिष्टोपस्थितिद्वारा व्याप्यतावच्छिन्नहेतुविशिष्टपक्षोपस्थितिद्वारा जनिते वह्निव्याप्यधूमवान् पर्वत इत्याकारकशाब्दबोधेऽतिव्याप्तिः । ननूपनयार्थघटितमहावाक्यार्थबोधे कथमतिव्याप्तिः उपनयार्थज्ञानस्य पक्षविशेष्यकव्याप्यप्रकारकज्ञानत्वेन तद्धेतुताया अप्रामाणिकत्वात् प्रकृतपदार्थज्ञानत्वेन तदन्वयबोधे हेतुत्वादेवानुपस्थितपदार्थान्वयबोधाप्रसक्तेः । न च घण्टादेः सकलपदार्थोपस्थितावपि अया-

न्तरवाक्यार्थज्ञानं विना तद्घटितमहावाक्यार्थज्ञानानुदयात् अवान्तरवाक्यप्रतिपाद्यो यादृशविशिष्टार्थः तद्विषयकज्ञानत्वेन महावाक्यार्थज्ञाने हेतुत्वमावश्यकमिति वाच्यम्। दण्डी कुण्डली वासस्वी चैत्र इत्यादौ दण्डादिविशेषणान्वितचैत्रादिज्ञानं विनैव तादृशवाक्यार्थघटिततावद्विशेषणान्वितविशिष्टरूपमहावाक्यार्थधियः समूहालम्बनरूपतावत्पदार्थावगाहिस्मृतित उत्पत्तेर्माणिकृता स्वीकारादित्यत आह व्युत्पादयिष्यत इति । महावाक्यार्थज्ञानस्य एकविशिष्टार्थेनापरपदार्थसंसर्गावगाहिज्ञानस्य । अवान्तरेति । तादृशविशिष्टार्थविषयकज्ञानत्वावच्छिन्नजन्यत्वमित्यर्थः । अयं भावः । यादृशविशेषणविशिष्टस्य विशेष्यस्य विशेषणस्य वा शब्दादुपस्थितिस्तादृशेनैव विशिष्टेन विशेष्यस्य विशेषणान्तरस्य वान्वयबोधोऽनुभवसिद्धः यत्र च युगपदेवैकस्मिन्धर्मिणि समूहालम्बनोपस्थितानां विशेषणानां तुल्यतया भानात्तत्रापि नैकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोधः अतो न तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यं विशेष्ये वा यत्र विशेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते स बोधो विशिष्टविषयकबोधादेवोत्पद्यते न तु विशृङ्खलसमूहालम्बनात् । अत एवेष्टविशेष्यकोपायसाध्यताज्ञानस्य प्रवर्तकतामाशङ्क्य तन्मते विधिवाक्याद्वाक्यभेदभिया कृतिसाध्ययागसाध्यमिष्टमित्येतादृशस्य समूहालम्बनविलक्षणविशिष्टयागविशेषणकबोधस्यैव स्वीकार्यतया तदर्थमन्तरा कृतिसाध्यो याग इत्यवान्तरवाक्यार्थबोधस्य कल्पनीयतया गौरवम् उपायविशेष्यकफलसाधनताबोधस्य प्रवर्तकत्वे चार्थद्वयैकत्र द्वयमिति रीत्या कृतिसाध्यत्वेष्टसाधनत्वरूपविशेषणद्वयावगाही यागः कृतिसाध्य इष्टसाधनमिति बोधः स्वीक्रियते इति लाघवमित्युक्तं विधिवादे मणिकारेण । विशिष्टेन सममन्यान्वयबोधे विशिष्टधियो हेतुत्वे तादृशान्वयतात्पर्यधीघटितशाब्दसामग्र्या मिथोविषयकप्रत्यक्षादिप्रतिबन्धकतायां विशिष्टविषयकैकोपस्थितिर्निविशते अन्यथा तत्स्थाने तदुद्देश्यविधेयोपस्थितिद्वयमतो लाघवादपि तद्धेतुतासिद्धिः । एवं चोपनयप्रतिपाद्यहेतुविशिष्टपक्षविशेष्यकतदन्वयबोधप्रतिष्ठ्यानिर्दुर्वारैवेति । ननु तदादेर्विशेषरूपेणोपस्थापकतया विचारासहत्वात्कथं तदादिपदजन्यशा-

न्दबोधेऽतिव्याप्तिसङ्गतिः तथाहि तदादिपदस्य न घटत्वादिरूपविशेषधर्मविशिष्टे शक्तिर्नानार्थताप्रसङ्गेन गौरवात्। घटादिकं बुद्धिस्थीकृत्य प्रयुक्ततच्छब्दात्पटादिबोधस्य शक्तिभ्रममन्तरेणापि प्रसङ्गात्। न च वस्तुगत्या यद्रूपावच्छिन्नं बुद्धिस्थीकृत्य यत्पदव्यक्तिः प्रयुक्ता तद्रूपावच्छिन्ने तस्याः शक्तिरतो नायं दोष इति वाच्यम्। एवमपि पदव्यक्तिभेदेनानन्तशक्तिकल्पनया गौरवात्। यत्पदव्यक्तिप्रयोज्या प्रयोज्यवृद्धप्रवृत्तिर्नोपलब्धा तत्पदव्यक्तिशक्तेरगृहीतत्वेन ततोऽन्वयबोधानुपपत्तिश्च अतः सामान्यतः स्वप्रयोक्तृपुरुषबुद्धिस्थे तदादिपदसामान्यशक्तिः कल्पनीया। तथा च तत्त्वेनैवोपस्थितिः सर्वनामपदाद्भविष्यति न तु विशेषरूपेण। न च बुद्धिस्थत्वेन शक्यानुगमेऽपि तेन रूपेण व्युत्पत्तौ सत्यां घटत्वादिरूपविशेषधर्मपुरस्कारेण बुद्धिस्थत्वरूपविशेषधर्मदर्शनादुपलक्षणीभूतघटत्वादिप्रकारेण शक्तिग्रहसम्भव इति तेन रूपेण न तत्पदादुपस्थितिर्दुर्लभा सम्बन्धग्रहप्रकारताया एव स्मृतिप्रकारताप्रयोजकतया प्रकारांशे शक्तिग्रहानपेक्षणादिति वाच्यम्। द्रव्यादिपदाद्घटत्वादिप्रकारेण शक्तिभ्रमशून्यस्य शाब्दबोधानुदयाच्छक्त्यधीनोपलक्षणीभूतधर्मप्रकारकोपस्थितेः शाब्दबोधानुपयोगित्वादित्यत आह तदादेश्चेति। विशेषरूपेणोपस्थापकत्वं व्युत्पाद्यत इत्यनुषङ्गेणान्वयः। अयमभिप्रायः। स्वप्रयोक्तृबुद्धिप्रकारत्वेनानुगतीकृतघटत्वादिरूपविशेषधर्मविशिष्टे तत्पदशक्तिरतो न विशेषणभेदेन शक्त्यानन्त्यं न वा विशेषधर्मप्रकारकशाब्दबोधोपयोगिविशेषधर्मप्रकारकोपस्थितेर्दुर्घटता। न च तादृशबुद्धिविषयत्वविशिष्टे शक्त्यैवोपपत्तौ किमेतावता प्रयासेन विशेषरूपेणोपस्थापकतया विरहेऽपि क्षतिविरहादिति वाच्यम्। विशेषधर्मप्रकारकसंशयनिवृत्त्यर्थमपि तदादेर्विशेषरूपेणोपस्थापकताया अवश्योपपाद्यत्वात्। बुद्धिप्रकारत्वेन प्रवृत्तिनिमित्तघटत्वादीनामनुगमेऽपि तादृशधर्मस्याशक्यतया तदंशपरित्यागेन निर्विशेषणकघटत्वादिप्रकारकबोधोपपत्तिः बुद्धिप्रकारत्वस्याशक्यत्वेऽपि च तत्पदं बुद्धिप्रकारविशिष्टं बोधयत्वित्याकारकभगवत्सङ्केतरूपशक्तौ तेनानुगतरूपेण घटत्वपटत्वादिभानाच्छक्तैक्यं बुद्धिप्रकारत्वस्य सङ्केतविषयत्वेऽपि तस्य शक्योपलक्षणता

न तु शक्यान्तर्भावेन विशेषणत्वं तदुपलक्षितघटत्वादिप्रकारकत्वेनैव बोधस्य सङ्केतविषयत्वात् न तु तद्विशिष्टप्रकारकत्वेन शाब्दबोधप्रकारतायां शाब्दबोधविषयतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानं प्रयोजकं यथा घटपदजन्यशाब्दबुद्धिप्रकारतायां घटत्वावच्छिन्नो घटपदजन्यशाब्दबोधविषयतावान्भवत्वित्याकारकसङ्केतीयशाब्दबोधविषयतावच्छेदकत्वेन विषयत्वस्य ज्ञानं तादृशसङ्केतग्रहश्च घटत्वावच्छिन्नत्वविषयतानिरूपितसङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविषयतावान्घट इत्याकारकः । शाब्दबोधप्रकारतावच्छेदकतायां च शाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन सङ्केतविषयत्वज्ञानम् । *यथा लोमत्वस्य पशुपदजन्यशाब्दबोधप्रकारतावच्छेदकतायां लोमत्वावच्छिन्नलोमावच्छिन्नः पशुपदजन्यशाब्दबोधविषयतावान्भवत्वित्याकारकसङ्केतीयशाब्दबोधविषयतावच्छेदकतावच्छेदकत्वेन* विषयत्वज्ञानं तादृशसङ्केतग्रहश्च लोमत्वावच्छिन्नस्वनिष्ठावच्छेदकताकत्वसम्बन्धावच्छिन्नलोमनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्ना या शाब्दबोधविषयत्वप्रकारता तन्निरूपितविशेष्यतावाल्लोमादिमानित्याकारकः । प्रकृते च बुद्धिप्रकारताश्रयावच्छिन्नस्तत्पदजन्यशाब्दबोधविषयो भवत्वित्याकारकभगवत्सङ्केतीयशाब्दबोधविषयतावच्छेदकत्वेन विषयत्वं न बुद्धिप्रकारत्वस्य किं तु तदंशे सङ्केतेन शाब्दबोधविषयतावच्छेदकतासामानाधिकरण्यस्यैवावगाहनात् सङ्केतीयशाब्दबोधविषयतावच्छेदकतासमानाधिकरणत्वेनैव विषयत्वमिति तस्य तत्पदजन्यशाब्दबोधप्रकारतानवच्छेदकत्वनिर्वाहः । इदं च विशिष्टशक्तपदस्थले उपलक्षितवाचकगगनादिपदस्थले च यद्धर्मधर्मितावच्छेदकीकृत्य शाब्दबोधविषयत्वेन सङ्केतविषयत्वग्रहस्तद्धर्मप्रकारक एव बोध उत्पद्यत इति तत्र शब्दाश्रयत्वाद्यनियतधर्मप्रकारकबोधनिर्वाहः । दीधितिकारास्तु सर्वत्रैव शाब्दबोधप्रकारतायां तदवच्छेदकतायां च सङ्केतीयशाब्दबोधविषयत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वतदवच्छेदकत्वरूपशक्यतावच्छेदकत्वतदवच्छेदकत्वज्ञानं हेतुः । यथा घटपदपशुपदस्थले घटत्वलोमत्वादेः । गगनपदस्थले च शब्दाश्रयत्व एव निरुक्तशक्यतावच्छेदकत्वसत्त्वात् शब्दाश्रयत्वप्रकारक एव शक्तिप्रमाजन्य-

बोध इति घटगगनपदयोरविशेष इति वदन्ति । तन्मते बुद्धिप्रकारत्वस्य शाब्दबोधप्रकारतावच्छेदकत्वं दुरुपपादम् । नानार्थहर्यादिपदस्थले चोपलक्षणीभवता केनाप्यनुगतरूपेण प्रवृत्तिनिमित्तानामभानाद्वाच्यस्वरूपसदनुगतरूपसत्त्वेऽपि शक्तिभेदान्नानार्थतानिर्वाहः । बुद्धिप्रकारविशिष्टवाचकं तत्पदमिति सर्वोपसंहारेण व्युत्पत्तिस्वीकर्तुरपूर्वचैत्रत्वादिविशिष्टे तदादिघटितवाक्यात्प्रवृत्त्याद्यनुपलम्भेऽपि न तत्प्रकारकशाब्दबोधस्य तदादिपदादनुपपत्तिः । अथ सामान्यतो व्युत्पत्तेश्चैत्रत्वाद्यपूर्वधर्मविशिष्टगोचरत्वेऽपि स्वरूपतस्तद्धर्मप्रकारेण शक्तिग्रहात्स्वरूपतस्तत्प्रकारकोपस्थितेस्तादृशशाब्दबोधस्य चानुपपत्तिः । जातिमान् हस्तिपकसम्बन्धीति ज्ञानात्स्वरूपतो हस्तित्वादिप्रकारकस्मरणानुदयात्स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसम्बन्धिधिय एव हेतुत्वात् । यत्त्वनुगमकधर्ममोपस्थानात्सामान्यव्युत्पत्त्यधीनं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणं दुर्घटमिति ततस्तादृशचैत्रत्वादिप्रकारकपदार्थोपस्थितिशाब्दबोधयोर्नानुपपत्तिरिति । तदसत् । स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकानुभवस्य हेतुतायाः व्यवस्थापनान्मोपपदेन तद्विशिष्टतत्प्रकारकानुभवाद्विशिष्टतत्प्रकारकस्मरणानुपपत्तेरिति चेन्न । प्रकरणादिना निर्विशेषणचैत्रत्वावच्छिन्ने वक्तृबुद्धिविषयताग्रहे वक्तृबुद्धिविषयतावच्छेदकविशिष्टवाचकं तत्पदमिति स्मृतौ सत्याम् विशिष्टचैत्रत्वादिविशिष्टवाचकतायास्तदादिपदेन मानसज्ञानस्यैवान्तत सम्भवेन सर्वसामञ्जस्यात् । न च चैत्रोऽस्य बुद्धिस्थ इति निश्चयेऽपि विशिष्य चैत्रत्वादिविशिष्टवाचकतायाः अनिश्चयेन तत्प्रकारकशाब्दबोधानुपपत्तिरिति वाच्यम् । यद्विशिष्टविषयकबुद्धिप्रयोज्य यत्पद तत्तद्विशिष्टवाचकमिति सामान्यतो व्याप्त्यवधारणेन प्रकरणाद्यधीनस्य चैत्रत्वविशिष्टबुद्धिप्रयोज्यत्वस्य पदस्य विशेषदर्शनतया तद्विशिष्टवाचकतासंशयघटकत्वेन विशिष्टवाचकतायाः सुनिश्चयत्वात् । नन्वेवमपि स्वप्रयोजकबुद्धिप्रकारत्वे स्वपदार्थस्यानुगमेन सकलतत्पदानुपसंहारेण व्युत्पत्तिर्दुर्घटेति पवनप्रकाशपतिप्रवृत्तिनोपलभ्या तस्या व्युत्पत्त्यनुरोधेः तदर्पितशाब्दबोधानुपपत्तिवारणमशक्यमेवेति वाच्यम् ।

तदननुगमोद्धारस्याबहितैः परिचिन्तनीयत्वादित्यलमधिकेन । तत्रातिरिक्तेति । शाब्दबोधनिरूपितावान्तरवाक्यार्थबोधपदार्थोपस्थितिनिष्ठजनकतावच्छेदकगर्भेऽनुमितिजनकतावच्छेदकोक्तधर्माप्रविष्टस्य पदवृत्तिज्ञानजन्यत्वस्य निवेशादित्यर्थः । यत्रावान्तरवाक्यार्थबोधानन्तरं चरमपदज्ञानं तदुत्तरं चरमपदार्थस्मृतिस्तत्र तदानीमवान्तरवाक्यार्थगोचरशाब्दबोधस्य विनष्टत्वात् । महावाक्यार्थबोधहेतुत्वासम्भवेऽपि यत्र तादृशशाब्दबोधोत्पत्तिद्वितीयक्षण एव पूर्वोत्पन्नचरमपदज्ञानात् चरमपदार्थस्मृतिस्तात्पर्यविषयकसमूहालम्बनरूपा तत्रैव तादृशशाब्दबोधस्य महावाक्यार्थबोधहेतुत्वम् । अन्यत्र समूहालम्बनरूपतावत्पदज्ञानजन्यतावत्पदार्थगोचरसमूहालम्बनस्मृतिरेव गतिः । इद तु बोध्यम् । अवान्तरवाक्यार्थबोधस्य महावाक्यार्थबुद्धौ शाब्दत्वजातिपुरस्कारेणैव कारणता न तु पदजन्यत्वेन गौरवात् । न च तथा सति विशिष्टविषयकशाब्दबोधादिव विशिष्टे गृहीतवृत्तिकपदजन्यविशिष्टस्मृतेरपि विशिष्टे इतरान्वयबोधोत्पत्त्या तत्र विशिष्टविषयकशाब्दधियो व्यभिचारः स्यादिति तादृशस्मृतिसाधारणपदजन्यत्वेनैव हेतुत्वमुचितमिति वाच्यम् । पदज्ञानजन्यत्वेन स्मृतिशाब्दधियोरनुगमे पदरूपलिङ्गज्ञानजन्यार्थविषयकानुमित्या तत्तत्कारणाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकनिवेशेनैव वारणीयत्वात् । यत्रावान्तरवाक्यार्थबोधान्महावाक्यार्थधीस्तत्राप्यवान्तरवाक्यार्थघटकार्थान्तरस्य पदजन्यस्मृतेरवान्तरवाक्यार्थबोधानन्तरमवश्यकल्पनीयतया तस्याः सकलपदार्थविषयकत्वोपगमेन पदार्थस्मृतेरवान्तरवाक्यार्थधीजन्यशाब्दबोधे व्यभिचारवारण तु न सम्यक् । विशिष्टे गृहीतवृत्तिकपदाधीनाविशिष्टस्मृतेरिव विशेष्यमात्रे गृहीतवृत्तिकपदाधीनाया उद्बोधकान्तरवशाद्विशेषणमवगाहमानाया विशिष्टस्मृतितो व्याप्यविशिष्टपक्षादिविषयकेतरान्वयबोधवारणाय गृहीतविशिष्टवृत्तिकपदजन्योपस्थितित्वेनैव विशिष्टविषयकस्मृतेस्तादृशान्वयबोधहेतुताया वक्तव्यतया विशिष्टवृत्तिकग्रहानपेक्षावान्तरवाक्यार्थशाब्दधीजन्यबोधे तस्या व्यभिचारस्यापरिहार्यत्वात् प्रका-

रान्तरेण तद्वारणे तावत्पदार्थविषयकस्मृतिकल्पनाया अकिञ्चित्करत्वात् अतोऽप्यवान्तरवाक्यार्थधियः शाब्दत्वपुरस्कारेण कारणत्वान्तरमावश्यकमिति पदजन्यत्वपदं पदाजन्यबोधव्यावृत्तधर्मपरम् तच्च शाब्दत्वादिकमपीति । *अधिकप्रवेशेन* निश्चयत्वपर्याप्ततज्जनकतावच्छेदकताघटितस्य लक्षणस्य *नातिव्याप्तिरित्युक्त्वा निश्चयत्वप्रवेशेन पर्याप्त्यनि*षेधेऽपि नातिव्याप्तिरित्याह निश्चयत्वस्येति । परोक्षसंशयानभ्युपगमेन संशयान्यत्वस्योक्तयुक्त्या शाब्दत्वादेर्निवेशनीयतया ज्ञानत्वस्य च पदजन्यबुद्धावव्यावर्तकत्वादिति भावः ॥

व्याप्तिविशिष्टहेतुरूपविशेषणतावच्छेदकविशिष्टस्य तद्विशेषणधर्मितावच्छेदकपर्वतत्वाद्यवच्छिन्नस्य वैशिष्ट्यावगाहिनि शाब्दबोधादौ प्रत्यक्षादिसाधारणविशिष्टवैशिष्ट्यबोधनिष्ठतद्विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतामादायातिव्याप्तिं शङ्कते न चेत्यादिना ॥

(दी०) न च तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् तादृशे शाब्दबोधे प्रत्यक्षे चातिव्याप्तिः दण्डो रक्तो न वेति संशये रक्तदण्डवानयमिति ज्ञानानुदयादिति वाच्यम् । ज्ञानोपरमेऽपि विशिष्टविषयोपधानेनेच्छाद्वेषयोः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्कारादेव विशिष्टस्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वे न्यूनदृष्टेर्ज्ञानत्वस्य तत्राप्रवेशादिच्छादितः संस्काराद्यानुमितेरनुदयात् संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात् ॥

(गा०) तथापि अवान्तरवाक्यार्थबोधादिनिष्ठशाब्दबोधासाधारणकारणतामादायातिव्याप्तेरुक्तरीत्या वारणेऽपि । तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रतीति पर्वतत्वादिरूपधर्मितावच्छेदकावच्छिन्नविशेषणतापन्नव्याप्तिविशिष्टधूमादिविशिष्टवैशिष्ट्यज्ञानत्वावच्छिन्नं प्रतीत्यर्थः । तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन पर्वतत्वाद्यवच्छिन्नविशेष्यकव्याप्तिविशिष्टधू-

ज्ञादिप्रकारकनिश्चयत्वेन । तादृशे वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधरूपे शाब्दबोधेऽतिव्याप्तेर्वारित्वात् तस्यैव प्रथममुपन्यासः स्मृतिव्यावृत्तधर्मस्य जन्यतावच्छेदकत्वे स्मृतौ नातिव्याप्तिसम्भवः । उपमितेः पदवाच्यत्वावगाहिन्याः तादृशविशिष्टवैशिष्ट्यबोधरूपताप्रयाशो न सम्भवत्यतः प्रत्यक्षशाब्दबोधमात्रोपादानम् । अथ किमिदं विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकं विशिष्टवैशिष्ट्यबोधत्वं न तावद्विशिष्टप्रतियोगिकं यद्वैशिष्ट्यं तदवगाहित्वं व्यधिकरणसम्बन्धावगाहिविशिष्टभ्रमे व्यभिचारात् । नापि विशिष्टप्रकारकत्वं काञ्चनमयवह्निमानित्यादिभ्रमप्रकारीभूतविशिष्टाप्रसिद्धेः । तत्र काञ्चनमयो वह्निरित्यादिज्ञानानपेक्षणीयतापत्तेः । नापि विशेषणान्तरप्रकारेण भासमानप्रकारकत्वं । रक्तो दण्डः दण्डवान् पुरुष इति समूहालम्बनस्थलेऽपि रक्तो दण्ड इतिज्ञानापेक्षाप्रसङ्गात् । नापि विशेषणान्तरप्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्रकारताकत्वं रक्तत्वादिप्रत्येकपदार्थोपस्थितिमूलके रक्तदण्डवानितिज्ञाने व्यभिचारात् । न हि तादृशाकारकबोधो रक्तो दण्ड इत्यादिविशिष्टज्ञानानन्तरमेव जायत इति दीधितिकाराद्यनुमतम् । बाधग्रन्थे काञ्चनमयत्वविशिष्टवह्न्यप्रसिद्ध्योपनीतकाञ्चनमयत्वादिविशिष्टवह्निवैशिष्ट्यानुमितिः शुद्धवह्नित्वावच्छिन्नव्याप्यधूमादिमत्त्वज्ञानादिना पर्वते न सम्भवतीति कथं तद्विरोधितया व्यधिकरणकाञ्चनमयत्वावच्छिन्नवह्न्यभावस्य दोषान्तरासङ्कीर्णबाधस्य हेत्वाभासतेति मणिकारोक्तेर्विशिष्टविशेषणज्ञानं विनापि विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति रीत्या तादृशानुमितिसम्भव इत्यभिधाय स्वयं दूषणीयत्वात् । *विशिष्टव्याप्तिज्ञानं विनापि तद्घटकप्रत्येकपदार्थोपस्थितिभ्यो विशिष्टपरामर्शोत्पत्त्यानुमितिरिति मिश्रेणान्येन चाभिधानात्* एकत्वविशिष्टकर्तुः पूर्वमज्ञानेऽपि क्षितिरेककर्तृकेत्यनुमितेरनेन स्वीकृतत्वाच्च । अत्राहुः । विशेषणान्तररक्तत्वादिविशेष्यतापन्नदण्डादिप्रकारकं ज्ञानं द्विधा रक्तत्वाद्यवच्छिन्नप्रतियोगिकत्वेन दण्डादिवैशिष्ट्यावगाहि तद्रूपानवच्छिन्नतद्वैशिष्ट्यावगाहि च । तादृशविशिष्टप्रतियोगि-

कत्वं च दण्डादिप्रकारतानिरूपकसंसर्गतायामवच्छेदकतया भासते तद्विशिष्टसंयोगादेरेव दण्डादिसंसर्गतया भानात् । दण्डादिविशेषणताप्रयोजकत्वादेरेव वा रक्तावच्छिन्नप्रतियोगिकसंयोगात्मकपरम्परासम्बन्धेन पुरुषादौ प्रकारता तादृशविशिष्टवैशिष्ट्यबोधे एव विशेषणतावच्छेदकप्रकारकधीः कारणं न तु विशिष्टविशेषणावगाहिन्यपि रक्तत्वादिकं वैशिष्ट्यप्रतियोगिन्युपलक्षणतयावगाहमाने द्वितीयबोधे । अत एव च प्रतियोगिविशेषिताभावबुद्धौ घटो नास्तीत्याकारिकायां प्रतियोगिनि प्रकारीभवतो घटत्वादेः प्रतियोगितावच्छेदकतयैव भानमिति तत्र घटत्वादिप्रकारकज्ञानापेक्षानियमः । यद्यपि विशिष्टविशेषणावगाहिज्ञानमात्र एव विशिष्टज्ञानापेक्षाया मणिकारादेः स्वरसः । तथापि लाघवोपनीतरक्तत्वादिविशिष्टकर्मधारयानुमितिर्विशिष्टज्ञानमनपेक्ष्यैवोत्पद्यत इत्यनुरोधाद्दीधितिकारादीनां दर्शितविशेषादरः । दण्डो नास्ति रक्तो नास्तीत्यादिज्ञानदशायां नियमतो रक्तदण्डो नास्तीत्यादिज्ञानोत्पादविरहः परोक्तविशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशेषणधीहेतुताकल्पकः । दण्डो रक्त इत्यादिज्ञानदशायामपि कदाचित्तादृशसमूहालम्बनबुद्धावुत्पद्यमानायां दण्डो रक्तो नास्तीतिबुद्धेरनुत्पादे गत्या तत्राननुगतस्य कस्यचित्प्रतिबन्धकता कल्प्यत इति विवेचनीयं चेदमधिकमन्यत्र । केचित्तु रक्तदण्डवानित्यादिज्ञानीया रक्तत्वादिविशेष्यतापन्नदण्डादिनिष्ठा प्रकारता द्विविधा । काचिद्दण्डादिविशेषणतापन्नरक्तत्वाद्यन्तर्भावेन पर्याप्ता काचित्केवलदण्डादावेव । तत्र प्रथमा विशेषणतावच्छेदकप्रकारकज्ञानाधीना नापरा पुरुषादिविशेष्यतानिरूपितप्रकारताया रक्तत्वादिवृत्तित्वेऽपि पुरुषो न रक्त इत्यादिधीर्न तादृशप्रकारताकज्ञानविरोधिनी इतरविशेषणतानवच्छिन्नायाः पुरुषादिविशेष्यतानिरूपितरक्तत्वादिप्रकारताया एव तत्प्रतिबध्यतावच्छेदकत्वादित्याहुः । अपरे तु यथा विशेष्यतानिरूपितप्रकारतामात्रं न विशेष्यतावच्छेदकता भूतले घटवदित्यादौ भूतलत्वादेर्घटादिधर्मितावच्छेदकता घटेतरस्यापि प्रसङ्गात् । अपि तु विलक्षणैव विषयता सा च

प्रकारतात्मिका तदन्यैव वा । एवं विशेषणतावच्छेदकतापि विलक्षणविषयता तन्निरूपकदण्डादिनिष्ठप्रकारताशालिनि बोधे विशेषणतावच्छेदकरक्तत्वादिप्रकारकज्ञानापेक्षा प्रत्येकोपस्थितिमूलकं रक्तदण्डवानयमित्यादिज्ञानं च न तथाविधविलक्षणप्रकारताशालीति वदन्ति । तदुभयमपि न सम्यगिव प्रतिभाति विशिष्टज्ञानपूर्वकतदपूर्वकयोरविलक्षणाकारज्ञानयोर्विषयभेदमन्तरेण विषयतावैलक्षण्यस्याननुभवात् । विशिष्टज्ञानकार्यतावच्छेदकतया तत्सिद्धिरित्यपि बालप्रलपितं तादृशवैलक्षण्यविषयतासिद्धावेव तन्नियामकतया विशिष्टज्ञानहेतुतासिद्धेः । यदि च विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाहिनि बोध एवान्वयव्यतिरेकाभ्यां विशिष्टविशेषणज्ञानं हेतुः तज्जन्यतावच्छेदकं यदि विशिष्टप्रतियोगिकत्वावच्छिन्नसंसर्गताकबुद्धित्वं तदा गौरवम् उक्तवैलक्षण्यपुरस्कारेण प्रकारताविशेषस्य कार्यतावच्छेदकत्वे च लाघवमिति विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिन्येव ज्ञाने प्रकारताया व्यासज्यवृत्तित्वादिरूपवैलक्षण्यासिद्धिरप्रत्यूहेत्युच्यते तदा न विवदामह इति प्रकृतमनुसरामः । ननु यथा विशेषणतावच्छेदकरक्तत्वांशे निर्धर्मितावच्छेदककताद्विशिष्टवैशिष्ट्यबोधे तत्प्रकारकज्ञानत्वेनैव हेतुता न तु तत्र संशयान्यत्वप्रवेशः तथा तदंशे सधर्मितावच्छेदककविशिष्टवैशिष्ट्यबोधेऽपि तत्तद्धर्मितावच्छेदकावच्छिन्नविशेष्यकतत्प्रकारकज्ञानत्वेनैव संशयसाधारणहेतुता स्वीक्रियते निश्चयत्वेन विशेष्यतावच्छेदकप्रकारकधीहेतुताया मणिकारादिभिरनभिधानादिति कथमतिव्याप्तिरतस्तथा हेतुतामनुभवेन द्रढयति रक्तो दण्डो न वेति । ननु रक्तो दण्डो न वेति संशयानन्तरं रक्तदण्डवानितिनिश्चयानुत्पाद एवानुभवसिद्धः स च विशेषणसन्देहे विशिष्टसन्देहस्यौचित्यार्जितत्वादुपपद्यते निश्चयोत्पत्तौ संशयसामग्र्यभावस्यापेक्षितत्वाद्रक्तदण्डवान्न वेति विशिष्टसंशयस्त्वननुभवसिद्ध एवेति निश्चयत्वेन हेतुतायां साधकविरहो बाधकस्य च सत्त्वम् । अत्र केचित् । यदि विशेषणतावच्छेदकप्रकारकसंशयादपि विशिष्टवैशिष्ट्यबोध उपेयते तदा अप्रामाण्यशङ्कास्कन्दितादपि ज्ञाना-

तदुपगम आवश्यकः अप्रामाण्यसन्देहेन विषयसन्देहस्यैव जननात् संशये ऽप्रामाण्यसंशयस्याकिञ्चित्करत्वात् । अतो ऽप्रामाण्यनिश्चयास्कन्दितज्ञानात्फलवारणायाप्रामाण्यनिश्चयानास्कन्दितत्वेनैव हेतुता वक्तव्येत्यप्रामाण्यज्ञानीयगुरुशरीरनिश्चयत्वनिवेशाद्गौरवमित्यप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वेन हेतुत्वमेवोचितमिति विशेषणसंशयाद्विशिष्टसंशयानुपपत्तिरूपबाधकमपि कथञ्चिदुद्धरणीयमिति वदन्ति । वस्तुतस्तु संशयस्य विशिष्टवैशिष्ट्यबोधजनकत्वे दण्डो रक्तो न वेत्यादिसंशयाद्रक्तत्वतदभावाद्युभयविशिष्टदण्डादिवैशिष्ट्यावगाहिबोधोऽपि स्यात् न चेष्टापत्तिः । तादृशज्ञानस्यैकत्र दण्डादौ धर्मिणि विरुद्धोभयप्रकारकतया रक्तत्वादिनिश्चयत्वासम्भवात् । विशेष्यान्तरविशेषणतापन्नधर्मिकसंशयस्य चानुभवविरुद्धतया तत्र संशयत्वोपगमासम्भवाच्च । अत एव च केवले विशेष्ये विशेषणमिति रीत्या रक्तदण्डवानितिज्ञानेऽपि उक्तसंशय कार्यसहवृत्तितया प्रतिबन्धक इति वदन्ति । न च तत्र संशयस्य प्रतिबन्धकत्वे विशिष्टवैशिष्ट्यबोधसाधारणधर्म एव तत्प्रतिबध्यतावच्छेदकोऽस्तु तावतैव तत्र संशयानन्तरतद्विशिष्टवैशिष्ट्यबोधवारणे तत्र तत्प्रकारकज्ञानत्वेनैव हेतुत्वमुचितमिति वाच्यम् । तत्संशयद्वितीयक्षणे कथञ्चित्तत्प्रकारकनिश्चये तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्यधीनिर्वाहाय विशिष्टवैशिष्ट्यविषयताभिन्नवैशिष्ट्यविषयताया एव संशयप्रतिबध्यतावच्छेदकत्व वाच्यमितिनिश्चयत्वेन विशिष्टवैशिष्ट्यबोधाहेतुत्वे संशयोत्तर विनापि निश्चय विशिष्टवैशिष्ट्यधीप्रसङ्गात् । न च यत्र दण्डे रक्तत्वस्य संशय पुरुषे च दण्डस्यानुमितिसामग्री रक्तेतरदण्डस्य पुरुषे बाधग्रहश्च तत्र संशयसत्त्वेऽपि केवले विशेष्ये विशेषणमित्यादिरीत्या रक्तदण्डवान्पुरुष इत्याद्यनुमित्युत्पत्तेः कथं तादृशबोधे संशयप्रतिबन्धकतेति वाच्यम् । प्रत्यक्षं प्रत्येव तत्प्रतिबन्धकताया वक्तव्यत्वात् । अलौकिकत्वमपि तत्र विशेषणांशे संशयसत्त्वेऽपि लौकिकसन्निकर्षाद्रक्तदण्डवानितिज्ञानोत्पत्तेः । लौकिकप्रत्यक्षसामग्र्या विपरीतज्ञानविरोधितयैव च विशेषणधर्मिकलौकिकप्रत्यक्षात्मकसंशयस्य ना-

पत्तिः । एवं च विशिष्टवैशिष्ट्यबोधव्यावर्तकविशेषणानवच्छिन्ने ऽपि विशेष्ये विशेषणमितिरीत्या बोधे विशेषणे तद्विशेषणसंशयस्य प्रतिबन्धकत्वेऽपि दण्डो रक्तो न वेति संशयबलादितरबाधाद्युपनीतरक्तत्वादिविशेषितदण्डाद्यनुमितौ रक्तत्वादिविशिष्टवैशिष्ट्यावगाहिताप्रसङ्गस्य तादृशसन्देहानन्तरजातरक्तत्वादिविशेषितदण्डादिप्रकारकलौकिकप्रत्यक्षे विशिष्टवैशिष्ट्यावगाहिताप्रसङ्गस्य च वारणाय तद्बुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुताकल्पनमावश्यकम् । यत्तु निश्चयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे निश्चयत्वघटकयोस्तदभावाप्रकारकत्वतत्प्रकारकत्वदलयोर्विशेषणविशेष्यभावे विनिगमकाभावेन कारणताबाहुल्यमिति तदभावप्रकारकज्ञानत्वेन संशयस्य प्रतिबन्धकत्वमेव कल्पयितुमुचितं यत्र संशयद्वितीयक्षणे स्मरणादिरूपस्तन्निश्चयस्तत्र द्वितीयक्षणे संशयनाशे सत्येव विशिष्टबोध उपेयत इति । तदसत् । तथा सति तुल्ययुक्त्यानुमित्यादावपि लिङ्गादिसन्देहस्य तदभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वापातात् निश्चयत्वावच्छिन्नहेतुताघटितानुमितिलक्षणे ऽसम्भवापत्तेः । यत्तु विशिष्टवैशिष्ट्यबोधं प्रति निश्चयत्वेन हेतुत्वे विशेषणसंशयजन्यविशिष्टसंशयानुपपत्तिरिति बाधकं तदप्यकिञ्चित्करम् । दण्डत्वसामानाधिकरण्येन रक्तत्वानिश्चयरूपकोटितावच्छेदकावच्छिन्नप्रसिद्धिस्थल एव चैत्रीयो दण्डो रक्तो न वेतिविशेषरूपावच्छेदेन रक्तत्वाभावावगाहिसंशयाद्रक्तदण्डवान्न वा चैत्र इति विशिष्टसंशयोदयात् तथाविधनिश्चयस्य तादृशसंशयाविरोधित्वात् । यत्तु तत्र विशेष्ये विशेषणमित्यादिरीत्यैव विशिष्टकोटेरवगाही संशयो न तु विशिष्टवैशिष्ट्यावगाहीति समाधानम् । तदसत् । धर्मिणि रक्तत्वादिविशेषितदण्डादेरुक्तरीत्या भानसम्भवेऽप्यभावांशे विशिष्टप्रतियोगिनो वैशिष्ट्यभाननियमात् । अभावांशे रक्तत्वादिविशिष्टदण्डादिवैशिष्ट्यभानस्यावश्यकत्वात्तदुपपत्तेर्दर्शितप्रकारं विना असम्भवात् । न च लौकिकप्रत्यक्ष एवाभावांशे तद्धर्मविशेषितप्रतियोगिनि प्रकारतया भासमाने तद्विशिष्टवैशिष्ट्यावगाहितानियम इति सं-

शाये कोट्योरुपनयादेव मानाद्विशिष्टवैशिष्ट्यानवगाहनसम्भव
इति वाच्यम् । दण्डसामान्याभावस्यैव रक्तत्वाद्युपलक्षितप्र
तियोगिकत्वाद्भावांशे रक्तत्वादिविशिष्टदण्डादिरूपप्रतियोगिवैशि
ष्ट्यानवगाहने तादृशसंशयस्य दण्डादिसामान्याभावावगाहितया
दण्डवानितिविशिष्य निश्चयदशायां दण्डादौ रक्तत्वादिसं
शयाद्विशिष्टसंशयानुपपत्तेरित्यधिकमन्यत्रानुसन्धेयम् । रक्तो
दण्डो नवेति संशयानुव्यवसाये च रक्तत्वादिविशिष्टदण्डादि
रूपविषयप्रकारेण न ज्ञानमानं किं तु दण्डादिविशेषणतापन्नरक्त
त्वादिप्रकारत्वेनैवेति न तदनुपपत्तिरिति संक्षेपः । विशिष्ट
वैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेनैव हे
तुता न तु तादृशसंशयान्यज्ञानत्वेनेति संशयान्यत्वविशिष्टज्ञानत्व
रूपनिश्चयत्वावच्छिन्नकारणताघटितलक्षणस्य न तत्रातिव्याप्तिरिति
समाधत्ते ज्ञानोपरमेऽपीत्यादिना ज्ञानत्वस्याप्रवेशादित्यन्तेन ।
ज्ञानत्वस्यावच्छेदकगर्भाप्रवेशे हेतुगर्भविशेषणं न्यूनवृत्तेरिति ।
न्यूनवृत्तित्वं चावच्छेद्यत्वाभिमतहेतुताया अव्यापकत्वम् । ज्ञा
नत्वानिवेशेऽनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षापत्ति
स्मृतावेवोद्बोधकस्य हेतुतया प्रत्यक्षे च तादृशदशायाकिञ्चि
त्करत्वात् तेन विनापि ज्ञानेन विशिष्टवैशिष्ट्यप्रत्यक्षजननादिति
तु न देश्यम् । अगत्योद्बोधकासमवधानविशिष्टसंस्कारत्वाभाव
स्यावच्छेदककोटौ प्रवेशेन तदापत्तेर्वारणीयत्वात् । कालान्त-
रे उद्बोधकसमवहितसंस्काराद्विशिष्टवैशिष्ट्यावगाहिस्मरणानि
र्वाहाय संस्कारभेदमुपेत्य विशिष्टसंस्कारत्वाभावानुधावनम् ।
उद्बोधकसमवहिते संस्कारे च विशेषणाभावाद्विशिष्टसंस्का
रत्वाभावः सुलभः । भेदस्याव्याप्यवृत्तित्वे तूद्बोधकाभावविशिष्ट
संस्कारभेद एव निवेश्य । अत एव ज्ञानत्वाप्रवेशे लाघवासम्भवेन
न्यूनवृत्तित्वमेव तदनिवेशप्रयोजकतयाऽभिहितम् । तद्विषयकगु
णानां हेतुत्वं इति न्यूनवृत्तिताप्रकाशनाय तद्विषयकगुणानां
विशिष्टविशेषणावगाहिनामिच्छाद्वेषकृतिसंस्काराणाम् । ननु वि
शिष्टविषयकेच्छादिस्थलेऽपि तज्जनकविशिष्टज्ञानस्यावश्यकत्वात्
सर्वत्र ज्ञानमेव हेतुर्न त्विच्छादिकमित्याशङ्कायामिच्छादेर्वि
शिष्टवैशिष्ट्यबोधहेतुत्वे हेतुमाह ज्ञानोपरमेऽपीत्यादिना । ज्ञा

मोपरमेऽपि इच्छादिजनकविशिष्टज्ञाननाशेऽपि । विशिष्टविषयोपधानेनेति । रक्तत्वादिविशिष्टदण्डादिरूपविषयप्रकारेणेत्यर्थः । इच्छाद्वेषयोः साक्षात्कारादित्यन्वयः । रक्तदण्डमिच्छामि रक्तदण्डं द्वेष्मि इत्याकारकेच्छाद्वेषसाक्षात्कार इच्छात्वादिप्रकारक इच्छादिद्वितीयक्षणोत्पन्नेच्छात्वादिनिर्विकल्पकादिच्छातृतीयक्षण एव उत्पत्स्यते तत्पूर्वक्षण एव जनकज्ञानं नश्यतीति न विशिष्टवैशिष्ट्यावगाहीच्छाप्रत्यक्षाव्यवहितप्राक्क्षणे ज्ञानसत्त्वमिति इच्छादिकमेव हि तत्र हेतुः । यदि चेच्छात्वादिनिर्विकल्पकेऽपि विशिष्टविषयप्रकारेणेच्छादिकं भासते तथा च तदेव निर्विकल्पकमिच्छांशे विशिष्टवैशिष्ट्यगर्भात्मकमिच्छासाक्षात्कारपूर्वं स्थास्यतीति तादृशज्ञानस्य न व्यभिचारः अत एव नरसिंहाकारकं तन्निर्विकल्पकमितिसिद्धान्त इत्युच्यते तदापि यत्र विशिष्टविषयकफलसाधनताज्ञानं प्रथमं तदुत्तरं च फलेच्छा तदनन्तरं च विशिष्टोपायविषयिणीच्छा तत्रेच्छात्वनिर्विकल्पकरूपे विशिष्टविषयकेच्छासाक्षात्कारे एवं द्विष्टसाधनताज्ञानानन्तरजातफलद्वेषजन्योपायद्वेषविषयकसाक्षात्कारे च ज्ञानस्य व्यभिचारो दुर्वार एव द्विक्षणस्थायिनो ज्ञानस्य तत्पूर्वक्षण एव नाशादिति भावः । कृतिसाक्षात्काराव्यवहितपूर्वे च ज्ञानस्य विनश्यदवस्थस्यापि सत्त्वं सम्भावितमपि नेति सूचयितुं स्वातन्त्र्येण कृतिसाक्षात्कारे व्यभिचारं दर्शयति कृतेश्चेति । अत्रापि विशिष्टविषयोपधानेनेत्यनुपज्यते । ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतया विशेषणज्ञानं विना विषयविशिष्टकृत्यादिसाक्षात्कार एव न भवितुमर्हतीति अगत्या तत्पूर्वे विषयस्मरणमेव कल्पनीयम् । तथा च विशेषणतावच्छेदकप्रकारकज्ञानत्वावच्छिन्नस्यापि न तत्र व्यभिचार इत्यत आह विशेषणेति । ज्ञानोपरमेऽपीत्यनुपज्यते। रक्तत्वादिरूपविशेषणज्ञाननाशेऽपि रक्तत्वादिविषयकाप्रकत्वादिविशिष्टदण्डादिविषयकसंस्कारादेव तादृशविशिष्टविषयकस्मरणोत्पत्तेरित्यर्थः । तथा च तत्र व्यभिचारभयेन विशेषणज्ञानस्यापि विशेषणविषयकत्वेनैव विशिष्टधीहेतुता वाच्या तथा च विशेषणविषयककृत्यादित एव विषयविशेषितकृत्यादिसाक्षात्कारसम्भवान्न ज्ञानापेक्षेति विशिष्टवैशिष्ट्यबुद्धावपि विशिष्टविषयकगुणमात्रस्य हेतुत्वम् इत्थं च विशिष्टवैशिष्ट्यावगाहिसंस्कारा-

विशेषणतावच्छेदकप्रकारकज्ञानं विनैव तादृशस्मरणनिर्वाहोऽपीति भावः। एवमुपनायकज्ञानस्यापि सविषयकत्वेन हेतुतातो न विषयापनयार्थं ज्ञानापेक्षेति बोध्यम्। अनुद्बुद्धसंस्कारात् उपनीतभानवारणाय ज्ञानप्रत्यासत्तिहेतुतायामविशिष्टसंस्कारभेद एव निवेश्यः न तूद्बोधकासमवधानविशिष्टसंस्कारत्वाभावादिः कालान्तरीणोद्बोधकसमवधानविशिष्टसंस्कारादुपनीतभानानुपगमे क्षतिविरहात् ततः स्मरणोत्पादे क्षणिकविलम्बेनैवोपनीतभाननिर्वाहात्। न च स्मरणकल्पने गौरवाद्विशिष्टसंस्कारत्वाभावनिवेशनमेवोचितमिति वाच्यम्। उद्बोधकानामननुगततया तदभावसहस्रस्य निवेशनीयतया महागौरवात् लघुरूपेण कारणतासिद्धौ तन्निर्वाहकस्मरणकल्पनागौरवस्य फलमुखत्वेनादोषत्वात्। अत एव निर्विकल्पकादिस्मरणकल्पनेन विशेषणधियोऽपि विशेषणज्ञानत्वेन हेतुत्वमग्रे व्यवस्थापयिष्यते इदानीं तु निर्विकल्पकस्मृतिर्न सिद्धान्तसिद्धा इत्यादिसाक्षात्कारभ्रान्तरा विषयस्मरणं विनैवानुभवसिद्ध इत्याशयेन विशेषणज्ञानादिहेतुतायां ज्ञानत्वप्रवेशोऽभ्युपगत इत्यवधेयम्। अनुमितावपि सविषयकत्वमात्रेण न कुतो हेतुत्वमित्याकाङ्क्षायामाह इच्छादित इति। व्याप्यवत्पक्षविषयकेच्छादित इत्यर्थः। ज्ञानत्व विरहान्तरितत्वविरहेण कदाचिदिच्छादेरनुमित्युत्पादकतायामिष्टापत्तिः सस्मयतीत्याशङ्क्याह संस्काराच्चेति। व्याप्यविशिष्टपक्षविषयकसंस्काराच्चेत्यर्थः। ननु विशिष्टवैशिष्ट्यबोधादिहेतुतायामनुद्बुद्धसंस्कारान्यत्ववदनुमितिहेतुतायामपि ज्ञानत्वमुपेक्ष्य संस्कारस्येच्छादेश्च व्यावर्तनाय तदन्यत्वमेव किं न निवेश्यत इति तदस्यप्रश्ने उत्तरयति संस्काराद्यन्यत्वस्येति। अगत्या तु विशेषणतावच्छेदकप्रकारकगुणहेतुतायामवच्छेदकगौरवसहिष्णुतेति भावः। अतिव्याप्तिशङ्कया तु संस्काराद्यन्यत्वस्येत्यादिग्रन्थो नावतरति। संस्काराद्यन्यत्वेनानुमितिहेतुत्वेऽपि उभयनैकरूपेणाहेतुतयातिव्याप्तेरनवकाशात्। ज्ञानत्वघटितधर्मावच्छिन्नकारणताघटितलक्षणे ऽसम्भवशङ्कानिरासपरोऽयं ग्रन्थ इत्यप्याहुः॥

परामर्शप्रत्यक्षं प्रत्यनुमिताविव परामर्शत्वेन हेतुता परामर्श

विना तत्प्रत्यक्षानुदयादित्यभिमानमूलां परामर्शप्रत्यक्षातिव्याप्तिशङ्कां तत्र तेन रूपेण हेतुतां निराकुर्वाणो निरस्यति न चेति ॥

(दी०) न च परामर्शानुव्यवसायेऽतिव्याप्तिः सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तत्र हेतुत्वं न तु यावानेव तत्तदितरत्वादिर्विषयनिष्ठो धर्मस्तेन तद्विषयत्वेन कार्यकारणभावः मैत्रावलोकितचैत्रनिर्मितनीलेतरघटताद्विषयकत्वादिना तत्त्वेऽनन्तकार्यकारणभावमसङ्गान्मानाभावादन्यथोपपत्तेश्च ॥

(गा०) परामर्शादिप्रत्यक्षे साध्यव्याप्यहेतुप्रकारकपक्षविशेष्यकसंशयान्यज्ञानत्वरूपपरामर्शत्वेन हेतुतां निराकर्तुं वस्तुगत्या यद्यत्प्रत्यक्षनिरूपितविषयनिष्ठहेतुतावच्छेदकं तन्निर्धारयति सामान्यत इत्यादिना । सामान्यतः प्रत्यक्षत्वरूपसामान्यधर्मावच्छिन्ने प्रत्यक्षे । विषयत्वेनेति । विषयतायाः स्वाश्रयविषयादिभेदेन भिन्नत्वेऽपि विषयतात्वमनुगमकं कारणस्य प्रत्यासत्तिस्तादात्म्यं कार्यस्य लौकिकसन्निकर्षजज्ञानीयविलक्षणविषयता । अत एवातीतादिविषयस्य न प्रत्यक्षविषयत्वं कार्याव्यवहितपूर्ववृत्तिविषयरूपकारणस्य तत्र तादात्म्येनासम्बद्धत्वात् । अव्यवहितप्राक्क्षणवृत्तिकारणसम्बन्धस्य कार्यसम्बन्धप्रयोजकत्वात् । अतीतानागतघटादिरूपविषये कार्याव्यवहितप्राक्क्षणवृत्तिचक्षुःसंयोगादेरसत्त्वे अतीतानागतशब्दादिरूपविषयविशेषावाविन्द्रियसमवायतत्संयुक्तसमवाययोः सत्त्वेन तत्प्रत्यक्षस्य विषयतयोत्पत्तिवारणाय विषयस्य हेतुत्वमावश्यकम् । यदि चाव्यवहितप्राक्क्षणावच्छिन्नकारणसम्बन्ध एव कार्योत्पत्तिप्रयोजको न तु तादृशक्षणवृत्तित्वोपलक्षितकारणस्यापि सम्बन्धः तत्क्षणे प्रतिबन्धकसमवहितस्यापि देशस्यान्यदेशावच्छेदेन तत्क्षणवृत्तिप्रतिबन्धकात्यन्ताभावस्यान्यकालावच्छेदेनाधिकरणतया तत्र द्वितीयक्षणे कार्यापत्तेः । एवं चातीतादिविषयस्य वर्तमानकालासम्बन्धितयावच्छेद्याधिकरणसम्बद्धस्यैव चावच्छेदकतया नित्यस्यापि सन्निकर्षस्य वर्तमानकालावच्छेदेन न तत्र

सत्त्वमिति नातिप्रसङ्गः । अथैवमतीतादौ विषये सामान्यप्रत्यासत्त्यापि प्रत्यक्षं न जायेत तत्र वर्तमानकालावच्छेदेन नित्यस्यापि सामान्यस्यासत्त्वादिति चेन्न । कारणताघटकं व्यापकत्वं द्विधा किञ्चिद्यत्र यदा कार्यं तत्र तदव्यवहितप्राक्क्षणावच्छेदेन कारणमित्येवं रूपं कञ्चिच्च यत्र यदा कार्यं तत्र तदव्यवहितप्राक्क्षणवृत्तिकारणमित्येवं रूपं यस्य कारणता प्रथमोक्तव्यापकताघटिता तस्य प्राक्क्षणावच्छेदेन देशे सत्त्वमेव कार्योत्पत्तिप्रयोजकं यस्य कारणता द्वितीयव्यापकताघटिता प्राक्क्षणवृत्तेस्तस्य यत्र कुत्रचिद्देशे सत्त्वं देशे कार्योत्पादप्रयोजकं लौकिकसन्निकर्षादेः प्रत्यक्षहेतुतायां च प्रथमं व्यापकत्वं सामान्यप्रत्यासत्त्यादेस्तद्धेतुतायां च द्वितीयमिति नातीतादिविषयस्य लौकिकप्रत्यक्षप्रसङ्गो न वा सामान्यप्रत्यक्षानुपपत्तिरित्युच्यते तदापि पूर्वक्षणावच्छिन्नसन्निकर्षादिविषयनाशकाले तत्प्रत्यक्षापत्तिवारणाय विषयस्य कार्यसहभावेन हेतुत्वमावश्यकम् । यदि च विषयनाशोत्पत्तिकालेऽपि प्रत्यक्षमिष्यते सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिनेति प्रवादस्तु प्राक्क्षणे वर्तमानतापरः अत एवाशुविनाशिसुखादिप्रकारकलौकिकप्रत्यक्षस्य सुखाद्युत्पादतृतीयक्षणे निर्वाहः विशेषणज्ञानस्य हेतुतयोत्पत्तिक्षणे तद्विरहेण द्वितीयक्षणे तद्विशिष्टबुद्ध्यसम्भवादित्युच्यते तदापि प्रत्यक्षविशेषे विषयविशेषस्य हेतुताया व्यवस्थापनीयतया यद्विशेषे यद्विशेषस्य प्रयोजकता तत्सामान्ये तत्सामान्यस्येति नियमात्सामान्यकार्यकारणभाव आवश्यकः । तत्तद्विषयकेति । तत्तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुतेत्यर्थः । न चैतादृशविशेषकार्यकारणभावो निष्प्रामाणिकः तत्तद्व्यक्तिविषयकप्रत्यक्षस्य सन्निकर्षादिशालिव्यक्त्यन्तरे दृष्टत्वात् यावतीषु सन्निकर्षादिघटितसामग्रीसमवधानं युगपत्तावद्व्यक्तिभासकसामग्र्या तावद्व्यक्तिविषयकस्यैकस्यैव प्रत्यक्षस्योत्पत्तेरिति वाच्यम् । तत्तद्व्यक्तिभेदेनेन्द्रियसन्निकर्षादिघटितसामग्रीभेदनिर्वाहाय तत्तद्व्यक्तित्वेन विषयस्य हेतुताया आवश्यकत्वात् । अन्यथा तत्तद्घटेन्द्रियसन्निकर्षादीनां साधारणधर्मपुरस्कारेणैव हेतुतया तद्व्यक्तिमा-

सकसामग्र्या एतद्व्यक्तिभासकसामग्रीतो वैलक्षण्यासम्भवात् । तादृशहेतुतासत्त्वे तादृशसामग्र्याः पृथक्तत्तद्व्यक्तित्वावच्छिन्नघटितत्वेनैव वैलक्षण्यात् । तद्वैलक्षण्ये च तद्व्यक्तिविषयकबाधग्रहाभावादिघटितायाः समवायेन तद्व्यक्तिविषयकविशिष्टप्रत्यक्षसामग्र्या विषयतासम्बन्धेन तत्तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीमत्क्षणवृत्तित्वविशिष्टायाः समवायेन तत्तद्व्यक्तिविषयकविशिष्टबुद्ध्युत्पादप्रयोजिकाया व्यक्त्यन्तरमात्रे सन्निकर्षदशायामप्यात्मनि सत्त्वेन तदानीमात्मनि समवायेन तादृशबुद्ध्यापत्तेर्दुर्वारत्वात् । न च सन्निकर्षस्यैव तत्तद्व्यक्तिसन्निकर्षत्वेन हेतुत्वमस्तु तावतान्यव्यक्तिमात्रवृत्तिसन्निकर्षवति काले विषयतया तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरहः सुघटः तदानीं तादृशव्यक्तिसन्निकर्षाभावादिति वाच्यं गुरुणा तत्तद्व्यक्तिसन्निकर्षत्वेन हेतुतापेक्षया लाघवात्तद्व्यक्तित्वेन विषयहेतुताया एवोचितत्वात् । न चोक्तकाले तत्तद्व्यक्तित्वावच्छिन्नस्य विषयस्य सत्त्वेन तद्घटितसामग्र्याः क्षतैवेति न विषयतया तद्व्यक्तिप्रत्यक्षोत्पादकसामग्रीविरह इति विशिष्य विषयहेतुतया नोक्तातिप्रसङ्गवारणसम्भव इति वाच्यम् । एकाधिकरणप्रत्यासन्नकारणतावच्छेदकावच्छिन्नस्तोमस्यैव सामग्रीत्वात्तादात्म्यसम्बन्धेन तद्व्यक्तित्वावच्छिन्नसम्बन्धिन्यां तत्तद्व्यक्तौ समवायादिना ऽप्रत्यासन्नस्येन्द्रियसंयोगादेः सत्त्वेऽपि उक्तसामग्रीविरहात् । यद्वि च तद्धर्मघटितधर्मावच्छिन्नजनकसामग्री तद्धर्मवत्त्वप्रयोजकसामग्रीसमवहिता कार्यं जनयति अत आत्मनि तद्व्यक्तिविषयकज्ञानजनकसामग्र्यां तद्विषयकत्वप्रयोजकसमवधानमपेक्षणीयं प्रत्यक्षस्य तद्व्यक्तिविषयकत्वप्रयोजकत्वं च तद्विषयतानियामकसामग्र्यास्तद्व्यक्तित्वसामानाधिकरण्यम् उक्तस्थले चेन्द्रियसन्निकर्षादौ तदभावात्तत्तद्व्यक्तित्वेन तत्तत्प्रत्यक्षाहेतुत्वेऽपि नोक्तापत्तिरित्युच्यते तदापि तत्तद्घटादिव्यक्तिवृत्तितद्रूपाद्यात्मकविशेषणधीघटिता सामग्री तद्विशिष्टबुद्धिजनने तद्घटादिरूपविशेष्यभासकसामग्रीसापेक्षा वाच्या । व्यक्त्यन्तरभासकसन्निकर्षादिघटितसामग्रीतस्तद्व्यक्तिभासकसामग्र्या अविशेषे च व्यक्त्यन्तरमात्रसन्निकर्षदशायामपि तद्व्यक्तिगतरूपादिज्ञानात्तद्विशिष्टबु-

व्याप्तिर्दुर्वारैव । न हि तद्रूपादिज्ञानजन्यतावच्छेदकगर्भे तद्घटादिव्यक्तिविषयकत्वमपि प्रविष्टं येनोक्तप्रयोजकापेक्षया नातिप्रसङ्गः स्यात् । तथा सति तत्प्रकारकभ्रमाद्यसंग्रहप्रसङ्गादिति तत्तद्व्यक्तित्वेन विषयहेतुत्वमावश्यकम् । तद्व्यक्तिविषयकत्वरूपकार्यतावच्छेदकोपलक्षितप्रत्यक्षस्य समूहालम्बनरूपस्य विषयतासम्बन्धेन व्यक्त्यन्तरे उत्पत्तावपि तद्विशिष्टस्यानुत्पत्तेर्न तद्व्यक्तित्वावच्छिन्नहेतुतायां व्यभिचारः तादृशकार्यतावच्छेदकविशिष्टसमानाधिकरणाभावघटितव्यापकताया असत्त्वात् । तद्व्यक्तिवृत्तिविषयतात्वेनैव कार्यतावच्छेदकसम्बन्धत्वोपगमान्न व्यभिचार इत्याहुः । ननु परामर्शत्वपरामर्शप्रत्यक्षत्वयोरतिसामान्यातिविशेषोक्तरूपबहिर्भावेऽपि मध्यविधकार्यकारणभावस्तेन रूपेणापीति शङ्कामपाकर्तुं मध्यविधकार्यकारणभावस्य *प्रामाणिकत्वे तदवच्छेदक विशिष्टानात्मकं लघु रूपं* दर्शयति कदा चिदिति । तादृशकार्यकारणभावस्य निर्युक्तिकत्वं कदाचिदित्यनेन सूचितम् । यद्यप्यतीन्द्रियाणां गुरुत्वादृष्टभावनास्थितिस्थापकानां प्रत्यक्षस्य चक्षुराद्ययोग्यस्पर्शादीनां च चक्षुरादिना ग्रहणस्य च वारणाय योग्यजातीयानां स्वविषयकप्रत्यक्षे हेतुत्वकल्पनमावश्यकं तथा सति यावद्विशेषकारणबाधेनातीन्द्रिये विषयतया प्रत्यक्षवारणसम्भवात् । तथाप्यादिपदग्राह्यघटादिप्रत्यक्षे घटत्वादिना कार्यकारणभावोऽतिनिर्युक्तिक एव । वस्तुतस्तु अतीन्द्रियविषयाणां तादात्म्येन प्रतिबन्धकत्वकल्पनयैवातिप्रसङ्गवारणे योग्यजातीयानां बहूनां न प्रत्यक्षहेतुता अन्यत्स्वयमूहनीयम् । इदानीं प्रतिमन्दं दर्शयन् परामर्शप्रत्यक्षे परामर्शत्वेन हेतुतां निराकरोति नत्विति । तत्तदितरत्वादिरिति । व्याप्तिप्रकारकत्वपक्षधर्मताविषयकत्वज्ञानत्वसंशयेतरत्वादिघटित इत्यर्थः । घटतद्विषयकत्वादिना घटत्वतत्प्रकारकप्रत्यक्षत्वादिना । ननु हेतुत्वस्य प्रामाणिकत्वे गौरवं न दोषायेत्यत आह मानाभावादिति । ननु परामर्शादिशून्यकाले तत्प्रत्यक्षत्वावच्छिन्नापत्तिवारणान्यथानुपपत्त्या परामर्शादिप्रत्यक्षे परामर्शत्वादिना कारणत्वकल्पनमावश्यकमित्यत आह अन्यथोपपत्तेरिति । प्रत्यक्षविषयताप्रयो-

जिकाया विषयतासम्बन्धेन प्रत्यक्षोत्पादकसामग्र्या विषयनिष्ठतद्धर्मसामानाधिकरण्यरूपात् प्रत्यक्षविषयतायास्तद्धर्मसामानाधिकरण्यप्रयोजकादेव तत्तद्धर्मवद्वृत्तिविषयताकप्रत्यक्षत्वावच्छिन्नोत्पत्तिनियमोपपत्तेरित्यर्थः । अत एव प्रयोजकसमाजनियम्यधर्मान्तराणामपि न कार्यतावच्छेदकत्वमिति भावः ॥

वह्निव्याप्यधूमवान्पर्वत इतिस्मरणे तादृशनिश्चयत्वेन हेतुत्वात्तत्रातिव्याप्तिरिति शङ्कते अथेति ।

(दी०) अथ विशिष्टस्मरणेऽतिव्याप्तिः । न चोपेक्षान्यत्वेन तत्र हेतुत्वम् उपेक्षात्वं हि न जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गात् आंशिकत्वोपगमाच्च ॥

(गा०) विशिष्टस्मरणे व्याप्यविशिष्टपक्षस्मरणे । न च स्मृतिजनकतायाम् अप्रामाण्यज्ञानाभाववैशिष्ट्यानिवेशादनुमितौ च तन्निवेशान्नैकरूपेणोभयत्र हेतुतेति नातिव्याप्तिरितिवाच्यम् । अनुमितिजनकतायामप्रामाण्यज्ञानाभावनिवेशे विशेष्यविशेषणभावे विनिगमनाविरहादप्रामाण्यज्ञानाभावस्य पृथक्कारणत्वोपगमात् । अथ धूमत्वादिनैकधूमादिविषयकज्ञानात्तेन रूपेण धूमाद्यन्तरस्मरणवारणाय तत्तद्धूमादिव्यक्त्यवगाहित्वमपि स्मृतिजनकतावच्छेदके प्रविष्टं न त्वनुमितिजनकतावच्छेदकतायामिति कथमवच्छेदकतापर्याप्तिघटितलक्षणेऽतिव्याप्ति' न च पर्याप्त्यनिवेशाभिप्रायेणैव तदभिधानं न चोपेक्षान्यत्वेनेतिशङ्कानवतारात् न च समानविशेष्यत्वप्रत्यासत्त्यैवानतिप्रसङ्गे तत्तद्व्यक्तिविषयकत्वस्य स्मृतिजनकतायां न निवेश इति वाच्यं । वह्निव्याप्यधूमत्वादिप्रकारकविषयतात्वेन विषयतायाः कार्यकारणसम्बन्धत्वोपगमे कारणतावच्छेदकगर्भे व्याप्त्यादिविषयतानिवेशे प्रयोजनविरहेण तद्रूपावच्छिन्नजनकताघटितोक्तलक्षणस्यातिव्याप्त्यनवकाशात् । उक्तविषयतायाः सम्बन्धत्वे ऽप्यभावत्वादिनाभावान्तरस्य व्याप्तिशरीरे यत्र भानं तत्रापरामर्शादिविषयकस्मरणापत्तिर्दुर्वारैवेति तत्तद्व्यक्तिविषयतात्वेनैवाभावत्वाद्यवच्छिन्नविषयताः स्मृतिजनकतायां निवेशनीयाः न त्वनुमितिजनकतायामित्यतिव्याप्तिरसङ्गतैवेति चेन्नायत्साध्यव्याप्यहेतुविशिष्टधर्मिविषयकं सर्व-

मेव ज्ञानं तत्तद्धर्मप्रकारेण तद्धर्माश्रयाशेषव्यक्तिविषयकं तत्साध्यव्याप्यतद्धेतुविशिष्टतद्धर्मिज्ञानस्य तादृशस्मृतिहेतुतायां तत्तद्धर्मिविषयकत्वस्याव्यावर्तकत्वेनानिवेशात्तादृशपरामर्शहेतुताघटितलक्षणाभिप्रायेणैवैतदतिव्याप्त्यभिधानात् । अतिघटितलक्षणस्येदानीमकरणात् । न च तादृशस्थलेऽपि नानासाधनादिप्रकारेण नानाधिकरणावगाहिज्ञानस्य यद्यदधिकरणादेर्यद्यत्साधनादिप्रकारेण तद्विषयता तत्तत्साधनादिव्यक्तिभिन्नतत्तद्विषयसाधनादिप्रकारेण तद्विषयाधिकरणादिव्यक्त्यन्तरविषयकस्मरणापत्तिर्दुर्वारैवेति तत्तद्व्यक्तिप्रकारतानिरूपिततत्तद्व्यक्तिविशेष्यतानां विशिष्य कार्यकारणभावे निवेशनमावश्यकमिति वाच्यम् । तत्स्थलीयपरामर्शस्य तत्स्मरणनिष्ठकार्यतावच्छेदकगर्भे तत्तत्साधनादिव्यक्तिप्रकारतानिरूपिततत्तत्साधनाधिकरणव्यक्तिविषयतानां विशिष्टनिवेशादेव स्मृतौ वैपरीत्येन भानवारणात् कारणतावच्छेदककोटौ तत्तद्व्यक्तिविषयतात्वेन विषयतानिवेशे प्रयोजनविरहात् तावतैव च शङ्कितातिव्याप्तिसङ्गतेः । परे तु यद्युपमितिविशेषेऽतिव्याप्तिवारणाय कारणतावच्छेदकत्वपर्याप्तिः परामर्शत्वांशे निवेशनमावश्यकमिति मन्यते तदापि परामर्शत्वशरीरे या या विषयताः प्रविष्टास्तदन्यविषयत्वानवच्छिन्नत्वरूपं परामर्शत्वपर्याप्तावच्छेदकताकत्वमेव लक्षणप्रविष्टकारणतायां निवेश्यं लाघवान्न तु परामर्शत्वघटका यावन्तः पदार्थास्तदन्यपदार्थानवच्छिन्नत्वम् अधिकभेदनिवेशे गौरवात् एवञ्चोपमितिविशेषे हेतुतावच्छेदकेऽधिकविषयतानिवेशादेव नातिव्याप्त्यवकाशः स्मृतिकारणतावच्छेदके च तत्तद्विषयाणामधिकानां निवेशेऽप्यधिकविषयतानामनिवेशात्तत्रातिव्याप्तिशङ्कासङ्गतिः । अतिरिक्तविषयतानवच्छिन्नत्ववत् उपेक्षान्यत्वानवच्छिन्नत्वमपि निवेश्यमित्याशयमूलायाः शङ्काया न चेत्यादिना निरास इत्याहुः । अथ तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन हेतुतयैव स्मृतेर्विषयनियमे ज्ञानत्वेनैव स्मृतित्वावच्छिन्नं प्रति हेतुता न तु तत्तद्विषयकस्मृतौ तत्तद्विषयकनिश्चयत्वेनेति कथमतिव्याप्तिः । न चैवं तत्संशयात्तत्स्मरणवारणाय तत्र स्मृतौ तन्निश्चयत्वेन हेतुत्वमावश्यकमिति वाच्यम् । सं-

स्कारस्य तद्धर्मिकतद्धर्मप्रकारकस्मरणे तद्धर्मिकतदभावप्रकारका-न्यतद्धर्मिकतत्प्रकारकसंस्कारत्वेन हेतुतयैव तद्गोचरसंशया-त्तत्स्मरणापत्त्ययोगात्संशयजन्यसंस्कारस्य विरोधिप्रकारकत्वनि-यमादिति चेन्न । संस्कारस्य संस्कारत्वेनैव हेतुता ज्ञानस्य तु तद्गोचरस्मृतौ तत्तन्निश्चयत्वेनेत्यस्यापि सम्भवेन विनिग-मकाभावात् ज्ञानहेतुतायामपि विषयादिनिवेशस्यावश्यकत्वात् । *न च तद्गोचरज्ञानजन्यस्य संस्कारस्य कालादिना* नाशे अन्यगोचरसंस्कारात्तद्गोचरस्मरणवारणाय संस्कारहेतुतायां विषयनिवेशनमावश्यकमिति वाच्यम् । संस्कारहेतुतायां विषयानिवेशेऽप्युक्तस्थले तन्निश्चयरूपकारणव्यापारविरहेण त-त्स्मरणापत्त्यसम्भवात् । वस्तुतो ऽन्वयव्यतिरेकाभ्यां तद्गो-चरस्मृतौ तद्गोचरनिश्चयत्वेन हेतुत्वसिद्धौ तन्निर्वाहकतया व्यापारीभूतसंस्कारकल्पना संस्कारे प्रमाणान्तराभावादिति कथं संस्कारेण तद्गोचरनिश्चयत्वावच्छिन्नस्यान्यथासिद्धिर्यतस्तद्रू-पावच्छिन्नमहेतुः स्यात् । न हि यदुपजीव्य यत्सिध्यति तत्तद्व्याघातकम् । *एतेन संस्कारहेतुतायां विषयानिवेशे त-*द्वंशे उपेक्षात्मकज्ञानजन्यादन्यगोचरसंस्कारात् तत्स्मरणापत्ति-वारणाय तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन हेतुत्वमावश्यक-मिति *ज्ञानहेतुतायां विषयनिवेशो व्यर्थ इत्यपि प्रत्युक्तम्* । फलव्या-पारौ प्रति करणस्यैकेनैव रूपेण हेतुतेति प्राचीनसम्मतनियमा-नुरोधेन ज्ञानस्य स्मृतिजनकतायां विषयनिवेशनमावश्यकमित्यपि वदन्ति । *यत्तु ज्ञानस्य ज्ञानत्वेनैव स्मृतिहेतुता* तद्विषयकस्मृतायु-द्बोधकविशेषाणां हेतुताया आवश्यकत्वात्तत एव विषयनियमो-पपत्तेः उद्बोधकानां फलबलकल्प्यत्वात् । न च सम्बन्धिपदज्ञाना-दीनामनुगतरूपेणैव तत्तद्गोचरस्मृतिहेतुतया तद्गोचरज्ञानं वि-नापि तत्स्मरणापत्तिरिति वाच्यम् । तत्सम्बन्धित्वेन गृहीतं यत्तज्ज्ञा-नस्यैव तद्विषयस्मारकतया तादृशोद्बोधकसमवधानस्थले तज्ज्ञान-स्याप्यावश्यकत्वादिति । तदसत् । तथा सति ज्ञानत्वमा-त्रेणापि ज्ञानस्य स्मृतिहेतुताया अप्रामाणिकत्वापत्तेः । उद्बोध-केन ज्ञानविशेषान्यथासिद्धौ कालान्तरे यज्ज्ञानस्योपयोगिता तज्ज्ञानार्थं विशेषदर्शिनां शास्त्राभ्यासादावप्रवृत्तिप्रसङ्गाच्च । य-

स्तुत स्मृतौ सम्बन्धिज्ञानस्य सम्बन्धावगाहित्वेन न हेतुता यत्र सम्बन्धो येन रूपेण गृहीत सम्बन्धाविषयकादपि तत्प्रकारकज्ञाना त्सम्बन्ध्यन्तरस्मरणात्। नापि सम्बन्धग्रहविषयताघच्छेदकावच्छि न्नविषयकत्वेन सम्बन्धग्रहस्योपलक्षणतया भाविसम्बन्धग्रहविष यकज्ञानस्याप्युद्बोधकतापत्ते सम्बन्धग्रहे सामान्यत पूर्वत्वम व्यावर्तक तज्ज्ञानपूर्वत्व चाननुगतम्। सम्बन्धानुद्बोधे च पूर्वस म्बन्धग्रहोऽप्यस्मारक सम्बन्धोद्बोधका अप्यननुगता एव च स्मृत्यु पधायकसम्बन्धिज्ञानाना तत्तद्व्यक्तित्वेनैव हेतुता वाच्या तथा च यादृशसम्बन्धिज्ञानसत्त्वे यस्य पुसो नियमतोऽनुभूतस्य यद्विष यस्य स्मृतिस्तद्वस्तुज्ञानस्य तत्तद्व्यक्तित्वेन नानाहेतुत्वकल्पनाम पेक्ष्य तत्पुरुषीयतद्विषयस्मृतौ तद्वस्तुज्ञानत्वेनानुगतरूपेणैकहेतुतैव कल्प्यते यत्पूर्वं च तद्विषयस्य नानुभवस्तत्कालीनतद्वस्तुज्ञानात्त स्य तद्विषयस्मृतिवारणाय च तद्व्यवहारस्मृतौ तद्विषयकनिश्चयं त्वेनापि हेतुत्वमावश्यकमिति दिक्। उपेक्षाज्ञानात्स्मरणानुत्प त्त्या तदन्यत्वस्याप्यधिकस्य स्मृतिकारणतावच्छेदके निवेश्यतया नोपदर्शितनिश्चयत्वपर्याप्ताघच्छेदकताकःकरणताकत्व स्मृतावित्ति नातिव्याप्तिरिति शङ्का निरस्यति न चेति। उपेक्षान्यत्वम् उपे क्षात्वावच्छिन्नभेद तस्य तदा स्मृतिकारणतावच्छेदकघटकता स्यात् यद्युपेक्षात्व स्मृतिजनकधीव्यावृत्तो जातिविशेष स्यात् स्मृत्यजनकज्ञानत्वरूपस्योपेक्षाव्यवहारविषयस्योपाधे स्मृतिज नकताया प्रवेशासम्भवात् स्मृत्यजनकान्यत्वस्य स्मृतिजनकत्वरूप त्वात्। स्वस्य च स्वानवच्छेदकत्वात् न हि तादृशजाति क ल्पकल्पना जातिसङ्करादिदोषग्रासादित्याह उपेक्षात्व हीति। अत्र च जातित्वाभावानुमाने उपेक्षात्वस्य स्मृतिजनकतावच्छेद कभेदप्रतियोगितावच्छेदकत्वेन पक्षता। अथैत्यादिग्रन्थकृन्मते ऽपि स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकत्वस्य सन्देह त्वे तद्घटकविरोधिप्रकारकत्वे चाप्रसिद्धत्वात्। तत्र जातित्वा भावस्यौभयमतसिद्धत्वेऽप्युक्तपक्षतावच्छेदकावच्छेदेन साध्य सिद्धेरुद्देश्यत्वाशात सिद्धसाधन दोष। अत्रोपेक्षापदप्रवृत्ति निमित्तत्वेन पक्षता उपेक्षापदप्रवृत्तिनिमित्तधर्मस्य प्रसिद्धत्वेऽपि या दृशस्य स्मृत्यजनकत्वादिरूपतया तदवच्छिन्नान्यत्वस्य स्मृति

जनकतावच्छेदकत्वासम्भवेन स्मृतेरनुमितिजनकतावच्छेदकपर्याप्तजनकतावच्छेदकताकत्वाक्षतेः । अत्राप्यवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नोक्तदोष इत्यपि केचित् । तच्चिन्त्यम् । उपेक्षात्वस्य जातित्ववादिना तस्योपेक्षापदप्रवृत्तिनिमित्तत्वानभ्युपगमेऽपि क्षतिविरहात् अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि तत्र जातित्वाभावासिद्धेः तादृशादपि स्मृत्युत्पादादित्यग्रिमग्रन्थासङ्गतेश्च । तद्रूपवतः स्मृत्युत्पादकत्वे तद्रूपनिष्ठस्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकताया एव विरोधित्वान्न तूपेक्षापदप्रवृत्तिनिमित्ततायाः इति । यत्तु स्मृतिजनकावृत्तिज्ञानधर्मत्वेन पक्षता तादृशधर्मत्वं च तत्तज्ज्ञानान्यतरत्वादौ प्रसिद्धमिति तदसत् । एकांशे उपेक्षात्मकज्ञानस्यापि अन्यस्मृतिजनकतयोपेक्षात्वस्य स्मृतिजनकावृत्तित्वाप्रसिद्धेः अन्यथांशिकत्वोपगमाच्चेति बाधकासङ्गतेः । स्वीययावद्विषयविषयकस्मृतिजनकावृत्तिज्ञानधर्मत्वेन तु पक्षत्वं सम्भवति । चाक्षुषत्वादिनेति । आदिना ज्ञानत्वव्याप्यनिखिलजातिपरिग्रहः तत्तज्जातिनिरूपितसङ्करस्य च पृथगेव हेतुता बोध्या न तु मिलितस्य वैयर्थ्यात् । तज्जात्यव्यापकत्वे सति तज्जातिव्यभिचारित्वे सति तज्जातिसामानाधिकरण्यं सङ्करः व्यापकत्वं तत्समानाधिकरणप्रतियोग्यसमानाधिकरणाभावप्रतियोगित्वं तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वं वा । तज्जातिव्यभिचारित्वं च तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकतदभावसामानाधिकरण्यम् । यद्यपि व्याप्यजातिमत्यनित्येऽपि कालिकादिसम्बन्धेन व्यापकजात्यवच्छिन्नस्य भेदो वर्तते व्याप्यजातेरपि *व्यापकजातिशून्ये कालिकादिसम्बन्धेन वृत्तेर्विरुद्धजातेरपि* कालिकादिसम्बन्धेन सामानाधिकरण्यमस्ति समवायेन चावच्छेदकत्वं वृत्तिश्च पक्षस्योपेक्षात्वस्य नोमयमते उपेक्षात्वस्योपाधित्वमते विशेषणताविशेषेणैव वृत्तेरिति स्वरूपासिद्ध्यापत्तिः । *वस्तुतस्तु गुणगतजातिसङ्करस्य* यत्र हेतुता तत्र साधनाप्रसिद्धिरेव गुणे जातिभिन्नस्यासमवायात् । समवायघटितचाक्षुषत्वसङ्करस्य क्वचिदपि प्रसिद्धिविरहात् । तथापि समवायदैशिकविशेषणतान्यतरसम्बन्धेन तथात्वं बोध्यम् । अथवा समवायेनावच्छेदकत्वस्थाने समवायावच्छिन्नावच्छेदकता-

शून्यं यत्समवेतं तदन्यत्वं समवायेन तदभावादिमिति समवायेन वृत्तिस्थाने समवायेन तदवृत्तित्वे सति यत्समवेतं तदन्यत्वं तज्जातिसमानाधिकरणत्वस्थाने तज्जातिमदसमवेतत्वे सति यत्समवेत तदन्यत्वं च निवेशनीयमिति नासिद्धिः। विशिष्टभेदस्य पक्षस्य समवेतत्वे ऽसमवेतत्वे चाक्षतत्वात्। यदि चैतभिरूपकजातिभेदेन भिन्नमेव तत्तज्जातीनां विशिष्योपादानादिति चाक्षुषत्वादिसङ्करस्य यत्र हेतुना तत्र व्याप्यजातौ व्यभिचारवारकं व्यभिचारित्वविशेषणं व्यर्थं चाक्षुषत्वादेर्व्याप्यजात्यप्रसिद्धेः तत्परित्यागे च ज्ञानत्वाद्यव्यापकतत्समानाधिकरणचाक्षुषत्वादेरिव चाक्षुषत्वाद्यव्यापकतत्समानाधिकरणस्योपेक्षात्वस्यापि जातित्वं स्यादित्यप्रयोजकत्वशङ्काग्रास इत्युच्यते तदा यज्जात्यव्यापकत्वे सति यज्जातिव्यभिचारि यत्तत्र तज्जातिसमानाधिकरणजातिरिति सामान्यतो व्याप्त्या उपेक्षात्वे चाक्षुषत्वादिसमानाधिकरणजातित्वाभावः साध्यः चाक्षुषत्वादिव्यापकज्ञानत्वादौ ज्ञानत्वादिव्याप्यचाक्षुषत्वादौ च व्यभिचारवारणाय दलद्वयम्। वस्तुतस्तु स्वाव्यापकस्वव्यभिचारिजातित्वव्यापकविरोधप्रतियोगि यद्यत्तद्भेदकूटं हेतूकृत्योपेक्षात्वादौ जातिसङ्कीर्णधर्मे जातित्वाभावः साधनीयः उपेक्षात्वाद्यव्यापकतद्व्यभिचारिचाक्षुषत्वादिजातौ तद्विरोधासत्त्वेनोपेक्षात्वादेर्निरुक्तस्यान्तर्भावात्। तादृशभेदकूटस्योभयमतसिद्धत्वात्। न च सत्ताव्यभिचारिजातेरप्रसिद्ध्या न तादृशं स्वं सत्तेति तत्र व्यभिचार इति वाच्यम्। अपरजातित्वाभावस्यैव साध्यत्वोपगमात्तत्र साध्यसत्त्वेन व्यभिचारानवकाशात्। यत्र च तुल्ययुक्त्या आपादितजात्यन्तरेण सङ्करस्य जातित्वबाधकता यथा प्राचां भूतत्वमूर्तत्वयोः परस्परं सङ्करेण जातित्वखण्डनं तत्र जातिसङ्करहेतोरसिद्धत्वेऽपि व्याप्यव्यापकभावानापन्नसमानाधिकरणद्वयवृत्तित्वेन स्वाश्रयैकधर्मव्यापकापरवृत्ति यत्तदन्यत्वे सति स्वाश्रयैकधर्मवदवृत्ति यत्तदन्यत्वे च सति अनेकवृत्तित्वेन वा तदुभयत्वे जातित्वाभावसामानाधिकरण्यं साधनीयम्। विनिगमनाविरहेणोभयत्र जा-

तित्वाभावपर्यवसानमिति कृतमतिविस्तरेण । ननु चाक्षुषत्वादिव्याप्यमुपेक्षात्वं नानैव स्मृतिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकमुपगन्तव्यं भेदकूटस्य कारणतावच्छेदकत्वे बाधकाभावात् तथा च न जातिसङ्कर-इत्याशङ्क्य बाधकान्तरमाह आंशिकत्वेति । यत्र समूहालम्बनज्ञानस्यैकविषयस्मारकत्वमपरविषयास्मारकत्वञ्च तत्रोपेक्षात्वात्वज्जात्यनभ्युपगमे सकलविषयस्मारकत्वं तदभ्युपगमे च सकलविषयास्मारकत्वं स्यादिति यस्य यद्विषयास्मारकत्वं तस्य तद्विषयावच्छेदेनोपेक्षात्वं स्वीकरणीयम् अन्याविषयांशे च तदभाव इति तद्विषयकस्मृतौ च तद्विषयावच्छिन्नमुपेक्षान्यत्वं प्रयोजकं वाच्यमिति अव्याप्यवृत्तित्वादुपेक्षात्वं न जातिरित्यर्थः । न चांशिकोपेक्षायामपि न विषयान्तरावच्छेदेनोपेक्षात्वाभावः स्वीक्रियते किं तु तद्विषयकत्वस्योपेक्षात्वानवच्छेदकत्वमात्रं प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वानियमात् । तथानियमे दण्डादेर्द्रव्यत्वादिना घटादिजनकत्वाभावप्रसङ्गादिति नोपेक्षात्वस्याव्याप्यवृत्तित्वं स्वाभावासामानाधिकरण्यादिति वाच्यम् । जातावभावसामानाधिकरण्यवत् किञ्चिदवच्छिन्नवृत्तिकताया अपि सिद्धान्तविरुद्धत्वात् । यद्यपि उपेक्षान्यत्वस्य स्मृत्यजनकत्वादिरूपोपाधित्वमते न स्वाभावसामानाधिकरण्यमवच्छिन्नवृत्तिकत्वं वेति नायमुभयसिद्धो हेतुस्तथापि तन्मतसिद्धहेतुनैव तं प्रति जातित्वाभावः साध्यते अत एवोपगमादित्युक्तम् । वस्तुतस्तु प्रमेयत्वादिनांशिकत्वजातित्वोभयाभावः साधनीयः । उपेक्षान्यत्वेन स्मृतिहेतुतावादिना च तस्यांशिकत्वोपगमाज्जातित्वाभावमादाय पर्यवसानमित्यांशिकत्वोपगमाच्चेत्यनेन दर्शितम् ॥

ननु माभूदुपेक्षात्वं जातिस्तद्वोचरप्रयत्नाजनकत्वरूपोपाधिरेव तद्विषयकस्मृतिप्रयोजकं वाच्यम । अत एवैकज्ञानस्य किञ्चिद्विषयास्मारकत्वं किञ्चिद्विषयस्मारकत्वं चोपपद्यते निरुक्तोपेक्षात्वस्य विषयभेदनियान्त्रितत्वात् । अथवा स्वसमानाधिकरणतद्विषयकजिज्ञासानुत्तरत्वं तदित्याशङ्कां निराकरोति नापीति ॥

(दी०) नापि प्रवृत्तिनिवृत्त्यजनकत्वमजिज्ञासितविषयत्वं

वा तादृशादपि स्मृत्युत्पादात् । नापि संस्काराजनकत्वं तज्जननतावच्छेदकरूपान्तरापरिचयात् अन्योन्याश्रयप्रसङ्गात् । संस्कारानुत्पर्यवसानस्मरणसम्भवे स्मृतिजनकतायां तदप्रवेशाच्च । नाप्यनुभवत्वेन तथात्वं संस्कारस्य फलनाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात् । समूहालम्बनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः ॥

प्रवृत्तिनिवृत्त्यजनकत्वमिति । स्मृतिप्रयोजकभेदप्रतियोगितावच्छेदकमुपेक्षात्वमित्यनुषज्यते । तादृशादपीति । तथा चोक्तरूपयोः स्मृतिप्रयोजकभेदप्रतियोगितावच्छेदकरूपत्वे तादृशायाः स्मृत्युत्पादकता न स्यादिति भावः । नन्वपेक्षात्मकज्ञानात्संस्कारानुत्पादेन तद्विषयकसंस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदस्तत्संस्कारजनकत्वपर्यवसितस्तत्स्मृतिजनकतावच्छेदको वाच्य इत्याशङ्कां निरस्यति नापीति । तज्जनकतावच्छेदकेति । संस्कारं प्रत्युपेक्षासाधारणरूपेण निश्चयत्वमात्रेण हेतुत्वे उपेक्षायाः संस्काराजनकत्वं दुर्घटमिति संस्काराजनकत्वस्य तद्देशोपेक्षारूपता सम्भवति यद्युपेक्षाव्यावृत्तरूपेण संस्कारजनकता स्यात्तादृशं च रूपमुपेक्षान्यनिश्चयत्वादन्यद्दुर्वचमतः संस्कारं प्रत्युपेक्षान्यत्वेन हेतुता वाच्या ईदृशोपेक्षात्वस्य संस्काराजनकत्वरूपत्वे आत्माश्रयः स्मृत्यजनकत्वरूपत्वे च संस्कारं प्रति स्मृतिजनकत्वेन स्मृतिं प्रति च संस्कारजनकत्वेन हेतुतेत्यन्योन्याश्रय इति नैतद्युक्तमित्यर्थः । ननु संस्कारजनकतावच्छेदकस्योपेक्षासाधारण्येऽपि उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन संस्कारप्रतिबन्धकत्वोपगमात्तासां संस्कारानुपधायकत्वनिर्वाहः । व्याप्तिकोपेक्षाव्यक्तीनां तत्तद्विषयकसंस्कारत्वमेव प्रतिबध्यतावच्छेदकमिति तासामन्यविषयकसंस्कारोपधायकतया ऽन्यविषयस्मारकतोपपत्तिरित्यत आह संस्कारेति । यत्तु ननु तत्तद्व्यक्तित्वेनैवोपेक्षाव्यक्तीनां भेदाः संस्कारजनकतावच्छेदकाः । न चैवं भेदसमूहस्य विशेष्यविशेषणभावे विनिगमनाविरहः प्रत्येकभेद

पृथक्पृथक्निवेश्यैकैककारणताभ्युपगमात् । एकोपेक्षाज्ञानव्यक्तिदशायामन्योपेक्षाव्यक्तिभिन्नज्ञानसत्त्वेऽपि तदुपेक्षाव्यक्तिभिन्नज्ञानरूपकारणविरहेणैव संस्कारानुत्पादसम्भवात् । न चोपेक्षाद्वयसत्त्वे सकलकारणसत्त्वात्संस्कारापत्तिस्तद्वारणाय तादृशव्यक्तिभेदद्वयस्यैकत्र निवेश्यत्वात् तयोर्भेदयोर्विशेषणविशेष्यभावे विनिगमनाविरहात्कारणताद्वयमिष्टमेव । उपेक्षाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतामतेऽपि तत्कालीनसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकतया गौरवात् । एवं च संस्कारानुपधायकत्वरूपोपेक्षात्वावच्छिन्नभेदस्य स्मृतिजनकतावच्छेदकत्वेऽपि नान्योन्याश्रयः इत्यतः संस्कारेतीत्यवतरणं तदसत् । तत्तदुपेक्षाव्यक्तीनां तत्कालीनसंयोगादिव्यक्तेर्वा तत्प्रतिबन्धकता कल्प्यते इत्यनुयोगस्याशक्यसमाधानत्वात् । संस्कारानुत्पत्त्यैवेत्यस्योपेक्षाज्ञानादित्यादिः । संस्काराजनकत्वस्य तदैवोपेक्षात्वरूपतासम्भवो यद्युपेक्षाधीः संस्कारं जनयेत्, तथा सति संस्काररूपव्यापारविरहेणैवोपेक्षाया अस्मारकत्वसम्भवे उपेक्षात्वस्य संस्काराजनकत्वरूपस्य सुनिर्वचत्वेऽपि तदवच्छिन्नान्यत्वस्य निष्प्रयोजनकतया स्मृतिजनकतावच्छेदकगर्भे ऽनिवेशादित्यर्थः । तथा च विशिष्टस्मरणातिव्याप्तिर्दुर्वारैवेति भावः । न च तद्विषयकस्मृतौ तद्विषयकसंस्काररूपव्यापारेण यथा तद्विषयकज्ञानत्वावच्छिन्नस्य नान्यथासिद्धिस्तथोपेक्षान्यत्वसहिततद्रूपावच्छिन्नस्यापीति तेन रूपेण हेतुता दुर्वारैवेति वाच्यम् । संस्कारासिद्धौ संस्काराजनकत्वरूपोपेक्षात्वावच्छिन्नभेदघटितधर्मपुरस्कारेण कारणताकल्पनासम्भवात् । तादृशधर्मावच्छिन्नकारणतायाः संस्काररूपव्यापारसिद्ध्यनुपजीव्यतया तेन तद्रूपावच्छिन्नस्यान्यथासिद्धावुपजीव्यविरोधरूपबाधकानवकाशात् । यत्तु ननूपेक्षात्वस्यानुगतस्य निर्वचनासम्भवेऽप्युपेक्षाज्ञानात्स्मरणानुत्पत्त्या तत्तदुपेक्षाव्यक्तिभिन्नत्वेनैवागत्या स्मृतिहेतुत्वमुपेयं तथापि न विशिष्टस्मृतावतिव्याप्तिरित्यत आह संस्कारानुत्पत्त्यैवेत्यवतार्य उपेक्षाज्ञानात्संस्कारो नोपगम्यते गौरवात् । तन्निर्वाहाय च संस्कारजनकतायामुपेक्षाभेदनिवेशस्यावश्यकत्वे स्मृतिजनकतायां न तन्निवेशः संस्काराभावेनैवोपेक्षितास्मरणोपपत्तेः । न चैवं फलव्यापारौ प्रति कर-

णस्यैकरूपेणाहेतुतेति नियमपरित्यागे निश्चयत्वमपि संस्कारजनकतायामेव निवेश्यतां तथा च कथमतिव्याप्तिरिति वाच्यम् । संस्कारजनकतायां निश्चयत्वानिवेशे उपेक्षान्यत्वेन सह विशेष्यविशेषणभावे विनिगमनाविरहात्स्मृतिकारणतायामेव निश्चयत्वनिवेशौचित्यात् । संशयादर्धर्मिगोचरसंस्कारस्यापदर्पकतया निश्चयत्वेन विशिष्टसंस्काराहेतुत्वे संशयजन्यसंस्कारे विशिष्टविषयकत्वमात्रकल्पनमुपेक्षान्यत्वेन तदहेतुत्वे च उपेक्षाज्ञानात् विशिष्टविषयकसंस्काररूपधर्मिकल्पनमिति न विनिगमनाविरहेण वैपरीत्यप्रसक्तिः । वस्तुत उपेक्षाज्ञानानां संस्कारप्रतिबन्धकत्वमेवोपेयते तथा च फलव्यापारौ प्रति करणस्यैकरूपेण हेतुत्वनियमादुभयत्रैव निश्चयत्वप्रवेशः । एतेनांशिकोपेक्षाज्ञानादन्यविषयकसंस्कारस्य प्रामाणिकतया तद्भेदाः स्मृतिजनकतायामेव निवेश्यन्ते न तु संस्कारजनकतायां तथा सति सर्वांशे उपेक्षाभेदैः सह विशेष्यविशेषणभावे विनिगमनाविरहेण कारणताबाहुल्यप्रसङ्गात् इति निश्चयत्वं संस्कारजनकतायामेव निवेश्यं स्मृतिजनकतायां तन्निवेशेऽप्यांशिकोपेक्षभेदैः सह विशेष्यविशेषणभावे विनिगमनाविरहतादवस्थ्यादित्यपास्तम् । तथा च विशिष्टस्मरणेऽतिव्याप्तिः सुदृढैवेति व्याख्यानम् । तदसत् व्यापारासिद्धिदशायां कल्पनीयस्य तत्तदुपेक्षान्यत्वेन स्मृतिहेतुत्वस्योत्तरकालकल्प्यव्यापारविरहेण कार्यातिप्रसङ्गवारणासम्भवेऽपि तत्तदुपेक्षान्यत्वेन कारणतामतेऽपि तेन रूपेण ज्ञानस्य संस्कारहेतुता निराकरणासम्भवादुक्ताशङ्कया संस्कारानुत्पत्त्यैवेत्यादिफक्किकावतारणासङ्गतेः । ननु तद्विषयकस्मृतौ तद्विषयकज्ञानत्वेन न हेतुताऽपि तु तत्तद्विषयकानुभवत्वेनैव । अनुभवत्वस्यापि जातित्वेन ज्ञानत्वापेक्षया गौरवाभावात् । स्मृत्युत्तरमपि पूर्वानुभवादेव स्मरणोपपत्तेः स्मृतेः स्मृतिहेतुताया अप्रामाणिकत्वात् । तथा च न ज्ञानत्वघटितधर्मावच्छिन्नकारणताघटितानुमितिलक्षणस्य विशिष्टस्मृतावतिव्याप्तिः । न चानुभवत्वापेक्षया ऽगुरुणा ज्ञानत्वेनापि स्मृतिहेतुताया विनिगमनाविरहेण दुर्वारतया तादृशकारणतामादायातिव्याप्तिर्दुर्वारैवेति वाच्यम् । अगुरुव्याप्यधर्मपुरस्कारेण करणत्वसम्भवे व्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वादित्याशङ्कां नि-

रस्यति नाप्यनुभवत्वेनेति । संस्कारस्य फलनाश्यतया स्वजन्यस्मृतिनाश्यतया प्रथमस्मरणेनैव पूर्वानुभवजन्यसंस्कारनाशे सकृदनुभूतस्य स्मरणोत्तरमननुभूतस्य विषयस्यानुभवरूपकरणव्यापारसत्त्वेनास्मरणप्रसङ्गात् स्मरणान्तरानुपपत्तेरित्यर्थः । स्वजन्यस्मरणस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन स्मृतिहेतुत्वेऽपि घटपटादिरूपनानाविषयावगाहिनानुभवेन जनितस्य तावद्विषयकसंस्कारस्य घटाद्येकैकगोचरस्मरणेनापि विनाशात्तदुत्तरं पटादिस्मरणानुपपत्तिः तद्विषयकसंस्काराभावात्स्मृतिजन्यघटादिगोचरसंस्कारस्य च भिन्नविषयकतया पटादिस्मारकत्वायोगादित्याशङ्कां निरस्यति समानेति । समानाकारस्य अन्यूनाकारस्य अतः प्रत्येकगोचरनानासंस्कारजनितसमूहालम्बनस्मरणे स्वजनकसकलसंस्कारनाशहेतुतानिर्वाहः । अथात्र नाशकता यदि स्वजन्यस्वान्यूनविषयकस्मृतित्वेन तदा स्वपदस्य तत्तत्संस्कारव्यक्तिपरताया आवश्यकत्वात्तत्तद्व्यक्तिभेदेन कारणताबाहुल्यं तदुपगमे तत्तद्व्यक्तित्वेनैव नाशकताया युक्तत्वात् । यदि च प्रतियोगितासम्बन्धेन संस्कारनाशं प्रति जनकत्वानतिरिक्तविषयकत्वोभयसम्बन्धेन स्मृतित्वेन हेतुना जनकत्वनिवेशात् स्वजन्यसंस्कारस्य स्मृत्या न विनाशः जनकत्वस्थाने तद्धटकं पूर्ववर्तित्वमेव वा निवेश्यं नियमान्यथासिद्धत्वप्रवेशवैफल्यात् । न च व्यधिकरणस्मृतेरपि नाशकतापत्तिः । व्यधिकरणस्मृतिं प्रत्यपि संस्कारस्य स्वरूपयोग्यतया सामानाधिकरण्यनिवेशस्योभयमते आवश्यकत्वात् वस्तुतः सामानाधिकरण्यसहितमनतिरिक्तविषयकत्वमेव सम्बन्धः न तु जनकत्वस्य पूर्वकालीनत्वस्य वा निवेशः ज्ञानादीनां क्षणिकतावारणाय प्रतियोगितासम्बन्धेन नाशं प्रति पूर्वत्वसम्बन्धेन नाशस्य सामान्यकारणताया आवश्यकत्वात् अत एव स्वजनकस्मरणेन संस्कारस्य स्वोत्पत्तिद्वितीयक्षणे नाशापत्त्यनवकाशात् । तदानीं च स्मृतेर्विनाशेन ततस्तदुत्तरक्षणेऽपि तन्नाशापत्त्यसम्भवात् । अनतिरिक्तविषयकत्वं च स्वावृत्तिविषयिताशून्यत्वं न तु स्वाविषयाविषयकत्वं प्रमेयत्वादिना सकलप्रमेयविषयकस्मरणस्याविषयाप्रसिद्धेः संस्कारनाशकतानुपपत्तेः ।

भावत्वादिना सकलभावादिविषयकस्मरणाद्धट इत्यादिज्ञानजन्य-
संस्कारनाशापत्तेश्चेदुच्यते तदापि सम्बन्धमध्ये तत्तत्स्मरण
व्यक्तिरूपस्यपदार्थमनन्तर्भाव्यानतिरिक्तविषयकत्वस्यावृत्तिविषयता-
या अप्रसिद्धा दुर्निर्वचत्वेन तत्तद्व्यक्तिविश्रामस्यावश्यकत्वात् स्व
निष्ठभेदप्रतियोगितावच्छेदकविषयिताशून्यत्वरूपानतिरिक्तविषयक-
त्वेऽपि भेदे तत्तत्स्मृतिव्यक्तिनिष्ठत्वनिवेशनमावश्यकम् अन्यथाव
च्छेदकत्वान्तस्य विषयितायामन्यावर्तकत्वापत्तेरिति चेत् सत्यम्।
तत्प्रकारकतद्विशेष्यकसंस्कारनाशं प्रति तत्प्रकारकतद्विशेष्य
कस्मृतित्वेन कारणता कार्यस्य सम्बन्धः प्रतियोगिता कार
णस्य पूर्ववर्तित्वसहितं तदसहितं वा सामानाधिकर-
ण्यं तत्तद्विषयकसंस्कारभेदोऽपि प्रतियोगिप्रत्यासन्नो हेतु-
अतो घटत्वप्रकारकघटविशेष्यकसमूहालम्बनात्मकस्मृत्या
यथा समूहालम्बनात्मकस्तत्प्रकारकतद्विशेष्यकसंस्कारो ना
श्यते तथा समूहालम्बनात्मकोऽपि तादृशसंस्कारो नाश्यताम् अ-
न्यविषयकस्मृतिविरहस्य तद्विषयकस्मृतिघटितसामग्रीविरहप्र
योजकत्वादिति दूषणस्य नावकाशः। समूहालम्बनात्मकतद्वि
षयकसंस्कारनाशप्रयोजकसामग्र्या अन्यविषयकसंस्कारभेदरूपका-
रणकूटघटितत्वात्। समूहालम्बनसंस्कारनाशप्रयोजकसामग्र्या
अन्यविषयस्मृतिघटितत्वात्समूहालम्बनसंस्कारे च तादृश्याः क
स्या अपि सामग्र्या उत्तरक्षणे ऽसत्त्वात्। न चैवं गोत्वाभाव
वान् गोत्वाभाव इत्यादिज्ञानजन्यसंस्कारस्य गोत्वाभाव इत्याकारक-
स्मरणादिना नाशापत्तिः तादृशसंस्कारनाशे तादृशस्मृतिसहका-
रिणा यावत्तद्विषयविषयकसंस्कारभेदानां सत्त्वात्तद्विषयकगोत्वा
दिविषयकसंस्कारभेदस्य च तत्सहकारित्वाद्गोत्वाभावादिनिष्ठत
त्सम्बन्धस्यापि तत्स्वरूपतया तादृशस्मृतिनाश्यसंस्कारविषय
त्वेन तद्विषयकसंस्कारभेदस्यापि तादृशस्मृतिसहकारित्वासम्भवा
दिति वाच्यम्। तत्प्रकारकान्यसंस्कारनाशे तत्तत्प्रकारकसं-
स्कारभेदत्वेन हेतुतायाः उपगन्तव्यतया गोत्वाभाव इत्यादिस्मृति
नाश्यसंस्कारसाधारणस्य गो[illegible]त्वाभावादिप्रकारकसंस्कारभेदस्य
तादृशस्मृतिसहकारि[illegible] गो[illegible]वान् गोत्वाभाव इत्यादिधीज-
न्यसंस्कारे ता[illegible]भावात्। द्रव्यत्वादिना घ

टपटादिविशेष्यकसंस्कारस्य तेन रूपेण घटमात्रविशेष्यकस्मृतितो विनाशवारणाय तत्तद्विशेष्यकान्यसंस्कारनाशे तत्तद्विशेष्यकसंस्कारभेदस्य हेतुत्वमपि वाच्यम् । एवं समानप्रकारकसमानविशेष्यकनानासंसर्गावगाहिसंस्कारस्यैकमात्रसंसर्गकस्मृतितो विनाशवारणाय तत्तदसंसर्गकसंस्कारनाशे तत्तत्संसर्गकसंस्कारभेदस्यापि हेतुता बोध्या । वस्तुतस्तादृशधर्मिविशेष्यतानिरूपिततत्संसर्गावच्छिन्नतादृशधर्मप्रकारताकान्यसंस्कारनाशे तथाविधतादृशधर्मप्रकारताकसंस्कारभेदो हेतुरित्येवोपगन्तव्यम् अन्यथा द्रव्यत्वपृथिवीत्वोभयरूपेण घटं पटं चावगाहमानस्य संस्कारस्य द्रव्यत्वमात्रेण च घटं पृथिवीत्वमात्रेण च पटमवगाहमानात् स्मरणाद्विनाशापत्तेः तत्र द्रव्यत्वमात्रेण घटं पृथिवीत्वमात्रेण पटमवगाहमानस्य संस्कारस्य यादृशसामग्रीतो नाशस्तादृशसामग्र्यास्तन्नाशकत्वात् तादृशसंस्कारस्यापि द्रव्यत्वपृथिवीत्वोभयप्रकारकतया घटपटोभयविशेष्यकतया च तन्नाशकसामग्र्या तत्तत्प्रकारकभेदतत्तद्विशेष्यकसंस्कारभेदाप्रवेशात् तन्नाशकसामग्रीघटकद्रव्यत्वपृथिवीत्वेतरधर्मप्रकारकसंस्कारभेदघटपटभिन्नविशेष्यकभेदानां चोक्तसमूहालम्बनसंस्कारेऽपि सत्त्वात् । संस्कारनाशं प्रति तादात्म्यसम्बन्धेन संस्कारत्वेनान्येकहेतुता कल्पनीया अतः संस्कारनाशप्रयोजकसामग्र्या नादृष्टादिसाधारण्यम् । केचित्तु समूहालम्बनजन्यघटपटादिसंस्कारा भिन्नभिन्ना एव संस्कारयौगपद्ये क्षतिविरहात् तथा च स्ववृत्तिविषयतावत्त्वस्यापि स्मृतिनिष्ठनाशकतावच्छेदकप्रत्यासत्तिघटकत्वोपगमात् घटादिस्मृत्या पटादिसंस्कारस्य न विनाशनं तस्य तत्स्मृतिवृत्तिघटादिविषयतावत्त्वाभावादित्युत्तरकाले पटादिस्मरणनिर्वाहः । एवं घटवद्भूतलमित्यादिविशिष्टज्ञानाद् घट इत्यादिस्मृतिनिष्ठप्रत्येकपदार्थीयविषयताशून्या एव विशिष्टगोचरसंस्कारा उपगम्यन्ते ते च न तादृशस्मृतितो विनश्यन्ति तत्र तादृशस्मृतिनिष्ठविषयतावत्त्वविरहादत उत्तरकालं विशिष्टस्मृतिनिर्वाहः । घट इत्यादिस्मृतेरपि घटादिविषयकसंस्कारत्वावच्छिन्नविशिष्टसंस्कारफलतया तद्व्यावर्तनाय फलस्य समानाकारकताकथनसङ्गतिरित्याहुः । स्मृ-

तिवृत्तित्वाभावविशिष्टविषयताविरहः संस्कारप्रत्यासन्नस्तन्नाशकः एकैकगोचरस्मृतिदशायां संस्कारनिष्ठविषयान्तरविषयतायां स्मृतिवृत्तित्वाभावसत्त्वेन तया प्रतिबन्धात् समूहालम्बनसंस्कारनाश इत्यपरे । नन्वनुगतरूपेण स्मृतेर्नाशकत्वं निर्युक्तिकं भवतां चरमस्मृतिजन्यस्यैव ममाप्यनुभवजन्यसंस्कारनाशस्याप्यननुगतेनापि कालादिना नाशसम्भवात् । न च यत्र विषये चरमस्मृतिव्यक्तेः उपेक्षारूपा तत्रानुभवजन्यसंस्कारस्यानुगतात्स्मरणरूपनाशकान्नाशोपगम एव युक्तः तत्र चरमस्मृतिजन्यसंस्कारस्याप्रसिद्ध्याननुगतकालादेर्नाशकताया अनावश्यकत्वादिति वाच्यम् । ज्ञानत्वेन स्मृतिसंस्कारहेतुतामते चरमस्मृतिविशेषाणां संस्काराजनकत्वनिर्वाहाय तत्तद्व्यक्तित्वेन तासां संस्कारप्रतिबन्धकताया. कल्पनीयतयानुभवत्वेन स्मृतिसंस्कारहेतुत्ववादिना उक्तस्थले ऽनुभवजन्यसंस्कारनाशेऽननुगतानां हेतुत्वोपगमेऽपि गौरवानवकाशाच्चरमस्मृतिव्यक्तीनामपि तत्तद्व्यक्तित्वेन संस्कारनाशकतासम्भवात्संस्कारस्य फलनाश्यताप्रवादसङ्गतिरित्यनुभवत्वेन स्मृतिसंस्कारहेतुतायां नोक्तबाधकावकाश इत्यत आह जायते, चेति । अनुभवजन्यसंस्कारापेक्षया स्मरणात् दृढस्तदुत्तरस्मरणात्ततश्च दृढतरदृढतमाः संस्कारा जायन्त इत्यवश्यमेव स्वीकार्यं दार्ढ्यं चोत्कर्षरूपो जातिभेदो झटिति स्मृत्युत्पादप्रयोजकः न च दैववशसम्पन्नझटित्युद्बोधकसमवधानादेव झटिति स्मृतिनियमोपपत्तौ न तत्प्रयोजकतया संस्कारगतो जातिविशेषः सिध्यतीति वाच्यं यादृशसम्बन्धिविशेषज्ञानसत्त्वे पुनः पुनः स्मरणोत्तरं नियमतः स्मृतिर्न त्वनुभवमात्रोत्तरं तादृशोद्बोधकघटितसामग्र्यनुगमाय संस्कारगतजातिविशेषस्यावश्यकत्वात् झटिति स्मृतेर्दैवाधीनत्वमुपगम्य संस्कारातिशयखण्डने शास्त्रादावभ्यासोऽपि नोपयुज्येतेति नानुभवत्वेन स्मृतिसंस्कारहेतुतासम्भव इत्याशयः । इदं तु बोध्यं दृढदृढतरादिसंस्कारं प्रति समानविषयकस्मृतित्वतादृशस्मरणोत्तरस्मरणत्वादिना न हेतुता पुनःपुनरनुभवनादपि संस्कारदार्ढ्यदर्शनात् नापि समानविषयकज्ञानोत्तरज्ञानत्वादिना उपेक्षोत्तरोत्पन्नोपेक्षातो दृढतरसंस्कारानुदयात्

रोगादिना ज्ञातार्थगोचरसंस्कारनाशोत्तरजातज्ञानात्तदनुदयाच्च किं तु समानविषयकसंस्कारत्वेन दृढसंस्कारं प्रति दृढदृढत-रादिसंस्कारत्वेन च दृढतरदृढतमसंस्कारं प्रति जन-कता अत एव भावनायाः पटुतरभावनाजनकत्वप्रवादः भावनया भावनान्तरजनने चोत्तरोत्तरज्ञानं सहकारि तस्य संस्कारत्वावच्छिन्नं प्रत्येव स्मृतिसाधारणज्ञानत्वघटितधर्मपुर-स्कारेण हेतुत्वात् न चैवं स्वजन्यज्ञानसहकारेणेव स्वजनकज्ञा-नसहकारेणापि संस्कारः पटुपटुतरसंस्कारं जनयत्विति वाच्यं स्वजन्यसंस्कारानुपहितज्ञानत्वेनैव संस्कारहेतुत्वोपगमात् । अन्यथा सर्वत्र विनश्यदवस्थज्ञानात् पटुतरसंस्कारान्तरस्य दुर्वारत्वादन-न्ताप्रामाणिकसंस्कारकल्पनागौरवेण इष्टापत्तेरयोगादिति ॥

ज्ञानत्वेन स्मृतिसंस्कारहेतुत्वे युक्त्यन्तरमप्याह परित्यज्य चेति ॥

(दी०) परित्यज्य च निश्चिताव्यभिचारकं रूपं गृ-ह्यमाणव्यभिचारकेण कारणत्वकल्पनानुदयात् इदमेव चान्यत्र सामान्यस्य च हेतुतावच्छेदकत्वे बीजम् । अभिहितं च तात्प-र्यटीकायां प्रथमसूत्रे ऽवयवविवेचनप्रस्तावे मिश्रैः । स्मृतीनां स्वकार्यसंस्कारविरोधिनीनामसहभावादिति चेन्न । चरमज्ञान-पदस्यानुभवपरत्वात्साक्षात्तज्जन्यत्वस्य वा विवक्षितत्वादित्यपि कश्चित् । किं च व्याप्यविशेष्यकात् पक्षविशेष्यकाच्च परामर्शा-दनुमितिदर्शनाच्च तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लक्षणघटकमपि तदेव ॥

(गा०) निश्चितः कार्यतावच्छेदकावच्छेदेनाव्यभिचारो यद्रू-पावच्छिन्नस्य तन्निश्चिताव्यभिचारकं गृह्यमाणः कार्ये संशय-साधारणज्ञानविपर्ययीभूतो यद्रूपावच्छिन्नस्य व्यभिचारः तद्रूपं गृह्यमाणव्यभिचारकं तथा च ज्ञानत्वावच्छिन्नस्य स्मृतिसं-स्कारयोर्न व्यभिचारशङ्कापि स्मृतेः संस्कारादिजनकत्वस्य स-न्दिग्धत्वादनुभवत्वावच्छिन्नस्य तत्र व्यभिचारः सन्दिग्ध इति न तेन रूपेण कारणताग्रहः सम्भवतीति भावः । यद्यपि

व्यभिचारसंशयस्य ग्राह्यसंशयतया कल्पनात्मककारणताग्रहे न विरोधित्वसम्भवः ग्राह्यसंशयस्य परोक्षज्ञानाविरोधिताया सर्वसम्मतत्वात् । तथापि कारणतायां सामान्यविशेषरूपावच्छिन्नत्वयोः संशये सामान्यरूपस्य नियतपूर्ववर्तितावच्छेदकत्व कल्प्तम् विशेषरूपस्य तथात्वमसिद्धतया कल्प्यमिति तस्य कारणतावच्छेदकत्वे कल्पनागौरवमिति गौरवप्रतिसन्धानेन प्रतिबन्धाद्विशेषरूपेऽवच्छेदकत्वग्रहो न भवतीति बोध्यम् । इदमेव निश्चितान्यभिचारकत्वमेव अन्यत्र प्रवृत्त्यादिकार्ये सामान्यस्य इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकनिश्चयत्वाद्यपेक्षया ऽधिकसंग्राहकस्य तदुभयवैशिष्ट्यावगाहिनिश्चयत्वादे । संस्कारस्य स्मृतिजन्यत्वं नापसिद्धान्त इत्याविष्कर्तुं तत्र टीकाकारसंवादमाह अभिहित चेति । प्रथमसूत्रे प्रमाणप्रमेयेत्यादिसूत्रे अवयवविवेचनप्रस्ताव इति तत्र पूर्वपूर्ववर्णस्मृतिसहित उत्तरवर्णानुभव एव पदप्रत्यक्षहेतुरस्तु इत्याक्षेपसमाधान स्वकार्येति । स्व स्मृति तत्कार्यो य संस्कार स एव स्वानन्तरोत्पन्नविशेषगुणविधया विरोधी नाशको यासा तासामित्यर्थ । एतच्च तृतीयक्षणानवस्थाननिर्वाहकत्रिचतुरादिव्यक्तीनामेकक्षणानवस्थानरूपासहभावप्रयोजकतया अभिहितम् । चरमज्ञानपदस्येति । अनुभवपरत्वात् अनुभवत्वावाच्छिन्नरूपविशेषार्थकत्वात् तथा च तादृशनिश्चयत्वावाच्छिन्नजन्यानुभवत्व लक्षण तस्य चानुभवत्वशून्याया स्मृतावतिव्याप्तिर्न शङ्कास्पदमपीति भाव । अन्यस्य समाधानान्तरमुपन्यस्यति साक्षादिति । साक्षात्तज्जन्यत्व तज्जन्याजन्यत्वे सति तज्जन्यतावच्छेदकावाच्छिन्नाजन्यत्वे सति वा तज्जन्यत्व परामर्शजन्यतावच्छेदकविशिष्टगोचरसंस्कारत्वावच्छिन्नजन्यायां स्मृतौ नास्तीति भाव । अत्र गौरवमस्वरसबीज विशिष्टवैशिष्ट्यबोधहेतुतया ज्ञानत्वानिवेशनव्यवस्थापनाया शक्यत्वेन तत्राति-यातिर्यथा वारणीया विशिष्टस्मरणेऽपि तेनैव प्रकारेण तद्वारण सम्भवतीति चरमज्ञानपदस्यानुभवपरत्व नावश्यकनीयमित्याशयवानाह व्याप्येति । व्याप्यविशेष्यकात् आधेयतासम्बन्धेन व्याप्यरूपविशेष्य पक्षप्रकारकात्पर्यंत बाह्निव्याप्य इत्याकारकात् पक्षविशेष्यकात् अधिकरणतासम्बन्धेन

पक्षरूपविशेष्ये व्याप्यप्रकारकात् वह्निव्याप्यवान् पर्वत इत्याकारकात्परामर्शात् अनुमितिदर्शनात् अविलक्षणायाः पर्वतो वह्निमानित्यनुमितेरनुभवात् तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन उभयानुगमकेन व्याप्यपक्षोभयनिरूपितवैशिष्ट्यविषयताशालिनिश्चयत्वेन तत्र हेतुत्वम् अनुमितिं प्रति कारणत्वं न तु विशिष्टवैशिष्ट्यबोधविशिष्टस्मरणजनकतावच्छेदकेन व्याप्यप्रकारकपक्षविशेष्यकनिश्चयत्वादिना अन्यतरासंग्रहादित्यर्थः । ननु वैशिष्ट्यमत्र व्याप्यतावटकसम्बन्धरूपं विवक्षणीयम् । अन्यथातिप्रसङ्गात् एवं च संयोगावच्छिन्नाधारत्वादिकमेव धूमादेर्व्याप्यताघटकं न त्वाधेयत्वं तत्कृत उक्तरूपेण पक्षप्रकारकस्य पर्वते धूम इत्यादिज्ञानस्य संग्रहः तत्र संयोगावच्छिन्नाधेयत्वस्यैव संसर्गत्वात् न च पर्वते धूम इत्यादावपि व्याप्यताघटकः संयोगादिरेव संसर्गः न त्वाधाराधेयभाव इति वाच्यं पर्वतादिप्रतियोगिकसंयोगादेर्धूमादिरूपविशेष्यानुयोगिकत्वविरहेण तादृशप्रत्ययस्य भ्रमत्वापातात् आधाराधेयभावानवगाहने सप्तम्युल्लेखानुपपत्तेश्च न च संयोगाद्यवच्छिन्नाधेयत्वमेव च तत्र सम्बन्धः तत्संसर्गकत्वेऽपि तदन्तर्गतसंयोगादिसंसर्गकत्वमक्षतमिति वाच्यं विशिष्टसंसर्गकत्वेऽपि विशेषणीभूतसंयोगादेः संसर्गतावच्छेदकतया तद्विषयतायाः प्रकारविशेष्योभयनिरूपितत्वाभावात् अन्यथा संयोगावच्छिन्नाधेयतासम्बन्धेन व्याप्यप्रकारकात् व्याप्ये पर्वतः इत्यादिज्ञानात् संयोगावच्छिन्नाधारतासम्बन्धेन पक्षप्रकारकात् पर्वतवान् धूम इत्यादिज्ञानाच्चानुमितिप्रसङ्गात् एतेनाधाराधेयत्वयोस्तुल्यवित्तिवेद्यतया संयोगाद्यवच्छिन्नाधारत्वावगाहित्वेन तादृशाधेयत्वावगाहित्वेन वा व्याप्यपक्षविशेष्यकपरामर्शयोरनुगम इति निरस्तं व्याप्ये पर्वत इत्यादिधियो दुर्वारत्वात् व्याप्यनिरूपिताधारत्वावगाहित्वेन पक्षनिरूपिताधेयत्वावगाहित्वेन वाऽनुगमस्यान्यनिरूपिताधारत्वसम्बन्धाद्यवगाहिभ्रमासंग्रहेनासम्भवात् । अथ पर्वते धूम इत्यादिसप्तम्युल्लेखिप्रतीतौ संयोगावच्छिन्नाधेयत्वमेव पर्वतस्य संसर्गतया भासतां सा च पर्वतधूमयोः संयोगानवगाहितयानुमिताहेतुरेवोक्तरूपेणानुगमस्तु संयोगसम्बन्धेनैव व्याप्यांशे यः पक्षप्रकारकः यश्च

पक्षांशे तत्सम्बन्धेनैव व्याप्यप्रकारकः तयोरेव परामर्शयोः स्वीकरणीयः प्रथमज्ञानस्योक्तयुक्त्या भ्रमत्वेऽपि तस्यानुमितिहेतुतायास्तेनाप्रत्याख्येयत्वात् इति चेन्न। व्याप्यतावच्छेदकसंयोगेन व्याप्यस्य पक्षवृत्तितायाः तत्र साध्यासत्त्वेऽप्युपपद्यमानतया व्याप्यांशे तेन सम्बन्धेन तद्वत्ताज्ञानस्य तत्र पक्षे साध्यानुमितिहेतुताया अनुभवविरुद्धत्वात्। अन्यथा समवायादिना द्रव्यत्वादिव्याप्ये गुणादौ तेन सम्बन्धेन सत्त्वादिप्रकारकप्रमात्मकज्ञानात्सत्त्वादौ बाधानवतारदशायां द्रव्यत्वादिसिद्धिप्रसङ्गः। अत्राहुः आधाराधेयत्वयोस्तुल्यवित्तिवेद्यतामते पर्वते धूम इत्यत्राधारतानिरूपिताधेयता धूमवान् पर्वत इत्यत्र चाधेयतानिरूपिताधारता सम्बन्धः न तु तुल्यमुभयोः संसर्गतया भानं प्रत्येकमुभयोरुभयप्रकारतापत्तेः एवं चोभयत्रैवाधारत्वविषयता पर्वतविषयतया आधेयत्वविषयता च धूमविषयतया निरूपिता तथा च पक्षविषयतानिरूपिता या आधारताविशेषविषयता तन्निरूपितानिरूपितत्वविषयतानिरूपिताधेयत्वविषयतानिरूपितव्याप्यविषयताशालित्वेन द्वयोरनुगमः व्याप्ये पर्वतः पर्वतवान् धूम इत्यत्र च पक्षविषयतानिरूपिताधेयत्वविषयता व्याप्यविषयता चाधारत्वविषयतानिरूपितेति वैपरीत्यात्प्रोक्तानुगमकरूपस्यैतत्साधारण्यमिति नातिप्रसङ्गः न चाधारत्वावगाहित्वस्य कारणतावच्छेदकत्वे तदनवगाहिनो व्याप्यताघटकशुद्धसंयोगादिना पक्षे हेतुमत्ताज्ञानादनुमित्यनुदयप्रसङ्ग इति वाच्यं प्राचां मते आधाराधेयभावगर्भस्य हेतुसामानाधिकरण्यस्य व्याप्तिघटकतया हेतुनिरूपिताधारत्वावगाहिधिय एवानुमितिजनकत्वात् यदि च संयोगादिरेव संसर्गतया व्याप्तिप्रविष्टहेतुसामानाधिकरण्यघटको नाधारत्वं तदा संयोगादेर्यत्र हेतुतावच्छेदकसम्बन्धता तत्र तेन सम्बन्धेन व्याप्यप्रकारक पक्षविशेष्यकज्ञानमेवानुमितिजनकं न तु संयोगाद्यवच्छिन्नाधेयतासम्बन्धेन पक्षप्रकारकं व्याप्यविशेष्यकज्ञानं हेतुपक्षयोः सम्बन्धविधया व्याप्यतावच्छेदकसम्बन्धानवगाहनात् तस्याधिकविषयत्वेन गौरवस्य पक्षविशेष्यकपरामर्शहेतुतायां विनिगमकत्वाच्च एवं न यत्र तादात्म्यसम्बन्धेन हेतुना तत्रैव

व्यपक्षोभयविषयतानिरूपिततादात्म्यसंसर्गताकज्ञान

च न कश्चिदतिप्रसङ्गः निष्कृष्टजातिघटितानुमितिलक्षणस्या-वश्यकत्वेन तादृशकारणताघटितलक्षणस्यैव सर्वसाधारण्यस-म्भवात् । न च जातिघटितलक्षणे जातावनुभवत्वव्याप्यत्वस्या-वश्यं निवेशनीयतया स्मृतौ समानाकारत्वेन कार्यकारणभाव-व्यवस्थापनमग्रे विफलं तावतैव स्मृतावतिप्रसङ्गवारणसम्भवादिति वाच्यम् । कार्यतासमानाधिकरणानुभवत्वव्याप्यजातिघटितलक्षणा-पेक्षया लाघवेन कार्यतावच्छेदकजातिघटितलक्षणस्यादरणीय-तया स्मृतौ व्याप्यपक्षोभयविशेष्यकपरामर्शद्वयसाधारणरूपेण कारणत्वे तादृशकारणताप्रतियोगिककार्यतावच्छेदकस्मृतित्वजा-तिमादाय स्मरणातिव्याप्तेः प्रसक्त्या तादृशलक्षणाभिप्रायेणानुभव-त्वव्याप्यजातिघटितलक्षणेऽपि स्मृतावनुगतरूपेणाहेतुत्वेऽनु-भवत्वान्यानुभवान्यासमवेतत्वरूपानुभवत्वव्याप्यत्वमुपेक्ष्य लघोरनु-भवनिष्ठभेदप्रतियोगितावच्छेदकत्वरूपस्य निवेशनं सम्भवती-त्यभिप्रायेण वा स्मृतौ विशेषरूपेण हेतुत्वव्यवस्थापनस-ङ्गतेः लक्षणेऽपि तादृश्येव कारणता विशिष्टवैशिष्ट्यबोधादा-वतिव्याप्तिवारणाय निवेश्येत्यवधेयम् । लक्षणघटकम-पि तदेवेति । तदेव उभयवैशिष्ट्यावगाहिनिश्चयत्वरूपानुगत-धर्मावच्छिन्नकारणत्वमेव प्रकृतलक्षणघटकमुपेयमित्यर्थः अन्य-रूपावच्छिन्नहेतुताघटितस्य लक्षणस्यालक्ष्य एव सत्त्वादिति भाव ॥

विशिष्टस्मृतिकारणता नोक्तानुगतरूपावच्छिन्ना अपि तु वि-शेषरूपावच्छिन्नेति न तत्रातिव्याप्तिरित्याह एकतरेत्यादिना तत्र विशिष्यैव कार्यकारणभाव इत्यन्तेन ॥

(दी०) एकतरविशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभा-वात् । अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात् समा-नप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्च तत्र विशि-ष्यैव कार्यकारणभावः । न तूक्तरूपेण गौरवात् मानाभावाच्च इत्यपि केचित् । एवं च विशिष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रस-ङ्गशङ्कापि । वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीवि-षयधर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव

लक्षणे निवेशात् । अत एव व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः । व्याप्यविषयकत्वेन वा जन्यज्ञान विशेषणीयम् । एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम् ॥

(गा०) तत्र स्मृतिस्थले विशिष्यैव व्याप्यप्रकारकपक्षविशेष्यकस्मृतित्वतादृशनिश्चयत्वादिरूपविशेषधर्ममुपादायैव कार्यकारणभाव कल्प्यत इति शेष । अत्र हेतुमाह समानप्रकारकत्वेनैव ज्ञानस्मरणयो कार्यकारणभावाच्चेति । तृतीयाया वैशिष्ट्यार्थकत्वात् । समानप्रकारकत्वेनेत्यसमानप्रकारकयोरित्यर्थ । तथा चासमानप्रकारकज्ञानस्य स्मरणाहेतुत्वादित्यवधारणार्थं । एतावतानुगतरूपस्य कारणतातिरिक्तवृत्तित्वलाभ असमानप्रकारकज्ञानस्य स्मृत्यकारणत्वे तस्य फलानुत्पादकत्व हेतुमाह एकतरेति । व्याप्यादिमात्रविशेष्यकस्मरणानुत्पत्तेरित्यर्थ । एतदेव द्रढयति अन्यथेति । एकतरविशेष्यकज्ञानादपि अन्यविशेष्यकस्मृतीना पक्षादिविशेष्यकत्वनियमापत्तेरित्यर्थ । केचित्तु नियमेनेत्यत्र अकारप्रश्लेष । तथा चानियमेन नियामकाभावेन स्मृतेस्मृतिमात्रस्योभयविशेष्यकत्वप्रसङ्गादिति व्याचक्षते विशिष्टविशेषणतानवच्छेदकप्रकारकविशेषणविशेष्यकनिश्चयत्वावच्छिन्नजन्यव्याप्यविशिष्टपक्षवैशिष्ट्यबोधादावित्यर्थ । आदिना विशिष्टस्मृतिपरिग्रह । व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकतापक्षे अन्वयव्यतिरेकव्याप्तिकारनयोर्व्यभिचारधीप्रतिबन्धकतावच्छेदकत्वमननुगमय्य कारणतावच्छेदकत्वमते तादृशकारणताया एव लक्षणे निवेशादेकविधव्याप्त्यवगाहिज्ञानादन्यविधव्याप्तिविषयकविशिष्टवैशिष्ट्यबोधाद्यनुदयात् तज्जनकतावच्छेदकगर्भं विशिष्यैव तद्व्याप्तिविषयतानिवेशन एकरूपेणानुमिति-

विशिष्टवैशिष्ट्यबोधादिहेतुताविरहात् तत्र च नातिव्याप्तिप्रसक्तिरित्याह वक्ष्याद्यनुमितावित्यादिना । विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयहेतुतानभ्युपगन्तृमिश्रमते व्याप्यविशिष्टपक्षवैशिष्ट्यावगाहिप्रत्यक्षसामान्येऽतिव्याप्तिविरहेऽप्यभाववुद्धौ प्रतियोगितावच्छेदकप्रकारकप्रतियोगिविशेष्यकनिश्चयत्वेन हेतुता मिश्रेणावश्यं स्वीकरणीयेति वह्निव्याप्यवान्पक्षो नास्तीत्याद्यभावग्रहे तन्मतेऽप्यतिव्याप्तिरस्तीति दर्शितरीत्यैव वारणीयेत्याह । अत एवेति । अत एव उक्तरूपावच्छिन्नकारणताया लक्षणे प्रवेशादेव व्याप्यवत्पक्षाद्यभावग्रहं प्रतीति । पक्षतावच्छेदकावच्छिन्नविशेषणतया व्याप्तिविशिष्टावच्छिन्ना या प्रतियोगिता तन्निरूपितानुयोगिताप्रकारकाभावलौकिकं प्रतीत्यर्थः । व्याप्यवत्पक्षादिज्ञानत्वेन व्याप्तिविशिष्टप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वेनेत्यर्थः । दण्डो रक्तो नास्तीत्याद्यभावग्रहस्य दण्डो रक्तो न वेति संशयादनुत्पत्तेरानुभाविकतया विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकधीहेतुतायादिनां तद्विशेषहेतुतायामिव मिश्रमतेऽपि सधर्मितावच्छेदकप्रतियोगितावच्छेदकप्रकारकज्ञानहेतुतायां निश्चयत्वनिवेशस्यावश्यकत्वादिति भावः। न क्षतिः नातिव्याप्तिः व्याप्यपक्षविशेष्यकयोरन्वयव्यतिरेकव्याप्तिप्रकारकयोश्च परामर्शयोरनुगमकरूपस्याभावप्रत्यक्षजनकतानवच्छेदकत्वादिति भावः । यदि चानुमितिपरामर्शयोः समानविशेष्यकत्वानुभवानुरोधात् विनिगमकान्तराद्वा पक्षविशेष्यक एव परामर्शोऽनुमितिहेतुरुपेयते व्यतिरेकिणि च व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति मतं व्यतिरेकव्याप्तेरनुमितिप्रयोजकत्वेऽपि मणिमन्त्रादिन्यायेन विरोधितया ऽप्रामाणिकतयानुगमासम्भवेन पृथक् पृथगेव व्याप्तिज्ञानयोरनुमितिहेतुता व्यतिरेकिस्थले दर्शितदिशा च व्यभिचारवारणं तदा नोक्तरीतिद्वयेन विशिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणसम्भवः । न चा पूर्वोक्तरीत्यानुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यबोधवारणाय तद्धेतुतायां ज्ञानत्वप्रवेशस्यावश्यकत्वादित्यालोच्य तदतिव्याप्तिवारणाय विशेषणान्तरं प्रवेशयति

लक्षणे निवेशात् । अत एव व्याप्यवत्पक्षादिभावग्रहं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः । व्याप्यविषयकत्वेन वा जन्यज्ञानं विशेषणीयम् । एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव वा तस्या हेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्त्वादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम् ॥

(गा०) तत्र स्मृतिस्थले विशिष्यैव व्याप्यप्रकारकपक्षविशेष्यकस्मृतित्वतादृशज्ञानिश्चयत्वादिरूपविशेषधर्ममुपादायैव कार्यकारणभावः कल्प्यत इति शेषः । अत्र हेतुमाह समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्यकारणभावाच्चेति । तृतीयाया वैशिष्ट्यार्थकत्वात् । *समानप्रकारकत्वेनेत्यसमानप्रकारकयो*रित्यर्थः । तथा चासमानप्रकारकज्ञानस्य स्मरणाहेतुत्वादित्यवधारणार्थः । एतावतानुगतरूपस्य कारणतातिरिक्तवृत्तित्वलाभः असमानप्रकारकज्ञानस्य स्मृत्यकारणत्वे तस्य फलानुत्पादकत्वे हेतुमाह एकतरेति । व्याप्त्यादिमात्रविशेष्यकस्मरणानुत्पत्तेरित्यर्थः । एतदेव द्रढयति अन्यथेति । एकतरविशेष्यकज्ञानादपि अन्यविशेष्यकस्मृतीनां पक्षादिविशेष्यकत्वनियमापत्तेरित्यर्थः । केचित्तु नियमेनेत्यत्र अकारप्रश्लेषः । तथा चानियमेन नियामकाभावेन स्मृतेः स्मृतिमात्रस्योभयविशेष्यकत्वप्रसङ्गादिति व्याचक्षते विशिष्टविशेषणतावच्छेदकप्रकारकविशेषणविशेष्यकनिश्चयत्वावच्छिन्नजन्यव्याप्यविशिष्टपक्षवैशिष्ट्यबोधाद्यावित्यर्थः । आदिना विशिष्टस्मृतिपरिग्रहः । व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकतापक्षे अन्वयव्यतिरेकव्याप्तिप्रकारतयाव्यभिचारधीप्रतिबन्धकतावच्छेदकत्वनानुगमस्य कारणतावच्छेदकत्वमते तादृशाकारतायाः एव लक्षणे निवेशादेकविधव्याप्त्यवगाहिज्ञानादन्यविधव्याप्तिविषयकविशिष्टवैशिष्ट्यबोधाद्यनुदयात् तज्जनकतावच्छेदकगर्भे विशिष्यैव तद्व्याप्तिविषयतानिवेशेन एकरूपेणानुग-

कारणता तदीयव्यापारमात्रसत्त्वं कार्योत्पत्तावपेक्षितं तथा च संस्कारादप्यनुभवसामग्रीसहकृताद्विशिष्टवैशिष्ट्यबोधापत्तिः यदि च ज्ञानस्य स्वतः पूर्ववर्तितया अपि कारणताघटकत्वात्तत्सत्त्वमपेक्षितं तदा स्मरणेनापि तदपेक्षताम् अतो व्यापारघटितमेकं कारणत्वमन्यच्च तदघटितं वाच्यं तथा च दर्शितव्यभिचारो दुर्वार एवेत्याशयेन कल्पान्तरमाह निर्विकल्पात्मकस्य वा स्मरणस्येति । विशिष्टस्मृतिपूर्वमित्यादिः कल्पनादित्यनेनान्वयः । केचित्तु विशेषणधिय इत्यग्रिमस्य विशेषणतावच्छेदकधिय इत्यर्थकतया विशेषणतावच्छेदकप्रकारकज्ञानस्यैव ज्ञानत्वेन हेतुताव्यवस्थापकोऽयं ग्रन्थः एवं च विशेषणविषयकादित्यादिपूर्वग्रन्थोऽपि विशेषणविषयकपदस्य विशेषणताच्छेदकप्रकारार्थकतया विशिष्टस्मरणपदस्य विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुतायामिव व्यभिचारप्रदर्शनपर इति न संदर्भविरोधः न चैवं यद्यपि निर्विकल्पकस्मरणकल्पनया विशिष्टवैशिष्ट्यावगाहिस्मरणोपपत्तिः निर्विकल्पकस्य विशेषणतावच्छेदकप्रकारकत्वविरहात् किं तु विशिष्टवैशिष्ट्यस्मरणपूर्वं विशिष्टविशेषणकस्मरणकल्पनयैव तदुपपत्तिः निर्विकल्पकात्मकस्य वा इत्यग्रिमग्रन्थविरोधः । विशेषणतावच्छेदकस्मरणोपपादकतया तद्गोचरनिर्विकल्पकस्मरणोपगमेन सङ्गतावपि अन्तरा विशिष्टविशेषणगोचरस्मरणकल्पनीयत्वाकथनेन न्यूनतापत्तिश्चेति वाच्यं यतः स्मृतेः निर्विकल्पकतायाः सविवादतया तादृशी स्मृतिर्न संभवतीति विशिष्टवैशिष्ट्यस्मरणपूर्वं विशिष्टस्मृतिकल्पनं न सम्भवतीति विशिष्टवैशिष्ट्यधीहेतुतायामिव विशिष्टधीसामान्यहेतुतायामपि ज्ञानत्वनिवेशे युक्तेस्तुल्यत्वादित्युभयत्रैव न ज्ञानत्वप्रवेश इत्यभिप्रायेणैव पूर्वमतिव्याप्तिसमाधानम् । एवं चेदानीं निर्विकल्पकस्मरणोपगमेनैव *प्रत्यक्षस्थल इव निर्विकल्पकविशिष्टज्ञानविशिष्टवैशिष्ट्यज्ञानानि* स्मृतिस्थले क्रमशो भवन्तीति विशिष्टवैशिष्ट्यबोधं प्रति ज्ञानत्वेन हेतुत्वे बाधकाभाव इत्यर्थतो लाभादन्तराविशिष्टस्मृतिकल्पनाकथनेऽपि न न्यूनतेति ध्येयम् । अथातिप्रसङ्गवारणाय समानप्रकारकत्वेनैव स्मृतिं

व्याप्त्यविषयकत्वेनेति । लिङ्गोपधानस्य मणिकृतामभ्युपगमात् तन्मतेऽसम्भवेऽपि न क्षति उक्तधीविशिष्टवैशिष्ट्यबोधविशिष्टस्मरणादेर्व्याप्तिविषयकत्वनियमाभावात्व्याप्तिरिति भावः । नन्वनुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिवारणायोद्बोधकाभावविशिष्टसंस्कारान्यत्वमेव विशेषणतावच्छेदकप्रकारकहेतुतायां निवेश्यं न तु ज्ञानत्वं पूर्वोपदर्शितव्यभिचारस्य दुर्वारत्वात् अनन्यगतिकतया जनकतावच्छेदकगौरवस्यादोषत्वात् भेदस्याव्याप्यवृत्तितायां उपगन्तव्यतया उद्बुद्धसंस्कारे उद्बोधकाभावविशिष्टतद्भेदसत्त्वात् तादृशात् संस्काराद्विशिष्टवैशिष्ट्यस्मरणनिर्वाहः । संस्कारानिष्ठत्वविशेषितस्योद्बोधकाभाववैशिष्ट्यस्यात्यन्ताभाव एव वा निवेश्यः स च उद्बोधकासमवहितग्रामादिसाधारणोऽपि तथा च ज्ञानत्वस्य विशिष्टवैशिष्ट्यधीजनकतायामनिवेशादेव तत्राति-व्याप्तिवारणसम्भवे किं व्याप्त्यविषयकत्वनिवेशनेन विशिष्टस्मरणातिव्याप्तेरनुभवत्वविवक्षयापि वारणसम्भवादित्याशङ्क्य ज्ञानत्वेन विशिष्टवैशिष्ट्यबोधहेतुताया व्यभिचारमुद्धरन् व्याप्त्यविषयकत्वनिवेशस्य तदतिव्याप्तिवारणप्रयोजनकत्वं दर्शयति एतेनेत्यादिना । प्रथमतो विशेषणज्ञानस्य हेतुताया ज्ञानत्वेन व्यवस्थितौ विशेषणतावच्छेदकप्रकारकधियाऽपि हेतुत्वे तत्प्रवेशसम्भव इत्याशयेन विशिष्टबुद्धौ विशेषणज्ञानत्वेन हेतुत्वं पूर्वपूर्वोपदर्शितविशिष्टवैशिष्ट्यस्मरणे व्यभिचारमुद्धरति स्मृतौ प्रतीत्यादिना कल्पनेन । संस्कारद्वारेति विशेषणधियो हेतुत्वस्य कल्पनादित्यनेनान्वयः । तथा च न स्मृतौ ज्ञानत्वावच्छिन्नस्य व्यभिचारः विशेषणज्ञानजन्यसंस्कारोत्पत्तिक्षण एव विशिष्टानुभवस्योत्पत्त्या तत्र संस्कारद्वारा हेतुत्वासम्भवेऽपि न क्षतिः साक्षादेव तत्र तथात्वादित्याह अनुभवं प्रति चेति । न च साक्षाद्धेतुत्वे स्मृतौ परम्परया हेतुत्वे चानुभवे व्यभिचारात् कथमयं कल्पः सम्भवदुक्तिक इति वाच्यं स्वस्वव्यापारान्यतरत्वावच्छेदेन नियतपूर्ववर्तिताया एव कारणताघटकत्वात् प्रत्येकं व्यभिचारस्याकिञ्चित्करत्वात् । ननु व्यापारघटिता तस्य

कारणता तदीयव्यापारमात्रसत्त्वं कार्योत्पत्तावपेक्षितं तथा च संस्कारादप्यनुभवसामग्रीसहकृताद्विशिष्टवैशिष्ट्यबोधापत्तिः यदि च ज्ञानस्य स्वतः पूर्ववर्तिताया अपि कारणताघटकत्वात्तत्सत्त्वमपेक्षितं तदा स्मरणेनापि तदपेक्षताम् अतो व्यापारघटितमेकं कारणत्वमन्यच्च तदघटितं वाच्यं तथा च दर्शितव्यभिचारो दुर्वार एवेत्याशयेन कल्पान्तरमाह निर्विकल्पात्मकस्य वा स्मरणस्येति । विशिष्टस्मृतिपूर्वमित्यादिः कल्पनादित्यनेनान्वयः । केचित्तु विशेषणधिय इत्यग्रिमस्य विशेषणतावच्छेदकधिय इत्यर्थकतया विशेषणतावच्छेदकप्रकारकज्ञानस्यैव ज्ञानत्वेन हेतुताव्यवस्थापकोऽयं ग्रन्थः एवं च विशेषणविषयकादित्यादिपूर्वग्रन्थोऽपि विशेषणविषयकपदस्य विशेषणतावच्छेदकप्रकारार्थकतया विशिष्टस्मरणपदस्य विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुतायामिव व्यभिचारप्रदर्शनपर इति न संदर्भविरोधः न चैवं यद्यपि निर्विकल्पकस्मरणकल्पनया विशिष्टवैशिष्ट्यावगाहिस्मरणोपपत्तिः निर्विकल्पकस्य विशेषणतावच्छेदकप्रकारकत्वविरहात् किं तु विशिष्टवैशिष्ट्यस्मरणपूर्वं विशिष्टविशेषणकस्मरणकल्पनैवेव तदुपपत्तिः निर्विकल्पकात्मकस्य वा इत्यग्रिमग्रन्थविरोधः । विशेषणतावच्छेदकस्मरणोपपादकतया तद्गोचरनिर्विकल्पकस्मरणोपगमेन सङ्गतावपि अन्तरा विशिष्टविशेषणगोचरस्मरणकल्पनीयत्वाकथनेन न्यूनतापत्तिश्चेति वाच्यं यतः स्मृतेः निर्विकल्पकतायाः सविवादतया तादृशी स्मृतिर्न संभवतीति विशिष्टवैशिष्ट्यस्मरणपूर्वं विशिष्टस्मृतिकल्पनं न सम्भवतीति विशिष्टवैशिष्ट्यधीहेतुतायामिव विशिष्टधीसामान्यहेतुतायामपि ज्ञानत्वनिवेशे युक्तेस्तुल्यत्वादित्युभयत्रैव न ज्ञानत्वप्रवेश इत्यभिमायेणैव पूर्वमतिव्याप्तिसमाधानम् । एवं चेदानीं निर्विकल्पकस्मरणोपगमेनैव प्रत्यक्षस्थल इव निर्विकल्पकविशिष्टज्ञानविशिष्टवैशिष्ट्यज्ञानानि स्मृतिस्थले क्रमशो भवन्तीति विशिष्टवैशिष्ट्यबोधं प्रति ज्ञानत्वेन हेतुत्वे बाधकाभाव इत्यर्थतो लाभाद्न्तराविशिष्टस्मृतिकल्पनाकथनेऽपि न न्यूनतेति ध्येयम् । भवाभिप्रसङ्गवारणाय समानप्रकारकत्वेनैव स्मृतिं

प्रति संस्कारज्ञानयोर्हेतुत्वान्न निर्विकल्पकस्मरणसम्भव घट-त्वादिविशिष्टतद्घटादिगोचरसंस्कारादिजन्यतायां निर्विकल्प-कसाधारणस्य घटत्वादिभिन्नप्रकारतानिरूपितविशेष्यताभिन्न-तद्घटादिविषयताशालिघटत्वादिगोचरस्मृतित्वस्यावच्छेदकत्वे च यत्र द्रव्यत्वेन तद्घटावगाहिनी घटत्वेन चैतद्घटावगाहिन संस्काराद्घटत्वतद्घटादिविषयक निर्विकल्पक तत्र घटत्वविशिष्टतद्घटविषयकसंस्कारादेर्व्यभिचारः एव निर्विकल्पकस्मरणोपगमे प्रमेयत्वादिसामान्यलक्षणाजन्यज्ञानाधीनविश्वविषयकनिर्विकल्पकस्मरणेन स्वरूपतो निखिलजातिप्रकारकज्ञान स्यात् न च तादृश ज्ञान अद्ययावदस्यानुभवसिद्ध न च स्वरूपतस्तत्प्रकारकस्मृतौ स्वरूपतस्तत्प्रकारकसंस्कारादेर्हेतुतया तादृशकारणाभावात् सकलजातिनिर्विकल्पकसत्त्वेऽपि न स्वरूपत सकलजातिप्रकारकस्मरणसम्भव तादृशप्रत्यक्षादपि युगपत्सकलजातिसन्निकर्षविरहेण नापत्तिसम्भव इति वाच्य ज्ञानरूपसन्निकर्षसत्त्वेन तादृशमानसस्य दुर्वारत्वात् तत्कथमिदानीमपि निर्विकल्पक स्मरणमङ्गीकृतमिति चेन्न अनुद्बुद्धसंस्कारान्यत्वापेक्षया लघुना ज्ञानत्वेन विशिष्टधीहेतुतासिद्धौ तन्निर्वाहकतया निर्विकल्पकस्मरणस्यावश्यकत्वे तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वादिना सामान्यतो हेतुत्वान्तरस्य कल्पनीयतया विशिष्टसंस्कारादितो विशिष्टस्मरणस्येव तत्पूर्वं निर्विकल्पकस्यापि स्मरणस्य सम्भव न चोक्तक्रमेण सार्वज्ञ्यापत्ति स्वरूपतस्तत्प्रकारकोपनीतमाने स्वरूपतस्तत्प्रकारकज्ञानस्य हेतुत्वोपगमात् । उद्बोधकाकल्पनेन वा प्रमेयत्वादिसामान्यलक्षणाप्रयोज्ययावत्प्रमेयगोचरसंस्काराद्यावज्जातिनिर्विकल्पकस्यापि वारणसम्भवात् तदनभ्युपगमेऽपि स्वरूपतो भानयोग्यप्रमात्वघटकपदार्थनिर्विकल्पकमूलकप्रमेयत्वादिविषयकस्मरणजन्यतत्प्रकारकविश्वविशेष्यकस्मरणादेव कालादौ प्रमेयत्वादिना सकलप्रमेयप्रकारकस्मरणोपपत्तेरित्याशयेनेदानीं निर्विकल्पकस्मरणोपगमात् । ननु विशिष्टज्ञानत्व परित्यज्य विशिष्टानुभवत्वस्य जन्यतावच्छेदकत्वोपगमेनैव विशिष्टस्मृतौ व्यभिचारवारणे किं निर्विकल्पकस्मरणादिकल्पनया न च विशिष्ट-

विषयकानुभवत्वापेक्षया लघु विशिष्टविषयकत्वमेव स्मृतिसाधारणं विशेषणधीजन्यतावच्छेदकं तथा च निर्विकल्पकस्मरणमावश्यकमेवेति वोध्यं ज्ञानविनाशेऽपि तद्व्यापारभूतया इच्छया विशिष्टविषयककृतिजननात्तत्र व्यभिचारेण विशिष्टविषयकत्वमात्रस्य विशेषणधीजन्यतावच्छेदकत्वासंभवात् न चोपादानप्रत्यक्षस्य साक्षात् कृतिहेतुतया कृतौ न ज्ञानत्वावच्छिन्नस्य व्यभिचार इति वाच्यं उपादानप्रत्यक्षस्य फलसमानविषयकत्वानियमेन सुखत्वादिविशिष्टफलाविषयककृतौ सुखत्वादिधियो व्यभिचारस्य दुर्वारत्वात् एवं निर्विकल्पकस्मरणोपगमेऽपि कृतिसाक्षात्कारपूर्वं विशिष्टस्मृतिकल्पनया न तदुपपत्तिः कृतिद्वितीयक्षणोत्पन्ननिर्विकल्पकस्मरणेन विशिष्टविषयकस्मृतिजननकाले कृतिनाशेन विशिष्टविषयोपधानेन कृतिसाक्षात्कारासंभवादित्यालोच्य विशिष्टानुभवत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वमाहानुभवमिति । तस्याः विशेषणधियः अनुभवत्वजात्यनङ्गीकारे विशिष्टप्रत्यक्षत्वस्यैव तथात्वं स्वीकरणीयमिति ध्येयम् । इच्छाद्वेषसाक्षात्कारे व्यभिचारस्य कथितरीत्यानवकाशात् कृतिसाक्षात्कारे व्यभिचारमुद्धरति नियमत इति । यत्र यत्र कृतिसाक्षात्कारस्तत्र कृतिद्वितीयक्षणे विशिष्टविषयस्मृतिं कल्पयित्वा तदनन्तरक्षण एव कृतिप्रत्यक्षोपगमादित्यर्थः न च कृतित्वनिर्विकल्पकविषयस्मरणयोर्युगपदुत्पादासम्भवात् क्रमेण तदुभयोत्पत्तौ कृतेर्विनाशाद्विषयविरहेण कृतित्वविशिष्टकृतिप्रत्यक्षानुपपत्तिरिति वाच्यं कृतित्वविशिष्टबुद्धौ तज्ज्ञानस्य हेतुत्वानुपगमेन तन्निर्विकल्पकस्यानभ्युपगमात् तत्र विशेषणधियो हेतुत्वेऽपि विषयस्मरणस्यैव कृतित्वविषयकत्वोपगमेनोपपत्तौ तन्निर्विकल्पकस्यानावश्यकत्वात् अनादौ संसारे सर्वदैव कृतित्वविषयकसंस्कारसंभवेन कृतिसाक्षात्कारजनकविषयस्मृतौ तद्भाने बाधकाभावात् । न चैवमन्यत्रापि निर्विकल्पकोच्छेदः अपूर्वचैत्रत्वादेः प्राथमिकविशिष्टबुद्धिपूर्वं तत्स्मरणासम्भवेन तन्निर्विकल्पकस्यावश्यकत्वात् यत्र विशिष्टान्तरचाक्षुषादिसामग्रीकाले घटादीन्द्रियसंयोगोत्पत्तिस्तत्रैव द्वितीयक्षणे विशिष्टान्तरचाक्षुषाद्युत्पत्त्या तदुत्तरं

घटत्वादिविशिष्टधीनिर्वाहाय घटत्वादिनिर्विकल्पकस्यापेक्षकत्वाच्च ।

जन्यज्ञाने व्याप्यविषयकत्वनिवेशे यत्र व्याप्तिविशिष्टधूमादेः पक्षतावच्छेदकघटकता तत्रत्यानुमितौ वह्निव्याप्यधूमादिविषयकसमूहालम्बनानुमितौ चाव्याप्तिं साध्याद्यननुगमनिबन्धनव्याप्यननुगमप्रयुक्ताऽव्याप्तिवारणानुरोधेनावश्यविवक्षणीयवह्निव्याप्तिविशिष्टपर्वतवृत्तिताज्ञानजन्यव्याप्यविषयकज्ञानजातीयत्वस्य लक्षणतया निराकर्तुमाह साध्यादेरिति ।

(दी०) साध्यादेरननुगमात् एकोपादाने अन्यानुमितौ दैवाद्व्याप्तिविषयिण्यां च तस्यामव्याप्तिः परमवशिष्यते । सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनीया । एतल्लाभायैव चानुभवार्थकं चरमज्ञानपदम् । एवं चान्वयव्यतिरेकव्याप्त्योः पृथक् प्रयोजकत्वे ऽपि न क्षतिः । पर्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताया वह्निव्याप्यवत्पर्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकवृत्तिकार्यताया वा अवच्छेदिका ज्ञानवृत्तिः सामानाधिकरण्येन वावच्छेदिका या जातिस्तद्वत्त्वं वा बोध्यम् ।

(गा०) आदिना सम्बन्धविशेषादिपरिग्रहः एकोपादाने एकसाध्यादिघटितव्याप्त्यादिविषयकपरामर्शजन्यताघटितलक्षणे अन्यानुमितौ अन्यसाध्यकाद्यनुमितौ दैवात् दैववशसंपन्नसामग्रीविशेषात् तस्याम् अनुमितौ परमित्यनेनातिव्याप्तेरसंभवस्य च व्यवच्छेदः । तादृशज्ञानवृत्तीति पर्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नजन्ये व्याप्यविषयके वह्निव्याप्यधूमविशिष्टपर्वतत्वावच्छिन्नविषयकनिश्चयत्वावच्छिन्नजन्ये वा ज्ञाने समवेतेत्यर्थः । तद्वृत्तित्वं तत्समवेतत्वम् अतो न सम्बन्धान्तरेण तद्वृत्तिप्रत्यक्षत्वादिकमादाय ज्ञानमात्रेऽतिव्याप्तिः सत्तागुणत्वज्ञानत्वानुभवत्वजातिमादायातिव्याप्तिवारणायानुभवस्यव्याप्येति । व्याप्यत्वमिह भेद-

गर्भम् अनुभवत्वान्यत्वे सति अनुभवान्यासमवेतत्वरूपं विवक्षितं तेनानुभवत्वनिरासः । यद्यपि अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वरूपं यत्किंचिदनुभवासमवेतत्वरूपं वा तद्व्यापकत्वं निवेश्यापि अनुभवत्वान्तजातीनां वारणं संभवति तथापि ईदृशव्यापकजातिवारकप्रकाराणां जातिघटितान्यलक्षणे बहुशो ग्रन्थान्तरे च दर्शितत्वात् दिक्प्रदर्शनायैव प्रकारोऽत्र दर्शितः व्याप्यपदमेव उक्तभेदगर्भव्याप्त्यपेक्षया लघुशरीरदर्शिताव्यापकत्वार्थकमिति तु न युक्तं यां कां चिदित्यादौ दर्शितभेदगर्भव्याप्तेर्व्याप्यपदार्थस्य स्फुटतयोपादानेन विरोधादिति । जातिपदं समवायेन तद्वत्वलाभाय जातिभिन्नज्ञानसमवेतधर्माप्रसिद्ध्या जातित्वनिवेशवैयर्थ्यात् यद्यपि तादृशधर्मोऽनुमितित्वं तदेव च लक्ष्यतावच्छेदकं तथापि स्वरूपतस्तस्य लक्ष्यतावच्छेदकता दर्शितरूपेण च लक्षणत्वमित्याविरोधः । ननु व्याप्यविषयकत्वस्य जन्यज्ञानविशेषणत्वे संस्कारवारणायोपात्तं ज्ञानपदमनर्थकं व्याप्यवत्तानिश्चयत्वावच्छिन्नजन्यसंस्कारस्य व्याप्तिविषयकत्वनियमादित्याशङ्क्य तत्पदमुक्तार्थलाभसंपादकतया सार्थकयति एतल्लाभायैव चेति । जन्यपदस्य लक्षणया अनुभवत्वव्याप्यजातिपुरस्कारेण जन्यजातीयत्वार्थे तात्पर्यग्रहायैवेत्यर्थः । अनुभवत्वोपस्थापकज्ञानपदसमभिव्याहारादनुभवत्वघटितोक्तार्थे झटिति तात्पर्यस्य ग्रहात् पटो घटजातीयं द्रव्यमितिवज्जलं घटजातीयं द्रव्यमित्यादिवाक्यस्य स्वरसतोऽप्रयोगात्तज्जातीयार्थकपदस्य समभिव्याहृतपदोपस्थाप्यधर्मव्याप्यजात्या साजात्यपरताया औत्सर्गिकत्वादिति भावः । जातिघटनायाश्च प्रयोजनान्तरमपि दर्शयति एवं चेति । पृथक् प्रयोजकत्वेऽपि अनुमितिनिरूपितविभिन्नकारणतावच्छेदकशरीरे विशेषरूपेण प्रवेशेऽपि न क्षतिः न प्रकृतघटितलक्षणकरणे अपरव्याप्तिज्ञानजन्यानुमितावव्याप्तिः प्रकृतव्याप्तिज्ञानजन्यजातीयत्वस्यापरव्याप्तिज्ञानजन्यानुमितावक्षतत्वादितिभावः । कार्यतासामानाधिकरण्यस्थाने कार्यतावच्छेदकत्वनिवेशने जातावनुभवत्वव्याप्यत्वविशेषणं विनैव सत्वादिवारणं संभ-

सति तादृशजातीनां परामर्शजन्यतावच्छेदककोट्यनिविष्टत्वात् अनुमितिरनस्यैव च तथात्वादित्याशयेनाह पर्वतेति । व्याप्यपक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुतामते तद्रूपावच्छिन्नजन्यतयैव ज्ञानान्तरातिव्याप्त्यनवकाशात्तादृशकारणताघटितप्रथमकल्पे व्याप्यविषयकत्वानिवेश अवच्छेदकत्वस्य पर्याप्त्यनिवेशाद्विषयविशेषविषयकत्वस्याधिकस्य परामर्शजन्यतातावच्छेदकत्वेऽपि नासमत्र समुदायस्य एकदेशानतिरिक्ततया समुदायस्यावच्छेदकत्वे तदेकदेशस्यापि तथात्वस्यावाहतत्वात् अत एवावच्छेदककोटिप्रविष्टवह्नित्वादिजातिमादाय वह्न्यादिरूपविषयेऽतिव्याप्तिवारणाय ज्ञानवृत्तिरिति ज्ञानसमवेतेत्यर्थः । अथ वह्नित्वादिकमवच्छेदकविशेषणतया अवच्छेदकतायामेवावच्छेदक न तु कार्यतायां तथा च कथं तज्जातिमादायातिप्रसक्तिः न च स्वावच्छिन्नविधेयताकत्वसम्बन्धेन कार्यविशेषणतया वह्नित्वमपि कार्यतावच्छेदकमिति वाच्य तादृशपरम्परायाः सम्बन्धत्वे मानाभावात् विधयितासम्बन्धेन च वह्नित्वस्यातिप्रसक्ततया अवच्छेदकत्वायोगादिति चेन्न अवच्छेद्याश्रये साक्षात्परम्परया वा यावन्ति विशेषणानि तावत्स्वेव कार्यतावच्छेदकत्वोपगमे बाधकाभावात् कार्यतावच्छेदकादिविशेषणस्य कार्यतादौ तदवच्छेदकत्वे वा अवच्छेदकत्वमित्यत्र विनिगमकाभावेऽपि न ज्ञानवृत्तीत्यादिवैयर्थ्यम् । न च व्यधिकरणस्यानवच्छेदकत्वनियमाद्विषयवृत्तेर्न कार्यतावच्छेदकत्वसम्भव इति वाच्य साक्षादवच्छेद्याश्रयविशेषणतया विलक्षणावच्छेदकतायामेव सामानाधिकरण्यापेक्षणात् अवच्छेदकधर्मकानां भेदेऽपि अवच्छेद्यज्ञाननिरूपिताया अवच्छेदकत्वपर्याप्त्यधिकरणं यादृशं तादृशप्रकारावच्छेद्याश्रयविषयताया अभेदादवच्छेद्यकार्यत्वादेरभेद इति वह्निविधेयकानुमिति परामर्शजन्या इत्याकारके कार्यकारणभावग्रहे अनुमितिविषयताया ऐक्यात् कार्यकारणभावैक्यम् अनुमितित्ववह्नित्वादीनामवच्छेदकताविलक्षण्येन तावत्समुदाय यद्यपि नैकमवच्छेदकत्व तथापि तत्कार्यतानिरूपितावच्छेदकतात्वेन तदवच्छेदकतानां व्यासज्यवृत्तित्वे बाधकाभाव । तादृशानुगतरूपावच्छिन्नाव

च्छेदकत्वाधारतायाः समुदायवृत्तिधर्मेनैवावच्छेदादित्यलं पल्लवेन । तादृशजातिमज्ज्ञानत्वस्य लक्षणत्वे सामानाधिकरण्यसम्बन्धेन तादृशजातिवैशिष्टस्य ज्ञानत्व इव विषयवृत्तिधर्मेऽपि सत्वेन तद्व्यावर्तनाय ज्ञानत्वत्वरूपेण ज्ञानत्वस्याप्यवश्यं निवेशनीयतया गौरवमिति तदुपेक्षितं ज्ञानत्वाद्यवच्छिन्नसाध्यकादिपरामर्शजन्यताघटितज्ञानवृत्तिजातिमादाय लक्षणं दुष्करं तत्र विषयवृत्तिज्ञानत्वादिजातिमादायातिव्याप्तेर्दुर्वारत्वादिति तादृशपरामर्शजन्यताघटितमपि लक्षणं संभवतीति सूचयितुं ज्ञानवृत्तित्वविशेषणं परित्यज्य कल्पान्तरमाह सामानाधिकरण्येन वेति । कार्यविशेषणतया विलक्षणमवच्छेदकत्वमिह सामानाधिकरण्येनावच्छेदकत्वम् । अतो ज्ञानत्वादेः कार्यतासमानाधिकरणत्वेऽपि न क्षतिः । यत्तु आलोकादिलिङ्गकानुमितौ धूमादिलिङ्गकपरामर्शस्य व्यभिचारवारणाय स्वसमानाधिकरणतत्तल्लिङ्गरूपपरामर्शाव्यवहितोत्तरपर्यंताद्युद्देश्यकवह्न्यादिविधेयकानुमितित्वमेव तल्लिङ्गकपरामर्शजन्यतावच्छेदकं वाच्यं तथा च परामर्शविशेषणतया ज्ञानत्वस्य परामर्शजन्यतावच्छेदकत्वाच्चदादाय प्रत्यक्षादावतिप्रसक्तिवारणाय सामानाधिकरण्येनेति कल्पानुसरणमिति । तन्न साधीयः । अव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वे ऽनुमितित्वनिवेशस्य निष्प्रयोजनकतया ऽसंभवप्रसङ्गात् न ह्यव्यवहितोत्तरत्वनिवेशे क्वापि व्यभिचारः प्रसज्येत येन तद्वारकतया अनुमितित्वनिवेशनं सार्थकं भवेत् । अथानुमितित्वाप्रवेशे धूमपरामर्शाव्यवहितोत्तरोत्पन्नतत्समानाधिकरणात्मघटसंयोगद्वित्वाद्यधिकरणे घटादौ परामर्शाभावेन व्यभिचार इत्यनुमितित्वनिवेशसार्थक्यम् । न च विषयविशेषावगाहित्वनिवेशान्निर्विषयसंयोगादिव्यावृत्तिरिति वाच्यम् । अव्यवहितोत्तरत्वनिवेशे विषयविशेषावगाहितायाः प्रयोजनान्तराभावेनानिवेशात् । न च कार्यनिरूपितं दैशिकव्यापकत्वं न कारणताघटकम् । अपि तु कार्यतावच्छेदकव्यापकसामानाधिकरण्यप्रतियोगित्वम् । अत एव क्रियानधिकरणोत्तरदेशसंयोगोत्पत्तावपि तस्यास्तत्कारणत्वमिति वाच्यम् । प्रकृते कार्यनिरूपितदैशिकव्यापकतायाः कारणत्वाघटकत्वे कार्याधिकरणदेशत्वस्य

कारणाधिकरणदेशत्वानियतत्वनिर्वाहात् । क्रियाधिकरणे उत्पद्यमानः संयोगो यथा तदनधिकरणोत्तरदेशे जायते तथा परामर्शाधिकरणे इव तदनधिकरणेऽपि सिद्धयभावादिघटितानुमितेरुत्पादस्य दुर्वारत्वादिति चेत् । सत्यम् । अनुमितित्वमनिवेश्य स्वसमानाधिकरणपरामर्शाव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे संयोगादिविशेषे व्यभिचारो ऽस्त्येव तद्वारणाय स्वाव्यवहितपूर्ववर्तिपरामर्शसामानाधिकरण्यमेव विशेषणतया जन्यतावच्छेदकमुपेयतां तथा च तद्विशिष्टाधिकरणं परामर्शाधिकरणमेवेति तदुपलक्षितस्य संयोगादेः परामर्शाव्यभिचारेऽपि तद्विशिष्टाधिकरणताघटितव्यापकतागर्भकारणत्वमक्षतमित्यनुमितित्वानिवेशनमफलम् । न च इष्टत्वाननुगमेन नोक्तधर्मस्य कार्यतावच्छेदकत्वमपि तु अव्यवहितोत्तरत्वसामानाधिकरण्योभयसम्बन्धेन परामर्शविशेष एव तज्जन्यतावच्छेदकः तस्य चानुमितिरूपकार्ये विशेषणतया न कारणताघटकत्वसंभवः । परामर्शसमानकालीनविनश्यदवस्थपरामर्शजन्यानुमित्यधिकरणतायाः परामर्शविशिष्टानिरूपितत्वेन कारणत्वाघटकतया परामर्शस्य तादृशानुमित्यकारणत्वप्रसङ्गात् । न हि विशेष्यानिरूपिताधिकरणतावच्छेदककालावच्छेदेन विशेष्ये असम्बद्धे व्यावर्तके अधिकरणतानिरूपकतावच्छेदकत्वरूपमाधिकरणतानिरूपकविशेषणत्वमुपेयते किं तूपलक्षणत्वमेव भूतलाद्यधिकरणे पुरुषादेः सत्त्वदशायां पुरुषाद्यसम्बद्धेन तद्व्यावर्तकेनापि दण्डादिना विशिष्टस्य पुरुषादेरधिकरणत्वस्य भूतलादावमायात् । परामर्शोपलक्षितस्य संयोगादेर्घटादौ व्यभिचार एवेत्यनुमितित्वनिवेशनमावश्यकमिति वाच्यम् । तदधिकरणतावच्छेदककालावच्छेदेनावृत्तेरव्यवहितकालावच्छिन्नत्वाविशेषितस्य सामानाधिकरण्यसम्बन्धेन तदधिकरणतानिरूपकतावच्छेदकत्वोपगमात् । अत एव सिद्धिसिषाधयिषोभयकाले कालान्तरावच्छिन्नतदधिकरणात्मवृत्तिसिसाधयिषाविरहविशिष्टसिद्धिनिरूपिताधिकरणत्वासत्त्वेन विशिष्टसिद्धयभावरूपपक्षताया अनिर्वाह इत्यालोच्य दीधितिकृतां पक्षतानाग्रन्थे पक्षतायच्छिन्नत्वविशेषितसामानाधिकरण्यसम्बन्धेन सिद्धौ

सिषाधयिषाविरहवैशिष्ट्यमित्यभिधानं संगच्छते अत एव पक्षताया विशिष्टाभावरूपाया अतीन्द्रियक्षणघटितत्वेनातीन्द्रियतया प्रत्यक्षासंभवाभिप्रायेण विशेष्याद्यभावरूपाया इत्यनुपदं तदभिधानस्यापि संगतिः । एवं चानुमितित्वस्य परामर्शजन्यतावच्छेदककोटावप्रवेशेऽपि नोक्तव्यभिचारप्रसङ्गः । घटादौ परामर्शाधिकरणतानियतायाः तदुपलक्षिताधिकरणताविलक्षणायाः सामानाधिकरण्यघटितसम्बन्धेन परामर्शविशिष्टाधिकरणताया असत्त्वात् । नापि विनश्यदवस्थपरामर्शजन्यानुमित्यधिकरणतायाः कारणताघटकव्यापकतायामनिवेशे तस्याः परामर्शरूपकारणनियम्यता न स्यादिति दूषणस्याप्यवकाशः तदधिकरणताया अपि विशिष्टाधिकरणतात्वेन तादृशव्यापकतायां प्रवेशात् अस्तु वा स्ववृत्तित्वस्ववृत्तिधूमादिपरामर्शाव्यवहितोत्तरत्वोभयसम्बन्धेनात्मविशिष्टत्वमेव धूमादिपरामर्शजन्यतावच्छेदकं तावताप्यन्यलिङ्गकानुमितौ तस्य व्यभिचारवारणात् । आत्मवृत्तित्वविशिष्टस्यैवाधेयतयात्मविशिष्टस्याप्यनात्मन्यवृत्तेरिति ज्ञानत्वादिकं निवेश्यापि संयोगादौ व्यभिचारवारणसंभवात् । विनिगमनाविरहेण तस्यापि कार्यतावच्छेदकताया दुर्वारत्वादतिप्रसङ्गाच्च। न चाव्यवहितप्राक्क्षणावच्छिन्नतल्लिङ्गकपरामर्शाधिकरणताविशिष्टसमवायस्तल्लिङ्गकपरामर्शजन्यतावच्छेदकसम्बन्धः एवं च शुद्धमनुमितित्वमेव तज्जन्यतावच्छेदकं शुद्धज्ञानत्वादिकं च नित्यसाधारणमिति न तथात्वसंभव इति वाच्यं तथा सति ज्ञानत्वस्य कार्यतावच्छेदककोट्यप्रवेशेन तद्वारकविशेषणोपादानानुपपत्तेः । तस्मात् यत्साध्यपक्षकानुमितिरेकलिङ्गकपरामर्शजन्यैव प्रसिद्धा तत्पक्षकतत्साध्यव्याप्यवत्तापरामर्शजन्यताघटितमेव लक्षणमभिप्रेतं पर्वतादिपदमपि तत्पक्षादिपरमेव तत्र च न परामर्शविशेषणतया ज्ञानत्वस्य जन्यतावच्छेदककोटिप्रवेशप्रसक्तिरिति । तथा च ज्ञानत्वघटितयादृशसाध्यकानुमितिरेकलिङ्गकपरामर्शादेव तदनुमितिकारणताघटितमपि लक्षणं ज्ञानवृत्तित्वविशेषणमुपेक्ष्य सामानाधिकरण्येनावच्छेदकत्वं निवेश्य कर्तुं शक्यते इत्याशयेन सामानाधिकरण्येन चेत्यभिहितमिति तत्त्वम् ॥

ननु विशिष्टवैशिष्ट्ययोर्व्याप्तिव्याप्तिवारणाय नानापदार्थघटित-गुरुतरव्याप्त्यविषयकत्वनिवेशनमयुक्तं असमावर्तत्वादित्यतर्किविद्यासि घटकपदार्थाविषयकत्व निवेशस्यापि तद्वारणसम्भवात् जातिघटनया व्यसाध्याद्यनुमितेरपि सङ्ग्रहादित्याशयेनाह व्याप्तिमान इति।

(दी०) व्याप्तिमाने ऽवश्यं भासमानो यस्तादृशानुमित्यविषयस्तद्विषयत्वमात्रं वा ग्राह्य या का चिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्मसमवायित्वमिति वा वक्तव्यम्। अनुभवत्वजात्यनङ्गीकारे तु तद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवायित्व वक्तव्यम्। व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्ना या विशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्यता तत्समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि कश्चित्।

(गा०) व्याप्तिज्ञानविषयतद्घटकपदार्थान्तराविषयकत्वनिवेशेऽतिव्याप्तेर्दुर्वारत्वात् अवश्यमिति। अनुमितौ नियतभासमानव्याप्तिघटकसाध्याद्यविषयकत्वनिवेशस्यासम्भवसपादकत्वादसम्भव इत्यतस्तादृशानुमित्यविषय इति प्रकृतसाध्यकयत्किंचिदनुमित्यविषय इत्यर्थः। यत्किञ्चिदनुमितिविषयताया प्रकृतसाध्यादिसाधारणत्वात् सामान्यतोऽनुमितिविषयताया प्रकृतसाध्यकयावत्प्रमेयविधेयकसमूहालम्बनानुमितिविषयताया श्च केवलान्वयित्वात्। प्रकृतसाध्यकेति यत्किञ्चिदिति वा तिव्याप्त्यसम्भवयोर्वारकतामाविष्कर्तुमेवोक्तमतस्याभिधान निवेश स्तु तादृशपदार्थस्य कस्य चिदेकस्य विशिष्यैवेत्यवधेयम्। अनुभवत्वव्याप्यजातिघटितलक्षणे परामर्शत्वावच्छिन्नकारणताप्रतियोगिकव्याप्त्यविषयकवृत्तिकार्यताशालित्वेन कतिपयानुमितीनां निवेशनमयुक्तं तद्धर्मानाम प्रकृतानुमितिव्यक्तिमुपादाया नुभवत्वव्याप्यजात्या तद्व्यक्तिजातीयत्वस्यापि लघोर्लक्षणत्वसम्भवादित्याशयेन तादृशजातिघटितलक्षण तथैव निष्क

र्षयति यां कां चिदिति । अनुभवत्वस्य तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एव भेदो निविष्टः न त्वनुभवत्वत्वावच्छिन्नप्रतियोगिताकः अनुभवत्वत्वशरीरे सकलानुभवसमवेतत्वस्य निविष्टत्वात् तदवच्छिन्नभेदनिवेशनेनैवानुभवत्वज्ञानत्वादिसकलव्यापकजातिवारणसंभवे भेदप्रतियोगितावच्छेदकशरीरे अनुभवेतरासमवेतत्वनिवेशनेनान्यत्वान्तस्य ज्ञानत्वादिसाधारण्यं संपाद्य तद्वारणायानुयोगिन्यनुभवान्यासमवेतत्वरूपविशेषणान्तरप्रवेशस्य प्रक्षालनाद्धीत्यादिन्यायविषयत्वात् तद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वस्य लक्षणत्वसंभवेऽपि न क्षतिः अनुभवत्वव्याप्यताघटितपूर्वलक्षणस्यैवेदानीं निष्कर्षणात् तद्व्यक्तिपदेन प्रत्यक्षादिव्यक्तिमुपादाय उक्तशब्देन प्रत्यक्षादिलक्षणमपि संभवतीत्याशयेन प्रत्यक्षाद्यसमवेतत्वं नोपात्तमिति केचित् । तन्न तद्व्यक्तिसमवेतयत्किंचिदनुभवासमवेतधर्मसमवायित्वमित्येकशब्देन प्रमाचतुष्टयलक्षणसंभवात्तथानभिधानबीजानुयोगस्य तावताप्यपरीहारात् । धर्मसमवायित्वमिति । समवायेन *तद्वत्त्वमित्यर्थः यथाश्रुते* कालिकादिसम्बन्धेन तादृशानुमितित्वसमवायस्यातिव्याप्ततया सम्बन्धविशेषेण समवायवत्तानिवेशस्यावश्यकत्वे समवायस्यैव सम्बन्धताया उचितत्वात् । नन्वनुभवचतुष्टयसाधारणी जातिरप्रामाणिकी प्रत्यक्षत्वस्यैव विशेषणधीजन्यतावच्छेदकत्वसंभवादिति स्मृत्यन्यज्ञानत्वमेवानुभवत्वं तथा चानुभवत्वान्यत्वविशेषणमयुक्तं स्मृत्यन्यत्वविशिष्टस्यापि ज्ञानत्वस्य ज्ञानत्वानतिरिक्ततया विशेषणान्तरेण वारितत्वात् । *एवमनुभवान्यासमवेतेति* स्मरणान्यज्ञानान्यासमवेतत्यर्थकं तत्र । स्मरणभिन्नज्ञानत्वनिवेशनमनतिप्रयोजनकं ज्ञानान्यसमवेतेच्छात्वादेस्तद्व्यक्तिसमवेतत्वविशेषणेनैव वारणात् स्मरणान्यान्यत्वेन स्मृत्युपादानमपि न हि घट इत्यादिवक्तव्येऽनघट इति कश्चिद्वदतीति *न्यायेनायुक्तमित्यत आहानुभवत्वेति* । अनुभवत्वजात्यङ्गीकर्तृमते अनुभवत्वान्यत्वविशेषणस्यानुभवत्वव्यावर्तनायावश्यकतया तदनंगीकारे त्वित्युक्तम् । मूलोक्तलक्षणे चक्रवर्तिव्याख्यानमुपन्यस्यति *व्याप्तीति* । व्याप्तिज्ञानत्वावच्छिन्नेति धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नेत्य-

र्थं । विशिष्टपरामर्शत्वावच्छिन्नेति वह्निव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्ने यथा धूमो वह्निव्याप्य इत्याकारकव्याप्तिप्रकारकनिश्चयस्य करणविधया हेतुत्व तदन्यतावच्छेदक धूमलिङ्गकवह्निविधेयकानुमितित्व वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शस्य च व्यापारविधया तत्र तदन्यतावच्छेदकं च पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नविधेयताकधूमलिङ्गकानुमितित्वम् एवं च धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकीभूतोपदर्शितधर्मावच्छिन्नव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिका च या पर्वते वह्निमानित्याद्यनुमितिनिष्ठा कार्यता तादृशकार्यतासमानाधिकरणानुभवत्वव्याप्यजातिश्चानुमितित्वजातिरेव तामादाय सकलानुमितौ लक्षणसमन्वय वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधवृत्तितथाविधनिश्चयत्वावच्छिन्नविशेषणतावच्छेदकप्रकारकज्ञानीयकारणताप्रतियोगिककार्यतामादायातिप्रसङ्गवारणायावच्छिन्नान्त तथा च वह्निव्याप्तिविशिष्टावच्छिन्नपर्वतप्रकारताशालिज्ञानत्वावच्छिन्नतादृशकार्यताया धूमत्वावच्छिन्नविशेष्यकवह्निव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नत्वाभावान्न तामादायातिप्रसङ्ग वह्निव्याप्यधूमवान् पर्वत इत्येतादृशनिश्चयत्वावच्छिन्नकारणताया अपि धूमत्वावच्छिन्नविशेष्यकवह्निव्याप्तिप्रकारकतादृशनिश्चयवृत्तित्वात्तादृशकारणतानिरूपितकार्यतावच्छेदकावच्छिन्नतादृशकार्यतामादायातिप्रसङ्ग इत्यतस्तादृशनिश्चयवृत्तित्वमपहाय तादृशनिश्चयत्वावच्छिन्नत्वनिवेशन तादृशनिश्चयत्वान्यूनवृत्तित्व तदर्थं अन्यथा वह्निव्याप्यधूमवान् पर्वत इत्यादिविशेषणतावच्छेदकप्रकारकनिश्चयस्य वह्निव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन पर्वतत्वावच्छिन्नविशेषणताप्रधूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तिप्रकारताशालिनिश्चयत्वेन च विनिगमनाविरहेण हेतुत्वादधिक त्वित्यादिन्यायेन तादृशनिश्चयहेतुताया अपि तथाविधधर्मनिश्चयत्वावच्छिन्नतया तन्निरूपितकार्यतामादायातिप्रसङ्गवार

णासंभवात् तादृशनिश्चयत्वान्यूनवृत्तित्वनिवेशे च वह्निव्याप्यधूमवान् पर्वत इत्येतादृशविशेषणतावच्छेदकप्रकारकनिश्चयहेतुताया वह्निव्याप्यो धूम इत्येतादृशनिश्चयावृत्तित्वेन तादृशनिश्चयत्वन्यूनवृत्तित्वेन न दोषः । वह्निव्याप्यधूमवत्पर्वतवान् देश इत्येतादृशविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यताया अपि धूमत्वावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयत्वावच्छिन्ना या विशेषणतावच्छेदकप्रकारकनिश्चयविषया कारणता तत्प्रतियोगिकव्याप्तिविशिष्टधूमवैशिष्ट्यावगाहियोधनिष्ठकार्यतासमानाधिकरणत्वात् उक्तातिप्रसङ्गवारणासंभवेन तादृशकार्यतासामानाधिकरण्यमपहाय तदवच्छेदकावच्छिन्नत्वनिवेशनम् । एवं च तादृशव्याप्तिप्रकारकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकीभूतवह्निव्याप्यत्वविशिष्टधूमविशेषणताकबुद्धित्वेन वह्निव्याप्यत्वविशिष्टधूमावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छिन्नायाः कार्यतायाः अनवच्छिन्नत्वान्नातिप्रसङ्गः । अथैवमपि वह्निव्याप्यत्वावच्छिन्नधूमविशेषणताकबुद्धित्वावच्छिन्नजन्यतावच्छेदकघटकीभूतेन बुद्धित्वेन वह्निव्याप्यत्वविशिष्टधूमावच्छिन्नपर्वतविशेषणताकबुद्धित्वावच्छिन्नजन्यताया अवच्छिन्नत्वान्नोक्तातिप्रसङ्गवारणसंभवः न च तदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकपदस्यावच्छेदकतापर्याप्त्यधिकरणपरत्वात् नावच्छेदकैकदेशज्ञानत्वावच्छिन्नत्वमादायातिप्रसङ्ग इति वाच्यं समुदायस्य एकदेशानतिरिक्तत्वात् समुदायस्य तथात्वे एकदेशस्यातथात्वमित्यस्य शब्दमात्रत्वात् इति चेन्न तदवच्छेदकावच्छिन्नेत्यत्र तदवच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकताकत्वं विवक्षितं न्यूनाधिकपदार्थावच्छिन्नोक्तजन्यतयोरवच्छेदकत्वे च नैकधर्मावच्छिन्नपर्याप्तिके न्यूनाधिकवृत्तिभ्यां तावत्पदार्थसमुदायत्वाभ्यामेव तत्पर्याप्त्यवच्छेदादिति नातिप्रसङ्गः प्रकृते च व्याप्तिनिश्चयव्याप्यवत्तानिश्चयनिरूपितजन्यतावच्छेदककुक्षिनिविष्टपदार्थानां न्यूनाधिकभावविरहेण एकेनैव समुदायत्वेन तदुभयावच्छेदकतापर्याप्तिरवच्छिद्यते अतो नासंभवः । अथ धूमो वह्निव्याप्य इत्येतादृशव्याप्तिनिश्चयस्य धूमलिङ्गकवह्निविधेयकानुमितित्वमेव

जन्यतावच्छेदकमुपेयते न तु तत्र पक्षविषयत्वान्तर्भाव तथा सत्यनन्तपक्षभेदेन तत्कारणतावाहुल्यप्रसङ्गात् वह्निव्याप्यधूमवान् पर्वत इतिपरामर्शजन्यतावच्छेदककोटौ च पर्वतविषयता न्तर्भाव यावश्यक अन्यपक्षकानुमितौ तदहेतुत्वात् कथं तादृशजन्यतावच्छेदकत्वयोरेकपदार्थावच्छिन्नपर्याप्तिरेव न च तदवच्छेदकावच्छिन्नत्वम तदवच्छेदकयावत्पदार्थावच्छिन्नत्वमेव निवेशनीय न स्वैकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकता वत्त्व धूमो वह्निव्याप्य इतिविशेषणतावच्छेदकप्रकारकनि श्चयजन्यतावच्छेदककोटौ धूमनिष्ठविशेषणताया निवेशात्। वह्नि व्याप्यधूमवान पर्वत इति विशेषणतावच्छेदकप्रकारकनिश्चयजन्य तावच्छेदककोटौ च तन्निष्ठविशेषणतावच्छेदकताया एव नि वेशात् नैतादृशजन्यतायास्तादृशजन्यतावच्छेदकयावत्पदार्था वच्छिन्नत्वमिति नातिप्रसङ्ग प्रकृते च परामर्शजन्यतावच्छेद ककोटौ पक्षविषयत्वस्याधिकस्य निवेशेऽपि तज्जन्यताया व्या प्तिज्ञानजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वमव्याहतमेवेति ना समव इति वाच्य धूमो वह्निव्याप्य इत्येतादृशव्याप्ति निश्चयजन्यतावच्छेदककोटौ पर्वतविशेष्यतया अनिरूपित महानसादिनिष्ठविशेष्यतानिरूपितवह्निविधेयताया अपि व ह्निविधेयतात्वेन निवेशात् वह्निव्याप्यधूमवान् पर्वत इत्येतादृश परामर्शजन्यतावच्छेदककोटौ च पर्वतनिष्ठविशेष्यतानिरूपितवह्नि विधेयताया एव निवेशात् परामर्शजन्यताया व्याप्तिनिश्चय जन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्वविरहात्। एव व्याप्ति निश्चयजन्यतावच्छेदककोटौ तदव्यवहितोत्तरत्वमन्यलिङ्गकानु मितौ व्यभिचारवारणाय निवेशनीय न तु व्याप्यत्व ज्ञानाव्यवहितोत्तरत्व गौरवात् व्याप्यत्वज्ञानिश्चयजन्यता वच्छेदककोटौ न तन्निवेश तन्निवेशेऽपि धूमो वह्निव्याप्य इत्ये तादृशज्ञानकालीनान्यलिङ्गकानुमितौ व्यभिचारात् अपि तु व्याप्यत्वज्ञानिश्चयाव्यवहितोत्तरत्वमेव तथा च परामर्श जन्यताया न व्याप्तिज्ञानजन्यतावच्छेदकयावत्पदार्थावच्छिन्नत्व मिति चेन्न। करणव्यापारनिरूपितफलनिष्ठजन्यतयो प्राचीनमते एकधर्मावच्छिन्नत्वनियमादगत्या पर्वतपक्षकधूमलिङ्गकवह्निविधे

यकानुमितित्वमेव व्याप्तिज्ञानपरामर्शयोर्जन्यतावच्छेदकं वाच्यं तथा च तादृशजन्यतयोरेकधर्मावच्छिन्नपर्याप्तिनिरूपकतावच्छेदकताकत्वमक्षतमेवेति नानुपपत्तिः एतादृशनियमस्याप्रामाणिकत्वात् अयमेवास्वरसः केचिदित्यनेन सूचितः । धूमत्वावच्छिन्नधर्मिकव्याप्तिप्रकारकज्ञानीयकारणताया अपि वह्निव्याप्यधूमवान् पर्वत इत्येतादृशनिश्चयवृत्तित्वात् तत्प्रतियोगिककार्यतायास्तादृशव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नत्वमादायातिप्रसङ्गवारणाय विशिष्टपरामर्शवृत्तित्वमपहाय तदवच्छिन्नत्वनिवेशः पदान्तरव्यावृत्तिस्तु पूर्ववद्बोध्या । अत्र व्याप्यविषयकवृत्तित्वस्य निवेशेनैव विशिष्टवैशिष्ट्यबोधादिवृत्तिकार्यतामादायातिप्रसङ्गवारणं संभवति गुरुतरव्याप्तिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नत्वस्य निवेशाद्गौरवमित्यप्यस्वरसः केचिदित्यनेन सूचितः ॥

मिश्रव्याख्यानमुपन्यस्यति परे त्विति ॥

(दी०) परे तु पक्षधर्मतेत्यत्र पक्षता विशेषणं तथा च पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः यथोक्ताया विशेष्याद्यभावरूपाया वा पक्षतायाः प्रत्यक्षवारणाय परामर्शस्योपादानं तत्त्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वं च विवक्षितं तेन बाधादिकालीनेन दैवात् प्रतियोगिविषयकेन परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे तदुभयसमूहालम्बने वा नातिप्रसङ्गः । तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया च नाव्याप्तिरित्याहुः । तच्चिन्त्यम् ।

(गा०) यथाश्रुतव्याख्येयलक्षणे पक्षताजन्यत्वनिवेशान्मूलोक्तशब्दास्वरसमादायाह पक्षधर्मतेत्यत्रेति । प्रतिपाद्यकोटिनिविष्टत्वं सप्तम्यर्थः तथ पक्षतेत्यत्रान्वेति तथा च पक्षधर्मतेत्यत्र तत्पदप्रतिपाद्यकोटिनिविष्टा पक्षतेत्यर्थः तथा च पक्षपदं न धर्मिमात्रपरमपि तु पक्षताविशिष्टधर्मिपरमेवेति भावः । विशेषणमिति ज्ञानपदार्थं इत्यादिः । धर्मन्यरूपविषयविशेषणत्वेन

विषयतया ज्ञानान्वयिनि धर्मिरूपविशेष्यांशे न तस्य विशेषणत्वमसम्भव परामर्शाविषयस्य तस्य तद्विषयनिरूपणता सम्भवात् दण्डाद्यविषयकस्य पुरुषादिज्ञानस्य पुरुषादेर्दण्डादिमत्त्वेऽपि दण्डादिविशिष्टपुरुषाद्यविषयकत्वात् दण्डपुरुषाविन्त्यादिज्ञानस्य दण्डादिविषयकत्वेऽपि न तद्विशिष्टविषयकत्व विषयतावच्छेदकस्यैव विषयविशेषणत्वादत पक्षतोपलक्षितधर्मिविषयकमेव ज्ञानमिह विवक्षित तथा सत्यपि पक्षता जन्यत्वसहित परामर्शजन्यत्व जन्यान्नात् स्म्यते विशेष्यीभूत तदन्वयिना तदन्वयिनो विशेषणत्वात् ज्ञानविशेषणपक्षता या ज्ञानान्वितनम्यपदार्थजन्यतायामन्वयादित्याशयेन त थैव लक्षणार्थमाह तथा चेति । अथारुणया गवा सोम क्रीणातीत्यादौ गवादावारुण्यादे साक्षात् प्रकार तया तत्र तस्य विशेषणत्वमसम्भवेन गवादिसाध्यत्वया प्रतीयमाने सोमक्रयादौ आरुण्यादिसाध्यताप्रतीति सम्भ तीति प्रकृतस्थले तु पक्षताया ज्ञानांशे साक्षादप्रकारत्वाज्ज्ञा नान्वयिना जन्यत्वेन कथमन्वय । न चारुणयेत्यत्रापि आरुण्य गवि न साक्षात्प्रकार । अभेदसम्बन्धेनारुण्यविशिष्टाया एव तत्र साक्षात् प्रकारत्वात् तथा च परम्परया गवि प्रकारस्यापि आरुण्यस्य यथा गवान्वयिना तृतीयार्थसाध्यत्वेनान्वयस्तथा प्रकृतेऽपि ज्ञानविशेषणधर्मताया प्रकारीभूतधर्मिणि प्रकारीभव न्त्या पक्षताया ज्ञानान्वयितावच्छेदकावच्छिन्नजन्यत्वे ऽन्वय संभवतीति वाच्यम् । विशेषणविभक्तेरभेदार्थकतया अरुणाभेद स्यारुण्यपर्यवसितस्य साक्षाद्गोविशेषणत्वसम्भवात् । नैव लो हितोष्णीषा ऋत्विज प्रचरन्तीत्यादौ यथा लौहित्यस्य ऋत्वि क्प्रचरणांशे परम्परया विशेषणस्यापि तदन्वयिना इष्टसाधनत्वेना न्वयस्तथा प्रकृतेऽपि परम्परया ज्ञानविशेषणीभूतपक्षताया अपि जन्यतान्वये बाधकाभावात् । एव विशेषणविभक्ते सार्थकता मते अरुणयेत्यादावारुण्य गवि परम्परयैव प्रकार इति साक्षात् तत्प्रकारस्यैव तदन्वयिना अन्वय इति नियमाभावात् । अथ भवतु परम्परया स्वविशेष्यान्वयिनापि स्वान्वय तथापि जन्य ताया ज्ञानान्वये उपलक्षणतया भासमानविषयांशे प्रकारीभू

तायाः पक्षताया जन्यतान्वयो न संभवतीति उपलक्षणपुच्छलग्नस्य विशेषणत्वायोगात् लोहितोष्णीषा इत्यादौ लौहित्यविशेष्यीभूतोष्णीषादावपि इष्टसाधनतान्वयोपगमेन लौहित्यस्यारुणयेत्यादावारुण्यविशेष्यतद्धर्मिणोऽपि क्रयसाधनत्वान्वयोपगमेनारुण्यस्योपलक्षणपुच्छलग्नत्वाभावेन सामञ्जस्यात् प्रकृते च परामर्शविषयेऽनुमितिजनकत्वबाधेन तदन्वयायोगात् । उपलक्षणताया एव वाच्यत्वादिति चेन्न । प्रकृतेऽपि जन्यपदस्य प्रयोज्यपरतया कारणतावच्छेदकप्रविष्टविषयाणामपि अनुमितिप्रयोजकतया तेषामपि जन्यपदार्थान्वयः संभवत्येवेति सामञ्जस्यात् परामर्शादिप्रयोज्यताया लक्षणघटकत्वेऽपि परामर्शाद्यन्वयिप्रयोज्यताशरीरे जनकजनकत्वादिना या अन्यथासिद्धिस्तदनिरूपकत्वस्य निवेशेनानुमितिजन्यप्रत्यक्षादौ अतिव्याप्तिवारणसंभवात् विषयप्रयोजकतायाश्च लक्षणघटकत्वेन न विवक्षा अतो न लक्षणे व्यर्थविशेषणता । वस्तुतो ज्ञानांशे पक्षताश्रयधर्मिवृत्तिताविषयकत्वस्य साक्षात् प्रकारतया भाने पक्षताया अपि धर्मिपारतन्त्र्येण स्वाश्रयधर्मिवृत्तित्वविषयकत्वसम्बन्धेन तदंशेऽन्वयः स्वीक्रियते तथा च ज्ञानांशे परंपरासम्बन्धेन साक्षात् प्रकारीभवन्त्याः पक्षताया जन्यत्वान्वयो निराबाध एव दण्डिनं पुरुषमानयेत्यादौ अन्तरा भासमाने मत्वर्थसम्बन्धे आनयनकर्मत्वबाधेऽपि दण्डादावानयनकर्मत्वान्वयो दण्डादेरपि स्वसम्बन्धप्रभेदसम्बन्धेन पारतन्त्र्येण पुरुषादौ साक्षात्प्रकारत्वोपगमेनोपपादनीयः । यत्तु पक्षतायाः सहकृतत्वसम्बन्धेन ज्ञानविशेषणत्वात् पक्षताजन्यत्वलाभ इति तदसत् । परंपरया विशेषणस्य परंपराघटकतत्पदार्थघटितपरंपरासम्बन्धातिरिक्तसम्बन्धेनान्वये आकाङ्क्षाविरहात् अन्यथा दण्डी पुरुष इत्यादौ एककालीनत्वादिसम्बन्धेनापि पुरुषादौ पारतन्त्र्येण दण्डदण्डत्वाद्यन्वयापत्तेः । अरुणयेत्यादावारुण्यरूपधर्म एवारुणपदार्थः तत्पदोत्तरतृतीययैवारुण्यस्य क्रयसाधनत्वं बोध्यते न तु विशिष्टान्वयफललाभ इति मीमांसासिद्धान्तः । तदुक्तं तृतीयया गुणस्यैव साधनत्वं क्रयं प्रति विस्पष्टं गम्यते न तु द्रव्यद्वारैव सिध्यति हानि । आ-

विषयतया ज्ञानान्वयिनि धर्मिरूपविशेष्यांशे न तस्य विशेषणत्वसंभवः परामर्शाविषयस्य तस्य तद्विषयविशेषणत्वासंभवात् दण्डाद्यविषयकस्य पुरुषादिज्ञानस्य पुरुषादेर्दण्डादिमत्त्वेऽपि दण्डादिविशिष्टपुरुषाद्यविषयकत्वात् दण्डपुरुषाविस्यादिज्ञानस्य दण्डादिविषयकत्वेऽपि न तद्विशिष्टविषयकत्वं विषयतावच्छेदकस्यैव विषयविशेषणत्वादतः पक्षतोपलक्षितधर्मिविषयकमेव ज्ञानमिह विवक्षितं तथा सत्यपि पक्षताजन्यत्वसहितं परामर्शजन्यत्वं जन्यान्तात् लभ्यते विशेष्यीभूततदन्वयिना तदन्वयिनो विशेषणत्वात् ज्ञानविशेषणपक्षता या ज्ञानान्वितजन्यपदार्थजन्यतायामन्वयादित्याशयेन तथैव लक्षणार्थमाह तथा चेति । अथारुणया गवा सोमं क्रीणातीत्यादौ गवादावारुण्यादेः साक्षात् प्रकारतया तत्र तस्य विशेषणत्वसंभवेन गवादिसाध्यतया प्रतीयमाने सोमक्रयादौ आरुण्यादिसाध्यताप्रतीतिः संभवतीति प्रकृतस्थले तु पक्षताया ज्ञानांशे साक्षादप्रकारत्वाज्ज्ञानान्वयिना जन्यत्वेन कथमन्वयः । न चारुणयेत्यत्रापि आरुण्यं गवि न साक्षात्प्रकारः । अभेदसम्बन्धेनारुणविशिष्टाया एव तत्र साक्षात् प्रकारत्वात् तथा च परम्परया गवि प्रकारस्यापि आरुण्यस्य यथा गवान्वयिना तृतीयार्थसाध्यत्वेनान्वयस्तथा प्रकृतेऽपि ज्ञानविशेषणधर्मतायां प्रकारीभूतधर्मिणि प्रकारीभवन्त्या पक्षताया ज्ञानान्वयितावच्छेदकावच्छिन्नजन्यत्वे ऽन्वयः संभवतीति वाच्यम् । विशेषणविभक्तेरभेदार्थकतया अरुणाभेदस्यारुण्यपर्यवसितस्य साक्षाद्गोविशेषणत्वसंभवात् । नैवं लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यादौ यथा लौहित्यस्य ऋत्विक्प्रचरणांशे परम्परया विशेषणस्यापि तदन्वयिना इष्टसाधनत्वेनान्वयस्तथा प्रकृतेऽपि परम्परया ज्ञानविशेषणीभूतपक्षताया अपि जन्यतान्वये बाधकाभावात् । एवं विशेषणविभक्तेः सार्थकतामते अरुणयेत्यादावारुण्यं गवि परम्परयैव प्रकार इति साक्षात्तत्प्रकारस्यैव तदन्वयिना अन्वय इति नियमाभावात् । अथ भवतु परम्परया स्वविशेष्येऽन्वयिनापि स्वान्वयः तथापि जन्यताया ज्ञानान्वये उपलक्षणतया भासमानविषयांशे प्रकारीभू

ज्ञातुमशक्यतया न तल्लौकिकप्रत्यक्षसंभवः सिषाधयिषायोग्यतायां उत्तेजकत्वमते सुतरां तथा योग्यतायास्तत्तत्क्षणात्मकतया अयोग्यत्वादित्यत आह विशेष्याद्यभावरूपाया वेति । सिषाधयिषाभावविशेषितसिद्ध्यभावरूपाया इत्यर्थः । आदिना सिषाधयिषाभावरूपविशेषणाभावपरिग्रहः यत्र विषयविशेषे सिषाधयिषावशात् कदापि नानुमितिस्तत्र सिद्ध्यभावमात्रं पक्षता यत्र च सिषाधयिषां विना कदापि नानुमितिस्तत्र सैव पक्षतेति तयोः प्रत्यक्षस्य न दुरपवादत्वमिति भावः । न च परामर्शानुपादानेऽपि स्थलविशेषीयविशिष्टाभावरूपपक्षताजन्यत्वघटितलक्षणं संभवतीति परामर्शोपादानमनर्थकमिति वाच्यं मूलोपात्तपरामर्शजन्यत्वांशसार्थक्याय प्रत्यक्षविषयपक्षताया निवेशयितुं युक्तत्वात् परामर्शजन्यत्वं परामर्शनिष्ठजनकतानिरूपितजन्यत्वं तत्र परामर्शनिष्ठत्वस्थाने परामर्शत्वावच्छिन्नत्वं तदुभयजन्यतयोरेकावच्छेदकावच्छिन्नत्वं च निवेशयति तत्त्वेनेत्यादिना । तत्त्वेन परामर्शत्वेन पक्षताजन्यताघटकजनकतायां च, न पक्षतात्वावच्छिन्नत्वनिवेशनं प्रयोजनविरहात तदुभयजन्यत्वं पक्षतापरामर्शोभयजन्यत्वं तथा च पक्षताजन्यतावच्छेदकावच्छिन्ना या परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यता तद्वत्त्वं पर्यवसितम् । परामर्शत्वेन जनकताविवक्षायाः प्रयोजनमाह तेनेत्यादिना । अथ परामर्शसत्त्वेऽनुमितिरेव भविष्यति न तत्प्रत्यक्षम् अनुमितिसामग्र्या भिन्नविषये बलवत्त्वात्तथा च कथमतिव्याप्तिरित्याशङ्कापरिहारायाह बाधादिकालीनेनेति । आदिपदात् साध्याभावव्याप्यवत्साक्षात्प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपानुमितिप्रतिबन्धकान्तरपरिग्रहः तथा च तत्रानुमितिसामग्र्येव नास्तीति भावः । पक्षताप्रत्यक्षे परामर्शजन्यतासम्पादकं विशेषणमाह दैवात् प्रतियोगिविषयकेणेति । दैवात् कदाचित् स्वसामग्रीवशात् प्रतियोगिविषयकेण केवलसिद्धिविषयकेण तथा च वह्निव्याप्यधूमवान् पर्वतः पर्वतविशेष्यकवह्निनिश्चयश्चेतिसमूहालम्बनस्मरणोत्तरकालीनैतादृशनिर्णयाभाववानहमित्यादिप्रत्यक्षे पक्षताजन्यतावच्छेदकीभूततादृशसिद्ध्यभावप्रत्यक्षत्वावच्छिन्नायाः परामर्शनिष्ठासिद्धिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतायाश्च सत्त्वात्प्रसक्तोऽतिप्रसंग

रुण्यस्य क्रयसाधनत्व साधनतावच्छेदकतया प्रयोजकत्वमेव धूमाद्वह्निमानित्यत्र धूमपदस्य मुख्यार्थपरतैवेति मते यथा हेतु- पञ्चम्या धूमस्य कारणतायां विषयतया अवच्छेदकत्वरूपं वह्नि ज्ञानप्रयोजकत्वमेव प्रतिपाद्यते तथात्रापि हेतुतृतीयया साध- नतावच्छेदकत्वप्रत्यायनसम्भवात् । आरुण्यस्य साधनताव- च्छेदकत्वं चाश्रयनामसम्बन्धेन । तत्तु तत्र द्रव्यद्वारैवावच्छेदक त्वे लाघवं सिध्यति उपपद्यते इति तदर्थः । एवं च गो क्र- यसाधनतायां श्रुतिसिद्धायामारुण्यस्य तदवच्छेदकत्वे लाघवं तदाश्रयद्रव्यान्तरनिष्ठकारणतान्तरावच्छेदकत्वे गौरवमिति प्रति- सन्धानेन गोनिष्ठकारणतायामारुण्यस्यावच्छेदकत्वनिश्चये आ रुण्यविशिष्टगौः क्रयसाधनत्वमर्थात् प्रतीयते तादृशबोधे अ- रुणयेतिपदस्य तात्पर्याद्गुणिपरतया अरुणपदस्य गुणिपरगो- पदसमानलिङ्गतेति कारिकाभिप्रायः । तथा चेति । पक्षताया उपदर्शितविशेषणत्वे चेत्यर्थः । पक्षतासहकृतेति । प- क्षताजन्यत्वे सति परामर्शजन्यत्वमर्थः. परामर्शजन्यसाध्य- व्याप्यहेतुविशिष्टपक्षवैशिष्ट्यावगाहिबोधकतादृशपक्षाभावप्रत्यक्षादाव- तिव्याप्तिवारणाय पक्षताजन्यत्वोपादानं । परामर्शजन्यत्वोपादा- नस्य प्रयोजनमाह यथोक्ताया इति । यथोक्ताया सिषाधयिषा- विरहविशिष्टसिद्ध्यभावरूपाया । ननु तादृशाभावस्य लौकिक- प्रत्यक्षमेव न सम्भवति एकक्षणावच्छिन्नैककालमात्रवृत्तित्वरूपातीन्द्रिय क्षणघटितधर्मावच्छिन्नप्रतियोगिताकत्वात् । यदि चैककालमात्रवृत्ति- त्वमेव वैशिष्ट्यं सिषाधयिषाकालीनसिद्धौ कालान्तरावच्छेदेन स्वसमानाधिकरणसिषाधयिषाभावनिरूपिततादृशवैशिष्ट्यसत्त्वेऽपि तदानीं सिषाधयिषाविरहात्मकविशेषणाभावाधीनो विशिष्टा- भावोऽस्त्येव अन्यथा एकक्षणावच्छिन्नत्वनिवेशेऽपि तादृश- सिद्धेर्द्वितीयक्षणे सिषाधयिषाया उत्पत्तिस्वभावो वा तत्र सिषा- धयिषाभावनिरूपितवैशिष्ट्यसत्त्वेन तस्या उत्पत्तिद्वितीयक्षणे तत्क्षणे वा विशिष्टाभावासत्त्वप्रसङ्गादिति सिद्धेः सिषाधयि- षाविरहेण वैशिष्ट्यं एकक्षणावच्छेदेनैकदेशवृत्तित्वमिति यदि म- न्यते तथाप्यनुगतानुगतसिषाधयिषाभावसहस्रस्य तादृश- विशिष्टाभावप्रतियोगितावच्छेदकघटकत्वेन तस्य युगसहस्रेणापि

ज्ञातुमशक्यतया न तल्लौकिकप्रत्यक्षसंभवः सिषाधयिषायोग्यताया उत्तेजकत्वमते सुतरां तथा योग्यतायास्तत्तत्क्षणात्मकतया अयोग्यत्वादित्यत आह विशेष्याद्यभावरूपाया वेति । सिषाधयिषाभावाविशेषितासिद्ध्यभावरूपाया इत्यर्थः । आदिना सिषाधयिषाभावरूपविशेषणाभावपरिग्रहः यत्र विषयविशेषे सिषाधयिषावशात् कदापि नानुमितिस्तत्र सिद्ध्यभावमात्रं पक्षता यत्र च सिषाधयिषां विना कदापि नानुमितिस्तत्र सैव पक्षतेति तयोः प्रत्यक्षस्य न दुरुपपादत्वमिति भावः । न च परामर्शानुपादानेऽपि स्थलविशेषीयविशिष्टाभावरूपपक्षताजन्यत्वघटितलक्षणं संभवतीति परामर्शोपादानमनर्थकमिति वाच्यं मूलोपात्तपरामर्शजन्यत्वांशसार्थक्याय प्रत्यक्षविषयपक्षताया निवेशयितुं युक्तत्वात् परामर्शजन्यत्वं परामर्शनिष्ठजनकतानिरूपितजन्यत्वं तत्र परामर्शनिष्ठत्वस्थाने परामर्शत्वावच्छिन्नत्वं तदुभयजन्यतयोरेकावच्छेदकावच्छिन्नत्वं च निवेशयति तत्त्वेनेत्यादिना । तत्त्वेन परामर्शत्वेन पक्षताजन्यताघटकजनकतायां च न पक्षतात्वावच्छिन्नत्वानिवेशनं प्रयोजनविरहात तदुभयजन्यत्वं पक्षतापरामर्शोभयजन्यत्वं तथा च पक्षताजन्यतावच्छेदकावच्छिन्ना या परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यता तद्वत्त्वं पर्यवसितम । परामर्शत्वेन जनकताविवक्षायाः प्रयोजनमाह तेनेत्यादिना । अथ परामर्शसत्त्वेऽनुमितिरेव भविष्यति न तत्प्रत्यक्षम् अनुमितिसामग्र्या भिन्नविषये बलवत्त्वात्तथा च कथमतिव्याप्तिरित्याशङ्कापरिहारायाह बाधादिकालीनेनेति । आदिपदात् साध्याभावव्याप्यवत्ताज्ञानप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपानुमितिप्रतिबन्धकान्तरपरिग्रहः तथा च तत्रानुमितिसामग्र्येव नास्तीति भावः । पक्षताप्रत्यक्षे परामर्शजन्यतासम्पादकं विशेषणमाह दैवात् प्रतियोगिविषयकेणेति । दैवात् कदाचित स्वसामग्रीवशात् प्रतियोगिविषयकेण केवलसिद्धिविषयकेण तथा च वह्निव्याप्यधूमवान् पर्वतः पर्वतविशेष्यकवह्निनिश्चयश्चेतिसमूहालम्बनस्मरणोत्तरकालीनतादृशनिर्णयाभाववानहमित्यादिप्रत्यक्षे पक्षताजन्यतावच्छेदकीभूततादृशासिद्ध्यभावप्रत्यक्षत्वावच्छिन्नायाः परामर्शनिष्ठसिद्धिज्ञानस्यावच्छिन्नजनकतानिरूपितजन्यतायाश्च सत्त्वात्प्रसक्तोऽतिप्रसंग

उक्तसिद्धिज्ञानत्वावच्छिन्नजनकताया परामर्शत्वावच्छिन्नत्वविरहान्न भवतीति समुदायार्थः । एकावच्छिन्नत्वाविवक्षाया फलमाह तदुभयसमूहालम्बनेति । पक्षतापरामर्शोभयसमूहालम्बनप्रत्यक्षे चेत्यर्थः तादृशप्रत्यक्षे विषयविधया तादृशपक्षतापरामर्शयोः कारणत्वेऽपि पक्षताप्रत्यक्षत्वपरामर्शप्रत्यक्षत्वरूपभिन्नधर्मयोरेव तदुभयजन्यतावच्छेदकतया नातिव्याप्तिरिति भावः । अथ परामर्शप्रत्यक्षे परामर्शत्वेन न विषयस्य हेतुता अपि तु सामान्यतः प्रत्यक्षे विषयत्वेनैवेति प्रागेवोक्त एव च एकावच्छिन्नत्वनिवेशनमफलं न च परामर्शप्रत्यक्षस्य वह्निव्याप्यधूमवत्पर्वतं जानामीत्याकारकस्य विशिष्टवैशिष्ट्यबोधतया विशेषणतावच्छेदकीभूतवह्निव्याप्यधूमप्रकारकपक्षनिश्चयत्वरूपपरामर्शत्वेन तत्र हेतुत्वमक्षतमेवेति वाच्यं मिश्रैर्विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वानभ्युपगमात् । यत्तु ज्ञानव्याप्यसुखवदात्मभिन्नमिदं सिद्धमाववाश्चाहमित्येतादृशानुमितिमानसेऽतिव्याप्तिवारणाय तदावश्यकं तत्र साध्यव्याप्यहेतुमत्पक्षनिश्चयत्वस्य प्रतियोगितावच्छेदकप्रकारकनिश्चयत्वात्मकतया मिश्रमते तथाविधभेदप्रत्यक्षजनकतावच्छेदकत्वादिति । तन्न लौकिकमानसायोग्यवह्न्यादिव्याप्यवत्पक्षविषयकनिश्चयत्वरूपपरामर्शत्वावच्छिन्नकारणताया एव लक्षणे निवेशनीयतया ज्ञानव्याप्यसुखवदात्मरूपप्रतियोगिज्ञानमादायातिव्याप्त्यनवकाशात् तद्वृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्यानुपदमेव विवक्षणीयतयाऽव्याप्त्यनवकाशाच्चेति । नैव परामर्शप्रत्यक्षे परामर्शत्वेन हेतुताया स्वयं दूषितत्वेऽपि मिश्राभ्युपगततया तन्मते तामादाय स्वमते च उक्तविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुतामादायातिप्रसङ्गवारणाय उभयजन्यतायामेकधर्मावच्छिन्नत्वनिवेशस्यावश्यकत्वात् । यद्येकधर्मावच्छिन्नत्वं यदवच्छेदककोटिप्रविष्टैकधर्मकत्वं तदा उक्तस्थले पक्षतापरामर्शजन्यतयोः प्रत्यक्षत्वरूपैकधर्मावच्छिन्नत्वात् तद्दोषतादवस्थ्यं यदि च एकधर्मपर्याप्तावच्छेदकताकत्वं तदाऽसम्भवः यदि तल्लिङ्गपरामर्शान्यवहितोत्तरोत्पन्नानुमितित्वस्य परामर्शजन्यतावच्छेदकस्यात् पक्षताजन्यतावच्छेदककोटौ च उत्प

घटत्वान्तानिवेशात् पक्षताजन्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नपरामर्शजन्यत्वनिवेशेऽपि न निस्तारः पर्वतो वह्निमानित्यादिसिद्धिकालेऽपि नीलपर्वतो वह्निमानित्याद्यनुमित्युत्पत्त्या पर्वतत्वाद्यंशे उद्देश्यतावच्छेदकत्वपर्याप्तेः परामर्शजन्यतावच्छेदककोट्यप्रविष्टाया अधिकायाः पक्षताजन्यतावच्छेदके निवेशादिति चेन्न । पक्षताजन्यतावच्छेदकतापर्याप्त्यधिकरणघटितधर्मावच्छिन्नपरामर्शजन्यतैव निवेशनीया व्यभिचारविरहेऽपि पक्षतापरामर्शयोः सामान्यसामग्रीत्वविशेषसामग्रीत्वनिर्वाहाय पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शजन्यतावच्छेदककोटौ पर्वतत्वाद्युद्देश्यतावच्छेदकतापर्याप्तेरवश्यं निवेश्यतया उक्तदोषासम्भवात् अन्यथा पर्वतो वह्निव्याप्यधूमवान्नीलपर्वतो वह्निव्याप्यधूमवानित्यादिसमूहालम्बनजन्यायाः पर्वतो वह्निमानित्यादिसिद्धिकालीनाया नीलपर्वतो वह्निमानित्याद्यनुमितेः पर्वतो वह्निमानित्यादिसिद्ध्यभावजन्यतावच्छेदकानाक्रान्तायास्तथाविधपरामर्शजन्यतावच्छेदकाक्रान्ततया अन्यलिङ्गकनुद्धपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनुमितेस्तादृशपरामर्शजन्यतावच्छेदकानाक्रान्तायास्तथाविधसिद्ध्यभावजन्यतावच्छेदकाक्रान्ततया तत्कार्यतावच्छेदकव्याप्यव्यापकभावविरहेण सामान्यविशेषभावानुपपत्तेः अन्यथा परामर्शजन्यतावच्छेदके विषयनिवेशस्यापि निष्प्रयोजनकत्वापातात् यदि चान्यलिङ्गकेच्छाकाले सिद्धिसत्त्वे ऽनुमितिवारणाय सिद्ध्यनुत्तरत्वं तज्जन्यतावच्छेदककोटौ निवेश्यते तदा परामर्शजन्यतावच्छेदककोटावपि तादृशसिद्ध्यनुत्तरत्वं निवेशनीयम् अन्यथा सामान्यविशेषभावानुपपत्त्या परस्परसहकारित्वासम्भवादिति नानुपपत्तिरिति संक्षेपः । पक्षतात्वपरामर्शत्वयोरननुगतसाध्यादिघटिततया एकोपादानेऽन्यानुमितावव्याप्तिरित्याशङ्क्याह तद्वृत्तीति । तादृशजन्यतावच्छेदकाश्रयवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षयेत्यर्थः । नाव्याप्तिः न एकोपादानेऽन्यानुमितावव्याप्तिः । चिन्त्यमिति जन्यताया अभावाविषयकवृत्तित्वांनिवेशेनैव सकलातिव्याप्तिवारणे गुरुतरपक्षताजन्यत्वनिवेशे गौरवमेव चिन्तावीजं बोध्यम् ॥

(दी०) तत्करणमिति । न च व्याप्त्यादिज्ञानकरणत्वे-

नेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसम्बन्धेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरननुगमेऽपि अधिकृत्य भागासिद्धिवारणाप्रयोजकत्वादिति वाच्यं फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात् । करणत्वनिष्ठव्याप्तेस्तादृशव्याप्तिज्ञानत्वत्वाद्यनवच्छेद्यत्वाद्व्यतिरेकव्याप्तेर्गमकतया वैयर्थ्यञ्च ज्ञानवत्ताशङ्काचेति ॥

(गा०) तत्करणमितीति । तत्करणमनुमानमित्यत्र तत्पदेन पक्षविशेषणतापन्नहेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकं यज्ज्ञानं तज्जन्यज्ञानं परामृश्यते तेन तादृशज्ञानकरणत्वस्यानुमानलक्षणस्य लभ्यते तच्च न घटते इतरभेदानुमापकस्यैव लक्षणत्वात् । तादृशलक्षणेन इतरभेदानुमाने तद्घटकस्य हेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकज्ञानत्वस्यैवानुमापकतासम्भवेन इतरांशस्य वैयर्थ्येन तस्यानुमानेतरभेदानुमापकत्वासम्भवात् । यदि च प्रकृतहेतुतावच्छेदकघटकधर्मस्यानुमापकत्वावच्छेदकत्वसम्भव एव इतरांशस्य वैयर्थ्यम् प्रकृते च व्याप्तिज्ञानत्वस्यानुमापकत्वे व्याप्तिप्रकारकत्ववैशिष्ट्यावच्छिन्नज्ञानत्वत्वमेवानुमापकतावच्छेदकं तच्च प्रकृतहेतुतावच्छेदकीभूततादृशज्ञानकरणतात्वस्य न घटकं तच्छरीरे स्वरूपतो ज्ञानत्वस्य निवेशात् सामानाधिकरण्यरूपस्य व्याप्तिप्रकारकत्ववैशिष्ट्यस्य चानिवेशादिति मन्यते तदापि व्याप्तिज्ञानत्वावच्छिन्नस्य तादात्म्यसम्बन्धेनानुमापकत्वसम्भवात् वैयर्थ्यं दुष्परिहरमेव न च व्याप्तिज्ञानत्वं सामानाधिकरण्यसम्बन्धेन व्याप्तिप्रकारकत्वावच्छिन्नज्ञानत्वं तच्च नोक्तलक्षणघटकं तच्छरीरे ज्ञानत्वावच्छिन्न एव व्याप्तिप्रकारकत्वस्य विशेषणत्वात् इति कथं वैयर्थ्यमिति वाच्यम् उक्तलक्षणघटकयोरेकत्र द्वयमितिरीत्या ज्ञानविशेषणतापन्नव्याप्तिप्रकारकत्वज्ञानत्वयोरेव व्यासज्यवृत्तिव्याप्यतावच्छेदकत्वसम्भवेन वैयर्थ्यानुद्धारात् न च साध्यादिभेदेन विभिन्नानां व्याप्तीनामनुगतरूपेण निवेशासम्भवात् विशिष्टव्याप्तिप्रकारकज्ञानत्वमेव हेतु कार्य्यं । तथा चानु

मानमात्रस्य पक्षीकृतत्वाद्भागासिद्धिरिति व्याप्तिज्ञानत्वादेर्नानुमापकत्वसम्भवः किञ्चिद्व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्करणत्वं तु निखिलानुमानसाधारणमितिवाच्यम् । भागासिद्धिमात्रवारकविशेषणस्यापि व्यभिचारावारकतया तदन्तर्भावेन व्याप्यत्ववच्छेदकत्वविरहाद्व्यर्थतावा अनुद्धारादित्याशङ्कते न चेत्यादिना वाच्यमित्यन्तेन । इतरभेदसाधने अनुमानरूपपक्षे तदितरभेदानुमाने । गमकम् अनुमापकं । तथा चेतरांशस्य वैयर्थ्यमिति भावः । अधिकस्य व्याप्तिज्ञानभिन्नांशस्य । वारणमात्रेति मात्रपदेन व्यभिचारवारणप्रयोजनकत्वव्यवच्छेदः फलोपहितकरणस्य अनुमित्युपहितकरणस्य लक्ष्यतया इतरभेदसाधने पक्षतया व्याप्तिज्ञानत्वादेरित्यादिना तादात्म्यसम्बन्धेन व्याप्तिज्ञानपरिग्रहः । अतिप्रसक्तत्वात् पक्षातिरिक्ते अनुमित्यनुपहितव्याप्तिज्ञानेऽपि वृत्तेः तथा च व्याप्तिज्ञानत्वादेरनुमितिफलोपहितकरणरूपपक्षेतरभेदात्मकसाध्यव्यभिचारवारकत्वेनेतरांशस्य सार्थक्यमिति भावः । स्वरूपयोग्यकरणमात्रस्य लक्ष्यतामभ्युपेत्य समाधत्ते करणत्वनिष्ठव्याप्तेरिति । तादृशव्याप्तिज्ञानत्वत्वाद्यनवच्छिन्नत्वादिति व्यधिकरणत्वेनेत्यादिः तथा च तन्निष्ठतत्साध्यनिरूपितव्याप्तौ लघोरवच्छेदकस्य सम्भवे तद्घटितगुरुधर्मस्य नावच्छेदकत्वं गौरवज्ञानस्यावच्छेदकताग्रहविरोधित्वादन्यथोपपत्त्या तस्यावच्छेदकत्वे मानाभावाच्चेत्येव व्यर्थविशेषणताया दूषकताबीजं यथा वह्निमान्नीलधूमादित्यादौ प्रकृते च करणत्वनिष्ठेतरभेदव्याप्तौ व्याप्तिज्ञानत्वत्वस्य व्यधिकरणतया अवच्छेदकत्वासम्भवेन व्याप्त्यवच्छिन्नत्वनियमेनान्यथानुपपत्त्या गुरोरपि तादृशज्ञानकरणत्वस्यावच्छेदकत्वं वाच्यमिति न व्यर्थविशेषणता दोषः उक्तं च यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना प्रतीतुं न शक्यते तत्तस्य सार्थकमिति । अत एव वह्निमान् धूमप्रागभावादित्यादौ धर्मिभेदान्न वैयर्थ्यमित्यभिप्रायः । न च व्याप्तिज्ञाननिष्ठकरणत्वं न व्याप्तिज्ञानत्वावच्छिन्नमनुमितिनियतपूर्ववर्तित्वं फलानुपधायकव्याप्तिज्ञानासंग्रहात् अपि तु तन्नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव तादृशधर्मश्च व्याप्तिज्ञानत्वमेवेति तन्निष्ठव्याप्तेः कथं व्याप्तिज्ञानत्वत्वाद्यवच्छेद्यत्वासम्भव इति

नेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसम्बन्धेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरननुगमेऽपि अधिकस्य भागासिद्धिवारणाप्रयोजनकत्वादिति वाच्यं फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात् । करणत्वनिष्ठव्याप्तेस्तादृशव्याप्तिज्ञानत्वत्वाद्यनवच्छेद्यत्वाद्व्यतिरेकव्याप्तेर्गमकतया 'वैयर्थ्यशङ्कानवकाशाच्चेति ॥

(गा०) तत्करणमितीति । तत्करणमनुमानमित्यत्र तत्पदेन पक्षविशेषणतापन्नहेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकं यज्ज्ञानं तज्जन्यज्ञानं परामृश्यते तेन तादृशज्ञानकरणत्वस्यानुमानलक्षणत्वं लभ्यते तच्च न घटते इतरभेदानुमापकस्यैव लक्षणत्वात् । तादृशलक्षणेन इतरभेदानुमाने तद्घटकस्य हेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकज्ञानत्वस्यैवानुमापकतासम्भवेन इतरांशस्य वैयर्थ्येन तस्यानुमानेतरभेदानुमापकत्वासम्भवात् । यदि च प्रकृतहेतुतावच्छेदकघटकधर्मस्यानुमापकत्वावच्छेदकत्वसम्भव एव इतरांशस्य वैयर्थ्यम् प्रकृते च व्याप्तिज्ञानत्वस्यानुमापकत्वे व्याप्तिप्रकारकत्ववैशिष्ट्यावच्छिन्नज्ञानत्वत्वमेवानुमापकतावच्छेदकं तच्च प्रकृतहेतुतावच्छेदकीभूततादृशज्ञानकरणतात्वस्य न घटकं तच्छरीरे स्वरूपतो ज्ञानत्वस्य निवेशात् सामानाधिकरण्यरूपस्य व्याप्तिप्रकारकत्ववैशिष्ट्यस्य चानिवेशादिति मन्यते तदापि व्याप्तिज्ञानत्वावच्छिन्नस्य तादात्म्यसम्बन्धेनानुमापकत्वसम्भवात् वैयर्थ्यं दुष्परिहरमेव न च व्याप्तिज्ञानत्वं सामानाधिकरण्यसम्बन्धेन व्याप्तिप्रकारकत्वावच्छिन्नज्ञानत्वं तच्च नोक्तलक्षणघटकं तच्छरीरे ज्ञानत्वावच्छिन्न एव व्याप्तिप्रकारकत्वस्य विशेषणत्वात् इति कथं व्यर्थतेति वाच्यम् उक्तलक्षणघटकयोरेकत्र द्वयमितिरीत्या ज्ञानविशेषणतापन्नव्याप्तिप्रकारकत्वज्ञानत्वयोरेव व्यासज्यवृत्तिव्याप्यतावच्छेदकत्वसम्भवेन वैयर्थ्यानुद्धारात् न च साध्यादिभेदेन विभिन्नानां व्याप्तीनामनुगतरूपेण निवेशासम्भवात् किञ्चिद्व्याप्तिप्रकारकज्ञानत्वमेव हेतुः कार्यः । तथा चानु-

करणकज्ञानत्वेनेति । तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वेनेत्यर्थः यथाश्रुते विशेषणतावच्छेदकप्रकारकज्ञानकरणकविशिष्टवैशिष्ट्यबोधादावव्याप्तेः तस्यैव प्रत्यक्षलक्षणत्वादिति भावः । प्रत्यक्षमितिमध्यनिवेशे प्रत्यक्षविशेषात्मकत्वे तत्करणस्य अनुमितिकरणस्य प्रत्यक्षप्रमाणान्तर्भावः स्यादिति प्रमितिवैलक्षण्यस्यैव स्वतन्त्रप्रमाणत्वनियामकत्वादितिभावः । तत् अनुमितेर्ज्ञानाकरणकज्ञानत्वम् अत्र चानुमितेर्ज्ञानाकरणकज्ञानत्वेऽपि न प्रत्यक्षप्रमित्यन्तर्भावः अनुमिनोमि न साक्षात्करोमीत्यनुव्यवसायवलात् अनुमितौ प्रत्यक्षत्वविरुद्धानुमितित्वसिद्धेः उक्तलक्षणे च चाक्षुषवृत्तित्वादिकं जातिविशेषणमुपगम्यानुमितेर्व्यावर्तनसम्भवादित्यस्वरसः केचिदित्यनेन सूचितः ॥

(दी०) अनुमानप्रामाण्यं परीक्षितुं चार्वाकमतमुत्थापयति अथेति ।

(चि०) अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्याभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति । न । अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात् । एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात् । तयोश्च परकीययोरप्रत्यक्षत्वात् अनुमानमप्रमाणमितिवाक्यस्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च ।

(दी०) अनुमानम् अनुमानत्वेनाभिमतं धूमादिज्ञानम् असत्तर्कपात्स्युपनीतमनुमानमेव वा संवादेन संवादाभिमानेन

धार्य्यं। स्वरूपसम्बन्ध एव करणत्वमित्यभिप्रायेणैव तल्लिखनात्। वस्तुतो व्याप्तिज्ञानत्वं न निखिलव्याप्तिज्ञानवृत्तिकरणतानिष्ठव्याप्यतावच्छेदकं व्याप्तिज्ञानत्वरूपावच्छेदकघटकस्य ज्ञानविशेषणतापन्नव्याप्तिप्रकारकत्वस्यापि करणतात्मकत्वात् व्याप्तिज्ञानत्वत्वस्य तद्वृत्तित्वाऽज्ञानत्वे सति व्याप्तिप्रकारकत्वत्वस्य तादृशज्ञानत्वात्मककरणत्वावृत्तित्वात् नियतपूर्ववर्तितावच्छेदकत्वरूपकरणतात्वस्य चोभयसाधारण्येन चोभयनिष्ठव्याप्यतावच्छेदकत्वं निष्प्रत्यूहमेव व्याप्तेः साध्यादिभेदेनाननुगततयापि व्याप्तिप्रकारकत्वत्वस्य न निखिलव्याप्तिप्रकारकत्वसाधारण्यं तादृशज्ञानजन्यज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्करणत्वं तु सर्वसाधारणमेवेति नानुपपत्तिलेशोऽपि। धर्मिभेदेऽपि वैयर्थ्यमभ्युपेत्य समाधत्ते व्यतिरेकव्याप्तेरिति। लक्षणस्य केवलव्यतिरेकिहेतुतया व्यतिरेकव्याप्तिरेव प्रकृते गमकतौपयिकी तथा च साध्याभावत्वावच्छेदेन हेत्वभावव्याप्तिग्राहकतया हेतुतावच्छेदकस्य साध्यव्याप्यतानवच्छेदकत्वेऽपि न क्षतिरिति भावः।

(दी०) लिङ्गस्य नित्यत्वेऽपि अनुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवकत्वं व्यवस्थापयन्नाह तच्चेति। अनुमितेर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्षमितिमध्यनिवेशे तत्करणस्यापि प्रत्यक्षप्रमाणान्तर्भावः स्यादिति तन्निरस्यति तच्चेतीत्यपि केचित्।

(गा०) अथ प्रत्यक्षोपजीवकत्वादिति यदुक्तं तत्र घटले ज्ञायमानधूमादेरनुमितिकरणतया तस्य प्रत्यक्षानुपजीवकत्वात् धूमादेरदृष्टद्वारा प्रवृत्तिजनकभूतोपादानप्रत्यक्षोपजीवकत्वेऽपि नित्यहेतोस्तथात्वेनानुमानत्वावच्छेदेन तथात्वानुपपत्तेः अनुमानसामान्यस्यैव निरूपणीयतया ऽनुमानत्वावच्छेदेनोपजीवकत्वस्य ज्ञानाद्येव तदुपपत्तिपर्यवसानादित्याशङ्कोद्धारपरतया तच्चेत्यादिमूलमवतारयति लिङ्गस्येत्यादिना। स्वरूपत अनुमितिकरणत्वाप्यन्वयेन। अन्ये तु अनुमानस्य प्रत्यक्षान्तर्भावशङ्कापरिहारकतया तादृशग्रन्थमवतारयन्ति तन्मतमाह अनुमितेरिति। ज्ञाना-

करणकज्ञानत्वेनेति । तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वे-नेत्यर्थः यथाश्रुते विशेषणतावच्छेदकप्रकारकज्ञानकरणकविशिष्ट-वैशिष्ट्यबोधादावव्याप्तेः तस्यैव प्रत्यक्षलक्षणत्वादिति भावः । प्रत्य-क्षमितिमध्यनिवेशे प्रत्यक्षविशेषात्मकत्वे तत्करणस्य अनुमि-तिकरणस्य प्रत्यक्षप्रमाणान्तर्भावः स्यादिति प्रमितिवैलक्षण्य-स्यैव स्वतन्त्रप्रमाणत्वनियामकत्वादितिभावः । तत् अनुमितेर्ज्ञा-नाकरणकज्ञानत्वम् अत्र चानुमितेर्ज्ञानाकरणकज्ञानत्वेऽपि न प्रत्यक्ष-प्रमित्यन्तर्भावः अनुमिनोमि न साक्षात्करोमीत्यनुव्यवसायव-त्वात् अनुमितौ प्रत्यक्षत्वविरुद्धानुमितित्वसिद्धेः उक्तलक्षणे च चाक्षुषवृत्तित्वादिकं जातिविशेषणमुपगम्यानुमितेर्व्यावर्तनसम्भवा-दित्यस्वरसः केचिदित्यनेन सूचितः ॥

(दी०) अनुमानप्रामाण्यं परीक्षितुं चार्वाकमतमुत्थापय-ति अथेति ।

(चि०) अथानुमानं न प्रमाणं योग्योपाधी-नां योग्यानुपलब्ध्याभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्य-भिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्या-दिव्यवहारश्च सम्भावनामात्रात् संवादेन च प्रा-माण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति । न । अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानु-मानत्वात् । एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात् । तयोश्च परकीययोरप्रत्यक्षत्वात् अ-नुमानमप्रमाणमितिवाक्यस्य प्रामाण्याप्रामाण्ययोर्व्या-घाताच ।

(दी०) अनुमानम् अनुमानत्वेनाभिमतं धूमादिज्ञानम् असदुपायोपनीतमनुमानमेव वा संवादेन संवादाभिमानेन

सम्भावितस्यासतो ऽनुगताकारस्य परमार्थसत्स्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखात् अध्यक्षमूलकविकल्पोल्लिखितत्वाद्वा संवादः अनुमानाप्रामाण्ये च तन्मूलकसमयनिर्णयाद्यधीनप्रवृत्तिकयोः शब्दोपमानयोः सुतरामप्रामाण्यान्नाप्रत्यक्षं प्रमाणमित्याह इतीत्यादि । अप्रमाणसाधर्म्येण प्रमाणताप्रयोजकरूपशून्यत्वेन दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य वा । नन्वभिहितमेव साधर्म्यदर्शनं सम्भावना भावयति संभावनैव च बहुशो व्यवहारहेतुरित्यत आह अनुमानमिति ।

(गा०) परीक्षितु परमत निराकृत्य व्यवस्थापयितुम् अनुमित्यात्मकप्रमितेश्चार्वाकेनानभ्युपगमात् तत्करणत्वरूपानुमानत्वावच्छिन्ने तेषामप्रामाण्यसाधन न सम्भवति अतो ऽनुमानपदमन्यथा व्याचष्टे अनुमानमिति । अभिमतमित्यस्य परैरित्यादि धूमादिज्ञान धूमादिज्ञानत्वावच्छिन्नम् अनुमानम् अनुमानपदार्थ इत्यर्थ तथा च धूमादिज्ञानत्वेनैव पक्षतेति नानुपपत्तिरिति भाव । अनुमानपदाद्धूमादिज्ञानत्वादिना बोधो लक्षणयैवेत्यभिप्रेत्य मुख्यार्थपरतामपि सङ्गमयति असदिति । ख्याति ज्ञानम् उपनीत विषयीकृतम् अनुमानमेव वा अनुमितिकरणत्वावच्छिन्नमेव वा अनुमानपदार्थं इत्यनुषज्यते तन्मते अलीक एव, पदानां शक्तिर्न तु पारमार्थिके सदसत्सम्बन्धाभावेन तत्र पदप्रवृत्तिनिमित्तीभूतानुगताकारासम्बन्धात् अनुगताकारस्य गोत्वादेर तद्व्यावृत्त्यात्मकत्वेनाभावरूपतया ऽलीकत्वात् असतोऽप्यनुमिति करणत्वावच्छिन्नस्य तन्मते अनुमानपदार्थतेति बोध्यम् । एव च चार्वाकैरनुमित्यनभ्युपगमेऽपि असत्ख्यातिस्वीकर्तॄणां तेषा मते अनुमितिकरणत्वावच्छिन्ने अप्रामाण्यसाधने नाश्रयाज्ञानरूपदोष इति भाव । ननु लिङ्गज्ञानस्य पर्वतो वह्निमानित्याद्यनुमित्यजनकत्वे लिङ्गपरामर्शानन्तर वह्न्यर्थिन पर्वतगमनप्रवृत्त्यनुपपत्ति पर्वतादौ वह्न्यादिनिश्चय विना तद्गमने वह्निप्राप्तिसाधनतावच्छेदकवह्निमद्देशगमनत्वनिश्चयायोगादित्याशङ्कां परि

इति मूले लोक इति सम्भावनामात्रादिति । यद्यपि लिङ्गदर्शनेन स्मारितसाध्यस्य मानसनिश्चयोपगमेनाप्यनुमानस्याप्रामाण्यमायाति तथापि सर्वत्र व्यभिचारसंशयसम्भवेन व्याप्तिनिश्चयस्तावन्न सम्भवतीत्याशयेन सम्भावनादरः । न च यत्र संशये कोटिद्वयांशे तुल्यता विपरीतकोट्यंशे चौत्कट्यं ततः प्रवृत्त्यादिवारणाय तदभावाप्रकारकत्वस्य तत्प्रकारकज्ञानकरणतायामवश्यं निवेशनीयतया कथं सम्भावनातः प्रवृत्त्यादिकार्यनिर्वाहः।तत्कोट्यंशे औत्कट्यरहिततदभावप्रकारकान्यत्वस्य तत्कोटिकसम्भावनासाधारणस्य कारणतावच्छेदकत्वे च गौरवमिति वाच्यम् । अगत्या गौरवस्यादोषत्वात् । वस्तुतस्तु तन्मतेऽनुगतधर्मस्यालीकतया सर्वत्राव्यवहितपूर्वापरीभावापन्नतत्तद्व्यक्त्योरेव हेतुहेतुमद्भावसम्भवः तत्र च तदभावाप्रकारकत्वस्य निवेशो नास्त्येवेति तत्त्वम् । ननु सम्भावनायाः प्रमाणान्तरगृहीतग्राहित्वरूपसम्वादेन प्रमितित्वसिद्ध्या तत्करणस्य धूमादिज्ञानस्य प्रमाणत्वं सेत्स्यतीत्यत आह मूले सम्वादेन चेति। वक्ष्यमाणयुक्त्या प्रमाणान्तरगृहीतग्राहित्वरूपसम्वादस्य तन्मते सम्भावनायामसत्त्वेन संवादेन प्रामाण्याभिमानादित्यसङ्गतमतो व्याचष्टे संवादेनेति । यथाश्रुतत्यागे बीजमाह सम्भावितस्येति । सम्भावितस्य सम्भावनाविषयस्यानुगताकारस्य वह्नेरध्यक्षेण प्रत्यक्षप्रमित्या अनुल्लेखात् अविषयीकरणादित्यर्थः । अनुगताकारस्य प्रमित्यविषयतासम्पादकं विशेषणमाह असत इति । वह्नित्वादेरतद्व्यावृत्तिरूपतया अलीकत्वं बोध्यम् । अध्यक्षस्यालीकाविषयत्वसम्पादकं विशेषणमाह परमार्थसत्स्वलक्षणसाक्षिणेति । परमार्थसन् पारमार्थिको लक्षणः स्वतो व्यावृत्तो वह्न्यादिस्तन्मात्रविषयकेनेत्यर्थः । वह्नित्वादेरनुगताकारस्य पारमार्थिके वह्न्यादावसत्त्वेन तस्य कथमितरव्यावृत्तिः व्यावर्त्तकधर्मादर्शनादित्याशङ्कापरिहाराय स्वलक्षणेत्युक्तं तथा च न सम्भावनायाः प्रमित्यन्तरविषयकत्वरूपसम्वाद इति भावः । न चाध्यक्षस्य सम्भावनाविषयानुगताकाराविषयत्वेऽपि अध्यक्षविषयवह्न्यादिविषयकत्वेन सम्भावनायाः सम्वादित्वमक्षतमिति वाच्यं सदसतोरेकज्ञानाविषयतया अनुगताकारविषयिण्या विशिष्टबुद्धेः पारमार्थिकवह्न्यादि-

विषयकत्वासम्भवात् अनुगताकारवह्नित्वादिसम्बन्ध्यलीकव-ह्नयादेरेव विशिष्टधीविषयत्वात् भ्रमस्यासन्मात्रविषयकत्वेन स-द्घटितस्य प्रमित्यन्तरविषयकत्वरूपसम्वादस्याभिमानो न भव-तीत्यत आहाध्यक्षमूलकेति । सम्भावितस्येत्यनुपज्यते विकल्पो-ल्लिखितत्वात् तद्विषयकत्वात् । अनादिवासनामूलकशशविषाणा-दिविकल्पव्यावर्त्तनायाध्यक्षमूलकेति । सम्वादः सम्भावनाया इति शेषः तथा चाध्यक्षमूलकविकल्पोल्लिखितविषयत्वमेव सम्भावनानि-ष्ठसंवादः स एव प्रामाण्याभिमानप्रयोजकतया मूलकृतोक्त इति भावः। योग्योपाधीनामित्यादिग्रन्थेनानुमानाप्रामाण्य एव हेतु-कथनादिति नाप्रत्यक्षं प्रमाणमित्यनुमानोपमानशब्दानां त्रयाणा-मप्रामाण्योपसंहारो न घटते इत्याशङ्कां परिजिहीर्षु-रनुमानाप्रामाण्यसाधकहेतोरेवोपमानशब्दयोरप्रामाण्यसम्पादकहे-तुपरतां दर्शयति तन्मूलकसमयनिर्णयाधीनप्रवृत्तिक्रियो-रिति । तन्मूलोऽनुमाननिर्णयाधीनो यः समयनिर्ण-यादिः शक्तिनिर्णयादिः तदधीनप्रवृत्तिक्रययोः तादृशसहका-रिसमवधानाधीनप्रमारूपफलोपधानकयोरित्यर्थः । आदि-पदात्तात्पर्यनिर्णयादिपरिग्रहः समयादिसम्भावनात एव शा-ब्दादिप्रमा भविष्यतीत्यादिशङ्कापरिहाराय निश्चयेत्युक्तं न चैवमनुमानं न प्रमाणमित्यनेनानुमानाप्रामाण्यमात्रस्य प्रक्रान्ततया त्रयाणामप्रामाण्योपसंहारविरोध इति वाच्यम् अनुमानमप्रमाणमितिवाक्यस्य त्रितयाप्रामाण्य एव ता-त्पर्यात् अप्रामाण्यसाधने ऽप्रमाणसाधर्म्यस्य यथाश्रुतस्य हेतु-ता न घटते प्रमाणेऽपि यत्किञ्चिद्रूपेणाप्रमाणघटादिसाधर्म्य-सत्वादित्याशङ्कोद्धाराय प्रमाणतावच्छेदकरूपशून्यत्वधर्मेण साधर्म्यं विवक्षितं तथा च प्रमाणताप्रयोजकरूपशून्यत्वमेव पर्यवसितो हेतुरित्यभिसन्धायाह अप्रमाणेति। अयं च प्रसाध्याङ्को हेतुः नै-यायिकमते व्याप्तिनिश्चयत्वरूपप्रमाणताप्रयोजकरूपस्यानुमाने स-त्त्वादिति अत एव पूर्वं मणिकृतोऽस्यैव तद्धेतोः सिद्ध्यर्थं योग्योपाधीनामित्यादिग्रन्थेन सर्वत्र व्यभिचारसंशयसामग्रीस-त्त्वमभिधाय व्याप्तिनिश्चयस्यैव दुर्घटत्वेन व्यभिचाराप्रकारकत्वे सति व्याप्तिप्रकारकज्ञानत्वरूपस्य व्याप्तिनिश्चयत्वस्याप्र-

सिद्धिः सूचिता। एवं चानुमानमप्रमाणं प्रमितिकरणतावच्छेदकरूपशून्यत्वादिति प्रथमतश्चार्वाकैः प्रयुज्यते तत्र च व्याप्तिनिश्चयत्वात्मकतादृशरूपस्यानुमाने सत्त्वाद्धेतुरयमस्माकमसिद्ध इति नैयायिकैरसिद्ध्युद्भाविततायां व्याप्तिज्ञानत्वं व्यभिचाराप्रकारकत्वासमानाधिकरणं स्वावच्छिन्नोत्पत्त्यव्यवहितप्राक्क्षणव्यापकव्यभिचारप्रकारकज्ञानसामग्रीकज्ञानमात्रधर्मत्वादिति तैरुद्भावनीयं तावता च निरुक्तनिश्चयत्वग्रहप्रतिबन्धाच्चादृशनिश्चयत्वस्य प्रमाकरणतावच्छेदकत्वसन्देहाधीनासिद्धिसन्देहनिवृत्तिरिति ध्येयम्। हेत्वयत्नातीतत्वमविवक्षितं तथा च ज्ञायमानेत्यर्थः एतच्च ज्ञायमानलिङ्गकरणतामते एवोपपद्यते अतः स्वमताभिप्रायेण पूरयति साधर्म्यदर्शनस्य चेति। अभिहितमित्यत्र हेतुरित्यनन्तरोक्तातिपदोपस्थाप्यप्रकृतवाक्यार्थः कर्मत्वेनान्वेति संभावनैव परकीयसंशयादिविषयकसंभावनैव व्यवहारहेतुः अनुमानं न प्रमाणमिति शब्दप्रयोगप्रयोजक इत्यर्थः तथा च परकीयसन्देहविपर्ययज्ञानस्य तन्निवृत्तिसाधनतारूपेष्टसाधनताज्ञानसम्पादकतया तादृशशब्दप्रयोगप्रयोजकत्वोपपादनाय नानुमानप्रामाण्यमिति भावः। इदमुपलक्षणं अन्यस्थले ऽवयवप्रयोगेन मध्यस्थस्य परिगृहीतकोटिविषयकसंभावनासम्पादकतयैव वादिजय इति बोध्यं तेन हेतुज्ञानान्मध्यस्थानुमितेरवश्याभ्युपेयतया अनुमानप्रामाण्यं निर्वहतीति प्रागुक्तदूषणमप्युद्धृतं भवतीति ध्येयम्॥

अनुमानमप्रमाणमिति वाक्यस्याप्रामाण्योपगमे ऽप्रामाण्यस्य भ्रमजनकत्वरूपतया ऽनुमानस्य प्रामाण्यापातात् अप्रामाण्याभावरति अप्रामाण्यप्रकारकत्वरूपस्य तज्जन्यज्ञानभ्रमत्वस्य विशेष्यांशे प्रामाण्यस्यानिर्वाहकत्वात् इति मूलोक्तव्याघातमुद्धरति नन्वित्यादिना॥

(दी०) ननु न वयमापाततो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो येन भ्रमस्य विषयबाधाधीनतया प्रामाण्यं संभाव्येतापि परं तु प्रमाकरणत्वव्यतिरेकमत आह अनि चेति।

(चि०) अपि चानुमानाप्रामाण्ये प्रत्यक्षस्या-प्यप्रमाणतापत्तेः प्रामाण्यस्यानुमेयत्वात् स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः । व्याप्तिग्रहोपायश्च वक्ष्यते ।

(दी०) स्वत इति । न चानुगताकारासंस्पर्शिनि परमार्थसत्स्वलक्षणसाक्षिणि स्वसंवेदनसंविदितप्रामाण्ये निर्विकल्पकज्ञानेनाप्रामाण्यं संदिह्यते परं तु तदुत्तरभाविनि समुल्लिखितालीकानुगताकारे सविकल्पक एवेति वाच्यं निर्विकल्पकस्य सन्मात्रावलम्बनस्य स्वविषयत्वप्रामाण्यावगाहित्वानामनुमानाधीनसिद्धिकत्वात् । सर्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु न संभवत्युपायाभावात् इत्यत आह व्याप्तीति ।

आपातत इति यावदसद्विषयकत्वस्य भ्रमत्वरूपत्व न व्यवस्थापित तावदित्यर्थः । तस्य भ्रमत्वरूपत्वे तस्य प्रामाण्य घद्विशेष्यकत्व विनाप्युपपत्तेरनुमानप्रामाण्यानापादकत्वादिति भाव. । निरूपयाम अभ्युपगच्छाम विषयबाधाधीनतया विशेष्यतासम्बन्धेन विषयबाधव्याप्यतया सभाव्येत आपाद्येत प्रमाकरणत्वव्यतिरेकमिति निरूपयाम इत्यनुषज्यते । तथा च प्रमाकरणत्वतदभावयोरेव तृतीयपक्षो न सम्भवतीति अन्यतराभ्युपगम आवश्यक । न तु प्रमाकरणत्वभ्रमकरणत्वयोरपीति । तदुभयमेव नाभ्युपेयते शब्दस्य विशिष्टज्ञानाजनकत्वेऽपि पदार्थोपस्थितिद्वारा मानसविशिष्टज्ञानप्रयोजकत्वात् । परमात परत्यर्थं शब्दप्रयोग उपपद्यते मानस च ज्ञान निश्चय सभावना वेत्यन्यदेतदिनिभाव । स्वत प्रामाण्यग्रहे तत्संशयानुपपत्तिरूपमूलोनबाधकमुद्धरति न चेत्यादिना । अप्रामाण्यतदभावसपादकहेत्वन्तरसूचक निर्विकल्पकविशेषणमाद्यानुगताकारेत्यादिना । अनुगताकारासस्पर्शिनि वह्नित्वाद्यविषयके एतेन निर्विकल्पक प्रामाण्यसशयसम्पादकानुगताकारविषयकस्यरूपाप्रामाण्यसहचारिधर्माभाव सूचित । परमार्थसत्स्य

लक्षणसाक्षिणि सन्मात्रविषयके एतेन संशयविरोधिसन्मात्रविषयकत्वरूपाप्रामाण्यव्यावर्तकदर्शनं सूचितम् । स्वसंवेदनेति स्वात्मकं यत्संवेदनं ज्ञानं तेन संवेदितं प्रामाण्यं यत्र तज्ज्ञेत्यर्थः । निर्विकल्पकस्य स्वांशे प्रामाण्यावगाहिनाप्याः स्वतः प्रामाण्येत्यादिपङ्क्त्यवतारार्थं प्रागेवाशङ्कितत्वेऽपि पुनरभिधानं निर्विकल्पकस्यैव तथात्वं न तु सविकल्पकस्येति सविकल्पके प्रामाण्यसंशयसम्पादकतत्सिद्धान्तसम्पादनाय । नन्वेवं प्रत्यक्षप्रमायाः प्रामाण्यं सन्दिह्यते इत्यनुभवः कथमुपपद्यतामित्यत आह तदुत्तरभाविनीति । निर्विकल्पकाव्यवहितोत्तरभाविनीत्यर्थः । तथा च निर्विकल्पकस्य सविकल्पकादिसान्निध्यात्मकदोषात् भ्रमात्मकस्तादृशानुभव इति भावः। एवं चाध्यक्षस्य स्वतः प्रामाण्यग्रहेऽपि न प्रामाण्यसंशयानुपपत्तिः प्रामाण्यग्रहस्य भिन्नधर्मिकतया ऽविरोधित्वादिति नानुमानप्रामाण्यसिद्धिरिति न वाच्यमिति समुदिततात्पर्यार्थः । निर्विकल्पकस्येति अनुमानाधीनसिद्धिकत्वात् तन्मात्राधीनव्यवस्थितिकत्वादित्यर्थः । तन्मते निर्विकल्पकस्य स्वप्रकाशतया अनुव्यवसायाभावेन स्वस्य स्वनिष्ठस्वविषयकत्वाद्यवगाहित्वोपगमे विषयानवस्थाप्रसङ्गेन संभावनायाश्चाप्रमात्वेन तद्व्यवस्थापकप्रमाणाभावादितिभावः । सर्वमिदं अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनं व्याप्तिनिश्चये सतीत्यन्वयः ।। स एव व्याप्तिनिश्चय एव न संभवति नोत्पत्तुमर्हति उपायाभावात् निश्चायकाभावात् ॥

इति महामहोपाध्याय गदाधरभट्टाचार्यविरचिता

अनुमितिविवृतिः सः

अनुमानगादाधर्याम्

व्याप्तिपञ्चकप्रकरणम् ।

(दी०) समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना ।

(चि०) नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वं साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात् ॥

(गा०) अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् वक्ष्यत इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपबीजं दर्शयन् नन्वित्यादिग्रन्थमवतारयति समारब्धेति । व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्यानिष्पन्नत्वात् समारब्धेति परीक्षाविशेषणम् । परीक्षा परमतनिराकरणपूर्वकस्वमतव्यवस्थापनं कारणीभूतेति प्रतिपादनविशेषणम् । यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय व्याप्तिग्रहोपायश्च वक्ष्यते इत्येतद्ग्रन्थावतारणात् व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात् तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायस्येदानीमाकाङ्क्षितत्वम् । एवमपि तत्र व्याप्तिस्वरूपनिरूपणं विना

अनुमानगादाधर्याम्

व्याप्तिपञ्चकप्रकरणम् ।

(दी०) समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना ।

(चि०) नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वं साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात् ॥

(गा०) अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् वक्ष्यत इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपबीजं दर्शयन् नन्वित्यादिग्रन्थमवतारयति समारब्धेति । व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्यानिष्पन्नत्वात् समारब्धेति परीक्षाविशेषणम् । परीक्षा परमतनिराकरणपूर्वकस्वमतव्यवस्थापनं कारणीभूतेति प्रतिपादनविशेषणम् । यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय व्याप्तिग्रहोपायश्च वक्ष्यते इत्येतद्ग्रन्थावतारणात् व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात् तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायस्येदानीमाकाङ्क्षितत्वम् । एवमपि तत्र व्याप्तिस्वरूपनिरूपणं विना

समवर्तीति प्रथमत एव तदेवोचितमित्येतत्सूचनायैतदभिहितम् । निदानमिति । व्याप्तिघटकीभूताव्यभिचारांशमाने या धाभावमुद्रया व्यभिचारज्ञानाभावो हेतु । साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकाग्रह च विशेषणज्ञानमुद्रया सहचारग्रहो हेतुरितिनमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रतिपाद्यासम्भवादितिभाव । प्रथमत पूर्वपक्षस्यैवाभिधानम निरूपयतीत्यसङ्गतम्त आरभ्य इत्युक्त निरूपणस्य परमतनिराकरणपूर्वकस्वसिद्धान्तकथनरूपतया पूर्वपक्षाभिधान तत्खण्डनयोरपि तदारम्भतेतिध्येयम् । मूले न तावदव्यभिचरितत्वमिति । व्याप्तिरिति प्रदनस्थमनुषज्यते । तथा चाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थ । अनुमितिजनकत्व न अव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नमिति तु पर्यवसितम् । अत्र हेतुमाह तद्धि न साध्याभाववदवृत्तित्वमित्यादि । यत साध्याभाववदवृत्तित्वादिरूपतदव्यभिचरितत्व न व्याप्तिरित्यनुषङ्गेणान्वय । तथा च साध्याभाववदवृत्तित्वादिरूपा ये ये अव्यभिचारपदार्थास्तत्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावकूटस्यादिति निरुक्तपर्यवसितसामान्याभावसाधक फलिता हेतु । न चाप्रयोजकत्व विशेषाभावकूटस्य सामान्याभावव्याप्यतायाविरहात् । अत्र साध्याभाववदवृत्तित्वादिरूपा ये पञ्चाव्यभिचारपदार्थास्तदवच्छिन्नविषयताघटितधर्मावच्छिन्नत्वकूटस्य प्रत्यक्षसाधक हेतु वक्ष्यति केवलान्वयिन्यभावादिति । साध्ये अत्यन्ताभावप्रतियोगित्वान्योन्याभावप्रतियोगितावच्छेदकत्वरूपकेवलान्वयित्वग्रहदशायामत्यन्तान्योन्याभावयो साध्यतदवच्छिन्नप्रतियोगिकत्वमानासम्भवेन प्रतियोगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वाद्यवच्छिन्नविषयतायास्तादृशदशाविशेषीयानुमितिजनकज्ञाने अभावादित्यर्थ । एवञ्च तादृशविषयताशून्यवृत्तित्वमेव अनुमितिजनकतायां दर्शितसाध्यभावको हेतुरभिमत इति नासिद्ध्यादि । ईदृशादिशा अग्रिमाग्रिमहेतवोऽपि परिष्करणीया । दीधितौ अव्याप्येति । कपिसयोगी एतद्वृक्षत्वादित्यादावित्यर्थ । अव्याप्तिरिति

तत्र हेत्वधिकरणे तद्वृक्षादावप्यन्यदेशकालावच्छेदेन कपिसंयोगाद्यभाववत्त्वादिति भावः । साध्यवद्भिन्नो यः साध्याभाववान् इति कर्मधारये अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं तद्वृत्तित्वमित्यर्थः स्यात्तथा सति तद्घटकीभूतस्य अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्तद्वृत्तित्वस्यैव लक्षणत्वसंभवात् साध्याभावत्त्वांशस्य वैयर्थ्यमतः सप्तमीतत्पुरुषं व्याचष्टे साध्यवद्भिन्न इति । तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वद्वृत्तित्वमर्थः तत्र पूर्ववदभेदेन साध्यवद्भिन्नपदार्थविशेषितधर्मिवृत्तित्वादेर्न घटकता तादृशपदार्थस्य धर्मिण्यविशेषणत्वात् वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावांशवैयर्थ्यमिति भावः । अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसंभव इति तद्वारणाय साध्यपदसार्थक्यं न चाधिकरणभेदेनाभावभेदमत एवैतल्लक्षणकरणात्पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम् अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्यादिरूपविरुद्धधर्माध्यासेन भेदस्य लक्षणकर्तृसंमतत्वात् आकाशाभावादेर्भेदकाभावेन तस्यैक्यात् अत एवोक्तधर्माणां भेदकत्वमेतानि च न भेदकानीत्यनेन दीधितिकृन्निराकरिष्यति । अथ वा साध्याभावपदम् अनुयोगिताविशेषसम्बन्धेन साध्यीयपरम् अभावीयविलक्षणानुयोगितालाभायैवाभावपदं न त्वभावत्वमपि निवेश्यते प्रयोजनाभावात् इत्थं च साध्यवद्भिन्नवृत्तिर्यस्तादृशविलक्षणसम्बन्धेन साध्यीयस्तद्वद्वृत्तित्वमर्थः तत्र च साध्यस्य यत्पदार्थविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति हेतोर्वृत्तेरसंभवः स्यादिति तन्निवेशः । अत्र च साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमवति सत्त्वेन पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठस्य द्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेनाव्याप्त्यापत्तेः । साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया अन्यथा ह्रदादिवृत्तिसमवायादिसम्बन्धावच्छिन्नप्रतियोगिता-

समवर्तीति प्रथमत एव तदेवोचितमित्येतत्सूचनायैतदभिहितम् । निदानमिति । व्याप्तिघटकीभूताव्यभिचाराद्यभावे वा धाभावबुद्ध्या व्यभिचारज्ञानाभावो हेतुः । साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकाद्यग्रहश्च विशेषणज्ञानमुद्रया सहचारग्रहो हेतुरितिक्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपप्रतिपाद्यादानन्तर्यादितिभावः । प्रथमतः पूर्वपक्षस्यैवाभिधानेन निरूपयतीत्यसङ्गतमत आरमत इत्युक्तं निरूपणस्य परमतनिराकरणपूर्वकस्वसिद्धान्तकथनरूपतया पूर्वपक्षाभिधानतत्खण्डनयोरपि तदारम्भतेति ध्येयम् । मूले न तावदव्यभिचरितत्वमिति । व्याप्तिरिति प्रदनस्थमनुषज्यते । तथा चाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थः । अनुमितिजनकत्वं न अव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नमिति तु पर्यवसितम् । अत्र हेतुमाह तद्धि न साध्याभाववदवृत्तित्वमित्यादि । यत साध्याभाववदवृत्तित्वादिरूपतदव्यभिचरितत्वं न व्याप्तिरित्यनुपङ्गेणान्वयः । तथा च साध्याभाववदवृत्तित्वादिरूपा ये ये अव्यभिचारपदार्थास्तत्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नाभावकूटवत्त्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः । न चाप्रयोजकत्वं विशेषाभावकूटस्य सामान्याभावव्याप्यतायाविघातात् । अत्र साध्याभाववदवृत्तित्वादिरूपा ये पञ्चाव्यभिचारपदार्थास्तदवच्छिन्नविषयताघटितधर्मानवच्छिन्नत्वकूटस्य प्रयकसाधकः हेतुः वक्ष्यति केवलान्वयिन्यभावादिति । साध्ये अत्यन्ताभावप्रतियोगितान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहदशायामत्यन्तान्योन्याभावयोः साध्यतदवच्छिन्नप्रतियोगिकत्वमानासम्भवेन प्रतियोगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वत्वावच्छिन्नविषयतायास्तादृशदशाविशेषीयानुमितिजनकज्ञाने अभावादित्यर्थः । एवं च तादृशविषयताशून्यवृत्तित्वमेव अनुमितिजनकतायां दर्शितसाध्यसाधको हेतुरभिमत इति नासिद्ध्यादि । ईदृशादिशा अग्रिमाग्रिमहेतवोऽपि परिष्करणीया । दीधितौ अव्याप्येति । कपिसंयोगी एतत्त्वादित्यादावित्यर्थः । अव्याप्तिरिति

तेन हेत्वधिकरणे तद्वृक्षादावप्यन्यदेशकालाद्यवच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः । साध्यवद्भिन्नो यः साध्याभाववान् इति कर्मधारये अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं तद्वृत्तित्वमित्यर्थः स्यात्तथा सति तद्घटकीभूतस्य अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्तद्वृत्तित्वस्यैव लक्षणत्वसंभवात् साध्याभाववत्त्वांशस्य वैयर्थ्यमतः सप्तम्यन्तरूपं व्याचष्टे साध्यवद्भिन्न इति । तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वद्वृत्तित्वमर्थः तत्र पूर्ववदभेदेन साध्यवद्भिन्नपदार्थविशेषितयावृत्तित्वादेर्न घटकता तादृशपदार्थस्य धर्मिण्यविशेषणत्वात् वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावांशवैयर्थ्यमिति भावः । अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसंभव इति तद्वारणाय साध्यपदसार्थक्यं न चाधिकरणभेदेनाभावभेदमत एवैतल्लक्षणकरणात्पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम् अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासेन भेदस्य लक्षणकर्तृसंमतत्वात् आकाशाभावादेर्भेदकाभावेन तस्यैक्यात् अत एवोक्तधर्माणां भेदकत्वमेतानि च न भेदकानीत्यनेन दीधितिकृन्निराकरिष्यति । अथ वा साध्याभावपदम् अनुयोगिताविशेषसम्बन्धेन साध्यीयपरम् अभावीयविलक्षणानुयोगितालाभायैवाभावपदं न त्वभावत्वमपि निवेश्यते प्रयोजनाभावात् इत्थं च साध्यवद्भिन्नवृत्तिर्यस्तादृशविलक्षणसम्बन्धेन साध्यीयस्तद्वद्वृत्तित्वमर्थः तत्र च साध्यस्य यत्पदार्थाविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति हेतोर्वृत्तेरसंभवः स्यादिति तन्निवेशः । अत्र च साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः, अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमवति सत्त्वेन पृथिवीत्वाभावद्द्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठस्य द्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेनाव्याप्त्यापत्तेः । साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया अन्यथा ह्रदादिवृत्तिसमवायादिसम्बन्धावच्छिन्नप्रतियोगिता-

कवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेरसम्भवस्य कालिकसम्बन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसङ्ग । अत्र साध्याभाववत्ताया सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकादिसम्बन्धेन पर्वतादौ वृत्तेरव्याप्तिः दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्यात्मादिषु वृत्तेर्घटत्वाभावादिसाध्यकस्थले सद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासम्बन्धेन वृत्तौ च मानाभावेन चाव्याप्तिः अतः साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकनिश्चयः प्रतिबन्धकस्तेन सम्बन्धेनाभाववत्त्वं निवेश्य संयोगेन वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिकविशेषणता । कालिकविशेषणतासम्बन्धेनाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसम्बन्ध एव तथा समवायादिना घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोषः न चैवं वृक्षनिष्ठा या कपिसंयोगाभावीयमूलावच्छिन्नविशेषणता तादृशसम्बन्धेन वृक्षादौ तादृशाभाववत्ताज्ञानेऽपि कपिसंयोगवत्ताज्ञानोत्पत्तेस्तादृशसम्बन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति वाच्यम् संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्षः कपिसंयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतसंसर्गताश्रयत्वात् । केचित्तु साध्यवत्त्वाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षितं स च सम्बन्धो यत्सम्बन्धावच्छिन्नप्रतियोगिताकः स्वाभावः साध्यमिति नानुपपत्तिः । अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतुकस्थले कालिकसम्बन्धस्यापि तत्सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयाभि

पितप्रतियोगितावच्छेदकत्वात्तेन साध्याभाववति काले हेतोर्वृत्तेरव्याप्तिः न च साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धानिवेशान्नायं दोषः कालिकसम्बन्धावच्छिन्नघटाभावादिरूपप्रमेयस्य कालिकसम्बन्धावच्छिन्नप्रतियोगितायाः घटादावेव सत्वात् कालिकसम्बन्धस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धत्वविरहादिति वाच्यं तादृशप्रमेयाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपिततादृशप्रमेयाभावनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसम्बन्धेप्यक्षततयाऽव्याप्तेर्दुर्वारत्वात् न च यावत्साध्यनिरूपितप्रतियोगिता निवेशनीया तथा चोपदर्शिताभावात्मकयत्किञ्चित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसम्बन्धमादाय न दोष इति वाच्यम् असमवेतप्रमेयस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावोऽत्र नास्तीतिप्रत्ययाविषयतया तादृशप्रमेयाभावाभावत्वे मानाभावात् । तादृशप्रमेयाभावनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिद्ध्योक्तस्थलेऽव्याप्तितादवस्थ्यात् न च साध्यतावच्छेदकसम्बन्धेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगिताया निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यं सर्वत्र समवायिन्येकया सत्तयैव तादृशप्रमेयाभावाभाववत्तानिर्वाहे सर्वसमवाय्यसंग्राहकगुणादीनां तादृशप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वादिति चेन्न साध्यतावच्छेदकसम्बन्धेन वृत्तिमद्यत्किञ्चित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धानिवेशेनैवोपपत्तेः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य साध्यत्वेऽपि तस्य साध्यतावच्छेदकसमवायसम्बन्धेनावृत्तित्वात् । न चैवमपि कालिकसम्बन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रमेयाभावस्य यः कालिकसम्बन्धावच्छिन्नाभावस्तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यं तादृशप्रतियोगितावच्छेदकत्वसम्बन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्सम्बन्धेन तद्वद्वृत्तित्वस्य विवक्षणीयत्वादुक्तस्थले च साध्याभावस्य कालिकसम्बन्धेन

साध्यवद्भिन्नेऽवृत्ते । अथैव तादृशप्रतियोगितायां स्वनिष्ठत्वनिवेशो विफलः तदनिवेशे घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन घटत्वात्मकसाध्याभाववति घटत्वे हेतोर्वृत्तेः प्रसक्ताया अव्याप्तेरीदृशनिवेशेनैव वारणसम्भवात् घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन साध्यवद्भिन्ने घटेऽवृत्ते न चैवं तादृशसाध्यस्य तादृशसम्बन्धेन साध्यवद्भिन्नवृत्तिरभाव एवाप्रसिद्ध इति कथमव्याप्तिपरिहार इति वाच्यं घटभेदस्य घटत्वाभावसमनियतत्वेन तद्भिन्नतया घटत्वेऽपि समवायसम्बन्धावच्छिन्नायास्तादृशप्रतियोगितायाः सत्त्वेन तादृशप्रतियोगितावच्छेदकसमवायेन साध्यवद्भिन्नघटवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसम्भवात् । तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेऽपि घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादवस्थ्यात् संयोगिभेदस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपवैधर्म्येण संयोगाभावाभेदासम्भवेऽपि संयोगवत्प्रकारकप्रमाविषयत्वाभावाभेदे बाधकाभावात्स्वरूपसम्बन्धस्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेन साध्यवद्भिन्नवृत्तेः तादृशप्रमाविषयत्वरूपसाध्याभावस्य प्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्तिरनवकाशादिति चेन्न प्रतियोगितायां स्वनिष्ठत्वानिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ साध्ये आत्मत्वादावव्याप्तेर्दुर्वारत्वात् । तादृशसाध्यस्य यः कालिकसम्बन्धावच्छिन्नाभावः दैशिकविशेषणतासम्बन्धावच्छिन्नतदभावस्य तादृशसाध्यस्वरूपतया दैशिकविशेषणतासम्बन्धस्य साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेनाकाशाभावरूपसाध्याभावस्य साध्यवद्भिन्ने काले हेतुमति च वृत्तेः प्रतियोगितायां स्वनिष्ठत्वनिवेशे दैशिकविशेषणतया आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वविरहेणाव्याप्तिरनवकाशात् न च साध्यनिरूपितस्वनिष्ठप्रतियोगितानिवेशे साध्याभावपदोपादानवैयर्थ्यम् अभावत्वनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वविरहेण तद्व्यावृत्ते-

रिति वाच्यम् । स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिरूपसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन, साध्याभाववत्त्वनिवेशध्रौव्येण तत्पदवैयर्थ्यानवकाशात् । तादृशसम्बन्धेन साध्यवद्भिन्नवृत्ति यत्तद्वत्त्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतोर्वृत्त्यानुपपत्तेरित्याहुः । अत्रेदं बोध्यं साध्यवत्त्वग्रहविरोधिग्रहविषयसम्बन्धेन साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन वा नानुमित्यौपयिकव्याप्तिशरीरेऽभावसम्बन्धनिवेशसम्भवः साध्यभेदेन व्याप्तेर्भेदाल्लाघवेन तत्तत्साध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गाणामेव विशिष्याभावसम्बन्धतया निवेशौचित्यात् । उक्तगुरुरूपेण विशेषणताविशेषादीनां सम्बन्धताया अत्यन्ताप्रामाणिकतया तद्रूपावच्छिन्नस्य सम्बन्धाविधया व्याप्तिघटकत्वायोगाच्च परं तु यादृशसाध्यकस्थले यादृशसम्बन्धोऽभावसम्बन्धतया व्याप्तिघटकः तत्परिचयायैव दर्शितोक्तयः तथा च यादृशसम्बन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तते तादृशसम्बन्धेन तद्वत्त्वं निवेश्यमित्युक्त्यैव तत्परिचयसम्भवादित्यलं वाग्जालेन । तत्र च साध्याभाववत्पदेन साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयं तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टस्यानातिरिक्ततया सत्तारूपसाध्याभावस्य गुणादौ सत्त्वेऽपि न क्षतिः गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययात् तत्र तादृशाभावत्वविशिष्टाधिकरणत्वानभ्युपगमात् । अथैतल्लक्षणे घटत्वघटाकाशसंयोगान्यतराभाववानाकाशत्वादित्यादावव्याप्तिः । घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववद्भिन्ने घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्वधिकरणे गगनेऽपि वृत्तेः निरवच्छिन्नसाध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्वांशवैयर्थ्यादिति चेन्न । एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधिकरण्यस्वप्रतियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासो ऽभावस्य भेदक इत्येतादृशयुक्त्या द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यनुरुत्याऽव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिः समाधीयते तथा च घटाकाशसंयोगस्योक्तान्यतराभावप्रतियोगित्वेऽपि न तदभावरूपता तथा च सति तादृशविरुद्ध-

भेयोः समावेशापत्तेस्तयोर्विरोधाभावे संयोगाभावस्याप्यधिकरणभेदेन भेदासिद्धेरव्याप्यवृत्तिसाध्यके सर्वत्रैवाव्याप्तेः तदभिप्रायेण लक्षणान्तरस्यावतारणीयत्वादिति गगने अतिरिक्त एव तदभावः स्वीकरणीयः स च न साध्यवद्भिन्नवृत्तिरिति न दोषः। साध्यवद्भिन्ने वर्तते इत्यनेनानवच्छिन्नाया एव वृत्तेर्विवक्षणाद्य घटाकाशसंयोगात्मकाभावमादाय दोष इति तु न श्रद्धेयं तथा सति सुषुप्त्यादिकालावच्छेदेनास्मदाद्यात्मवृत्तौ स्वाश्रयाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिस्तत्र साध्यवद्भिन्ने ईश्वरे तादृशसम्बन्धेन निरवच्छिन्नवृत्तिकस्य ज्ञानत्वरूपाभावस्य तेन सम्बन्धेन सुखाद्यधिकरणे ऽस्मदाद्यात्मन्यपि वृत्ते उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्च ॥

संयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः प्रतियोगिसमानाधिकरण्यप्रतियोगिवैयधिकरण्ययोर्वक्ष्यमाणरीत्या न विरोध इत्यभिप्रायेणाव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्त्या लक्षणान्तरमवतारयति कर्मादाविति ॥

(दी०) कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति । हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति । साकल्यं साध्याभाववति साध्ये च बोध्यं साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यस्तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः। अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिमद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय अभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम्। हेत्वभावो ऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम् तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः न वा विशिष्टसत्ता-

त्वादिना तादृशाभावप्रतियोगिनि सत्त्वादतिप्रसङ्गः ॥

(गा०) इदं त्ववधेयम् । द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियते अपि तु एतत्तद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगाभावत्वं कल्प्यते अनन्तगुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैकाभावे संयोगाद्यभावत्वकल्पने लाघवात् । न च संयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावे द्रव्यत्वाभावे द्रव्यभेदे संयोगिभेदादौ वा संयोगाभावत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति वाच्यम् । तादृशाभावानां समनियततयाऽभेदात् । एवं च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः सप्रमाण एव । अथैवं द्रव्यत्वाभावादीनामप्यानन्त्यापत्तिः । कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यते अपि तु एतत्तद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाद्यभावस्य गुणादिवृत्तितदभावतो भेदसिद्धिरिति चेत् । इष्टमेवैतदधिकरणभेदेनाभावभेदवादिनां न चैवं संयोगाद्यभावत्वकल्पनायां धर्मिणामप्यानन्त्यादुक्तविनिगमकाभावसम्भव इति वाच्यम् । विनिगमनाविरहेणापि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूहत्वादिति । हेतोरिति । नानाधिकरणकस्येत्यादिः । अव्याप्तेरिति एतद्रुपवानेतद्रसादित्यादावेतद्रूपाधिकरणस्य द्वित्वादिना भेदसत्त्वेऽपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगितायाः प्रतियोग्यवृत्तित्वेन वा भेदस्य विशेषितत्वेन लक्षणगमनसम्भवाद्यासम्भवो दर्शितः । साकल्यमिति । बोध्यमित्यस्य विशेषणमित्यादिः । अत्र साध्याभाववति साकल्यविशेषणसत्त्व एव साध्ये तद्विशेषणव्यावृत्तिः सङ्गच्छते अन्यथा साध्याभाववत्तायाः हेतुमत्साधारण्येऽपि साध्याभाववद्यत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसम्भवादतः साध्ये तदभाववति चेत्यनुक्त्वा साध्याभाववति साकल्यविशेषणं प्रथमतो दर्शितम् । न च साध्याभाववति साकल्यविशेषणासत्त्वेऽपि वह्निमान् पर्वतान्यत्वादित्यादावतिव्याप्तिवारणमेव साध्ये साकल्यविशेषणप्रयोजनमस्ति उभयत्र साकल्यविशेषणादाने यत्किञ्चित्साध्याभाववति प-

वते हेत्वभावसत्त्वेनातिव्याप्तिः साध्ये साकल्यविशेषणसत्त्वे तु ह्रदादेरेव सकलसाध्याभाववत्तया तत्र हेतुसत्त्वेनातिव्याप्त्युद्धाराग्रन्थकाराभिप्रायवर्णनं सम्यगिति वाच्यं, साध्याभाववति साकल्यविशेषणासत्त्वे साध्ये साकल्यविशेषणस्योक्तातिव्याप्तिवारणप्रयोजनकत्वसम्भवेऽपि साकल्यविशेषणस्य वक्ष्यमाणप्रयोजनस्यैव वास्तवतया तस्य साध्याभाववति साकल्यविशेषणसत्त्व एव सङ्गतेरादौ तत्प्रदर्शनस्योचितत्वात्। वस्तुतस्तु साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशरूपकल्पान्तरस्यावलम्बनीयतया चरममेव तत्प्रदर्शनमुचितं साध्ये तदभावयति च बोध्यमित्युक्त्वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वाऽभावो ग्राह्य इत्युक्ते साध्याभाववति च साकल्यं निवेद्यते साध्याभावो वा एतादृशो निवेश्यते इत्येतादृशविकल्पः प्रतीयते स चाविवक्षित इति सारम्। अव्याप्तिवारणाय साध्याभावे साकल्यविशेषणे धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणं गुणादिरेव स्यादयोगोलकादेर्दहदासंयुक्तत्वावच्छिन्नप्रतियोगिताकाभावानधिकरणत्वादित्यतिव्याप्तिः वह्निमत्त्वप्रकारकप्रमाविषयो धूमादित्यादौ साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्याव्याप्तिश्चेति तदुपेक्ष्य साध्ये साकल्यविशेषणं निवेशितम्। ननु साध्ये साकल्यविशेषणदानेऽपि पर्वतीयवह्नेर्धूमादिना ऽभावसत्त्वेन सकलसाध्याभावसत्त्वात् व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनाभावविशेषणे च वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिः वह्निमत्तन्नधाविधसकलसाध्याभावानधिकरणत्वात् साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्मस्तदनवच्छिन्नप्रतियोगिताकत्वनिवेशने च लाघवात्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वमेवाभावे विशेषणमुचितं किं साध्ये साकल्यविशेषणेनेत्यभिप्रेत्य तथैवाह साध्यतावच्छेदकेति। साध्याभाववति साकल्यविशेषण-

प्रयोजनमाह विपक्षेति । वैकल्पिकयोः साध्यतदभावयोः साकल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वं विशेषणयोर्व्यावृत्तिमाह न वेति । एकव्यक्तिके एतद्रूपवानेतद्रूमादित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः पूर्वक्षणादिवृत्तित्वविशिष्टैतद्रूपादेरेतद्रसाधिकरणे वृत्तेरेतद्रूपतद्रूपोभयत्वावच्छिन्नाभावोऽपि न तथा, प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेरिति तत्र लक्षणसङ्गतिरित्यतो नानाव्यक्तिक इत्युक्तम् । अत एवाव्याप्तिरेवोक्ता नासम्भवः । अत्र च नानाव्यक्तिसाध्यकत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम् । अत एव एतद्व्यक्तिवृत्तियावद्धर्मवानेतत्त्वादित्यादौ नानाव्यक्तिसाध्यके ऽव्याप्तिविरहेऽपि न क्षतिः । अव्याप्यवृत्तीति । कपिसंयोग्येतद्वृक्षत्वादित्यादावित्यर्थः अव्याप्तेर्वारणायेत्यन्वयः । व्यभिचारिणि चेति । पृथिवी कपिसंयोगादित्यादौ चेत्यर्थः । अभावद्वये साध्याभावे हेत्वभावे च तथा चाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तिवारणाय साध्याभावे व्यभिचारिणि चाव्याप्यवृत्त्यावतिव्याप्तेर्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यमित्यर्थः । यद्यपि हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया कपिसंयोगी कपिविभागादित्यादौ चाव्याप्यवृत्तिहेतुके ऽव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य सम्भवतीति व्याप्यवृत्तीकिञ्चित्करं तथापि हेत्वभावे तद्विशेषणप्रतिसन्धानं विनैव व्याप्यवृत्तिहेतुकस्थले व्याप्तिनिर्णयो भवतीत्येतदभिसन्धायैव तदुक्तं प्रतियोगिवैयधिकरण्यं च न प्रतियोग्यधिकरणावृत्तित्वम् । अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्या ऽव्याप्तेः अपि तु प्रतियोग्यनधिकरणवृत्तित्वं तथा च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन् वर्तते योऽभावस्तत्प्रतियोगित्वमर्थः तेन कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्त्वेऽपि नाव्याप्तिः न वा एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथाविधकपिसंयोगाभावस्य सत्-

लसाध्याभावाधिकरणे सत्त्वेऽप्यतिव्याप्तिः. प्रतियोग्यनधिकरणीभूतसाध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितोऽर्थः । प्रथमे साध्यतावच्छेदकसम्बन्धेन चरमे हेतुतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यं तेनायमात्मा आत्ममहाकालान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसम्बन्धेनात्मत्वाधिकरणत्वेऽपि नातिव्याप्तिः न वा वह्निमान् धूमादित्यादौ साध्याभावाधिकरणयावदन्तर्गतकालज्ञानादिषु कालिकविषयित्वादिसम्बन्धेन हेत्वभावप्रतियोग्यधिकरणतासत्त्वेऽपि असम्भवो ऽव्याप्तिर्वा इत्थं च प्रतियोगित्वे सम्बन्धविशेषावच्छिन्नत्वेन न निवेशनीये सम्बन्धान्तरावच्छिन्नप्रतियोगिताकयोः साध्याभावहेत्वभावयोरुक्तसम्बन्धेन प्रतियोगिसमानाधिकरणतया ऽसम्भवातिव्याप्त्योरनवकाशात् हेत्वभावोऽपीति अपिशब्देन साध्याभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्य निवेशनीयमिति सूच्यते तेन विशिष्टसत्तावान् जातेरित्यादौ हेत्वाधिकरणादिषु साध्याभावप्रतियोगिसत्त्वादेः सत्त्वेऽपि नातिव्याप्तिः । अत्र साध्याभावोऽपीत्युक्तौ अग्रिमतत्पदेन हेत्वभावपरामर्शासम्भवः तत्र हेत्वभावपदोपादाने ऽक्षराधिक्यमिति तदोक्तं तत्प्रतियोगित्वं साध्याभाववन्निष्ठाभावप्रतियोगित्वं हेतुतावच्छेदकरूपेण हेतुतावच्छेदकावच्छिन्नमित्यर्थः । हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे स्वप्रतियोगितावच्छेदकावच्छिन्ननिवेशस्य प्रयोजनमाह द्रव्यत्वादाविति । विशिष्टेति गुणकर्मान्यत्वविशिष्टेत्यर्थः । प्रतियोगितायां हेत्वभावप्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशस्य प्रयोजनमाह न वेति । अत्रापि द्रव्यत्वादौ साध्य इत्यनुषज्यते । विशिष्टसत्तात्वादिना गुणकर्मान्यत्वविशिष्टसत्तात्वादिना तृतीयार्थश्चात्रावच्छिन्नप्रतियोगिताकत्वं तस्याभावेऽन्वयः प्रतियोगिपदार्थैकदेशप्रतियोगित्वान्वितमवच्छिन्नत्व वा तदर्थः । तादृशाभावेति । सकलसाध्याभाववन्निष्ठाभावेत्यर्थः । न च हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्थले हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यतां ततोऽपि तत्प्रयोजननिर्वाहात् त-

था च द्रव्यं सत्त्वादित्यादौ गुणादिनिष्ठविशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैवातिव्याप्तिवारणसम्भवात्प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमिति वाच्यं हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्वमर्थः स्यात्तदपेक्षया सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणता तद्वत्त्वरूपास्मदीयफलितार्थस्यागुरुत्वात् न च ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्वं तद्धर्मवत्त्वमित्येवार्थः स चातिलघुरेवेति वाच्यम् । एतादृशार्थकरणे मूलोक्त प्रतियोगिताया व्याप्तित्वं व्याहन्येतेति मूलानुसारेण दीधितिकृता गुर्वर्थानुसरणात् उक्तविशेष्यविशेषणभावेनानिवेशे व्यर्थविशेषणतानवकाशात् । केचित्तु हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यानिवेशे सकलसाध्याभाववन्निष्ठविशिष्टसत्तात्वावच्छिन्नव्यधिकरणाभावप्रतियोगित्वरूपव्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य गुणेऽपि सत्त्वात् बाधानवतारदशायां तत्र द्रव्यत्वानुमित्यापत्तिः अस्मन्मते तु तत्प्रतियोगित्वं चेत्यतो लब्धस्य तादृशप्रतियोगितावच्छेदकहेतुतावच्छेदकस्य व्याप्तितया तद्विशिष्टवैशिष्ट्यावगाहिज्ञानस्य गुणेऽपि भ्रमत्वादित्याहुः ॥

एतल्लक्षणं दूषयित्वोत्तरलक्षणमवतारयति यत्रैकव्यक्तिकमिति ॥

(दी०) यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिः तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदन्येति । अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं न हि भवति नीलो घटो घटादन्य इति ॥

(गा०) यत्रैकव्यक्तिकं साध्य तत्राव्याप्तिरित्यन्वयः । एतद्-

पदानेतद्रसादित्यादावनेकाशेपत्वरूपसाकल्यस्य साध्ये ऽसत्त्वा-दिति भावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानु-सरणाय तत्रैतद्दोषावकाश इत्यत आह विपक्षो वेति । विपक्षः साध्याभाववान् अत्रापि एकव्यक्तिक इत्यस्य विपरिण-तस्यानुषङ्गः तथा चैतद्दृदभिन्नं पटत्वादित्यादौ साध्याभाव-वत्येतद्घटादौ साकल्याप्रसिद्ध्या ऽव्याप्तिरित्यर्थः । सकलप-दस्यादोषमात्रपरत्वे दोषान्तरमाह निर्धूमत्वादिव्याप्य इति । तत्त्वेन निर्धूमत्वव्याप्यत्वेन तथा च धूमत्वावच्छिन्नाभावव्याप्यवान् व-ह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः । धूमत्वाद्यवच्छिन्नाभावे साध्ये एकव्यक्तिकतया पूर्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानु-सरणं निर्धूमत्वव्याप्यजलत्वादेस्तद्रूपेण साध्यतायां सद्धेतु-त्वानुपपत्तिरतस्तत्त्वेनेत्युक्तम् । हेत्वभावस्येति । अथ वह्न्यात्मकहे-त्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेऽपि सक-लतन्निष्ठवह्न्यभावादिभेदप्रतियोगितामादायैव लक्षणं सङ्गमनीयं हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यानिवेशादेव व्य-भिचारिणि सम्बन्धान्तरावच्छिन्नप्रतियोगिताकहेत्वभावमादा-यातिप्रसङ्गानवकाशेन हेत्वभावप्रतियोगितायां हेतुतावच्छेदक-सम्बन्धावच्छिन्नत्वानिवेशात् । यत्तु वह्निमद्भेदहेतुताभिप्रायको ऽयं ग्रन्थः तत्र हेतुभेदमादायापि लक्षणगमनासम्भवात् भे-दभेदस्यानवस्थाभयेनाधिकरणस्वरूपस्य स्वीकरणीयतया तस्य च प्रत्येकविश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवादिति तन्न । आकाशाभावाद्यधिकरणकभेदभेदस्याकाशाभावाद्यधिकरणस्वरूप-तया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भ-वात् । न चैतादृशरीत्याकाशाभावमादाय भेदहेतुकव्यभिचारि-ण्यतिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयं तथा सत्यधिकरणस्वरूपाभावस्य स्वस्मिन्नेव त-दभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाशः । एवं चाकाशाभा-वमादाय नोक्ताव्याप्तिपरिहारसम्भव इति वाच्यम् । उक्तस्थले आकाशाभावस्य हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकर-ण्यविरहादेवातिव्याप्तिवारणसम्भवेन तादृशविवक्षाया निष्प्रयो-जनकत्वात् वह्निमद्भेदहेतुकस्थले च साध्याभावाधिकरणस्य

हेतुरूपप्रतियोग्यनाधिकरणत्वेनाकाशाभावरूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वेनाव्याप्तिवारणसम्भवादिति । अत्र केचित् । यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं साध्यं वह्न्यभावान्यत्वविशिष्टवह्न्यभावो हेतुस्तत्र वह्न्यभावस्यापि सकलसाध्याभाववदन्तर्गततया तत्र वह्न्यभावभेदासत्त्वेन तमादाय लक्षणगमनासम्भवात् । न च तादृशविशिष्टहेतुकस्थले हेतुभेदस्य सकलसाध्याभाववन्निष्ठत्वासम्भवेऽपि अखण्डविशिष्टात्यन्ताभावस्य तथात्वमादायैव लक्षणं सङ्गमनीयमिति वाच्यं प्राचीनमते विशेषणाभावविशेष्याभावाभ्यामनतिरिक्ततया तादृशविशिष्टाभावस्य वह्न्यभावत्ववह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात् । यद्येवमपि विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्याखण्डतया सकलधूमवन्निष्ठतया तमादायैव लक्षणं सङ्गमनीयमिति चेन्न वृत्त्यनियामकतया विषयितादिसम्बन्धानामत्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावात्यन्ताभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेऽपि तदभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना तत्र लाघवेनाभावत्वस्यैवावच्छेदकत्वादिति न तमादायापि लक्षणसङ्गतिः । न च गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्यं तथा च वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवेति वाच्यम् । एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत्वेन पारिभाषिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेण तदनुपादानादिति वदन्ति । तदसत् तथा सत्यपि सकलसाध्याभाववन्निष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभावमादाय लक्षणसमन्वयसम्भवात् । न च जन्यमात्रस्य कालोपाधितानये साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावादिसत्त्वात्तत्र तत्सम्बन्धेन तस्याभावो न वर्त्तत एवेति वाच्यं कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमदवयवावच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात् । एवं विशिष्टाभावस्य विशेष्याभाव-

विशेषणाभावाभ्यामनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावेवा-व्याप्तिसम्भव तदुपेक्ष्याभावसाध्यकाभावहेतुकस्थलानुधावने बीजा-भावात् । तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवै-यधिकरण्य निविष्टं प्रतियोगिता च हेतुतावच्छेदकसम्बन्धाव-च्छिन्नैव निविष्टेत्याशयेनैव तद्दोपदानम् । हेतुतावच्छेदकस-म्बन्धेन प्रतियोगिवैयधिकरण्यदाने तु अग्रिमलक्षणापेक्ष-या गौरवमेव तल्लक्षणावतारे बीजं बोध्यम् । एतेन स-कलशब्दस्य व्यापकतार्थकतया साध्याभावव्यापकीभूताभावप्र-तियोगित्वमेव निष्कृष्टेतल्लक्षणार्थः धूमवान् वह्नेरित्यादौ प्रमेय-त्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेऽपि न क्षतिः यद्रूपावच्छिन्नप्रतियोगिताकाभावस्य साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात् एवं च हेत्वभावे प्रतियोगिवैयधि-करण्यं न निवेश्यते व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवे-शेनाव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववि-शिष्टहेतुरूपाभावप्रतियोगितया व्यापकत्वासम्भवेनातिप्रसङ्गावर-हात् । व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभा-ववद्विशिष्टत्वमभावे निवेश्यते तेन वह्न्यभाववति कालिकादिस-म्बन्धेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्या-भावव्यापकताक्षतिः सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या ऽव्याप्तिश्च लक्षणपञ्चक एव दोषः अस्तु वा हेतुतावच्छेदकसम्बन्धेन हेतुमत्ताज्ञानं प्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकस्तादृशसम्ब-न्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत्स्वं तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम् इत्थं च सत्ता-वान् जातेरित्यादौ एतादृशं स्वं जातित्वाभावत्वादिकमेव तद्भिन्नं च जात्यभावत्वादिकमिति लक्षणसमन्वयः इत्थं च ए-तद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावत्वावच्छि-न्नानधिकरणत्वाप्रसिद्ध्या कपिसंयोगाभावत्वस्य साध्याभावव्या-पकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधि-करण्यविशेषणं देयमेव न देयमेव वा स्वाधिकरणत्वाभावस्यै-वाधिकरणभिन्नत्वस्थाने निवेशनीयत्वात् कपिसंयोगाभावादेरि-

य तदधिकरणतायाः अव्याप्यवृत्तितया, तदभावस्य साध्याभाववति सत्त्वेनातिव्याप्त्यनवकाशात् । आधिकरणत्वाभावश्च भावप्रतियोगिकतया ऽतिरिक्त एवेति विशेषणताविशेषेणैव तद्वत्त्वं साध्याभाववति विशेषणीयमिति । एवं च निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वाभावाव्याप्तिरिति पूर्वपक्षो ऽप्यकिञ्चित्करः यत्र यावतां साध्याभाववतां सम्भवस्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकं न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैवैतद्दोषदानात् प्रकारान्तरानुसारेण परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादिति कृतं पल्लवितेन । परे तु निर्धूमत्वव्याप्यत्वेन साध्ये इत्यस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावव्याप्ये साध्ये तत्सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादावव्याप्तिरित्यर्थः । तत्र च हेतोरपि सकलसाध्याभाववदन्तर्गततया तत्र हेतुभेदासत्त्वेन न वह्न्यभावभेदमादाय लक्षणसङ्गतिरित्यव्याप्तिर्दुर्वारैव तथाहि सामानाधिकरण्यसम्बन्धेन पर्वतत्वादौ वर्तमानस्य वह्नेस्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य पर्वतादौ सत्त्वेन तत्र सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावसत्त्वात् साध्याभावाधिकरणत्वमविशदमेवेति ध्येयमित्याहुः । साध्यवद्व्यक्तिविशेषभेदमादायाव्याप्तिं परिहरति अत्रेति । साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति साध्यतावच्छेदकाविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः । तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषः तादृशभेदप्रतियोगितावच्छेदकतायास्तत्ताविशिष्टवह्निमत्त्व एव पर्याप्तत्वात् । व्युत्पत्तिबललभ्यम् अन्यादिपदसमभिव्याहारलभ्यं नञादिपदसमभिव्याहारज्ञानस्येव तादृशपदसमभिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दत्वावच्छिन्नं प्रत्येव जनकत्वादिति भावः । व्युत्पत्तिबललभ्यमित्यनेन यथाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितं तादृशसमभिव्याहारस्थले तत्प्रतियोगिताकाभावप्रबोधे ऽतिप्रसङ्गं सूचयति न हि भवतीति । प्रामाणिकव्यवहार इति

शेषः । तथा च्चान्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेऽपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोऽपि स्यादिति भावः । द्रव्यं न घट इत्याद्यप्रयोगादनुयोगितावच्छेदकावच्छेदेनैवान्योन्याभावादिरन्यादिपदेन प्रत्याय्यते अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्म इति प्रकाशकृदङ्गीकृतव्युत्पत्त्यन्तरविरोधात् घटो घटादन्य इति प्रयोगवारणसम्भवान्नील इति । घटादन्य इत्यादौ प्राचीनमते पञ्चम्याः प्रतियोगित्वमर्थः । तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वयः । अथ वा केवलाधेयत्वमेव घटस्य सम्बन्धः धर्मिपारतन्त्र्येण घटत्वादेरपि अवच्छिन्नत्वसम्बन्धेन तत्रान्वयोपगमात् एकविशेषणत्वेनोपस्थितस्याप्यन्यत्र पारतन्त्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात् । प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येण अन्यपदार्थैकदेशे भेदे निरूपकतासम्बन्धेनान्वयः घटादन्य इत्यादौ च निरूपकतासम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताविशिष्टे लक्षणया घटादिपदार्थः तत्पुरुषस्थले पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टे लाक्षणिकत्वात्तादृशघटादिपदार्थस्य चाभेदसम्बन्धेन भेदे ऽन्वयः । नवीनमते घटादन्य इत्यादावनुयोगित्वं पञ्चम्यर्थस्तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्नप्रतियोगितानिरूपकतासम्बन्धेनान्वयः । अनुयोगितायाश्चाश्रयतासम्बन्धेन भेदेऽन्वयः समासस्थले च घटत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा तस्य चाभेदसम्बन्धेन भेदे ऽन्वयः । अथैव साध्यवदन्यावृत्तित्वमित्येतादृशलक्षणयाप्यादभेदसम्बन्धेन तादृशप्रतियोगिताविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदस्तद्वद्वृत्तित्वमेव प्रतीयते । तथा चानुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधाने ऽर्थान्तरप्रसङ्गस्तादृशप्रतियोगितासम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तिताज्ञानस्यैव लाघवेनानुमितिहेतुत्वात् । इति चेन्न । यादृशव्याप्तिज्ञानमनुमितिहेतुस्तस्यामेवास्य तात्पर्यात् । शाब्दबोधविषयत्वेऽपि तन्मूलकोदीच्यव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्यनिर्वाहत्वात् । तादृशशाब्दबोधस्यापि कथं चिदुपपादयितुं

शक्यत्वाच्च नीलो घटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्याप्रमाणत्वात् घटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्य प्रमाणत्वात् । अन्वयितावच्छेदकनिरूपितपारिभाषिकमवच्छिन्नत्वं प्रतियोगितायां भासत इत्युपेयम् अतः साध्यवदन्य इत्यादौ मतुबन्तर्प्रतिपाद्यतावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतयानवच्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः पारिभाषिकं तदवच्छिन्नत्वं च तद्विशिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तत्तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वं एतादृशावच्छिन्नत्वस्य च सम्बन्धतया प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेऽपि न क्षतिः सम्बन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात् अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगितावगाहिज्ञानमेव कारणं लाघवात् न तु साध्यसम्बन्धावच्छिन्नप्रतियोगितावगाहिज्ञानमित्यनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवेश्यते कम्बुग्रीवादिमत्वान् घटादित्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकावच्छिन्नत्वमेवानुमित्यौपयिकव्याप्तिघटकं तादृशगुरुधर्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकसमशालितावाविनस्तु स्वरूपसम्बन्धरूपमेवावच्छिन्नत्वं व्याप्तिशरीरे निवेशयन्तीति समासः मूले केवलान्वयिन्यभावादित्यादौ एतादृशलक्षणपञ्चकस्य केवलान्वयिनि अप्रसिद्धेरित्यर्थः । न च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यावश्यं निवेशनीयतया सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिरस्तीति केवलान्वयिसाध्यकमात्रे अव्याप्तिकथनमसङ्गतमिति वाच्यम् । केवलान्वयिपदेन हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिदधिकरणवृत्त्यभावाप्रतियोगित्वरूपकेवलान्वयित्वाश्रयसाध्यकमात्रस्योक्तत्वात् । अथवा हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमनिवेश्य हेतुतावच्छेदकसम्बन्धातिरिक्तो यो हेतुप्रतियोगिकः सम्बन्धः तदन्यसम्बन्धावच्छिन्नवृत्तित्वमेव निवेश्यं वह्निमान् धूमादित्यादौ कालिकसम्बन्धेन धूमादेः साध्याभाववद्वृत्तित्वेऽपि तत्सम्बन्धस्य हेतुतावच्छेदकसम्बन्धातिरिक्तत्वात् हेतुप्रतियोगिकत्वाच्च लक्षणाघटकतया तदन्यसम्बन्धेन तद्वृत्तित्वाभावः अस्त्येवेति भावः । एवं च सत्तावान् द्रव्यत्वादित्यादौ

हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्धावपि हेतुतावच्छेदकसम्बन्धातिरिक्तहेतुप्रतियोगिकसम्बन्धान्यविशेषणताविशेषादिना वृत्तित्वप्रसिद्ध्या नाव्याप्तिरिति ध्येयम् ॥

इति श्रीगदाधरभट्टाचार्यविरचिता शिरोमणिकृतव्याप्तिपञ्चकव्याख्याया विवृतिः समाप्ता ॥



अनुमानगादाधर्याम्

सिंहव्याघ्रप्रकरणम् ।

(चि०) नापि साध्यासामानाधिकरण्यानधिकरणत्वम् । साध्यवैयधिकरण्यानधिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधिकरणत्वं तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम् ॥

(दी०) नापीति । साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम् । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत् । तदनधिकरणत्वमित्यर्थः साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः ॥

(गा०) साध्यासामानाधिकरण्यानधिकरणत्वमित्येतल्लक्षणे यदि तदधिकरणावृत्तित्वरूपमसामानाधिकरण्यं निवेश्यते तदा द्रव्यं सत्त्वादित्यादावतिव्याप्तिः सत्तायाः द्रव्यत्वाधिकरणवृत्तितया तादृशासामानाधिकरण्यानधिकरणत्वात् तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वेऽनन्तरवक्ष्यमाणलक्षणाभेद इत्यतो व्याचष्टे साध्येति । असमानाधिकरणं यस्येत्यत्रासमानाधिकरणपदस्य स्वानधिकरणाधिकरणार्थकत्वे द्रव्यं सत्त्वादित्यादावेवातिव्याप्तिः द्रव्यत्वादेः सत्ताद्यनधिकरणाधिकरणत्वविरहेण यत्पदेन सत्त्वादरुपादानासम्भवात् सत्तावान् द्रव्यत्वादित्यादावव्याप्तिश्च , सत्तादेर्द्रव्यत्वाद्यनधिकरणाधिकरणत्वादवस्तदधिकरणानधिकरणकत्व-

परतया तत्पदं व्याचष्टे यदधिकरणेति । यदधिकरणानधिकरणक साध्य तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टार्थरूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्वाह यत्तत्त्वस्याननुगमन तत्तदधिकरणत्वाभावकूटस्य निवेशनीय तया गौरव चेत्याशयेन यत्तत्त्वाघटित साध्यासामानाधिकरण्यपदार्थमाह साध्यनिष्ठेति । साध्यनिष्ठ य दसामानाधिकरण्य स्वाधिकरणीभूतयत्किञ्चिन्निवृत्तिरभाव तत्प्रतियोगित्व तन्मानयोगिकाद्यविशिष्टाधिकरणकत्व साध्यनिष्ठाभावीयाधेयत्वनिष्ठप्रतियोगिताया निरूपितस्वसम्बन्धेन यदवच्छेदक तद्वृत्तित्वमितियावत् । वह्निमान् धूमादित्यादौ साध्यनिष्ठाभावो ह्रदाधेयत्वाभावस्तदीयप्रतियोगितायामुक सम्बन्धेनावच्छेदको ह्रदादिस्तद्वृत्तित्वानधिकरणत्व धूमादाविति लक्षणसमन्वय । अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्व साध्यतावच्छेदकसम्बन्धावच्छिन्न ग्राह्यम् । अन्यथा वह्निमान् धूमादित्यादौ पर्वतादिसमवेतत्वाद्यभावमादायानुपपत्ते तथा च सत्तावान् समवायित्वादित्यादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकाधिकरणाप्रसिद्ध यव्याप्ति वह्निमान् धूमादित्यादावपि धूमादरयोगात्कीयत्र ह्रदादिनिष्ठपर्वतादिवृत्तित्वाभावप्रतियोगितावच्छेदकपर्वतादिवृत्तित्वाद्व्याप्तिश्च साध्यतावच्छेदकव्यापकीभूताभावनिवेश च गौरवमित्याशयेन फलितार्थमाह साध्यनिष्ठाधेयत्वेति । अनिरूपकत्वमिह साध्यनिष्ठाधेयतात्वावच्छेदेन ग्राह्य तेन वह्निमान् धूमादित्यादौ महानसाद पर्वतीयवह्निनिष्ठाधेयत्वानिरूपकत्वेऽपि नाव्याप्ति एव साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमाधेयता निवेशनीया तेनायमात्मा आत्ममहाकाला यत्त्वादित्यादौ कालस्य कालिकसम्बन्धावच्छिन्नात्मत्वादिनिष्ठाधेयतानिरूपकत्वेऽपि नाव्याप्ति तादृशाधेयत्वानिरूपकत्वमधिकरणत्वमविवक्षित तद्विनिरूपकत्वमात्र निविष्टम् । प्रथमतो द्रव्य सत्वादित्यादावतिव्याप्ति वारयितुं विनतया व्यभिचारसामान्य एवाति व्याप्तिमुद्धरति साध्यवद्भिन्नस्येति । व्यभिचारनिरूपकाधिकरणस्य चेत्यर्थ । अत्राधिकरणवृत्तित्व हेतुतावच्छेदकसम्बन्धेन ग्राह्यम् अ-

न्यथा वह्निमान् धूमादित्यादौ वह्निनिष्ठाधेयत्वानिरूपकस्यावयवादौ धूमादेः समवायेन वृत्तेरव्याप्त्यापत्तेः इत्थं च सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धात्मकसमवायादिसम्बन्धेन वृत्तेरप्रसिद्धेः एवं द्रव्यं विशिष्टसत्त्वादित्यादावपि विशिष्टसत्त्वादेः सत्तानतिरिक्ततया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वासम्भवादव्याप्तिरित्यतो निष्कृष्टार्थमाह साध्यनिष्ठेति। अत्रापि पूर्वदोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयत्वं निवेशनीयम्। एवमधिकरणत्वमप्यविवक्षितं तादृशाधेयत्वानिरूपकत्वव्यापकतैवाभावे निवेशनीया तादृशाधेयत्वानिरूपकवृत्तित्वमात्रनिवेशे धूमवान् वह्नेरित्यादौ वह्न्यधिकरणत्वसामान्याभावस्य साध्यनिष्ठाधेयत्वानिरूपकह्रदादिवृत्तित्वादतिव्याप्तिरतो व्यापकतानिवेशः व्यापकत्वं च तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं न तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं सर्वस्यैव तथाविधवह्नित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः न वा तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तादृशप्रतियोगितानवच्छेदकीभूताभावत्वादिकमादाय वह्न्यधिकरणत्वसामान्याभावस्यापि धूमनिष्ठाधेयत्वानिरूपकत्वव्यापकतया धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः अनवच्छेदकत्वं चावच्छेदकतापर्याप्त्यनधिकरणत्वम्। अतो नोभयवच्छेदमादाय दोषः। अथवा यदधिकरणतासामान्याभावत्वं साध्यनिष्ठाधेयत्वानिरूपकवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकं तत्त्वमेव समुदायार्थः। अतोऽभावत्वादिना व्यापकतामादाय न दोषः। अधिकरणता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या तेन वह्निमान् धूमादित्यादौ वह्न्यनधिकरणधूमावयवादौ धूमाधिकरणत्वसामान्याभावसत्त्वेऽपि न क्षतिः धूमवान् वह्नेरित्यादौ यत्किञ्चिद्वह्न्यधिकरणत्वाभावस्य धूमानधिकरणत्वव्यापकतयाऽतिव्याप्तिवारणाय सामान्यपदं तथा च तादृशाधेयत्वानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वं यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वं वा तादृशाधेयत्वानिरूपकत्वव्यापकतावच्छेदकं

तद्रूपवत्त्वं व्याप्तिरिति फलितार्थः तेन धूमानधिकरणत्वव्यापकीभूतवह्न्यधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगितायाः वह्न्यधिकरणत्वसामान्यनिष्ठत्वेऽपि नातिव्याप्तिः यदधिकरणतामात्रनिवेशे द्रव्य गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावासत्त्वादतो यद्रूपावच्छिन्नेति । हेत्वभावस्य व्यापकतानिवेशे व्यापकताशरीरे हेतुतावच्छेदकसम्बन्धावच्छिन्नं तद्वन्निष्ठत्वं निवेश्यम् अन्यथा वह्निमान् धूमादित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे ह्रदादौ धूमात्मकाभावस्य कालिकसम्बन्धेन वृत्तेरव्याप्त्यापत्तेः तथा च सति सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेरतो हेत्वधिकरणत्वाभावस्य व्यापकताघटितमेव तल्लक्षण कृतं तथा चाधिकरणताया विशेषणताविशेषेण वृत्तिमत्तया तेन सम्बन्धेन तद्वन्निष्ठत्वं निवेश्यमतो न दोषः । पूर्वकल्पपरित्यागे बीजमाह तनेति । न दोष इति सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि तत्सम्बन्धावच्छिन्नाया द्रव्यत्वाधिकरणताया द्रव्ये प्रसिद्धाया अभावस्य साध्यानधिकरणत्वव्यापकत्वादिति भावः ॥

साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पुनः पौनरुक्त्यमतस्तद्दूषणाचष्टे साध्यवैयधिकरण्यमिति ॥

(दी०) साध्यवैयधिकरण्यं साध्यवज्भिन्नाधिकरणत्वं चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्या अन्यद् दूषयति तदुभयमपीति । साध्येत्यादेः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः । तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चाद्ये द्वितीये च साध्य-

वैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा केवलान्वयिनि यदि च यत्किञ्चित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्वत्राव्याप्तिः ॥

(गा०) ननु मूले तदुभयमपि साध्यानधिकरणानधिकरणत्वमधिकरणताद्वयघटितत्वादनुवादे चाधिकरणताद्वयमात्रस्य निवेशादित्यतस्तादृशमूलं सङ्गमयति चरमाधिकरणत्वांशस्येति । अनतिप्रयोजनकतयेति । अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावनिवेशेनैवोपपत्तेरिति भावः । असामानाधिकरण्याद्यधिकरणत्वाभावस्याखण्डस्यासामानाधिकरण्याद्यभावाघटिततया न वैयर्थ्यमित्यनतिप्रयोजनकतयेत्युक्तं तदपहाय चरमाधिकरणत्वांशं परित्यज्य द्वयं साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थद्वयं साध्यानधिकरणानधिकरणत्वमित्यनेन सत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथञ्चिदपि प्रतिपादनासम्भवात्तदनुवादकतानुपपत्तिरिति यथाश्रुतार्थानुवादपरतया सङ्गमयितुम् अनुवादनीयलक्षणद्वयार्थमाह साध्येत्यादेरिति । लक्षणद्वयस्य क्रमेणेति शेषः । तस्याभाव इत्यन्तेन प्रथमलक्षणार्थकथनम् एवं च साध्यानधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते तदुत्तरत्वप्रत्ययेन तत्त्वं साध्यपदोत्तरसन्निकृष्टनञा तदभावः प्रत्याय्यत इति प्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणानधिकरणत्वमित्यस्य । न च साध्याधिकरणानधिकरणत्वपदेन नञ्पदसमासे सत्येव तदर्थाभावो नञा प्रत्याययितुं शक्यते तथा च साध्यपदोत्तरनञ्निपातोऽसम्भवी समस्यमानपदपूर्वनिपातितस्यैव नञः साधुत्वात् अन्यथा अविप्रगुरित्यादौ विप्रादिपदोत्तरमपि नञ्निपातप्रसक्तेरिति वाच्यं समस्यमानधिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञो मध्यनिवेशस्यापि साधुतासम्भवादकस्मात् अन्यथा घटानधिकरणत्वं साध्याभाववद्वृत्तित्वमित्यादौ च

घटाधिकरणत्वाभावतद्वृत्तित्वाभावप्रत्ययानुपपत्ते न हि तत्रानधिकरणत्वादिपदाना घटादिपदे समासे तादृशा शाब्दप्रतीतिरुपपद्यते अनधिकरणत्वादिपदजन्यप्रतीतिविशेष्यीभूतत्वाभावेन समस्यैव घटादिसंसर्गभानात् समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टनापरपदार्थान्वये राजपुरुषादन्य इत्यर्थे राजा पुरुष इत्यादिसमासापत्त । एव नञाऽन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनात् अधिकरणसामान्यभेदवानत्रानाधिकरणपदार्थे स्यात् तस्य चाप्रसिद्धया नञ्पदाधिकरणपदयो प्राथमिकसमासासम्भवाच्चेति साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपप्रथमलक्षणस्य निष्कृष्टयथाश्रुतार्थोऽपि साध्यानधिकरणानधिकरणत्वमिति शब्देन प्रतिपाद्यते तथाहि आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेनाधिकरणानाधिकरणपदेन अधिकरणमनधिकरण आधेयत्वानिरूपक यस्येति व्युत्पत्त्याऽधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावत्त्वेनान्यपदार्थो बोध्यते बहुव्रीहौ विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नस्य बोध तादृपरीतविशेषणविशेष्यभावापन्नस्य प्रत्ययाच्चित्रा गौर्यस्येति विग्रहवाक्यात् यत्पदार्थसम्बन्धित्वेन चित्रगाश्चित्रगुरित्यत्राश्चित्रगोनिष्ठसम्बन्धप्रतियोगित्वेन यत्पदार्थस्य बोधनात् प्रकृतस्थले च विग्रहवाक्यादन्यपदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवत्त्वेनाधिकरणप्रतीते एव च साध्य यदधिकरणानधिकरण यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावदिति व्युत्पत्त्या साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवदधिकरणवृत्तित्व साध्यानधिकरणानाधिकरणशब्देन प्रत्याय्यते तदुत्तरत्वप्रत्ययेन तस्य तदभावश्च साध्यपदोत्तरनिविष्टनञ्पदघटितवाक्येनेति । द्वितीयलक्षणार्थमाह साध्यस्येति । तथा च साध्यानधिकरणमाधिकरणम् आधेयतानिरूपक यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृत्तित्व प्रत्याय्यते तदभावश्च द्वितीयनञ्प्रति उक्तशब्दस्यैतदर्थानुवादकतेति भाव । पूरणस्खलित तत्रेतिग्रन्थ व्याचष्टे तत्रेत्यादिना । मूल केवलान्वयिनि वह्निमान् धूमादित्यादौ चाव्याप्तेर्दुर्वचनात्प्रथमलक्षणे केवलान्वयिव्याप्तिहेतु पूरयति सा

ध्येत्यादिना अप्रसिद्धेरित्यन्तेन । साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेणेयमप्रसिद्धिरभिहिता यत्किञ्चिन्निरूपकभेदनिवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तिरव्याप्तिर्बोध्या वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यकहेत्वन्तरेऽप्यव्याप्तिसत्त्वात् धूममात्रे तत्कथनं मूलकृतो न्यूनतासम्पादकमतो धूम इत्यस्योपलक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे नानाव्यक्तिसाध्यकेति । अत्र च यथासम्भवमव्याप्तिर्बोध्या तेनैतद्वृत्तियावद्धर्मवानेतस्मादित्यादौ वक्ष्यमाणरीत्याऽव्याप्तिविरहेऽपि न क्षतिः । अत एवाग्रे नानाधिकरणके सर्वत्रेति वक्ष्यति । अथवा नानाव्यक्तिसाध्यक इत्यस्य मिथो व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदकक इत्यर्थः अत्राव्याप्तेर्हेतुं पूरयति एकसाध्येत्यादिना इतीत्यन्तेन । अनया रीत्या ऽव्याप्तिश्च यत्किञ्चित्साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्वयिन्यव्याप्तिरेव दोष इति ध्येयम् । क्वचिदिति पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादौ । अतिव्याप्तिरिति विशिष्टद्रव्यत्वस्य शुद्धद्रव्यत्वानतिरेकितया पृथिव्यादेः साध्यनिष्ठाधेयतानिरूपकत्वासम्भवादिति भावः । आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशे च नैव दोष अधिकरणतानिरूपकतावच्छेदकस्यैवाधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादेः पृथिवीनिरूपिताधेयतानवच्छेदकत्वादिति ध्येयम् । द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे च धूमादौ नाव्याप्तिरतस्तत्कल्पे केवलान्वयिसाध्यकाव्याप्तिरेव यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशे चोभयस्थल एवाव्याप्तिरिति मूलाभिप्रायं स्फुटयति द्वितीये चेत्यादिना । साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदः साध्यवैयधिकरण्ये विवक्षितः साध्यवैयधिकरण्यघटकतया विवक्षित इत्यर्थः । केवलान्वयिनि केवलान्वयिन्येव । नानाधिकरणकेति । एकव्यक्तिसाध्यकेऽपि सत्तावान् द्रव्यत्वादित्यादावेकस्य साध्यवतो भेदस्यान्यस्मिन् साध्यवति सत्त्वादव्याप्तेर्नानाव्यक्तिसाध्यकेऽपि एतद्वृत्तिधर्मवानेतत्त्वादित्यादावव्याप्त्यसम्भवान्नानाव्यक्तिसाध्यकेति नोक्तं तथा च द्वितीयलक्षणाभिप्रायेण धूम

इति मूल नानाधिकरणसाध्यकसामान्योपलक्षणमिति भाव ॥

साध्यासामानाधिकरण्यानधिकरणत्वमित्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविलक्षणेऽपि द्रव्य सत्त्वादित्यादावतिव्याप्तिर्न सम्भवति सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्तायामपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्त्वात् किन्तु वह्निमान् धूमादित्यादावव्याप्ति स्वावयवाद्यवच्छेदेन धूमादौ वह्न्यादिसामानाधिकरण्याभावसत्त्वात् साऽपि हेतुतावच्छेदकसम्बन्धेन यद्धेतुमत्तदवच्छिन्नत्वेनाभाव विशेष्य वारयितु शक्यते इत्यभिप्रायेण तत्पद तादृशाभावपरतया व र्णयत सार्वभौमस्य मतमुपन्यस्यति केचित्त्विति ॥

(दी०) केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवदवृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः । तादृशाभावश्च सम्बन्धान्तरेण तत्रैव वर्तमाने सुलभः व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वं सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् । न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः विशिष्टस्यातिरिक्तत्वात् । अनतिरिक्तत्वे तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया व्याप्तत्वात् केवलान्वयिनि चाव्याप्तेरभिधान द्वितीयलक्षणाभिप्रायेणेत्याहुः । तच्चिन्त्यम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन सामानाधिकरण्यस्य वा अभाव गुणेऽवगाहते न तु सत्तायामेव द्रव्यवृत्तित्वाभावं सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादितर्वजनसिद्धप्रतीतिबाधितत्वात् बाधकाभावाच्च संयोगतदभावयोरवच्छेदकभेदेनैकत्र

प्रतीत्या तदुभयोरेकत्र सिद्धिः । अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच । तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयं तद्वृत्तिभिन्नत्वस्योपाधित्वात् । किञ्चेदमिदानीमितिप्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ॥

(गा०) हेत्वाधिकरण इति सप्तम्यर्थो ऽभावान्वितमवच्छिन्नत्वं तेनैव सम्बन्धेनेति तृतीयार्थोऽपि 'वृत्त्यन्वितमवच्छिन्नत्वं वृत्तिपदस्य सम्बन्धार्थकत्वे तु अभेद एव तदर्थः अनधिकरणत्वपदस्याधिकरणत्वाभावो ऽभावमात्रं वा यद्यर्थः स्यात्तदा अव्याप्यवृत्त्याधिकरणताया अपि अव्याप्यवृत्तितया सत्त्वादौ द्रव्यावच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकरण्यरूपतदभावाभावस्य चाक्षतत्वादतिव्याप्तिस्तदवस्थैवेत्यनधिकरणपदमधिकरणभेदवदर्थकतया व्याकरोति नदधिकरणेति । यद्यप्यधिकरणभेदेनाभावभेदाभावात्संयोगादिना धूमाधिकरणपर्वताद्यवच्छिन्नो यः सम्बन्धान्तरेण तद्वृत्तिरूपादिनिष्ठवह्न्यादिमत्संयुक्तत्वाभावस्तस्यैव स्वावयवावच्छेदेन धूमादौ वर्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटं तथापि तादृशहेत्वधिकरणावच्छिन्नत्वविशिष्टाभावानधिकरणत्वस्यैव विवक्षणीयतया न दोषः । रूपे पर्वते न वह्निमत्संयुक्तत्वमितिवद्धूमे पर्वते न वह्निमत्संयुक्तत्वमिति· प्रतीत्यनुदयात् पर्वतावच्छिन्नत्वविशिष्टनिरूपिताया वह्निमत्संयुक्तत्वाभावीयविलक्षणाधिकरणताया रूपादावेवोपगमात् अभावाधिकरणतायामेव चाधिकरणविशेषावच्छिन्नत्वं निवेशनीयं तावतापि धूमरूपयोरभिन्नस्याप्यभावस्य परस्परानवच्छेदकावच्छिन्नाधिकरणताभेदेन कथितदोषनिराकरणसम्भवात् । उभयत्र हेतुतावच्छेदकसम्बन्धप्रवेशप्रयोजनं क्रमेण दर्शयति तेनेति । स्वावयवे संयोगेनावृत्तावपीत्यन्वयः । तथा च स्वावयवावच्छेदेन साध्यवत्संयुक्तत्वासत्त्वेन तदभावस्याक्षततया प्रथमतो हेतुता-

घच्छेदकसम्बन्धानिवेशे स्वावयवरूपस्याधिकरणावच्छिन्नसाध्य वत्संयुक्तत्वाभावानधिकरणत्वविरहेण संयोगेन धूमहेतौ क स्यापि साध्यस्य व्याप्तिर्न स्यादितिभावः । यद्यपि तादृशस म्बन्धानिवेशेऽपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धू मादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाववृत्तेः पर्वता देरपि कालोपाधितया तादृशाभावावच्छेदकत्वादव्याप्तिता दवस्थ्यं तथापि इदानीमितिप्रतीतिनियामककालस्याव च्छेदकत्वादिहेतिप्रतीतिनियामकदेशनिष्ठावच्छेदकताया वैलक्ष ण्यं दुरपह्नवं यदभावात्पर्वते धूमे न वह्निमत्संयुक्तत्व मितिप्रत्ययाभावो हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेवाभावे निवेश्यमतो न दोषः । न च कालोपाधेरवच्छेदकताया मवच्छेद्याधिकरणेनावच्छेदकस्य कालिकसम्बन्धो नियामक इत्य च तादृशसम्बन्धानवच्छिन्नत्वमेव देशस्यावच्छेदकता या वैलक्षण्यम् । अन्यस्य दुर्वचत्वात् तथा च व्य भिचारिणि कालिकसम्बन्धेन हेतौ वर्तमानसाध्यसामानाधि करण्याभावे व्यभिचारनिरूपकहेत्वधिकरणावच्छेदकताया का लिकसम्बन्धानवच्छिन्नत्वविरहादतिव्याप्तिरितिवाच्यम् । का लिकव्याप्यवृत्तावपि कालिकसम्बन्धघटितात्मत्वाकाशत्वादिम यसामानाधिकरण्ये दैशिकसम्बन्धेनात्मत्वाद्यनधिकरणकालस्य दे शविधयैवावच्छेदकत्वात् कालविधया तस्यावच्छेदकत्वे तादृश सामानाधिकरण्यस्य कालिकाव्याप्यवृत्तित्वापत्तेः कालिक सम्बन्धानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधयाव च्छेदकताया स्वीकरणीयत्वात् । हेत्वधिकरण इत्यत्र हेतुपदम् अ धिकरणभिन्नत्वानुयोगितत्तद्धेतुपरम् । अतो धूमाद्यन्तरसंयुक्त स्यानयवाद्यवच्छेदेन धूमादस्तादृशाभाववत्त्वेऽपि न क्षतिः । एवं च व्याप्ते प्रतिधूमादभिन्नत्वेऽपि केनापि रूपेणानुगतानां तासां धूमत्वा दिकमेवावच्छेदकम् । यत्तु हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना याधिकरणता तदन्यत्वेन सा ध्यसामानाधिकरण्याभावाधिकरणताया विशेषणीयत्वान्नैव दो षः न वा अननुगमः एवं च कालोपाधिविधया हेत्वधिकरणदे शस्यावच्छेदकत्वेनातदोषस्य हेतुतावच्छेदकसम्बन्धावच्छि

त्रावच्छेदकत्वनिवेशेनापि वारणसम्भवः पर्वतरूपादौ हेतुतावच्छेदकसम्बन्धावच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभाववत्त्वाप्रसिद्धावपि रूपादिनिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदस्याक्षततया तदन्यत्वेन धूमादौ लक्षणसमन्वयादिति । तन्न साधु । तथा सति किञ्चेत्यग्रिमदोषासङ्गतेः गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणताया एवोक्ताधिकरणताभिन्नायाः प्रसिद्धेः । वह्निमति चेति । तथा च तेनैव सम्बन्धेनेत्यनुक्त्वा यत्किञ्चित्सम्बन्धेनेत्युक्तौ पर्वतावच्छिन्नवह्निमत्संयुक्तत्ववत्यपि तदवच्छिन्नवह्निमत्समवेतत्वाभावसत्त्वात् धूमस्य वह्निव्याप्यत्वं नोपपद्यत इति भावः । साध्यवत्सम्बद्धत्वसामान्याभावानिवेशे वह्निमत्समवेतत्वसामान्याभावस्य लक्षणाघटकत्वेऽपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्सम्बद्धत्वसामान्याभावस्याप्रसिद्ध्या ऽसम्भवो बोध्यः साध्यवदसम्बद्धस्य गगनादेः हेतुमति सम्बन्धासम्भवादवच्छेद्याधिकरणसम्बन्धिन एवावच्छेदकतया तन्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात् । न क्षतिरिति नाव्याप्तिः नासम्भवश्चेत्यर्थः । साध्यवत्त्वं साध्यतावच्छेदकसम्बन्धेन बोध्यम् । तेन समवायेन वह्नौ साध्ये संयोगेन धूमे पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नातिव्याप्तिः न वा सद्धेतावपि यत्किञ्चित्सम्बन्धेन यः साध्यवान् तद्वृत्तित्वसामान्याभावस्यासत्त्वेऽपि नातिव्याप्तिः । साध्यं चोपलक्षणविधया ऽभावप्रतियोगितावच्छेदककोटौ निवेशनीयं न तु विशेषणविधया तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्त्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभावसत्त्वेऽपि गन्धवान् पृथिवीत्वादित्यादौ मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यभावसत्त्वात्तादृशवृक्षाद्यवच्छेदेनैतद्वृक्षत्वादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्त्वेऽपि कपिसंयोगि एतद्वृक्षत्वादित्यादौ नाव्याप्तिः तत्तत्कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्र हेतौ तादृशसाध्योपलक्षितधर्मिवृत्तित्वसत्त्वात् न चैवमपि धूमादौ पर्वतादिवृत्तेरनवच्छेदको यो देशः कालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमा-

दौ सत्त्वाद्व्याप्तिदुर्वारेतिवाच्यं तत्तद्देशकालावच्छिन्नपर्वतादे र्धूमाद्यसम्बन्धितया धूमादावभाववृत्तावपि तादृशस्यानवच्छेदकत्वात् न चैवमुत्पत्तिक्षणादिविशिष्टपर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्यनुपपत्तिः द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमित्यादिप्रतीतिवदुक्तप्रतीते सामानाधिकरण्यावच्छेदकत्वाभावावलम्बनता न सम्भवति विशेष्यस्यावच्छेदकत्वे विशिष्टस्यानवच्छेदकत्वासम्भवादिति वाच्यं तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्टपर्वताद्यवच्छेद्यत्वाभावावगाहितयैवोपपत्तेः उत्पत्तिक्षणे पर्वते धूमस्य न वह्निमत्संयुक्तत्वमित्यादौ पर्वतावच्छिन्नं यद्धूमस्य वह्निमत्संयुक्तत्वं तस्योत्पत्तिक्षणो नावच्छेदक इत्यादिरप्यर्थः सम्भवति धूमनिष्ठवह्निमत्संयुक्तत्वाभावे उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नाय पर्वतस्य प्रतियोग्यवच्छेदकतया तदन्तर्भावेन द्वयोरभावावच्छेदकत्वस्यासम्भवात् घटपटोभयाधेयत्वाभावाधिकरणतावत् । एतेनोक्तोभयावच्छिन्नसाध्यसामानाधिकरण्याभाववत्त्वव्यावर्तनाय हेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं केषाञ्चिदनुपादेयमथ तथा सति वह्न्यादिनिष्ठधूमसामानाधिकरण्याभावस्याप्ययोगोलकस्थाययोभयावच्छिन्नतया हेतुतावच्छेदकसम्बन्धेन हेतुमन्मात्रावच्छेद्यतयाऽतिव्याप्तिप्रसङ्गाच्च । केचित्तु विशिष्टपर्वतादेरवच्छेदकतामादायाव्याप्तिवारणायावच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्वमपि निवेशनीयम् । एवं च पर्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वस्यापि व्यावृत्ति पर्वतादेः स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनोऽवच्छेदकत्वात् तन्निष्ठाभावावच्छेदकतया अविरोधाद्यावदन्तस्काल्पावच्छिन्नयोगमादित्याहु । हेतुमदसम्बद्धे साध्यसामानाधिकरण्याभावस्यानुक्त्या हेत्वधिकरणावच्छिन्नत्वपरिहारः तु नानवच्छेदकसम्बन्धेन हेतुमत्सम्बद्धे हेतुमदवच्छिन्नसाध्याभावाप्रसिद्धेः तादृशेति । हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तिघटनस्य तेन सम्बन्धेन हेत्वधिकरणावच्छिन्नाभावप्रत्यर्थं तत्रैव तादृशहेतुमत्त्वेय । न च तथापि पर्वतादौ वह्निमत्संयुक्तत्वाद्यभावाव्याप्यवृत्तित्वात् तत्राधिकरणावित्व

स्यावच्छेदकत्वं निर्युक्तिकं प्रतियोगिमत्यभाववृत्तावेव विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणात् धूमवत्कपालादिसमवेतवह्निमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभावसौलभ्येऽपि एतद्रूपवानेतद्रसादित्यादावेतद्रूपवत्समवेतत्ववति हेत्वधिकरणावच्छेदेन साध्यसामानाधिकरण्याभाववृत्त्यसम्भवात् एतद्रूपादिमति सम्बन्धान्तरेण वर्तमाने साध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणानवच्छिन्नत्वात् निरुक्ताभावाप्रसिद्धेर्दुर्वारत्वादिति वाच्यं पर्वते रूपे न वह्निमत्संयुक्तत्वमितिप्रतीतिबलेन व्याप्यवृत्तेरपि सामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात् । यत्तु व्याप्यवृत्तेरभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमे हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः तथा च धूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसम्बन्धेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायां च हेत्वनुयोगिकत्वस्याभावेनोभयाभावसत्त्वाल्लक्षणसमन्वय इति । तन्न । व्याप्यवृत्तेरवच्छेदकत्वानुपगमे पृथिवी रूपादित्यादावतिव्याप्तिः पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्याक्षतत्वात् । अथ हेत्वधिकरणावच्छिन्नत्वस्थानेऽवच्छिन्नत्वहेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वान्नायं दोषः जलरूपादिनिष्ठपृथिवीसमवेतत्वाभावाधिकरणतायामवच्छिन्नत्वविरहेणोभयाभावसत्त्वात्तावतैव दर्शिताप्रसिद्धेरपि निवारितत्वात्तादृशोभयाभाववदधिकरणतावदन्यत्वमेव निवेशनीयं न तूक्ताधिकरणतासामान्ये हेत्वनुयोगिकत्वतादृशोभयाभाववत्त्वोभयाभावः प्रयोजनविरहादितिचेत् । एवमपि वक्ष्यमाणायाः कालिकसम्बन्धेन हेतावव्याप्तेरसङ्गतिर्दुर्वारैव । तत्र कालिकसम्बन्धेनावृत्तौ गगनादावेव दर्शितोभयाभाववत्साध्यसा-

मानाधिकरण्याभावाधिकरणताया अप्रसिद्धे अवृत्तावेव सर्वत्र तादृशाभाववत्त्वाप्रसिद्ध्या सम्बन्धान्तरेण वर्तमानपर्यन्तानुधावनवि रोधश्च । तस्माद्व्याप्यवृत्तेरवच्छेदकत्वमेव ग्रन्थकारानुमतमित्य वधेयम् । द्रव्य सत्त्वादित्यादावाशङ्कितातिव्याप्तिमुद्धरति व्यभिचारि णश्चेति । तादृशेति हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः । अवच्छेदकत्व सप्तम्यर्थः । तादृशाभाववत्त्व हेतुतावच्छेदकसम्ब न्धेन साध्यवद्वृत्तित्वाभाववत्त्वम् । अत्र प्रमाणाकाङ्क्षायामाह सत्तायामिति । तादृशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्ताया तदनवच्छेदकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादि ति भावः । एव सत्ताया द्रव्यत्वसामानाधिकरण्याभावोपगमे विशिष्टसत्त्वे गुणाद्यन्यत्वविशिष्टसत्तात्वाद्यवच्छिन्ने अव्याप्तिरिति गुणाद्यवच्छेदेन साध्यसामानाधिकरण्याभाववत्या केनापि रू पेण तदनधिकरणत्वासम्भवादितिभावः । विशिष्टस्येति । तथा च विशिष्टसत्त्व द्रव्यमात्रवृत्ति तदधिकरणत्व न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववत्त्व मिति नाव्याप्तिरितिभावः । यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधि करणावच्छिन्नत्व निवेश्यापीयमव्याप्तिर्न शक्यते वारयितु तथापि प्रकारान्तरेणाव्याप्तिवारणसम्भवे लक्षणे ऽधिकनिवेश नमनुचितमित्यभिप्रेत्य विशिष्टस्यातिरिक्तत्वपक्ष आश्रित । न च हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकम् । अन्यथा इद स्पर्शवत् भूतत्वमूर्तत्वोभयस्मादित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वाधिकरणे गगने मनसि च साध्यसामानाधिकरण्य विरहेणाव्याप्तिप्रसङ्गादितिवाच्यम् । उभयत्वस्यैकविशिष्टापरत्वरूप तामनभ्युपगम्य विशिष्टव्यातिरिक्तत्वेन तत्र स्वावच्छिन्ननिरूपि ताधिकरणत्वरूपपरम्परासम्बन्धेनाभयत्वस्यैव हेतुत्वमिति स्वीकारेणैव वा तत्रान्यथा समाधानसम्भवात् । ननु द्रव्य गुणाद्यन्यत्वे सति सत्त्वादित्यादौ विशिष्ट स्यातिरिक्ततापक्षमवलम्ब्याव्याप्तिवारण न विचारसह त थाहि गुणादिवृत्तिसत्त्वादौ गुणाद्यन्यत्वविशिष्टसत्तादेरति रिक्तत्व ऽनुगतधर्माभावादिः एव यन्निवृत्तित्वविशिष्टस्या प्यविनिवृत्त्यनुपपत्तेः न च तत्प्रतियोगिवृत्तित्वविशिष्टसत्ता

दीनां मिथो भेदेऽपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यं शुद्धसत्त्वादौ तत्तद्व्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतां तदेकत्वासम्भवात् तदनभ्युपगमे तस्यावृत्तित्वप्रसङ्गात् एवं सर्वेषामेव वस्तूनां तत्तत्क्षणवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभङ्गापत्तिपर्यवसानं दुर्वारमेव । अथ प्रत्यभिज्ञाद्यनुरोधेन एकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव । परे तु गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्तीदानीं पूर्वक्षणवृत्तित्वविशिष्टघटत्वं नास्तीतिप्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्विशेषणविशिष्टसत्त्वघटत्वादयः स्वीक्रियन्ते तदवलम्बनेनैव तादृशप्रतीत्युपपत्तिः द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेण चानुगतसत्त्वादेर्न द्रव्यत्वानुमापकता स्वीक्रियते अपि तु तदन्यतादृशविशेषणविशिष्टगुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षतिरिति चेत् । तादृशवस्तुनां केन रूपेण व्याप्यता न द्रव्यवृत्तित्वादिविशिष्टत्वेन तादृशरूपस्याव्याप्यानुगतधर्मसाधारण्यात् नापि तादृशविशेषणविशिष्टतद्व्यक्तित्वादिना तादृशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात् तद्व्यक्तित्वानुपस्थित्याद्यनुमानानिर्वाहाच्च । एवं विशिष्टसत्ता नास्तीत्यत्र विशिष्टसत्तात्वावच्छिन्नाभावस्य न विधेयतासम्भवः तद्रूपावलीदानुगतसत्तावति तद्रूपावच्छिन्नाभावासम्भवात् । नापि तत्तद्व्यक्तित्वावच्छिन्नाभावस्य तत्तद्व्यक्तित्वस्य प्रतियोगिकोटावनुल्लेखात् विशेषणावच्छिन्नप्रतियोगिकसम्बन्धो विलक्षणः स च नानुगतसत्तायाः सम्बन्धोऽपि तु अतिरिक्तविशिष्टसत्ताया एवेति प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिसत्तासाधारण्येऽपि तत्र विशिष्टाभावो ऽमत एव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वे ऽपेक्षितत्वादिति चेत् । तर्हि गुणादिसाधारणसत्ताया एव तादृशातिरिक्तः सम्बन्धः स्वीक्रियतां किं सम्बन्धान्तरकल्पनेनेत्यभिप्रेत्याह मतातिरिक्तं चेति । विशेषणविशेष्यसम्बन्धस्यैवेति सत्त्वगुणाद्यन्यत्ववैशिष्ट्यपर्यवेत्यर्थः । परम्परया स्वरूपसम्बन्धेन स्वावच्छिन्ननिरूपितसत्तावादिसम्बन्धेनेति यावत् । स्वान्यत्वादिति गुणाद्यन्यत्ववैशिष्ट्यावच्छिन्नाधिकरणताया गुणादावसत्त्वाद-

शसम्बन्धेन तद्वैशिष्ट्यस्य ज्ञायमानवृत्तित्वादिति भावः । प्रका-
रेण सत्ताया व्याप्यत्वव्यवच्छेदः । यत्र विशेषणवैशिष्ट्यावच्छिन्नस-
त्ताहेतुकद्रव्यत्वाद्यनुमितिरभिमता तत्र तद्वैशिष्ट्यानुमितिरेवोपेयते
वैशिष्ट्ये परम्परासम्बन्धेन व्याप्तिधीविरहे चानुमितिप्रसिद्धे-
वेतिमात्र । यद्यपि विशिष्टनिरूपितसम्बन्धस्य विलक्षणत्वे
तादृशसम्बन्धेन सत्ताया अपि व्याप्यत्वं निर्वहति तथापि
विशेषणतावच्छिन्ननिरूपितसमवायत्वादिना न सत्तादिसम्बन्धता
किं तु विशिष्टसत्तावानिति प्रत्यये वैशिष्ट्यस्यैव सत्तादिवि-
शेषणतापन्नस्योक्तपरम्परासम्बन्धेन धर्मिणि विशेषणत्वोपगमाद-
तिप्रसङ्ग इत्याशयेनेदमभिहितम् । नन्वेवं रीत्या प्रथमलक्षणपरि-
ष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यसङ्गतिः तथापि सम्ब-
न्धान्तरेण हेतुमत्त्वे हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्या-
भावप्रसिद्ध्या लक्षणगमनसम्भवादत आह केवलान्वयिनीति । द्वि-
तीयलक्षणेनेति । न च तद्धेत्वनेनोभयत्वावच्छिन्नस्यैव परामर्शात्प्रथमल-
क्षणे ऽव्याप्त्यभावे ऽसङ्गतिर्दुर्वारैवेति वाच्यम् । केवलान्वयिसाध्य-
के धूमे चाव्याप्तिप्रदर्शनादुभयत्वेनोपस्थितेऽपि लक्षणद्वये यथायोगं
तत्तत्स्थले ऽव्याप्त्यन्वये तात्पर्यात् । यद्यपि धूमादावपि साध्य-
सामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य ना-
व्याप्त्यवकाशः तथापि यत्किञ्चित्साध्यव्यक्तिभेदनिवेशाभिप्रा-
येण द्वितीयलक्षणस्यैव यत्किञ्चित्साध्यसामानाधिकरण्याभाव-
निवेशाभिप्रायेणैव प्रथमलक्षणस्यापि नानाव्यक्तिसाध्यके ऽव्या-
प्तिप्रदर्शनमविरुद्धम् । मूले च यत्किञ्चित्साध्यानधिकरणाधिकरण-
त्वमुपलक्षणं यत्किञ्चित्साध्याधिकरणावृत्तित्वस्यापि बोध्यं तेन प्र-
थमलक्षणव्याख्यानसम्प्रदायस्य केवलान्वय्युक्त्यनुरूपस्य नापवाद इति
ध्येयम् । सामानाधिकरण्यस्याव्याप्यवृत्तितायां प्रमाणसिद्धा-
यामेव दर्शितातिव्याप्तिर्वारयितुं शक्यते तत्रैव न प्रमाण-
मुत्पन्नानित्यविषयकत्वादित्याह सत्तायामिति । प्रतीतिरिति । प्र-
मायां गुणेऽवगाहन इत्यनेनान्वयः । अवच्छेदकस्येति निरूपकत्व-
स्यार्थः तेन सामानाधिकरण्यस्य व्याप्यवृत्तितामते तदव-
च्छेदकस्याप्रसिद्धावपि न क्षतिः उक्तपरामर्शनौ भ-
वच्छेदकत्वानुरोधात् अवच्छेदकस्याभावावगाहिता न सम्भवती-

स्याशङ्क्याह परम्परेति । ननु उक्तपरम्परासम्बन्धो न वृत्तिनियामकः आकाशं द्रव्यत्वसामानाधिकरण्यवदित्यप्रत्ययादित्युक्तसम्बन्धावच्छिन्नाभाव एवाप्रामाणिक इति तादृशाभावावलम्बनतापि नोक्तप्रतीतेः सम्भवति इत्याशङ्कोद्धारायानुरूपं दृष्टान्तमाह द्रव्यत्व इति । गुणस्यावच्छेदकतानियामकद्रव्यत्वसम्बन्धशून्यतया द्रव्यत्वनिष्ठाभावावच्छेदकत्वं न सम्भवतीत्यगत्या गुणनिष्ठो द्रव्यत्ववृत्तिपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन तादृशसामानाधिकरण्यस्य वाभाव एव तादृशप्रतीतिविषय इत्यवश्यमुपेयं तद्वदत्रापीत्यर्थः. । स्वरसतो यादृशशब्दाद्यादृशोऽर्थः प्रतीयते तादृशशब्दोल्लिखितप्रत्यये तादृशार्थविषयकत्वमेवासति बाधके युज्यते इत्याशयेन दर्शितप्रतीतेः सत्तायां गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीतिमाह सत्ता न द्रव्यवृत्तित्वाभाववतीति । न च द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्तायामसम्मतेऽपि सत्त्वान्नैतस्याः प्रतीतेः बाधकत्वं सम्भवति विरोध्यविषयकत्वादिति वाच्यं तादृशशब्देन द्रव्यवृत्तित्वाभाववद्भेदस्यैव प्रत्यायनात्तदाकारप्रतीतेरपि तद्भेदावगाहितया बाधकत्वात् भेदस्याव्याप्यवृत्तिताविरहेण सामानाधिकरण्याभाववद्भेदस्य तदभावविरोधित्वात् यदि च भेदस्याव्याप्यवृत्तित्वमतमवलम्ब्य तादृशप्रतीत्योर्विरोध्यविषयकत्वमुपपाद्यते तदा सत्तायां द्रव्यत्वसामानाधिकरण्याभावेऽपि तदधिकरणभिन्नत्वस्याक्षततया ऽतिव्याप्तिवारणमशक्यमिति भावः । अव्याप्यवृत्तित्वसाधकदर्शितप्रतीतेरभावरूपाविशेष्ये सत्तावृत्तित्वावगाहितया उपगमात्तदभावविशेष्यकसत्तावृत्तित्वविरोधिविषयकप्रत्ययं बाधकतयोपन्यस्यति द्रव्यवृत्तित्वाभाव इति । यद्यपि द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं सत्तात्वसामानाधिकरण्यरूपं सामानाधिकरण्यस्याव्याप्यवृत्तितामते ऽव्याप्यवृत्तीति तदनवच्छेदकगुणत्वाद्यवच्छेदेन द्रव्यवृत्तित्वाभावे तदभावः सम्भवत्येवेति न विरोधः तथाप्युक्तयुक्त्या दर्शितप्रतीतेः सत्तावृत्तिभेदावगाहितया बाधकत्वं दुर्वारमेव । यत्तु सत्तावृत्त्यभावे ऽवच्छेदकभेदेन सत्तावृत्तित्वाभावसम्भवेऽपि अवच्छेदका-

प्रतीतिदशायां जायमानतत्प्रत्ययस्य सत्त्वावृत्तित्वग्रहप्रतिबन्धकतया तदुत्तरं जायमानायाः सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमितिप्रतीतेः सामानाधिकरण्याभावे सत्तावृत्तित्वावगाहित्वासम्भवेन गुणनिष्ठसामानाधिकरण्यावच्छेदकत्वाभावावगाहित्वे सर्वत्रैव तदवगाहित्वकल्पनमुचितमिति भाववर्णन तदसत्। एवं सति अवच्छेदकविषयिण्याः द्रव्यत्वसामानाधिकरण्यत्वेन सत्तायां तत्सामानाधिकरण्यविषयकप्रतीतेरपि बाधकता सम्भवेन सत्ता न द्रव्यवृत्तित्वाभाववतीत्यादिप्रतीतिपर्यन्तानुधावनस्य निर्बीजतापातात्। नन्वेव सयोगादिमति सयोगोदरप्यभावो मा सैत्सीत् मूले न कपिसयोग इत्यादिप्रतीतेरपि मूलनिष्ठकपिसयोगावच्छेदकत्वाभावावलम्बनतयोपपत्तेरित्यत आह बाधकाभावादिति। तत्र कपिसयोगाभावो वृक्षावृत्तिरित्यादिप्रत्ययस्याननुभवादिति भाव। सयोगाभावे वृक्षावृत्तित्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्ताऽवृत्तित्वप्रत्ययेऽपि विवादसम्भवात्र सामानाधिकरण्याभावस्य न प्रत्यक्षसम्भवस्तत्र तत्सत्त्वे मानाभावेन तदनधिकरणत्व निष्प्रत्यूहमिति अतिव्याप्तिरित्याह अतीन्द्रियसाध्यकेति। इद गुरु द्रव्यत्वात् पृथिवीत्वाकाशाभावादित्यादावित्यर्थः। अथवा स्तम्भादौ पिशाचत्वाभावस्येव स्तम्भत्वादौ पिशाचत्वसामानाधिकरण्याभावस्य महति वाय्वादौ रूपाभावस्येव महावायुत्वादौ रूपसामानाधिकरण्याभावस्यापि प्रत्यक्षत्वादुभयत्रातीन्द्रियत्वोपादानम्। तत्रेति। गुरुत्वादिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्यातीन्द्रियप्रतियोगिकत्वेनातीन्द्रियतया ऽतीन्द्रियेहेतुकस्थले च धर्मिण एव तथात्वेन हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासम्भवेन तत्र तदसिद्धेरित्यर्थः। तदभाववद्वृत्तित्वेन गुरुत्वाभाववद्वृत्तित्वेन तत्र द्रव्यत्वादौ तत् गुरुत्वादिमद्वृत्तित्वाभाववत्त्वम्। अनुमेयमिति तद्विरुद्धदृष्टान्तेनेत्यादि। तद्वदिति गुरुत्वादिमदित्यर्थः। उपाधित्वादिति तद्विरुद्धदृष्टान्ते तद्वृत्तिभिन्नत्वस्य साध्यव्यापकतायाः पक्षीभूत प्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकतायाः सुग्रहत्वात् पक्षे साध्यसन्देहेन पक्षावृत्तिताहशोपाधौ साध्यव्यापकत्वानिश्चयासम्भ·

घेऽपि सन्दिग्धोपाधित्वस्य दुर्वारत्वात् अनुकूलतर्कविरहे सन्दिग्धोपाधेरपि दूषकत्वादिति भावः । नन्वेवमतीन्द्रियसंयोगादेरपि अव्याप्यवृत्तित्वं न स्यात् तद्वति तदभावस्य प्रत्यक्षासम्भवेनासिद्धेः अनुमानस्याप्रयोजकत्वात् । एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण इति ग्रन्थेनाव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्धृता तथा च तन्मते युक्तिर्भवतु मा वा उभयथापि तदाश्रित्य पूर्वपक्षलक्षणं व्याचक्षाणो नापराध्यतीत्याशङ्क्य दूषणान्तरमाह इदमिदानीमिति । कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः । अभावादेरिहेति प्रत्ययनियामको यो दैशिकविशेषणताविशेषस्तत्र तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानं न चेदानीमितिप्रतीतौ सम्बन्धवैलक्षण्याभावेऽपि कालत्वेनाधिकरणावगाहनादिहेतिप्रत्ययात्तस्य वैलक्षण्यमुपपद्यते इति किं सम्बन्धवैलक्षण्येनेति वाच्यं सम्बन्धविशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वात् इदानीं कालत्वाभाव इत्यादिप्रतीत्या काले कालत्वाभाववृत्तेः प्रामाणिकत्वेऽपि काले कालत्वं नास्तीतिप्रतीत्यनुदयान्नास्तीत्याकारकप्रतीतौ कालिकसम्बन्धव्यावर्त्तकरूपावच्छिन्नाया एव विशेषणताया नियामकत्वस्यावश्यकत्वात् दैशिककालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धतावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धेर्निष्प्रत्यूहत्वाच्च । सङ्केताविति कालत्वादिसाध्यकघटादिहेतावित्यर्थः । काल इति कालावच्छेदेनेत्यर्थः । अप्रसिद्धेरिति वृत्तिमतः कालावच्छेदेन कालत्वादिसामानाधिकरण्यवत्त्वादवृत्तिनिष्ठतदभावस्य च कालानवच्छिन्नत्वादवच्छेद्याधिकरणासम्बन्धिनोऽनवच्छेदकत्वात् । अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव कालवृत्तित्वाभावः प्रसिध्यति महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वासत्त्वात् स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाभावावच्छेदकत्वसम्भवात् । न च तादात्म्यसम्बन्धो नावच्छे-

दैशिकतानियामकं रूपे पर्वते न वह्निमत्संयुक्तत्वमितिप्रतीतिवत् स्व
स्मिन् रूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीतेः सविवादत्वादिति
वाच्यं तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तद्वृत्तिकालिकसम्ब
न्धेन स्वासम्बद्धे हेतौ तेन सम्बन्धेन हेतुमत्त्वावच्छेदेन साध्यासा
मानाधिकरण्यव्यभिचारविरहादतिव्याप्तेः स्फुटतया तद्वारणापेक्षाया अनु
चितत्वापातात्। अत्र केचित् कालिकसम्बन्धेन गगनादेरपि वृत्तिम
त्त्वमताभिप्रायकोऽयं ग्रन्थः तथा च कालावच्छेदेन महाकालेऽपि का
लिकसम्बन्धेन साध्यवद्वृत्तित्वमस्तीति तद्विरहाप्रसिद्धिर्न विरुध्यत
इति वदन्ति। वस्तुतस्तु स्वासमानाधिकरण्यतदभावयोर्वृत्त्यव
च्छेदकत्वे स्वाधिकरणत्वमेव नियामकं न तु सम्बन्धितामात्रं
स्वाधिकरणावच्छेदेनैव स्वस्मिन् तत्प्रतीतेरनुभवसिद्धत्वात् अत एव
सम्बन्धान्तरेण सम्बद्ध इत्युपेक्ष्य सम्बन्धान्तरेण वर्तमान इत्यभि
हितं न चैवं तादात्म्यादिवृत्त्यनियामकसम्बन्धेन व्यभिचारिण्य
तिव्याप्त्यकथनान्न्यूनता दुर्वारैवेति वाच्यं तादृशसम्बन्धेन सा
ध्यवद्वृत्तेरस्य हेत्वधिकरणत्वस्य चाप्रसिद्ध्यातिव्याप्त्यसम्भवात् न
च तेन सम्बन्धेन सद्धेतौ लक्षणसङ्गमनाय वृत्तेरधिकरणताया अ
स्थाने प्रतियोगित्वानुयोगित्वयोरेव निवेशनीयत्वादतिव्याप्ते
र्दुरुद्धरत्वेनेति वाच्यं प्राचा तेन सम्बन्धेन व्याप्त्यनभ्युपगमसम्भवेन
दुष्टत्वादेरपि निवेशासम्भव इत्यभिप्रायेणैवातिव्याप्त्यनुद्भावनात्।
एतेन हेत्वधिकरणखण्डकालावच्छेदेन कालिकसम्बन्धेन तद्वृत्तौ
तद्विषयकज्ञान एव साध्यासामानाधिकरण्यप्रसिद्धिसम्भवे
ति न चैवमपि कालत्वेनात् सत्त्वादित्यादौ खण्डकालस्य
हेत्वनधिकरणतया हेत्वधिकरणावच्छिन्नसाध्यासामानाधिकरण्या
प्रसिद्धेर्दुर्वारत्वेति वाच्यं हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप
र्यन्तानिवेशेन वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वम
भिहितं तत्र तादृशधर्मस्यैव तन्मते स्वावच्छिन्नानिरूपिताधि
करणवृत्तित्वस्य सम्भवेन हेतुत्वस्यानुमततया उक्तस्थले स
धेस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेनावृत्तौ का
लिकसम्बन्धेन कालवृत्तौ गगनत्वादावेव तादृशसम्बन्धेन साध्य
वद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरिति निर
स्तं तादृशकाले उक्तज्ञानस्य विषयतासम्बन्धसत्त्वेऽपि तादृश

सम्बन्धस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनता-
विरहेण च तज्ज्ञानानधिकरणत्वात्तज्ज्ञाने ऽभाववृत्तौ तत्कालस्या-
नवच्छेदकत्वात् महाकालानुयोगिकविशेषणताविशेषेण घटा-
दिहेतुकस्थलाभिप्रायकोऽयं ग्रन्थः तादृशसम्बन्धेन हेतुमत्तायाः
खण्डकालेऽभावान्नोक्तदिशा प्रसिद्धिरित्यपि केचित्। अत्र स्वनिष्ठहे-
तुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतादृश-
सम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति
नोक्ताव्याप्त्यवकाशः स्वाश्रयपरमाण्ववच्छेदेन घटादौ वर्त्तमाने
कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्या-
नवच्छेदकतया तत्र लक्षणसमन्वयसम्भवात् केवलान्वयिसा-
ध्यके मेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धा-
वच्छिन्नसाध्यवद्वृत्तित्वसत्त्वात् स्वनिष्ठतदभावाप्रसिद्ध्याऽव्याप्ति-
र्न क्षतिमावहति मूलकृतैव तथाऽव्याप्तेर्वक्ष्यमाणत्वात्। यदि चैव-
मात्मभिन्नं ज्ञानवदन्यत्वादित्यादौ हेतोरात्मान्यसकलवस्त्वव-
च्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वात्। आत्मनश्च
केनापि सम्बन्धेन हेतुमत्त्वाभावात् तदवच्छेदेन हेतौ साध्यसामा
नाधिकरण्याभावस्याप्यसम्भवात् हेतुनिष्ठतादृशाभावाप्रसिद्ध्या-
व्याप्तिरिति विभाव्यते तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधि-
करणं तदवच्छेदेन स्वस्मिन् वर्त्तते योऽभावस्तत्प्रतियोगितानवच्छे-
दकतादृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वकत्वं व्याप्तिरित्येव विवक्ष-
णीयं कालत्ववान् घटादित्यादौ कालसमवेतत्वाद्यभाव एव प्रसिद्ध-
स्तत्प्रतियोगितानवच्छेदकं च कालिकसम्बन्धावच्छिन्नकालवृत्तित्व-
त्वादिकमिति लक्षणसमन्वयः। हेतुतावच्छेदकसम्बन्धेन यद्वृ-
त्तिमत्त्वनिष्ठतत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतत्स-
म्बन्धावच्छिन्नतन्निरूपिततद्धेतुमदधिकरणतावत्सामान्यकत्वं वा
वक्तव्यम् आत्मभिन्नं ज्ञानवदन्यत्वादित्यादावात्मावच्छेदेन घट-
त्वाभावादिनिष्ठस्वसामान्यवृत्तित्वाभावस्यानवच्छेदकं घटत्वाभा-
वज्ञानवदन्यत्वोभयाधिकरणसामान्यमिति लक्षणसमन्वयः उ-
भयाधिकरणत्वेनैव वह्निमान् धूमादित्यादौ धूमादिसंयोगि-
नः कपालादेर्घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेऽपि न
क्षतिः कपालादेः संयोगेन घटानधिकरणतयोभयाधिक-

रणतावत्सामान्यानन्तर्गतत्वात् अथवा हेतुतावच्छेदकसम्बन्धे-न यत्स्वाधिकरणं तदवच्छिन्नस्ववृत्तिकान्यहेतुतावच्छेदकसम्ब-न्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वाविवक्षणान्न कश्चिद्दोषः स-र्वत्र· सद्धेतावन्ततोऽवृत्तौ प्रसिद्धे साध्यसामानाधिकरण्या-भाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात् वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावे ऽयोगोलकादेरिव तद्-वृत्तित्वस्याप्यवच्छेदकत्वात् स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छि-न्नवृत्त्यनवच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसामानाधिकरण्या-भावकत्वं वा विवक्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः ॥

इति महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचिता
सिद्धव्याप्तिलक्षणविवृतिः समाप्ता ॥

अनुमानगादाधर्याम्।

व्यधिकरणधर्मावच्छिन्नाभावप्रकरणम्।

(चि०) अथेदं वाच्यं ज्ञेयत्वादित्यादौ समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् न चैवं घट एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वं हि व्यभिचारः न च वाच्यत्वाभावस्तादृशो घटे इतिचेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिस्तथा चाप्रसिद्धिः प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकस्तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् ॥

(दी०) समवायितयेति। वाच्यत्वं यथा न समवायि तथाग्रे वक्ष्यते। घटादिसमवायितयेत्यर्थ इत्यप्याहुः। प्रमेयसाध्यके च भावत्वेनाभावानामभावत्वेन भावानां वह्नित्वेन निर्वह्नौ अवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्यां च सर्वत्र प्रमेयमात्रस्याभावः सुलभः ॥

(गा०) अथ समवायितयेतिमूलं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमे एव सङ्गच्छते तादृशाभावाभ्युपगमे सर्वत्र तदभाववति हेतोर्वृत्तेरसम्भवः साध्याभाववद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसङ्गमने सर्वत्र व्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासम्भवेन सौन्दडमतमवलम्ब्य लक्षणकर्तुरीदृशाशङ्का न सङ्गच्छत इति चेत्। अत्रोपाध्यायानुयायिनः केवलान्वयिनि साध्याभावाप्रसिद्धिनिबन्धनस्य दोषस्योद्भावि-

तत्साध्याभावस्य कथञ्चिदप्रसिद्धावेव लक्षणस्य निर्दो
षतेत्यभिमानेनेयमाशङ्का तादृशाभिमानमेव निराकरिष्यत्यग्रे
तर्हीतिग्रन्थेन व्यधिकरणधर्मावच्छिन्नाभावोपगमे यथा व्य
भिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते
तथा व्याप्तिलक्षणेऽपि तादृशसाध्याभाव एव निवेश्यो
ऽन्यथासम्भवस्यातिव्याप्तेर्वा प्रसक्तव्याप्तेर्व्यभिचाररूपतानुप
पत्तेश्चेति पुनरप्रसिद्धिनिबन्धनाव्याप्तिः केवलान्वयिस्थले प
र्यवसितेति तदर्थः । न चैवमपि तत्तद्वह्नित्वावच्छिन्नाभावत्वा
वच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपेण साध्याभा
वस्य निवेशनीयतया वाच्यत्वत्वावच्छिन्नसाध्यकस्थले स
मवायित्वावच्छिन्नतदभावस्याप्यतादृशत्वात्तादृशाभावप्रसिद्धिरनुप
योगिनीति कथमयमाशङ्का साध्यप्रतियोगिकाभावमात्रनिवेशाभि
मानस्याशङ्काबीजत्वे केवलान्वयिसाध्यकस्थले व्यासज्यवृत्ति
रूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य च तादृ
शाभावस्य प्रसिद्धिसम्भवेन सौन्दडमतावलम्बनस्य निर्बीज
त्वापातादिति वाच्यं महानसीयवह्नित्वाद्यवच्छिन्नाभाववार
णाय साध्यतावच्छेदकापर्याप्तत्वसमानाधिकरणधर्मानवच्छेद
कताकप्रतियोगिताभावप्रतियोगिताकाभाव एव निवेश्य इ
त्यभिमानेनाशङ्कासङ्गतेः प्रमेयत्वादिना प्रमेयाभावे यत्र सा
ध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेयापर्याप्त तदवच्छे
दितघटत्वादिनिष्ठधर्मानवच्छेदकत्वप्रसिद्धेस्तत्समानाधिकरण
वृत्तितादृशावच्छेदकतानिरूपकप्रतियोगिताभिन्नं च व्यधिक
रणधर्मावच्छिन्नप्रतियोगिताभावमत्र यत्र यादृशं साध्यता
वच्छेदकं विशिष्टमविशिष्टं वा तत्र तदनवच्छिन्नत्वसमाना
धिकरणधर्मावच्छिन्नत्वाभावाभावत्वप्रतियोगितानिवेशाभिप्रायकोऽयं
ग्रन्थ इत्यप्याहुः । न चैवं प्रमेयत्वावच्छिन्नसाध्यकस्थलेऽपि
व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणघटकतासम्भवा
द्गौरवनिकृता तत्र गगनत्वघटत्वपटत्वोभयाद्यवच्छिन्नप्रमेया
भावपर्यन्तानुसरणप्रयासो व्यर्थ इति वाच्यं महानसी
यवह्नित्वाद्यवच्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्र
तियोगिताक साध्यतावच्छेदकापर्याप्तसाध्यनिष्ठधर्मत्वप्र

च्छेदकताकान्यप्रतियोगिताको वा ऽभावो निवेश्यस्तदभिप्रायेणैव तैस्तथाविधाभावानुसरणात् न च घटत्वपटत्वोभयावच्छिन्नाभावप्रतियोगिताचच्छेदकता साध्यवृत्तिधर्मनिष्ठैव घटत्वपटत्वयोः प्रत्येकं साध्यनिष्ठत्वादिति कथमसौ लक्षणघटक इति वाच्यं साध्यवृत्तिधर्मानिष्ठेत्यनेन यद्धर्मविशिष्टाधिकरणं साध्यवत्तत्त्वस्य विवक्षिततया घटत्वपटत्वोभयपर्याप्तावच्छेदकताया अन्यत्वप्रतियोगिकोटावनन्तर्भावात् । वस्तुतो वृत्तिमद्वृत्तयो यावन्तः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वमेव साध्याभाववदवृत्तित्वमित्यस्यार्थ इत्यभिप्रायकतयाथेत्यादिग्रन्थः सार्वभौमैर्व्याख्यातः दीधितिकृतामपि तादृशग्रन्थस्य तदभिप्रायकत्वमेवानुमतं कूटघटितलक्षणस्य स्वयमग्रे दूषणीयत्वेऽप्यापाततः सम्भवदुक्तिकतयैव तस्याशङ्कितुरभिप्रायविषयत्वौचित्यात् । व्यधिकरणधर्मावच्छिन्नाभाववादिमते निर्दोषस्यापि लक्षणस्य सम्भवेन तदुपेक्ष्य सदोषं कूटघटितलक्षणमवलम्ब्य प्रतियोग्यवृत्तिश्चेत्याद्यवतारणमनुचितमित्यभिप्रेत्यैव चाग्रे तल्लक्षणमाक्षेप्स्यमिति न सन्दर्भविरोधः । यत्समानाधिकरणा इत्यादिलक्षणाभिप्रायकता चात्र न युज्यते तादृशव्याप्तेः साध्याभाववदवृत्तित्वरूपत्वाप्रसक्तेर्मूलोक्तलक्षणपरिष्कारासम्भवात् । व्यभिचारशरीरे च साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपता न सम्भवतीत्यभिधानेनाव्यभिचारपदार्थरूपसाध्याभाववदवृत्तित्वाभावस्य व्याप्तित्वे निराकृते च साध्याभाववदवृत्तित्वपदार्थस्य व्याप्तित्वानभ्युपगमेऽपि न क्षतिरित्याशयेन यत्समानाधिकरणा इत्यादिनिर्दोषलक्षणमवलम्ब्यैव प्रतियोग्यवृत्तीत्यादेः स्वयमवतारणीयत्वात् । न च साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवद्वृत्तित्वस्यापि व्यभिचारपदार्थत्वसम्भवादुक्तव्याप्तेरव्यभिचाररूपत्वमक्षतमेवेति वाच्यं तस्य व्यभिचारपदार्थत्वे न चैव घट घटेत्यादिदर्शिताया ज्ञेयत्वादिहेतौ वाच्यत्वव्यभिचारितापत्तेर्दुर्वारत्वाद्वाच्यत्वादेः समानाधिकरणध-

र्मावच्छिन्नाभावाप्रसिद्धेः व्यधिकरणधर्मावच्छिन्नाभावकूटवति च हेतोर्वृत्तेरिति सर्वमनाकुलम् । एवं च कूटघटितलक्षणाभिप्रायेणैव प्रमेयसाध्यकस्थले उक्ताभावानुधावनं ग्रन्थकर्तुः सफलं घटत्वाद्यवच्छिन्नपटाद्यभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहादितिध्येयम् । ननु वाच्यत्वं पदशक्तिः सा च तत्तत्पदबोद्धव्यत्वप्रकारिका भगवदिच्छैव न तु पदार्थान्तरमपसिद्धान्तत्वात् । तथा च समवायित्वं समवायप्रतियोगित्वरूपं तदनुयोगित्वरूपं वा भवतु उभयथैव वाच्यत्ववृत्तीति तेन रूपेण तदभावस्य कथं व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं न च भगवदिच्छाया वाच्यत्वपदार्थत्वे पटादेर्घटादिपदावाच्यतानुपपत्तिः घटादाविव पटादावपि घटादिपदबोद्धव्यत्वप्रकारिकाया भगवदिच्छाया विषयतासम्बन्धेन सत्त्वात्तदिच्छाया एकत्वादिति वाच्यं यद्धर्मांशे यस्य प्रकारता तस्यैव धर्मिणो विशेष्यतासम्बन्धेन तद्धर्मप्रकारकत्वविशिष्टवत्त्वोपगमात् पटादेर्घटादिपदवाच्यतया भगवदिच्छयानवगाहनात्तत्र विशेष्यतासम्बन्धेन तद्बोद्धव्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेण तदवाच्यत्वोपपत्तेः न चैवं विशिष्टेच्छाया वाच्यत्वरूपत्वे विशेषणांशे समवायित्वाभावात्तेन रूपेण विशिष्टाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमव्याहतमेवेति वाच्यम् यतो विशिष्टाभावप्रतियोगिता न विशेषणान्तर्भावेन पर्याप्ता अपि तु विशेष्यांशमात्रे अवच्छिद्यते पुनरियं विशेषणेनेति प्रतियोगिताया अव्यासज्यवृत्तित्वात् । तथा च विशेष्यवृत्तेः समवायित्वस्य कथं प्रतियोगिताव्यधिकरणत्वमिति न च प्रतियोगिताया व्यासज्यवृत्तित्वानुपगमे सर्वत्र घटत्वेन घटपटोभयं नास्तीतिप्रतीति कथमुपपद्यताम् घटादिमति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वेन तद्विषयाभावासम्भवादिति अभावविशेषीयप्रतियोगित्वमवश्यमेव व्यासज्यवृत्त्युपेयं तथा सति च तत्र प्रतियोगितापर्याप्त्यधिकरणस्याभयत्वाद्यवच्छिन्नस्य प्रतियोगितावच्छेदकघटत्वादिविशिष्टत्वासम्भवाद्धर्मावच्छिन्ने प्रतियोगिताया पर्याप्तिः प्रतियोगिता

वच्छेदकविशिष्टतदवच्छिन्नस्यैव चाभावविरोधितया तादृशाभावस्य सार्वत्रिकत्वादिति वाच्यं प्रतियोगिताया अव्यासज्यवृत्तित्वेऽपि तत्रैकधर्मावच्छिन्नापर्याप्तिरूपविरोधशालिनो घटत्वघटपटोभयत्वयोः प्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वोपगमात्तादृशाभावस्य विरुद्धघटत्वपटत्वाद्युभयावच्छिन्नाभाववत्केवलान्वयित्वोपपत्तेः यद्यपि घटपटौ न स्त इत्यादिप्रतीतिविषयसमानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्तर्भावेण पर्याप्त तथापि तत्र द्वित्वधर्मितावच्छेदकतापन्नस्यैव घटत्वादेरवच्छेदकता प्रतीयते अत्र च स्वातन्त्र्येणापीति भेदः आस्तां चोभयाभावप्रतियोगिताया गत्यन्तराभावाद्व्यासज्यवृत्तित्वं तथापि विशिष्टाभावप्रतियोगितायास्तथात्वमप्रामाणिकमेव दण्डिपुरुषादिमति पुरुषत्वेन दण्डविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेरित्यत आह दीधितौ वाच्यत्वं यथेति । तथा वक्ष्यत इति । अयमाशयः । वाच्यत्वं शक्तिविषयत्वं न तु शक्तिर्धातुनैव शक्तिप्रतिपादनात् । प्रत्ययस्य निरर्थकतापत्तेः विषयत्वं च पदार्थान्तरमिति नैयायिकैकदेशिसिद्धान्तः तस्य च समवायो न सम्बन्धः अपि तु स्वरूपमेवेति समवायितया वाच्यत्वपदार्थाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेति एकदेशिमतानुयायितया मणिकारलिखनसङ्गतिरिति । घटादिसमवायितयेति । तथा च वाच्यत्वपदस्य भगवदिच्छापरत्वेऽपि नासङ्गतिरिति भावः । यथाश्रुतपरतयैवोपपत्तेः समवायिपदस्य विशेषपरतया व्याख्यानमनुचितमित्याहुरित्यनेनास्वरसः सूचितः । ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धेः सम्भवेऽपि प्रमेयत्वादिना प्रमेयसाध्यकस्थले साध्याभावाप्रसिद्धिर्दुर्वारैव प्रमेयसामान्यावृत्तिधर्मस्याप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नस्यापि तस्यासम्भवादित्यत आह प्रमेयसाध्यके चेति । भावाभावयोरभावौ समनियततयाऽभिन्नाविति तत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्यमित्येतादृशाभावोऽपि कूटघटनया परिष्करणीयसाध्याभाववद्वृत्तित्वरूपप्रथमलक्षणघटको भविष्यती-

त्यभिप्रायः । न च यदभावीयप्रतियोगितात्वेन साध्यताव-
च्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके घ-
टत्वादिसाध्यके वा तादृशाभावाप्रसिद्धिः निखिलव्यधिकर-
णधर्मावच्छिन्नाभावानां समनियतत्वेनाभिन्नतया घटादेरपि
तथाविधवाच्यत्वाभावप्रतियोगित्वात् किञ्चिद्विशिष्टस्याभावा
देरपि वह्न्याद्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन स-
मनैयत्यं विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकत्व
मिति वाच्यं समनैयत्यशरीरे व्यापकतायास्तदभावप्रतियो-
गितात्वावच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नाया
निवेशनेनानुपपत्त्यभावात् । ननु साध्यनिष्ठान्योन्याभावप्रति-
योगितानवच्छेदकत्वरूपा व्यापकता चेत्समनैयत्यशरीरे निवेश्यते
तदा व्यधिकरणधर्मावच्छिन्नयोर्भावाभाववृत्तिप्रतियोगित्वयोर्द्व-
योरेव प्रत्येकप्रमेयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतया नो-
क्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वमित्यतो
ऽभावान्तरमाह वह्नित्वेनेति । प्रमेयमात्रस्याभाव इत्यत्र
तत्तेनान्वयः वह्नित्वेन प्रमेयं नास्तीतिप्रतीत्या प्रमेयसा-
मान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाहनात्प्रमेयत्वव्या-
पकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगितेति भावः ।
यदि च तत्र वह्निर्नास्तीतिप्रतीतिसिद्धवह्निमात्रनिष्ठप्रतियोगितैव
प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते प्रमेयसामान्यस्यैव
तत्प्रतियोगितया भानोपगमे तु वह्निर्नास्तीत्यादावपि तादृशप्रती-
तिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगिताया वह्नित्वादिविशेषितप्रतियो-
गिवृत्तित्वेन भानोपगमसम्भवात् समानाधिकरणधर्मावच्छिन्नवह्नि-
त्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना घ-
टत्वाद्यभावीयवह्निमात्रवृत्तिप्रतियोगितामादाय वह्निमान् प्रमेय-
त्वादित्यादावतिव्याप्त्यापत्तेरित्युच्यते तदा तादृशाभावस्य
नोक्तरूपत्वमित्याशङ्क्याभावान्तरमनुसरति अवृत्तिमात्रेति । गगनं
नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छि-
न्नप्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभिन्नं नास्तीत्यादौ
गगनभिन्नत्वादिसामानाधिकरण्येन प्रतीयते अवच्छेदकवैषम्येऽपि
बाधके प्रतियोगिताया अप्यैक्यस्वीकारात् गगनाभिन्ननिष्ठप्रतियो-

शिलाया गगनाभिन्नवृत्तित्वेऽपि गगनत्वरूपप्रतियोगितावच्छेदक-
विशिष्टप्रतियोगिनो ऽप्रसिद्धत्वेन गगनत्वावच्छिन्नाभावस्य केव-
लान्वयित्वापत्तेः वह्नित्वावच्छिन्नघटादिनिष्ठप्रतियोगितायाश्च
वह्निनिष्ठान्यप्रतियोगिताभेदे वह्न्यादिमति वह्न्यादिना
घटाद्यभावस्यानुपपत्त्या उक्ताभ्यां तत्र प्रकृतप्रतियोगिता-
द्वयसमन्वयः । एवं च गगनत्वावच्छिन्नप्रमेयत्वसम-
नियतप्रतियोगिता प्रसिद्धैवेति भावः । उक्तार्थोप-
ष्टम्भायैवावृत्तिनाद्युक्तिप्रदर्शनेनम् । नन्वेवमपि यत्र विष-
यितासम्बन्धेन प्रमेयसामान्यं साध्यम् ईश्वरज्ञानत्वादिकं हे-
तुस्तत्र समवायेन ज्ञानीयत्वादौ साध्याभावकूटवति हेतुतावच्छेदक-
सम्बन्धेन वृत्त्यप्रसिद्ध्याऽव्याप्तेर्व्याप्तेर्वा ? साधनसामानाधि-
करण्यविशेषणतासामान्यसाध्यतावच्छेदकसमनियतसाध्यतावच्छेदक-
सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः गगनादेरपि वि-
षयितासम्बन्धेनेश्वरज्ञानादिसत्त्वात्तादात्म्यसम्बन्धेन गगनाद्या-
दिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यसम्भवादित्यतो
ऽसत्यन्तमाह विरुद्धेति । येन सम्बन्धेन घटत्वपटत्व-
योर्विरोधस्तत्सम्बन्धावच्छिन्नतदुभयनिष्ठप्रतियोगितावच्छेदकता-
कप्रमेयसामान्याभाव इत्यर्थः । प्रतियोगितावच्छेदकताव-
च्छेदकोभयत्वविशिष्टघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिनो ऽप्रसि-
द्धा विरोधिविशेषणोपादानस्य वैफल्यापत्तिरित्यवधेयम् । इद-
मुपलक्षणम् । व्यधिकरणधर्मावच्छिन्नाभावत्वादिना प्रतियोगिता-
वच्छेदकतावच्छेदककोटौ च तादात्म्यसम्बन्धेनाप्यवच्छेदकस्य वृ-
त्तिमत्तया अवच्छेदकतायामनन्तर्भावात्समवायादिसम्बन्धेन
गगनाद्यवच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्यं बोध्यम् ।
अत्यन्ताभावत्वेनान्योन्याभावस्यापि व्यधिकरणधर्मावच्छिन्नप्र-
तियोगिताकत्वे गगनाद्यप्रमेयसामान्यस्य यत्र तादात्म्येन सा-
ध्यता तत्र घटत्वपटत्वाभ्यां समवायेन गगनादिना वा
प्रमेयसामान्यभेदो लक्षणघटकः प्रतियोगितावच्छेदकव्यापि-
समवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा
तथैवावधेयम् ॥

ननु व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्य-

स्याभिप्रायः । न च यदभावीयप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके घटत्वादिसाध्यके वा तादृशाभावाप्रसिद्धिः निखिलव्यधिकरणधर्मावच्छिन्नाभावानां समनियतत्वेनाभिमततया घटादेरपि तथाविधवाच्यत्वाभावप्रतियोगित्वात् किञ्चिद्वह्न्यादिप्रत्स्याभावादेरपि वह्न्यभावप्रतियोगित्वादिति तत्तत्प्रतियोगितात्वेन समनैयत्यं विवक्षणीयमिति कथमुक्ताभावस्य लक्षणघटकत्वमिति वाच्यं समनैयत्यशरीरे व्यापकतायास्तदभावप्रतियोगितात्वानवच्छिन्नाया व्याप्यतायाश्च विशेषरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात् । ननु साध्यनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपा व्यापकता चेत्समनैयत्यशरीरे निवेश्यते तदा व्यधिकरणधर्मावच्छिन्नप्रमेयाभाववृत्तिप्रतियोगित्वयोर्द्वयोरेव प्रत्येकप्रमेयनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकतया नोक्ताभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वमित्यतोऽभावान्तरमाह वह्निर्नेति । प्रमेयमात्रस्याभाव इत्यप्रतीतेनान्वय वह्निर्न प्रमेयं नास्तीतिप्रतीत्या प्रमेयसामान्य एव वह्नित्वावच्छिन्नप्रतियोगित्वावगाहनात्प्रमेयत्वव्यापिकैव तादृशाभावीयवह्नित्वावच्छिन्नप्रतियोगितेति भावः । यदि च तत्र वह्निर्नास्तीतिप्रतीतिसिद्धवह्न्यभावनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते प्रमेयसामान्यस्यैव तत्प्रतियोगितया भानोपगमे तु वह्निर्नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगितायां वह्नित्वादिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसम्भवात् समानाधिकरणधर्मावच्छिन्नवह्नित्वादिसमनियतप्रतियोगित्वाप्रसिद्ध्या वह्निभिन्नत्वादिना घटाद्यभावीयवह्निवृत्तिप्रतियोगितामादाय वह्निमान् प्रमेयत्वादित्यादावतिव्याप्त्यापत्तिरित्युच्यते तदा तादृशाभावस्य नोक्तरूपेत्याशङ्क्याभावान्तरमनुसरति धूमवृत्तिमानिति । गगनं नास्तीत्यत्र गगनत्वसामानाधिकरण्येन या गगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव गगनं न गगनभिन्नं नास्तीत्यादौ गगनभिन्नत्वादिसामानाधिकरण्येन प्रतीयत इत्यवच्छेदकैक्येऽपि बाधकप्रतियोगिताया धर्म्यैक्यस्वीकारात् गगनाभिन्ननिष्ठप्रतियो

तियाया गगनभिन्नवृत्तित्वेऽपि गगनान्यत्वप्रतियोगितावच्छेदक-
विशिष्टप्रतियोगिनो ऽवृत्तित्वेन गगनत्वेन गगनभिन्नाभावस्य केव-
लान्वयित्वापत्तेः वह्नित्वावच्छिन्नघटादिनिष्ठप्रतियोगिताकाभाव-
वह्निनिष्ठात्यन्ताप्रतियोगितावभेदे वह्न्यादिमति वह्न्यादिना
सहावस्थानस्यानुपपत्त्या उभयोर्वा तत्र एकप्रतियोगिता-
ध्यवसानवः । एवं च गगनत्वावच्छिन्नैव प्रमेयत्वम-
तियोगिता प्रसिद्ध्यतीति भावः । उत्तरत्रैव-
त्वानवच्छिन्नावृत्तित्वदर्शनम् । अन्येषामपि यत्र विप-
क्षिणासम्बन्धेन प्रमेयसामान्य साध्यम् ईश्वरज्ञानत्वादिकं हे-
तुस्तत्र सत्त्वात् ज्ञानीयत्वादौ साध्याभावकूटस्य हेतुतावच्छेदक-
सम्बन्धेन वृत्तिप्रसिद्ध्या ऽव्याप्तिवारणायोपात्तसाध्यसामानाधि-
करण्यघटितव्याप्तिलक्षणस्यावच्छेदकसमनियतसाध्यतावच्छेदक-
सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धिः गगनादेरपि वि-
षयितासम्बन्धेनेश्वरज्ञानादिनिरूपकत्वात्तत्सम्बन्धेन गगनत्वा-
दिना प्रमेयसामान्याभावस्य साधनसामानाधिकरण्यसम्भवादित्यतो
उपायान्तरमाह विरुद्धेति । येन सम्बन्धेन घटत्वपटत्व-
योरेकधर्मावच्छिन्नव्यापकत्वं तदुभयनिष्ठप्रतियोगितावच्छेदकता-
कप्रमेयसामान्याभाव इत्यर्थः । प्रतियोगितावच्छेदकताव-
च्छेदकतया विशिष्टघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिनो ऽप्रसि-
द्धा विरोधिविरहेणात्यन्ताभावस्य केवलान्वयितैरस्याध्येयम् । इद-
मुपलक्षणम् । व्यधिकरणधर्मावच्छिन्नाभावत्वादिना प्रतियोगिता-
वच्छेदकतावच्छेदकरूपेणैव तादात्म्यसम्बन्धेनाप्यवच्छेदकस्य वृ-
त्तिमत्ताया अवच्छेदकतायामतन्त्रत्वात्समवायादिसम्बन्धेन
गगनत्वावच्छिन्नप्रमेयसामान्याभावस्यापि सौलभ्यं बोध्यम् ।
अत्यन्ताभावस्येवान्योन्याभावस्यापि व्यधिकरणधर्मावच्छिन्नप्र-
तियोगिताकस्योपगमात् प्रमेयसामान्यस्य यत्र तादात्म्येन सा-
ध्यता तत्र घटत्वपटत्वाभ्यां समवायेन गगनादिना वा
प्रमेयसामान्यभेदो लक्षणघटकः प्रतियोगितावच्छेदकावृत्ति-
समवायित्वाद्यवच्छिन्नप्रमेयत्वादिना प्रमेयसामान्यभेदो वा
तथैवावधेयम् ॥

ननु व्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धावपि व्य-

भिचाराभावरूपव्याप्तौ साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य लक्षणघटकतया ऽप्रसिद्धिनिरन्धनाव्याप्तेर्दुर्वारतयैव वादिनो निवृत्ते व्यधिकरणधर्मावच्छिन्नाभावखण्डनपरग्रन्थानुत्थितिरित्यतस्तादृशग्रन्थमवतारयति नन्वित्यादिना ॥

(दी०) ननु पारिभाषिकमेवाव्यभिचरितत्वं तथाहि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तो ऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम् । सर्वत्र वाध्यत्वाद्यभावस्य तथात्वाद् यावत्त्वोपादानम् ॥

(गा०) पारिभाषिकमिति तान्त्रिकसङ्केतरूपपरिभाषया व्याप्तिप्रतिपादक न तु यौगिकत्यर्थं । अव्यभिचारितत्व अव्यभिचरितत्वपदम् । अथवा पारिभाषिकमव्यभिचरितत्व परिभाषया ऽव्यभिचरितत्वपदप्रतिपाद्य व्याप्यत्वमिति शेष न तु यौगेन तत्पदलभ्यमित्यर्थ । तथा च व्यभिचारघटकस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य व्याप्तिघटकत्वविरहेऽपि न क्षतिरिति भाव । यदिति । यत्पद यद्धर्मावच्छिन्नपर यत्रे तत्पद तद्धर्मावच्छिन्नपर स च धर्मो हेतुतावच्छेदकीभूतधूमत्वादि सद्धेतुस्थले हेतुतावच्छेदकावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणाग्रान्तो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका घटत्वादिना वह्न्यभावादिरेव तस्य च प्रतियोगिसामानाधिकरण्यमावश्यकमिति लक्षणसमन्वय । व्यभिचारिणि व्यभिचारनिरूपकाधिकरणीभूते हेत्वधिकरणे साध्यतावच्छेदकेत्यादिविशेषणाग्रान्तः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावादिरपि तस्य च प्रतियोगिसामानाधिकरण्याभावात् तादृशाभावस्य प्रतियोग्यधिकरणे कालिकसम्बन्धेन वृत्तावपि विवक्षणीयस्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्ति । अयमात्मा ज्ञानादिमत्त्वादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावा-

दिकमादायाव्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टसामानाधिकरण्यमभावविशेषणम् अभाववृत्तौ सम्बन्धभेदानिवेशेन वह्निमान् धूमादित्यादौ वह्नित्वादिना वह्न्यभावस्य प्रतियोगिमति पर्वतादौ कालिकसम्बन्धेन वृत्तेर्लक्षणसम्भवाच्च तत्राव्याप्तिवारणं तत्फलमिति ध्येयम् । अयमात्मा पृथिव्याद्यन्यत्वे सति द्रव्यत्वादित्यादौ द्रव्यत्वसमानाधिकरणात्मत्वत्वाद्यवच्छिन्नात्मत्वाद्यभावानां प्रतियोगिसामानाधिकरण्यविरहादव्याप्तिरतो हेतुसामानाधिकरण्यघटकहेतौ हेतुतावच्छेदकवैशिष्ट्यनिवेशः । यद्यप्ययमात्मा ज्ञानादित्यादौ समानाधिकरणधर्मावच्छिन्नाभावमादायाव्याप्तिरभावे साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यविशेषणेनापि वारयितुं शक्यते *धूमवान् वह्नेरित्यादौ धूमादिसमानाधिकरणस्य* तादृशाभावस्य प्रतियोगिसामानाधिकरण्यावश्यकत्वेऽपि स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगिसामानाधिकरण्यस्यैव विवक्षणीयतया ऽयोगोलकान्तर्भावेन तादृशाभावस्यातथात्वान्नातिव्याप्तिः स्वविशिष्टहेत्वधिकरणत्वञ्च यत्पदेनैव हेतोरुपादेयतया तत्त्वमित्यत्र तत्पदेन तस्यैव परामर्शाद्व्याप्तेर्हेतुनिष्ठत्वोपपत्तिरिति । तथापि कपिसंयोगाभाववान् जातित्वादित्यादौ साध्यसमानाधिकरणस्य कपिसंयोगाद्यात्मकाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या सत्तावानात्मत्वादित्यादौ सत्ताधिकरणकाले कालिकसम्बन्धेन विद्यमानस्य सत्ताभावस्य तदप्रसिद्ध्याऽव्याप्तिर्दुर्वारैवेति हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यमेवोपात्तं यत्तु *अयमात्मा ज्ञानादित्यादौ आत्मत्वत्वादिना आत्मत्वादेरभावस्य* लक्षणघटकत्वेऽपि नाव्याप्तिः तस्य प्रतियोग्यधिकरणीभूतात्मादावेकज्ञानविषयत्वस्वाश्रयाश्रयत्वादिरूपपरम्परासम्बन्धेन वर्तमानतया प्रतियोगिसमानाधिकरणत्वादिति सामानाधिकरण्यान्तविशेषणमनर्थकमिति । तन्न । एकज्ञानविषयत्वादिना विशिष्टबुद्धौ प्रमाणाभावेन तेषां संसर्गत्वाभावात् न चैवं यदभावो व्यभिचारविरोधीत्युपाधिलक्षणे, इह्रोपाधिर्नेहोपाधिरितिप्रतीतिव्यवहारानुरोधेनाव्याप्यत्वस्य सम्य-

(दी०) अत एव भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोऽन्यत्वाद्यभावस्यातथात्वान्नातिप्रसङ्गः । साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि ॥

(गा०) रणे मूर्तत्वरूपप्रतियोगिसामानाधिकरण्येऽपि तथा च यावत्पदानुपादाने साध्यतावच्छेदकव्याप्यप्रतियोगिताकतादृशोभयाभावस्यैव प्रतियोगिसमानाधिकरणतयातिव्याप्तिः स्यादिति भावः । यावत्पदसत्त्वे यादृशाभावमादायातिव्याप्तेर्वारणं तादृशाभावं दर्शयति भूतत्वमनोऽन्यत्वाद्यभावस्येति । भूतत्वाभावस्य मनोऽन्यत्वाभावस्य वेत्यर्थः अतथात्वात् प्रतियोग्यसमानाधिकरणत्वात् यावत्पदे दत्ते साध्यतावच्छेदकव्याप्यप्रतियोगिताकत्वनिवेशने वह्निमान् धूमादित्यादौ तादृशयावदन्तर्गतमहानसीयवह्न्याद्यभावमादायैवाव्याप्तिः स्यादिति यथोक्तविशेषणस्यैवोपादेयतया तादृशाभावयोरपि लक्षणघटकत्वादिति भावः । भूतत्वस्य बहिरिन्द्रियग्राह्यविशेषगुणात्मकतया प्रतियोगिस्वरूपाणां तन्निष्ठप्रतियोगितानां चालनीन्यायेनोऽत्पत्तिकालावच्छेदेन वा साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया भूतत्वाभावस्य न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमित्याशयेनाखण्डव्याप्यवृत्तिमनोऽन्यत्वाभावानुधावनम् । उक्तरीत्या अत एवेत्यादिग्रन्थावतारात्प्रथमतो वाच्यत्वाभावमादाय सर्वत्रैव व्यभिचारिण्यतिव्याप्तेर्दर्शितत्वात्साध्याभावमादाय व्यभिचारिविशेषे ऽतिव्याप्तिप्रदर्शनं सन्दर्भविरुद्धमित्याशङ्कानवकाशः । केचित्तु यावत्पदानुपादाने वाच्यत्वादेरुदासीनपदार्थस्याभावमादाय व्यभिचारिसामान्येऽतिव्याप्तिर्विश्राम्यतु साध्याभावमादायापि क्वचिदतिव्याप्तिः स्यात् सा च यावत्पदोपादानान्न भवतीत्यभिप्रायकतया न सन्दर्भविरोध इत्याहुः । परे तु ननु साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकयावदभावनिवेशेनैवोपपत्तेः साध्यतावच्छेदका-

वच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावनिवेशनमफलं तादृशप्रतियोगिताकत्वविशेषणव्यावर्तनीयस्य तत्तद्वह्न्यभाव स्य वह्नित्वव्यापकप्रतियोगिताकत्वाभावेनोक्तविशेषणनापि व्या वर्तनसम्भवात् अत आह अत एवेति । यत एव साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावे या वत्त्वमुपात्तं न तु साध्यतावच्छेदकव्यापकप्रतियोगिताका भावे अत एवेत्यर्थः । भूतत्वेति । साध्यतावच्छेदक व्यापकप्रतियोगिताकाभावनिवेशे भूतत्वमूर्तत्वोभयवान् मूर्तत्वा दित्यादौ भूतत्वाभावमनोऽन्यत्वाभावप्रतियोगितयोः उभयत्वाव्या पकत्वेनोभयत्वावच्छिन्नप्रतियोगिताकाभावादेरेव लक्षणघटकतया प्रतिव्याप्तिः स्यात् यथोक्तविशेषणाक्रान्ताभावनिवेशे च भूतत्वमनोऽ न्यत्वाभावानामपि लक्षणघटकतया नातिव्याप्तिरिति भावः । न च सा ध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशेऽपि हेतुसमानाधि करणस्य मनोभिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगि सामानाधिकरण्यविरहान्नातिव्याप्तिः साध्यतावच्छेदकावच्छिन्नव्या पकताया लक्षणेऽनिवेशे तादृशव्यापकताघटकसम्बन्धेन प्रतियोगि सामानाधिकरण्यनिवेशासम्भवात् प्रतियोगितावच्छेदकसम्बन्धेनैव तत्सामानाधिकरण्यस्य विवक्षणीयत्वादिति वाच्यं प्रतियोगिताव च्छेदकसम्बन्धेन तत्सामानाधिकरण्यनिवेशेऽपि वह्निमान् धूमा दित्यादौ हेतुसमानाधिकरणस्य वह्नित्वव्यापकप्रतियोगिता कस्य पर्वतभिन्नभेदस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रति योगिसामानाधिकरण्यं पर्वतान्तर्भावेण नास्तीत्यव्याप्त्यापत्त्या तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशासम्भवात् सा ध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यमगत्या वा च्यं तथा च मनोभिन्नभेदस्य तेन सम्बन्धेन मूर्त त्वादिरूपप्रतियोगिसामानाधिकरण्यमक्षतमेवेति व्याप्तेः सा ध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशे व क्ष्यमाणदोषान्तरेऽप्यतिव्याप्तिः स्यादिति तु नास्माकं दोष इत्यभिप्राय इति व्याचख्युः । तन्न समीचीनतया न प्रतिभाति साध्यतावच्छेदकत्वादिविशेषणव्यावृत्ते व क्ष्यमाणतया तदुत्तरमेव साध्यतावच्छेदकावच्छिन्न

त्यादिविशेषणस्थले साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वं विशेषणं किं नोपात्तमित्याकाङ्क्षोदयादादावेव तादृशविशेषणपरित्यागबीजकथनस्यासङ्गतत्वादिति । गोत्वाद्यभावस्येति । प्रतियोग्यसमानाधिकरणत्वादित्यर्थकेनातथात्वादित्यनेनान्वयः । तथा च साध्यतावच्छेदकेत्याद्यनुपादानेऽसम्भव इति भावः । यद्यपि गोत्वाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यं तथापि व्यापकताया लक्षणाघटकत्वे साध्यतावच्छेदकसम्बन्धेनैव प्रतियोगिसामानाधिकरण्यं धूमवान् वह्नेरित्यादौ धूमाभावादेः पूर्वक्षणवृत्तित्वादिविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमादायातिव्याप्तिवारणायावश्यं विवक्षणीयं तथा चायमसम्भव इति भावः । साध्यप्रतियोगिकाभावनिवेशेऽपि गोत्वाद्यभावमादायासम्भवस्य वारणसम्भवादाह तत्तत्साध्यव्यक्त्यभावस्येति अस्य च नानाव्यक्तिसाध्यक इत्यादिः । तथा च साध्याभावनिवेशेऽपि वह्निमान् धूमादित्यादावव्याप्तिः स्यादिति भावः । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वं च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदिकाया अपि द्रव्यत्वाद्यभावप्रतियोगितायान साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं सत्तावति गुणादौ तादृशप्रतियोगित्वावच्छिन्नाभावसत्त्वादतो विशिष्टसत्ताद्यभाव एव लक्षणघटकः तस्य च गुणादौ सत्तादिरूपप्रतियोगिसमानाधिकरणत्वादतिव्याप्तिरतः साध्यतावच्छेदकावच्छिन्नत्वोपादानं तथा च सति द्रव्यत्वाभावप्रतियोगिताया अपि विशिष्टसत्तात्वाद्यवच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकतया तादृशाभावानां च गुणाद्यवृत्तित्वान्नातिव्याप्तिः यत्किञ्चिद्रूपावच्छिन्नसाध्यवत्तानिवेशे च सत्तावान् जातेरित्यादौ विशिष्टसत्ताव्यापकतावच्छेदकप्रतियोगिताकद्रव्यत्वाद्यभावादिकमादायाव्याप्तिर्बोध्या साध्यवत्त्व साध्यतावच्छेदकसम्बन्धेन बोध्यम् । अन्यथा धूमवान् वह्नेरित्यादौ धूमाभावायोगोलकान्यत्वाभावादिप्रतियोगितायाः कालिकविशेषणताविषयितादिसम्बन्धेन धूमादिमति काले धा-

नाशे च संयोगादिसम्बन्धेन स्वावच्छिन्नाभाववत्त्वात्, तेनापि सम्बन्धेन न व्यापकतावच्छेदकत्वमिति केवलान्वयिनाश्यत्वादिनिष्ठप्रतियोगितैव स्वरूपादिसम्बन्धघटितव्यापकतावच्छेदिका स्यादित्यतिव्याप्तिः । न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयविषयतासम्बन्धावच्छिन्नप्रतियोगितानवच्छेदिका या ज्ञाननिष्ठप्रतियोगिता तन्निरूपकज्ञानाभावस्य च न निरुक्तसाध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकत्वसम्बन्धेन स्वविशिष्टयावदधिकरण प्रतियोगिसामानाधिकरण्यं साध्यतावच्छेदकसंयोगादिसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकतायां संयोगादिसम्बन्धावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतासम्बन्धस्यापि घटकतया तेन सम्बन्धेनायोगोलकादौ प्रतियोगिनोऽसत्त्वादिति वाच्यं यतो विषयताया विषयतावैव सम्बन्धता ज्ञानादिवृत्तिः न तु तयाविधविशेष्यतायैवेति परम्परया समवायेन ज्ञानादिसाध्यकस्थलादिष्वेतादृशाभावमादाय सम्बन्धः तत्र ज्ञानाभावस्य सम्बन्धसामान्येन साध्यनिष्ठव्याप्यतानिरूपितविषयतासम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसमवायेन घटादौ प्रतियोगिसामानाधिकरण्यविरहादिति न च सम्बन्धसामान्येन धूमादिमन्निष्ठो योऽभावस्तदीयसम्बन्धसामान्यावच्छिन्नप्रतियोगिताया धूमाद्यभावीयसम्बन्धसामान्यावच्छिन्नप्रतियोगितानवच्छेदकत्वं संयोगसामान्यावच्छिन्नसंयोगादिसम्बन्धेन धूमादिसम्बन्धसत्त्वेऽपि सम्बन्धस्वरूपस्यावच्छेदकधर्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकत्वसमास्पदत्वात् तथा च धूमाद्यभावस्यापि स्वप्न घटकतया तस्य च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगितावच्छिन्नव्यापकतावच्छेदकसम्बन्धावच्छिन्नसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तिरिति वाच्यं सम्बन्धेन सम्ब-

न्धानामभावप्रतियोगितावच्छेदकसम्बन्धत्वे मानाभावात्तेन रूपेण सम्बन्धानां व्यापकताघटकत्वासम्भवात् । वस्तुतस्तु प्रतियोगिसामानाधिकरण्यशरीरे व्यापकतायाः स्वातन्त्र्येण निवेशस्य प्रतिक्षेप्यत्वाज्ज्ञानवान् द्रव्यत्वादित्यादावतिव्याप्तिरवाधेति ध्येयम् । वस्तुतस्तु संयोगसमवायादिसाधारणानुगतसम्बन्धत्वस्य कथञ्चित्सुवचत्वेऽपि तेन रूपेण संयोगादीनां सम्बन्धतया भानस्य निर्युक्तिकतया व्यापकताशरीरे लाघवानुरोधात्साध्यप्रकारेणाधिकरणस्य भाने साध्यसम्बन्धोऽपि विशिष्य संसर्गतया निवेश्यः तथा च विशिष्य साध्यतावच्छेदकसम्बन्धनिवेशनमावश्यकं यत्किञ्चित्सम्बन्धेन साध्यवत्ताया व्यापकताघटकत्वे तु वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन साध्यं प्रति गुणत्वाद्यभावप्रतियोगिताया अपि व्यापकतावच्छेदकतया तादृशाभावस्य लक्षणघटकत्वेन तस्य च पर्वतादौ प्रतियोगिसामानाधिकरण्यविरहादसम्भवो बोध्यः । साध्यवन्निष्ठाभावाप्रतियोगिप्रतियोगिकत्वनिवेशे सर्वस्यैव साध्यवन्निष्ठद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया तादृशाभावाप्रतियोगिनोऽप्रसिद्धिरित्यतोऽवच्छेदकगर्भता । तादृशप्रतियोगितानवच्छेदकत्वं च तादृशप्रतियोगितायां समानाधिकरणं सद्यदवच्छेदकं तत्तदन्यत्वम् अन्यथा व्यतिरेकिप्रतियोगितामात्रस्यैव व्यधिकरणतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकतया विरुद्धघटत्वपटत्वोभयाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावस्यैव लक्षणघटकत्वेन व्यभिचारिण्यतिप्रसङ्गात् । यत्तु साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकप्रतियोगिकत्वरूपसाध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकत्वनिवेशेनैव सर्वसामञ्जस्ये निरुक्तव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशनमफलं वह्निमान् धूमादित्यादौ घटत्वादिना वह्न्याद्यभावप्रतियोगिनां वह्न्यादीनां चालनीन्यायेन साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि घटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसमन्वयसम्भवात् व्यभिचारिणि व्यभिचारनिरूपकाधिकरणभेदाभावमादायैवातिव्याप्तिवारण-

सम्भवाच्च । न च साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकत्वापेक्षया तादृशविशेषणस्य न लघुशरीरतेति वाच्यं व्यापकतावच्छेदकतावटकाभावप्रतियोगितानवच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नत्वस्याधिकस्य प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वस्य च निवेशनीयतया एतन्मते तदनिवेशेन लाघवात् तन्मते तदनिवेशे सर्वासामेव प्रतियोगितानां साध्यवन्निष्ठो यो विषयितासम्बन्धेन स्वावच्छिन्नस्याभावस्तत्प्रतियोगितावच्छेदकतया व्यापकतावच्छेदकप्रतियोगिताया एवाप्रसिद्ध्यापत्तेः भेदप्रतियोगितावच्छेदकताया व्यापकतावटकसम्बन्धावच्छिन्नत्वस्यैतन्मते निवेशवत् तन्मतेऽप्यभावप्रतियोगितायां तन्निवेशस्यावश्यकतया तद्दोषे साम्यादिति । तदसत् । यतोऽनवच्छेदकप्रतियोगिकत्वमनवच्छेदकनिष्ठप्रतियोगितानिरूपकत्वं प्रतियोगितायां तन्निष्ठत्वं च स्वरूपसम्बन्धेन वाच्यमन्यथा वह्निमान् धूमादित्यादावपि विषयतासम्बन्धेन साध्यव्यापके प्रमेयमित्याकारकनिश्चयविषयकज्ञाने विषयितासम्बन्धेन जलत्वाद्यभावीयप्रतियोगिताया वृत्तेस्तादृशाभावस्य लक्षणघटकतापातात् विषयितायाः वृत्त्यनियामकतया एतद्दोषानवकाशेऽपि एतद्वह्निमानेतद्धूमादेतद्रूपवानेतद्रसादित्यादौ जलत्वाद्यभावप्रतियोगितायाः कालिकसम्बन्धेन साध्यव्यापकसाध्यवत्समानाधिकरणधर्मादौ वर्तमानतया लक्षणघटकत्वापातात् तथा च व्यापकनिरूपितवृत्तौ स्वरूपसम्बन्धावच्छिन्नत्वनिवेशस्यैतन्मतेऽप्यावश्यकतया न लाघवावकाशः विपरीतमेव गौरवमाधेयत्वाद्यनिवेशाधिक्येनेति । न च व्यापकनिष्ठप्रतियोगिताकत्वेनाभावो न निवेशनीयो येनोक्तगौरवं स्यादपि तु अनुयोगितासम्बन्धेन व्यापकविशेषित एव तत्र च व्यापकतावच्छेदकप्रतियोगिताकत्वेनाभावनिवेशापेक्षया लाघवमक्षतमेवेति वाच्यं प्रतियोगिप्रकारीभूतधर्मावच्छिन्ननिरूपितत्वावच्छिन्नानुयोगिताया अभावांशे प्रतियोगिसम्बन्धतया भाने घटादिमति घटत्वावच्छिन्नाभावविषयिण्या द्रव्यं नास्तीत्याकारकप्रतीतेः एव तदवच्छिन्ननिरूपितानुयोगिताया एव संसर्गतया भानोपगमात् व्यापकतावच्छिन्नविशेषिताभावस्य लक्षणे निवेशे

व्यापकत्वावच्छिन्ननिरूपितानुयोगितायाः सम्बन्धतया निवेशनीयतया सद्धेतौ हेतुसमानाधिकरणसाध्यव्यापकत्वावच्छिन्नसाध्यव्यापकाभावस्य सम्बन्धविशेषावच्छिन्नप्रतियोगिताकस्य कथञ्चित्प्रसिद्ध्या लक्षणसमन्वयसम्भवेऽपि व्यभिचारिण्यतिव्याप्तिः व्यभिचारनिरूपकाधिकरणेऽपि कस्यचित्साध्यव्यापकस्य वृत्ते व्यधिकरणधर्मावच्छिन्नाभावस्य लक्षणघटकत्वानुपपत्तेश्चेति एवमनवच्छेदकपदेनावच्छेदकतापर्याप्त्यनधिकरणत्वमवश्यं वाच्यम् अन्यथा द्रव्यत्वाभावादेरपि वह्निमन्निष्ठपूर्वक्षणवृत्तित्वविशिष्टद्रव्यत्ववद्भेदप्रतियोगितावच्छेदकद्रव्यत्वप्रतियोगिकत्वाल्लक्षणाघटकत्वापत्तेः तथा च घटत्वावच्छिन्नघटाभावादेरपि लक्षणघटकत्वापत्तः वह्निमन्निष्ठभेदप्रतियोगितावच्छेदकतायाः घटत्वविशिष्टपर्याप्ततया शुद्धघटस्य तत्पर्याप्त्यनधिकरणत्वात्। अथ निरुक्तव्यापकतावच्छेदकताया निवेशे कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावानां लक्षणघटकत्वानुपपत्तिः कपिसंयोगाभावादिनिष्ठतत्प्रतियोगितानां साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावप्रतियोगितावच्छेदकत्वादित्यग्रिमग्रन्थविरोधः न च व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्याविशेषणसत्वात्साध्यवन्निष्ठकपिसंयोगाद्यात्मकाभावस्य न व्यापकतालक्षणघटकतेति वाच्यं प्रकृतव्यापकतायां तादृशविशेषणप्रवेशस्य निष्प्रयोजनकत्वात्। अत्र केचित् व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यनिवेशनमावश्यकम्। अन्यथा अभावे सम्बन्धसामान्येन साध्यवन्निष्ठत्वनिवेशे कालपरिमाणवान् द्रव्यत्वादित्यादौ व्यतिरेकितावच्छेदकप्रतियोगितामात्रस्यैव कालिकसम्बन्धेन साध्यवद्वृत्तिर्यः स्वावच्छिन्नाभावस्तत्प्रतियोगितावच्छेदकतया वाच्यत्वादिनिष्ठप्रतियोगिताया एव व्यापकतावच्छेदकतयातिव्याप्त्यापत्तेः दैशिकविशेषणतासम्बन्धेन तन्निष्ठत्वनिवेशे भावस्य तेन सम्बन्धेन वृत्तेरप्रामाणिकतया वह्निमान् धूमादित्यादौ पर्वतत्वाद्यभावनिष्ठप्रतियोगितायाअपि व्यापकतावच्छेदकत्वापत्त्या पर्वतत्वाद्यात्मकाभावस्यापि लक्षणघटकत्वापातात् हेतुसामानाधिकरण्यघटकाभावीयवृत्तावपि तादृशसम्बन्धावच्छिन्नत्वनिवेशे नानास्थाने तादृश-

सम्बन्धनिवेशेन प्रतियोगितानवच्छेदकत्वमित्यत्र च व्यधिक
रणधर्मावच्छिन्नाभावीयप्रतियोगितानवच्छेदकतावारणाय सामा
नाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वस्य निवेशेन च गौरवात् अ
भावे प्रतियोगिवैयधिकरण्यनिवेशनमेवोचितं व्यधिकरणधर्मा
वच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणतयैव तमादाय दोषा
सम्भवात्तन्मते ऽवच्छेदकताया सामानाधिकरण्यप्रत्यासत्त्यवच्छि
न्नत्वस्यानिवेशात् अभावीयवृत्तौ सम्बन्धभेदानिवेशाच्च लाघवं
प्रतियोगिवैयधिकरण्यं च न प्रतियोगिसमानाधिकरणभिन्नत्वं
तथा सति वह्निसंयोगाभावस्य प्रतियोगिसमानाधिकरणत्व
या अभावान्तरमादाय वह्निसंयोगादिनिष्ठप्रतियोगिताया अ
पि वह्नित्वावच्छिन्नव्यापकतानवच्छेदकत्वापत्त्या तदभावमादा
याव्याप्त्यापत्तेः किन्तु प्रतियोग्यनधिकरणवृत्तित्वं तथा च प्रति
योग्यनधिकरणीभूतसाध्यवन्निष्ठाभाव इत्यभावान्तार्थनिष्कर्षः ।
अत्र च व्यापकताघटकत्वेनाभिमतो यः सम्बन्धस्तेन सम्ब
न्धेन प्रतियोग्यधिकरणत्वं वाच्यं तेन कालपरिमाणादिसाध्य
कस्थले सम्बन्धसामान्येन प्रतियोग्यनधिकरणसाध्याधिक
रणाप्रसिद्धावपि न क्षतिः कालो घटवान् कालपरिमाणादि
त्यादौ साध्यतावच्छेदककालिकसम्बन्धेन प्रतियोग्यनधिकरण
साध्याधिकरणाप्रसिद्ध्या तादृशसम्बन्धस्य व्यापकताघटकत्वा
सम्भवेऽपि न क्षतिः तत्र समवायादिसम्बन्धघटितव्यापकतावच्छे
दकप्रतियोगिताकघटत्वादिना द्रव्यत्वाद्यभावमादायैव लक्षणसम
न्वयसम्भवात् । अथैवं दैशिकविशेषणतासम्बन्धस्य क्वापि व्या
पकताघटकत्वं न स्यात् सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्ववि
दिग्द्रव्याभावाभावप्रतियोगिनस्तेन सम्बन्धेन साध्यवति वृत्तेस्ते
न सम्बन्धेन स्वप्रतियोग्यनधिकरणीभूतसाध्यवन्निष्ठाभावाप्रसि
द्धेः न च तादृशसम्बन्धस्य व्यापकताघटकत्वेऽपि क्षतिविर
ह सामान्यादिमत्त्वसाध्यकस्थले विषयतासम्बन्धघटित
व्यापकतावच्छेदकप्रतियोगिताकसाध्यवत्त्वप्रकारकप्रमाभावमादायै
वोपपत्तिसम्भवादिति वाच्यं तादृशसम्बन्धस्यानधारे तेन स
म्बन्धेन कपिसंयोगाभावादिसाध्यकमेयत्वादिहेतुकस्थले त
द्धटकपिसंयोगाभावाभावप्रतियोगिताया व्यापकतावच्छेदक-

त्वानुपपत्त्या अग्रिमग्रन्थासङ्गतितादवस्थ्यादिति चेन्न लाघवानुरोधेन येन सम्बन्धेन यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणं साध्यवत्तादृशप्रतियोगितानवच्छेदकत्वमेव तादृशसम्बन्धघटितव्यापकतावच्छेदकत्वं वक्तव्यं इत्थञ्च कपिसंयोगाभावादिसाध्यकस्थले तन्निष्ठप्रतियोगिता नोक्ततादृशपदेनोपादातुं शक्यते तादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वस्य साध्यवत्यसम्भवात् किन्तु घटत्वाद्यभावनिष्ठप्रतियोगितैव दैशिकविशेषणतया तदवच्छेदकावच्छिन्नानधिकरणत्वस्य साध्यवति घटादौ सत्त्वात् तदनवच्छेदकत्वं च कपिसंयोगाभावादिनिष्ठप्रतियोगिताया इति कपिसंयोगादेः दैशिकविशेषणताघटितव्यापकतावच्छेदकप्रतियोगिताकत्वनिर्वाहः समनियताभावैक्यमते घटाद्यभावानामपि घटत्वादिना प्रमेयसामान्याभावाभिन्नतया प्रमेयमात्रप्रतियोगिकत्वेन प्रतियोग्यनधिकरणीभूतसाध्यवतोऽप्रसिद्धिरतः प्रतियोगितावदनाधिकरणत्वं विहाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशः । न च घटाद्यभावानां प्रमेयमात्रप्रतियोगिकत्वेऽपि तदीयघटादिमात्रवृत्तिप्रतियोगितावदनधिकरणत्वमादाय व्यापकतालक्षणसामञ्जस्यमिति वाच्यं तादृशाभावानामभेदे घटो नास्तीत्यादिप्रतीतीनामपि घटत्वादिविशेषितघटादिवृत्तित्वेन यावत्प्रमेयनिष्ठप्रतियोगितावगाहित्वसम्भवात् घटादिमात्रवृत्तिप्रतियोगिताया अप्रामाणिकत्वात् समनियताभावानामभेदानभ्युपगन्तृनयेऽपि साध्याभावादिप्रतियोगितया साध्यवद्वृत्तिपदार्थाभावस्य प्रतियोगितामादाय तादृशप्रतियोगितानां व्यापकतानवच्छेदकत्वापत्तिवारणाय प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वनिवेशनमावश्यकम् । अथ द्रव्यत्वाद्यभावीयद्रव्यत्वादिनिष्ठप्रतियोगितानामपि संयोगादिव्यधिकरणसम्बन्धघटितव्यापकतावच्छेदकत्वापत्तिः संयोगादिना तादृशप्रतियोगितात्मकप्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्ध्या यादृशप्रतियोगितेत्यत्र तादृशप्रतियोगितावच्छिन्नायाः प्रतियोगिताया उपादातुमशक्यत्वात्प्रतियोगितान्तरमुपादाय तदनवच्छेदकत्वान्तसत्त्वात् तथा च यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधि-

करण्यासम्भवादसम्भवः न च संयोगादिना द्रव्यत्वाद्यभावस्य स्वसमनियतघटत्वावच्छिन्नप्रतियोगिताकवह्न्याद्यभावाभिन्नतया संयोगादिना वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वान्नासम्भव इति वाच्यम्। एवमपि सत्तावान् जातेरित्यादौ हेत्वधिकरणावच्छेदेन तादृशाभावानां संयोगेन प्रतियोगिसामानाधिकरण्यासम्भवेनाव्याप्तेर्दुर्वारत्वात्। मैवं व्यापकताघटकत्वेनाभिमतो यः सम्बन्धस्तेन सम्बन्धेन वृत्तिमत्त्वेन प्रतियोगिताया विशेषणीयत्वात् द्रव्यत्वादेः संयोगादिनावृत्तितया उक्तदोषानवकाश इत्याहुः। वस्तुतस्तु लघुरूपसमनियतगुरुधर्मस्यानवच्छेदकत्वे घटाद्यभावीयप्रतियोगिताया अपि वह्न्यादिव्यापकतावच्छेदकत्वापत्तिः तादृशप्रतियोगिताविशिष्टघटाद्यभावप्रतियोगितायां लाघवेन घटत्वादेरेवावच्छेदकतया घटाद्यभावप्रतियोगितानां तदनवच्छेदकत्वात् न च प्रतियोगितायाः तत्तदभावीयप्रतियोगितात्वेनावच्छेदकतायां गौरवेऽपि स्वरूपतोऽवच्छेदकत्वेऽविशेषः प्रतियोगितायाः स्वरूपतो भानाभावेन तेन रूपेणावच्छेदकताया अप्यसम्भवादिति पारिभाषिकमेवावच्छेदकत्वं व्यापकताशरीरे निवेशनीयं तथा च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकं फलतः साध्यवत्किञ्चिद्व्यक्त्यसम्बद्धस्वविशिष्टसामान्यकं यद्यत्स्वं तदन्यत्वमेव व्यापकतावच्छेदकत्वं तथा च कपिसंयोगाद्यात्मकाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वमनायासेनैव निर्वहति यतः कपिसंयोगाद्यभावनिष्ठप्रतियोगिताविशिष्टस्य सर्वथैव साध्यवति वृत्तेस्तस्याश्च स्वपदेनोपादातुमशक्यत्वात् तादृशं स्वं धर्मान्तरमेव तदन्यत्वं च तादृशप्रतियोगितायामक्षतमेवेति। असम्बद्धत्वशरीरे च व्यापकताघटकत्वेनाभिमतो यः सम्बन्धः स एव निवेशनीयः द्रव्यत्वादिनिष्ठप्रतियोगित्वं च संयोगादिसम्बन्धेन साध्यवदसम्बद्धस्वविशिष्टसामान्यकमेवातो न संयोगादिघटितव्यापकतावच्छेदकत्वं तस्येति नोक्तदोषावकाश इति दिक्॥

(दी०) येन सम्बन्धेन हेतुस्तेनैव तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाधिकरणे घटादौ वर्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः ॥

(गा०) येन सम्बन्धेन हेतुरिति व्याप्यतावच्छेदकत्वेनाभिमतो यः सम्बन्ध इत्यर्थः । बोध्यमित्यस्य हेतुसामानाधिकरण्यघटकमित्यादिः । तेन तादृशसम्बन्धविशेषणेन आत्मत्वे साध्य इति अयमात्मा ज्ञानादित्यादावित्यर्थः ॥ साध्याभावस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य अतथात्वेऽपि स्वविशिष्टस्य हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणस्याप्रसिद्ध्या विवक्षणीयस्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिः नाव्याप्तिः । वह्निमान् धूमादित्यादौ धूमावयवादिवृत्तेर्वह्नित्वाद्यवच्छिन्नाभावस्य स्वविशिष्टं यद्धेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तदवच्छेदेन प्रतियोगिसामानाधिकरण्यं सम्भवत्येव तथाविधहेत्वधिकरणपर्वतादेः जन्यमात्रस्य कालोपाधितया कालिकसम्बन्धेन तादृशाभावादिविशिष्टत्वात् तदन्तर्भावेन तेन सम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वाच्च अभाववैशिष्ट्यादौ सम्बन्धविशेषानिवेशादित्यभिप्रायेण नित्यमात्रवृत्तिहेतुकस्थलानुधावनम् । अथ वह्निव्यापकस्य चरमक्रियाभावस्य योऽभावश्चरमक्रियात्मकस्तस्य कालिकसम्बन्धेन हेत्वधिकरणे महाकाले वर्तमानस्य न विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवस्तद्विशिष्टस्य हेतुतावच्छेदकसंयोगेन धूमाधिकरणस्याप्रसिद्धेः धूमाधिकरणपर्वतादेस्तदसमानकालीनतया तत्र कालिकसम्बन्धेनापि तद्वैशिष्ट्यासम्भवादिति आत्मत्वसाध्यकपर्यन्तानुधावनमफलं न च वृत्त्यनियामकसंयोगेन धूमसम्बन्धिनि परमाणावेव चरमक्रियावैशिष्ट्यस्य प्रसिद्ध्या तत्र चरमक्रियाभावरूपप्रतियोगिनोऽपि सत्त्वात्सम्भवत्येव विवक्षणीयप्रतियोगिसामानाधिकरण्यं तादात्म्यसम्बन्धावच्छिन्नहेतुताकस्थलानुरोधेन हेत्वधिकरणावच्छेदेनेत्यत्र हेतुसम्बन्धित्वमात्रस्यैव विवक्षितत्वादिति वाच्यं यादृशपरमाणौ क-

दापि धूमसंयोगो नास्ति तदीयचरमक्रियात्मकाभाववैशिष्ट्यस्य हेतुसम्बन्धिन्यसत्त्वेन तमादायैवाव्याप्तिसम्भवादिति चेन्न महाकालस्यैव वृत्त्यनियामकसंयोगसम्बन्धेन हेतुसम्बन्धितया तत्र कालिकसम्बन्धेन चरमक्रियात्मकाभाववैशिष्ट्यस्य दैशिकविशेषणतया तदभावस्यापि सत्त्वेन विवक्षणीयप्रतियोगिसामानाधिकरण्यसम्भवात् वृत्त्यनियामकसंयोगस्यापि संयोगत्वेन हेतुतावच्छेदकसम्बन्धत्वात् । न च तथापि वृत्तिनियामकसंयोगेन धूमहेतुकस्थलेऽव्याप्तिरस्त्येवेति वाच्यं तेन रूपेण सम्बन्धतायां मानाभावात् कालस्यावृत्तितया काले धूमसंयोगस्य कालनिष्ठधूमाधेयत्वानियामकत्वेऽपि धूमस्य तेन सम्बन्धेन कालवृत्तित्वमस्त्येवेत्यस्यापि सुवचत्वात् वह्निमान् धूमादित्यादौ साध्याभावमादाय नाव्याप्तिसम्भवः किन्तु चरमक्रियात्मकाभावमादायैवेति अव्याप्तेः स्फुटतरप्रतिपत्त्यर्थमात्मत्वादिसाध्यकस्थलानुधावनस्य सार्थकत्वाच्चेति ॥

ननु ज्ञानवान् आत्ममहाकालान्यतरत्वादित्यादौ हेतुसमानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावदभावानामेव स्वविशिष्टहेत्वधिकरणमहाकाले कालिकसम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वाददिव्याप्तिः न च तादात्म्येन ज्ञानव्यापकस्यात्मनोऽभाव एव काले न प्रतियोगिसमानाधिकरणः आत्मनोऽवृत्तितया काले कालिकसम्बन्धेनावृत्तेरिति वाच्यम् । आत्मनः कालावृत्तित्वे कालवृत्तित्वघटितकारणत्वाद्यनुपपत्त्या तदुपगमस्यावश्यकत्वात् नित्यद्रव्याणां कालावृत्तित्वेऽपि महाकालभिन्ने द्रव्यत्वात् ईश्वरज्ञानभिन्नं गुणत्वादित्यादावतिव्याप्तिः वृत्तिमतामेव महाकालभेदेश्वरज्ञानभेदव्यापकतया तदभावानां यावतामेव महाकाले ईश्वरज्ञानादौ च कालिकविशेषणताविषयितासम्बन्धघटितप्रतियोगिसामानाधिकरण्यसत्त्वादित्यत आह एवं दृष्टान्तरेऽपीति ॥

(दी०) एवं दृष्टान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः ॥

(गा०) दृष्टान्तरे प्रतियोगिसामानाधिकरण्यघटकप्र-

तियोगिमत्त्वाद्दले सम्बन्धभेदनिबन्धनो दोषः कालिकादिसम्बन्धमादायातिव्याप्तिरूपः सम्बन्धैक्यविवक्षया व्यापकताघटकसम्बन्धप्रतियोगिमत्ताघटकसम्बन्धयोरैक्यविवक्षया तथा च ज्ञानवान् आत्ममहाकालान्यतरत्वात् महाकालभिन्नो द्रव्यत्वादित्यादौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितव्यापकताघटकसमवायदैशिकविशेषणतादिसम्बन्धेन ज्ञानाभावमहाकालभेदाभावादिप्रतियोगिनां कालादावबृत्तेर्नातिव्याप्तिरिति भावः । अत्र च येन येन सम्बन्धेन स्वप्रतियोगित्वावच्छिन्नस्य साध्यतावच्छेदकावच्छिन्नव्यापकता तेन तेन सम्बन्धेन प्रतियोगिसामानाधिकरण्यमभावस्य विवक्षणीयम् अन्यथा इदं नित्यज्ञानं नित्यत्वे सति सविषयकत्वादित्यादौ हेतुसमानाधिकरणनित्यज्ञानत्वाद्यभावस्य प्रतियोगिनः साध्यं प्रति विषयितासम्बन्धेनापि व्यापकतया तेन सम्बन्धेन हेत्वधिकरणेश्वरेच्छाकृत्योः प्रतियोगिसामानाधिकरण्येनातिव्याप्तिः येन येनेत्युक्तौ च तथाविधसमवायादिसम्बन्धेनातथात्वान्नातिव्याप्तिः । अत्र साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपितस्वप्रतियोगित्वावच्छिन्नव्यापकताघटकयावत्सम्बन्धत्वेन तादृशसम्बन्धस्य प्रतियोगिसामानाधिकरण्यशरीरे न स्वातन्त्र्येण निवेशस्तथा सति अभावे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकत्वविशेषणवैयर्थ्यापातात् न हि तादृशविशेषणानुपादाने गोत्वाद्यभावमादायासम्भवः सम्भवति गोत्वाद्यभावानामपि हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनिष्ठव्यापकताघटकदैशिकविशेषणतासम्बन्धेन प्रतियोगिसामानाधिकरण्यसत्त्वात् धूमवान् वह्नेरित्यादौ धूमाद्यभावस्यायोगोलके पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्येऽपि यावद्व्यापकताघटकसम्बन्धान्तर्गतसंयोगादिना प्रतियोगिसामानाधिकरण्यविरहात् घटत्वाद्यभाववान् प्रमेयत्वादित्यादौ घटत्वाद्यात्मकाभावस्य च तादृशप्रतियोगिसामानाधिकरण्येऽपि विशेष्यतासम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य घटावृत्तिघटत्वाभावादिप्रकारकप्रमाया अभावस्य तादृशसम्बन्धेन घटे प्रतियोगिसामानाधिकरण्यविरहाद-

तिव्याप्त्यनवकाशात् अपि तु साध्यतावच्छेदकावच्छिन्नव्याप्यतानिरूपितयद्यत्सम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताका ये येऽभावास्तत्तत्सम्बन्धेन प्रतियोगिसमानाधिकरणा इत्येवं क्रमेणैव निवेशाद्व्यापकताया एकस्यैव लक्षणे निवेश इति । यत्तु साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यनिवेशान्न ज्ञानवानात्ममहाकालान्यतरत्वादित्यादावतिव्याप्तिः इत्थं च व्यापकतासाध्यतावच्छेदकसम्बन्धघटिता ग्राह्या अत एव वह्निमान् धूमादित्यादौ घटत्वादिना घटवृत्तित्वविशिष्टद्रव्यत्वत्वादिना वा द्रव्यत्वादेरभावस्य समवायादिसम्बन्धघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेऽपि न क्षतिरिति तन्न । तथा सति कालिकविशेषणतया महाकालान्यत्वविशिष्टघटादौ साध्ये कालत्वादिहेतावतिव्याप्त्यापत्तेः तत्र महाकालान्यत्वविशिष्टघटाभावमहाकालान्यत्वाभावादीनां कालिकसम्बन्धेन महाकाले घटादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वात् यदि च महाकालान्यत्वविशिष्टोऽपि घटो महाकाले वर्तते अन्यथा सिद्धान्तलक्षणे महाकालो घटवान् कालपरिमाणादित्यादौ महाकालान्यत्वविशिष्टघटाभावस्यैव प्रतियोगिव्यधिकरणस्य सुलभतया उभयाभावघटितप्रतियोगिवैयधिकरण्यनिर्वचनायासस्य निष्प्रयोजनकत्वापत्तेरिति दर्शितविशिष्टसाध्यकस्थले कालत्वादिः सद्धेतुरेवेति मन्यते तदापि घटत्वाभाववान् प्रमेयत्वादित्यादौ घटत्वात्मकाभावस्य साध्यतावच्छेदकदैशिकविशेषणतासम्बन्धेन किञ्चिद्विशिष्टस्वाभावात्मकप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तिरस्मन्मते दुर्वारैव न च तेन सम्बन्धेन भावरूपप्रतियोगिसामानाधिकरण्यस्य विवक्षणीयतया नायं दोष इति वाच्यं तथा सत्यभावसाध्यकसद्धेतौ निरुक्तयावदभावान्तर्गतभावरूपसाध्याभावस्य भावरूपप्रतियोग्यप्रसिद्ध्या भावरूपप्रतियोगिसामानाधिकरण्यासम्भवादव्याप्तेः एवं साध्यतावच्छेदकसम्बन्धेन व्यापकत्वादिनिवेशे सर्वत्रेत्यादिना धूमवान् वह्नेरित्यादौ वाच्यत्वाद्यभावमादायातिव्याप्तिप्रदर्शनस्यासङ्गत्यापत्तेश्चेति । यत्तु दैशिकविशेषणताविशेषेण व्यापकता तेनैव सम्बन्धे-

न प्रतियोगिसामानाधिकरण्यं सर्वत्र साध्यवत्त्वप्रकारकप्रमाविषयत्वाद्यभावमादायैव लक्षणसङ्गमनमतिव्याप्तिवारणं चेति तदपि उक्तातिव्याप्तेरात्मत्वादिसाध्यकस्थले साध्याभावमादाय हेतुतावच्छेदकसम्बन्धव्याप्तिप्रदर्शनविरोधाच्चानुपादेयमेव । केचित्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यप्रवेशान्न प्रागुक्तातिव्याप्तिः इत्थं च व्यापकतापि तेन सम्बन्धेन बोध्या अतो वह्निमान् धूमादित्यादौ संयोगादिघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकत्रह्न्याद्यभावस्य हेत्वधिकरणे समवायादिना प्रतियोगिसामानाधिकरण्याविरहेऽपि न क्षतिः तादृशाभावानां साध्यतावच्छेदकसम्बन्धघटितसाध्यनिष्ठव्याप्यतानिरूपितस्वप्रतियोगितावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकप्रतियोगिताकत्वाभावेन निरुक्ताभावानन्तः पातित्वादिति न चैवं व्यधिकरणधर्मावच्छिन्नाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तिरिति वाच्यं संयोगेन घटत्वेन पटो नास्तीत्यनुभवबलात्तादृशाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वात् अनुभवानादरे च समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितायामपि सम्बन्धस्यावच्छेदकत्वासिद्धेः । अथ ग्राह्यबुद्धिप्रतिबन्धकतायाः सम्बन्धविशेषनियन्त्रितत्वानुरोधेन समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य सम्बन्धावच्छिन्नप्रतियोगिताकत्वमावश्यकम् अन्यथा एकैकविधघटाद्यभावज्ञानस्य संयोगसमवायादिरूपनिखिलसंसर्गावगाहिज्ञानप्रतिबन्धकत्वप्रसङ्गात् न च संयोगसम्बन्धावच्छिन्नघटादिप्रकारकबुद्धिं प्रति वस्तुगत्या संयोगादिसम्बन्धेन घटादिमत्ताविरोधी योऽभावस्तज्ज्ञानत्वेन प्रतिबन्धकत्वान्नोक्तातिप्रसङ्ग इति वाच्यम् वास्तवतादृशाभावत्वादिना प्रतिबन्धकत्वे घटाभावत्वेन पदार्थान्तरावगाहिज्ञानस्य घटादिमत्ताज्ञानाविरोधित्वप्रसङ्गात् तस्मात्तत्संसर्गकविशिष्टबुद्धौ तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वावगाहिज्ञानत्वेन प्रतिबन्धकताया वक्तव्यतया समानाधिकरणधर्मावच्छिन्नप्रतियोगितायां सम्बन्धस्यावच्छेदकतासिद्धिरिति चेत्तर्हि घटत्वविशिष्टपटाद्यवगाहिभ्रमघटत्वाद्यवच्छिन्नप्रतियोगिता-

रूपादायभावज्ञानयोरपि प्रतिबध्यप्रतिबन्धकभावसत्त्वात् तादृशप्रतिबध्यप्रतिबन्धकभावस्य सम्बन्धविशेषनियन्त्रितत्वानुरोधेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया अपि सम्बन्धावच्छिन्नतयाऽऽवश्यकत्वात् व्यधिकरणधर्मावच्छिन्नाभावज्ञानस्याप्रतिबन्धकत्वे बाधग्रन्थे लाघवोपनीतकाञ्चनमयत्वादिना वह्न्यनुमितिविरोधितया काञ्चनमयत्वाद्यवच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य हेत्वाभासतोक्तेरसङ्गत्यापत्तेरित्यलमप्रकृतविचारेणेति वदन्ति। तदपि न साधीयः निखिलाभावस्य किञ्चिद्विशिष्टस्याभावनिष्ठप्रतियोगितावच्छेदकीभूतदैशिकविशेषणतासम्बन्धेन तादृशप्रतियोगिसामानाधिकरण्यसत्त्वेन व्यभिचारिण्यतिव्याप्तेः। यावत्प्रतियोगितावच्छेदकसम्बन्धेन क्वचिदपि हेत्वधिकरणे संयोगविषयतादिरूपसकलसम्बन्धेन प्रतियोगिनोऽवृत्तेरसम्भवापत्तेः प्रकारान्तरानुसरणे च गौरवात्॥

अथ यावत्त्वमनुपादाय साध्यतावच्छेदकव्याप्यप्रतियोगिताकस्य तदुपादाय साध्यतावच्छेदकव्यापकप्रतियोगिताकस्य वाऽभावस्य निवेशे उभयत्वावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरुक्ता न तु रूपसामान्याभावसाध्यके प्राचीनमते विरुद्ध पृथिवीत्वादिहेतावित्यत्र किं बीजं तथा सति तत्रापि रूपसामान्याभावाभावस्य रूपस्य ध्वंसप्रागभावादिरूपप्रतियोगिसामानाधिकरण्यसत्त्वेनातिव्याप्तिसम्भवादित्याशङ्कापरिहाराय तस्य स्वमते लक्ष्यत्वमेवोपपादयति रूपादीति॥

(दी०) रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतुरेव मलये परमाणावुत्पत्तिकाले चावयविनि तत्सत्त्वात् ॥

(गा०) यथोक्तलक्षणे अतिव्याप्तिशङ्कया तु नैतद्ग्रन्थावतारः तत्र पृथिव्यन्यत्वाद्यभावस्यापि यावदन्तर्गततया तस्य पृथिवीमद्रूपप्रतियोगिसामानाधिकरण्यासम्भवेनातिव्याप्तेरनवकाशात्। यत्तु उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य पृथिव्यामपि सत्त्वेन पृथिव्यन्यत्वाभावस्य न रूपसामान्याभावव्यापकतावच्छेदकप्रतियोगिताकत्वमित्यभिसन्धिपूर्विका प्राचीनमतमात्रेणासद्धेतुत्वाभिमानिना यथोक्तलक्षणे ऽतिव्याप्तिशङ्का निराकरोति रूपादीति।

सद्धेतुरेवेति याद्दशरीत्या पृथिव्यन्यत्वाभावस्य लक्षणाघटकत्वोपपत्तिः ताद्दशरीत्या साध्यवति हेतुमत्ताया अप्यावश्यकतया सद्धेतुरेवेत्यर्थ इति व्याख्यानं तदनुपादेयमेव ताद्दशाशङ्कितुः पृथिव्यां रूपसामान्याभावसत्त्वेऽविप्रतिपत्तावेवातिव्याप्तिशङ्कासम्भवेनाग्रे पृथिव्यां रूपसामान्याभावव्यवस्थापनौपयिकाकाङ्क्षानुत्पत्त्या तदसङ्गत्यापत्तेः। प्रलये महाप्रलये परमाणूनां नित्यतया तन्नोत्पत्तिकालावच्छेदेन रूपसामान्याभावासम्भव इति भावः। यद्यपि पाकाद्रूपनाशोत्पत्तिकाले पूर्वरूपात्मकप्रतिबन्धकसत्त्वेन रूपान्तरानुत्पादेन तदानीमपि परमाणौ रूपसामान्याभावसम्भवः तथाप्यविनश्यदवस्थरूपस्य प्रतिबन्धकत्वे पूर्वरूपनाशोत्पत्तिक्षणे एव पाकजरूपोत्पत्तिसम्भव इत्यभिप्रायेण *प्रलयपर्यन्तानुधावनम्। उत्पत्तिकाल इति अवयविद्रव्यस्य जन्यतया* प्रलयेऽसत्त्वात्तदवच्छेदेन तत्राभावासम्भव इति भावः तत्सत्त्वात् रूपादिसामान्याभावसत्त्वात् ॥

ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावस्यात्यन्ताभावात्मकतया रूपप्रागभाववत्युत्पत्तिकालीनावयविनि रूपध्वंसवति प्रलयावच्छिन्नपरमाणौ कथं रूपसामान्याभावसम्भवः ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वादित्याशङ्कां निरस्यति न च प्रतियोगिवदिति ॥

(दी०) न च प्रतियोगिवत्तद्ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वं मानाभावात् । अत एवान्तराश्यामे रक्तं रूपं नास्तीतिप्रत्ययः । न चैव रक्तिमध्वंसावगाही पूर्वापररक्तिमध्वंसप्रागभाववतीदानीं रक्तेऽपि तथा प्रत्ययप्रसङ्गात् ॥

(गा०)यथा प्रतियोगिन एककालावच्छिन्नैकदेशावृत्तित्वरूपस्यात्यन्ताभावविरोधिता तथा स्वध्वंसप्रागभावयोरप्यत्यन्ताभावविरोधितेति नेत्यर्थः। मानाभावादिति। ननु रूपध्वंसप्रागभावावच्छिन्नाधिकरणे तदत्यन्ताभावस्य वृत्तौ प्रमाणाभावः घटाद्युत्पत्तिक्षणे तद्द्वितीयक्षणे च तत्प्रत्यक्षासम्भवेन तद्वृत्तित्वेन रूपात्यन्ताभावप्रत्यक्षस्य सुतरामसम्भवात् द्वितीयादिक्षणावच्छेदेन रूपस्यैव त-

थोपत्त्या तदभावीयविशेषणताया असत्त्वेन तृतीयक्षणादावपि तादृशप्रत्यक्षासम्भवात् अनुमये विप्रतिपन्नस्य प्रत्यक्षप्रमाणेन शुद्धाव्य निरसितुमशक्यत्वाच्च अनुमानं चाप्रयोजकमिति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमर्थायातमित्यत आह अत एवेति। ध्वंसप्रागभावयोः अत्यन्ताभावाविरोधित्वादेव अन्तरादयाने पूर्वापरदशायां रक्ते मध्यदशायां श्याम इत्यर्थः । रक्तं रूपं नास्तीति प्रत्यय इति ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे तत्र पूर्वरक्तध्वंसभाविरक्तप्रागभावयोः सत्त्वेनात्यन्ताभावावगाहिन्या प्रमात्मकतादृशप्रतीतेरनुपपत्तेरिति भावः । एव रक्तं रूपं नास्तीतिप्रत्ययः ध्वंसादीत्यादिना प्रागभावपरिग्रहः । पूर्वापरेति । यत्र घटादौ पाकादेव रक्तनाशानन्तरं रूपान्तरमुत्पन्नं तन्नाशानन्तरञ्च रक्तान्तरं तथा नाशानन्तरोत्पन्नरूपान्तरनाशानन्तरं रक्तान्तरमुत्पद्यते तत्र मध्यरक्तदशायां रक्तं रूपं नास्तीति प्रतीत्यापत्तेरित्यर्थः तत्रापि ध्वंसरूपप्रागभावयोः सत्त्वादिति भावः । एतेन मतन्मते रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत्तादृशध्वंसप्रागभावौ तादृशप्रतीतिविषयौ अन्तरारक्तसमानकालीनौ पूर्वापररक्तध्वंसप्रागभावौ च न तथाविधाविति नातिप्रसङ्ग इति निरस्तं तादृशध्वंसप्रागभावयोरेव रूपान्तरदशायां तादृशप्रतीतिनियामकतया तयोरपि तथात्वस्वीकारस्यावश्यकत्वात् तत्र मध्यरक्तध्वंसप्रागभावयोस्तथात्वस्वीकारे तु पूर्वापररक्तदशायां तादृशप्रत्ययापत्तेः । ननु रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावावेव तादृशप्रतीतिविषयौ इत्थं च रक्तरूपतादशायां लौकिकप्रत्यक्षात्मकतादृशप्रत्यय आपाद्यते अनुमित्यात्मको वा भावस्वरूपलौकिकप्रत्यक्षसामग्र्या रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसतदभावप्रत्यक्षं प्रति प्रतिबन्धकतयाऽनापत्तिः अन्यथा भवन्मतेऽपि रूपान्तरकालावच्छेदेन तद्रूपे रक्तत्वावच्छिन्नात्यन्ताभावस्यैव तदानीं घटसन्निकर्षघटितसन्निकर्षानुवृत्तितया प्रत्यक्षापत्तेः विशेष्यघटितसन्निकर्षेण सन्निकर्षस्यादुष्टत्वात् रक्तरूपग्रहप्रतिबन्धकदोषादिसत्त्वे च तादृशानुपपत्त्यापात्। मैवं तद्रूपावच्छिन्नस्याप्यभावज्ञानादिसत्त्वे आनुमानिकस्यापि विपर्ययस्यापत्त्या न च तादृशप्रत्ययस्य प्रमात्वापत्तिः भवन्मतेऽपि तथाविधात्यन्ताभावस्य तत्र

सत्त्वात्तादृशप्रत्ययस्य प्रमात्वेन इष्टापत्तेः यदा च तत्र रक्तं रूपं तत्कालावगाहिन इदानीमत्र रक्तं रूपं नास्तीतिप्रत्ययस्य प्रमात्वं पुनरशक्यापादनं तादृशप्रत्ययेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वे तत्कालावच्छिन्नत्वावगाहनात् यदा च न तत्र रक्तं रूपं तत्कालावच्छेदेनैव ध्वंसप्रागभावयो रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेण तादृशविषयबाधात् तद्धर्मोपलक्षिताभावांशे तत्कालावच्छिन्नत्वावगाहिप्रत्ययस्य प्रमात्वं पुनरिष्टमेव न च तद्धर्मिनिष्ठध्वंसादौ तत्कालावच्छेदेन रक्तत्वावच्छिन्नप्रतियोगिताकत्वं कल्प्यते किं वा तत्कालावच्छेदेन तद्धर्मिण्येव रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावः कल्प्यत इत्यत्र विनिगमनाविरहात् ध्वंसाद्यधिकरणेऽप्यत्यन्ताभावासिद्धिर्निष्प्रत्यूहैवेति वाच्यं ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावाकल्पने ध्वंसादेरतिरिक्तात्यन्ताभावाकल्पनेन लाघवात् रक्तरूपात्यन्ताभावस्यैव तन्मते रक्तरूपध्वंसात्यन्ताभावसमनियततया तस्यैव ध्वंसात्यन्ताभावत्वात् । नैवं तद्धर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वोपगमे विशेषाभावानामेवाधिकरणविशेषावच्छेदेन सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवादतिरिक्तसामान्याभावासिद्धिप्रसङ्गः एवमेकस्यैवाभावस्याधिकरणविशेषकालविशेषवृत्तित्वावच्छेदेन घटत्वपटत्वादिरूपनानाधर्मावच्छिन्नप्रतियोगिताकत्वसम्भवेनाभावभेदविलोपप्रसङ्गः एवं रक्तानधिकरणकालावच्छेदेन रक्तध्वंसादेरक्तत्वावच्छिन्नप्रतियोगिताकत्वोपगमे तत्समानाधिकरणतदसमनियतध्वंसाद्यन्तरस्य तत्समानाधिकरणैकत्वादेरेव वा तादृशकालावच्छेदेन तत्कल्पनमादाय विनिगमनाविरहप्रसङ्गश्चेति ध्वंसप्रागभावाधिकरणेऽत्यन्ताभावकल्पनमेव न्याय्यम् । अथैतादृशयुक्त्या रक्तध्वंसादिमति तदत्यन्ताभावसिद्धावपि रूपध्वंसादिमत्यां पृथिव्यां रूपत्वावच्छिन्नाभावो निर्युक्तिक एवेति चेन्न रूपोत्पत्तिद्वितीयक्षणे पुनस्तदधिकरणे सामान्यसामग्रीबलात् रूपान्तरापत्तिवारणाय रूपं प्रति रूपत्वावच्छिन्नाभावस्य हेतुत्वं कल्पनीयम् । एवं चोत्पत्तिकाले पाकाद्रूपनाशोत्पत्तिक्षणे च रूपत्वावच्छिन्नाभावस्वीकारे तदनन्तरं रूपानुत्पादप्रसङ्गः रूपोत्पादानन्तरं रूपसामान्यस्य पुनरुत्पादश्च प्रागभावहेतुतया दुर्वारः रूपवत्यपि पाकजभाविरूपप्रागभावस-

स्यात् न चैवमपि पृथिव्यां रूपात्यन्ताभावो निर्युक्तिक यत्कालावच्छेदेन तत्र रूपात्यन्ताभावो भवता स्वीक्रियते तत्कालावच्छेदेन रूपप्रागभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वस्वीकारेणैवोपपत्तेरिति वाच्यं दत्तोत्तरत्वात्। इदं त्ववधेयम् उक्तयुक्त्या उत्पत्तिकालावच्छेदेन घटादौ रूपत्वावच्छिन्नाभावासिद्धावपि प्रलयकालावच्छेदेन परमाणौ तत्सत्त्वे मानाभाव । एवं रूपं प्रति रूपत्वावच्छिन्नाभावहेतुत्वमपि न कल्प्यते स्पर्शोत्पत्त्यनुरोधेनावश्यकल्पनीयस्पर्शसामान्याभावस्य तद्धेतुतयैव रूपवति रूपान्तरापत्तेः शक्यवारणत्वात् घटादौ स्पर्शोत्पत्त्यनन्तरं स्पर्शोत्पत्तिवारणाय स्पर्शं प्रति रूपाभावहेतुताया वक्तुमशक्यत्वात् तत्र स्पर्शाभावहेतुताया आवश्यकत्वात् न च रूपं प्रति स्पर्शाभावहेतुत्वे यत्र पाकाद्रूपसत्त्वे स्पर्शनाशस्तत्र स्पर्शान्तरोत्पत्तिकाले रूपान्तरोत्पादप्रसङ्ग इति वाच्यम्। एकजातीयस्यैवाग्निसंयोगस्य रूपरसगन्धस्पर्शनाशकतया स्पर्शनाशकाले रूपनाशस्याप्यावश्यकत्वात् एवं ध्वंसप्रागभावाधिकरणे सामयिकात्यन्ताभावाभ्युपगन्तृमते तादृशात्यन्ताभावो न तदनधिकरणेषु कल्प्यते अनन्ताधिकरणेषु तादृशाभावकल्पनामपेक्ष्य लाघवादेकैकेषु तत्तद्धर्मावच्छिन्नतद्भेदेषु तद्धर्मावच्छिन्नप्रतियोगिताकत्वकल्पनेनैवोपपत्तेरिति ॥

(दी०) तत्सामानाधिकरण्यं च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्मावच्छेदेन तद्वृत्ति काले महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यत्र कालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्वेत्यादौ नातिप्रसङ्गः। स्वविशिष्टेतिविशेषणात् कपिसंयोगाभाववान् मेयत्वादित्यादौ संयोगाभावात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः ॥

(गा०) तत्सामानाधिकरण्य प्रतियोगिसामानाधिकरण्य स्वविशिष्टेति। स्व यत्राभाव प्रतियोगिसामानाधिकरण्य ग्राह्य स एव हेत्वधिकरणावच्छेदेनेति हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकावच्छिन्नाधिकरण यत्तत्सामान्यान्तर्भावेनेत्यर्थः। तेन

वह्न्यभावस्य धूमावयवावच्छेदेन द्रव्यं विशिष्टसत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य क्वचिदपि प्रतियोगिसामानाधिकरण्यस्योपपादयितुमशक्यतया धूमवान् वह्नेरित्यादौ अतिव्याप्त्यप्रसक्तेर्दर्शितविवक्षायाः स्थलान्तरे प्रयोजनमाह तेन गोत्वेति। तद्वति गवादिमति कालिकसम्बन्धेन गोत्वादिना गवादौ साध्ये प्रलयान्तर्भावेन व्यभिचारिणि गोत्वादिहेतौ लक्षणघटकानां गोत्वाद्यवच्छिन्नाभावानां गवादिमति एतत्काले गवाद्यनधिकरणदेशावच्छेदेन महाकाले च प्रलयावच्छेदेन वर्तमानतया प्रतियोगिसामानाधिकरण्यमक्षतमेव। एवं दैशिकविशेषणताविशेषेण गवादिव्यापकप्रलयान्यत्वादेरभावोऽपि तेन सम्बन्धेन प्रलयान्यत्वादिमति महाकाले वर्तमानतया प्रतियोगिसमानाधिकरण एव प्रतियोगिसामानाधिकरण्यघटकीभूताभाववृत्तौ सम्बन्धविशेषानिवेशादित्यतिव्याप्तिः स्यात्। निरुक्तविवक्षणे च स्वविशिष्टयावद्धेत्वधिकरणान्तर्गतप्रलयान्तर्भावेन तादृशाभावानां न प्रतियोगिसामानाधिकरण्यं प्रलये तत्प्रतियोगिनोऽवृत्तेरिति समुदायार्थः। गवादिव्यापकस्य चरमध्वंसादेरभावस्य योऽभावश्चरमध्वंसादिस्तस्य गवादिमति खण्डकाले न प्रतियोगिसामानाधिकरण्यं तत्र तस्यावृत्तेरतो महाकाले वेत्युक्तं महाकाले च कालिकसम्बन्धेन वृत्तेस्तथात्वमक्षतमेव गोसाध्यकस्थले व्यापकतावच्छेदकजन्यद्रव्यत्वप्रलयावृत्तित्वाद्यवच्छिन्नाभावमादायातिव्याप्तिवारणं न सम्भवतीति स्फुटीकरणाय तद्रूपावच्छिन्नसाध्यकस्थलेऽप्यतिव्याप्तिमाह यत्र कालत्वमित्यादिना। अथैतादृशविवक्षापेक्षया लाघवात्प्रतियोगिसामानाधिकरण्यघटकाभावीयवृत्तौ दैशिकविशेषणताविशेषावच्छिन्नत्वमेव निवेश्यतां तथा सति दैशिकविशेषणताविशेषसम्बन्धेन प्रलयान्यत्वादेरभावस्य प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्युद्धारस्य शक्यत्वात्। न चैवं वह्निमान् धूमादित्यादौ कालिकविशेषणताविशेषसम्बन्धेन हेत्वधिकरणवृत्तेर्द्रव्यत्वत्वादिना द्रव्यत्वादेरभावस्य दैशिकविशेषणतया द्रव्यवृत्तित्वाभावादव्याप्तिरिति वाच्यं हेतुसामानाधिकरण्यशरीरेऽपि अभावीयवृत्तौ दैशिकविशेषणतासम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात्। तावतापि लाघवानपायात् न

च दैशिकविशेषणताविशेषेण प्रतियोगिसामानाधिकरण्यनिवेशेऽपि उक्तस्थले ऽतिव्याप्तिस्तदवस्थैव प्रलयान्यत्वाभावस्य प्रलयमात्रवृत्तेरभावमात्राधिकरणकतया प्रलयात्मकाधिकरणस्वरूपत्वात्तस्य च प्रलयान्यत्वरूपप्रतियोग्यधिकरणे परमाण्वादौ दैशिकविशेषणतया वृत्तेरितिवाच्यम् । एवमपि प्रलयान्यकालत्वादेरभावस्य प्रलयातिरिक्तगगनादावपि वर्तमानस्य प्रलयानात्मकतया प्रतियोगिसामानाधिकरण्यस्य दुरुपपादतयातिव्याप्त्यनवकाशात् । मैवं दैशिकविशेषणतया प्रतियोगिसामानाधिकरण्यप्रवेशेऽपि दैशिकविशेषणतासम्बन्धेन प्रलयावृत्तिसाध्यके कालत्वादिहेतावतिव्याप्तिदुर्वारैव तत्र प्रलयमात्रस्य व्यभिचारनिरूपकाधिकरणतया साध्यतावच्छेदकसम्बन्धेन साध्यं प्रति व्यापकतावच्छेदिका यदभावप्रतियोगिता व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोगिताकस्य तस्य प्रलयमात्रवृत्तितया प्रलयात्मकत्वादुक्तरीत्यैव प्रतियोगिसामानाधिकरण्यात् इतरसम्बन्धावच्छिन्नाभावस्य प्रलयानात्मकत्वेऽपि प्रलयान्यवृत्तितया सुतरामेव प्रतियोगिसमानाधिकरणत्वादिति निरुक्तविवक्षणमावश्यकम् । एतदभिप्रायेणैव प्रलयावृत्तिसाध्यकानुसरणं ग्रन्थकृत इति । वस्तुतस्तु प्रलयादिमात्रवृत्तेरभावस्य प्रलयाद्यनात्मकत्वेऽपि दर्शितस्थलेषु उक्तविवक्षामन्तरेणातिव्याप्तिवारणमशक्यम् प्रलयान्यत्वादेरभावस्यापि स्वप्रतियोगिनिष्ठव्यापकताघटकस्वरूपसम्बन्धेन प्रलयात्मकनानाध्वंसान्तर्गतयत्किञ्चिद्ध्वंसवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिना हेत्वधिकरणध्वंसान्तरे स्वस्य समानाधिकरणत्वात् यत्किञ्चिद्ध्वंसान्यत्वाभावस्य तद्ध्वंसमात्रवृत्तेस्तद्ध्वंसमात्रवृत्तित्वविशिष्टस्वाभावाधिकरणे ध्वंसान्तरे सत्त्वेऽपि कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावस्य स्वानधिकरणध्वंसावच्छेदेन स्वाधिकरणेऽपि सत्त्वेन तत्रैव प्रतियोगिसमानाधिकरणत्वात् प्रलयान्यत्वविषयकत्वोपलक्षितप्रमायाः विषयतासम्बन्धेन केवलान्वयितया तादृशसम्बन्धावच्छिन्नतादृशप्रमाभावाप्रसिद्ध प्रलयान्यत्वविषयकत्वविशिष्टप्रमाभावस्य प्रलये प्रसिद्धावपि प्रलये तदन्यविषयकनित्यप्रमारूपप्रतियोगिसमानाधिकरणत्वात् प्रलयाविषयकप्रमाभावस्य च जन्यप्रमाभा

अप्रतियोगिकतया कालिकाव्याप्यवृत्तितया प्रतियोगिमत्यपि तच्छून्यकालावच्छेदेन वृत्तेस्तादृशाभावमादायातिव्याप्तिवारणासम्भवात् उक्तविवक्षणे तु प्रलये प्रलयाविषयकप्रमाभावस्य विषयतया प्रतियोगिसामानाधिकरण्यविरहादतिव्याप्तिवारणसम्भवः एवमुक्तरीत्या घटत्वाभाववान् मेयत्वादित्यादौ व्यावृत्तिर्बोध्या। हेतुमति प्रलय इति हेतुमत्सामान्यान्तर्गतप्रलयान्तर्भावेनेत्यर्थः । तत्सामानाधिकरण्याभावात् गवादिरूपप्रतियोगिसामानाधिकरण्याभावात् अत्र गवादेरभावस्येत्यनुषज्यते। हेतुमति स्ववैशिष्ट्यनिवेशफलमाह स्वविशिष्टेतीति। साम्प्रदायिकैर्द्रव्ये संयोगसामान्याभावानभ्युपगमात्तद्धेतुत्वार्थं कपिसंयोगाभावपर्यन्तानुधावनं सकलहेत्वधिकरणावृत्तित्वेऽपीति नित्यगुणादौ केनापि सम्बन्धेन कपिसंयोगासत्त्वादितिभावः । एतेन हेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगिसामानाधिकरण्यं नास्तीति सूचितं नाव्याप्तिरिति नित्यगुणादेः स्वविशिष्टत्वाभावात्तदन्तर्भावेनातथात्वेऽपि स्वविशिष्टहेत्वाधिकरणान्तर्भावेन तथात्वस्याक्षतत्वात्। अत्र व्यापकताघटकाभावे उक्तयुक्त्या प्रतियोगिवैयधिकरण्यस्य प्रवेशनीयतया साध्यवद्यत्किञ्चिद्यत्त्वसम्बद्धस्वविशिष्टसामान्यकाभिन्नत्वरूपव्यापकतावच्छेदकत्वस्य निवेशनीयतया वा कपिसंयोगाभावादिनिष्ठप्रतियोगितायाः अपि व्यापकतावच्छेदकत्वनिर्वाह इत्यभिप्रेत्य कपिसंयोगाद्यात्मकाभावमादायाव्याप्तिराशङ्किता अन्यथा पुनः सत्तावान् जातेरित्यादौ काले कालिकसम्बन्धेन हेतुसमानाधिकरणानां सत्तात्वाद्यवच्छिन्नसत्ताद्यभावानां हेत्वधिकरणसामान्यान्तर्गतगगनाद्यन्तर्भावेन प्रतियोगिसामानाधिकरण्यविरहात्प्रसक्ताव्याप्तेर्वारणाय स्वविशिष्टेति विशेषणमावश्यकमिति। आदिपदग्राह्यमपि तादृशस्थलमेवेत्यपि बोध्यम्। अत्र च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रत्येकं हेतुतावच्छेदकविशिष्टाधिकरणसामान्यान्तर्भावेन तत्प्रतियोगिसामानाधिकरण्यं तादृशा यावन्तोऽभावाः यद्रूपविशिष्टाधिकरणत्वव्यापकतावच्छेदकप्रतियोगिताकाः तद्रूपवत्त्वमित्यादिकं तादृशाभावे हेतुसामानाधिकरण्यविशेषणाघटिते हेत्वधिकरणे स्वविशिष्टत्वविशेषणाघटितञ्च व्यधिकरणध-

मावच्छिन्नाभावघटितं लघुलक्षणं सम्भवतीति बोध्यम् ॥

ननु धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमाभावादेरपि अयोगो-
लकादौ गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वात् गोत्वाद्य-
भावस्य तत्प्रतियोगित्वं च धूमाभावे जलवृत्तित्वविशिष्टगोत्वा-
भावो नास्तीतिप्रतीतिनियामकाभावस्याभावाधिकरणकाभावप्रति-
योगिकाभावतया ऽधिकरणीभूतधूमाभावस्वरूपत्वात् जलवृत्ति-
त्वविशिष्टगोत्वाद्यभावस्य शुद्धविशेष्यानतिरिक्तत्वादित्याशङ्क्य
जलवृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावातिरिक्तत्वाभा-
वस्वरूपतां प्रदर्शयन् तत्स्वरूपतां प्रतिक्षिपति जलेत्यादिना ।

(दी०) जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु गो-
त्वाद्यभावो न तु धूमाद्यभावो जलादावपि तदभावप्रत्यय-
प्रसङ्गात् ॥

(गा०) न च धूमाभावस्य स्वप्रतियोगिनिष्ठव्यापकताघट-
कयावत्सम्बन्धान्तर्गतसंयोगसम्बन्धेन प्रतियोगिसामानाधिकरण्य-
विरहात्कथमतिव्याप्तिशङ्केति वाच्यं जलवृत्तित्वविशिष्टगोत्वाभावद्र-
व्यान्यतराभावस्याप्युक्तयुक्त्या धूमाभावस्वरूपतासम्भवात् सं-
योगसम्बन्धेन द्रव्यात्मकप्रतियोगिनैव समानाधिकरणत्वात् न
चैवं जलवृत्तिद्रव्यमेव तत्प्रतियोगि तस्यैव प्रतियोगितावच्छेद-
कजलवृत्तित्वविशिष्टयावदन्तर्गतत्वात् तस्य च धूमाभावविशिष्टस-
स्वात्मनि वृत्तौ मानाभावान्नातिव्याप्तिः प्रसज्यते यदि च
जलवृत्तित्ववैशिष्ट्यम् अन्यतरत्वघटकीभूतभेदप्रतियोगिनि गोत्वा-
भावत्वावच्छिन्न एव विशेषणं न त्वन्यतरत्वावच्छिन्ने विशेष-
णतया प्रतियोगितावच्छेदकमिति जलावृत्तिद्रव्यस्यापि तत्प्र-
तियोगित्वमित्युच्यते तदा तादृशाभावस्य विशिष्टाभावानात्मकतया
अन्यतरत्वरूपप्रतियोगितावच्छेदकविशिष्टगोत्वाभावाधिकरणधूमा-
भावाधिकरणकत्वानुपपत्तिरिति वाच्यं जलवृत्तिद्रव्य धूमाभावविशि-
ष्टयादृशहेत्वधिकरणे नियमतो वर्तते तादृशाव्यभिचारिहेतुकस्थल-
एव धूमाभावात्मकनिरुक्तविशिष्टाभावप्रतियोगिद्रव्यसामानाधिक-
रण्यमादायातिव्याप्तिमाशङ्क्य जलवृत्तीत्यादिग्रन्थस्यावतारणीयत्वा-
त् । न चैवं तादृशान्यतराभावस्यैव धूमाभावस्वरूपताप्र-

तिक्षेप उचित इति विशिष्टगोत्वाभावस्याभाव इति ग्रन्थासङ्गतिर्दुर्वारैवेति वाच्यम् । एतादृशग्रन्थस्यापि गोत्वाभावप्रतियोगिकाभावत्वेन रूपेण जलवृत्तित्वविशिष्टतादृशान्यतरत्वावच्छिन्नाभावपरत्वात् न चैवमपि अयोगोलकभेदाद्यभावस्यायोगोलकत्वादिरूपभावात्मकस्य स्वनिष्ठजलवृत्तित्वविशिष्टगोत्वाभावाभावस्वरूपताविरहात्तस्य प्रतियोगिसामानाधिकरण्यं न घटत इत्यतिव्याप्त्यप्रसक्तिः साध्यतावच्छेदकसम्बन्धेन व्यापकतायाः लक्षणाघटकत्वं प्रागेव दूषितम् अतो नायोगोलकान्यत्वाद्यभावस्य लक्षणाघटकत्वसम्भव इति वाच्यम् । अयोगोलकभेदाभावादेरपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसम्भवात् न चैवं धूमाभावस्य गोत्वाभावाद्यप्रतियोगिकत्वेऽपि पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वादतिव्याप्तितादवस्थ्यमितिवाच्यम् तादृशप्रतियोगिना स्वप्रतियोगिनिष्ठव्यापकताघटकयावत्सम्बन्धान्तर्गतसंयोगादिना सामानाधिकरण्यविरहात् घटत्वाभाववान् मेयत्वादित्यादावपि घटत्वाभावादिप्रकारकजन्यप्रमाभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशात् । न चैवं जलवृत्तित्वविशिष्टगोत्वाभावद्रव्यान्यतराभावस्य धूमाद्यभावस्वरूपतया संयोगेन प्रतियोगिसामानाधिकरण्यसत्त्वेऽपि धूमवत्त्वादिप्रकारकप्रमाभावस्य यावद्व्यापकताघटकसम्बन्धान्तर्गतविशेष्यतासम्बन्धेन प्रतियोगिसामानाधिकरण्यासम्भवात् धूमवान् वह्नेरित्यादावतिव्याप्त्यसम्भवात्तादृशाभावस्य धूमाभावस्वरूपताप्रतिक्षेपो न युक्त इति वाच्यं तादृशाभावस्य तत्स्वरूपत्वे तुल्ययुक्त्या धूमवत्त्वप्रकारकप्रमाभावनिष्ठस्य जलादिवृत्तित्वविशिष्टगोत्वाभावद्रव्यत्वप्रकारकप्रमान्यतराभावस्य तत्स्वरूपतया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन तयैव समं विशेष्यतासम्बन्धेन तादृशाभावस्य सामानाधिकरण्यसत्त्वादतिव्याप्तिप्रसक्तिरिति । नन्वेवमपि धूमवान् वह्नेरित्यादावतिव्याप्तिर्दुर्वारा उक्ताभावस्य जलत्वाद्यभावस्वरूपत्वे तुल्ययुक्त्या धूमवद्वृत्तित्वविशिष्टतादृशाभावस्य धूमाभावस्वरूपत्वेन द्रव्यसामान्यस्य तत्प्रतियोगित्वानपायात् एवं धूमाद्यभावस्य धूमत्वादिना प्रमेयसामान्याभावसमनियतत्वेन त-

दभिन्नत्वोपगमात् प्रमेयमात्रस्यैव तत्प्रतियोगित्वात् यदि च धूमत्वादिना प्रमेयं नास्तीतिप्रतीतौ धूममात्रस्यैव प्रतियोगित्वग्रहः न तु प्रमेयान्तरस्य अथवा प्रतियोगिसामानाधिकरण्यशरीरे न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगिता निवेशनीया एव च तादृशप्रतियोगिताको हेतुसमानाधिकरणाभावो ग्राह्यः यत्र प्रमेयनिष्ठप्रतियोगिता च तथाविधधूमत्वाद्यवच्छिन्नैव तादृशधर्मानवच्छिन्ना च धूमादिमात्रवृत्तिप्रतियोगितैव तदाश्रयसामानाधिकरण्यं च नायोगोलकाद्यन्तर्भावेनेति मन्यते तथापि धूमाभावस्य वह्निधूमोभयाभावसमनियततया तदभिन्नत्वेन वह्नेरपि तदभावप्रतियोगितया अयोगोलकान्यत्वाभावस्यायोगोलकान्यवृत्तित्वविशिष्टाकाशाभावाभावसमनियततया तदभिन्नत्वेनाकाशाभावस्यापि तत्प्रतियोगितया धूमत्वादिप्रकारकप्रमाभावस्य धूमवद्विशेष्यकत्वविशिष्टद्रव्यत्वादिप्रकारकप्रमाभावसमनियततया द्रव्यत्वप्रकारकप्रमाया अपि तत्प्रतियोगित्वेन धूमभेदस्य धूमत्वसदुभयत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन सत्ताभेदस्यैव तत्प्रतियोगितया हेतुसमानाधिकरणतादृशाभावानां स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन दर्शितप्रतियोगिभिः सामानाधिकरण्यमसत्त्वमेवातिव्याप्ति । अथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका या या प्रतियोगिता तन्निरूपकाभावानां स्वविशिष्टयावद्धेत्वधिकरणावच्छेदेन तत्तत्प्रतियोगिनाश्रयसामानाधिकरण्यं विवक्षणीयमिति नातिव्याप्तिरिति चेत्तर्हि तादृशी या या प्रतियोगिता तदाश्रयसामानाधिकरण्यं यत्र क्वचिद्यावदधिकरणान्तर्भावेन तत्राभिन्येवावैव सामञ्जस्ये ऽभावे यावत्त्वस्य तत्तत्प्रतियोगितानिरूपकत्वस्य हेतुसामानाधिकरण्यविशेषणस्य हेत्वधिकरणे च स्वविशिष्टत्वविशेषणस्य वैयर्थ्यप्रसङ्गः एवं सर्वत्र हेतुसमानाधिकरणमुभयत्वाद्यवच्छिन्नप्रतियोगिताक साध्याभावमादाय लक्षणसमन्वयसम्भवात्स्वाधिकरणधर्मावच्छिन्नाभावस्याप्रामाणिकत्वेऽपि क्षतिविरहेण एतादृशव्याप्तिलक्षणाशङ्कायां प्रतियोग्यवृत्तित्वं स्यनेन तादृशाभावखण्डनस्यासङ्गत्यापत्तिरित्यतो लक्षणान्तरमाह यत्समानाधिकरणानामिति ॥

(दी०) यत्समानाधिकरणानां साध्यतावच्छेदकावच्छि-

म्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा तत् । ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव शेषं दर्शितादिशावसेयमत आह प्रतियोग्यवृत्तिश्चेति ॥

(गा०) अत्रापि यत्तत्पदयो; पूर्ववद्यत्तद्धर्मावच्छिन्नपरता बोध्या वह्निमान् धूमादित्यादौ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावा वह्नित्वेन घटाद्यभावा एव तेषां च स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेण वह्नित्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणतया *लक्षणसमन्वयः* अत्रापि प्रतियोगिसामानाधिकरण्यानिवेशे उक्तक्रमेण धूमवान् वह्नेरित्यादावति*व्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशः* तथा च धूमाद्यभावानां वह्निधूमोभयत्वाद्यवच्छिन्नप्रतियोगिताश्रयवह्न्यादिना सामानाधिकरण्यसत्त्वेऽपि प्रतियोगितावच्छेदकीभूततादृशोभयत्वावच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिः द्रव्यत्वेन धूमो नास्तीतिप्रतीत्या च द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वं न भासते अपि तु धूमत्वादेरेव द्रव्यत्वादेस्तु तृतीयोल्लिखितवैशिष्ट्यमात्रं धूमादौ भासत इत्युपेयते अतस्तादृशप्रतीतिविषयाभावस्य धूमाभावादिसमनियततया तत्प्रतियोगितावच्छेदकं द्रव्यत्वादिकमपि धूमाद्यभावप्रतियोगितावच्छेदकमिति प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याविवक्षणेऽप्यतिव्याप्तेर्दुर्वारत्वेत्याशङ्काया नावकाशः । एतेन धूमकालावच्छिन्नधूमवद्वृत्तित्वविशिष्टस्य वह्नित्वरूपेण योऽभावस्तस्य धूमाभावसमनियततया वह्नित्वमपि धूमाभावप्रतियोगितावच्छेदकमित्यपास्तं वह्नित्वेन तादृशधूमवद्वृत्तित्वविशिष्टं नास्तीतिप्रतीतौ तादृशधूमवद्वृत्तित्वविशिष्टवस्यैव प्रतियोगितावच्छेदकत्वावगाहित्वोपगमात् अन्यथा धूमवद्वृत्तित्वविशिष्टवह्निमति धूमशून्ये वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिसत्त्वेन तादृशप्रतीत्यनुदयप्रसङ्गात् अस्तु वा तादृशवैशिष्ट्यसहितस्य वह्नित्वस्य तथात्वं तावतापि न क्षतिः प्रतियोगितावच्छेदकपदस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणपरत्वात् । अथैवमपि घटभिन्नत्वेन धूमघटान्यतरघास्तीत्यत्र घटधमान्य-

तदन्यमात्रस्य न प्रतियोगितावच्छेदकत्वभानं धूमशून्ये घटवति तादृशप्रतीत्यनुपपत्तेः नापि घटभिन्नत्वसहितस्य तस्य गौरवात् किन्तु घटभिन्नत्वमात्रस्यैव एव च तादृशाभावस्य धूमाभावसम नियततया धूमाभावस्यापि घटभिन्नत्व प्रतियोगितावच्छे दकम् एव भेदत्वेनायोगोलकभेदघटात्यन्ताभावान्यतराभाव स्यायोगोलकभेदत्वावच्छिन्नाभावसमनियततया भेदत्वमप्ययोगो लकभेदाभावप्रतियोगितावच्छेदकम् । एवं द्रव्यत्वभिन्नत्वेन द्रव्य त्ववृत्त्यन्यतराभावस्य धूमभेदसमनियततया द्रव्यत्वभिन्नत्वम पि धूमभेदप्रतियोगितावच्छेदकं तादृशधर्मावच्छिन्नानां चायो गोलकादावपि सत्त्वादतिव्याप्तिरव्याप्तिश्चेति चेत् तर्हि प्रतियो गितावच्छेदकेत्यनेन प्रतियोगिताया न्यूनवृत्तिभिन्नं यद्यदवच्छेदकं तदेव विवक्षणीयं न्यूनवृत्तित्वं च स्वसमानाधिकरणभेदप्रतियोगि तावच्छेदकत्वे सति स्वसमानाधिकरणत्वं तद्भिन्नत्वं च व्यधिकर णधर्मसाधारणं घटधूमान्यतरादिनिष्ठप्रतियोगितायाश्च न्यूनवृत्तेरेव घटभिन्नत्वादिकं न च वह्नित्वेन प्रमेयं नास्तीत्यत्र प्रमेयसामान्य वृत्तित्वेन वह्नित्वावच्छिन्नप्रतियोगिता या प्रतीयते वह्निर्नास्तीत्य त्रापि वह्निवृत्तितया सैव प्रतीयत इत्युपेयते पक्षधर्मावच्छिन्नावि भिन्नप्रतियोगिताकल्पने गौरवात् तथा च कालिकादिसम्बन्धेन हेतुसमानाधिकरणवह्नित्वावच्छिन्नतद्धर्माद्यभावप्रतियोगिताया न्यून वृत्तिभिन्नावच्छेदकाप्रसिद्ध्याऽव्याप्तिरिति वाच्यं वह्नित्वेन प्रमे यं नास्तीतिप्रतीतौ प्रमेयत्वविशेषितस्य वह्नेरेव प्रतियोगित्वभा सते नान्यस्येत्यभ्युपगम इति तादृशाभावप्रतियोगिताया प्रमेय सामान्यवृत्तिधर्मप्रसिद्धेः । अथवा प्रतियोगितावच्छेदकपदं प्रति योगिताया अनतिरिक्तवृत्ति यद्यदवच्छेदकं तत्परम् अनतिरिक्त वृत्तित्वं च स्वव्यापकत्वं कान्यत्वसमानाधिकरणोभयाभावप्र तियोगित्वं च व्यधिकरणधर्मसाधारणमपि घटधूमान्यतरा दिनिष्ठप्रतियोगितायाश्चातिरिक्तवृत्तय घटभिन्नत्वादिकं ताद- शप्रतियोगिताया यावद्घटाभावादिसाधारण्याप्रसक्तेः वह्नि- त्वावच्छिन्नप्रतियोगितायाश्च प्रमेयसामान्यवृत्तित्वेऽपि त दनतिरिक्तवृत्त्यवच्छेदकं वह्नित्वादिकमेव स्वव्यापकताया न्यव्यावृत्तेः प्रतियोग्यादिति नानुपपत्तिरप्यत्रेति प्रति

योगितायाः स्वन्यूनवृत्तिभिन्नं यदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं वा विवक्षितं न्यूनवृत्तित्वं सामानाधिकरण्यघटितमिति व्यधिकरणधर्मसंग्रहः तत्प्रतियोगितासमानाधिकरणं सद्यत्तत्प्रतियोगितानिरूपकाभाववद्वृत्तितावच्छेदकं तदन्यत्तत्प्रतियोगितावच्छेदकं वा निवेश्यम् एतल्लक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावनिवेशे वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावसमनियतत्वेन घटत्वादिना वह्न्याद्यभावस्य हेत्वधिकरणावच्छेदेन वह्नित्वावच्छिन्नरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यसम्भवेऽपि वह्निघटोभयत्वावच्छिन्नाभावस्यापि तथाविधतया तस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावेनासम्भव इत्यतो व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुक्तम् अत एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमे हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्याप्रसिद्ध्या ऽसम्भवः अयमात्मा ज्ञानादित्यादौ केवलान्वयिसाध्यके चाव्याप्तिर्वा भवतीत्यभिप्रायकतया प्रतियोग्यवृत्तिश्चेत्यादिग्रन्थसङ्गतिः न चायमात्मा ज्ञानादित्यादौ पूर्वक्षणादिवृत्तित्वविशिष्टात्मत्वत्वादेरात्मत्वाद्व्यापकतावच्छेदकतया तदवच्छिन्नाभावस्योत्तरक्षणावच्छेदेन हेतुसमानाधिकरणतया इदं वाच्यं ज्ञेयत्वात् गुणत्वाद्वेत्यादावपि एतत्क्षणान्यक्षणवृत्तित्वविशिष्टवाच्यत्वत्वादेर्विषयतासम्बन्धेन जन्यज्ञानत्वविश्वविषयकजन्यज्ञाननिष्ठद्युक्तित्वादेः साध्यव्यापकतावच्छेदकतया तदवच्छिन्नाभावस्य चैतत्क्षणावच्छेदेन प्रलयान्तर्भावेन च हेतुसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि न तादृशाभावाप्रसिद्धिरिति वाच्यं प्रतियोगिवैयधिकरण्याघटितव्यापकतायाः एव निवेशनीयतया निरुक्तधर्मावच्छिन्नाभावानामपि साध्यवति सत्त्वेन तादृशधर्माणां व्यापकतावच्छेदकत्वासम्भवात् न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाव एव किं न निवेश्यते प्रमेयसाध्यकस्थले संयोगसमवायादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रमेयत्वादिनिष्ठप्रतियोगितावच्छेदकताकाभावमादाय लक्षणसमन्वयादिति वाच्यं तथा सति लघुरूपसमनियतगुरु

धर्मस्याभावप्रतियोगितानवच्छेदकत्वेन तद्रूपावच्छिन्नसाध्यके त-
थाविधाभावाप्रसिद्ध्या ऽव्याप्त्यापत्तेः । अत्र च ज्ञानवानात्ममहाका-
लान्यतरत्वादित्यादावतिव्याप्तिवारणाय साध्यतावच्छेदकसम्ब-
न्धेन व्यापकत्वं तेनैव सम्बन्धेन प्रतियोगिसामानाधिकरण्यं
विवक्षणीयं महाकालान्यत्वविशिष्टघटादिसाध्यकस्थले कालत्वा-
देर्व्यभिचारित्वेऽपि तत्र हेतुसमानाधिकरणस्य महाकालान्य-
त्वविशिष्टघटाद्यभावस्य प्रतियोगितावच्छेदकविशिष्टसामानाधि-
करण्याभावेनातिव्याप्त्यभावात् तादात्म्यसम्बन्धेन प्रमेयसा-
ध्यके तादृशसम्बन्धेन साध्यं प्रति तादृशसम्बन्धेन व्यापक-
तायामवच्छेदकीभूतो यः प्रमेयत्वादिरूपकेवलान्वयिधर्मस्तदव-
च्छिन्नस्य संयोगसमवायविषयितादिसम्बन्धावच्छिन्नाभावमादा-
यैव लक्षणसमन्वयसम्भवात् अभावप्रतियोगितायां साध्यता-
वच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रयोजनविरहेणानिवेशात् तदनि-
वेशेऽपि व्यधिकरणसमवायित्वावच्छिन्नप्रतियोगितावच्छेदकता-
प्रमेयत्वादिमद्भेदमादाय लक्षणसमन्वयसम्भवात् समवायितया वा-
च्यत्ववद्भेदोऽपि द्रष्टव्य इति मिश्रोक्तेस्तादृशभेदस्यापि सो-
न्दडम्भमतत्वादिति केचित् तदसत् घटत्वाभाववान् प्रमेयत्वा-
दित्यादौ पूर्वोक्तदिशाऽतिव्याप्तेः स्वप्रतियोगितावच्छेदकावच्छि-
न्नव्यापकतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न-
सामानाधिकरण्यनिवेशनमपि न सत् तथा सति इदं वाच्यं
ज्ञेयत्वादित्यादौ विषयतासंयोगादिसम्बन्धावच्छिन्नप्रतियोगिता-
काभावमादाय व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि लक्ष-
णसमन्वयात्प्रतियोग्यवृत्तित्वघटितग्रन्थावतारासङ्गतेः एतेन विषय-
तासम्बन्धेन व्यापकता तेन सम्बन्धेन प्रतियोगितावच्छेद-
कावच्छिन्नसामानाधिकरण्यं विवक्षणीयं साध्यतावच्छेदकप्रमा-
त्वावच्छिन्नाभावमादाय सर्वत्र लक्षणसङ्गमनमतिव्याप्तिवारणं
चेति निरस्तं प्रमेयत्वादिना वाच्यत्वादीनामभावे इत्येतादृ-
शाभावाप्रसिद्धेश्च ज्ञेयत्वस्य ज्ञानविषयतात्मकस्य विषयतासम्ब-
न्धेनाव्यापकत्वात् किन्तु स्वप्रतियोगितावच्छेदकसम्बन्धेन व्या-
पकत्वं तेनैव प्रतियोगितावच्छेदकावच्छिन्नाभावसामानाधिकरण्यं
विवक्षणीयं व्यभिचारिणि साध्याभावस्य किञ्चिद्विशिष्टस्याभाव-

निष्ठप्रतियोगितावच्छेदकविशेषणताविशेषेण तादृशाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्येऽपि तदवच्छिन्नभावसामानाधिकरण्यासम्भवान्नातिव्याप्तिः किञ्चिद्विशिष्टस्य स्वस्य यो ऽभावः सामानाधिकरण्यसम्बन्धेन तद्विशिष्टस्याभावश्च स्वसमनियतोऽपि स्वस्मादतिरिक्त एव अभावमात्रप्रतियोगिकाभावस्यैव तदभावप्रतियोगिरूपतायाः सिद्धत्वात् अतो धूमाद्यभावस्य सामानाधिकरण्यसम्बन्धेन ह्रदादिवृत्तित्वविशिष्टधूमाद्यभावाभावविशिष्टत्वावच्छिन्नभावसामानाधिकरण्येऽपि न क्षतिः । यावदभावानामित्यत्राभावपदं भावभिन्नपरम् अतः कालिकादिसम्बन्धेन हेतुसमानाधिकरणस्य वह्न्यादिव्यापकतावच्छेदकरूपावच्छिन्नह्रदत्वाद्यभावाभावस्य ह्रदत्वादेः स्वप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यासम्भवेऽपि न क्षतिः न च ह्रदत्वाभावाभावस्य ह्रदत्वाभावप्रकारकप्रमाविषयत्वाभावसमानियततया स्वप्रतियोगितावच्छेदकतादृशप्रमाविषयत्वत्वावच्छिन्नभावसामानाधिकरण्यमस्त्येवेति वाच्यं तस्य भावतया भिन्नत्वात् एवं सति कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगात्मकाभावस्य लक्षणाघटकत्वेऽपि विवक्षणीयस्वविशिष्टेत्यस्य सार्थकता पूर्ववद्बोध्या न च भावभिन्नाभावविवक्षणेऽपि अयमात्माज्ञानादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावत्वावच्छिन्नप्रतियोगिताकस्याकाशाभावादेः स्वप्रतियोगितावच्छेदकावच्छिन्नभावसामानाधिकरण्यासम्भवादत्र लक्षणसमन्वयासम्भव इति वाच्यम् आकाशाभावीयतादृशाभावत्वस्य दैशिकविशेषणतया साध्यवद्वृत्तेराकाशाभावस्य प्रतियोगितावच्छेदकतया साध्यव्यापकतावच्छेदकत्वविरहेण लक्षणाघटकत्वात् अस्तु वा व्यापकतावच्छेदकरूप एव भाववृत्तित्वविशेषणम् इदं वाच्यं ज्ञेयत्वादित्यादौ च व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाद्यभावस्य प्रतियोगितावच्छेदकं न प्रतियोगितावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकमतस्तादृशाभावस्य न लक्षणाघटकतेति नोक्तप्रतियोग्यवृत्तिश्चेत्यादिग्रन्थासङ्गतिरिति न च प्रतियोगितावच्छेदकसम्बन्धेन व्यापकताविवक्षणेऽपि इदं वाच्यं ज्ञेयत्वा-

दित्यादौ विषयितासम्बन्धेन वाच्यत्ववत्त्वादिमतो ज्ञानादेर्यं स्वरूपसम्बन्धेनाभावस्तस्य स्वप्रतियोगितावच्छेदकीभूतस्वरूपसम्बन्धघटितवाच्यत्वनिष्ठव्यापकतावच्छेदकवाच्यत्वावच्छिन्नप्रतियोगिताकतया हेतुसमानाधिकरणतया स्वरूपसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नवाच्यत्वादिसमानाधिकरणतया च तत्र व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि तमादायैव लक्षणसामञ्जस्यमिति तादृशग्रन्थासङ्गतितादवस्थ्यमिति वाच्य धूमवान् वह्नेरित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाद्यभावस्य कालिकसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिना सम संयोगेन समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकस्यायोगोलकावृत्तिजातित्वाद्यवच्छिन्नाभावस्य कालिकसम्बन्धेन तादृशजातित्वादिविशिष्टायोगोलकीयरूपादिना सम समवायेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य धूमवत्त्वप्रकारकप्रमाविषयत्वाद्यभावस्य कालिकसम्बन्धेन तादृशविषयत्ववत्त्वादिविशिष्टसंयोगादिध्वंसेन अनुयोगितासम्बन्धेन तादृशविषयत्ववत्त्वादिविशिष्टतादृशविषयत्ववत्त्वाद्यभावेन च सम स्वरूपसम्बन्धेन विषयतासम्बन्धावच्छिन्नप्रतियोगिताकधूमवत्त्वप्रकारकप्रमाद्यभावस्य विषयितासम्बन्धेन कालिकसम्बन्धेन वा तादृशप्रमात्वादिविशिष्ट यदयोगोलकादिविषयक ज्ञान तेन सम विषयतासम्बन्धेन सामानाधिकरण्यसत्त्वादतिव्याप्तेर्वारणाय प्रतियोगितावच्छेदकताघटकसम्बन्धेनैव प्रतियोगितावच्छेदकवैशिष्ट्यस्य विवक्षणीयतया वह्निमान् धूमादित्यादौ विषयितासम्बन्धेन द्रव्यत्ववत्त्वादिमतः समवायसम्बन्धावच्छिन्नाभावस्य स्वप्रतियोगितावच्छेदकसमवायादिघटितद्रव्यत्वादिनिष्ठव्यापकताया स्वरूपसम्बन्धेनावच्छेदकीभूतो यो द्रव्यत्ववत्त्वादिस्तदवच्छिन्नप्रतियोगिताकस्य स्वप्रतियोगितावच्छेदकताघटकविषयितासम्बन्धेन प्रतियोगितावच्छेदकविशिष्टज्ञानादिना सम हेत्वधिकरणप्रतियोगितावच्छेदकसमवायादिना सामानाधिकरण्य न सम्भवतीति व्यापकतावच्छेदकतायामपि स्वप्रतियोगितावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्यावश्य निवेशनीयत्वेन इद वाच्य ज्ञेयत्वादित्यादौ दर्शिताभावाना लक्षणाघटकत्वादिति दिक् । न चात्र लक्षणे समवायित्वादिना वाच्यत्वाद्यभावीयसमवायित्वादिरू

प्रतियोगितावच्छेदकस्य वाच्यत्वादिव्यापकतानवच्छेदकत्वाद्वाच्यत्वादिसाध्यकस्थले न तादृशाभावानां लक्षणघटकता तथा च तादृशाभाव एव दुर्लभ इत्यत आह ज्ञेयत्वस्वादिनेति । वाच्यत्वादीनामित्यादिपदाद् घटादेरपि परिग्रहः । शेषमिति स्वविशिष्टयावद्धेत्वधिकरणान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविनिवेशनं हेतुसामानाधिकरण्यशरीरे सम्बन्धविशेषनिवेशनं तत्प्रयोजनं चेत्यर्थः । अत्र च निरुक्ताभावेषु स्वविशिष्टहेत्वधिकरणसामान्यान्तर्भावेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यनिवेशापेक्षया प्रतियोगिवृत्तित्वमेव निवेशयितुमुचितं सङ्केतौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां तादृशाभावानां केवलान्वयितया प्रतियोगिन्यपि वृत्तेर्लक्षणसमन्वयसम्भवाद्वह्निमान् धूमादित्यादौ कालिकादिसम्बन्धेन हेतुसमानाधिकरणरूपान्यत्वप्रकारकप्रमाविषयत्वाद्यभावस्य दैशिकविशेषणतया हेतुसामानाधिकरण्यनिवेशनेन वह्न्यादिभेदस्य प्रतियोगितावच्छेदकतादात्म्यसम्बन्धघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेण लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः । कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगादेरुक्तरीत्या व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण दैशिकविशेषणतया हेतुसामानाधिकरण्यविरहेण भावभिन्नत्वविरहेण च लक्षणाघटकतया प्रतियोग्यवृत्तित्वेऽपि न क्षतिः । धूमवान् वह्नेरित्यादौ धूमाद्यभावस्य प्रतियोगिवृत्तित्वेऽपि अयोगोलकान्यत्वादिप्रकारकप्रमाविषयत्वाभावस्य भावप्रतियोगिकतया अयोगोलकत्वाद्यतिरिक्तस्य प्रतियोगिन्यवृत्तित्वान्नातिव्याप्तिरित्यवधेयम् (१) ॥

---

(१) नन्वयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्यायोगोलकावृत्तित्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन तादृशाभावप्रतियोग्ययोगोलकावृत्तौ अयोगोलके अयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावसत्त्वादतिव्याप्तिरिति चेन्न । हेतुसमानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकायोगोलकत्वप्रकारकप्रमाविषयत्वाभावत्वावच्छिन्नप्रतियोगिताकस्यायोगोलकत्वप्रकारकप्रमाविषयत्वस्वरूपाभावस्याभावमात्रवृत्तिप्रतियोगिताकत्वेन स्वसमनियतादपि भाववृत्तिप्रतियोगिताकत्वेनातिरिक्तादयोगोलकावृत्तित्वावच्छिन्नाभावादतिरिक्तस्य यावदन्तर्गतस्य प्रतियोगिवृत्तित्वविरहेणातिव्याप्तिविरहात् । हेत्वधिकरणवृत्तित्वं प्रतियोगिवृत्तित्वं च तादृशाभावत्वरूपेण बोध्यं तेनाधिकरणस्वरूपाभावमादाय कुत्राप्यव्याप्त्यतिव्याप्त्योर्नावकाशः । एवमयोगोलकभे-

चक्रवर्तिलक्षणमाह केचित्त्विति ।

(दी०) केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगिताया अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वा अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः एवञ्च व्याप्तेरव्यभिचारिसम्बन्धरूपतापि सङ्गच्छते । हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्येव साध्यतावच्छेदके हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् ॥

(गा०) व्याप्यवृत्तेरिति सद्धेतौ साध्यावृत्तिघटत्वादिना साध्याभाव एव लक्षणघटकः तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वाल्लक्षणसमन्वयः व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि लक्षणघटकत्वान्नातिव्याप्तिः कपिसंयोगी एतद्वृक्षत्वादित्यादौ अव्याप्तेर्वारणाय व्याप्यवृत्तेरिति । व्याप्यवृत्तित्वञ्च निरवच्छिन्नवृत्तिकत्वं न तु अवच्छिन्नवृत्तिकान्यत्वं कपिसंयोगी सत्त्वादित्यादौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावादेर्द्रव्ये ऽवच्छिन्नवृत्तिकतया तदन्यत्वाभावात् घटत्वादिना साध्याभावस्यैव लक्षणघटकतयातिव्याप्त्यापत्तेः निरुक्तव्याप्यवृत्तित्वविशिष्टस्य हेत्वधिकरणवृत्तित्वं बोध्यम् । अन्यथा कपिसंयोगी एतत्त्वादित्यादौ कपिसंयोगसामान्याभावस्य द्रव्ये हेतुसमानाधिकरणतया गुणादौ च निरवच्छिन्नवृत्तिकतया तमादायाव्याप्तिवारणासम्भवात् हेत्वधिकरणनिरूपितनिरवच्छिन्नाधेयतावत्त्वं हेत्वधिकरणनिष्ठनिरवच्छिन्नाधिकरणतावत्त्वं वा दलद्वयपर्यवसितार्थः । केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्येति समुदायस्य हेत्वधिकरणे व्याप्यवृत्तिर्यः साध्याभावस्तस्येत्यर्थः हेत्वधिकरणे व्याप्यवृत्तित्वञ्च हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानव-

एतेन प्रमेयवत्साध्यकव्यभिचारिण्यतिव्याप्तिरिति यदि साध्यतावच्छेदकत्वेन निवेशः तदा प्रतियोगि-तावच्छेदकसम्बन्धावच्छिन्नत्वेन निवेशनीयम् इति १ पुस्तके अधिक- पाठः ।

च्छेदकं यदभावनिष्ठं तद्व्यक्तित्वं तत्त्वं न च विशिष्टसत्तावान् जातेरित्यादौ गुणादिनिष्ठसत्तादिरूपाभावप्रतियोगिताया विशिष्टसत्ताद्यभावनिष्ठतद्व्यक्तित्वस्यावच्छेदकत्वात् विशिष्टसत्त्वाद्यभावस्य व्याप्यवृत्तित्वानुपपत्तिः यदभावाभावत्वावच्छिन्नाधिकरणत्वं हेतुमतस्तत्त्वमितिविवक्षणे व्यधिकरणधर्मावच्छिन्नाभावासङ्ग्रहप्रसङ्गस्तदभावाप्रसिद्धेरिति वाच्यं यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकानुयोगितानिरूपकतानवच्छेदकं यदभावत्वं तत्त्वस्य विवक्षितत्वात् गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीत्यप्रत्ययेन विशिष्टसत्ताभावत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टायाः सत्ताया गुणादिवृत्तितानभ्युपगमेन विशिष्टसत्ताद्यभावस्य व्याप्यवृत्तितानिर्वाहादित्याहु । । ननु संयोगिभिन्नं प्रमेयत्वादित्यत्रातिव्याप्तिः संयोगिभेदाभावस्य तद्भेदप्रतियोगितावच्छेदकीभूतसंयोगात्मकस्याव्याप्यवृत्तित्वेन लक्षणघटकत्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसङ्क्रमनादिति चेन्न संयोगिभेदस्य व्याप्यवृत्तित्वे तस्य द्रव्यत्वसंयोगप्रकारकप्रमाविशेष्यत्वाद्यवच्छिन्नभेदसमनियततया तदभिन्नत्वेन तद्भेदप्रतियोगितावच्छेदकद्रव्यत्वादिकमपि संयोगिभेदाभावः तस्य हेत्वधिकरणे व्याप्यवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य च साध्यतावच्छेदके सत्वेनातिव्याप्त्यनवकाशात् एवं द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ व्याप्यवृत्तेः सत्तारूपाभावस्य प्रतियोगितावच्छेदकं साध्यतावच्छेदकमित्यव्याप्तिरित्यपि नाशङ्कनीयं सत्तादिसत्त्वेऽपि द्रव्यादौ द्रव्यान्यत्वविशिष्टसत्ताभावो नास्तीत्यादिप्रत्ययानुदयात् विशिष्टनिरूपिताधिकरणताविशेषस्यैव विशिष्टाभावाभावत्वोपगमात् तावतापि नाभावाभावस्य प्रतियोगिरूपताक्षतिः विशिष्टाभावस्य विशिष्टाधिकरणत्वाभावसमनियतत्वेन तदभिन्नतया विशिष्टसत्ताधिकरणताया अपि विशिष्टाभावप्रतियोगित्वात् । परे तु संयोगत्वेन संयोगनिरूपिताधिकरणतायाः किञ्चिदवच्छिन्नत्वेऽपि संयोगिभेदाभावत्वेन तन्निरूपिताधिकरणता निरवच्छिन्नैव द्रव्ये संयोगिभेदस्याप्रत्ययात् अवच्छेदकमनन्तर्भाव्य तदभावत्वावच्छिन्नवत्ताप्रतीतेः एवं द्रव्यादौ सत्तात्वावच्छिन्नसत्ताद्यधिकरणतासत्त्वेऽपि द्रव्यान्यत्वविशिष्टसत्ता-

त्वादिनैव तदवच्छिन्नप्रतियोगिताकाभावाभावत्वेनापि न वृत्तिः तत्र विशिष्टाभावो नास्तीत्यप्रत्ययात्तथा च साध्यनिष्ठयादृशप्रतियोगिताकाभावत्वावच्छिन्ननिरूपितानवच्छिन्नाधिकरणता हेत्वधिकरणवृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यमिति न कश्चिद्दोष इत्याहुः। अथात्र हेत्वधिकरणवृत्तित्वं यदि येन केनचित्सम्बन्धेन तदा कालिकसम्बन्धेन धूमाधिकरणवृत्तिवह्नित्वाद्यवच्छिन्नवह्न्यभावादिकमादायाव्याप्तिः यदि च कालिकसम्बन्धेन काले वह्न्यभावादेर्वृत्तिर्वह्न्यनधिकरणदेशावच्छिन्नैवेति नासौ हेत्वधिकरणे निरवच्छिन्नवृत्तिक इति मन्यते तदापि सत्तावान् जातेरित्यादौ विषयितासम्बन्धेन हेतुमति ज्ञानादौ वर्तमानसाध्याभावमादायाव्याप्तिर्दुर्वारैव दैशिकविशेषणतासम्बन्धेन हेत्वधिकरणवृत्तित्वनिवेशे च घटत्वाभावसाध्यके व्यभिचारिण्यतिव्याप्तिः तत्र समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य भावरूपसाध्याभावस्य तेन सम्बन्धेनावृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् एवं कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः दैशिकविशेषणतया हेतुसमानाधिकरणस्याकाशाभावस्य प्रतियोगितावच्छेदकतायाः साध्यतावच्छेदके सत्त्वात् कालिकसम्बन्धेनाकाशाभावरूपप्रतियोगिमत्ताया एव कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावो नास्तीतिप्रत्ययनियामकत्वादाकाशाभावस्यैव तादृशसाध्याभावरूपत्वे बाधकविरहादिति चेन्न स्वीययादृशप्रतियोगिताश्रयवत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकज्ञानं विरोधि तादृशसम्बन्धेन हेत्वधिकरणवृत्तियोऽभावस्तदीयतादृशप्रतियोगितानवच्छेदकत्वस्यैव निवेशनीयत्वात् आकाशाभावस्य दैशिकविशेषणतासम्बन्धो न दर्शिताकाशाभावाभाववत्ताज्ञानविरोधिज्ञानविषयः अपि तु कालिकसम्बन्ध एव न च तेन सम्बन्धेन स आत्मनि वर्तते अत आकाशाभावीयसाध्यनिष्ठप्रतियोगिताया न यादृशप्रतियोगितेत्यनेनोपादानसम्भवः अपि तु व्यधिकरणधर्मावच्छिन्नसाध्याभावीयप्रतियोगिताया एव तादृशाभावज्ञानस्य दैशिकविशेषणतासंसर्गकस्य व्यधिकरणधर्मप्रकारेण साध्यवत्त्वावगा-

छिन्नं भ्रमं प्रति विरोधित्वात् सामान्यतः प्रतियोगिप्रकारकज्ञाननिवेशे आकाशप्रकारकज्ञानं प्रति दैशिकविशेषणतासम्बन्धेन आकाशाभावप्रकारकज्ञानस्य प्रतिबन्धकतयोक्तदोषतादवस्थ्यमिति यादृशप्रतियोगिताश्रयेत्युक्तं प्रतियोगिताश्रयवत्ताज्ञानं च तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नप्रकारकं ग्राह्यं तेनाकाशत्वेन तादृशसाध्यवत्ताज्ञानं प्रति दैशिकविशेषणतयाकाशाभावप्रकारकज्ञानस्य विरोधित्वेऽपि न क्षतिः एवं च प्रतियोगिताश्रयावगाहित्वनिवेशे प्रयोजनाभावात् यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानं प्रतिबन्धकमित्येव वक्तव्यं साध्यवत्ताज्ञानविरोधित्वं वा एतल्लक्षणे निवेश्यं न चाकाशत्वादिना साध्यवत्ताज्ञानविरोधितामादाय दर्शितदोषतादवस्थ्यं साध्यतावच्छेदकावच्छिन्नप्रकारताकज्ञानविरोधित्वपर्यन्तनिवेशे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववत्ताज्ञानस्य व्यधिकरणधर्मादिप्रकारकसाध्यवत्ताज्ञानं प्रत्येव विरोधित्वेन साध्यतावच्छेदकावच्छिन्नप्रकारताकज्ञानाविरोधितया तादृशसाध्याभावाप्रसिद्धेरिति वाच्यं घटत्वविशिष्टवह्निमदित्यादिज्ञानस्यापि साध्यतावच्छेदकावच्छिन्नप्रकारताकत्वस्याधिकं त्वित्यादिन्यायेनाक्षतत्वात् न च तन्मात्रावच्छिन्नप्रकारताकत्वमवश्यं निवेश्यमन्यथा आकाशत्वनिरुक्तसाध्यतावच्छेदकोभयरूपेण साध्यवत्ताज्ञानं प्रति दैशिकविशेषणतया आकाशाभाववत्ताज्ञानस्य विरोधितया तद्दोषतादवस्थ्यमिति कथं व्यधिकरणधर्मावच्छिन्नाभावसङ्ग्रह इति वाच्यम् । प्रतियोगितावच्छेदकमात्रावच्छिन्नप्रकारतानिवेशेऽपि व्यधिकरणधर्मावच्छिन्नाभावासङ्ग्रहात्तदवच्छिन्नप्रकारतामात्रनिवेशो उक्तस्थले आकाशाभावीयदैशिकविशेषणताया वारणासम्भवात् द्वितीयलक्षणे यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकातिरिक्तानवच्छिन्नप्रकारताशालिज्ञानं प्रति येन सम्बन्धेन स्वप्रकारकं ज्ञानं विरोधीति विवक्षणवदेतल्लक्षणेऽपि साध्यतावच्छेदकप्रकृतप्रतियोगितावच्छेदकातिरिक्तानवच्छिन्नप्रकारताकज्ञानविरोधितानिवेशेन प्रतीकारसम्भवात् आकाशत्वादेस्तादृशाकाशाभावाभावत्वादिरूपसाध्यतावच्छेदकातिरिक्ततया तदवच्छिन्नप्रकारताकज्ञानविरोधितामादाय

तियोगिना सामानाधिकरण्यमावश्यकमेव एकव्यक्तिवृत्तिसाध्यके अतस्तत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्ध्या व्याप्तिरिति तन्नोक्तं प्रतियोगिव्यधिकरणत्वं च न प्रतियोग्यधिकरणावृत्तित्वं संयोगि सत्त्वादित्यादौ संयोगाद्यभावस्यातथात्वादभावान्तरमादायातिव्याप्तेः किन्तु प्रतियोग्यनधिकरणवृत्तित्वम्। एवं च प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तेरितिदलद्वयपर्यवसितार्थः प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणभिन्नत्वमतः समवायेन ज्ञानादिसाध्यकद्रव्यत्वादिहेतौ नातिव्याप्तिः इत्थं च प्रतियोगिता न सम्बन्धविशेषावच्छिन्नत्वेन विशेषणीया विशेषणताविशेषेणाभावसाध्यके सर्वस्यैवाभावस्य तेन सम्बन्धेन किञ्चिद्विशिष्टस्याभावरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरतो यादृशप्रतियोगिताश्रयानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति सिद्धान्तलक्षणे वक्ष्यमाणरीत्या निष्कर्षणीयम्। अथ विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिवारणाय यादृशप्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं हेतुमत इत्यस्यैव वाच्यतया वह्निमान् धूमादित्यादौ वह्नित्वादिना घटाद्यभावीयप्रतियोगिताया लक्षणघटकत्वासम्भवादवच्छेदकवह्नित्वावच्छिन्नानधिकरणत्वस्य हेतुमत्यसत्त्वात् तथा च सामानाधिकरण्येनेत्यनर्थकम्। अत्र केचित् यादृशप्रतियोगितावच्छेदकविशिष्टयादृशप्रतियोगिताश्रयोभयानधिकरणत्वं हेतुमत इत्येव तत्सार्थक्याय विवक्षणीयं दर्शिताभावीयप्रतियोगितावच्छेदकवह्नित्वादिविशिष्टस्य हेतुमति सत्त्वेऽपि तादृशप्रतियोगिताश्रयघटादेरसत्त्वादुभयानधिकरणत्वं हेतुमतोऽक्षतमेवेति तादृशप्रतियोगितावच्छेदकत्वमादाय दोषवारणाय सामानाधिकरण्येनेत्यस्य सार्थकता न च वह्नित्वेन घटाद्यभावस्य प्रतियोगिता वह्निभिन्नयावद्वृत्तिरेकैव स्वीक्रियते न तु घटादिरूपप्रतियोगिभेदेन भिन्ना अभावस्य प्रतियोगितावच्छेदकस्य चैक्यात् तथा च घटादिनिष्ठप्रतियोगिताश्रयसाधनादेरेव साधनवति सत्त्वात् तादृशप्रतियोगिताश्रयानधिकरणत्वं न समेति न सामानाधिकरण्येनेत्यस्य सार्थकतासम्भवः प्रतियोगिभेदेन प्रतियोगिताभेदे तु म-

हानसीयवह्न्यादिनिष्ठायां वह्न्यादिसामान्याभावीयप्रतियोगिताया
पर्वतीयवह्न्याद्यवृत्तितया तादृशप्रतियोगिताश्रयानाधिकरणत्वस्य हे
तुमति पर्वतादौ सत्त्वात् वह्नित्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरि
ति वाच्यं यतः प्रतियोगिभेदेन प्रतियोगिताया न भेदः अपि त्वव
च्छेदकभेदेनैव एवमपि वह्निभिन्नवान् घटादित्यादौ वह्निभिन्नत्व
वद्वह्न्यभावीयप्रतियोगिताया वह्निभिन्ने ऽसम्भाविततया तदाश्रयान
धिकरणत्वस्य वह्निशून्ये हेतुमत्पक्षवृत्तितया तादृशप्रतियोगि
तावच्छेदकत्वमादायाव्याप्तेर्वारकतया सामानाधिकरण्यमित्यस्य
सार्थकता महाकालो घटवान् कालपरिमाणादित्यादौ तु महा
कालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगिता तादृशी महाकालस्य
महाकालान्यत्वविशिष्टघटत्वाद्यवच्छिन्नाधिकरणताशून्यत्वात् य
था वक्ष्यमाणरीत्या साध्यतावच्छेदकसम्बन्धसामान्ये यादृ
प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वयादृशप्रतियोगिताश्रयप्र
तियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वैतत्त्रितयाव
च्छिन्नाभावस्तदनवच्छेदकत्वमेव वाच्यम्। एवं च तत्रावृत्तिगगन
भावप्रतियोगितैव तादृशी एवं च वह्नित्वादिना घटाद्यभाव
प्रतियोगितावच्छेदकवह्नित्वादिविशिष्टप्रतियोगिकत्वतदाश्रयवह्नि
प्रतियोगिकत्वयोरेकस्मिन् सम्बन्धे असत्त्वेन तादृशप्रतियोगिताया
अपि तथात्वाद्वारकतयापि सामानाधिकरण्येनेत्यस्य सफलत्व
मवधेयमित्याहुः। परे तु अत्यन्ताभावस्येवान्योन्याभावस्यापि प्रति
योग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोपगमात् पर्वतादौ वह्नि
त्वविशिष्टावच्छिन्नजलादिमद्भेदोऽपि प्रामाणिकः एवञ्च स्वाव
च्छेदकविशिष्टावच्छिन्नस्वाश्रयभिन्नप्रतियोगिताकभेदवद्धेत्वधिकर
णकः यत् प्रतियोगित्वं तदनवच्छेदकत्वं साध्यतावच्छेदकस्य
निर्वचनीयम्। एवञ्च वह्नित्वादिना जलाद्यभावीयप्रति
योगिताया तादृशा एव कथितभेदस्य तदवच्छेदकवह्नित्वादि
विशिष्टावच्छिन्नतदाश्रयजलादिमद्भिन्नप्रतियोगिताकत्वादनस्तदव
च्छेदकत्वमादाय दोषवारणाय सामानाधिकरण्येनेति। संयो
गी द्रव्यत्वात् वह्निमान् धूमादित्यादौ संयोगत्ववह्नित्वाद्यव
च्छिन्नसंयोगवह्न्याद्यभावप्रतियोगिताया गुणत्वद्रव्यत्वाद्यवच्छिन्न
संयोगिपर्वतभेद संयोगवह्न्याद्यवच्छिन्नगुणहृदादिभेद वारणाय व

वारणायावच्छिन्नान्तनिष्ठान्तयोरुपादानम् । अथवा यादृशप्रति-
योगितावच्छेदकावच्छिन्नयादृशप्रतियोगिताश्रयवृत्तिप्रतियोगिताव-
च्छेदकताकभेदघटितं हेतुमतस्तद्भेदावच्छेदकत्वं विवक्षणीयं
वह्नित्वादिना घटाद्यभावप्रतियोगिताप्येतादृशी तादृशप्रतियो-
गितावच्छेदकवह्नित्वावच्छिन्नतादृशप्रतियोगितासमानाधिकरण-
प्रतियोगितावच्छेदकताकस्य वह्नित्वेन घटवानिति प्रती-
तिविषयभेदस्य हेतुमति सत्त्वात् व्यधिकरणधर्मस्यात्यन्ता-
भावप्रतियोगितावच्छेदकत्ववदन्योन्याभावप्रतियोगितायामप्यवच्छे-
दकत्वात् अत एव समवायितया वाच्यत्ववद्भेदोऽपि दुर्ग्रह इति
मिश्रैरभिहितम् इत्थं च तादृशप्रतियोगितावारणाय सामानाधि-
करण्येनेति । हेतुमतो वह्नित्वेन घटवद्भेदवत्त्वं घटत्वेन वह्निमद्भेद-
वत्त्वं चादाय वह्निनिष्ठप्रतियोगितायास्तादृशत्ववारणाय प्रकृत-
प्रतियोगितासमानाधिकरणयत्तदवच्छेदकावच्छिन्नत्वयोर्भेदप्रतियो-
गितावच्छेदकतायां निवेशनं । महाकालो घटवान् कालपरिम-
णादित्यादौ महाकालान्यत्वविशिष्टघटाद्यभावीयप्रतियोगितामा-
दायैव लक्षणसमन्वयः न तु गगनत्वघटत्वादिना घटाद्यभावीय-
प्रतियोगितां तस्याः गगनाद्यवच्छिन्नघटाद्यवच्छिन्नकालभेदं गग-
नत्वघटत्वाद्यवच्छिन्नघटाद्यवच्छिन्नभेदं चादाय पूर्वप्रतीकारलाभ-
सम्भवेऽपि सामानाधिकरण्येन तदवच्छेदकस्याप्रसिद्धेः । अथवा
तादृशप्रतियोगितासामान्ये यद्धर्मसामानाधिकरण्यविशिष्टयद्धर्मा-
वच्छेद्यत्वाभावस्तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरित्येव वि-
वक्षणीयम् । एवं च व्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायापि
लक्षणसमन्वयस्तत्र सम्भवतीत्यवधेयम् । वह्नित्वेन वह्निधूमोभयं
नास्तीत्येतादृशप्रतीतिविषयाभावस्य वह्निमान् वह्नित्वेन वह्निधूमो-
भयवानितिप्रतीतिसिद्धभेदमादाय प्रतियोगिव्यधिकरणत्वेऽपि त-
स्य प्रतियोगितावच्छेदकत्वं न वह्नित्वमात्रे पर्याप्तं तथा सति
वह्नित्वरूपप्रतियोगितावच्छेदकविशिष्टवह्निरूपप्रतियोगिमति ता-
दृशाभावप्रत्ययप्रसङ्गात् किन्तु वह्नित्वतदुभयत्वयोरेव तत्पर्या-
प्तिरस्तादृशप्रतियोगितायां समानाधिकरणतयावच्छेदकत्वेऽपि व-
ह्नित्वस्य न क्षतिः । यदि च तादृशाभावप्रतियोगितावच्छेदकं
वह्नित्वादिकमेव न तु प्रतियोगिविशेषणतापन्नमुभयत्वं प्रतियो-

गिविशेषणतानापत्ते प्रतियोगितावच्छेदकत्वावगाहिप्रतीत्या तद्वि शेषणतापन्ने तदनवगाहनात् अन्यथा वह्नित्वेन घटो नास्तीत्यादावपि वह्नित्वघटत्वोभयस्मिन्नवच्छेदकत्वपर्याप्त्यवगाहनौचित्यात्सामा नाधिकरण्येनेत्यस्य वैयर्थ्यापत्तेः वह्नित्वेनोभयाभावप्रतियोगिता व्यासज्यवृत्तिरतो न तादृशाभावस्य केवलान्वयित्वानुपपत्तिरि ति मन्यते तदा सामानाधिकरण्येनेत्यस्य प्रतियोगितापर्याप्त्य धिकरणवृत्तित्वेनेत्यर्थ इत्याहु । तदुभयमपि न युक्तम् एव सति घटत्वादिना साध्याभावप्रतियोगितायाः अपि निरुक्तप्रतियोगिवै यधिकरण्यनिरूपकत्वसम्भवेन प्रथमलक्षणे प्रतियोगिवैयधि करण्यानभिधानस्य निर्बीजतया सन्दर्भविरोधापत्तेः । वस्तु तो यादृशप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकयत्किञ्चिद् र्मावच्छिन्नानधिकरणत्व हेतुमतस्तदनवच्छेदकत्व साध्यताव च्छेदकस्य विवक्षणीय कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगादि निष्ठप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदक कपिसंयोगत्वा दिकमेव तदवच्छिन्नानधिकरणत्व च न हेतुमत इति न कपिसं योगी एतद्वृक्षत्वादित्यादावव्याप्तिः घटत्वावच्छिन्नप्रतियोगिताक त्वसम्बन्धेन च प्रमेयत्वादिना प्रतियोगिनो घटत्वेन प्रमेय ना स्तीत्यादिज्ञाने भानात्प्रमेयत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमत्य सम्भवात् घटत्वाद्यवच्छिन्नप्रतियोगितायाः यादृशप्रतियोगिते त्यनेनोपादानासम्भवात्तथाविधप्रतियोगितायाः अप्रसिद्धिरतो यत्किञ्चिदित्युक्तं दण्डिमान् दण्डिसंयोगादित्यादौ तद्दण्डाव च्छिन्नानधिकरणत्वमादाय दण्डिसामान्याभावस्य प्रतियोगिवैय धिकरण्येऽपि न क्षतिः तत्तद्दण्डावच्छिन्नात्यन्ताभावप्रतियोगिता वच्छेदकत्वमादाय दोषवारणाय तत्र परम्परासम्बन्धेन दण्ड त्वादेः साध्यतावच्छेदकत्वस्वीकारस्यावश्यकत्वात् तत्संयोगत्व तद्वह्नित्वादिविशिष्टप्रतियोगिविषयकाभावभाने संयोगत्ववह्नित्वा दिरूपसामान्यधर्मावच्छिन्नप्रतियोगितायाः संसर्गतया भाने मानाभावात्तत्संयोगत्वतद्वह्नित्वाद्यवच्छिन्नानधिकरणत्वेऽपि हेतुमतो न क्षतिः संसर्गत्ववह्नित्वाद्यवच्छिन्नप्रतियोगितायाः घटत्वाद्यवच्छिन्नत्व न घटो नास्तीत्यभावबुद्धौ संसर्गतया भानोपगमे प्रमाणनिरूपितत्वेन प्रकारता विवक्षणीया विशिष्टसत्त्वावान् जातेरित्यादौ विशिष्टसत्ता

त्वाद्यवच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नप्रकारतावच्छेदकविशि-
ष्टसत्त्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्त्वान्नातिव्याप्तिः व-
ह्नित्वाद्यवच्छिन्नघटादिनिष्ठव्यधिकरणधर्मावच्छिन्नाभावीयप्रतियोगि-
तासम्बन्धावच्छिन्नप्रकारतावच्छेदकघटत्वाद्यवच्छिन्नानधिकरणत्व-
स्य हेतुमति सत्त्वात्सामानाधिकरण्येनेत्यस्य सार्थकता पक्ष-
मात्रवृत्तिसाध्यकस्थले साध्यनिष्ठप्रतियोगितासंसर्गावच्छिन्नप्र-
कारतावच्छेदकावच्छिन्नानधिकरणत्वं न हेतुमत इति साध्यवृत्ति-
तथाविधप्रतियोगितायाः अप्रसिद्ध्या न पूर्वोक्तलक्षणे प्रतियोगिव्य-
धिकरणत्वं निवेशितम् वह्नित्वादिना उभयाभावमादाय दोषस्तु पू-
र्ववदेव वारणीय इति। परे तु यदि घटत्वेन वह्निर्नास्ति वह्नित्वेन घटो
नास्तीत्यादौ वह्नित्वघटत्वादिरूपसमानाधिकरणधर्मस्यापि प्रतियो-
गितावच्छेदकत्वं भासते अन्यथा तादृशप्रतीतौ प्रतियोगिनि तत्त-
द्धर्माणामुपलक्षणतया भानेन तद्विशिष्टवैशिष्ट्यानवगाहितया तन्नि-
र्विकल्पकानन्तरमप्युत्पत्त्यापत्तेः न च वह्नित्वघटत्वादेः प्रतियोगिता-
वच्छेदकत्वानवगाहने तन्निर्विकल्पकानन्तरं तादृशाभावबुद्धिरिष्टैव
प्रतियोगितावच्छेदकतया यदवभासते तन्निर्विकल्पकानन्तरमेवाभा-
वप्रत्ययानुपगमादिति वाच्यं वह्नित्वादिनिर्विकल्पकानन्तरं तथावि-
धप्रत्ययोपगमे विशेषाभावेन तदुत्तरं वह्नित्वाद्यंशे प्रतियोगिताव-
च्छेदकत्वानवगाहिवह्निर्नास्तीत्याकारकसमानाधिकरणधर्मावच्छि-
न्नाभावप्रत्ययस्यापि स्वीकारापत्तेः एवं स्वातन्त्र्येण प्रतियोगि-
तावच्छेदकताविषयकाभावबुद्धौ प्रतियोगिनि प्रकारस्योपलक्ष-
णतया भानोपगमे वह्निमति वह्नित्वेन द्रव्यं नास्तीति प्रतीत्याप-
त्तिः। यत्तु प्रतियोगिप्रकारविरुद्धधर्म एव स्वातन्त्र्येण प्रतियोगि-
तावच्छेदकत्वं भासते इति नियमान्न तदापत्तिरिति । तन्न तथा-
सति ह्रदादौ वह्नित्वेन किमपि द्रव्यं नास्तीति प्रतीत्यनुपपत्तेः।
न च प्रतियोगित्वे प्रतीतिप्रकारीभूतधर्मान्यूनवृत्तित्वभाननियमात्
पर्वतादिवृत्तिवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितायाः द्रव्यत्वन्यूनवृ-
त्तित्वान्नोक्तापत्तिरिति वाच्यं वह्नित्वेन द्रव्यं नास्तीति शाब्दज्ञ-
बोधे प्रतियोगितायाः द्रव्यत्वान्यूनवृत्तित्वभासकाभावात् । न च
संसर्गतया भासमाने वह्नित्वावच्छिन्नप्रतियोगित्वे द्रव्यत्वान्यून-
वृत्तित्वस्य संसर्गतावच्छेदकतया भानमाकाङ्क्षाबलादेव सम्भव-

तीति वाच्यम् अन्यूनवृत्तित्वस्य नानापदार्थघटितस्य संसर्गघटकतया माने मानान्तरविरहेण स्वरूपसम्बन्धावच्छिन्नत्वमानोपगमस्यैवोचितत्वात् इत्युच्यते तदा व्याप्यवृत्तितानिवेशपक्षे वह्नित्वादेर्व्याप्यवृत्तिघटत्वाद्यवच्छिन्नवह्न्याद्यभावप्रतियोगितावच्छेदकतामादायासम्भवप्रसक्तिरित्यालोच्य प्रतियोगिवैयधिकरण्यनिवेशनमनुससार। तदर्थश्च प्रतियोगितावच्छेदकविशिष्टानधिकरणवृत्तित्वमेव तथा सत्यपि हेतुमतो घटत्वादिविशिष्टानधिकरणतया वह्नित्वादिना घटाद्यभावमादाय दोषप्रसक्त्या सामानाधिकरण्येनैतस्य सार्थक्यसम्भवात् न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकताकभेदवत्त्वं तथा च संयोगत्वाद्यवच्छिन्नघटादिमद्भेदमादाय संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यापत्तिः भेदप्रतियोगितावच्छेदकतायां प्रकृतप्रतियोगितासामानाधिकरण्यनिवेशनेन सामञ्जस्यात् । न च (१) परे स्वित्यादिनाभिहितद्वितीयकल्प एव पर्यवसानमिति घटत्वादिना वह्न्याद्यभावस्यापि प्रतियोगिवैयधिकरण्यापत्त्या वह्नित्वादेस्तत्प्रतियोगितायां सामानाधिकरण्येनावच्छेदकतयाऽव्याप्तिरिति वाच्यं व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेदानभ्युपगमेनैवोक्तापत्त्यसम्भवात्, घटत्वेन पटो नास्तीत्यादौ घटत्वाद्यवच्छिन्नपटात्यन्ताभावस्यैव विषयत्वोपगमात् प्रतियोगितावच्छेदकं सामानाधिकरण्येन यन्नावच्छेदकं तादृशप्रतियोगितावच्छेदकताक एव वा भेदो निवेश्य(२) । अथैवमपि घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य घटत्वाद्यवच्छिन्नघटादिमद्भेदमादाय घटत्वाद्यवच्छिन्नघटादिव्यधिकरणस्य प्रतियोगितावच्छेदकत्वमादायाव्याप्तिर्दुर्वारैवेति

(१) न च घटत्वादिना वह्न्याद्यभावस्यापि घटत्वाद्यवच्छिन्नवह्न्यादिमद्भेदमादाय प्रतियोगिवैयधिकरण्यं दुर्वारं तादृशभेदीयवह्न्यादिनिष्ठप्रतियोगितावच्छेदकताया घटत्वाद्यवच्छिन्नवह्न्यभाववद्वह्न्यादिनिष्ठप्रतियोगिताव्यधिकरणघटत्वादेरिव तत्सामानाधिकरण्यघटितत्वादेरपि सामानाधिकरण्येनावच्छेदकतायास्तादृशात्यन्ताभावप्रतियोगितावच्छेदकतावदभ्युपगन्तव्यत्वात् । प्रकृतप्रतियोगितासामानाधिकरण्यधर्मावच्छिन्नत्वस्य भेदस्यासम्भवात् इति वह्नित्वादेस्तत्प्रतियोगितायां सामानाधिकरण्येनावच्छेदकतया अव्याप्तिरिति वाच्यम् । इति २ पुस्तके पाठान्तरम् ।

(२) प्रतियोगितावच्छेदकसामानाधिकरण्येन यावच्छेदकता तादृशावच्छेदकताकप्रतियोगिकभेद एव वा निवेश्य इति १ पुस्तके पाठान्तरम् ।

चेन्न सामानाधिकरण्येन प्रतियोगितायामवच्छेदकं यद्यत्तदवच्छिन्नतत्समानाधिकरणप्रतियोगितावच्छेदकताकभेदस्यैव निवेशनीयत्वात् । अथ वह्नित्वादिना घटाभावस्य यदि घटत्वादिकं प्रतियोगितावच्छेदकं तदा घटादिमति तादृशाभावासत्त्वप्रसङ्ग इति वह्नित्वघटत्वयोरेवावच्छेदकतापर्याप्तिरुपगन्तव्या तथा चानवच्छेदकपदस्यावच्छेदकतापर्याप्त्यनधिकरणपरतया व्याख्ययैव तादृशाभावप्रतियोगितामादाय दोषाप्रसक्तेः सामानाधिकरण्येनेत्यस्य वैयर्थ्यमशक्यवारणमेवेति चेन्न प्रतियोगिविशेषणतापन्नतदनापन्नयोरवच्छेदकतावैलक्षण्येन प्रत्येकमेवावच्छेदकतापर्याप्तेः, पर्याप्तिविवक्षामात्रेण प्रतीकारासम्भवात् सामानाधिकरण्येनेत्यस्य सार्थक्यं तदपि प्रतियोगिविशेषणतापन्नस्य यादृशं विलक्षणमवच्छेदकत्वं तत्पर्याप्त्यनधिकरणत्वलाभायैव यथा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव तत्प्रतियोगितावच्छेदकविशिष्टविरोधित्वोपगमेनोक्ताभावस्य घटादिमति वृत्तौ बाधकाभावात् । अस्तु वा विलक्षणावच्छेदकतात्वेन प्रत्येकं पर्याप्तयोरप्यवच्छेदकतयोस्तत्तत्प्रतियोगितावच्छेदकत्वत्वेनानुगतयोः समानाधिकरणव्यधिकरणधर्मद्वये पर्याप्त्यन्तरं तादृशानुगतरूपावच्छिन्नपर्याप्त्यधिकरणधर्मावच्छिन्नस्यैव धाभावविरोधितेति व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगिमति सत्त्वोपपत्तिः । एवं च ह्रदत्ववह्नित्वोभयावच्छिन्नवह्न्यभावमादाय पर्याप्तिनिवेशव्यावृत्तिप्रदर्शनं समानाधिकरणधर्मस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकत्वपक्षीयव्याप्यवृत्तित्वघटितलक्षणाभिप्रायेणेति वदन्ति । अव्यभिचारिसम्बन्धरूपता अवयवशक्त्या अव्यभिचारिसम्बन्धपदप्रतिपाद्यता तथा च पूर्ववन्न तत्पदस्य पारिभाषिकतेतिभावः । ननु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारपदार्थस्य तच्छरीरे ऽनिवेशात्कथमेवमित्यत आह हेताविति । यथा हेत्वन्वयिसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वं व्यभिचारः तथा साध्यतावच्छेदकान्वयिनो हेतुसमानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वस्यापि तथात्वादित्यर्थः । वह्निर्धूमस्य व्य

भिचारीत्यत्राभाववद्वृत्तित्वं व्यभिचारपदार्थः । तदेकदेशे चाभावे षष्ठ्यर्थप्रतियोगिताया निरूपकत्वसम्बन्धेनान्वयः प्रतियोगितायां चाधेयतासम्बन्धेन धूमस्यावच्छिन्नत्वसम्बन्धेन धूमविशेषणतापन्नधूमत्वस्यान्वय इति धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वलाभः साध्यतावच्छेदकावच्छिन्नसाध्यान्तर्भावेन न व्यभिचारपदार्थता शक्त्यानन्त्यप्रसङ्गात् । साध्यवाचकपदवैयर्थ्यापाताच्च । एवं समानाधिकरणाभावप्रतियोगितायां सामानाधिकरण्येनावच्छेदकत्वं व्यभिचारपदार्थः । सामानाधिकरण्ये च व्युत्पत्तिवैचित्र्यात्प्रथमान्तपदोपस्थाप्यस्यापि वह्नेर्निरूपकत्वसम्बन्धेनान्वयः वह्न्याद्यन्तर्भावेनैव वा शक्तिः धूमपदं लक्षणया धूमत्वपरम् । आधेयत्वं षष्ठ्यर्थः अन्वयश्चावच्छेदकत्वे निरूपकत्वमिन् प्रत्ययार्थः । तथा च धूमत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतानिरूपको वह्निरित्यन्वयबोधः । यद्यपि लाघवरूपविनिगमकसत्त्वादभाववद्वृत्तित्व एव व्यभिचारपदशक्तिकल्पनमुचितं तथापि ज्ञेयत्वं वाच्यत्वस्याव्यभिचारीतिप्रामाणिकव्यवहारानुरोधादुपदर्शितगुरुरूपस्यापि व्यभिचारपदार्थत्वमावश्यकं तत्र वाच्यत्वाभावाप्रसिद्ध्या तदभाववद्वृत्तित्वाभावबोधासम्भवात् उक्तरूपस्य व्यभिचारपदार्थत्वे व्यभिचारस्याभावोऽव्यभिचारमित्यव्ययीभावाश्रयणात् । ज्ञेयत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमव्यभिचारपदार्थः । इन्प्रत्ययार्थो निरूपकत्वं वाच्यत्वपदं वाच्यत्वत्वपरं षष्ठ्यर्थश्चाधेयत्वं तथा च वाच्यत्वत्वनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकं ज्ञेयत्वमित्यन्वयबोधः । अथैवमव्यभिचारिसम्बन्धपदेनोक्तव्याप्तेः कथं लाभः न चाव्यभिचारिपदं तादृशप्रतियोगितानवच्छेदकत्वाश्रयपरं सम्बन्धश्च तदाश्रयसामानाधिकरण्यमिति तल्लाभ इति वाच्यं वह्निर्धूमाव्यभिचारीति प्रयोगाभावात् उक्तधर्मबोधकाव्यभिचारपदसमभिव्याहृतेऽप्रत्ययस्याश्रयपर्यायबोधकत्वात् अव्यभिचारपदार्थान्वयितावच्छेदकं यद्रूपं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबोधकताया व्युत्पत्तिसिद्धत्वात् साध्यतावच्छेदकस्याव्यभिचारिपदार्थैकदेशे हेतुसमानाधिकरणेऽयादृश्यतासम्बन्धेनाश्रयत्वा-

चेति चेन्न अव्यभिचारिसम्बन्ध इत्यस्य अव्यभिचारिहेतुनिष्ठं साध्यसामानाधिकरण्यमित्यर्थः। एवं च साध्यतावच्छेदकनिष्ठस्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतानिरूपकहेतुनिष्ठसाध्यसामानाधिकरण्यमिति पर्यवसितम् उक्तलक्षणस्याप्यत्रैवार्थे तात्पर्यं न तु यथाश्रुतविशेषणविशेष्यभावे तदापन्नस्याव्यभिचारिसम्बन्धपदेन बोधयितुमशक्यतया पारिभाषिकताया दुर्वारत्वात् । न च यद्रूपावच्छिन्नस्य यस्य व्याप्तित्व तदन्यरूपेण तस्याव्यभिचारिसम्बन्धपदार्थत्वेऽपि न क्षतिरिति वाच्यम् एवं सति साध्याभाववद्वृत्तित्वमात्रस्य व्यभिचारपदार्थत्वेऽपि व्यतिरेकिसाध्यकोक्त्यासिरव्यभिचारिसम्बन्धरूपतोपपत्तेरुक्तधर्मस्य व्यभिचारपदार्थत्वव्यवस्थापनानुपयुक्तत्वात् । उक्तलक्षणेऽपि साध्यसामानाधिकरण्यमन्तर्भाव्याव्यभिचारिसम्बन्धरूपताया व्यवस्थापयितुं शक्यत्वात् । साध्यसामानाधिकरण्यानन्तर्भावेऽपि प्रतियोगिसमानाधिकरणस्वसमानाधिकरणनिरुक्तयावदभावकत्वरूपपर्यवसितपूर्वलक्षणार्थस्याव्यभिचारिसम्बन्धरूपतासम्भवात् ॥

(दी०) अवच्छेदकत्वञ्चेह तत्पर्याप्त्यधिकरणत्वं तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः सत्त्ववति गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिः वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यं भवति च गुणत्वगुणान्यावृत्तित्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकत्वाप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः ॥

(गा०) अवच्छेदकत्वमिति अनवच्छेदकमित्यत्र यदवच्छेदकपदं तत्तात्पर्यविषयावच्छेदकत्वमित्यर्थः । तत्पर्याप्त्यधिकरणत्वं पर्याप्तिसम्बन्धेनावच्छेदकतावत्त्वं तथा च पर्याप्तिसम्बन्धेनावच्छेदकत्वावच्छिन्नस्य भेदोऽनवच्छेदकपदेन विवक्षित इति भावः । विशिष्टवह्न्यभावस्य प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्येत्यन्वयः । महानसीयत्वादिविशिष्टवह्न्यभावस्य प्रतियो-

गिनायां महानसीयत्वसहितवह्नित्वस्यावच्छेदकत्वेऽपि सामयतासम्बन्धेनावच्छेदकतावदन्यत्वस्य वह्नित्वे दुर्लभत्वादिति भावः । प्रतियोगिविशेषणतापन्नधर्मान्तरसहितवह्नित्वावच्छिन्नाभावमादाय दोषं प्रदर्श्य प्रतियोगिविशेषणतापन्नधर्मस्यैव प्रतियोगितावच्छेदकत्वं प्रतीयत इति नियममनभ्युपगन्तुर्व्यधिकरणधर्मावच्छिन्नाभाववादिनः प्रतियोग्यवृत्तिधर्मसहितप्रतियोगिवृत्तिधर्मपर्याप्तप्रतियोगितावच्छेदकताको ऽभावो ऽस्तीति व्युत्पादनाय तादृशाभावमादायापि दूषणं दर्शयति हृदत्वेतिउभयावच्छिन्नाभावप्रतियोगितावच्छेदकोभयघटकप्रत्येकस्यावच्छेदकताया अव्याहतत्वादिति भावः । न हीतिरिति अवच्छेद्याश्रयविशेषणभावापन्नेषु तद्भावापन्नेषु पर्याप्त यदवच्छेदकत्वं पर्याप्तिसम्बन्धेन तदवच्छिन्नभेदस्य तत्पर्याप्त्यनवच्छेदकप्रत्येकमात्रवृत्तिधर्मावच्छेदेन सत्त्वाद्वह्नित्वादेस्त्वादृशप्रतियोगितानवच्छेदकत्वस्य घटत्वावच्छिन्ने घटपटोभयत्वावच्छिन्नभेदवदव्यभिचारित्वादिति भावः । न च वह्नित्वहृदत्ववह्नित्वोभयावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येन यदवच्छेदकत्वं तद्वह्निमात्रे पर्याप्त हृदत्वस्य व्यधिकरणतया नावच्छेदकत्वादिति कथं वह्नित्वस्य तादृशावच्छेदकत्वावच्छिन्नान्यत्वानिर्वाह इति वाच्यं यतः सामानाधिकरण्येनानवच्छेदकत्वं नित्यस्य प्रतत्प्रतियोगिनामसमानाधिकरणवृत्तित्वं तत्प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदस्तदयत्नसमर्थः इत्थं च हृदत्ववह्नित्वोभयावच्छिन्नप्रतियोगितायाः समानाधिकरणवृत्त्यन्येकभेदावच्छेदकत्वम् उभयपर्याप्तं तदवच्छिन्नभेदो वह्नित्वे ऽव्याहत एवेति । ननु संयोगादिसाध्यकसद्धेतावव्याप्तिवारणाय तदभाववावर्तकव्याप्यवृत्तित्यादिनिवेशप्रयोजने तत्साध्यकसत्त्वादिरूपव्यभिचारिहेतावतिव्याप्तिप्रसङ्गः समाधानान्तरस्यैव तदुभयघटकत्वादित्याशङ्क्य व्यभिचारिहेतुकस्यऽपि संयोगाद्यभावस्य तदुभयघटकत्वप्रदर्शनेन परिहरति सत्त्ववतीति । व्याप्यवृत्तिर्यत्पुरस्कृत्यं प्रतियोगिव्यधिकरणत्वेऽपि बोध्यम् । अयं भावः । व्याप्यवृत्तित्वमत्र नावच्छिन्नवृत्तिकत्वमात्रं न वा स्वसमानाधिकरणाभावप्रतियोगित्वसामान्याभावः प्रतियोगिव्यधिकरणत्वं च न प्रतियोग्यधिकरणावृत्तित्वं किं त्वनवच्छिन्नाधिकरणत्वं स्वाधिकरणवृत्तिनिरवच्छिन्नाभावाप्रतियोगित्वं वा

व्याप्यवृत्तित्वं प्रतियोग्यनधिकरणवृत्तित्वं च प्रतियोगिवैयधिकरण्यं संयोगाद्यभावसाधारणं हेत्वधिकरणे तथात्वस्य विवक्षितत्वात्सद्धेतुस्थले न तादृशाभावस्य लक्षणघटकता तत्र गुणादेर्हेत्वनधिकरणत्वात् सत्वादिहेतुकस्थले तस्य हेत्वधिकरणतया तत्र व्याप्यवृत्तिः प्रतियोगिव्यधिकरणश्च साध्याभावो लक्षणघटक एवेति वक्ष्यमाणामिति सिद्धान्तलक्षण इत्यादिः । तदवच्छेदकत्वं प्रतियोगितावच्छेदकत्वम् इहापि एतल्लक्षणेऽपि बोध्यं विवक्षणीयम्। अन्यथा लघुरूपसमनियतगुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तेरिति भावः तथा च संयोगादिरूपसाध्याभावस्य व्याप्यवृत्तित्वादिरूपविशेषणेन व्यावर्तनेऽपि न क्षतिः व्याप्यवृत्त्यभावान्तरप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य संयोगत्वादौ सत्वेन तदवच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्त्यप्रसक्तेरिति यथाश्रुताशयो ऽवगम्यते स च न सङ्गच्छते सत्तावान् जातेरित्यादौ सत्तात्वस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितायाः सत्वात्तत्साधारणतयाव्याप्तेर्वारणाय स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपतदनतिरिक्तवृत्तित्वस्यैव विवक्षणीयतया तद्घटकाभावे व्याप्यवृत्तित्वनिवेशे प्रयोजनविरहेण संयोगादिसाध्यकसद्धेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसंयोगत्वादेर्निरुक्तानतिरिक्तवृत्तित्वस्य संयोगत्वादिसाधारण्यविरहेणाव्याप्त्यनवकाशेन हेतुसमानाधिकरणाभावे व्याप्यवृत्तित्वनिवेशनवैयर्थ्यात् न च स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणादाने संयोगेन द्रव्यस्याव्याप्यवृत्तितापक्षे संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशधर्माप्रसिद्धिः तादृशाभावप्रतियोगितावच्छेदकीभूतसकलधर्मावच्छिन्नानामेव संयोगेनाभावानां केवलान्वयित्वादिति स्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणस्यावश्यकतेति वाच्यं संयोगाद्यभावव्यावर्तकस्यावच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वस्य निवेशने संयोगेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावो

गुणादीनामेव व्याप्यवृत्तित्वं तु द्रव्यस्येति तादृशाभाव प्रतियोगितावच्छेदक यद्विशिष्टसम्बन्धिनिष्ठतादृशाभावप्रतियोगितानवच्छेदक तादृशधर्माप्रसिद्धितादवस्थ्यात् प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य यत्सम्बन्धावच्छिन्नत्वस्य निवेशनं तादृशावच्छिन्नत्वस्य वा विशेषणत्वपक्षस्यैवासम्भवनीयतया व्याप्यवृत्तित्वविशेषणवैयर्थ्यस्य दुरुद्धरत्वात् तस्माद्वक्ष्यमाण एवेति ग्रन्थस्याभावे व्याप्यवृत्तित्वादिविशेषणं न देयमेव तद्दानेऽपि संयोगत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगितायाः पारिभाषिकावच्छेदकत्वविरहेणाव्याप्त्यनवकाशोऽस्याशयः । ननु पारिभाषिकावच्छेदकत्वशरीरनिविष्टस्वविशिष्टसम्बन्धिनिष्ठाभावे व्याप्यवृत्तित्वविशेषणमावश्यकम् अन्यथा तुल्ययुक्त्या सत्तादिहेतुकेऽपि कपिसंयोगत्वादौ पारिभाषिकावच्छेदकत्वानिर्वाहादिति हेतुमन्निष्ठाभावेऽपि तद्विशेषणमावश्यकम् अन्यथा व्याप्तेरित्याशङ्का सत्तादिहेतुकस्थले गुणत्वाद्यवच्छिन्नाभावप्रतियोगितायाः पारिभाषिकावच्छेदकत्व संयोगत्वादौ सदर्थं वारयति भवति चेति। गुणत्वाद्यवच्छिन्नाभावानां व्याप्यवृत्तित्वाभिधानं च संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीय प्रतियोगितानवच्छेदकत्वसूचनाय जन्यद्रव्येषूत्पत्तिकालावच्छेदेन गुणत्वाद्यवच्छिन्नाभावस्य नवीनैरभ्युपगमात्तन्मते गुणत्वस्य संयोगत्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितानवच्छेदकत्वं न सम्भवतीति गुणावृत्तित्वानुधावन संयोगी गुणान्यत्वे सति सत्त्वादित्यादौ गुणावृत्तित्वं न विशिष्टहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमत संयोगादिसाध्यकव्यभिचारिस्थले तादृशप्रतियोगितावच्छेदकमुपादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वं सम्भवति तादृशधर्ममाह द्रव्यमात्रसमवेतान्येति ॥

प्रकृतस्य लक्षणद्वयस्यैकदापि दूषयितुमुपन्यस्यति साध्यतावच्छेदकविशिष्टेत्यादि ॥

(दी०) साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यावच्छेदकसमानाधिकरणसाध्याभाववत्त्वम् । यत्समानाधिकरणसाध्याभावाप्रसिद्ध्या साध्यवद्भिन्नावृत्तित्वं सा-

त्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्वत्र साध्याभावपदवैयर्थ्यात् ।

(गा०) विशिष्टाभावो विशेषणविशेष्यसम्बन्धाभावरूपः उभयाभावस्तु परम्परासम्बन्धेन वह्नित्वाभाव इति मतेनेदं लक्षणम् अन्यथा व्यधिकरणधर्मावच्छिन्नाभावं विनापि तादृशाभावमादाय लक्षणसमन्वयसम्भवे प्रतियोग्यवृत्तिरितिग्रन्थानुत्थितेरिति बोध्यं साध्याभावो वा पूर्वोक्तद्वितीयरीत्या साध्यव्यापकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकश्च ग्राह्यः । अवच्छेदकत्वमिहानतिरिक्तवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः यथोक्तधर्मयोस्तादृशावच्छेद्यावच्छेदकभावे मानाभावात् स्वपदं हेतुतावच्छेदकावच्छिन्नहेतुपरं तथा च साध्यतावच्छेदकविशिष्टसाध्यसामानाधिकरण्यानतिरिक्तवृत्ति यद्धर्मविशिष्टसमानाधिकरणसाध्याभावत्वं तद्धर्मवत्त्वं व्याप्तिरिति समुदितार्थः । सद्धेतौ साध्यासमानाधिकरणसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्य हेत्वसमानाधिकरणत्वनियमात्तादृशसाध्याभावत्वं साध्यसामानाधिकरण्यानतिरिक्तवृत्तीति लक्षणसमन्वयः व्यभिचारिणि तादृशसाध्याभावस्यापि हेतुसमानाधिकरणतया तदतिरिक्तवृत्त्येव तदिति न लक्षणसमन्वयः । गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्वारणाय साध्यतावच्छेदकविशिष्टेति । साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन संयोगादिना धूमादेरभावस्य धूमादिमति स्वावयवे वृत्तावपि नातिव्याप्तिः द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तेर्वारणाय हेतुतावच्छेदकविशिष्टत्वोपादानं तद्विशिष्टाधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन बोध्यं तेन धूमादिसमवायिनिष्ठवह्नित्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्न्यादिसामानाधिकरण्यविरहेऽपि न क्षतिः साध्यहेतुसामानाधिकरण्यघटकवृत्तित्वद्वयं दैशिकविशेषणतासम्बन्धेन बोध्यं तेन द्रव्यं सत्त्वादित्यादौ दैशिकविशेषणतया हेतुसमानाधिकरणस्य द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाद्यभावस्य कालिकादिसम्बन्धेन साध्यवन्महाकालादिवृत्तित्वेऽपि न क्षतिः । यद्यपि हेतुसमानाधिकरणसाध्याभावत्वघटकमभावत्वरूपं विशेष्यं व्यतिरेकिसाध्यके साध्यासमानाधिकरणाभावसाधारणमिति विशिष्टसाध्यसामानाधिकरण्यशून्यावृत्तित्वरूपं तदनतिरिक्तवृत्तित्वं दुर्घटं तथापि यावन्तः स्वसमानाधिकरणसाध्याभावाः विशिष्टसाध्यसमानाधिकरणा इत्य-

र्थस्य विवक्षणीयत्वान्न दोषः । अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यति-
व्याप्तिः साध्याभावस्य साध्यवत्यपि वृत्तेरिति तु नाशङ्कनीयं । व्य-
भिचारनिरूपकाधिकरणे यत्तद्वृत्तित्वावच्छिन्नाभावस्यापि साध्या-
भावतया तस्य च साध्यवदवृत्तेः । यत्समानाधिकरणेति यद्रूपाव-
च्छिन्नसमानाधिकरणेत्यर्थः । तेन द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादि-
त्यादौ सत्तासमानाधिकरणद्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभाववत्ता-
साध्यवत्ताज्ञानप्रतिबन्धकत्वेऽपि न क्षतिः यद्धर्मावच्छिन्नसमा-
नाधिकरण्यघटके च हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्ना-
धिकरणत्वं निवेशनीयं तत्प्रयोजनं च स्फुटमेव अधिकरणवृत्ति-
त्वं च निरवच्छिन्नं ग्राह्यं तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ हे-
तुसमानाधिकरणकपिसंयोगत्वावच्छिन्नकपिसंयोगाभावादिविषयक-
प्रमायाः अव्याप्यवृत्तित्वज्ञानविरहकालीनायाः साध्यवत्ताज्ञानप्र-
तिबन्धकत्वेऽपि न क्षतिः । प्रमायाः प्रमासामान्ये तेन व्यभिचारि-
णि नातिव्याप्तिः समानाधिकरणधर्मावच्छिन्नाभाववत्त्वेन व्यधिक-
रणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्यापि विरोधित्वात्सद्धेताव-
पि लक्षणगमनासम्भव इत्यतः ज्ञानसामान्यमुपेक्ष्य प्रमासामान्य-
निवेशनं प्रमापदं च यावद्भ्रमभिन्नपरमतः उक्तभ्रमात्मकज्ञानस्या-
मानत्वादौ भ्रमत्वेऽपि न क्षतिः साध्यवत्ताज्ञानपदं तत्सामान्यप-
रम् अतो व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्ताज्ञानस्य तद्धर्मव-
त्त्वेन साध्यवत्ताज्ञानविरोधित्वेऽपि न क्षतिः एवं च साध्यपदं
साध्यतावच्छेदकविशिष्टपरं ज्ञानं च स्वसमानधर्मितावच्छेदकक-
त्वेन स्वविषयीभूताभावप्रतियोगितावच्छेदकसंसर्गकत्वेन च वि-
शेषणीयं तेन धूमत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रति-
योगिताकधूमाभाववत्ताज्ञानस्य साध्यवत्ताज्ञानसामान्यान्तर्ग-
तद्रव्यत्वादिना धूमादिप्रकारक भिन्नधर्मावच्छिन्नविशेष्यकधूम-
त्वावच्छिन्नप्रकारकसमवायादिसम्बन्धेन धूमत्वावच्छिन्नप्रकारक-
च ज्ञानं प्रत्यप्रतिबन्धकत्वात् कामिनीजिज्ञासादेरेव च तादृ-
शज्ञानसामान्याविरोधित्वादतिव्याप्तेर्नावकाशः । साध्याभावपदवैय-
र्थ्यादिति । अत्र च साध्यतावच्छेदकविशिष्टसामानाधिकरण्याव-
च्छेदकत्वस्य व्यापकतावच्छेदकसामानाधिकरण्यघटकत्वं तथा च साध्यताव-
च्छेदकविशिष्टसामानाधिकरण्यघटकं यत्समानाधिकरणसाध्याभाव-

व्यापकतावच्छेदकं तत्त्वं व्याप्तिरित्येतादृशार्थकत्वे प्रथमलक्षणे न साध्याभावपदवैयर्थ्यं यत्समानाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपयत्सामानाधिकरण्यव्यापकतावच्छेदकत्वात् यत्समानाधिकरणसाध्याभावनिष्ठाभावप्रतियोगितावच्छेदकत्वाभावरूपस्य यत्समानाधिकरणसाध्याभावत्वव्यापकतावच्छेदकत्वस्यातिरिक्ततया तद्घटितलक्षणे यत्सामानाधिकरण्यव्यापकतावच्छेदकत्वस्यानिवेशात्तद्घटितलक्षणसम्भवेऽपि प्रकृतलक्षणे वैयर्थ्यानवकाशात् एवं यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकः साध्यवत्ताज्ञानप्रतिबन्धकत्वाभावस्तत्त्वमित्येतादृशार्थकत्वे द्वितीयलक्षणेऽपि न तद्वैयर्थ्यं यत्समानाधिकरणप्रमात्वव्यापकताघटकाभावाद्यत्समानाधिकरणसाध्याभावप्रमात्वव्यापकतायामभावान्तरस्यैव निवेशादित्यवधेयम् ।

(दी०) यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं वा व्याप्तिरिति । तन्न अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृत्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात् ॥

(गा०) साध्याभाववतीति । यन्निष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकतावच्छेदकत्वाभावस्तत्त्वमित्यर्थः वह्निमान् धूमादित्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिता व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वत्वविशिष्टविषयितैव सा च न वह्न्यनुमितिप्रतिबन्धकतावच्छेदिका तच्छालिज्ञानस्यानुमित्यप्रतिबन्धकत्वात् व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयितापि तादृशी तद्वत्ताज्ञानस्य च व्यभिचारज्ञानविधया ऽनुमितिप्रतिबन्धकत्वात् तादृशविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वान्नातिव्याप्तिः यन्निष्ठत्वानुपादाने धूमांशे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिभ्रमनिष्ठवह्न्यभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयिताया अनुमितिप्रतिबन्धकतावच्छेदकत्वाद्वह्निमान् धूमादित्यादावव्याप्तिरतस्तदुपादानं तथा च भ्रमविषयवह्नित्वेन वह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावान्न दोषः यन्निष्ठपदार्थनिरूपितविषयितासामान्ये यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्य इति वा यद्युच्यते

तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वमेव यत्र समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन भातं तादृशज्ञानीयहेतुनिष्ठतथाविधसाध्याभाववद्वृत्तित्वविषयिताया अप्यनुमितिप्रतिबन्धकतावच्छेदकत्वादसम्भवो ऽव्याप्तिर्वेति साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वं विषयिताविशेषणं तादृशभ्रमविषयिता च न साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपिता तादृशविषयितानिरूपकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतं यत्समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वं तद्विशिष्टत्वाभावात् न च तद्विशिष्टनिरूपितत्वं यदि तदवच्छिन्ननिरूपकताकत्वं तदा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्भ्रमविषयवृत्तावसत्त्वेऽपि तन्निष्ठविषयितानिरूपकत्वे व्यधिकरणीभूयावच्छेदकत्वात् भ्रमविषयितायास्तद्विशिष्टनिरूपितत्वमक्षतमेव यदि च वस्तुगत्या यत्र तद्वैशिष्ट्यं तन्निरूपितत्वमेव तद्विशिष्टनिरूपितत्वं तदा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वमेवोक्तभ्रमविषयिताया अक्षतमिति कथं तद्व्यावृत्तिरिति वाच्यं तदवच्छिन्नतदाश्रयनिष्ठनिरूपकताकविषयिताया एव तथात्वात् तथाहि विशेषणीभूतधर्मान्तरविशिष्टेन व्यावर्त्यमानस्य विशेष्यस्य भाने विशेषणांशे प्रकारीभवन्त्यां व्यक्तौ विशेष्यसम्बन्धितावच्छेदकताया विशिष्टवैशिष्ट्यबोधे भानात् साध्याभाववद्वृत्तित्वरूपविशेषणविशिष्टविशेषेण निरूपकीभूय विषयिताव्यावर्तने व्यावर्तकविषयस्याश्रयतया व्यावर्तकं यत्साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्तकत्वादुक्तभ्रमविषयितान्यावृत्तिः तद्व्यावर्तकविषयव्यावर्तकस्य तन्निष्ठसाध्याभाववद्वृत्तितात्वस्य तादृशविषयितानिरूपकतानवच्छेदकत्वात् तादृशविषयिताया लक्षणाघटकत्वात् एव च भ्रमविषयिताव्यावर्तकतयैव साध्याभाववत्त्वसार्थक्यं तादृशविषयिताया उक्तक्रमेण हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितत्वेऽपि हेतुनिष्ठाधेयतात्वविशिष्टनिरूपितत्वानपायात् साध्याभावपदमनुपादायाधिकरणवृत्तितात्वविशिष्टनिरूपितविषयितानिवेशे वृत्तौ समानाधिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयितावारणेऽपि वृत्तिविशेषणे तदधिकरणेऽधिकरणे यत्र समानाधिकरणधर्मावच्छिन्नाभावप्र

मत्त्वविषयतावारणासम्भवात्साध्याभावांशनिवेशस्यापि सार्थक्यात्। न च तावत्पर्यन्तनिवेशेऽपि वह्नित्वावच्छिन्नवह्न्यभावत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवह्न्यभावमवगाह्य तादृशाभाववद्वृत्तित्वावगाहि यज्ज्ञानं तदीयतादृशसाध्याभाववद्वृत्तित्वविषयितापि साध्याभाववद्वृत्तित्वत्वविशिष्टनिरूपितैव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताको यः साध्याभावस्तद्वद्वृत्तित्वत्वस्यैव तत्र विशेषणतया भानात्तद्विशिष्टत्वस्य च तादृशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वे सत्त्वादिति तद्दोषतादवस्थ्यमिति वाच्यम्। अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यप्रकारकव्यभिचारज्ञानमेवानुमितिविरोधि यत्र च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यं प्रकारस्तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टस्य व्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्ध्या तादृशज्ञानविषयितायां विशिष्टनिरूपितत्वासम्भवात् न चैवमपि समानाधिकरणधर्मावच्छिन्नसाध्याभावव्यधिकरणधर्मावच्छिन्नसाध्याभावद्वयविशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य विषयितायाः व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तितात्वविशिष्टनिरूपितत्वात् समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयतात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यम्। हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षितत्वात्, उक्तभ्रमे च समानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात्। अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्यैका प्रकारता तादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विषयीभवदभावे साध्यतावच्छेदकावच्छिन्नप्रतियो-

गिताकत्वासम्भवेऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धविषयितानिरूपकविषयितात्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वाद्व्याप्तिर्दुर्वारैवेति चेन्न, तादृशभ्रमस्याप्रामाणिकत्वात्, प्रामाणिकत्वे च संसर्गीयविषयितादृयानिरूपकत्वेनाभावविषयिताया विशेषणीयतया सामञ्जस्यात्। अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्य सम्बन्धविधया लक्षणघटकत्वमावश्यकं, स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपः, व्यधिकरणघटत्वावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावस्यैवाप्रसिद्धिः, व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भवश्चरमस्य निवेशे च सर्वत्र व्यभिचारिण्यतिव्याप्तिः प्रतियोगितावच्छेदकधर्माणां चोपलक्षणीभूतेन केन चिद्रूपेणानुगमय्य तेन रूपेण तेषां निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धघटकतया भानासम्भवात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव सम्बन्धतया निवेशाद्नानुगमानिबन्धनोक्तदोष इति वाच्यम्। अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताविषयकाभावज्ञानस्य प्रतियोगिमत्त्वज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतयावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया संसर्गतयाभानात्। न च स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवाभावो निवेश्यः, न तु साध्यविशेषितः, वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकधूमादिहेतुकस्थले लक्षणघटक इति वाच्यम्। प्रमेयत्वावच्छिन्नसाध्यके तादृशाभावाप्रसिद्धेः एवं स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगिताया बाधितवह्न्यादिनिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयिताया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावानिरूपितत्वयानुमितिविरोधितया चानुपपत्तेर्दुर्वारत्वात्, स्वावच्छिन्नसाध्यवृत्तित्व

विशिष्टप्रतियोगितानिवेशे च सर्वत्र सद्धेतावप्रसिद्धेः, एवं प्रतियोगिविशेष्यतापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वं प्रामाणिकं न तु प्रतियोगिविशेष्यतानापन्ने वह्निर्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतेः, न तु वह्नित्वेन नास्तीति तथा च विशिष्य प्रतियोग्यविशेषितस्वीकसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निवेशो न सम्भवत्येवेति । मैवं प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता लक्षणे न निवेश्यते, अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो यः सम्बन्धस्तत्प्रतियोगिसाध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकतावच्छेदकतात्वेन, यत्र हेतुसमानाधिकरणघटत्वाद्यवच्छिन्नवह्न्यभावे वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञानविषयितानिरूपकाभावनिष्ठो न निरुक्ततन्निरूपकतावच्छेदकसम्बन्ध इति तद्विषयिताव्युदासः यत्र वह्नित्वावच्छिन्नघटाभावे तन्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निरपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वनिवेशात्तादृशज्ञानीयाभावविषयिताव्युदासः साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छिन्नघटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्बन्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न दोषः, यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धस्तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्बन्धावच्छिन्नसाध्यनिष्ठनिरूपकतावच्छेदकत्वं विवक्षणीयमिति। साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबन्धकतावच्छेदककोटिप्रवेशादतिव्याप्तिरतो विषयितापर्यन्तनिवेशनं हेतुनिष्ठसाध्याभाववद्वृत्तितात्वविशिष्टप्रतिबन्धकतावच्छेदकविषयितापर्याप्त्यधिकरणे साध्यप्र-

तियोगिकाभावसाधननिवेशे व्यभिचारिण्यतिव्याप्तिः प्रतियोगिता-
यां साध्यतावच्छेदकावच्छिन्नत्वावगाहिन एव ज्ञानस्यानुमिति-
प्रतिबन्धकतया तद्घटितविषये प्रतिबन्धकतावच्छेदकविषयिता-
या अपर्याप्तेः साध्यतावच्छेदकावच्छिन्नसाध्याभावनिवेशश्च न
सम्भवतीति तदुपेक्षितं व्यधिकरणधर्मावच्छिन्नाभाववद्वृ-
त्तित्वविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावादतिव्याप्तिरतः
सामान्य इत्युक्तम् । प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपर-
म् अन्यथा व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वा-
भावविषयकसमूहालम्बनात्मकप्रकृतानुमितिप्रतिबन्धकतावच्छेदक-
त्वस्य हेतुनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामपि स-
त्त्वात्सद्धेतावपि लक्षणगमनासम्भवात् । एवं प्रकृतेत्यनुपादाने
कामिनीजिज्ञासादौ प्रसिद्धा यानुमितिसामान्यप्रतिबन्धकता तद-
वच्छेदकत्वाभावो धूमाभाववद्वृत्तित्वविषयितायामक्षत एव तद्वि-
षयकज्ञानस्यापि अन्यलिङ्गकान्यसाध्यकान्यसंसर्गकानुमित्यप्रति-
बन्धकत्वादतः प्रकृतेति तत्साध्यकतद्धेतुकतत्संसर्गकपरम् । सद्धे-
तुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविषयिताया
अनुमितिप्रतिबन्धकस्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसम्भवः स्याद-
तो यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यस्यानुमितिप्रति-
बन्धकवृत्तित्वाभावमुपेक्ष्य निरुक्तविषयितासामान्ये अनुमितिप्र-
तिबन्धकतावच्छेदकत्वाभावपर्यन्तानुधावनम् अवच्छेदकत्वं च स्व-
रूपसम्बन्धविशेषः न च धूमाभाववद्वृत्तित्वेन घटादिविष-
यकज्ञानस्याप्यनुमितिप्रतिबन्धकतया धूमाभाववद्वृत्तित्ववि-
शिष्टविषयिताशालिज्ञानत्वेन प्रतिबन्धकताकल्पनस्यासम्भवात्ता-
दृशविषयितायां प्रतिबन्धकतानिरूपितस्वरूपसम्बन्धरूपावच्छे-
दकत्वासत्त्वेनातिव्याप्तिरिति वाच्यं धूमाभाववद्वृत्तित्वत्वप्र-
कारितानिरूपितविषयिताशालिज्ञानत्वेन भ्रमसाधारणप्रतिबन्ध-
कताकल्पनसम्भवात् तादृशविषयितायां वास्तवधूमाभाववद्वृत्ति-
त्वत्वविशिष्टनिरूपितविषयितायाः प्रतिबन्धकतावच्छेदकत्वस्या-
क्षतत्वात् न चैवं समानाधिकरणधर्मावच्छिन्नसाध्याभावव्य-
धिकरणधर्मावच्छिन्नसाध्याभावोभयविशेषिताधिकरणवृत्तित्वावगा-
हिनः समानाधिकरणधर्मावच्छिन्नाभावांशे भ्रमरूपज्ञानस्य वि-

षयितायाः व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावि-शिष्टनिरूपितत्वात् समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वविषयितात्वेन च प्रतिबन्धकतावच्छेदकत्वादव्याप्तिरिति वाच्यं हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वावच्छिन्ननिरूपितविषयितायां प्रतिबन्धकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् उक्तभ्रमे च समानाधिकरणधर्मावच्छिन्नाभावविषयितायास्तादृशाविशिष्टनिरूपितत्वाभावेन तस्या एव च प्रतिबन्धकतावच्छेदकत्वेनाव्याप्त्यनवकाशात् न चैवं हेतुसमानाधिकरणव्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव यत्र हेतुसमानाधिकरणसाध्याभावत्वसमानाधिकरणधर्मावच्छिन्नसाध्याभावत्वाभ्यां भानं तादृशभ्रमविषयिताया हेतुसमानाधिकरणसाध्याभावत्वविशिष्टानिरूपितत्वात् । समानाधिकरणधर्मावच्छिन्नाभावत्वावच्छिन्नविषयतात्वेन प्रतिबन्धकतावच्छेदकत्वाव्याप्तिरिति वाच्यम् । अनुयोगिताद्वयावच्छिन्नानिरूपितत्वेन तादृशविषयिताया निवेशनीयत्वात् । अथ यत्र ज्ञाने हेतुसमानाधिकरणतया भासमाने व्यधिकरणधर्मावच्छिन्नाभावे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेन साध्यस्य एका प्रकारता तादृशज्ञानीयव्यधिकरणधर्मावच्छिन्नाभावीयविषयितायां साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य विपर्यासवद्भावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वासत्त्वेनासम्भवेऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यविशिष्टाभावनिरूपितत्वस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धावियविषयितानिरूपितविषयितात्वेनानुमितिप्रतिबन्धकतावच्छेदकत्वस्य चाक्षतत्वात् अव्याप्तिर्दुर्वारैवेति चेन्न तादृशभ्रमस्याप्रामाणिकत्वात् प्रामाणिकत्वे च संसर्गीयविषयिताद्वयानिरूपकत्वेन लक्षणघटकाभावविषयिताया विशेषणीयतया सामञ्जस्यात् । अथ साध्यरूपविशेषणविशिष्टस्याभावस्य विषयितानिरूपकतया लक्षणघटकत्वे साध्याभावयोः सम्बन्धस्यापि सम्बन्धविधया लक्षणघटकत्वमावश्यकं स च सम्बन्धः साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकत्वरूपो व्यधिकरणधर्मा-

वच्छिन्नप्रतियोगिताकत्वरूपस्यानुगत इति प्रथमस्य निवेशे केवलान्वयिनि साध्यविशेषिताभावाप्रसिद्धि व्यतिरेकिसाध्यकसद्धेतौ च तादृशहेतुसमानाधिकरणाभावाप्रसिद्धिरित्यसम्भव चरमस्य निवेशे च सर्वत्र व्यभिचारिण्यतिव्याप्ति प्रतियोगितावच्छेदकधर्माणां चोपलक्षणीभूतेन केनचिद्रूपेणानुगमय्य निवेशो न सम्भवति प्रतियोगितावच्छेदकोपलक्षणस्य सम्बन्धविधयाऽभानात्। न चावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव सम्बन्धतया निवेशान्नाननुगमनिबन्धनो दोष इति वाच्यम् अवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगित्वविषयकाभावज्ञानस्य प्रतियोगिमत्ताज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतया ऽवच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया संसर्गतया ऽभानात् न च स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन साध्यतावच्छेदकविशेषित एवाभावो निवेश्य न तु साध्यविशेषितः वह्नित्वादिना घटाद्यभाव एव वह्न्यादिसाध्यकस्थले लक्षणघटक इति वाच्यम्। प्रमेयत्वावच्छिन्नसाध्यकस्थले तादृशाभावाप्रसिद्ध एव स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन वह्नित्वादिविशेषिते वह्नित्वादिना घटादेरभावे भासमाने यत्र सम्बन्धघटकप्रतियोगिताया बाधितस्य वह्न्यादिनिष्ठत्वस्य भान तादृशज्ञानीयाभावविषयिताया उक्तसम्बन्धेन साध्यतावच्छेदकविशिष्टाभावनिरूपिततया अनुमितिविरोधितया चानुपपत्तेर्दुर्वारत्वात् स्वावच्छिन्नसाध्यवृत्तित्वविशिष्टप्रतियोगितानिवेशे च सर्वत्र सद्धेतावप्रसिद्धिः एव प्रतियोगिविशेष्यतातापन्न एवाभावे प्रतियोगिपारतन्त्र्येण समानाधिकरणधर्मस्य स्वातन्त्र्येण व्यधिकरणधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रकारत्व प्रामाणिक न तु प्रतियोगिविशेष्यतानापन्ने वह्नि र्नास्ति वह्नित्वेन घटो नास्तीत्येव प्रतीतेः न तु वह्नित्वेन नास्तीति तथा च विशिष्य प्रतियोग्यविशेषितस्य उक्तसम्बन्धेन साध्यतावच्छेदकविशेषितस्याभावस्य विषयित्वनिरूपकतया निवेशो न सम्भवत्येवेति चेन्मैवम् प्रतियोग्यादिविशेषिताभावीयत्वेन विशिष्टनिरूपितविषयिता न लक्षणे निवेश्यते अपि तु स्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो य सम्बन्ध स्वप्रतियोगिसा·

ध्यनिष्ठतत्सम्बन्धावच्छिन्ननिरूपकतावच्छेदकताकत्वेन यत्र हेतु-समानाधिकरणघटत्वावच्छिन्नवह्न्यभावे वह्नित्वाद्यवच्छिन्नप्रतियोगि-ताकत्वसम्बन्धेन वह्न्यादेः साध्यस्य प्रकारता तादृशज्ञान-विषयितानिरूपकाभावनिष्ठो न निरुक्तनिरूपकतावच्छेदकस-म्बन्ध इति तद्विषयिताव्युदासः यत्र वह्नित्वावच्छिन्नघटाद्यभावे त-न्निष्ठवह्नित्वावच्छिन्नप्रतियोगिताकत्वमेव वह्नेः सम्बन्धतया भासते तत्र तत्सम्बन्धप्रतियोगी न वह्निः अपि तु घट एवेति साध्ये वास्तवतत्सम्बन्धप्रतियोगित्वानिवेशात्तादृशज्ञानीयाभावविषयिताव्यु-दासः साध्यनिवेशाद्यत्र वह्नित्वेन घट एव वह्नित्वावच्छिन्नप्रतियो-गिताकत्वसम्बन्धेन तत्सम्बन्धानुयोगिनि वह्नित्वावच्छिन्नप्रतियो-गिताकघटाभावे प्रकारस्तादृशज्ञानीयाभावविषयितायास्तत्सम्ब-न्धप्रतियोग्यवच्छिन्ननिरूपकताकत्वेऽप्यनुमितिविरोधित्वेऽपि च न क्षतिः । यत्र घटत्वावच्छिन्नवह्न्यभावे घटत्वावच्छिन्नप्रतियोगिता-कत्वमेव वह्नित्वावच्छिन्नप्रतियोगिताकत्वत्वेन वह्नेः संसर्गतया भासते तादृशज्ञानस्य प्रामाणिकत्वे साध्यप्रतियोगिको हेतुसमा-नाधिकरणाभावानुयोगिको यद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वावि-शिष्टः सम्बन्धः तद्धर्मावच्छिन्नप्रतियोगिताकत्वत्वविशिष्टसम्ब-न्धावच्छिन्ननिरूपकतावच्छेदकत्वं विवक्षणीयमिति दिक् । न च व्यभिचारज्ञानस्यानुमितिकारणव्याप्तिज्ञानं प्रत्येव प्रतिबन्धकत्व-मिति व्यभिचारिण्यतिव्याप्तिरिति वाच्यं तज्जनकज्ञानप्रतिबन्धक-तावच्छेदकत्वाभावस्यैव विवक्षितत्वात् । अनुमित्यविरोधित्वज्ञानस्य अनुमितिप्रतिबन्धकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैव । अनुमिति हेतुत्व इति एतन्मते निरुक्तविषयितानिष्ठतादृशावच्छेदकत्वाभा-वस्यैवानुमितिकारणीभूतज्ञानविषयत्वादिति भावः । अनुमि-त्यविरोधितया अनुमितिजनकज्ञानाप्रतिबन्धकतया साध्याभाव-वद्वृत्तित्वज्ञानस्यानुमितिजनकत्वाभावादिति भावः । अतिप्रसङ्गा-दिति हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृ-त्तित्वविषयितासामान्ये ऽनुमितिजनकज्ञानप्रतिबन्धकतावच्छेद-कत्वाभावस्याक्षतत्वादिति भावः । न च हेतुनिष्ठसाध्याभाववद्वृ-त्तित्वविषयिता ऽनुमितिजनकज्ञानप्रतिबन्धकतावच्छेदिका इत्येता-दृशज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयिताया अपि तादृश-

विषयितासामान्यान्तर्गततया तत्र च प्रकृतव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकत्वस्यापि सत्त्वेन नातिव्याप्त्यवकाश इति वाच्यम् एवं सति सद्धेतावपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वविषयितायामनुमितिजनकज्ञानविरोधित्वभ्रमनिष्ठतादृशसाध्याभाववद्वृत्तित्वविषयितायामनुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वेन लक्षणगमनासम्भवात् तद्वारणाय इतराविशेषणत्वेन तादृशविषयितायाः एव लक्षणे निवेश्यतया विषयिताविशेषणत्वेन साध्याभाववद्वृत्तित्वविषयितामादायातिव्याप्तिवारणासम्भवादिति ध्येयम् ॥

मिश्ररीत्या साजात्यघटनेन साध्याभाववदवृत्तित्वरूपां व्याप्तिं परिष्कृत्योपन्यस्यति केचित्त्विति ॥

(टी०) केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्तदधिकरणनिरूपितवृत्तित्वाभावास्तद्वत्त्वं तत्त्वं साजात्यञ्च समानासमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण । साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रत्येतव्यो व्याप्यवृत्तिश्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्यस्याभाववति हेतोर्वृत्तावपि नाव्याप्तिः ।

(गा०) धूमवान् वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावसजातीयस्य घटत्वादिना तदधिकरणवृत्तित्वाभावस्य हेतौ सत्त्वादतिव्याप्तिरतो यावन्त इति । तथा च यावदन्तर्गतसमानाधिकरणधर्मावच्छिन्नाभावसजातीयस्य तदधिकरणवृत्तित्वाभावस्य हेतावसत्त्वान्नातिव्याप्तिः तथैव समानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय प्रत्येकं तत्तत्सजातीया इति । तथा च वक्ष्यमाणरूपेण व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वाभावान्न दोषः । यावत्साध्याभावत्वेन साध्याभावानां निवेशतया साजात्ये उभये व्यतिरेकिसाध्यके वह्निमान् धूमादित्यादौ यावत्साध्याभावसाजात्याप्रसिद्ध्याऽव्याप्तिरतस्तदुपलक्षितत्वेन तेषां साजात्ये

स्वस्य तथाविधतद्वृत्तित्वाभावे सत्त्वात् । एतेन समनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नाभावस्य समवायादिसम्बन्धावच्छिन्नगगनत्वावच्छिन्नगगनाद्यभावाभिन्नतया तस्य समानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठप्रतियोगितानिरूपकतया व्यधिकरणधर्मावच्छिन्नाभावस्य निरुक्तरूपवत्त्वानुपपत्त्या स्वसमानाधिकरणधर्मावच्छिन्नसमानाधिकरणसम्बन्धावच्छिन्नप्रतियोगिताया अनिरूपकत्वपर्यन्तनिवेशनप्रयासो नोपादेयः समनियताभावैक्यमते गगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापि साजात्यविवक्षणे सम्भवतीति ध्येयम् । ननु यावत्साध्याभावान्तर्गतानां तत्तत्साध्यव्यक्त्यभावादीनामधिकरणे हेतोर्वृत्त्या वह्निमान् धूमादित्यादावव्याप्तिरत आह साध्याभावश्चेति । द्वितीयरीत्येति यत्समानाधिकरणानामित्यादिद्वितीयलक्षणरीत्येत्यर्थः । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाव एव साध्याभावपदेन विवक्षित इति भावः । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभावविवक्षणे तथाविधवह्निघटोभयाभावमादाय दोषतादवस्थ्यमतः प्रथमरीत्येति नोक्तं साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावविवक्षणे वाच्यत्वादिसाध्यकस्थले लक्षणसमन्वयसम्भवेऽपि स्वरूपसम्बन्धेन तादात्म्यसम्बन्धेन वा प्रमेयमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्या ऽव्याप्तिरतो व्यापकतावच्छेदकपर्यन्तानुधावनं तथा च ज्ञेयत्वादिना वाच्यत्वाभाव एव तथेति न दोषः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशे च वह्न्यादिसाध्यके तार्णातार्णोभयाभावादिकमादाय दोषस्य व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवेश्य वारणेऽपि सत्तादिसाध्यकस्थले विशिष्टसत्ताभावमादाय दोष इति तादृशाभावो न निवेशितः व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता च न्यूनवृत्तिधर्मावच्छिन्ना अतिरिक्तवृत्तिधर्मावच्छिन्ना वा या या प्रतियोगिता तदन्यत्वेन निर्वचनीया तेन वह्न्यादिसाध्यकस्थले वह्नित्वादिना महानसीयवह्निघटान्यतराभावमादाय न दोषः न्यूनवृत्तित्वमतिरिक्तवृत्तित्वं च विरुद्धव्यावृत्त वाच्य नातो व्यधिकरणधर्मावच्छिन्नाभावासंग्रहः व्यापकता च साध्यतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या

तेन संयोगादिना वह्न्यादिसाध्यके समवायादिना वह्न्याद्यभावमादायासम्भववारणाय *साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन* प्रतियोगिताया विशेषणीयतया समवायादिना द्रव्यत्वादिसाध्यके विषयतादिसम्बन्धेन साध्यव्यापकस्य ज्ञानादेः समवायादिना ऽभावमादाय दोषस्य वारकाशः तादात्म्यसम्बन्धेन प्रमेयसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकः समनियताभावैक्यमते तादृशभेदस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावाभिन्नतया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्य प्रसिद्धिसम्भवात् । यत्तु संयोगेन प्रमेयत्ववान्नेति प्रतीतिसाक्षिकः संयोगावच्छिन्नप्रमेयत्वनिष्ठप्रतियोगितावच्छेदकताक एव भेदो लक्षणघटकः अत्यन्ताभावस्येव तेन सम्बन्धेन तदवृत्तियों धर्मः तत्सम्बन्धेन तदवच्छिन्नप्रतियोगितावच्छेदकताकभेदस्यापि उक्तयुक्तिबलात्सिद्धिरिति तन्न वह्निमान् धूमात् गुणवान् द्रव्यत्वादित्यादौ विषयितादिसम्बन्धेन वह्नित्वगुणत्वादिमतः साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य *वारणाय* व्यापकतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अवश्यं निवेशनीयतया तादृशाभावस्य प्रामाणिकत्वेऽपि लक्षणघटकत्वासम्भवात् । ननु कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगत्वावच्छिन्नाभावस्यापि लक्षणघटकतया तदधिकरणे हेतोर्वृत्तेरव्याप्तिः न च साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वादेः साध्यव्यापकतानवच्छेदकत्वेन तादृशाभावानां न लक्षणघटकतेति वाच्यं संयोगेन वह्न्यादिसाध्यकस्थले वह्नित्वादीनां संयोगरूपसाध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकत्वसम्पत्तये व्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशनस्यावश्यकत्वात् अन्यथा साध्यवत्युत्पत्तिकालावच्छेदेन वह्नित्वद्रव्यत्वाद्यवच्छिन्नस्य संयोगसम्बन्धेनाभावसत्त्वात् साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकस्यैवाप्रसिद्धिप्रसङ्गात् तथा च तत्तदधिकरणपदेन तत्तदभावीयव्याप्यवृत्तितानिरूपकाधिकरणमेव विवक्षणीयं व्याप्यवृत्तितानिरूपकत्वं च निरवच्छिन्ना-

धेयतानिरूपकत्वम् यत्र च संयोगाद्यभावस्य तथाविधाधिकरण गुणादिरेवेति न दोषः । इत्थं च कपिसंयोगाभाववान् कपिसंयोगाधिकरणत्वाभाववान् वा मेयत्वादित्यादौ कपिसंयोगतदधिकरणत्वादिरूपाणां यावत्साध्याभावान्तःपातिनामभावानां तथाविधाधिकरणाप्रसिद्ध्या ऽव्याप्तिरतः साध्याभाव व्याप्यवृत्तित्वेन विशिनष्टि व्याप्यवृत्तिश्चेति । तथा च तादृशाभावस्य तथाविधयावदनन्तर्गततया तथाविधाधिकरणाप्रसिद्धावपि न क्षतिः व्याप्यवृत्तित्वं च निरवच्छिन्नवृत्तिकत्वं न त्ववच्छिन्नवृत्तिकान्यत्वं तथा सति संयोगेन धूमसाध्यकव्यभिचारिणि संयोगेन धूमत्वावच्छिन्नधूमाद्यभावस्य महानसादाववच्छिन्नवृत्तिकतया ऽयोगोलकान्यत्वाद्यभावे साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविरहेण व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया अतिव्याप्तिः एवं च वक्ष्यमाणसंयोगाद्यभावस्यापि क्वचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयव्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वाभावमादाय दोषवारणायाधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयम् । कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिः व्याप्यवृत्तेः साध्याभावस्याकाशाभावस्य व्याप्यवृत्तितानिरूपकाधिकरणे आत्मादौ हेतोर्वृत्तेरतस्तदभावीयप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयं प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशात् प तद्रूपान्यत्वाविशिष्टगुणत्ववान् गुणत्वादित्यादौ समवायरूपसाध्यतावच्छेदकसम्बन्धघटितविशिष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वावच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकतया हेतुमत्यसत्त्वेऽपि नातिव्याप्तिः तथा च कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादिसाध्यकात्मत्वादावव्याप्तिः तत्र व्याप्यवृत्तेर्यावत्साध्याभावान्तःपातिनः आकाशाभावादेः प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धेः कालव्याप्याकाशावच्छेदेन तादृशसाध्यकत्वतदभावीयप्रतियोगिमत्त्वात् सर्वत्रैव तादृशाभावस्य प्र

तियोगिसमानाधिकरणत्वात् अतो व्याप्यवृत्तित्वमुपेक्ष्य तादृशाभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेशयति प्रतियोगितावच्छेदकावच्छिन्नेति । अत्र च समनियताभावैक्यमते सर्वेषामेव व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितया तत्प्रतियोग्यनधिकरणाप्रसिद्ध्या तदसंग्रहः विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नयत्किञ्चित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशे च वाच्यत्वत्वादिना घटाद्यभावस्य घटादिव्यधिकरणत्वेन लक्षणघटकतानिर्वाहेऽपि प्रतियोगिभेदेन प्रतियोगिताभेदमते जन्यज्ञानविषयत्वादिसाध्यकस्थले यत्किञ्चित्कालावच्छेदेन परमाण्वादौ प्रसिद्धस्य साध्यतावच्छेदकावच्छिन्नाभावस्य यत्किञ्चित्प्रतियोग्यनधिकरणवृत्तेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्ध्या ऽव्याप्तिः तत्रापि यत्किञ्चित्प्रतियोगितान्तर्भावेन तादृशाधिकरणत्वप्रसिद्धिसम्पादने यत्किञ्चित्प्रतियोगिताश्रयप्रतियोगिवैयधिकरण्यनिरूपकाधिकरणे तत्र हेतोर्वृत्त्यव्याप्तितादवस्थ्यम् एवं वह्निमान् धूमादित्यादौ द्रव्यत्वाद्यवच्छिन्नस्य संयोगेन योऽभावस्तस्य द्रव्येऽप्युत्पत्तिकालावच्छेदेन वर्तमानस्य गुणादौ प्रतियोगिव्यधिकरणस्य प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणे गुणादौ हेतुतावच्छेदकसम्बन्धेन धूमेऽप्रसिद्ध्या ऽव्याप्तिवारणाय हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे प्रतियोगिवैयधिकरण्यमभावे विशेषणं देयम् एवं चैतद्रूपान्यत्वविशिष्टसत्तावान् जातेरित्यादौ समवायघटितसाध्यव्यापकतावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्य हेत्वधिकरणे सत्तादिरूपप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतया ऽतिव्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानम् । अथ केवलान्वयिसाध्यकस्थले लक्षणघटकानां वाच्यत्वत्वाद्यवच्छिन्नघटाद्यभावानां सर्वेषामेव प्रतियोगितावच्छेदकवाच्यत्वत्वाद्यवच्छिन्नानधिकरणाप्रसिद्धिः न च यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वमेव निवेशनीयं तथा च समनियताभावानामैक्योपगमेन व्यतिरेकितावच्छेदकधर्मस्यापि उक्ताभावप्रतियोगितावच्छेदकतया तदवच्छिन्नानधिकरणत्वस्य प्रसिद्ध्या तेषां

लक्षणघटकतेति वाच्यं तथा सति संयोगाभावसाध्यकस्थले संयोगात्मकाभावस्य यत्किञ्चित्प्रतियोगितावच्छेदकसमवेतसामान्याभावत्वावच्छिन्नानधिकरणवृत्तित्वात् तद्घटितस्याप्रसम्भवात् विशिष्टसाध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणे उक्तस्थले तादृशप्रतियोगितावच्छेदकावच्छिन्नानाधिकरणाप्रसिद्धेर्दुर्वारत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वनिवेशे च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्ध्या तादृशप्रतियोगिव्यधिकरणत्व दुर्घटमिति। अत्र केचित् स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिसमानाधिकरणा ये ये तदन्यत्व व्यधिकरणान्तार्थं न तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्व व्यधिकरणधर्मावच्छिन्नाभावस्य विशिष्टप्रतियोग्यप्रसिद्ध्या ऽसंग्रहात् न चैव धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगसम्बन्धघटितव्यापकतावच्छेदकधूमत्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकानां धूमाद्यभावानाम् उत्पत्तिकालावच्छेदेन धूमादिमति वृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतयातिव्याप्तिरिति वाच्य साध्यतावच्छेदकसम्बन्धेन व्यापकतामनिवेश्य येन सम्बन्धेन व्यापकता तत्सम्बन्धावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाव निवेश्य विषयतासम्बन्धेन साध्यव्यापकस्य ज्ञानस्य समवायसम्बन्धावच्छिन्नाभावमादायोक्तदोषस्य वारणीयतया अयोगोलकभेदादेरभावमादायैवातिव्याप्तिवारणसम्भवात् यादृशप्रतियोगितावच्छेदको यो धर्मस्तादृशैतादृशप्रतियोगिताश्रयसामानाधिकरण्य विवक्षणीय तेन समनियताभावैक्यमते वाच्यत्वत्वादिना घटाद्यभावस्यापि घटत्वादिना वाच्यत्वाभावाभिन्नतया वाच्यत्वादिप्रतियोगित्वेन प्रतियोगितावच्छेदकवाच्यत्वविशिष्टवाच्यत्वादिरूपप्रतियोगिसमानाधिकरणत्वेऽपि न क्षतिः न चैवमपि वाच्यत्वादिसाध्यके सर्वेषामेवाभावानां पूर्वक्षणादिवृत्तित्वविशिष्टत्वाभावरूपप्रतियोगिना समानाधिकरणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिरिति वाच्यं व्यापकेच्छेदकविशिष्टव्यधिकरणस्वनाशीयप्रतियोगिताभिन्नत्वे·

न व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता विशेषणीया इत्थमेव प्रतियोगितावच्छेदकैक्यादिनिवेशवैयर्थ्यात् वाच्यत्वावच्छिन्नघटादिनिष्ठप्रतियोगितायाः व्यापकतावच्छेदकविशिष्टस्याधेयताप्रसिद्धा निरुक्तप्रतियोगिताभिन्नत्वेन तद्विशिष्टाभावमादाय लक्षणसमन्वयसम्भवात् । न च तथापि एतद्भावभिन्नं मेयत्वादित्यादौ साध्यव्यापकतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैतद्भावमात्रवृत्तेरभावमात्राधिकरणतया ऽधिकरणभेदरूपस्यादेतद्भावभेदादिरूपप्रतियोगिसमानाधिकरणतया निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकोऽभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्याप्तिरिति वाच्यं व्यापकतावच्छेदकविशिष्टस्याधिकरणे स्वनिरूपकाभावत्वेन वर्तते योऽभावस्तदीयप्रतियोगिताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया विशेषणीयतया एतद्भावाधिकरणे एतद्भावभिन्ने एतद्भावत्वेनैतद्भावकर्तृकतद्भावभेदाभावस्य वृत्तावपि तद्भावाधिकरणे एतद्भावभेदो नास्तीत्यप्रतीत्या एतद्भावभेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तस्यावृत्तित्वादेतद्भावभेदत्वावच्छिन्नप्रतियोगिताकं निरुक्तप्रतियोगिताभेदस्याक्षतत्वादित्याहुः । तच्चिन्त्यं व्यापकतावच्छेदकसम्बन्धावच्छिन्नाभावनिवेशे व्यापकताशरीरे प्रतियोगिव्यधिकरणत्वस्याभावाविशेषणत्वेऽपि संयोगादिसाध्यकव्यभिचारिणि अयोगोलकान्यत्वाभावमादायातिव्याप्तिवारणसम्भवात् तत्र तन्निवेशे प्रयोजनाभावेनाव्याप्यवृत्तिसाध्याभावमादायाव्याप्त्यनवकाशात् अभावे व्याप्यवृत्तित्वविशेषणस्याप्रसक्तेः अस्तु वा साध्यव्यापकतावच्छेदकस्यापि साध्यवन्निष्ठव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकतया तदभावव्यावर्तनाय व्यापकताशरीरे प्रतियोगिव्यधिकरणत्वप्रवेशस्तथाप्येतादृशप्रतियोगिसामानाधिकरण्यविवक्षणे तस्याव्याप्तिवारणप्रयोजनकत्वाभिधानामसङ्गतिः अभावे तदनिवेशे व्याप्यवृत्तिसाध्यकेऽपि यावत्साध्यवद्विषयकजन्यज्ञानव्यक्तिविशेषस्य प्रतियोगिव्यधिकरणत्वघटितसाध्यव्यापकताघटकत्वात् कालविशेषावच्छेदेन हेतुमति तदभाववृत्तेरसम्भवस्यैव प्रसङ्गात् । अत्र वदन्ति । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्व-

मेव तदर्थं न च व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छे· दकविशिष्टप्रतियोग्यप्रसिद्धे केवलान्वयिसाध्यके प्रतियोगि· तावच्छेदकविशिष्टप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरव्याप्ति रिति वाच्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरण वृत्तित्व हि स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिवृत्तिप्र तियोगितावच्छेदकताकभेदवद्वृत्तित्वं ज्ञेयत्वत्वादिना वाच्यत्वा· द्यभावस्य तादृशभेदसमानाधिकरणतया प्रतियोगितावच्छेद· कावच्छिन्नप्रतियोगिवैयधिकरण्य सुघटमेव व्यधिकरणधर्माव च्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकज्ञेयत्वत्वादिना वाच्य त्ववद्भेदस्यैव तथात्वात् कपिसयोगाभावान्मेयत्वादित्यादौ क· पिसयोगादिरूपसाध्याभावस्यापि ज्ञेयत्वत्वादिना कपिसयोगा भावादिमद्भेदसामानाधिकरण्यसत्त्वात् । तस्य च स्वप्रतियोगिता· वच्छेदकावच्छिन्नवैयधिकरण्यनिरूपकाधिकरणाप्रसिद्धेरत प्रति· योगितावच्छेदकावच्छिन्नस्य भेदप्रतियोगितावच्छेदकतायां विशे· षणम् । तत्रैव कपिसयोगात्मकाभावीयप्रतियोगितावच्छेदकी· भूतसमवेतसामान्याभावत्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्या· पि निरुक्तप्रतियोगितावच्छेदकताकत्वात् तत्सामानाधिकरण्य· मादाय कपिसयोगाद्यात्मकाभावानां प्रतियोगितावच्छेदकाव· च्छिन्नप्रतियोगिवैयधिकरण्यवारणाय साध्यतावच्छेदकावच्छिन्न· व्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदक विशेषणीय स मवेतसामान्याभावत्वादेः कपिसयोगाभावादिव्यापकतानवच्छे दकतया न दोष न चात्र साध्यतावच्छेदकावच्छिन्नव्यापकताव· च्छेदकत्वेन प्रतियोगितावच्छेदके विशेषिते तत्तत्साध्यव्यक्त्यभा वादीनामीदृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्य न घटते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूत· स्वप्रतियोगितावच्छेदकाप्रसिद्धेः तथा च साध्याभावश्चेत्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक· रूपावच्छिन्नप्रतियोगिताकाभावविवक्षणासङ्गतिरिति वाच्य सा· ध्याभावश्चेत्यादिग्रन्थस्य व्याप्यवृत्तितानिवेशकल्पेऽभावे सा· ध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणपरत्वात् द्वितीयकल्पे च प्रतियोगितावच्छेदकावच्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्य·

तादृशव्यापकतावच्छेदकत्वेन विशेषणात्तादृशरूपावच्छिन्नप्रतियोगिताक एवाभावो ऽत्र लक्षणघटक इत्यर्थकत्वात् एतत्कल्पे चाभावांशे तादृशप्रतियोगिताकत्वविशेषणाविरहेऽपि क्षतिविरहात् तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेदसामानाधिकरण्यमादाय तद्दोषवारणाय स्वप्रतियोगिवृत्तित्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं संयोगसामान्याभावादेरपि संयोगाद्यात्मकाभावप्रतियोगितया कपिसंयोगाद्यात्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वादिना संयोगसामान्याभावघद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय यादृशप्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकतायां निवेशनीयं कपिसंयोगाभावत्वम् च कपिसंयोगाभावनिष्ठप्रतियोगितायामेवावच्छेदकं संयोगसामान्याभावश्च न तादृशप्रतियोगिताश्रय इति न तादृशभेदमादाय दोषः भेदप्रतियोगितावच्छेदकतायां स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वमपि निवेशनीयं तेन कपिसंयोगाद्यात्मकाभावस्य कपिसंयोगाभावत्वावच्छिन्नकपिसंयोगाभावादिनिष्ठविषयितासम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदसामानाधिकरण्येऽपि न तद्दोषतादवस्थ्य एवं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यनिरूपकत्वे स्वनिष्ठं यत स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनिष्ठप्रतियोगितावच्छेदकताकभेद—मानाधिकरण्यं तन्निरूपकत्वम् अतो व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपि न तादृशाधिकरणाप्रसिद्धिः कपिसंयोगि एतत्वादित्यादौ हेत्वधिकरणेऽपि द्रव्यत्वादिना कपिसंयोगादिमतः कपिसंयोगत्वादिना च द्रव्यत्वादिमतो भेदसत्वात् तस्यापि तादृशाधिकरणत्वापत्तितो ऽवच्छिन्नान्तनिष्ठान्तयोरुपादानम् पूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावत्वादिरूपप्रतियोगितावच्छेदकरूपेण कपिसंयोगादिमद्भेदमादाय तद्दोषतादवस्थ्यमतः तत्प्रतियोगिताश्रयनिष्ठप्रतियोगितावच्छेदकतायां तदवच्छेदकावच्छिन्नत्वं विवक्षणीयम् एवं विशिष्टसाध्यव्यापकतावच्छेदकत्वनापि प्रतियोगितावच्छेदकं विशेषणीयं तेन संयोगो द्रव्यत्वादित्यादौ संयोगाभावस्य द्रव्यवृत्ति-

वृत्तेरव्याप्यत्वनवकाशात् कपिसंयोगाभावादेर्गुणादौ निरवच्छि-
न्नवृत्तिकत्वादिरूपव्याप्यवृत्तित्वादिसत्त्वेन तादृशविशेषणेन व्या-
वर्तनासम्भवाच्च तथा च कपिसंयोगाभावादिसाध्यकस्थले क-
पिसंयोगाद्यात्मकाभावस्य लक्षणघटकत्वेऽपि तदीयव्याप्यवृत्ति-
तानिरूपकाधिकरणाप्रसिद्धिरेवाव्याप्तिप्रयोजिका न तु ताद-
शाभावीयाव्याप्यवृत्तितानिरूपकाधिकरणे हेतोर्वृत्तिरिति वृत्ता-
वपि हेतोरिति न सङ्गच्छते तथाप्यभावे व्याप्यवृत्तित्वादिविशेष-
णानुपादाने यावदन्तर्गतकपिसंयोगादीनां व्याप्यवृत्तितानिरूपका-
धिकरणाप्रसिद्धिः स्यादिति तादृशाधिकरणपर्यन्तं न विवक्षणीयं
तथा सति अव्याप्यवृत्तिसाध्यकस्थले हेतोः साध्याभाववद्वृत्तित्व-
निबन्धनाव्याप्तिः सा च व्याप्यवृत्तितानुपादानाच्च सम्भवतीत्य-
भिप्रायः । अथवा कपिसंयोगादिसाध्यकस्थले हेतोः साध्याभावीया-
व्याप्यवृत्तितानिरूपकाधिकरणवृत्तित्वं तत्स्थलीयाव्याप्तिवारकव्या-
प्यवृत्तितानिरूपकाधिकरणवृत्तित्वनिवेशौपयिकमतस्तदधीना या
कपिसंयोगाभावादिसाध्यकस्थले कपिसंयोगाद्यात्मकाभावीयता-
दृशाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तिस्तत्सम्पादकमपीति न ता-
दृशग्रन्थासङ्गतिः । एतेन व्याप्यवृत्तितानिरूपकाधिकरणानिवेशे-
ऽव्याप्यवृत्तिसाध्यकस्थले क्षणविशेषवृत्तित्वविशिष्टसाध्याभावस्य
प्रतियोगिव्यधिकरणत्वघटितसाध्यव्यापकतावच्छेदकावच्छिन्नप्रति-
योगिताकत्वात् व्याप्यवृत्तेरधिकरणे हेतोर्वृत्त्या लक्षणगमनासम्भवा-
दसम्भव एव सम्भवतीत्यव्याप्तिरिति लिखनं न युज्यत इत्यपि
निरस्तम् ॥

तत्तत्साध्याभाववद्वृत्तित्वस्य हेतुवृत्तितानवच्छेदकाविशेषण-
संसर्गावच्छिन्नवृत्तिधर्मावच्छिन्नाभावमादाय व्यभिचारिण्यतिव्याप्ति-
स्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावं निवेश्य चेद्वार्यते तदा
व्यधिकरणधर्मावच्छिन्नसाध्याभाववज्जातीयस्य तादात्म्य तद्वृ-
त्तित्वान्येन पदार्थाभावस्य प्रसिद्धिः गुरुधर्मस्य प्रतियोगितावच्छेद-
कत्वाङ्गीकार एव सम्भवति अन्यथा तादृशाभाववद्वृत्तित्वस्य वृ-
त्तित्वव्यापकगुरुधर्मसमनियततया प्रतियोगितानवच्छेदकत्वेन तदव-
च्छिन्नाभावाप्रसिद्धेः धन्यूनानतिरिक्तवृत्तित्वरूपावच्छिन्नत्वनिवेशे
इदङ्गीकारे दाल्यनिरूढत्वावच्छिन्नाभावादेर्निरूढत्वस्याप्यादिसम-

नियतधर्मावच्छिन्नप्रतियोगिताकतया तद्वति धूमादिसाध्यकवह्न्यादि-हेतावतिव्याप्तेस्तत्तत्साध्याभाववद्वृत्तित्वविशिष्टव्यापकतावच्छेद-करूपावच्छिन्नाभावादिनिवेशे च निर्धूमवृत्तित्वत्वादिना ह्रद-वृत्तित्वघटान्यतराभावमादाय तद्दोषतादवस्थ्यमित्यन्यादृशाभावं तत्तदधिकरणवृत्तित्वाभावपदेन विवक्षति तत्तदिति ।

(दी०) तत्तदधिकरणवृत्तित्वाभावश्च तत्तत्साध्याभाव-वद्वृत्तितात्वव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तसमानाधिकरणधर्मानव-च्छिन्नप्रतियोगिताको वा बोध्यस्तेन साध्याभाववद्व्यक्तिविशेष-वृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसङ्गः ।

(गा०)व्यापकान्तमनवच्छिन्नान्तं च प्रतियोगिताविशेषणं प्रथम-विशेषणप्रयोजनमाह तत्तत्साध्याभाववद्व्यक्तिविशेषेति । यद्व्यक्तौ हे-तुरपि न वर्तते तादृशह्रदादिरूपव्यक्तीत्यर्थः । व्यभिचारनि-रूपकहेत्वधिकरणमात्रवृत्तियोऽयोगोलकादिव्यक्तिविशेषावृत्तित्वा-दिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभा-वस्तद्व्यक्तिविशेषवृत्तित्वाभावस्य हेतावसम्भवात् किञ्चिद्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसङ्गं दर्शयति पार्थि-वत्वादिविशेषितस्येति अग्रिमेण साध्याभाववद्वृत्तित्वस्येत्यने-नान्वितम् । वह्न्यादौ पार्थिवत्वादिविशेषणाभावात्तद्विशिष्टनिर्धूमवृ-त्तित्वाभावस्यापि तत्र सत्त्वात्तमादायेत्यर्थः । द्वितीयवि-शेषणप्रयोजनं दर्शयति द्वित्वाद्यवच्छिन्नस्येति । घटनिर्धूमवृत्ति-त्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः । नातिप्रसङ्ग इति । ह्रदादिवृत्ति-त्वत्वपार्थिवत्वादिविशिष्टनिर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगि-ताया वह्न्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्साध्याभाववद्-वृत्तित्वत्वाव्यापकत्वात् द्वित्वाद्यवच्छिन्नाभावप्रतियोगितायाः द्वि-त्वादिवद्व्यासज्यवृत्तिताविरहेण निर्धूमवृत्तित्वादिनिष्ठभेदप्रतियोगि-तानवच्छेदकत्वरूपनिर्धूमवृत्तित्वत्वादिव्यापकत्वसत्त्वेऽपि व्यासज्य-वृत्तिधर्मावच्छिन्नत्वात्तादृशाभावानां लक्षणाघटकत्वादिति भावः ।

व्यासज्यवृत्तिधर्मस्य तत्तत्साध्याभाववद्वृत्तित्वनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वविरहात् तत्तत्साध्याभाववद्वृत्तित्वव्यापकधर्मावच्छिन्नाभावनिवेशे द्वित्वावच्छिन्नाभावमादायातिप्रसङ्गस्य वारणसम्भवेऽपि प्रतियोगितायां व्यापकत्वविशेषणाप्रवेशे निर्धूमवृत्तित्वत्वादिना ह्रदादिवृत्तित्वघटान्यतराभावमादायातिप्रसङ्गो न शक्यते वारयितुमिति तत्र तद्विशेषणप्रवेशस्यावश्यकत्वे व्यासज्यवृत्तिधर्मावच्छिन्नाभाववारणाय तादृशधर्मानवच्छिन्नत्वमेव तत्तत्साध्याभाववद्वृत्तित्वव्यापकधर्मावच्छिन्नत्वापेक्षया लाघवान्निवेशयितुमुचितमिति तदेव निवेशितं व्यासज्यवृत्तित्वं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम् ॥

(दी०) अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यं तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः । इत्थं च साध्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन कस्य चिदधिकरणे वर्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिरिति ।

(गा०) साध्याभाववद्वृत्तित्वमिति । साध्याभाववत्सम्बद्धत्वमित्यर्थः । तेन तादात्म्यसम्बन्धेन वृत्तेरप्रसिद्धावपि न तत्सम्बन्धावच्छिन्नहेतुकस्थलेऽव्याप्तिः सम्बन्धप्रतियोगित्वरूपसम्बद्धत्वैकदेशे सम्बन्धे हेतुतावच्छेदकसम्बन्धेनेति तृतीयार्थाभेदान्वयः । वृत्तावपीति सम्बद्धत्वेऽपीत्यर्थः । न दोष इति । हेतुतावच्छेदकसम्बन्धानिवेशे वह्निमान् धूमादित्यत्र वह्न्यभाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगिताया वह्न्यभाववत्समवेतत्वावृत्तितया सामान्यतो वह्न्यभाववद्वृत्तित्वत्वं प्रत्यव्यापकत्वेन तादृशाभावस्य लक्षणघटकत्वानुपपत्तेर्वह्न्यभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकस्य तद्वद्वृत्तित्वसामान्याभावस्य वह्न्यभाववत्समवेतत्वयाति धूमेऽसत्त्वादव्याप्तिः प्रसज्यते हेतुतावच्छेदकसम्बन्धानिवेशे च निर्वह्निसंयुक्तत्वत्वावच्छिन्नाभावस्यापि तादृशसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया त-

मादाय लक्षणसमन्वय इति भाव । इत्थं च हेतुतावच्छेदक
सम्बन्धेन साध्याभाववद्वृत्तित्वाविवक्षणे च सतीति शेष । तद-
विवक्षणे च वक्ष्यमाणाप्रसिद्धिविरहादुपष्टम्भासङ्गति । हेतुतावच्छे
दकसम्बन्धेन कस्यचिदधिकरणे वर्तमान इति । अनुयोगितासम्बन्धेन
हेतुतावच्छेदकसम्बन्धवद्वृत्तिरित्यर्थ । अथवा हेतुतावच्छेदक
सम्बन्धेन धर्मवद्वृत्तिरित्यर्थ । विशिष्य हेतुतावच्छेदकपुरस्का
रेण हेतुमन्निवेशनसम्भवेऽपि बहुपदार्थघटितहेतुतावच्छेदकस्थले
धर्मत्वेन निवेशापेक्षया तेन रूपेण निवेशे गौरवमिति सामान्यतो
निवेशलाभाय कस्यचिदित्यभिहितम् । अथ द्रव्य गुणकर्मान्यत्व सति
सत्त्वादित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि
साध्याभावस्य सत्तादिरूपहेतुसामानाधिकरण्यसम्भवेऽपि हेतुताव
च्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावाना व्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकत्वनियमात्तादृशहेतुसमानाधिकरणत्वे
नाभावविशेषणे केवलव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरू
पेणैव साजात्यविवक्षण सम्भवतीति तन्निवेशनमेवोचितमिति
चेन्न तथा सति तादृशयावत्साध्याभावसजातीयत्वस्यैव लक्षणत्व
सम्भवतीति व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावस्यापि
विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटकतया तद्घटकयावद
भावसजातीयाप्रसिद्ध्यातिव्याप्तिविरहात् सद्धेतौ तादृशयावद
भावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभाव
मादायैव लक्षणसमन्वयसम्भवादिति साध्याभाववद्वृत्तित्वाभाव
घटकविशेषणवैयर्थ्यापत्त । हेतुतावच्छेदकसम्बन्धेनेति समवाया
दिसम्बन्धेनेत्यर्थं । साध्याभाववद्वृत्तित्वस्य स्वसमानाधिकरणध
र्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य । न क्षतिरिति । तादृशसाध्या
भावस्य समवायसम्बन्धानुयोग्यवृत्तितया व्यधिकरणधर्मावच्छि
न्नाभावस्यैव लक्षणघटकत्वाच्चेति च तादृशसम्बन्धेनापि वृत्ते
प्रसिद्धेरिति भाव । अत्र च द्रव्य गुणकर्मान्यत्वे सति सत्त्वादित्यादाव
व्याप्तिविशेषणविशेष्यभावसम्बन्धस्य परम्परया हेतुत्वमभ्युपेत्य धारणी
यत्यभिप्रेत्य हेतुतावच्छेदकसम्बन्धेन किञ्चिदधिकरणवृत्तित्वमभावे
विवक्षित यदि च सत्तादेरेव विशिष्टसत्त्वात्वादिना व्याप्यत्व
हेतुतावच्छेदकविशिष्टनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नाधि

करणतासामान्ये तत्तत्साध्याभावसजातीयतत्तदधिकरणानुयोगिकत्वाभावं तत्तत्साध्याभाववद्वृत्तितासामान्ये तत्तत्साध्याभावसजातीयहेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविशिष्टहेतुतावच्छेदकावच्छेद्यत्वाभाव वा निवेश्य निवार्यते तदा जातिमान् सत्त्वादित्यादावुपदर्शिताप्रसिद्धिनिबन्धनाव्याप्तेरुक्तविवक्षामन्तरेणैव निवारणं सम्भवतीत्यवधेयम् ।

मिश्रास्तु साध्याभाववद्वृत्तित्वाभावरूपव्याप्तेर्जातिमान् सत्त्वाद्द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिमालोच्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वरूपां व्याप्तिं साजात्यादिघटनया परिष्कृतवन्तस्तत्परिष्कृते च यथाश्रुते वक्ष्यमाणदोषमुद्धर्तुमभावप्रतियोगित्वस्थले स्वावच्छिन्नव्यापकतावच्छेदकतत्प्रतियोगितावच्छेदकत्वरूपपारिभाषिकतत्प्रतियोगितावच्छेदकत्वाश्रयहेतुतावच्छेदकवत्त्वं निवेशयन् तादृशलक्षणमाह यद्वेति ।

(दी०) यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वम् ।

(गा०) तादृशा व्याप्यवृत्तयः साध्याभावाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रत्येकं तत्तदभावसजातीयस्य तत्तदभावव्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तत्प्रतियोगितावच्छेदकं यद्धेतुतावच्छेदकावच्छिन्ननिरूपितव्यापकतावच्छेदकं तद्रूपवत्त्वं तत्त्वं तेन रूपेण व्याप्यत्वं वह्निमान् धूमादित्यादौ वह्नित्वाद्यवच्छिन्नवह्न्यभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नधूमाद्यभावः वह्नित्वावच्छिन्नघटाभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नघटाद्यभावस्तत्प्रतियोगितावच्छेदकं धूमत्वावच्छिन्नव्यापकतावच्छेदकमिति लक्षणसमन्वयः । व्यभिचारिणि धूमत्वावच्छिन्नवह्न्य-

भावसजातीयतत्तदभावव्यापकवह्नित्वावच्छिन्नघटाद्यभावतादृशवह्नित्वावच्छिन्नवह्न्यभावसजातीयतत्तदभावव्यापकवह्नित्वावच्छिन्नघटाद्यभावरह्नित्वावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकवह्नित्वादे वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेऽपि तादृशयावत्साध्याभावान्तर्गतधूमत्वावच्छिन्नधूमाभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य कस्यापि वह्नित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वाभावान्नातिव्याप्तिः । प्रथमाभावे व्याप्यवृत्तित्वविशेषणात्कपिसयोगी एतद्वृक्षत्वादित्यादौ कपिसयोगत्वाद्यवच्छिन्नकपिसयोगाद्यभावस्य केवलान्वयिन सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्त्यभावस्याप्रसिद्धावपि न क्षति व्याप्यवृत्तित्वविशिष्टतदभाव प्रति एतद्वृक्षत्वाद्यभावस्य व्यापकत्वात् साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकताया विवक्षणीयतया सयोगेन द्रव्यस्याव्याप्यवृत्तितामते सयोगेन तत्साध्यके तादृशसम्बन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यस्यावश्य निवेशनीयतया साध्यवन्निष्ठप्रतियोगिसमानाधिकरणाभावप्रतियोगितावच्छेदकस्यापि कपिसयोगत्वादे साध्यव्यापकतावच्छेदकत्वमक्षतमिति ध्येयम् । नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावस्य नानाधिकरण वैकव्यक्तिसाध्यके यत्किञ्चिदधिकरणवृत्तित्वविशिष्टसाध्याभावस्य व्यापकीभूताभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक इति तादृशसाध्याभावव्यावर्तनाय साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वनिवेशन व्यापकता च साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या तेन समवायेन द्रव्यत्वादिसाध्यकगुणादिहेतौ विषयतया साध्यव्यापकज्ञानादे साध्यतावच्छेदकसम्बन्धावच्छिन्नाभाव प्रति हेतुतावच्छेदकसम्बन्धावच्छिन्नहेत्वभावस्याव्यापकत्वेऽपि न क्षति साध्याभावश्च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्य तेन सयोगादिना वह्न्यादिसाध्यकधूमादिहेतौ समवायादिसम्बन्धावच्छिन्नवह्न्यभाव प्रति सयोगादिना धूमादेरभावस्याव्यापकत्वेऽपि न क्षति । व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावव्यापकव्याधिकरणहेतुतावच्छेदकावच्छिन्नप्रतियोगिताकाभावमादायातिप्रसङ्गवारणाय सजातीयत्वो

पादानं व्यतिरेकिसाध्यकस्थले यावत्साध्याभावसजातीयाप्रसिद्धा एकैकतत्सजातीयत्वनिवेशनं साजात्यघटकसमानाधिकरणधर्माव-च्छिन्नप्रतियोगिताकत्वादिकमनुगतं निरुक्तभेदकूटरूपमेव ग्राह्यम् । अन्यथा यत्र भिन्नभिन्नसम्बन्धेन साध्यहेतुभावस्तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य यादृशप्रतियोगितानिरूपकत्वं तस्यैव तद्वत्तया सजातीयत्वेन तत्सजातीयाभावनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः सजातीयस्यापि साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावस्य निवेशे हेतुव्यापकताया अपि तत्सम्बन्धघटिताया विवक्षणे उक्ताप्रसिद्धिनिबन्धनदोषासम्भवेऽपि व्यापकीभूतस्येत्यादेर्वैयर्थ्यस्य दुर्वारत्वात् तत्परित्यागे च चरमलक्षण एव पर्यवसानात् । अथ सजातीयाभावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यानिवेशेऽपि स्वमात्रनिष्ठयथाश्रुतसाजात्यनिवेशपक्षे नातिप्रसङ्गः । आत्मत्वादिसाध्यके विषयतादिसम्बन्धेन हेतौ ज्ञानादौ समवायादिसम्बन्धावच्छिन्नज्ञानाद्यभावस्य साध्याभावव्यापकत्वेऽपि यथाश्रुतसाजात्याभावेनातिव्याप्त्यप्रसक्तेः संयोगादिना वह्न्यादौ साध्ये समवायादिना हेतुं रूपविशेषं प्रति हेतुतावच्छेदकसमवायेन वह्न्याद्यभावप्रतियोगिनोऽव्यापकत्वेऽपि च न दोषः । साध्यतावच्छेदकसम्बन्धेनैव हेतुव्यापकताया विवक्षणीयत्वादिति चेत्तर्हि सजातीयाभावे साध्याभावव्यापकत्वविशेषणस्य वैयर्थ्यमापद्येत । स्वाव्यापकाभावस्य स्वसाजात्यविरहेणैव व्यावर्तनात् व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकावच्छिन्नहेत्वाद्यभावमादायातिप्रसङ्गवारणाय व्यापकीभूतस्येति।व्यभिचारिणोऽभावस्य व्यभिचारनिरूपकाधिकरणसाधारणसाध्याभावाव्यापकत्वान्न दोषः व्यापकत्वं च न तत्समानाधिकरणाभावाप्रतियोगित्वं सर्वस्यैव द्वित्वावच्छिन्नाभावप्रतियोगितयाऽसंभवात् न च तदधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेनावश्यं वाच्यं तथा च वह्न्याद्यभाववति धूमाद्यभावस्य धूमाद्यनात्मकाद्वित्वाद्यवच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसम्बन्धेनावृत्त्या न तमादाय दोषावसर इति वाच्यम् एवमपि यत्र स्वरूपसम्बन्धेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभावस्य व्यापकत्वानुपपत्तेर्दु-

धात्वात् नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वम् अभावत्वाद्यात्मकतादृशरूपमादायाभावमात्रस्यैव व्यापकतया व्यापकत्वस्याव्यावर्तकतापत्तेः एवं वह्न्यभाववति धूमावयवादौ समवायादिना वर्तमानं धूमादिरूपमभावमादाय तदभावव्यापकताभङ्गभिया हेतुतावच्छेदकसम्बन्धेन सामानाधिकरण्यस्य निवेशनीयतया सत्तावान् जातेरित्यादौ सत्त्वाद्यभाववति सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या ऽव्याप्तिश्चेति तद्भिन्नान्योन्याभावप्रतियोगितानवच्छेदकत्वमेव साध्याभावव्यापकत्वं निर्धूमो वह्निशून्यत्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं धूमादिमद्भिन्नभेदप्रतियोगितावच्छेदकत्वेऽपि अखण्डस्य निर्वह्नित्वप्रकारकप्रमाविषयत्वाद्यभावस्य तादृशव्यापकतासम्भवात् तत्प्रतियोगितावच्छेदकावच्छिन्नस्य हेतुव्यापकतयैव लक्षणसमन्वयः तद्भिन्नत्वं दैशिकविशेषणतया ग्राह्यम् अतो वह्न्यभाववति धूमाद्यभाववद्भेदस्य कालिकसम्बन्धेन वृत्तावपि न क्षतिः अभावाभावस्य प्रतियोगिरूपत्वेऽप्यभाववद्भेदो ऽतिरिक्त एव अतो धूमाद्यभाववति अयोगोलकादौ दैशिकविशेषणतया वह्न्यभावाभाववद्भेदस्य वृत्तिरव्याहतैवेति न वह्न्यभावस्य धूमाद्यभावव्यापकतापत्तिः । अथवा यदीयदैशिकविशेषणतासम्बन्धसामान्ये तत्तत्साध्याभाववद्वृत्तिकत्वभिन्नत्वानुयोगिकत्वाभावस्तदन्यत्वमेव तदभावव्यापकत्वम् अभावस्येति भावभिन्नस्येत्यर्थकं तेन धूमवान् जलत्वाभावादित्यादौ जलत्वादिनिरूपितदैशिकविशेषणतायाः अप्रसिद्ध्या तत्र निरुक्तभेदकूटात्मकव्यापकतासत्त्वेऽपि नातिव्याप्तिः अभावरूपसद्धेतौ हेतुमत्त्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायैव लक्षणसमन्वयः धूमवान् वह्नेरित्यादावयोगोलकादावुत्पत्तिकालावच्छेदेन वर्तमानस्य वह्न्यभावस्य निरुक्तव्यापकतासत्त्वादतिव्याप्तिरतो व्याप्यवृत्तिरिति यद्यपि तादृशाभावा अपि ह्रदादौ व्याप्यवृत्तयस्तथापि व्याप्यवृत्तित्वविशिष्टस्य व्यापकत्वं विवक्षणीयम् अनवच्छिन्नविशेषणतासम्बन्धेन व्यापकतानिवेशलाभायैव वा तदुक्तम् अवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वं तु न शक्यते निवेशयितुं संयोगेन सद्धेतौ हेतुतावच्छेदकसम्बन्धेन हेत्वभावस्याव्याप्यत्वात् ।

प्रतियोगितावच्छेदकेत्यत्र प्रतियोगिता हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या अन्यथा व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य समनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नाभावरूपतया समानाधिकरणधर्मावच्छिन्नसाध्याभावासजातीयत्वेन तमादायातिव्याप्तिविरहेऽपि आत्मत्वादिसाध्यके विषयतया हेतौ ज्ञानादौ साध्याभावव्यापकसमवायसम्बन्धावच्छिन्नज्ञानाद्यभावमादायातिव्याप्तिः । अभावे हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वविशेषणं प्रवेश्य च नातिप्रसङ्गवारणसम्भवः समनियताभावैक्यमते समवायसम्बन्धावच्छिन्नज्ञानाद्यभावस्यापि स्वसमवायिविषयकत्वसम्बन्धेन ज्ञानादिविशिष्टज्ञानादेर्विषयतासम्बन्धावच्छिन्नाभावसमनियतत्वेन तादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वात् धूमाभावव्यापकमहानसीयवह्न्यभावप्रतियोगिनो वह्नित्वादिना वह्नित्वाद्यवच्छिन्नव्यापकत्वादतिप्रसङ्ग इति प्रतियोगिनो व्यापकतामुपेक्ष्य प्रतियोगितावच्छेदकस्य तदवच्छेदकत्वपर्यन्तानुधावनं द्रव्यं विशिष्टसत्त्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकाविशिष्टसत्त्वादेर्हेतुतावच्छेदकोपलक्षितहेतुव्यापकत्वासम्भवाद्ये प्रतीत्यनुक्त्वा यद्रूपावच्छिन्नं प्रतीत्युक्तं व्यापकता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या अतो महाकालभिन्नं कालत्वादित्यादौ साध्याभावव्यापकाभावप्रतियोगितावच्छेदकस्य साध्यतावच्छेदकादेः कालिकादिसम्बन्धेन हेतुव्यापकतायामवच्छेदकत्वेऽपि नातिप्रसङ्गः व्यापकतावच्छेदकताघटकसम्बन्धमेदनिवेशनादिकं स्वयमूह्यं न च धूमवान् वह्निमत्त्वप्रकारकप्रमाविषयत्वादित्यादावतिव्याप्तिः धूमाद्यभावव्यापकस्य धूमाद्यभावस्य प्रतियोगितावच्छेदकजलत्वादिवृत्तित्वविशिष्टधूमाभावाभावत्वादेर्हेतुतावच्छेदकस्वरूपसम्बन्धघटितहेतुव्यापकतायामवच्छेदकत्वादिति वाच्यं भाववृत्तिप्रतियोगितावच्छेदकस्य व्यापकतावच्छेदकताया विवक्षणीयत्वात् ।

गघ्याध्रुतामिश्रलक्षणं दूषयति साध्यस्येति । .

(दी०) साधनस्य तादृशाभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्येति तु न न्याय्यम् । द्रव्यं सत्त्वादित्यादौ

सत्त्वादेस्तादृशाभावव्यापकगुणकर्मान्यत्वविशिष्टसत्त्वात्वाद्यवच्छि-न्नप्रतियोगिताकतादृशाभावप्रतियोगित्वादतिव्याप्तेः । ज्ञेयं प्रमे-यादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्या-प्तेश्च प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः ।

(गा०) तादृशेति ये ये साध्याभावा प्रसिद्धाः तत्तत्सजातीय तत्तद्व्यापकेत्यर्थः । तदवच्छेदकत्व तादृशप्रतियोगितावच्छेदकत्वम् । आद्ये द्रव्यं सत्त्वादित्यादाविति द्वितीये ज्ञेय प्रमेयादित्यादाविति । ननु प्रमेयत्वादेः केवलान्वयितावच्छेदकत्वेऽपि वाच्यत्वत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेद कत्वमक्षतमेवेत्याशङ्कां निरस्यति प्रमेयत्वव्यधिकरणेति । प्रमेय-त्वस्य केवलान्वयित्वादिति भाव । धूमाद्यभाव प्रति विषयितास म्बन्धेन वह्नित्वाद्यवच्छिन्नस्य योऽभावस्तस्य व्यापकत्वात्तमादाय समवायेनात्मत्वे साध्ये समवायेन द्रव्यत्वे हेतौ आत्मत्वाभाव प्रति विषयितासम्बन्धेन द्रव्यत्वज्ञानस्य य समवायसम्बन्धा वच्छिन्नप्रतियोगिताकाभावस्तस्य व्यापकत्वात्तमादायातिप्रसङ्गवार णाय प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघटकसम्ब-न्धावच्छिन्नत्वस्यावश्य निवेशनीयतया व्यधिकरणसमवायादि-सम्बन्धेन प्रमेयत्वस्याभावप्रतियोगितायामसमानाधिकरणतया ऽवच्छेदकत्वसम्भवेऽपि न निस्तार इत्यवधेयम । अन्योन्या-भाव पर व्यधिकरणधर्मावच्छिन्नावच्छेदकताको न त्वत्यन्ता भाव इत्याशयेनेदम् अन्यथा घटत्वावच्छिन्नप्रमेयत्वावच्छिन्नप्रति योगिताकात्यन्ताभावमादाय लक्षणगमनसम्भवात् । एतदुपलक्षण गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वाद्यवच्छि न्नहेतुकाव्याप्तिरपि द्रष्टव्या । एतेन व्यापकीभूताभावप्रतियोगितायां हेतुतावच्छेदकानवच्छिन्नत्वव्यधिकरणधर्मानवच्छिन्नत्वोभयाभावावि वक्षणे प्रमेयहेतुकस्थले वाच्यत्वत्वादिना घटाद्यभावप्रतियोगितायां तादृशोभयाभावसत्त्वेन लक्षणसमन्वयेऽपि न निस्तारः उक्तस्थले हेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्ध्या ऽप्रतीकारात् ।

उक्तलक्षणे सजातीयादिपरित्यागेन लघुलक्षणमाह यद्वेति ।

(दी०) यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रतियोगितावच्छेदकेन धर्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः।

(गा०) *व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावादिकमादायाति*व्याप्तेर्वारणाय यावन्त इति। वह्निमान् धूमादित्यादौ महानसीयवह्नित्वावच्छिन्नाभावप्रतियोगितावच्छेदकस्य धूमत्वावच्छिन्नव्यापकतानवच्छेदकतयाऽव्याप्तिरिति तादृशा इति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः। अत्र व्याप्यवृत्तित्वविशेषणं प्रयोजनाभावादनुपादेयं साध्याभावसजातीयत्वादिविशेषणावच्छिन्नस्याभावान्तरस्य प्रक्रान्तत्वात्तादृशपदे तत्परत्वभ्रमस्य झटिति निरासायाभावा इत्येतन्मात्रमनभिधाय साध्याभावा इत्युक्तं यावत्साध्याभावानिरूपिता न काचिदपि प्रतियोगितेति प्रत्येकपदम्। अत्र च व्यभिचारिणं प्रत्यपि काचित्किञ्चित्सम्बन्धेन साध्यतावच्छेदकावच्छिन्नस्य व्यापकतया ऽतिप्रसङ्गस्य वारणाय प्रतियोगितावच्छेदकसम्बन्धेनैव व्यापकता निवेशनीया इत्थं च समवायसम्बन्धावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकसमवायादिसम्बन्धेन वह्नित्वाद्यवच्छिन्नस्य धूमाद्यव्यापकत्वादसम्भव इति *प्रतियोगितावच्छेदकसम्बन्धेनैव साध्यव्यापकता विवक्षणीया* तथा च केवलान्वयिसाध्यकस्थले व्यधिकरणसम्बन्धावच्छिन्नसाध्याभावमादाय निर्वाहो न भवतीति व्यधिकरणसम्बन्धावच्छिन्नाभावस्योपयोगिता बोध्या। धूमवान् वह्नेरित्यादौ धूमाद्यभावप्रतियोगितावच्छेदकजलादिवृत्तित्वविशिष्टधूमाभावाभावत्वेन वह्न्याद्यव्यापकत्वेऽपि नातिव्याप्तिः साध्यतावच्छेदकावच्छिन्ननिरूपितस्यावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकावच्छिन्ना यावत्यः प्रतियोगिताः प्रत्येकं *तदवच्छेदकरूपेण तदवच्छेदकसम्बन्धेन यद्रूपावच्छिन्नं प्रति* व्यापकत्वमित्येतादृशार्थस्यैव विवक्षणीयत्वात् साध्यव्यापकतावच्छेदकं यद्यद्रूपं तेन व्यापकत्वविवक्षणे व्यधिकरणधर्मावच्छिन्नाभावोपयोगिता न घटते इति साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकत्वेन व्यापकतावच्छेदकनिवेशः

यथासन्निवेशे न धैयर्थ्यं प्रतियोगितायोः स्वरूपसम्बन्धरूपत्वे वह्नित्वावच्छिन्नप्रतियोगितायाः यावत्साध्यव्यक्तिभेदेन भिन्नायाः धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वं न सम्भवतीति व्यापकतावच्छेदकावच्छिन्नप्रतियोगितायां व्यापकतावच्छेदकत्वं न निवेशितम् ।

कूटघटितलक्षणे व्यभिचारिणि साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताको न निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावः अपि तु जगद्वृत्तित्वसामान्याभाव एव स च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव वृत्तिमद्वृत्तिरित्यतिव्याप्तिवारणाय कूटपदमुपात्तं तादृशातिव्याप्तिः समानाधिकरणव्यधिकरणधर्मावच्छिन्नाभावसाधारणरूपेण साध्याभावस्य व्याप्यतावच्छेदककोटौ प्रवेशने एव प्रसज्यते न तु विशिष्टसाध्याभावनिवेशे तथा सति निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्यापि लक्षणघटकता निर्वाहादिति कूटपदमनुपादाय विशिष्य साध्याभावं निवेश्यैव लक्षणमुचितं तदुपादाने बहूनां दोषाणां वक्ष्यमाणत्वादिति कूटघटितलक्षणं बोद्धिनमाक्षिप्य कूटाघटितं तल्लक्षणं दर्शयन्ति परे त्वित्यादिना ।

(दी०) परे तु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः येन सम्बन्धेन हेतुता तेनैव वृत्तिमत्त्वमपि बोध्यं तेन व्यधिकरणधर्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः । साध्याभावश्च पूर्ववद्बोध्यः, तद्वद्वृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्मेणानवच्छिन्नप्रतियोगिताको बोध्यः तेनालोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य यत्नेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्तस्य धूमादौ स्वानिष्ठसाध्याभाववद्वृत्तित्व-

विरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्नसत्त्वेऽपि न क्षतिरित्याहुः ॥

(गा०) साध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादाय व्यभिचारिमात्रे ऽतिव्याप्तिरतो यावन्त इति। तथा च समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य यावत्तादृशाभावान्तर्गतस्य व्यभिचारिण्यसत्त्वान्नातिव्याप्तिः । वृत्तिमद्वृत्तित्वानुपादाने समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्यासंयुक्तादौ प्रसिद्धस्य हेतावसत्त्वात् संयोगादिसम्बन्धेन हेतावव्याप्तिः न त्वसम्भवः यादृशसम्बन्धप्रतियोगित्वं वस्तुमात्र एव तादात्म्यविषयतादिरूपतादृशसम्बन्धेन हेताविव पर लक्षणसमन्वयो भवति तादृशसम्बन्धेन जगत्सम्बद्धत्वस्य समानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेरिति तदुपादानम्। ननु वृत्तिमद्वृत्तित्वोपादानेऽपि जगत्संयुक्तत्वत्वावच्छिन्नाभावस्य जात्यादिरूपवृत्तिमति वर्तमानस्य वारणासम्भवात् वह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारैव निर्धूमसंयुक्तत्वाद्यभावस्य निर्धूमवृत्तित्वत्वाव्यापकप्रतियोगिताकतया वृत्तिमन्मात्रस्यैव कालादिनिर्धूमवृत्तित्वेन च निर्धूमवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वेन धूमवान् वह्नेरित्यादावतिव्याप्तेर्वारणाय हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्य निवेशनीयतया यत्र संयोगादिना हेतुत्वं तत्र जगत्संयुक्तत्वत्वावच्छिन्नाभावस्यापि हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकत्वात् वृत्तिमत्पदस्य यथाश्रुतार्थकत्वे कालिकसम्बन्धेन गगनादेरवृत्तित्वमते तेन सम्बन्धेन यत्र हेतुता तत्रैव परमव्याप्तिवारकता तेन सम्बन्धेन जगद्वृत्तित्वाभावस्यावृत्तिमात्रे प्रसिद्धत्वादित्यत आह येन सम्बन्धेनेति। न क्षतिरिति नाव्याप्तिरित्यर्थः । न तु नासम्भवः तादात्म्यकालिकादिसम्बन्धेन हेतौ लक्षणसमन्वयसम्भवादिति। ननु नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्य हेतावसत्त्वादव्याप्तिः कूटघटितलक्षण इव साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनि-

धेशे तार्णातार्णदहनोभयत्वावच्छिन्नाभावमादाय वह्न्यादिसाध्यके
गुणादिवृत्तित्वविशिष्टसत्ताभावमादाय च स
त्त्वादिसाध्यकेऽव्याप्तिर्दुर्वारैव एवमव्याप्यवृत्तिकपिसंयोगादिसा
ध्यक हेत्वधिकरणस्यैव जगत एव कपिसंयोगत्वावच्छिन्ना-
भाववत्तया तद्वद्वृत्तित्वव्यापकप्रतियोगिताकस्य व्यधिकरण
धर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेऽपि तादृश
कपिसंयोगाभावादिसाध्यकद्रव्यत्वादिहेतौ कपिसंयोगादिरूपसा
ध्याभाववद्वृत्तित्वाभावासत्त्वादव्याप्तिरित्यत आह साध्याभाव
श्चेति । पूर्ववदिति । मिश्रलक्षणे यथा साध्यतावच्छेदकावच्छिन्न
व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिरभावो
निवेश्यते तथा ऽत्रापि निवेशनीय इत्यर्थः । तत्तद्वह्नित्वकथितो
भयत्वावच्छिन्नप्रतियोगिताकाभावानां प्रथमविशेषणेन कपिसंयो
गादिरूपाणां च द्वितीयविशेषणेन व्यावृत्तिः । ननु साध्याभाव
वद्वृत्तित्वप्रतियोगिकाभावमात्रनिवेशे प्रकृतहेतुसाधारणस्य
व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषस्य समानाधि
करणधर्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्ति सम्भवतीति यावत्ताद
शाभावान्तर्गततद्वत्त्वस्य हेतावभावादसम्भव एव समानाधिकरण,
धर्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूतकि
ञ्चिद्धर्मावच्छिन्नस्याभावोऽपि यावत्तादृशाभावान्तर्गत इति तद्वत्त्व-
विरहादपि व्यतिरेकिसाध्यकहेतूनामव्यभिचारित्वानुपपत्तिः तत्त
त्साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावश्च विवक्षि
तुमशक्य केवलान्वयिनि साध्याभाववद्वृत्तित्वत्वेन घटाद्य
भावस्य तादृशगुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि
तस्यातथात्वमते व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्व
त्वस्य स्वघटकैकवद्वृत्तित्वत्वसमनियततया प्रतियोगितानवच्छे
दकत्वेन तदवच्छिन्नाभावाप्रसिद्धेर्दुर्वारत्वात् तत्तदभाववद्वृत्ति
त्वत्वघटकधर्मावच्छिन्नाभावानिवेशे च वह्नित्वावच्छिन्नवह्न्यभा
वव्यक्तेस्तदभावत्वावच्छिन्नाभावस्यापि तादृशतया तस्य च धू
मादावसत्त्वादव्याप्तिः साध्याभाववद्वृत्तित्ववृत्तितादृशधर्माव
च्छिन्नाभावानिवेशनेऽपि घटवृत्तित्वत्वाद्यवच्छिन्नसाध्यके ता
दात्म्येन घटत्वव्यापकादिहेतौ तादृशसाध्याभाववान् यो घ

त्वाभावादिस्तद्वृत्तित्वनिष्ठतादृशसाध्याभाववत्त्वरूपतथाविधधर्मावच्छिन्नाभावस्य घटादिमात्रवृत्तेर्हेतावसत्त्वादव्याप्तिर्दुर्वारैव साध्याभावादिव्यावृत्तघटकतानिवेशे च प्रयासगौरवमिति तत्तत्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकाभावं विवक्षति तद्वदिति। एवं प्रतियोगिता। अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि निर्धूमवृत्तित्वत्वावच्छिन्नाभावप्रतियोगितया व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारणसाध्याभाववद्वृत्तित्वत्वाव्यापकत्वेन तादृशाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगिताकस्य च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितया अतिव्याप्तिरिति तत्तद्व्यक्तित्वेनाभावस्य व्याप्यतावच्छेदककोटिनिवेशलाभाय तत्तादिति। यद्यपि यत्किञ्चित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकवृत्तिमद्वृत्तियावदभाववत्त्वं व्यभिचारिसाधारणं यावन्तः साध्याभावाः प्रत्येकं तत्तदधिकरणवृत्तित्वत्वसमनियतैकप्रतियोगितायाः नानाविपक्षसाधके ऽप्रसिद्धिः तत्तद्विपक्षावृत्तित्वावच्छिन्नाभाववत्तत्तद्विपक्षवृत्तित्वत्वव्याप्यप्रतियोगित्वाप्रसिद्धेः तथापि यावतामभावानां प्रत्येकाधिकरणवृत्तित्वत्वसामनैयत्यस्य प्रत्येकप्रतियोगितान्वयेन एतदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताको यो यो ऽभावस्तदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकश्च यो योऽभावस्तद्वत्त्वमित्येवं रीत्या निवेशान्नानुपपत्तिः एतल्लक्षणे साध्याभावसमुदायो न समुदायत्वेन प्रविष्टः अपि तु प्रातिस्विकरूपेणेति कूटघटिताद्विशेषः। अथात्र स्वपदं न तत्तदभावीयप्रतियोगितात्वरूपेण प्रतियोगितापरं साध्याभाववद्वृत्तित्वत्वातिरिक्तेऽपि तदभावीयप्रतियोगितान्तरसत्त्वादिति तत्तत्प्रतियोगिताव्यक्तिपरं तद्वाच्यं तथा च यत्किञ्चित्प्रतियोगितानिरूपकाशेषाभावस्यातिव्यापकतया यावत्यस्तादृशप्रतियोगिताः प्रत्येकं तन्निरूपकाभाववत्त्वं निवेशनीयं तथा च समानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रतियोगितानिरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्या ऽव्याप्तिरिति वृत्तिमद्वृत्त्यभावीयत्वेन यावत्प्रतियोगिता निवेशनीया तथा च तन्नि-

रूपकाभावे वृत्तिमद्वृत्तित्वविशेषणं व्यर्थं भावत्ववि-
शेषणमपि तथेति चेत् नोपादीयत एव तत्र तद्विशेषणं
वृत्तिमद्वृत्त्यभावीययावत्प्रतियोगिताविशेष्यीभूताभावे वृत्तिम-
द्वृत्तित्वयावत्त्वाभिधानात् । अत्र च गुरुधर्मस्याभावप्र-
तियोगितानवच्छेदकत्वे स्वव्यापकतदभाववद्वृत्तित्वत्वावच्छिन्नभेद-
प्रतियोगितावच्छेदकत्वस्याव्यावर्तकव्यापकतात्वविशेषणघटितत्वे-
नाभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नान्योन्याभावरू-
पव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेशः सम्भवतीति
तादृशावच्छेदकभेदकूटात्मकव्यापकत्वपुरस्कारेणैव तन्निवेशः न च
स्वव्यापकतत्तदभाववद्वृत्तित्वत्वकत्वत तदभाववद्वृत्तित्वनिष्ठान्यो-
न्याभावप्रतियोगितावच्छेदकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियो-
गितानिवेशासम्भवादवच्छेदकभेदकूटनिवेशनमफलमिति वाच्यं
घटभेदादिसाध्यकस्थले तदभावव्यक्तित्वेन घटत्वादिघटितस्य
तदभाववद्वृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य स्व-
रूपतो घटत्वादिघटितघटवृत्तित्वनिष्ठान्योन्याभावप्रतियोगितावच्छे-
दकत्वमपेक्ष्य गुरुशरीरतया प्रतियोगितानवच्छेदकत्वेन तदवच्छि-
न्नैकभेदनिवेशासम्भवात् । अत्र कल्पे व्यधिकरणधर्मावच्छिन्न-
साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्य पर्वतवृत्तित्वप-
र्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावस्य पर्वतावृत्तिवृत्तिमद्वृत्तेर्धूमा-
दावभावात् एकमात्रवृत्तित्वेऽपि तादृशप्रतियोगिताकस्य एतत्-
क्षणावच्छिन्नवृत्तित्वैतदन्यक्षणावच्छिन्नवृत्तित्वोभयत्वावच्छिन्नाभा-
वस्यैतत्क्षणावच्छिन्नावृत्तौ वृत्तिमति वर्तमानस्याभावादसम्भ-
वः । तादृशाभावस्यावर्तनाय व्यासज्यवृत्तिधर्मानवच्छिन्नप्रति-
योगिताकत्वनिवेशे गौरवं पर्वतवृत्तित्वसामान्याभावस्य व्याव-
र्त्यसम्भवश्चेत्यतः कल्पान्तरमनुसरति तत्तत्साध्याभावेति ।
अतिरिक्तान्तानिवेशे व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य संग्र-
हादव्यभिचारिमात्रे ऽतिव्याप्तिरिति तन्निवेशनं यद्यपि यथाश्रु-
तेनापि महानसवृत्तित्वत्वादिना व्यधिकरणधर्मावच्छिन्नाभाव-
वद्वृत्तित्वाभाववारणं न सम्भवति महानसादिनिरूपितत्वविशिष्ट-
वृत्तित्वत्वस्य साध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वकासा-
ध्याभाववद्वृत्तित्वस्यान्यत्वविरहात् तथापि साध्याभाववद्वृत्ति-

त्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यत्वशून्यत्वस्यानवच्छिन्नान्तेन विवक्षणाच्च दोषः महानसवृत्तित्वत्वादिनिरूपितावच्छेद्यत्वस्य साध्याभाववद्वृत्तित्वत्वरूपाविशिष्टपदार्थानिरूपितत्वात् न चैवमपि साध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यं तादृशधर्मनिरूपितावच्छेद्यतायां तद्घटकसाध्याभाववद्वृत्तित्वत्वानिरूपितत्वस्याधिकं त्वित्यादिन्यायेनाव्याहतत्वादिति वाच्यं गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया महानसादिवृत्तित्वत्वसमनियतोपदर्शितगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वात् । अथ गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावपदस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावपरतया धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमत्वावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वत्वस्य स्वसमनियतधूमत्वावच्छिन्नाभाववद्वृत्तित्वत्वापेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धेः धूमत्वावच्छिन्नाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च धूमत्वावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य निरुक्ताभावविशेषणानाक्रान्तत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात् । यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण न निवेशः अपि तु तदभावत्वेनैव एतदेव सूचयितुं तत्तत्पदमुपात्तम् एवं च तत्तद्व्यक्तित्वेन धूमाभावघटिततदभाववद्वृत्तित्वत्वावच्छिन्नाभावस्य लक्षणघटकतया न धूमादिसाध्यकेऽतिव्याप्तिरित्युच्यते तथापि एतद्व्यक्तिभिन्नं घटभिन्नं वा मेयत्वादित्यादावतिव्याप्तिः तत्र तद्व्यक्तित्वेन रूपेण घटभेदाभावघटिततद्व्यक्तिमद्वृत्तित्वत्वापेक्षया लघीयस्तत्समनियतस्य किञ्चिद्विशेषणानवच्छिन्नघटत्वघटितस्य घटवृत्तित्वत्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वावच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वत्वावच्छिन्नप्रतियोगितायाश्च साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षणघटकत्वासम्भवात् व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्यैव तथात्वात् यदि चाभावधर्मो विशेषणविध-

या न निवेश्यते अपि तु अभावप्रभृतिरेव अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमुपलक्षणतया निवेश्यते एतल्लाभायैव तत्तत्पदोपादानमपि न तु तत्तद्व्यक्तित्वेनाभावनिवेशलाभार्थम् उपलक्षणीभूतप्रतियोगिताविशेषेणैवाभावान्तरव्यावृत्तिसम्भवे तत्तद्व्यक्तित्वस्योपलक्षणतया निवेशे प्रयोजनविरहात् एवं च घटवृत्तित्वत्वावच्छिन्नाभावोऽपि उक्तस्थले लक्षणघटकः घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात् प्रतियोगिताविशेषोपलक्षिताभाववद्वृत्तित्वपर्याप्तनिरूपकताकान्यत्वपर्यन्तानिवेशात् धूमादिसाध्यकस्थले निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकशरीरे ऽभावविशेषणस्याधिकस्य निवेशेऽपि न क्षतिः न चाभावप्रतियोगिकोटौ उपलक्षणतया मानस्यानुभवविरुद्धत्वात् विशिष्टनिरूपितत्वाभावस्य निरूपितत्वसम्बन्धावच्छिन्नविशिष्टाभावरूपस्य वा विशिष्टनिरूपितत्वस्य प्रतियोगिकोटौ प्रतियोगिताविशेषस्य कथमुपलक्षणविधया निवेश इति वाच्यम् अभावप्रतियोगिप्रकारशरीरे प्रतियोगितावच्छेदककोट्यप्रविष्टस्य न मानमित्यस्यार्थः । प्रकृते निरुक्तप्रतियोगिताकत्वस्य निरूप्यत्वप्रतियोगिविशिष्टाघटकत्वादेव निरूप्यत्वप्रतियोगिन्युपलक्षणत्वं न तु निरूप्यत्वाभावप्रतियोगितावच्छेदकघटकतया अप्रवेशात् । तदभावप्रतियोगितावच्छेदकप्रविष्टाभावस्याभावान्तरव्यावृत्तये तादृशप्रतियोगिताकत्वस्य प्रतियोगितावच्छेदकघटकतयैव निवेशात् यथा द्रव्यत्वस्य द्रव्यत्वोपलक्षितनिरूपितविषयित्वाभावप्रतियोगिनि नोपलक्षणत्वं किन्तु विषयितानिरूपकांश एवेति । निर्धूमवृत्तित्वत्वस्य धूमव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तितात्वसमनियतत्वे ऽपि व्यापकतावच्छेदकधर्मान्तरावच्छिन्नाभावघटितविशिष्टनिरूप्यत्वे धूमत्वावच्छिन्नधूमाभावघटितविशिष्टनिरूपितत्वरूपताविरहात् तद्विशिष्टनिरूपितत्वयोर्न समनैयत्यम् इति न व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वघटितधर्मावच्छिन्नप्रतियोगिताकनिरूप्यत्वाभावाप्रसिद्धिः । प्रतियोगितासंसर्गकज्ञान एव तादृशमानस्य तथात्वात् जात्यवच्छिन्नप्रतियोगिताकोऽभाव इत्याकारकस्य स्वरूपतो घटत्वावच्छिन्नप्रतियोगिताकाभावमानस्य सर्वस-

ष्मतत्वात् प्रकृते च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको योऽभावस्तद्वद्वृत्तित्वत्वानिरूपितत्वप्रतियोगिकाभाववतः समानाधिकरणधर्मावच्छेद्यत्वस्य योऽभावस्तद्वत्प्रतियोगिताका यावन्तोऽभावास्तद्वान् हेतुरित्याकारकव्याप्तिग्रहे प्रतियोगिताया विशेषणत्वेनानुपपत्त्यभावात् अत एव व्यापकतावच्छेदकत्वादेः उपलक्षणविधया भानोपपत्तिः न च तादृशानिरूपितत्वप्रतियोगिकस्य तत्त्वावच्छिन्नप्रतियोगिताकस्य वाऽभावस्य निवेशे निर्धूमवृत्तित्वत्वावच्छिन्नाभावप्रतियोगितानिष्ठावच्छेद्यतायामपि किञ्चिद्विशिष्टतादृशानिरूपितत्वत्वावच्छिन्नाभावसत्त्वात् तादृशाभावासंग्रह इति वाच्यं तत्तदभाववद्वृत्तित्वत्वनिरूपितत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावस्यैव निवेशनीयत्वात् इत्युच्यते तदापि घटत्वमेदादिसाध्यके व्यभिचारिण्यतिव्याप्तिवारणमशक्यं निर्विशेषणकघटत्वादिवृत्तित्वत्वस्यैव तत्र घटत्वादिवृत्तित्वाभावप्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रतियोगितावच्छेदकशरीरे ऽनिवेशेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् न च जातेः समवायेनैव स्वरूपतोऽवच्छेदकत्वं न तु सम्बन्धान्तरेण अत एव गोत्वादिजातिनिष्ठव्याप्तौ पदविशेषप्रवृत्तिनिमित्तत्वगवेतरासमवेतत्वादेरवच्छेदकत्वं स्वीकुर्वन्ति न तु तादात्म्यसम्बन्धेन लघोरपि गोत्वादिजातेरिति निर्विशेषणकघटत्वादिघटिततद्वद्वृत्तित्वत्वस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवतीति वाच्यं तादृशनियमे मानाभावात् यदि चाभावांशस्योपलक्षणत्वं स्वीक्रियते तदा महानसवृत्तित्वत्वावच्छिन्नाभाववारणमशक्यमेव यदि च साध्याभावातिरिक्तविशेषणाविशेषिताधिकरणवृत्तित्वत्वावच्छेद्यताभिन्नसमानाधिकरणधर्मावच्छेद्यत्वाभावं निवेश्याविशेषितघटत्वादिवृत्तित्वाभावः संगृह्यते तदा तादृशाभावमादाय जातिसाधारणसद्धेतावव्याप्तिर्वज्रलेपायते। एवं साध्याभाववद्वृत्तित्वत्वशरीरेऽभावादेर्विशेषणतया प्रवेशो वृत्तिमद्वृत्तिपदमनर्थकमापद्येत व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य यः समानाधिकरणधर्मावच्छिन्नाभावः तत्प्रतियोगिताया लाघवेन वृत्तित्वत्वेनावच्छिन्नतया तदवच्छेद्यताया अभावाघटितविशिष्टपदार्थानिरूपितत्वात्। अत्र वदन्ति। गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमतेऽ

दमभिहित व्यधिकरणधर्मावच्छिन्नसाध्याभाववन्महानसवृत्तित्वत्वाव-च्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्वत्वपर्याप्तावच्छेदकता-भिन्नसमानाधिकरणधर्मानिष्ठावच्छेदकत्वानिरूपकत्वमेव प्रतियोगि-ताया विशेषणं देयं न चैवं घटत्वादिना साध्याभाववद्वृत्तित्वाभाव-सद्भहफलकं समानाधिकरणपदोपादानं निषेधरूपनिवेशनं च वि-फलं तादृशाभावस्यासद्भहपि केवलान्वयिसाध्यके साध्याभावव-द्वृत्तित्वत्वेन घटाभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यं विषयितादिसम्बन्धेन यत्र हेतुना तत्र हेतुनावच्छेदकस-म्बन्धेन साध्याभाववति वृत्ते साध्याभावबुद्धिविषयतारूपाया विषयादिरूपत्वेन साध्याभावबुद्धिविषयतात्वादिरूपसाध्याभाववद्वृत्ति-त्वत्वस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्धेः तादृशाभाव-घटितलक्षणानुपपत्तेः न च साध्याभावबुद्धिविषयतात्वादिकं येन सम्बन्धेनावृत्ति तेन सम्बन्धेन तदवच्छिन्नाभावमादाय लक्षणस-मन्वयः सम्भवतीति वाच्यं कालिकसम्बन्धेन साध्याभाववद्वृ-त्तित्वत्वावच्छिन्नस्य योऽभावस्तस्य घटसाद्यधिकरण-हेत्वव्यापकतया स्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकता-काभावस्यावश्यं निवेशनीयतया व्यधिकरणसम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकताकाभावस्य लक्षणघटकत्वासम्भवात् वि-षयताया जात्यादिरूपत्वेऽपि विषयतात्वविशिष्टस्य न समवा-यादिना वृत्तिः तादृशस्य स्वस्मिन्नवृत्तेः जात्यादौ च सम-वायाभावात् किं तु स्वरूपसम्बन्धेनैव एवं च समवायादिस-म्बन्धावच्छिन्नप्रतियोगिताकः एव विषयतात्वाद्यवच्छिन्नाभावो लक्षणघटको भविष्यतीत्यपि न कालज्ञानादिरूपहेतौ कालिकवि-षयतादिसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वत्वाव-च्छिन्नाभावस्यासत्त्वेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभा-वस्यैव विवक्षणीयत्वात्। न चैवं साध्याभाववद्वृत्तित्वत्वातिरि-क्तसमानाधिकरणधर्मानवच्छिन्नाभावस्यापि तत्राप्रसिद्धिः घट-त्वादेः साध्याभावबुद्धिविषयतानिष्ठप्रतियोगितायैयधिकरण्यासम्भ-वादिति वाच्यं घटत्वादिना घटाद्यभावस्यैव तथात्वात्। अ-थैवमपि सामानाधिकरण्यमुपेक्ष्य साध्याभाववद्वृत्तित्वनिष्ठत्वेन धर्मविशेषणताकस्य घटत्वादेः घटादिस्वरूपसाध्याभावबुद्धि

यतानिष्ठत्वेन गगनादेरपि स्वनिष्ठविषयतात्मकत्वेन साध्याभाववद्विषयतानिष्ठतया साध्याभाववद्वृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नाभावाप्रसिद्ध्या उक्तस्थले ऽव्याप्तिर्दुर्वारैव येन रूपेण यत्साध्याभाववद्वृत्तित्ववृत्ति तद्रूपविशिष्टतदनवच्छिन्नप्रतियोगिताकाभावविवक्षणे गगनाद्यवच्छिन्नाभावस्य लक्षणघटकतानिर्वाहेऽपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वव्यक्तेः किञ्चिद्विशेषितत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावस्य तथाविधस्य हेतावसत्त्वादसम्भव इति चेन्न । येन सम्बन्धेन यद्वर्तते तेन सम्बन्धेन तन्निष्ठावच्छेदकताकान्यत्वस्य विवक्षणीयतया संयोगादिसम्बन्धेन घटत्वावच्छिन्नप्रतियोगिताकाभावमादायैवोक्तस्थले लक्षणसमन्वयसम्भवात् उक्तार्थलाभायैव च साध्याभाववद्वृत्तित्ववृत्तित्वोपादानं न तु तदपि लक्षणघटकं प्रयोजनाभावात् सर्वत्र दर्शिताभावमादाय लक्षणसमन्वयसम्भवेन समवायादिसम्बन्धेन घटत्वावच्छिन्नसाध्याभाववत्संयुक्तत्वाद्यभावस्य लक्षणाघटकत्वेऽपि क्षतिविरहात् एतेन धूमत्वत्वाद्यवच्छिन्नधूमत्वाद्यभावस्य धूमत्वप्रकारकप्रमाविषयत्वाद्यभावस्य च साध्याभाववद्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य वारणाय साध्याभाववद्वृत्तित्वप्रतियोगिकत्वविशेषणमप्यनादेयम् अत एव स्वसमानाधिकरणत्वस्य स्वप्रतियोगितावच्छेदकाविशेषणत्वकल्पापेक्षया लाघवमेव एतत्कल्पानुसरणबीजभूतं निष्प्रत्यूहमिति। यदि च गुरुधर्मो नाभावप्रतियोगितावच्छेदकस्तदा महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणाय साध्याभाववद्वृत्तित्वत्वातिरिक्तेत्यनेन साध्याभाववद्वृत्तित्वत्वाघटकत्वमेव विवक्षणीयं तदर्थश्च स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तितात्वरूपविशिष्टनिरूपितविषयिताकत्वम् एवं च शुद्धवृत्तित्वत्वावच्छिन्नवृत्तेरभावोऽपि लक्षणघटक इति वृत्तिमद्वृत्तिपदसार्थक्यम्। स्वाविषयकत्वं च इतरविशेषणतानापन्नस्वविषयिताशून्यत्वमतो विशेषणविधया साध्याभाववद्वृत्तित्वत्वघटकसाध्याभावत्वादेस्तद्घटकत्वनिर्वाह इति पूर्वोक्तदोषानवकाशः । चरमापि विषयिता इतरविशेषणतानापन्ननिरूपितैव ग्राह्या तेन वृत्तित्वत्वादिविशेषणकज्ञाने साध्याभाववद्वृत्तित्वत्वादेर्विशेषणतया विषयत्वे

ऽपि वृत्तित्वत्वादेर्न साध्याभाववद्वृत्तित्वत्वाघटकत्वं न च साध्याभाववद्वृत्तित्वत्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताकोऽभावो निवेश्यतां घटकान्तरार्थश्च स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयिताकत्वं तेन साध्याभाववद्वृत्तितात्वकेवलवृत्तितात्वयोरेव घटकतानिर्वाहः न तु स्वाविषयकप्रतीत्यविषयतादशाविशिष्टकत्वं तत्तदभाववद्वृत्तित्वत्वाघटकप्रतीतौ केवलाधेयतात्वस्य विषयतया तदभाववन्निरूपितत्वविशिष्टाधेयतात्वे तदविषयकप्रतीत्यविषयत्वस्य दुर्घटतया तदभाववद्वृत्तित्वत्वादेस्तद्घटकत्वानिर्वाहात् केवलाधेयतात्वस्यैव तद्घटकतया वृत्तिमद्वृत्ति तेन रूपेण घटाधभावमादायातिव्याप्त्यापत्तेरिति वाच्यं तथा सति उक्तरीत्या विषयितासम्बन्धेन यत्र हेतुता तत्र तादृशाभावाप्रसिद्धेः घटत्वभिन्नं मेयत्वादित्यादौ निर्विशेषणकघटत्वादिवृत्तितात्वस्य यथा समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तितात्वघटकत्वं तथा वाच्यं ज्ञेयत्वादित्यादावपि तादृशस्य स्वाविषयकप्रतीत्यविषयव्यधिकरणधर्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वत्वरूपविशिष्टनिरूपितविषयताकतया तदभाववद्वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेनाव्याप्तेः तदभाववद्वृत्तित्वत्वाघटकधर्मावच्छिन्नाभावनिवेशेनैव वारणसम्भवाच्च । तादृशधर्मनिरुक्तसाध्याभाववद्वृत्तित्वत्वघटकत्वसत्त्वेऽपि स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्वर्त्यन्तरवृत्तित्वविषयिताकत्वेन साध्याभाववद्वृत्तित्वाघटकत्वस्यापि सत्त्वेन तदवच्छिन्नाभावस्यापि यथानिरुक्ताभावानात्मकत्वात् न च स्वाविषयकप्रतीत्यवृत्तितदभाववद्वृत्तित्वत्वनिरूपितविषयितासामान्यकत्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणकघटत्वादिवृत्तित्वत्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तद्घटकधर्मावच्छिन्नाभावनिवेशोऽपि सम्भवतीति वाच्यं तथा सति व्यापकताघटितसामान्यपदार्थनिवेशने तद्घटकधर्मानवच्छिन्नाभावनिवेशापेक्षयाऽतिगौरवात् समानाधिकरणपदसार्थक्यं तु उक्तरीत्यैवेति ध्येयम् । केचित्तु व्यधिकरणधर्मावच्छिन्नसाध्याभाव-

द्रवृत्तित्वत्वेन पर्वतवृत्तित्वघटान्यतराभाववारणाय एतन्मतेऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वत्वकत्वं प्रतियोगिताविशेषणमावश्यकं तथा च साध्याभाववद्वृत्तित्वत्वेन घटाभावस्य लक्षणघटकता न सम्भवतीति निषेधद्वयनिवेशनसामानाधिकरण्यपदोपादानयोः सार्थकतेत्याहुः। प्रतियोगितायां साध्याभाववद्वृत्तित्वत्वव्याप्यत्वनिवेशनप्रयोजनमाह आलोकाद्यवृत्तित्वेनेति। वह्निसामान्याभाववद्वृत्तित्वस्य योऽभावस्तस्य धूमादावसत्त्वेपीत्यन्वयः वह्निसामान्याभावः वह्नित्वावच्छिन्नवह्न्यभावः। साध्याभाववद्वृत्तित्वत्वव्यापकतानिवेशनप्रयोजनमाह यद्यपीति। इन्धनत्वाद्यवच्छिन्नेति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया घटाभावापेक्षणं महानसवृत्तित्वादेरभाव इत्यत्र महानसवृत्तित्वत्वादिनैवेति बोध्यं तादृशाभावाधिकरणमहानसवृत्तित्वत्वावच्छिन्नतादृशवृत्तित्वनिष्ठप्रतियोगिताकत्वं पञ्चम्यन्तार्थं इति तु न सत् गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेऽपि तादृशाभावाविशेषितमहानसवृत्तित्वत्वाद्यवच्छिन्नाभावपर्यन्तानुसरणे सन्दर्भविरोधात् अधिकरणत्वान्तस्योपलक्षणतया शेषांशस्य विशेषणतया मानस्य व्युत्पत्तिविरुद्धतया तथाविवक्षितुमशक्यत्वात्। अधिकरणविशेषानुपरक्तवृत्तेरभावमादायापि दोषं दर्शयति स्वनिष्ठेति। धूमादिनिष्ठसाध्याभाववद्वृत्तित्वव्यक्तेस्तद्व्यक्तित्वावच्छिन्नाभावस्येत्यर्थः। हेत्वन्तरवृत्तेः आलोकादिवृत्तेः। एतेन वृत्तिमद्वृत्तित्वमस्तीति सूचितम्। स्वस्मिन् धूमादौ। अत्र च लक्षणं सत्ताभाववान् द्रव्यत्वादित्यादौ सत्तायाः समवेतत्वाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्तित्वेऽपि द्रव्यावृत्तित्वावच्छिन्नाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तद्वत्समवेतत्वाभावस्य समवेतगुणत्वादिवृत्तितया द्रव्यत्वादेस्तद्वत्त्वाभावाभावान्नाव्याप्तिः। एवमवृत्तिसाध्यकस्थलेऽपि साध्यतावच्छेदकावच्छिन्नव्यापकताप्रसिद्ध्या नातिव्याप्तिः कूटघटितलक्षणे च तत्र तथातिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणं देयम्। एतादृशे [illegible]-

ऽतिव्याप्तिवारणाय वृत्तिमत्त्वमात्रमुपादेयं कृतघटितलक्षणद्वयेऽपि महाकालान्यो घटादित्यादावतिव्याप्तिर्द्रष्टव्या किं तु तदन्यदोषाणामेवानवकाश इत्यवधेयम् ॥

(दी०) अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववत्समुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वं तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तित्वत्वव्यापकप्रतियोगिताको बोध्यः प्रयोजनं चोक्तमायम् । साध्याभावाधिकरणवृत्तित्वत्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्यभिचारिण्यतिव्याप्तिरतः समुदायेति । साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन बोध्यः तेन समवायेन वह्नेः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्वतवह्न्यवयवसंयोगे च पर्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानाधिकरणत्वेऽपि नातिव्याप्तिः ।

(गा०) अन्ये त्विति । घटत्वादिना निर्धूमवृत्तित्वाद्यभावमादाय व्यभिचारिण्यतिव्याप्तिवारणाय यावत्त्वोपादानम् एवं च केवलान्वयिनि साध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य प्रसिद्ध्या तत्समुदायाधिकरणजगद्वृत्तित्वस्याप्रसिद्धौ प्रसिद्धसमानाधिकरणधर्मावच्छिन्नाभावोऽपि यावदन्तर्गत इति तद्वत्त्वविरहादादृशसाध्यके विषयितादिरिक्तसम्बन्धेन हेतावव्याप्तिः साधनसमानाधिकरणत्वेन साध्याभावविशेषणपक्षे च व्यतिरेकिसाध्यस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्य सद्धेतौ लक्षणघटकतया जगत एव तत्समुदायाधिकरणतया व्यतिरेकिसाध्यकेऽपि विषयितातिरिक्तसम्बन्धेन हेतावव्याप्तिरिति वृत्तिमद्वृत्तित्वाभावविशेषणं तादृशवृत्तित्वेति साध्याभावसमुदायाधिकरणवृत्तित्वेत्यर्थः । प्रयोजनं चेति पूर्वं दत्तप्रयोजनम् आलोकाद्यवृत्तित्वेन रूपेण निर्वह्निवृत्तित्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणरूपं पूर्वलक्षणोक्तमेव चरमस्य प्रयोजनं तु साधनसमानाधिकरणत्वस्य साध्याभावविशेष

णत्वे केवलान्वयिसाध्यके ज्ञेयत्वादिहेतौ घटादिवृत्तित्वाभाव-मादायाव्याप्तिवारणमेव न तु वह्निमान् धूमादित्यादौ महान-सवृत्तित्वाभावव्यावर्तनं तत्र महानसादेर्वह्नित्वावच्छिन्नवह्न्य-भावानधिकरणत्वेन साध्याभावकूटानधिकरणत्वात् एतस्य च प्रागनुक्तत्वादुक्तप्रायमिति । समुदायपदप्रयोजनमाह साध्या-भावाधिकरणेति । व्यधिकरणधर्मावच्छिन्नाभावस्यैवेति । नि-र्धूमवृत्तित्वत्वाद्यवच्छिन्ननिर्धूमवृत्तित्वाद्यभावस्य प्रतियोगिता-या व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमहानसादिवृ-त्तित्वावृत्तितया साध्याभावाधिकरणवृत्तित्वत्वाव्यापकत-या जगद्वृत्तित्वसामान्याभावस्यैव तद्व्यापकप्रतियोगिताक-तया तस्य च समानाधिकरणधर्मावच्छिन्नप्रतियोगिताक-स्यावृत्तावेव प्रसिद्धत्वादिति भावः । व्यभिचारिण्य-तिव्याप्तिरिति । तादृशस्य जगद्वृत्तित्वाभावस्य सर्वत्रैव सत्त्वा-दिति भावः । अत्र च स्वव्यापकसाध्याभावसमुदायाधिकरणवृ-त्तित्वत्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्या-पकत्वं प्रतियोगिताविशेषणं तत्र च शेषदले समुदायानिवेशे-पि निर्धूमवृत्तित्वत्वावच्छिन्नाभावस्य लक्षणाघटकत्वेऽपि नाति-व्याप्तिः सम्भवति व्यतिरेकिसाध्यके तादृशप्रतियोगिताया अप्रसिद्धेः जगद्वृत्तित्वसामान्याभावीयप्रतियोगितायाः साध्याभा-वाधिकरणवृत्तित्वत्वव्यापकत्वेऽपि स्वव्यापकसाध्याभावसमुदाया-धिकरणवृत्तित्वत्वकत्वरूपपूर्वदलविरहात् धूमाद्यभावसमुदाया-धिकरणवृत्तित्वत्वशून्ये महानसादिवृत्तित्वे तादृशप्रतियोगितास-त्त्वादिति पूर्वपक्षयित्वा शेषदले समुदायपदाप्रवेशे पूर्वदलमेव नोपादेयं तदनुपादानेऽपि वह्निमान् धूमादित्यादौ आलोकाद्यवृत्ति-त्वाद्यवच्छिन्नाभावप्रतियोगित्वस्य आलोकादिनिष्ठपर्वतादिवृत्ति-त्वसाधारणसाध्याभावाधिकरणवृत्तित्वत्वाव्यापकतया तादृशा-भावमादाय दोषाप्रसक्तेः तदुपादाने व्यतिरेकिसाध्यकमात्र एवोक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्ध्या ऽव्याप्तिप्रसङ्गाच्च तथा च धूमवान् वह्नेरित्यादौ घटत्वेन जगद्वृत्तित्वाभावमादायाति-व्याप्तिरित्याशयेन दीधितिकृतेदमभिहितम् । अतिव्याप्तिवारणाय शेषदले समुदायप्रवेशने च निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताक-

स्यालोकावृत्तित्वावच्छिन्नाभावस्य वह्निमान् धूमादित्यत्र शेषद्लाक्रान्ततया पूर्वदलोपादानमावश्यकं तत्र समुदायाप्रवेशे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्ववत्व्याप्यप्रतियोगिताकस्यालोकावृत्तित्वस्याभावस्य धूमे ऽसत्त्वादव्याप्तिरिति तत्रापि तत्प्रवेशनमिति केचित्समादधति । परे तु प्रतियोगित्वव्यापकताविशेष्यतापन्नमेव साध्याभावसमुदायाधिकरणवृत्तित्वत्वं व्यापकत्वविशेषणविधया निवेश्यते न तु तद्दलस्योक्तरीत्या द्विधा निवेशः एवं च पूर्वपक्ष एवायं नावतरति न च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमते प्रतियोगित्वव्यापकत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वं नाभावप्रतियोगितावच्छेदकमिति प्रतियोगित्वे तादृशावच्छेदकत्वत्वावच्छिन्नाभावरूपव्यापकतानिवेशासम्भवात्तद्दलस्य द्विधाविनिवेशनमावश्यकमिति वाच्यं व्यापकत्वांशस्योपलक्षणतया साध्याभावसमुदायाधिकरणवृत्तित्वत्वरूपव्याप्यांशे निवेशासम्भवात् व्यापकतावच्छेदकावच्छिन्नाभाववानित्यादिज्ञाने व्यापकतावच्छेदकत्वान्तस्येवोक्तावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाभावबुद्धौ व्यापकताया उपलक्षणतया भाने ऽविरोधात् । वस्तुतस्तु गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे साध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वत्वमपि नाभावप्रतियोगितावच्छेदकं वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वघटादिरूपसमनियतधर्मापेक्षया व्यधिकरणधर्मावच्छिन्नसाध्याभावेनाधिकेन घटितस्य गुरुत्वादिति तादृशधर्मावच्छिन्नाभावो निवेशयितुमशक्यः किं तु तादृशान्योन्याभावप्रतियोगितावच्छेदकं यद्यत्तत्तद्भेदकूटत्वमेव निवेशनीयम् एवं च प्रतियोगितान्व्यापकत्वघटितोक्तधर्मस्य प्रतियोगितानवच्छेदकत्वमप्याकिञ्चित्करमेवेत्याहुः । तेनेति समवायेन वह्नेः साध्यत्वे पर्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि धूमे नातिव्याप्तिः संयोगेन वह्नेस्तथात्वे वह्न्यवयवस्य तादृशाभावद्वयानधिकरणत्वेऽपि वह्न्यवयवे नातिव्याप्तिः समवायेन वह्नेः साध्यत्वे संयोगेन तस्य स-

यात्वे च पर्वतस्य वह्न्यवयवस्य च तादृशाभावद्वयानधिकरणत्वेऽपि पर्वतवह्न्यवयवसंयोगे नातिव्याप्तिरिति योजना सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयं संयोगसम्बन्धावच्छिन्नवह्न्यभावसमवायसम्बन्धावच्छिन्नवह्न्यभावद्वयं साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशने तादृशाभावद्वयानधिकरणस्य पर्वतादेः साध्याभावकूटानाधिकरणतया तत्कूटाधिकरणवृत्तित्वाभावा यावन्तस्तद्द्वयं धूमादावव्याहतमेवेत्यतिव्याप्तिः स्यादेवेति भावः। न च साध्यतावच्छेदकसम्बन्धावच्छिन्नाभावनिवेशेऽपि समवायेन वह्नौ साध्ये संयोगेन हेतौ धूमे नातिव्याप्तिर्वारयितुं शक्यते समवायसम्बन्धावच्छिन्नवह्न्यभावकूटाधिकरणसंयुक्तत्वस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव संयुक्तवृत्तित्वात् वह्न्यवयवमात्रसंयुक्ताप्रसिद्धेः संयुक्तमात्रस्यैव तादृशाभावकूटाधिकरणगगनसंयुक्तत्वादिति कथमत्र व्यावृत्तिप्रदर्शने समवायेन धूमहेतुकस्थलपरता तु न युज्यते समवायेन धूमवतः साध्याभावकूटवत्त्वानिराकरणादिति वाच्यं संयुक्तमात्रस्यैव गगनादिसंयुक्तत्वेऽपि तादृशसंयोगस्य वृत्त्यनियामकतया तथा यस्य द्रव्यस्य वह्न्यवयव एवाधिकरणत्वप्रत्ययः प्रामाणिकः न त्वन्यत्र तत्र संयोगेन गगनादिवृत्तित्वाप्रसिद्ध्या संयोगेन वह्न्यवयवान्यवृत्तित्वाभावस्यैव संयोगेन वृत्तिमद्वृत्तेः सुलभतया वृत्तिपदस्य यथाश्रुतपरतामते तादृशव्यावृत्तिदानसङ्गतेः वृत्त्यनियामकतादात्म्यसम्बन्धेन व्याप्तिस्वीकारे वृत्तिपदस्य सम्बन्ध्यर्थकत्वमावश्यकमित्यभिप्रायेण एतदुपेक्ष्य द्वितीयस्थलानुसरणं साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे समवायादिसम्बन्धावच्छिन्नवह्न्यभावस्य वह्न्यवयवत्वरूपसाधनसामानाधिकरण्याभावेन न तत्रातिव्याप्तिसंभवः एवं सत्ताभाववान् द्रव्यत्वादित्यादावतिव्याप्तिवारणाय साध्यसामानाधिकरण्ये सतीति विशेषणप्रवेशस्यावश्यकतया संयोगादिना वह्निमत्यवर्तमानवह्न्यवयवत्वादौ तेनाप्यतिव्याप्तिर्वारयितुं शक्यत इत्यतः पर्वतवह्न्यवयवसंयोगहेतुकानुसरणं संयोगेन द्रव्यस्याव्याप्यवृत्तितामते पर्वतस्य सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयाधिकरणत्वेऽपि न तस्य व्याप्यवृत्तित्वविशिष्टसाध्याभावकूटवत्त्वम् अन्यथा अव्याप्यवृत्तिसंयोगादिसाध्यके

व्यभिचारिणि गगन एव साध्याभावकूटाधिकरणत्वेनातिव्याप्तिरिति दर्शितहेतौ पर्वतवृत्तित्वेऽपि तादृशाभावकूटाधिकरणवृत्तित्वाभावो ऽक्षत एवेत्यतिव्याप्तिप्रसङ्गः ।

पूर्ववदत्र साध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावविवक्षणे नानाविपक्षके तथाविधतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्या ऽव्याप्तिः साध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावनिवेशने च गौरवमिति साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकाभाव एव विवक्षितुमुचितः तार्णातार्णदहनवृत्तिद्वित्वावच्छिन्नप्रतियोगिताकानां तथाविधसाध्याभावानामधिकरणे धूमादेर्वृत्तावपि वह्नित्वाद्यवच्छिन्नद्वयाभावघटिततादृशाभावकूटवत्यवृत्तेरव्याप्त्यनवकाशादित्याशयेन तथाविधमेवाभावं निवेशयति तथेति ।

(दी०) तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि बोध्यस्तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नाभावकूटाधिकरणमप्रसिद्धं तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्या अव्याप्तिरित्याहुः ॥

(गा०) एवं प्रतियोगिना समनियताभावैक्यमते साध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेऽपि साध्यतावच्छेदकेन व्यधिकरणेन वा धर्मेणावच्छिन्नायाः साध्यमात्रवृत्तिप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यमक्षतमेव । अथ घटत्वावच्छिन्नघटत्वनिष्ठप्रतियोगिता घटत्वावच्छिन्नवद्वृत्त्यादिवृत्तियोगित्वान्न भिद्यते किन्तु घटादिभिन्नयावद्वस्तुवृत्तिरेकैव स्वीक्रियते न तु वाच्यत्वादिमात्रवृत्तिस्तथा सति घटत्वेन प्रमेयत्वं नास्तीति प्रतीतिविषयप्रतियोगितान्तरकल्पने गौरवादिति तादृशप्रतियोगिताया न वाच्यत्वत्वादिरूप

साध्यतावच्छेदकसमनैयत्यमिति चेत् का क्षति वाच्यत्वाभिन्न त्वेन वाच्यत्व नास्तीत्यादिप्रतीतिविषयमभावमादायैव तत्र ल क्षणसमन्वयसम्भवात् स्वव्यधिकरणवाच्यत्वभिन्नत्वावच्छिन्नाया प्रतियोगिताया वाच्यत्वभिन्नवृत्तित्वस्यासम्भावितत्वात्। वस्तुतस्तु घटत्वावच्छिन्नवाच्यत्वाभावप्रतियोगिताया व्यधिकरणघटत्वा देरिव समानाधिकरणवाच्यत्वत्वादेरपि अवच्छेदकत्वमावश्यक घटत्वेन वाच्यत्व नास्तीतिप्रतीत्या वाच्यत्वत्वादे प्रतियोगिता वच्छेदकत्वानवगाहने तादृशप्रतीतेवाच्यत्वत्वविशिष्टवैशिष्ट्यान- वगाहित्वेन तत्र वाच्यत्वत्वादिप्रकारकज्ञानानपेक्षापत्त एव च घट त्वेन प्रमेयत्व नास्तीत्यादिप्रतीतिविषयप्रतियोगिताया अतिरि- क्तत्वमावश्यकमवच्छेदकभेदादिति घटत्वेन वाच्यत्व नास्तीतिप्र तियोगिता वाच्यत्वादावेव वर्तते न त्वन्यत्रापि मानाभावादिति घटत्वादिना वाच्यत्वाभावोऽपि लक्षणघटक । अथैव साध्यताव च्छेदकरूपावच्छिन्नाभावघटितलक्षणे वह्नित्वावच्छिन्नसाध्यक स्थल वह्नित्वादिना घटाद्यभावो लक्षणघटको न स्यात् व्यापकताव च्छेदकवह्नित्वादिपर्याप्तप्रतियोगितावच्छेदकताकत्वविरहात् महान- सीयवह्नित्वाद्यवच्छिन्नाभाववारणायावच्छेदकतापर्याप्तिविवक्षणस्या वश्यकत्वादिति चेन्न व्यापकतावच्छेदकपर्याप्तत्व हि व्यापकतानव च्छेदकापर्याप्तत्व व्यापकतानवच्छेदकावृत्तित्व तच्चेन्धनत्वाद्यवच्छि न्नवह्न्यभावप्रतियोगितावच्छेदकतायामक्षतमिति तादृशाभावमादा यैव लक्षणसमन्वयसम्भव इति अत एव यच्चेन्धनत्वाव च्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभाव इति दीधि तिग्रन्थ सङ्गच्छते अन्यथा इन्धनत्वादिना घटाद्यभावोपेक्षाया निर्बीजत्वमापद्येत एव च सार्वभौमाणामेतल्लक्षणाभिप्रायकतया समवायितया वाच्यत्वाभावो घट एव प्रसिद्ध इति मूलग्र न्थोपवर्णनमपि सङ्गच्छते । अथ पर्याप्तिसम्बन्धेनोभयत्वादिक यत्र साध्यतावच्छेदक तत्र प्रतियोगिताया अव्यासज्यवृत्तित्वेन तत्पर्याप्त्यधिकरणप्रत्येकव्यक्तौ पर्याप्तिसम्बन्धेनोभयत्वादेरत्यन्ता भावस्य तदवच्छिन्नभेदस्य च सत्त्वात्तस्य प्रतियोगिताव्याप कत्व न सम्भवति न चाव्याप्यवृत्तिसयोगादेयत्र साध्यता वच्छेदकता तत्र प्रतियोगिताव्यापकत्वनिर्वाहाय प्रतियोग्यसा

मानाधिकरण्य व्यापकताघटकाभावे निवेशनीये तावता उभयत्वस्यापि व्यापकत्वं निर्वहति पर्याप्तिसम्बन्धेनोभयत्वपर्याप्त्यधिकरणस्य प्रत्येकानतिरिक्ततया प्रत्येकवृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वात् इति वाच्यं पृथिवीत्वघटत्वोभयत्वादिना यत्र साध्यता तत्र जातित्वाद्यवच्छिन्नाभावप्रतियोगितासमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियोग्यधिकरणावृत्तित्वविरहेण तादृशप्रतियोगिताव्यापकतापत्त्या तादृशाभावमादाय तदवच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतावतिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैवाभावे निवेशनीयतया उभयत्वाभावव्यावर्तनासम्भवात् तदभाववतः प्रत्येकं तदनधिकरणत्वात् तस्यैव तदधिकरणताया अपि व्यासज्यवृत्तित्वादिति चेन्न सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षे प्रतियोगिसामानाधिकरण्याभावविशिष्टाभावत्वाघटितव्यापकताया एव निवेशसम्भवात् पृथिवीत्वाद्युक्तोभयत्ववति पृथिवीत्वाद्यवच्छेदेन तदभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि जलत्वादेस्तत्सामानाधिकरण्याभावविशिष्टतदभाववत्त्वेनातिप्रसङ्गाभावात् उभयत्वाद्यभावस्य तदभाववत्येकस्मिन्नपि तत्सामानाधिकरण्याभावानभ्युपगमात् तत्सामानाधिकरण्यावच्छेदकस्य प्रत्येकानतिरिक्तत्वात् । अथवा यन्निरूपितसाध्यतावच्छेदकताघटकसम्बन्धसामान्ये प्रतियोग्यधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावस्तदन्यत्वमेव प्रतियोगिताव्यापकत्वम् उभयत्वनिरूपितपर्याप्तौ तु न प्रत्येकानुयोगिकत्वाभावः तदनुयोगिनः प्रत्येकानतिरिक्तत्वादिति । यत्तु प्राचीनमते रूपादिसामान्याभावस्य रूपवद्ध्वंसत्वप्रागभावत्रितयप्रतियोगिकतया रूपध्वंसादिसाध्यकरूपादिहेतावतिव्याप्तिः रूपादिसामान्याभावीयरूपध्वंसत्वावच्छिन्नप्रतियोगिताया साध्यतावच्छेदकसमनियतत्वेन तद्घटिताभावकूटाधिकरणे रूपादेरवृत्तेः न च रूपस्यापि रूपध्वंसाभावरूपतया तद्घटितस्य रूपसामान्याभावघटितकूटस्यापि यावतामेकाधिकरण्यमिति विवक्षया लक्षणघटकत्वादिति तत्र जलपरमाण्वादौ रूपध्वंसत्वाद्यवच्छिन्नाभावबुद्धिनिर्वाहाय अन्यत्वाद्यवच्छिन्नाभावे रूपध्वंसत्वावच्छिन्नप्रतियोगिताकत्वस्यावश्य-

कतया तत एव रूपादिसामान्याभाववत्यपि तत्प्रतीतिनिर्वाहात् रूपादिसामान्याभावस्य रूपध्वंसादिप्रतियोगिकत्वानभ्युपगमात् साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे तेनाप्युक्तस्थले रूपादिसामान्याभावव्यावर्तनात् स्वनिरूपकाभाववत्त्वसम्बन्धेन साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्वमेव निवेश्य लक्षणस्य परिष्करणीयतया रूपादिसामान्याभावानधिकरणस्यापि जलपरमाण्वादेरुक्तस्थले तत्कूटाधिकरणत्वेनातिव्याप्तेरनवकाशाच्च प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते नानाव्यक्तिसाध्यकस्थले साध्यतावच्छेदकसमनैयत्यस्य प्रत्येकप्रतियोगितायामसत्त्वेऽपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यस्य विवक्षणान्न दोषः तत्तद्वह्नितत्तद्धूमादिस्वरूपप्रतियोगितानामपि स्वावच्छेदकवह्नित्वधूमत्वावच्छिन्नतदभावीयप्रतियोगितात्वेन वह्नित्वधूमत्वादिसमनैयत्यात् वह्नित्वाद्यवच्छिन्नवह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्नाभावीयवह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदकद्रव्यत्वाद्यवच्छिन्नप्रतियोगितात्मकतया घटादावपि सत्त्वात् न तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितात्वेन वह्नित्वादिसमनैयत्यमिति तदभावीयत्वं विशेषणं तथा सति वह्नित्वाद्यवच्छिन्नाभावीयप्रतियोगितायाः घटादावसत्त्वान्नानुपपत्तिः । यद्यप्येवमपि वाच्यत्वत्वादिसमनियतप्रतियोगित्वाप्रसिद्धिर्दुर्वारैव व्यधिकरणधर्मावच्छिन्नाभावानामभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्वभिन्नत्वावच्छिन्नाभावीयप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां पटादावपि सत्त्वात् यत्किञ्चिदेकधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्यघटकव्याप्यत्वविवक्षणे च पृथिवीत्वाभावादिसाध्यकस्थले घटावृत्तित्वावच्छिन्नाभाववारणमशक्यं तदभावीयपृथिवीत्वाभावादिप्रतियोगितानां पृथिवीत्वाभावत्वाद्यवच्छिन्नाभावीयप्रतियोगितात्मकतया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वाभावत्वादिसमनैयत्यात् । तथापि यद्धर्मावच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं तादृशधर्मावच्छिन्नतदभावीयप्रतियोगिताकत्वेन व्याप्यत्वनिवेशान्न दोषः पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगिता-

त्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वं न तु घटावृत्तित्वा- वच्छिन्नाभावानिरूपितत्वमिति । यद्यपि पूर्वदलाप्रवेशे वह्न्यादि- साध्यके धूमादिहेतौ साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यता- वच्छेदकव्यापकप्रतियोगिताकतत्तदभावावृत्तित्वावच्छिन्नाभावकूटा- धिकरणत्वस्य गुणादौ प्रसिद्धत्वेऽपि तत्र हेतुतावच्छेदकस- म्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिसम्भव तथापि साध्याभावकूट- वति तादृशवृत्तेरप्रसिद्ध्या ऽव्याप्तिस्तदनिवेशेऽपि सत्तावान् जा- तेरित्यादौ वक्ष्यत इति स्थलान्तरे कूटाधिकरणाप्रसिद्ध्या ऽव्या- प्तिवारणरूपं तत्प्रयोजनमाह यत्र पृथिवीत्वाभावादाविति । तत्रादि पक्षेति । घटपटादिरूपेत्यर्थः । तत्र सद्धेताविति तत्र साध्ये य- सद्धेतुर्जलत्वादिस्तत्रेत्यर्थः । नाव्याप्तिरित्यनेनान्वय यावतामे- काधिकरण्यं सम्भवति तावदभावसमुदायाधिकरणविवक्षाया तद्दोषासम्भवेन स्थलान्तरे व्याप्तिमाह पृथिवीत्वादाविति । द्रव्यत्वाद' समवायेन हेतुत्वे जातित्वाद्यवच्छिन्नाभावघटितकू- टाधिकरणे समवायेन वृत्तेरप्रसिद्ध्या ऽतिव्याप्तेरनवकाशात् स्व- रूपसम्बन्धेन हेतुत्वानुसरणं साधनसमानाधिकरणत्वस्य सा- ध्याभावविशेषणतापक्षे जातित्वाद्यवच्छिन्नाभावस्य साधनस- मानाधिकरणतया वारणसम्भवेऽपि प्रत्येकं साधनसमानाधिकर- णजलावृत्तित्वतेजोवृत्तित्वाद्यवच्छिन्नसमवायसम्बन्धावच्छिन्नाभा- वकूटाधिकरणताया सामान्यादावेव सत्त्वादतिव्याप्तिर्दुर्वारैवेति ध्येयम् । द्वितीयदलप्रयोजनमाह नापीति । घटत्वादिना साध्य- ताया घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धिरत उक्तम भावत्वादिनेति । आदिपदात्प्रमेयत्वपरिग्रहः तत्तत्साध्येति घट- त्वाभावादिरूपसाध्यस्य च साध्यतावच्छेदकव्याप्यप्रतियोगिताको घटत्वपटत्वादिरूपो ऽभावस्तत्समुदायाधिकरणाप्रसिद्धेरित्यर्थः या- वतामैकाधिकरण्यं सम्भवतीति विवक्षायामपि तादृशाभावसमुदा- यवति घटादौ हेतोर्वृत्तेरव्याप्तिरेव न च यावतामभावानामै- काधिकरण्यसम्भवस्तादृशाभावकूटाधिकरणं यद्यत्तावदन्यतमवृ- त्तित्वव्यापकसमनियतप्रतियोगिताकोऽभावो विवक्षणीय घटवृत्तित्व- त्वावच्छिन्नाभावस्यापदर्शितस्थले न तथा अगत एव तावद- न्यतमान्तर्गतत्वात् अपि तु घटत्वादिना जगद्वृत्तित्वसामान्या

भाव एव वृत्तिमद्वृत्तिस्तथाविधाभावः तावदधिकरणान्यतमत्वं च तत्तदधिकरणावृत्तिशून्यत्वं न तु तत्तदधिकरणान्यान्यत्वमतो नाप्रसिद्धिरिति वाच्यम् एवमपि जातिप्रतियोगिकाभाववान् प्रमेयत्वादित्यादौ जातिमतामेव प्रत्येकघटत्वपटत्वघटिततादृशतादृशकूटाधिकरणतया जातिमद्वृत्तित्वत्वावच्छिन्नाभावस्यापि तादृशतया ऽव्याप्तेर्दुर्वारत्वादिति । अत्र साध्याभाववत्तायां सम्बन्धविशेषानिवेशे कालपरिमाणवान् प्रमेयत्वादित्यादावतिव्याप्तिः कालस्यापि कालिकसम्बन्धेन कालपरिमाणाभावाधिकरणतया जगत एव साध्याभावकूटवत्त्वात् दैशिकविशेषणतासम्बन्धनिवेशे च घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः घटत्वादेस्तेन सम्बन्धेनावृत्तेः तेन सम्बन्धेन तद्घटितकूटाधिकरणाप्रसिद्धेः तेन सम्बन्धेन वृत्तिमत्त्वस्याभावविशेषणत्वे च घटत्वाभावसाध्यके व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिश्च घटातिरिक्तवस्तुमात्रस्यैव दैशिकविशेषणतया साध्याभावकूटवत्त्वात् साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनिवेशेऽप्ययमेव दोषः किञ्चिद्विशिष्टतादृशसाध्यस्य योऽभावस्तस्य दैशिकविशेषणतासम्बन्धावच्छिन्नाभावस्तद्रूप इति दैशिकविशेषणताया अपि निरुक्तसाध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात् स्वनिष्ठतादृशप्रतियोगितावच्छेदकसम्बन्धेन स्वाधिकरणत्वनिवेशे च व्यधिकरणधर्मावच्छिन्नाभावस्य साध्याप्रतियोगिकतया तदसंग्रहप्रसङ्ग इति साध्यतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताज्ञानं प्रति यत्सम्बन्धावगाहितदभाववत्ताज्ञानं प्रतिबन्धकं तेन सम्बन्धेन तदभावाधिकरणत्वं विवक्षणीयं व्यधिकरणधर्मावच्छिन्नाभाववत्ताबुद्धिरपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिं प्रतिबध्नातीति तादृशाभावस्य लक्षणघटकत्वनिर्वाहः यदि चाभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वावच्छिन्नप्रकारकं ज्ञानं प्रतिबन्धकम् । अभावाभावस्यातिरिक्ततामते तादृशज्ञानप्रतिबन्धकताया आवश्यकत्वात् तस्य प्रतियोगिस्वरूपतामतेऽपि फलसाम्यानुरोधेन तदावश्यकत्वात् अभावाभावस्यातिरिक्तताग्रहदशायां तत्प्र-

तिबन्धकताया दुरपह्नवत्वाच्च एव च कालिकसम्बन्धावच्छिन्नप्रतियोगिताके घटत्वाभावजातित्वादेरभावे साध्ये आत्मत्वजातित्वादावव्याप्तिर्दुर्वारैव दैशिकविशेषणतासम्बन्धस्यापि निरुक्तरूपाक्रान्तत्वात् न चैव तादृशसाध्यवत्यपि पक्षे तादृशसाध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबन्धकज्ञानसम्भवात् तद्विपयस्य हेत्वाभासतापत्तिरिति वाच्यं तत्र पक्षे साध्यं नास्तीतिज्ञानस्य भ्रमत्वे निर्विवादमिति तदुपपादनाय तादृशसाध्यप्रतियोगिनस्तादृशसाध्याभावत्वेन दैशिकविशेषणतया वृत्त्यनभ्युपगमादित्युच्यते तदा निरुक्तसम्बन्धेन साध्याभावत्वावच्छिन्नाधिकरणताकूटवत्त्वमेव विलक्षणीयं हेतुमति तादृशाधिकरणताविरहान्नोक्ताव्याप्ति । परे तु घटत्वादेरपि दैशिकविशेषणतास्वीकार आवश्यकः अन्यथा घटे न घटत्वाभाव इत्यादिनञुल्लेख्यप्रतीतिव्यवहारयोरनुपपत्तिः काले न द्रव्यत्वमित्यादिप्रयोगाभावाद्दैशिकविशेषणतासंसर्गावच्छिन्नाधेयतान्वितस्वार्थावगाहिबोधजनकत्वस्यैव नञ्पदे व्युत्पन्नत्वात् न च भावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा दैशिकविशेषणता अभावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञा च प्रतियोगिभूताभावप्रतियोगितावच्छेदकसम्बन्धः प्रत्याय्यत इति व्युत्पत्तिरिति वाच्यं प्रतियोगितावच्छेदकसम्बन्धत्वेन सम्बन्धबोधोपगमे सर्वेषामेवाभावानां दैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकं किञ्चिद्विशिष्टस्याभावस्य योऽभावस्तद्रूपतया तादृशसम्बन्धश्च प्रतियोगितावच्छेदक इत्यतिप्रसङ्गात् । विशिष्य समवायकालिकसम्बन्धभानस्यैवोपगन्तव्यतया प्रतियोगिन्यभावे सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वबोधकादयमभावो नास्तीत्यादितत्सम्बन्धानवच्छिन्नाधेयताप्रतीतौ नियामकाभावात् समभिव्याहारविशेषनिरपेक्षस्य तात्पर्यस्य नियामकत्वे कालिकादिसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वाभावस्यात्मत्वरूपो योऽभावस्तस्य समवायादिसंसर्गेनात्मन्यात्मनि अयमभावो नास्तीति प्रत्ययप्रसङ्गात् । वास्तवतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपप्रतियोगिवाचकपदसमभिव्याहारस्य तत्सम्बन्धावच्छिन्नाधेयताभाननियामकत्वे वस्तुतः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकेऽस्मि

भ्रभावे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसंशयदशायाम् अ-त्रायमभावो नास्तीत्यादिवाक्यादधिकरणे एतदभाधाभावप्रतीतावपि अधिकरणे कालिकसम्बन्धेनाभाववत्त्वादिसंशयस्य सर्वानुभवसिद्धस्योच्छेदापत्तेः। अथैवं कालादावपि कालिकसम्बन्धावच्छिन्नघटत्वाभावो नास्तीतिप्रतीत्यनुरोधेन घटत्वादेर्दैशिकविशेषणतास्वीकारस्यावश्यकतया तत्र समवायावच्छिन्नघटत्वाभावो नास्तीतिव्यवहारापत्तिरिति चेन्न प्रतियोगिमति तद्भावत्वेन वृत्तेरनभ्युपगमात् इत्थं च दैशिकविशेषणतासम्बन्धेन साध्याभावत्वावच्छिन्नवत्त्वं लक्षणे निवेशनीयं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावाभावयावात्मत्वादित्यादौ घटत्वाभावस्य तादृशसाध्याभावत्वेनात्मन्यवृत्तेर्नाव्याप्तिः । एतेन यादृशसाध्यकस्थले साध्याधिकरणे साध्याभावस्य तदधिकरणे च साध्यस्य न भ्रमः प्रसिद्धस्तत्र प्रतिवध्यप्रतिबन्धकभावकल्पनाया असम्भवेन प्रतिबन्धकताघटितलक्षणस्याव्याप्तिरिति निरस्तमिति वदन्ति ।

(दी०) तत्र द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादिरवृत्तेरतिव्याप्तेः । अपि चेदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तेः। द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् । किञ्च रूपाभावसाध्यक सद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः । यावतामभावानामेकाधिकरण्यं तावतां समुदाये विवक्षितेऽपीदं पृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वाद्रूपवदन्यत्वाद्वेत्यादावतिव्याप्तिः तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति तद्धेतोरवृत्तेः । वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहसमानाधिकरणत्वात् समानाधिकरणयावदभावाधिकरणाप्रसिद्धिर्दुर्वारैव ।

(गा०) तदुभयेति द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नप्रतियोगिताया अपि तदुभयत्वसमनियततया तादृशाभाववतो गुणादेरेव निरुक्तसाध्याभावकूटाधिकरणत्वादिति भावः । प्रतियोगिवैयधिकरण्याघटितसमव्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमुपगम्य तदुभयत्ववति प्रत्येकमुभयत्वाभावसत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणे तु तद्रूपावच्छिन्नसाध्यकसद्धेतावव्याप्तिर्दुष्ट्या व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकसजातीयो यो धर्मस्तदवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वोपगमे नैतादृशातिव्याप्त्यवकाश इत्यतः स्थलान्तरे ऽतिव्याप्तिमाह अपि चेति । द्रव्यत्वत्वाद्यवच्छिन्नेति शुद्धद्रव्यत्वत्वाद्यवच्छिन्नेत्यर्थः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वस्य समव्याप्तत्वादिति किञ्चिद्विशेषणावच्छिन्नस्य शुद्धविशेष्यानतिरिक्तत्वादिति भावः । विशिष्टस्यातिरिक्तत्वेन साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वस्थाने प्रतियोगित्वावच्छिन्नव्यापकतावच्छेदकत्वनिवेशेन वा विशिष्टद्रव्यत्वादिसाध्यकस्थले शुद्धद्रव्यत्वाद्यभावस्य वारणसम्भवाद्दूषणान्तरमाह किञ्चेति । रूपाभावेति रूपत्वावच्छिन्नाभावेत्यर्थः। सद्धेताविरयव्याप्तिसूचनाय । सकलरूपव्यत्त्यधिकरणाप्रसिद्धेरिति तथा च तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरिति भावः । यावतामिति तथा च प्रकृते सकलरूपघटितसमुदायस्य न लक्षणघटकता सकलरूपाणामेकाधिकरण्यविरहात् । किं तु एकैकरूपव्यधिकरणधर्मावच्छिन्नाभावघटितकूटानामेव प्रत्येकं तदधिकरणता च रूपवत्त्वेव प्रसिद्धेति नाव्याप्त्यवकाश इति भावः । इदमिति वायौ पृथिवीवृत्तिद्वित्वसंयोगादिसत्त्वाद्वायुत्वादेरुक्तसाध्यव्यभिचारिता गुणसामान्याभावस्य साध्यत्वे वायवीयस्पर्शादिरूपे साध्याभावः तद्घटितनिरुक्ताभावकूटवद्वृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावभावान्नातिव्याप्तिसम्भव इति पृथिवीवृत्तीति घटतद्वायुद्वित्वघटतद्वायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावानां यावतामेकाधिकरण्यसम्भवेन तद्घटितकूटस्यापि लक्षणघटकतया त इति वायौ हेतोर्वृत्त्या नातिव्याप्तिसम्भवः । न च द्वित्वादिरूपसाध्याभावस्य उत्पत्तिकाले ऽसत्त्वेन कालिकाव्याप्यवृत्तितया

व्याप्यवृत्तित्वविशेषणेन तद्व्यावृत्तिः पार्थिवपरमाण्वेकत्वादिरेव लक्षणघटक इत्यतिव्याप्तिर्दुर्वारैवेति वाच्यं प्राचीनमते द्वित्वादिमति तत्प्रागभावादिकालावच्छेदेन तदत्यन्ताभावासत्त्वात् द्वित्वादेरपि व्याप्यवृत्तित्वादिति । पृथिवीपदमेतत्पृथिवीपरम् इदंपदपृथिवीपदयोः कर्मधारयो वाभिप्रेतः न च स्वसमानाधिकरणाभावाप्रतियोगित्वमनवच्छिन्नवृत्तिकत्वं वा व्याप्यवृत्तित्वं न तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं तच्च न द्वित्वादिसाधारणमिति पृथिवीपदस्य पृथिवीसामान्यपरत्वेऽपि न क्षतिरिति वाच्यम् । एतदतिव्याप्तिवारणानुरोधेनात्यन्ताभावघटितव्याप्यवृत्तित्वस्यैव निवेशयितुमुचितत्वात् एतद्रूपात्यन्ताभाववान् मेयत्वादित्यादावेतद्रूपात्मकाभावस्य लक्षणाघटकत्वेनातिव्याप्त्यापत्तेः प्राचीनमते ऽत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्यावश्यकत्वाच्च । अत एवाग्रेतनरूपादिघटितत्वेनेत्यपि साधु सङ्गच्छते। पार्थिवरूपमात्रस्यैवानित्यतया ऽत्यन्ताभावघटितव्याप्यवृत्तित्वानिवेशे तस्य व्याप्यवृत्तित्वाभावेन तदसङ्गत्यापत्तेः पृथिवीवृत्तीत्यत्र वृत्तिः समवायेन बोध्या तेन वायवीयस्पर्शादिः कालिकसम्बन्धेन पृथिवीवृत्तित्वेऽपि न क्षतिः पृथिवीसमवेतत्वावच्छिन्नाभावो गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे ऽप्रसिद्धः पृथिवीसमवेतत्वावच्छिन्नत्वेनाभिमतायां प्रतियोगितायां केवलसमवेतत्वस्यैवावच्छेदकत्वसम्भवेन पृथिवीसमवेतत्वस्याभावप्रतियोगितानवच्छेदकत्वात् न च पृथिवीसमवेतत्वावच्छिन्नाया जलत्वादिव्यावृत्तप्रतियोगितायाः अतिप्रसक्ते समवेतत्वे नावच्छेदकत्वसम्भव इति वाच्यं समवेतत्वावच्छिन्नप्रतियोगितातो ऽतिरिक्तायाः जलत्वादिव्यावृत्तप्रतियोगितायाः अप्रसिद्धेः गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वेऽपि पृथिवीसमवेतत्वावच्छिन्नाभावसाध्यके नातिव्याप्तिसम्भवः तादृशाभावस्य समवेतत्वावच्छिन्नाभावसमनियततया तदभिन्नत्वेन समवेतमात्रस्यैव तदभावतया वायुत्वादेरपि तथात्वात् न च पृथिवीसमवेतत्वविशिष्टाभाववति जलादौ समवेतत्वावच्छिन्नाभावविरहान्न तयोः समनैयत्यम् एवं च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि पृथिवीसमवेतत्वस्य तादृशाधि-

शिष्टाभावप्रतियोगितावच्छेदकत्वसाधकस्य समवेतत्वविशिष्टवति जलादौ तत्सत्त्वेन तन्मात्रस्य तत्प्रतियोगितावच्छेदकत्वासम्भवादिति वाच्यं विशिष्टाभावस्य साध्यत्वे तस्य वायुसाधारणतया सद्धेतुत्वप्रसङ्गेन पृथिवीसमवेतत्वोपलक्षिताभावस्यैव साध्यतायां उपगन्तव्यत्वादिति गुणपदोपादाने पृथिवीसमवेतगुणत्वावच्छिन्नाभावो गुणादिसाधारणत्वात् समवेतत्वावच्छिन्नाभावसमनियत इति नोक्तदोषावसरः ध्वंसप्रागभावानवच्छिन्ने सामान्याभावमुपगच्छता वाय्वादेरप्युत्पत्तिकालावच्छेदेन पृथिवीवृत्तिगुणसामान्याभाववत्त्वात् उक्तसाध्यस्य वायुत्वादि सद्धेतुरेवेत्यतो नातिव्याप्तिसम्भव इत्यत साध्यान्तरमाह सत्तान्यवेति । सत्तान्यत्वनिवेशप्रयोजनं पूर्ववत् वायुत्वादेरपि सत्तान्यसमवेताभावाभाववत्त्वात् पृथिवीति । अत्र पृथिवीपदं पृथिवीसामान्यपरमेव घटत्वाद्युद्धिलादेः स्वसमानाधिकरणसत्ताभावप्रतियोगित्वेन व्याप्यवृत्तित्वविशेषणव्यावृत्तत्वात् रूपादिघटितत्वेनात्र रूपवद्वोपादानं प्राचीनमताभिप्रायेणोपन्यस्तम् । पूर्वसाध्यमभिप्रेत्य हेतौ साध्यसामानाधिकरण्यविशेषणेन वायुत्वे नातिव्याप्तिरतो द्वितीयहेत्वनुसरणम् । ननु समनियताभावैक्यमते सत्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावस्य सत्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नतया विभुसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावस्य विभुसमवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावाभिन्नतया वायुत्वादेरपि तदभाव इति न तादृशाभावसाध्यकेऽतिव्याप्तिः सम्भवतीति पूर्वोक्तरूपाभावनान् वायुत्वादित्यत्रायमिरत्वेव विवक्षायां दुर्वारतामाह वस्तुत इति । अत्रायमाशयः । यावतामेकाधिकरण्यं तावत्समुदायाधिकरणत्वमित्यस्य यत्किञ्चिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वं यत्किञ्चिदधिकरणवृत्तिसाध्याभावव्यापकाधेयताकत्वपर्यवसितमर्थं साध्याभावाधिकरणाधिकरणकसकलसाध्याभावाधिकरणत्वं साध्याभावसमानाधिकरणसाध्याभावव्यापकाधेयताकत्वपर्यवसितं वा आद्ये व्यभिचारिमात्रेऽतिव्याप्तिः जगत एव साध्यवत्किञ्चिदधिकरणावृत्तिसकलसाध्याभाववत्त्वादिति समुदायोपादानस्याकिञ्चित्करतया तद्विवक्षणासम्भवः द्वितीये च साध्याभावसमानाधिकरणसाध्याभावत्व

मुक्तस्थले निखिलरूपाणामेवाक्षतमिति तादृशसाध्याभावत्वव्यापिका न केनाप्यधिकरणेन निरूपिताधेयतेति तादृशाधिकरणाप्रसिद्धिस्तदवस्थैवेति। ननु स्ववृत्तिसाध्याभावत्वव्यापकं यद्यदधिकरणवृत्तित्वं तत्तदधिकरणवृत्तिसाध्याभावत्वव्यापकस्ववृत्तिताकाधिकरणमेवाधिकरणान्तार्थः धूमवान् वह्नेरित्यादौ महानसादिकं न तथा अयोगोलकवृत्तितायास्तद्वृत्तिसाध्याभावत्वव्यापकत्वात् अयोगोलकादिवृत्तिसाध्याभावत्वस्य च समानाधिकरणधर्मावच्छिन्नसाध्याभावसाधारणतया तद्वृत्तित्वाव्याप्यत्वादिस्त्वयोगोलकाद्येव तादृशं स्वमिति नातिव्याप्तिः तादृशयत्किञ्चिदधिकरणह्रदादिवृत्तित्वाभावस्य वह्न्यादौ सत्त्वेऽपि न क्षतिः तादृशं यद्यत्स्वं तावदन्यतमवृत्तित्वत्वसमनियतप्रतियोगिताकाभावस्य निवेशात् अन्यतमत्वं च तत्तद्वृत्तिशून्यत्वं न तु तत्तदन्यान्यत्वम् अतो न केवलान्वयिसाध्यके अप्रसिद्धिरिति तादृशं स्वं यद्यत्तदधिकरणवृत्तित्वाभावकूटवत्त्वनिवेशेऽपि केवलान्वयिसाध्यके अव्याप्तिः हेतुमतोऽपि तथात्वादिति तदुपेक्षितं रूपसामान्याभाववान् वायुत्वादित्यादौ च सकलरूपवतामेव तथात्वं स्ववृत्तितायाः तत्तद्घटादिवृत्तिसाध्याभावत्वव्यापकत्वादतो नाव्याप्तिः। अथवा स्ववृत्तिसकलसाध्याभावसमानाधिकरणसाध्याभावत्वावच्छेदेन यदधिकरणवृत्तित्वं तादृशाधिकरणवृत्तिसकलसाध्याभाववत्त्वमेव यावतामित्यादेरर्थः धूमवान् वह्नेरित्यादौ च यत्किञ्चिदधिकरणं न साध्यवत् तद्वृत्तिसकलसाध्याभावसमानाधिकरणस्य साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तदवृत्तित्वात्। किन्तु अयोगोलकाद्येवेति जगतोऽ तथात्वान्नातिव्याप्तिः रूपाभाववान् वायुत्वादित्यादौ च तादृशाधिकरणं तद्घटादिरेव व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिसकलसाध्याभावसमानाधिकरणत्वात्तस्य च तद्वृत्तित्वनियमान्नाव्याप्त्यवसरः शेषं पूर्ववत्। अथवा व्यासज्यवृत्तिसाध्याभावमात्रवृत्तिधर्मावच्छिन्नाधिकरणत्वमेव साध्याभावकूटाधिकरणत्वं जगत एव साध्याभावत्वावच्छिन्नाधिकरणतया व्यभिचारिण्यतिव्याप्तिवारणाय व्यासज्यवृत्तित्वं धर्मविशेषणं तथा सत्यपि जगत एव व्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तितथाविधधर्मावच्छिन्नाधिक-

रणत्वात् स एव दोष इति आधेयतानवच्छेदकतादृशधर्मन्यूनवृत्ति सद्याप्य यद्यसदन्यत्वेन धर्मो विशेषणीय न्यूनवृत्तित्वञ्च स्वसमानाधिकरणाभावप्रतियोगित्वमात्रम् उक्तस्थले तद्रूपव्यधिकरणधर्मावच्छिन्नसाध्याभावोभयत्वादिरेव तादृशो धर्मस्तस्य रूपान्तरसाधारणमित्यादिन्यूनवृत्तित्वेऽपि तादृशमित्वाद्यवच्छिन्नस्य क्वचिदप्यवृत्तेः । तस्याधेयतानवच्छेदकतया आधेयतानवच्छेदकीभूततादृशधर्मन्यूनवृत्तित्वाविरहात् न च समनियताभावैक्ये व्यधिकरणधर्मावच्छिन्नसाध्याभावमात्रवृत्तित्वाप्रसिद्ध्या केवलान्वयिसाध्यकेऽव्याप्तिरिति वाच्यं तथा सति व्याप्यवृत्तित्वस्थलेऽव्याप्यवृत्त्यनेकवृत्तिधर्मभिन्नत्वस्य निवेशनीयत्वात् केवलान्वयिसाध्यके साध्याभावत्वस्यैव तथात्वादित्यतो दोषान्तरदानाय हेतुतावच्छेदकसम्बन्धं निवेशयति किञ्चेति ।

(दी०) किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्याभाववति वृत्तिस्तदभावो वक्तव्यः अन्यथा धूमादावव्याप्तिः साध्यतावच्छेदकसम्बन्धेन साध्याभाववति कालादौ वृत्तिमन्मात्रस्यैव वृत्तेर्व्यभिचारिण्यतिप्रसङ्गो वा तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः साध्याभाववति तेन सम्बन्धेन वृत्तेरप्रसिद्धेः साधनसमानाधिकरणत्वेन साध्याभावो विशेषणीय इति चेद्विशेष्यन्ताम् तथापि भूतत्वमूर्तत्वाद्योरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिः तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः। किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतावतिव्याप्तिः तादृशसाध्याभावसमुदायवति महाकाले तेन सम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः ।

(गा०) धूमादावव्याप्तिरिति वह्निमन्मात्रसमवेतघटादौ वर्तमानस्य निर्वह्निसमवेतत्वाभावस्य नभस्यसत्त्वादिति भावः ।

एतच्च यत्किञ्चित्सम्बन्धावच्छिन्नताद्दशवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशाभिप्रायेण अन्यथा निर्वह्निसंयुक्तत्वादिसाधारणताद्दशवृत्तित्वत्वं प्रति तथाविधाभावप्रतियोगिताया अव्यापकत्वात् तस्य लक्षणाघटकतया वृत्तिमन्मात्रस्यैव साध्याभावाधिकरणकालादौ वृत्तेर्निर्वह्निवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वाद्व्याप्त्यसङ्गतेः अत एव सम्बन्धमनिवेश्य ताद्दशाधिकरणवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशपक्षे दूषणान्तरमाह साध्यतावच्छेदकसम्बन्धेनेति । एतच्च कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य कालादावसत्त्वेऽपि तस्य यथाविवक्षितसाध्याभावसमुदायवत्त्वमक्षतमेवेति सूचनाय । कालादावित्यादिपदाद्विषयितादिसम्बन्धेन वस्तुमात्रसम्बन्धिन ईश्वरज्ञानादेः परिग्रहः । व्यभिचारिणीति यत्साध्यके वृत्तिमन्मात्राधिकरणस्य कालादौ विवक्षितसाध्याभावकूटवत्त्वं तादृशव्यभिचारिहेतावित्यर्थः द्रव्यत्वसाधनके द्रव्यत्वपृथिवीत्वान्यतराभावशुद्धद्रव्यत्वाभावयोर्वायुत्वादिहेतुके रूपाद्यात्मकसाध्याभावस्य सत्त्वादिसाध्यके संयोगेन समवायेन वा यत्र हेतुता तत्र सत्तात्वावच्छिन्नाभावस्य च साधनवदवृत्तित्वात् साधनसमानाधिकरणत्वेन साध्याभावे विशेषिते न ताद्दशाभावानादायोक्तस्थलेष्वव्याप्त्यतिव्याप्तिप्रसङ्ग इत्याशङ्कते साधनेति । सङ्केतौ व्यधिकरणधर्मावच्छिन्नाभावानामेव साधनसमानाधिकरणतया ताद्दशाभावकूटाधिकरणं जगदेव व्यभिचारिणि च साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि तथात्वात्ताद्दशाभावकूटाधिकरणं निःसाध्यमेव साधनसामानाधिकरण्योपलक्षिताभावाधिकरणत्वमेव निवेश्यं न तु तद्विशिष्टाधिकरणत्वं तेन व्यतिरेकिणि हेतौ तद्विशिष्टाधिकरणवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमद्वृत्तित्वसम्भवेऽपि नाव्याप्तिः साधनसमानाधिकरणत्वं साधनतावच्छेदकसम्बन्धेन साधनतावच्छेदकविशिष्टवद्वृत्तित्वं तेन द्रव्यत्वादेः कालिकसम्बन्धेनाधिकरणस्पन्दादौ सत्ताधिकरणे गुणादौ च द्रव्यत्वपृथिवीत्वान्यतरत्वावच्छिन्नाभावस्य सत्त्वेऽपि द्रव्यत्वपृथिवीत्वोभयादिसाध्यके द्रव्यवृत्तित्वविशिष्टसत्त्वादौ नातिव्याप्तिः न च

सत्ताया साध्याभावकूटवद्गुणादिवृत्तित्वसत्त्वात् विशिष्टसत्त्वे तदभावस्य दुर्लभतया नापदर्शितसाध्यके विशिष्टसत्त्वेऽतिव्याप्तिप्रसक्तिरिति वाच्यं साधनतावच्छेदकावच्छिन्नवत्त्वानिवेशे द्रव्यत्वादिसाध्यके विशिष्टसत्त्वेऽव्याप्तिवारणाय साधनतावच्छेदकसाध्याभावकूटवद्वृत्तितावच्छेदकत्वाभावपर्यन्तनिवेशस्यावश्यकतया उक्तस्थले ऽतिव्याप्तिप्रसक्तेः संयोगे साध्ये संयोगेन घटादिहेतौ संयोगत्वावच्छिन्नसंयोगाभावस्य उत्पत्तिकालावच्छेदेन साधनवति वृत्तेर्व्याप्यवृत्तित्वविशिष्टस्याधिकरणे गुणादौ संयोगेन वृत्तेरप्रसिद्ध्या ऽव्याप्तिः संयोगि सत्त्वादित्यादौ जगत एव संयोगाभाववत्त्वेनातिव्याप्तेर्वारणाय व्याप्यवृत्तित्वविशिष्टाभाववत्तानिवेशनस्यावश्यकत्वादित्यतो ऽनवच्छिन्नत्वं वृत्तिरत्र प्रवेश्या । अथ साधनसमानाधिकरणत्वेन साध्याभावे विशेषितेऽपि सत्तावान् जातेरित्यादावव्याप्तिवारणमशक्यमेव प्रत्येकं साधनसमानाधिकरणयोः द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटिताभावसमुदायस्य सामान्यादावेव सत्त्वात्तत्र च हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेः । यत्तु द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्ता च न निवेश्यते द्रव्यत्वादिवैशिष्ट्यमात्रस्यैव तत्प्रतियोगितावच्छेदकत्वसम्भवादिति द्रव्यत्वादिसाधारणद्रव्यत्वादिवैशिष्ट्यावच्छिन्नतत्प्रतियोगितायाः सत्तात्वसमनैयत्याविरहान्न तादृशाभावस्य लक्षणघटकतेति समाधानं तदपि तुच्छं द्रव्यत्वविशिष्टसत्तावान् जातेरित्यादावपि ईदृशयुक्त्या साध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्याभावप्रतियोगितानवच्छेदकत्वात् द्रव्यत्वादिवैशिष्ट्यावच्छिन्नाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावात् व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तेर्दुर्वारतया एतल्लक्षणवादिना गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वमवश्यावलम्बनीयत्वात् द्रव्यत्वविशिष्टसत्तात्वाद प्रतियोगितानवच्छेदकत्वेऽपि समवेतवान् जातेरित्यादौ समवायेनैतद्रूपान्यत्वविशिष्टाभावतद्रूपान्यत्वविशिष्टाभावादीनां समवेतत्वसमनियतप्रतियोगिताकतया प्रत्येकं साधनसमानाधिकरणतया च तद्घटितकूटाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिवारणास-

म्भवात् । एवं विशिष्टस्यातिरिक्ततामतावलम्बने दर्शितविशिष्टाभावानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वविरहोपपादनेन समाधानमपि हेयम् उक्तस्थल एव द्रव्यत्वतदन्यसमवेतोभयगुणत्वतदन्यसमवेतोभयकर्मत्वतदन्यसमवेतोभयाभावानां साध्यतावच्छेदकसमवेतत्वसमनियतप्रतियोगिताकानां प्रत्येकं साधनसमानाधिकरणानां समुदायवति सामान्यादौ समवायेन वृत्तेरप्रसिद्ध्याऽव्याप्तेस्तावतापि वारणासम्भवात् न च यादृशाभावसमुदायाधिकरणं साधनाधिकरणं तादृशसमुदायाधिकरणवृत्तित्वाभावस्य विवक्षितत्वात् उक्ताभावसमुदायाधिकरणतायाः साधनवत्यसम्भवात् न तत्समुदायस्य लक्षणघटकतेति नाप्रसिद्धिरिति वाच्यम् एवं सत्यपि तादृशविशिष्टाभावाद्येकतरघटितव्यधिकरणधर्मावच्छिन्नाभावस्तोमस्य तादृशस्याधिकरणे केषाञ्चिद्वृत्तिमतामवृत्तेः साधनस्य च वृत्तेरव्याप्तितादवस्थ्यात् एतादृशविवक्षानुसरणे भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यत्र भूतत्वमूर्तत्वोभयघटितसाध्याभावकूटवति हेतोरवृत्तितया वक्ष्यमाणातिव्याप्तेरसम्भवप्रसङ्गाच्च साधनवता निःस्पर्शस्य कस्य चिदपि तादृशोभयघटितस्तोमाधिकरणत्वविरहेण तादृशस्तोमस्य लक्षणाघटकत्वात् प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणवैयर्थ्यापत्तेश्च पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलावृत्तित्वतेजोऽवृत्तित्वाद्यवच्छिन्नाभावघटितकूटस्य क्वचिदपि साधनवत्यसत्त्वेन तादृशकूटस्य लक्षणाघटकत्वात् यादृशकूटवत्त्वं साधनवतः तद्वदवृत्तित्वाभावस्य साधने ऽसम्भावितत्वादित्यतिव्याप्त्यनवकाशादिति चेत् । अत्राहुः । साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वेन साध्याभावविशेषणादुपदर्शितविशिष्टाभावनिरासः गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावस्य संग्रहायावच्छिन्नान्तं वृत्तिनिरवच्छिन्ना ग्राह्या अन्यथा संयोगी सत्त्वादित्यादौ संयोगत्वाद्यवच्छिन्नसंयोगाद्यभावस्य साध्यवद्वृत्तितया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकतया ऽतिव्याप्त्यापत्तेः सद्धेतौ साधनसमानाधिकरणस्य साध्यवदवृत्त्यन्यस्याप्रसिद्धेः समाना-

धिकरणधर्मावच्छिन्नेति । तथा च व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव विशिष्टभेदप्रसिद्धिः न चैवं साध्यतावच्छेदकव्यापकत्वं प्रतियोगितावशेषणं व्यर्थम् अभाववान् मेयत्वादित्यादौ घटत्वादिरूपाभावस्य उक्तविशेषणेनैव वारणादिति वाच्यं प्रमेयसाध्यकस्थले घटत्वपटत्वोभयावच्छिन्नप्रमेयसामान्याभावस्य गगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नस्य संग्रहाय साध्यतावच्छेदकव्यापकत्वेन समानाधिकरणधर्मस्यावश्यं निवेशनीयतया घटत्वपटत्वादिरूपाभावप्रतियोगितावच्छेदकघटत्वाभावत्वादेश्चाभावत्वाव्यापकत्वेन घटत्वादौ विशिष्टभेदस्याक्षतत्वात् एतद्विशेषणेन तद्व्यावृत्तेः । न च वाच्यत्वादिसाध्यकस्थले घटत्वावच्छिन्नवाच्यत्वाभावस्य संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नवाच्यत्वाभावाभिन्नतया साध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमक्षतमिति तत्संग्रहाय समानाधिकरणसम्बन्धावच्छिन्नत्वस्य समानाधिकरणधर्मावच्छिन्नाभावप्रतियोगित्वविशेषणताया आवश्यकत्वात् प्रमेयसाध्यकस्थलीयोक्ताभावस्य व्यधिकरणसम्बन्धावच्छिन्नगगनाद्यभावाभिन्नत्वेऽपि प्रतियोगितावच्छेदकधर्मे साध्यतावच्छेदकव्यापकत्वविशेषणमन्तरेणैव विशिष्टभिन्नत्वमव्याहतमिति वाच्यम् एवमपि गगनत्वादिना प्रमेयसामान्याभावस्य समानाधिकरणतादृशसम्बन्धावच्छिन्नप्रतियोगिताकत्वोक्ताभावस्य तद्भिन्नत्वेन तत्र विशिष्टभेदनिर्वाहाय तादृशविशेषणस्यावश्यकत्वात् समानाधिकरणसम्बन्धावच्छिन्नत्वविशेषणं परित्यज्य साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं प्रतियोगितायां निवेश्य तत्कार्यस्य साध्यतावच्छेदकव्यापकत्वरूपप्रतियोगितावच्छेदकविशेषणसार्थकत्वस्य चोपपादनसम्भवाच्च साध्यवद्वृत्तितादृशाभावश्चोभयत्वादिना साध्याभाव एव प्रसिद्ध इति न काप्यनुपपत्तिः । एतेन नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वादित्यादौ साधनसमानाधिकरणं पटीयं नीलरूपं न घटे इति तादृशनीलरूपघटत्वात्मकसाध्याभावकूटाधिकरणाप्रसिद्ध्या ऽव्याप्तिरित्यपि निरस्तं तादृशाभावे उक्तभेदासत्त्वेन व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् । एवं घटवृत्तित्वविशिष्टाकाशाभावाभावे साध्ये

मेयत्वादिहेतौ साध्याभावस्य विशिष्टाकाशाभावादेराकाशाभावानतिरिक्ततया जगत एव साध्याभावकूटाधिकरणतापत्त्या ऽतिव्याप्तिरिति साध्याभावत्वविशिष्टाधिकरणत्वमेव विवक्षणीयं तथा च पटे घटवृत्तित्वविशिष्टाकाशाभावाभावो नास्तीतिप्रत्ययाभावात् पटादेर्न तादृशविशिष्टाभावाधिकरणत्वमिति न दोषः। एवं च साधनाधिकरणेऽपि साध्याभावत्वेन वृत्तिर्विवक्षणीया अन्यथा जातिमदन्यत्वविशिष्टाकाशाभावस्याभावे साध्ये समवायेन हेतौ साधनसमानाधिकरणाकाशाभावस्य साध्याभावत्वविशिष्टस्याधिकरणे सामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वादव्याप्त्यापत्तेस्तादृशविवक्षयापि उक्ताभयाभावसाध्यकस्थले ऽव्याप्तिवारणं सम्भवति प्रत्येकाधिकरणे उभयाभावाभावत्वेनावृत्तेः। वस्तुतो घटवृत्तित्वविशिष्टाकाशाभावाद्यभावो घटत्वाद्यभावसमनियततया तदभिन्न इति घटत्वादिरपि तदभावस्तद्घटितकूटाधिकरणता च न जगत इति दर्शितातिव्याप्त्यनवकाशात् साध्याभावत्वविशिष्टाधिकरणत्वविवक्षणमफलं साध्याभावत्वेन साधनवद्वृत्तित्वं तु साध्याभावत्वविशिष्टाधिकरणत्वाविवक्षणेऽपि घटान्यत्वविशिष्टद्रव्यत्वाभाववान् घटत्वादित्यत्र साध्याभावस्य द्रव्यत्वस्य द्रव्यत्वत्वादिना साधनसमानाधिकरणतया द्रव्यस्यैव तद्घटितकूटाधिकरणत्वेनाव्याप्तेर्वारणाय निवेद्यमेव न चैवमपि पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ साध्यतावच्छेदकविशिष्टवदवृत्त्योः प्रत्येकं साधनसमानाधिकरणयोः घटान्यत्वविशिष्टद्रव्यत्वाभावघटेतरपृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावयोरधिकरणं गुणाद्येवेत्यतिव्याप्तिर्दुर्वारैवेति वाच्यं विशिष्टस्यातिरिक्ततामवलम्ब्यैव तादृशातिप्रसङ्गस्य समाधातुं शक्यत्वादिति। भूतत्वमूर्तत्वाद्योरिति उभयत्वावच्छिन्नाभावस्य साध्यत्वे हेतोर्व्यभिचारित्वाभावादन्यतरत्वावच्छिन्नाभावस्य साध्यत्वानुसरणं पृथिव्यादाविति आकाशे मूर्तत्वस्य मनसि च मूर्तत्वस्य साधनसमानाधिकरणतया आकाशस्य मनसस्तत्प्रत्येकं तदुभयानधिकरणत्वेन साध्याभावसमुदायानधिकरणत्वादिति भावः। आदिशब्दात् भूतभेदमूर्तभेदान्यतराभाववान् भूतमूर्तान्यतरत्वादित्यादौ भूतभेदमूर्तभेदात्मकसाध्याभावघटितसमुदायवति कालदिगादौ हेतोरवृत्त्याऽतिव्याप्तेः परिग्रहः। ननु साधनाधिकरणे येषां परस्परमै-

काधिकरण्य तत्समुदायस्य विवक्षितत्वान्नाय दोष भूतत्वमूर्तत्वादौ प्रत्येकं साधनसमानाधिकरणत्वेऽपि साधनवति परस्परमैकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात्तदेकतरघटितकूटस्यैव तथात्वात् तद्वति च हेतोर्वृत्ते प्रतियोगिताया साध्यतावच्छेदकव्याप्यत्वविशेषण त्याज्यमेव एव च विशिष्टस्यानतिरिक्तत्वेऽपि पृथिव्यन्यद्रव्यत्ववद्द्रव्यत्वादित्यादौ भोक्तरीत्याऽतिव्याप्ति सम्भवति उक्तविशिष्टाभावानां साधनवति द्रव्यादावैकाधिकरण्याभावात् एव तादृशकूटाधिकरणपृथिव्यादिवृत्तित्वस्य द्रव्यवृत्तित्वत्वादिना योऽभावस्तस्यापि तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गततया तद्वत्त्वविरहादप्युक्तहेतौ नातिव्याप्तिसम्भव न च द्रव्यवृत्तित्वत्वावच्छिन्नाभावप्रतियोगिताया आकाशादिवृत्तित्वसाधारणतया तादृशवृत्तित्वत्वाव्याप्यत्वान्न तादृशाभावा लक्षणघटक इति वाच्य साधनसमानाधिकरणत्वस्य साध्याभावविशेषणत्वपक्षे प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यभावेन तादृशविशेषणस्य परित्याज्यत्वात् वह्निमान् धूमादित्यत्रालोकाद्यवृत्तित्वेन रूपेण निर्वह्निवृत्तित्वाभावस्य प्रतियोगिताया आलोकादिनिष्ठपर्वतादिवृत्तित्वसाधारणसाधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वव्यत्यव्यापकतयैव तादृशाभावयावत्त्वनात् व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणात्पर्वतसंयुक्तत्वपर्वतान्यसंयुक्तत्वोभयत्वावच्छिन्नाभावस्य पर्वतासंयुक्तघटादौ वर्तमानस्य धूमादावसत्त्वेऽपि न क्षति· प्रतियोगिताया तादृशवृत्तित्वत्वव्याप्यत्वविशेषणेऽपि तादृशाभावमादाय यातिव्याप्त्यभावकतया एतस्य विशेषणस्य तद्विशेषणसत्त्वेऽप्यावश्यकत्वात् चरमाभावप्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणपरित्यागे यत्किञ्चित्साधनाधिकरणवृत्तिसाध्याभावसमुदायस्य विलक्षणेऽपि प्रथमाभावप्रतियोगिताया साध्यतावच्छेदकव्याप्यत्वविशेषण परित्याज्यमेव पृथिवी द्रव्यव्यवहारकप्रमाविषयत्वादित्यादौ जलान्यसमवेतत्वावच्छिन्नाभावकूटवत्त्वस्य साधनवत्यसत्त्वेऽपि तादृशाभावकूटवत्सामान्यादिवृत्तित्वत्वव्यापकप्रतियोगिताकयावदभावान्तर्गतानां पृ

थिव्यन्यवृत्तित्वत्वावच्छिन्नाभावानामेव वृत्तिमद्वृत्तीनां हेतावसत्त्वेनातिव्याप्त्यनवकाशात् एवं सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसमवेतत्वाप्रसिद्धिनिबन्धनाव्याप्तिवारणायोपात्तसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नाभावभिन्नत्वरूपसाध्याभावविशेषणस्थाने साध्याभावप्रतियोगितायां साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेश्य व्यधिकरणधर्मावच्छिन्नाभावीयगगनादिकिञ्चिद्विशिष्टतद्भवनिष्ठप्रतियोगिताभिन्नव्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायैव व्यधिकरणधर्मावच्छिन्नाभावसद्धेतौ समानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वस्यानिवेशनीयतया ऽभावसाध्यकस्थले सध्यतावच्छेदकन्यूनवृत्तिघटत्वाद्यभावत्वावच्छिन्नप्रतियोगितासु साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नत्वाभावेन घटत्वाद्यात्मकाभावव्यावर्तनात् साध्याभावप्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणमपि परित्यजनीयम् उक्तरीत्यापि पृथिव्यन्यद्रव्यत्वाद्यभावस्य हेतुमत्यसत्त्वेऽपि घटान्यवृत्तित्वत्वादिना गुणादिवृत्तित्वाभावमादायातिव्याप्तिर्वारणीयेत्यतो दोषान्तरमाह किञ्चेति। केचित्तु ननु स्ववृत्तिसाधनसमानाधिकरणसाध्याभावसमुदायाणधिकरणं यद्यत्साधनाधिकरणं तद्वृत्तिसाध्याभावसमुदायाधिकरणं यद्यत्स्व तदेव साध्याभावसमुदायाधिकरणेत्यनेन विवक्षितं सद्धेतौ तादृशं स्वं जगदेव वह्न्यधिकरणमहानसादिनिष्ठानां निर्वह्निह्रदादिनिष्ठानां च धूमादिसमानाधिकरणसाध्याभावानां व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानां समुदायवत् यद्यत्साधनाधिकरणं तद्वृत्तितादृशसमुदायवत्त्वस्य महानसादौ साध्यवति साध्यशून्ये च ह्रदादौ सत्त्वाल्लक्षणसमन्वयः भूतत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ तादृशं स्वं मनो गगनं च गगनवृत्तिभूतत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगनरूपसाधनाधिकरणे एव मनोवृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य मनस्येव सत्त्वेन निरुक्तसाधनाधिकरणवृत्तिसाध्याभावसमुदायाधिकरणत्वस्य तत्र तत्र सत्त्वात्। स्वनिष्ठसाध्याभावे साधनसमानाधिकरणत्वविशेषणानुपादाने वह्न्यादिशून्यह्र-

दादिनिष्ठसमानाधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधिकरण
त्वस्य साधनाधिकरणे ऽसत्त्वात् साध्यवदेव तादृश स्व तद्वृ
त्तित्वाभावस्य वृत्तिमद्वृत्तेर्हेतावसत्त्वादव्याप्ति अतस्तत्र तद्विशेष
णप्रवेश प्रथमसमुदायपदादाने भूतत्वमूर्तत्वान्यतराभाववान् स्प
र्शवदन्यत्वादित्यादौ गगन मनश्च न तादृश स्व तद्वृत्तित्व्य
धिकरणधर्मावच्छिन्नाभावाधिकरणमनोगगननिष्ठभूतत्वमूर्तत्वाभय-
टितसाध्याभावसमुदायाधिकरणत्वस्य गगनमनसो प्रत्येकमस
त्त्वात् किन्तु पृथिव्यादिचतुष्कमेव तथाविध स्व तद्वृत्तित्वाभाव
स्य हेतौ सत्त्वादतिव्याप्तिरिति तदुपादान धूमवान् वह्नेरित्यादा
वपि पर्वतादे स्ववृत्तिसाध्याभावकूटाधिकरणमहानसादिरूपसाध
करणवृत्तिसाध्याभावकूटाधिकरणत्वाज्जगदेव तादृशस्व स्यात्
अतो यद्यदिति तथा च पर्वतादिवृत्तिसाध्याभावकूटाधिकरण
यद्यत्साधनवदयोगोलकादेरपि तदन्तर्गततया तद्वृत्तिसमा
नाधिकरणधर्मावच्छिन्नाभावघटितकूटस्य पर्वतादावसत्त्वात्
तादृश स्व धूमादिशून्यमेवेति नातिव्याप्ति यद्यत्साधनाधि
करणमित्यनुक्त्वा यद्यदधिकरणमित्येतावदुक्तौ भूतत्वमूर्तत्वा
न्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ गगनादिवृत्तिसाध्याभा
वकूटाधिकरण यद्यत्पृथिव्यादेरपि तदन्तर्गततया तद्वृत्तिमूर्तत्वा
दिघटितकूटस्य च गगनादावसत्त्वात्तादृश स्व न गगनादिक
भवेदपि तु पृथिव्यादिकमेवेत्यतिव्याप्तिरत साधनाधिकरणनिवे
श पृथिव्यादेस्तत्र साधनानधिकरणत्वान्न दोष । धूमवान् वह्नेरि
त्यादावयोगोलकादिनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्याभावाधिक
रणत्वस्य पर्वतादे सत्त्वाज्जगदेव तादृश स्यादिति चरमस
मुदायपदोपादान पूर्ववत्तादृश यद्यत्स्व तावदन्यतमवृत्तित्वत्व
व्यापकप्रतियोगिताको ऽभावो विवक्षणीय अतो नातिव्याप्तिर-
सम्भवो वेत्यता दोषान्तरमाह किञ्चेत्यादि । महाकालेति काला
न्यत्वसाध्यके कालिकविशेषणताविशेषेण हेतौ साध्यसामाना
धिकरण्यविशेषणेनातिव्याप्तिवारणसम्भवान्महाकालभेदसाध्यकानु
सरणम् । यद्यपि महाकालत्वसाध्यके ऽप्यतिव्याप्ति सम्भवति वृत्ति
मात्र एव महाकालातिरिक्तकालवृत्तित्वसत्त्वात् तथापि सा
ध्यतावच्छेदकावच्छिन्नाभावघटितलक्षणे तत्कालमात्रवृत्तित्व

त्कालीनवृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्या नातिव्याप्तिः साधनाधिकरणे सम्भवदैकाधिकरण्यकसाध्याभावसमुदायाधिकरणत्वस्य प्रयोजनान्तरानुरोधेन निवेशे तादृशाप्रसिद्धिविरहेऽपि साधनाधिकरणीभूतखण्डकालव्यक्तिविशेषावृत्तित्वावच्छिन्नाभावघटिततादृशकूटाधिकरणतत्तत्कालवृत्तित्वाभावस्य तत्तत्कालावृत्तौ वृत्तिमति वर्तमानस्य साधने ऽभावान्नातिव्याप्तिरित्यग्रिमस्य एतेनेत्यादेरसङ्गतिरिति एकमात्रविपक्षकानुसरणम् । आदिपदान्महाकालत्वाभावादिपरिग्रहः अवृत्तिर्हेतौ साध्यसामानाधिकरण्यविशेषणेनातिव्याप्तिवारणसम्भवाद्यभिचारिणीति । वृत्तिमत्त्वमात्रमत्र विवक्षितं तन्मात्रस्यैव व्यावर्तकत्वात् समवायादिना द्रव्यत्वहेतुके तादृशसम्बन्धेन महाकालवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमति पटत्वादौ वृत्तेर्हेताववृत्तेर्नातिव्याप्तिसम्भव इति कालिकसम्बन्धावच्छिन्नहेत्वनुसरणम् । इदमुपलक्षणम् । ईश्वरज्ञानान्यत्वादिसाध्यके विषयितासम्बन्धेन हेतुमात्रे साध्याभावसमुदायवति ईश्वरज्ञानादौ तेन सम्बन्धेन वस्तुमात्रस्यैव वृत्तेरतिव्याप्तिर्द्रष्टव्या । एतेन वृत्तिमद्वृत्तित्वविशेषणस्थले वृत्तिमदवृत्तित्ववत्तादृशवृत्तित्वत्वव्यापकप्रतियोगिताकत्वोभयाभावस्य वृत्तिमदवृत्तित्वसाध्यवदवृत्तित्वप्रतियोगिकत्वोभयाभावस्य वा निवेश महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावे चरमदलाभावेनोभयाभावसत्त्वेऽपि न निस्तारः एवं यथाश्रुते घटत्वादिसाध्यके व्यभिचारिणि सयोगेन हेतौ साध्याभाववति सयुक्तमात्रस्यैव संयुक्तत्वात् एतद्रूपत्वादिसाध्यके व्यभिचारिणि समवायेन हेतौ समवेतमात्रस्यैव एतद्रूपाद्यतिरिक्तसमवेतत्वादतिव्याप्तिरित्यपि द्रष्टव्यम् ।

साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावकूटाधिकरणस्य नानाविपक्षकस्थले ऽप्रसिद्धावपि साधनसमानाधिकरणतादृशाभावकूटाधिकरणस्य नाप्रसिद्धिरिति साधनसमानाधिकरणत्वविशेषणप्रक्षेपे तादृशाभावकूटाधिकरणत्वगर्भमेव लक्षणं सम्यक् साध्यतावच्छेदकव्यापकत्वापेक्षया साध्यतावच्छेदकावच्छिन्नव्यापकत्वस्य गुरुत्वेऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितलक्षणं सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावादिवारकनिरुक्तविशेषणप्रवेशेन महागौरवात्तुच्छविशि-

एत्यानतिरिक्तत्वे पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावादेरपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया उक्तदिशाऽतिव्याप्तिवारणाय तादृशाभावघटितलक्षणेऽपि साधनवति सम्भवदैकाधिकरण्यकतादृशाभावसमुदायाधिकरणस्यावश्यं विवक्षणीयतया पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ समवायसम्बन्धावच्छिन्नजलासमेघतत्वावच्छिन्नाभावघटितकूटाधिकरणसामान्यादिवृत्तित्वाभावसत्त्वेऽपि अतिव्याप्तेरनवकाशात् साधनवति सम्भवदैकाधिकरण्यकत्वविवक्षामन्तरेणैव पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ घटान्यवृत्तित्वत्वावच्छिन्नाभावमादायातिव्याप्तिवारणे उक्तस्थलेऽपि तादृशाभावमादायातिव्याप्तिवारणसम्भवात् प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविशेषणं नोपादेयं यद्यपि साधनवति सम्भवदैकाधिकरण्यककूटनिवेशे द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावघटितकूटस्य सत्तावान् जातेरित्यादौ न लक्षणघटकताप्रसक्तिस्तथापि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे तादृशाभावैकतरव्यधिकरणधर्मावच्छिन्नाभावघटितकूटस्य तथात्वादव्याप्तिरिति तदुपेक्षेतिरीत्या सार्वभौमलक्षणपरिष्कारमपि हेतुतावच्छेदकसम्बन्धेन वृत्तिमद्यावदधिकरणमहाकालमात्रविपक्षकव्यभिचारिण्यतिव्याप्त्या निराकुरुते एतेनेति ॥

(दी०) एतेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्तित्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयस्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्तमानोऽपि न व्याप्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्ध्यादिसम्पादकाः पुनरभावा न हेतुसमानाधिकरणाः उक्तसमुदायाधिकरण-

वृत्तित्वतदभाववृत्तिमत्त्वानि पूर्वोक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तम् ।

(गा०) अत्र प्रतियोगितायामवच्छिन्नान्ताविशेषणव्याप्यवृत्तिरभाववान् मेयत्वादित्यत्रैव वह्निमान् धूमादित्यत्रापि बोध्या यादृशसाध्याभावकूटाधिकरणं साधनवत् तार्णातार्णदहनोभयाभावादिघटितकूटस्यापि तथाविधकूटतया तथाविधोभयादिमद्वृत्तिपदार्थे वर्तमानस्य तादृशकूटाधिकरणवृत्तित्वाभावस्य हेतावसत्त्वात् । अत्र च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया अन्यथा वह्निमान् पर्वतवह्न्यवयवसंयोगादित्यादौ संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावसमवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावयोः साधनाधिकरणे सम्भवदेकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वादतिव्याप्तिविरहेऽपि वह्निमान् धूमादित्यादौ साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नाभावकूटस्योक्तक्रमेण लक्षणघटकतया तद्वति वह्न्यवयवाद्यतिरिक्ते हेतोर्वृत्तेरसम्भवापत्तेः व्यापकतापि साध्यतावच्छेदकसम्बन्धघटिता ग्राह्या अन्यथा समवायेन वह्निसंयोगे साध्ये संयोगेन साध्यव्यापकस्य वह्नेः समवायसम्बन्धावच्छिन्नाभावघटितकूटाधिकरणवह्न्यवयवातिरिक्तवृत्तौ सद्धेतावव्याप्त्यापत्तेः इत्थं च संयोगसम्बन्धेन साध्यतायां तेन सम्बन्धेन व्यापकताप्रसिद्ध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया व्याप्यवृत्तिपदोपादानसार्थक्यमिति केचित् । वस्तुतस्तु येन सम्बन्धेन व्यापकता तेन सम्बन्धेनाभावो ग्राह्यः साध्यतावच्छेदकसम्बन्धस्य विशिष्य निवेशेऽवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वनिवेशे संयोगेन धूमादिसाध्यके तत्सम्बन्धावच्छिन्नधूमत्वावच्छिन्नाभावस्य धूमवदवच्छिन्नवृत्तिकतया व्यधिकरणधर्मावच्छिन्नाभावमात्रस्य व्याप्यवृत्तित्वेनाव्याप्त्यापत्त्या ऽनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वस्यैव निवेशनीयतया एवमित्यादिवक्ष्यमाणपङ्क्त्यसङ्गत्यापत्तेः अन्योन्याभावघटितव्यापकतानिवेशाच्च व्याप्यवृत्तिपदसार्थक्यम् । संयोगाभावसाध्यकस्थले संयोगघटितकूटाधिकरणतया द्रव्यमात्रे

सत्त्वात्तद्वृत्तिहेतावव्याप्तिवारणरूपं तत्प्रयोजनमाह केवलान्वयिनि इति । एतेन तत्साध्यके द्रव्यवृत्तेः सद्धेतुत्वमक्षतमिति सूचितं गुणवान् द्रव्यत्वादित्यादौ गुणादावनवच्छिन्नवृत्तिकगुणाद्यभाववति नित्यद्रव्यातिरिक्ते हेतोर्वृत्त्याऽव्याप्तिवारणरूपमनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविशिष्टाभावनिरूपिताधिकरणतानिवेशनफलमाह एवमिति । साध्याभावे उत्पत्तिकालावच्छेदेन द्रव्यवृत्तित्वकथनं द्रव्यत्वे तद्वृत्तित्वाभावासत्त्वेनाव्याप्तिप्रसञ्जनाय न व्याप्यवृत्तिरित्यत्र द्रव्यत्वाधिकरणेऽपीत्यनुपपद्यते इति व्याख्यानमसत् अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वनिवेशे संयोगी घटादित्यत्रोक्तरीत्याऽव्याप्तेर्वारणाय साधनवति व्याप्यवृत्तित्वस्यावश्यं निवेशनीयतया तत्राव्याप्त्यप्रसक्तेः साधनवति व्याप्यवृत्तित्वपर्यन्तनिवेशनप्रयोजनप्रदर्शनपरतया एतत्पङ्क्तिव्याख्यापि न साधीयसी व्याप्यवृत्तित्वविशिष्टाधिकरणत्वानिवेशे संयोगी सत्त्वादित्यत्र गुणादौ व्याप्यवृत्तेः संयोगाभावस्येव द्रव्यत्वाभावस्यापि लक्षणघटकतया जगतः साध्याभावकूटानधिकरणत्वाद् अतिव्याप्त्यनवकाशेऽपि धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावकूटाधिकरणतया विश्वस्मिन्सत्त्वाद् अतिव्याप्तेर्दुर्वारतया तन्निवेशनस्यावश्यकतया तावताप्युक्ताव्याप्तिवारणसम्भवात् तस्माद्व्याप्यवृत्तित्वमवच्छिन्नवृत्तिकान्यत्वमभिमतमतोऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावोपेक्षा तन्निवेशे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्यैव निवेशनीयतया संयोगेन साध्यतायां व्यभिचारिणि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव संयोगेन द्रव्याभावस्यावच्छिन्नवृत्तिकान्यतयाऽतिव्याप्तिः तन्निवेशनस्यैव दैशिककालिकाव्याप्यवृत्तिसाध्यभेदेन स्थलद्वये व्यावृत्तिरभिहितेति सारम् । स्वसमानाधिकरणत्वानिवेशनप्रयोजनमाह उक्तरूपेति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपेत्यर्थः । अप्रसिद्ध्यादीति । सत्तावान् जातेरित्यादौ सत्तात्वाद्यवच्छिन्नाभावकूटाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तित्वाप्रसिद्धिसम्पादक रूपाभावादिसाध्यके रूपाद्यात्मकाभावकूटाधिकरणाप्रसिद्धिस-

स्पादकाः सम्भवदैकाधिकरण्यापन्नसाध्याभावस्तोमाधिकरणत्व-विवक्षणे सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादित्यादावादिपद-ग्राह्याया अतिव्याप्तेः सम्पादका बोध्याः । पूर्वोक्तरीत्येति । समु-दायाधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन तदभावास्तादृश-वृत्तित्वत्वव्यापकप्रतियोगिताका हेतुतावच्छेदकसम्बन्धेन वृत्ति-मद्वृत्तित्वं लक्षणघटकं बोध्यमित्यर्थः । अपास्तामिति न च सार्वभौममते सामानाधिकरण्यस्याव्याप्यवृत्तितया साध्याभाव-कूटवन्महाकालवृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावोऽपि सामानाधिकरण्यानिरूपकखण्डकालाद्यवच्छेदेन घटादिरूपवृत्ति-मति वर्तमान एवेति महाकालान्यत्वादिसाध्यके नातिव्याप्ति-सम्भव इति वाच्यं तथा सति वह्न्यादावपि स्वावयवावच्छेदेन निर्धूमसंयुक्तत्वाद्यभावसत्त्वेन धूमवान् वह्नेरित्यादावतिव्याप्तेरुक्त-स्थले ऽतिव्याप्तिवारणस्य सुदूरपराहतत्वात् । यत्तु हेतुतावच्छे-दकसम्बन्धेन हेत्वधिकरणसामान्यावच्छेदेन तद्वत्त्वस्य विवक्षि-तत्वान्नातिव्याप्तिः व्यभिचारनिरूपकाधिकरणावच्छेदेन हेतौ त-द्वत्त्वविरहादिति तन्न एवं सति स्वावयवावच्छेदेन घटादि-वृत्तेः समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य एवं-तावच्छेदेन धूमादावसत्त्वादसम्भवापत्तेः वृत्तिमद्वृत्तिपदेन हेतु-तावच्छेदकसम्बन्धेन यस्य यदधिकरणं तदवच्छेदेन तद्वृ-त्तित्वविवक्षायामपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमे व्यधिकरण-धर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावकूटाधिकरणवृत्तित्वाभा-वस्याधिकरणानवच्छिन्नतया ऽसम्भवस्य दुर्वारत्वात् यदि च वृत्तिमत्यनवच्छिन्नवृत्तयो यावन्तस्तादृशाभावकूटाधिकरणवृत्तित्वा-भावा अनवच्छिन्नतद्वत्त्वमित्युच्यते तदा सामानाधिकरण्यस्या-व्याप्यवृत्तितापक्षेऽपि न दर्शितदोषनिरासः सम्भवति समाना-धिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावस्य वृत्तिमत्यनवच्छि-न्नवृत्तिकत्वविरहेण लक्षणाघटकत्वात् । हेतुतावच्छे-दकसम्बन्धेन यस्य यदधिकरणे तदवच्छेदेन तद्वृत्तित्वकिञ्चि-दवच्छिन्नत्वोभयाभाववन्तो यावन्तस्तादृशाभावकूटवद्वृत्तित्वाभा-वा अनवच्छिन्नतद्वत्त्वं व्याप्तिरित्युक्तौ न कश्चिद्दोषः समा-नाधिकरणधर्मावच्छिन्नमहाकालवृत्तित्वाभावे किञ्चिदवच्छिन्नत्व-

सत्वेऽपि कालिकसम्बन्धेन घटाद्यधिकरणखण्डकालावच्छेदेन घटाद्यवृत्तित्वासत्त्वेनोभयाभाववत्तायाः सत्त्वेन महाकालान्यत्वसाध्यके व्यभिचारिणि तादृशाभावस्य लक्षणघटकत्वेनातिव्याप्तिविरहात् समानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्य घटादौ कपालाद्यवच्छेदेन वृत्तेः संयोगादिना यद्यद्घटाद्यधिकरणं तदवच्छेदेन घटादावृत्तेर्निरुक्तोभयाभाववत्त्वविरहात् वह्निमान् धूमादित्यादौ न लक्षणघटकता अपि तु अवच्छिन्नत्वविरहेणोभयाभाववतो व्यधिकरणधर्मावच्छिन्नाभावस्यैवेत्यव्याप्त्यनवकाशादिति ध्येयम्। सामानाधिकरण्यस्य व्याप्यवृत्तित्वे हेतुतावच्छेदकसम्बन्धेन किञ्चित्पदार्थाधिकरणवृत्तयो यावन्तस्तादृशाभावकूटाधिकरणवृत्तित्वनिरूपकत्वाभावा यदधिकरणावच्छेदेन वर्तन्ते तत्त्वमिति वक्तव्यं महाकालवृत्तित्वनिरूपकत्वस्य समानाधिकरणधर्मावच्छिन्नाभावः खण्डकालवृत्तिः साधनाधिकरणमहाकाले नास्तीति नाकातिव्याप्त्यवकाशः सद्धेतौ तादृशाभावकूटाधिकरणजगद्वृत्तित्वनिरूपकत्वस्य व्यधिकरणधर्मावच्छिन्नाभाव एव हेतुतावच्छेदकसम्बन्धेन किञ्चिदधिकरणवृत्तिः स च हेत्वधिकरणसामान्य एव वर्तत इति लक्षणसमन्वयः। अथवा वृत्तिमद्वृत्तयो यावन्तस्तादृशसाध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्त्वाधिकरणतासामान्यकधर्मवत्त्वमेव विवक्षणीयम्। वृत्तिमत्त्वादिकञ्च दैशिकविशेषणतासम्बन्धेनैव ग्राह्यम्। इत्थञ्च कालिकसम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणतायां सम्बन्धान्तरावच्छिन्नाधिकरणतावद्वृत्तेर्दैशिकसम्बन्धावच्छिन्नमहाकालवृत्तित्वाभावस्यासत्त्वादिति कृतं पल्लवितेन॥

(वि०) प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः, गवि शशशृङ्गं नास्तीति प्रतीतेरप्रसिद्धेः शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः।

(दी०) तद्विशिष्टेति। विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् अभावप्रत्ययो हि घटत्वादिवि-

शिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमवगाहते न तु स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतेः । तदिहाभावप्रत्ययो यदि व्यधिकरणधर्मेणावच्छिन्नं प्रतियोगिनं नावगाहते नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वम् अथावगाहते तर्हि भ्रम एव । न च ततोऽर्थसिद्धिरिति भावः । यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीत्यादिप्रत्ययो न तदा तादृशाभावनिवारणं गीर्वाणगुरूणामपि शक्यमिति मन्तव्यम् ।

(गा०) मूले प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इति व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुर्वादिनः प्रतिज्ञावाक्यं तत्र धर्मत्वमनुपादेयम् । अवृत्तेरपि प्रतियोगितावच्छेदकत्वस्य निराकर्तव्यत्वात् तत्त्वे साधकाभाव एव हेतुरूहः पक्षतावच्छेदकप्रतियोग्यवृत्तित्वशरीरे साध्यतावच्छेदके च सामान्यतः प्रतियोगितायां प्रवेशः सर्वेषामेव किञ्चिदभावप्रतियोगिनि सम्बन्धितया किञ्चिदभावप्रतियोगितावच्छेदकतया च विशिष्टपक्षाप्रसिद्धेः । किन्तु विशिष्यवाच्यत्वत्वादिना तथा च वाच्यत्वाद्यवृत्तित्वावच्छिन्ने वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयं समूहालम्बनानुमितिरुद्देश्या तत्तदभावीयप्रतियोग्यवृत्तित्वावच्छिन्ने तत्तदभावप्रतियोगितानवच्छेदकत्वसाधनं न सम्यक् समनियताभावैक्यमते समवायित्वादिना वाच्यत्वाद्यभावस्य घटत्वाद्यवच्छिन्नपटाद्यभावाभिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वादेर्वाच्यत्वाद्यभावीयप्रतियोग्यवृत्तितया दुर्घटत्वात् प्रतियोगिताः विशिष्योपादाय तत्तत्प्रतियोगितायदवृत्तित्वावच्छिन्ने तत्प्रतियोगितावच्छेदकत्वाभावसाधनमपि हेयं वाच्यत्वादिनिष्ठायाः प्रसिद्धसमानाधिकरणद्रव्याद्यवच्छिन्नाभावप्रतियोगिताया उपादाने सिद्धसाधनात् सोऽन्द्रोपाध्यादेरपि व्यधिकरणसमवायित्वादिधर्मस्य समाना-

धिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वानङ्गीकारात्, व्यधिकरणधर्मावच्छिन्नायाश्च प्रतियोगिताया उभयवाद्यसिद्धतया विशिष्योपादानासम्भवात् । केचित्तु विशिष्य समवायित्वत्वादिकं पक्षतावच्छेदकीकृत्य वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयं तादृशप्रतियोगितावद्वृत्तित्वमेव हेतुः यो यद्वृत्तिः स तन्निष्ठप्रतियोगितानवच्छेदक इति सामान्यतो व्याप्तिप्रदर्शकः प्रतियोग्यवृत्तिश्चेतिग्रन्थः वीप्साद्यभावेऽपि प्राथम्येन व्याप्तेर्लाभसम्भवात् वाच्यत्वाद्यवृत्तिधर्ममात्रस्यैव व्यधिकरणतया वाच्यत्वादिनिष्ठप्रतियोगितायां तन्मतेऽवच्छेदकतया यद्यपि अत्रान्वयदृष्टान्तदुर्भिक्षं तथापि व्यतिरेकेण वाच्यत्वादिनिष्ठाभावत्वादिकमेव दृष्टान्तः सम्भवतीत्यदोषः । अथवा यो यद्वृत्तिः स न तदवच्छेदकः इति सामान्यव्याप्तौ कारणत्वादिव्यधिकरणकारणत्वाद्यनवच्छेदक एवान्वयेन दृष्टान्तः प्रतियोगितावच्छेदकत्वविषयतावच्छेदकत्वोभयसाधारणावच्छेदकतात्वस्यैक्यभ्रमविषयताव्यधिकरणतदवच्छेदकरजतत्वादौ उक्तसामान्यव्याप्तेर्भङ्गवारणाय विषयतान्यत्वेन यत्पदार्थो विशेषणीय इत्याहुः । अथ कालिकादिसम्बन्धेन पटादिवृत्तिघटत्वादेः समवायादिना पटादिनिष्ठप्रतियोगितावच्छेदकत्वखण्डनाय तत्तत्सम्बन्धेन प्रतियोग्यवृत्तित्वं तत्तत्सम्बन्धेन प्रतियोगितावच्छेदकत्वाभावसाधने पक्षतावच्छेदकतया हेतुतया वा विवक्षणीयम् तथा च समवायसम्बन्धेन वाच्यत्वादिवृत्तित्वाप्रसिद्ध्योक्तरीत्या समवायादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाभावखण्डनानुपपत्तिः न च प्रतियोग्यवृत्तित्वमित्यनेन प्रतियोगिनिष्ठावच्छेदकताघटकसम्बन्धावच्छिन्नाभावप्रतियोगित्वमेव विवक्षणीयं तथा च घटत्वादेरेव वाच्यत्वादिनिष्ठसमवायादिसम्बन्धावच्छिन्नाभावप्रतियोगितया नाप्रसिद्धिरिति वाच्यम् अव्याप्यवृत्तेः संयोगाभावप्रतियोगितावच्छेदकस्य प्रतियोगिनिष्ठाभावप्रतियोगितया उक्तधर्मस्य पक्षतावच्छेदकत्वे बाधस्य हेतुत्वे च व्यभिचारस्य दुर्वारत्वात् प्रतियोगिनिष्ठभेदप्रतियोगितायामवच्छेदकताघटकसम्बन्धेनावच्छेदकत्वस्य विवक्षणे व्यधिकरणसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावनिराकरणानुपपत्तिः तेन सम्बन्धेन घटत्वादेर्भेदप्रतियोगितावच्छेद-

कत्वस्य घादिनोप्यननुमतत्वात् एवं घटत्वादौ समवायसम्बन्धेन घाच्यत्वादिनिष्ठप्रतियोगितायामवच्छेदकत्वस्याभावः प्रतियोग्यप्रसिद्धा साधयितुमशक्यः । मैवं स्वप्रतियोगिकत्वयदनुयोगिकत्वोभयाभाववद्यादृशसम्बन्धसामान्यको यः स स्वनिष्ठत्वतत्सम्बन्धावच्छिन्नत्वोभयाभाववत्तन्निष्ठप्रतियोगितावच्छेदकतासामान्यकः इत्यर्थविवक्षायामेव सामञ्जस्यात् संयोगादिसम्बन्धसामान्ये घटत्वादिप्रतियोगिकत्ववाच्यत्वाद्यनुयोगिकत्वोभयाभावसत्त्वात् प्रथमस्वपदेन घटत्वाद्युपादानस्य मतद्वय एव सम्भवात् तत्र स्वनिष्ठत्वसंयोगादिसम्बन्धावच्छिन्नत्वोभयाभाववद्वाच्यत्वादिवृत्तिप्रतियोगितावच्छेदकतासामान्यकत्वसाधने नोद्देश्यासिद्धिः । प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इति मूलग्रन्थस्य तथात्वे मानाभावादिति दोषः । ननु समवायितया वाच्यत्वं नास्तीत्याद्याकारकः समवायित्वादेर्वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहिप्रत्यय एव मानमिति उक्तहेतोरसिद्धाशङ्कायामाह तद्विदिष्टज्ञानस्येति । अत्र च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य अभावलौकिकप्रत्यक्षत्वावच्छिन्नहेतुत्वादित्यर्थः । यदि अन्यथा घटनिर्विकल्पकानन्तरं घटाभावप्रत्ययापत्तेरितिमूलदर्शितयुक्त्या वाच्यत्वं न समवायीतिविशेषदर्शनप्रतिबध्यवाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानपर्यन्तापेक्षा समवायित्वावच्छिन्नवाच्यत्वाभावप्रत्यक्षे नायाति तथापि स्वतन्त्रमहानसीयत्ववह्नित्वादिप्रकारकज्ञानान्महानसीयवह्निर्नास्तीतिबुद्ध्यनुदयात् महानसीयवह्निर्नास्तीत्यभावबुद्धौ महानसीयवह्नित्वावच्छिन्नत्वेन वह्न्यादिनिष्ठप्रतियोगितावगाहिन्यां यथा महानसीयत्वप्रकारेण वह्नित्वावच्छिन्नविषयकज्ञानं हेतुः तथा समवायितया वाच्यत्वं नास्तीत्यादिबुद्धेर्वाच्यत्वादिनिष्ठप्रतियोगितायां समवायित्वाद्यवच्छिन्नत्वावगाहित्वे समवायित्वादिना वाच्यत्वत्वाद्यवच्छिन्नधर्मिकज्ञानमपेक्षितं तथा च वाच्यत्वं न समवायीतिविशेषदर्शनदशायामप्यनुभूयमाना तथाकारा प्रतीतिः कथमुपपद्येत तस्याः वाच्यत्वाद्यनुयोगिकसमवायित्वाभावावलम्बनत्वोपगमे सर्वत्रैव तथात्वमुपेयतामिति गतं व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वेनेत्यभिप्राय इति मिश्रानुसारिव्याख्यानं त-

या वाच्यत्वं नास्तीत्यत्र वाच्यत्वत्वसामानाधिकरण्यविशेषितस्वावच्छिन्नप्रतियोगितायाः एव समवायित्वसंसर्गघटकतया भानोपगमसम्भवेन वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानस्याप्रानपेक्षणीयत्वमुपपद्यत इति । अत्रेदं समाधानं तदुभयधर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तदुभयैकतरधर्मावच्छिन्नधर्मिकतदन्यतरप्रकारकज्ञानत्वेन हेतुता समवायितया वाच्यत्वाभावस्य च व्यधिकरणसमानाधिकरणयोः समवायित्ववाच्यत्वत्वयोरुभयोरेव प्रतियोगितावच्छेदकत्वपर्याप्तिरवश्यमङ्गीकार्या समवायित्वमात्रस्य प्रतियोगितावच्छेदकत्वे वाच्यत्वत्वप्रकारकज्ञानमन्तरेणापि तादृशाभावप्रतीत्यापत्तेः यत्र समवायितया वाच्यत्वं नास्तीतिप्रतीत्या समवायित्ववाच्यत्वत्वोभयपर्याप्तप्रतियोगितावच्छेदकत्वानवगाहने तस्याः समवायिवाच्यत्ववदिदमिति भ्रमविरोधित्वानुपपत्तेश्च तं प्रति समवायितया प्रमेयत्ववाच्यत्वोभयं नास्तीतिनिश्चयस्याभूतेन तदुभयांशे प्रतियोगितावच्छेदकतापर्याप्त्यवगाहिनिश्चयत्वेनैव प्रतिबन्धकत्वात् न च विलक्षणवाच्यत्वप्रकारतानिवेशनादेव दर्शितनिश्चयव्यावृत्तिसम्भवे उभयांशे अवच्छेदकत्वपर्याप्त्यवगाहित्वमप्रयोजकमिति वाच्यं यतस्तदंशे ऽभावप्रतियोगितावच्छेदकत्वपर्याप्तिस्तदवच्छिन्नस्याभावविरोधित्वप्रयोजिका तदवगाहित्वमेवाभावबुद्धेस्तदवच्छिन्नविशिष्टज्ञानप्रतिबन्धकतायां तन्त्रं समवायितया वाच्यत्वप्रमेयत्वोभयं नास्तीतिप्रतीतेः समवायित्ववाच्यत्वत्वोभयविशिष्टवत्ताबुद्धिप्रतिबन्धकत्वेऽपि उभयांशे प्रतियोगितावच्छेदकतापर्याप्त्यवगाहित्वमेव बीजं तस्य च समवायितया वाच्यत्वं नास्तीतिधीसाधारण्ये तस्यास्तादृशविशिष्टधीप्रतिबन्धकत्वं न तु उक्तोभयाभावबुद्धेरिति विशेष एव नोपपद्येत इति । यदि चैतस्याः प्रतीतेः प्रतिबन्धकत्वं मान्यस्या इत्यत्र विषयतावैचित्र्यमात्रं बीजमाश्रयिष्यते तदा समानाधिकरणधर्मावच्छिन्नाभावविषयिण्या घटो नास्तीत्यादिबुद्धेरपि प्रतियोगितावच्छेदकत्वावगाहित्वं विलोपतां न हि तत्र घटत्वादिविशिष्टधीप्रतिबन्धकत्वानुरोधमन्तरेण पुष्कलतरं परिस्फुरति स च भवतामकिञ्चित्कर एव कपालसमवेतद्रव्यं नास्ति नीलो घटो नास्तीत्यादिधर्मानिरूढप्रकारता-

विशेषस्यैव तादृशधीप्रतिबन्धकतावीजत्वसम्भवात् तथा च तत्रैव समवायितया वाच्यत्वं नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धावपि वाच्यत्वत्वांशे प्रतियोगितावच्छेदकत्वावगाहनमशक्यापह्नवमेवेति वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानमन्तरेण न तत्सम्भवः । अथ वस्तुतस्त्वननुगमेन प्रतियोगितावच्छेदकभेदेन तत्प्रकारकज्ञानहेतुताभेदस्यावश्यकतया महानसीयत्ववह्नित्वादिरूपसमानाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षे प्रत्येकैकधर्मावच्छिन्नवदाप्यकापरधर्मप्रकारकज्ञानत्वेन हेतुता वाच्या न तु व्यधिकरणसमवायित्वसमानाधिकरणवाच्यत्वत्वोभयधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे समवायित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रत्यक्ष प्रति समवायित्वादिप्रकारकज्ञानत्वेन फलप्रकारणतयैव तन्निर्वाहादिति न तत्र वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानापेक्षेति चेन्न प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रतीत्याऽवगाह्यते न तु स्वातन्त्र्येणेति नियमेन समवायितया वाच्यत्वं नास्तीत्याकारिकाया एव व्यधिकरणधर्मावच्छिन्नाभावप्रतीतेरुपगन्तव्यतया समवायित्वविशिष्टवाच्यत्वत्वावच्छिन्नवैशिष्ट्यावगाहिन्यां तादृशबुद्धौ तु वाच्यत्वं स-

करीत्या ऽभावलौकिकत्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य कारणतया तादृशकारणबाधेन व्यधिकरणधर्मावच्छिन्नाभावाप्रत्ययादिति मूलं व्याख्येयं तच्चानुचितम् उक्तविशेषकारणताकल्पनोपजीव्यविशिष्टवैशिष्ट्यबोधसामान्यहेतुताश्रयविशेषणतावच्छेदकविशिष्टविशेषणज्ञानाभावस्यैव दर्शयितुमुचितत्वात् अतो मूले हेतुत्वादित्यस्यापेक्षणीयत्वादित्यर्थः इत्याशयेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधिया अपेक्षणे विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकविशिष्टविशेषणज्ञानकारणत्वमेव हेतुत्वेनाभिप्रेतमित्याह । तथा च जन्यतायामभावविषयकत्वावच्छिन्नत्वमविवक्ष्य विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नाभावधीनिष्ठजन्यताप्रतियोगीभूतस्याभावेन समवायितया वाच्यत्वं नास्तीत्यादिप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहित्वासम्भव इत्यर्थपरतया तद्व्याख्यानमेवोचितं न तु विशिष्टवैशिष्ट्यबोधहेतुतायामुपजीव्यकल्प्यहेतुत्यान्तरपरतयेत्याशयेनाह दीधितौ विशेषणतावच्छेदकेति । अयं भावः वाच्यत्वं समवायीति ज्ञानमन्तरेण समवायिवाच्यत्ववानयमिति विशिष्टवैशिष्ट्यबोधानुत्पत्त्या वाच्यत्वत्वावच्छिन्ननिरूपितत्वेन भासमानवैशिष्ट्ये समवायित्वावच्छिन्ननिरूपितत्वावगाहिज्ञाने वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन हेतुताकल्पनमावश्यकं समवायितया वाच्यत्वं नास्तीतिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेरपि वाच्यत्वत्वावच्छिन्नीयत्वेन भासमानेऽनुयोगितारूपवैशिष्ट्ये समवायित्वावच्छिन्नीयत्वावगाहितया तत्र तादृशज्ञानमवश्यमपेक्षणीयमिति । ननु वैशिष्ट्यांशे वाच्यत्वावच्छिन्नधर्मितावच्छेदकतानिरूपकविशेषणतापन्नसमवायित्वावच्छिन्नप्रतियोगिताकत्वावगाहिबुद्धावेव तदवच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं हेतुः व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ च वाच्यत्वत्वावच्छिन्ने समवायित्वस्य विशेषणत्वं नोपपद्यते अपि तु तद्विशेषणतानापन्नस्यैव तस्य स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाभावांशे विशेषणत्वमुपपद्यते वाच्यत्वसंसर्गतावच्छेदकतयैव वा तथाविधतदवच्छिन्नत्वस्य प्रतियोगितांशे

मानमुपेयते तथा च तत्र नोपदर्शितज्ञानापेक्षेत्याशङ्कां परिजिहीर्षुर्मतं व्याचष्टे अभावप्रत्ययो हीति । विशेषणस्य प्रतियोगिघटादिनिरूपितविशेषणतापन्नस्य घटत्वादेः प्रतियोगितावच्छेदकत्वमवगाहते प्रतियोगितया भासमानघटादिनिरूपितविशेषणत्वावच्छिन्ना या स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्ना घटत्वादिनिष्ठप्रकारता तच्छाली प्रत्ययीति यावत् । न तु स्वातन्त्र्येण न प्रतियोग्यविशेषणत्वेन घटत्वादेः प्रतियोगितावच्छेदकत्वमवगाहते इत्यनुषङ्गेणान्वयः तादृशसम्बन्धावच्छिन्नघटत्वादिनिष्ठप्रकारता प्रतियोगिनिरूपितप्रकारतानवच्छिन्ना न भवतीत्यर्थः । घटो नास्तीत्येवेति अभावादौ स्वातन्त्र्येण घटत्वादिवैशिष्ट्यावगाहित्वरहिताया एवेत्यर्थः । प्रतीतेरनुभवादिति शेषः । एतावता किमायातमित्यत आह तदिहेति । अवच्छिन्नविशेषितं तस्यापि प्रतियोगितावच्छेदकस्य तस्य प्रतियोगितावच्छेदकत्वमपि तथा च मानाभावेन न व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वासिद्धिरिति भावः । अथ व्यधिकरणधर्मस्य प्रतियोगिविशेषणतयैव व्यधिकरणधर्मावच्छिन्नाभावबुद्धौ मानमुपेयते न चैवं सति तादृशबुद्धेः समवायित्वादिरूपविशेषणतावच्छेदकप्रकारकव्याप्यत्वादिज्ञानजन्यतावच्छेदकाक्रान्ततया तादृशज्ञानं विना व्यधिकरणधर्मावच्छिन्नाभावबुद्ध्यनुपपत्तिरिति वाच्यं भ्रमात्मकतादृशज्ञानदशायामेव तद्बुद्धेरभ्युपगमात् विशेषदर्शनदशायामपि आहार्यतत्प्रकारकज्ञानसम्भवात् अनाहार्यस्यैव विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वे विशेषदर्शनकालीनायाः समवायितया वाच्यत्वं नास्तीत्यादिबुद्धेरगत्या वाच्यत्वाद्यधिकरणकसमवायित्वाद्यभावावगाहित्वमुपपद्यते वाच्यत्वं समवायीत्यादिभ्रमानन्तरं समवायिवाच्यत्वं नास्तीत्याकारकप्रत्यय एव व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वे मानमास्तां तत्र तदवगाहितायाः सर्वानुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् तादृशप्रतीतेर्यथार्थत्वे समवायित्वाभावावगाहित्वोपगमे तत्पूर्वं वाच्यत्वं समवायीतिभ्रमापेक्षानुपपत्तेः अरोपितपार्थ्येनावगाहने यथावगाहत इति । समाधत्ते भ्रम एवेति

व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वांशेऽपि भ्रम एवेत्यर्थः वैशिष्ट्यभान एवावच्छेदकतायाः भानादवच्छेदकताया वैशिष्ट्यनियततया तद्बाधे तस्या अपि बाधादिति भावः । न चैवं गवि शशशृङ्गं नास्तीतिप्रतीतेरसिद्धेरिति मूलासङ्गतिः तादृशप्रतीतेः शृङ्गांशे शशीयत्वावगाहित्वानभ्युपगमे शशीयत्वे शृङ्गनिष्ठप्रतियोगितावच्छेदकत्वावगाहनासम्भवात्तदवगाहित्वे भ्रमत्वादुभयथापि व्यधिकरणधर्मावच्छिन्नाभावासाधकत्वात्तादृशप्रतीतिनिराकरणस्यानुपयुक्तत्वादिति वाच्यम् । अभ्रान्तानामपि गवि शशशृङ्गं नास्तीति व्यवहारमूलप्रतीतिसत्त्वेनोक्तनियमस्यैवासिद्ध्या व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव तादृशप्रतीतेर्गोशृङ्गाधिकरणकशशीयत्वाभावावगाहित्वोपगमे तस्या गवाधिकरणकाभावावगाहितायामनुभवविरोध इत्याशङ्कामुत्थाप्याभ्रान्तपुरुषीयगवाधिकरणकाभावावगाहितादृशाभावप्रतीतिनिराकरणपरतया तद्ग्रन्थस्यावतारणीयत्वात् । ननु अभ्रान्तानां गवि शशशृङ्गं नास्तीति प्रतीतिर्माभूत् शशशृङ्गं नास्तीतिप्रतीतिर्नापह्नोतुं शक्यते सर्वेषामेव तथाविधव्यवहारदर्शनादित्याशङ्कायां शशशृङ्गं नास्तीत्यादिमूलावतारो बोध्यः यद्यपि शशशृङ्गं नास्तीति शब्देन शशे शृङ्गाभाव इत्याकारकः शाब्दबोधो न शक्यते जनयितुम् । अनुयोगिवाचकपदोत्तरं सप्तमीविरहेण निराकाङ्क्षत्वात् तथापि पदार्थोपस्थित्यादिमूलकेदृशमानसबोधजननेच्छया व्युत्पन्नानां तथा प्रयोग इत्याशयः । ननु घटत्वेन घटो नास्तीत्याकारकस्याभावप्रत्ययस्यानुभविकतया प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रत्ययो ऽवगाहत इति न नियमः तादृशप्रतीत्या स्वातन्त्र्येण भासमाने घटत्वादौ प्रतियोगितावच्छेदकत्वावगाहनात् अन्यथा घटत्वेनेत्याकारकतानुपपत्तेः तथा च घटत्वेन पटो नास्तीत्यादावपि घटत्वादौ पटादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहनं निराबाधमेवेति व्यधिकरणधर्मावच्छिन्नाभावसिद्धिर्निष्प्रत्यूहैव न च तत्र व्यधिकरणधर्मस्यावच्छेदकत्वावगाहनसम्भवेऽपि अतिरिक्ताभावकल्पनागौरवभयेन तादृशप्रतीतेः पटाद्यधिकरणकघटत्वाभावावगाहित्वमेव स्वीक्रियत इति वाच्यम् असति बाधके तच्छब्दोल्लेखिप्रतीतेस्तच्छब्दप्रति-

पाधार्थविषयकत्वापरित्यागात् घटाद्यधिकरणकघटत्वाद्यभावस्य च घटत्वेन पटो नास्तीत्यादिशब्दात्कथमप्यप्रतीतेः प्रतीतिबलात्पदार्थान्तरसिद्धौ तत्पदार्थकल्पनागौरवस्य फलमुखत्वेनाबाधकत्वात् न च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणबाधेन तादृशप्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावावगाहिता न सम्भवतीति युक्तं पटत्वाद्यवच्छिन्नधर्मिकघटत्वादिप्रकारकप्रतियोगिज्ञानहेतुतायां मानाभावात् तादृशज्ञानं विनैव घटत्वेन पटो नास्तीत्याकारकस्य घटत्वादिविशिष्टपटादिवैशिष्ट्यानवगाहिनोऽभावप्रत्यक्षस्य स्वीकारात् । वस्तुतस्तु कुत्राप्यभावबुद्धौ स्वातन्त्र्येण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य हेतुता नास्ति न च तदकल्पने प्रतियोगिज्ञानशून्यकाले नास्तीत्याकारकप्रतियोग्यविषयकाभावप्रत्यक्षस्य घटत्वादिनिर्विकल्पकानन्तरं विशेष्ये विशेषणमितिरीत्या घटाभावप्रत्यक्षस्यापत्तिरिति वाच्यं प्रतियोगिज्ञानहेतुतामतेऽप्यभावे प्रतियोगितया घटादिरूपप्रतियोगिज्ञानविरोधिबाधादिग्रहसत्त्वे प्रतियोग्यविषयकाभावग्रहापत्तेर्दुर्वारत्वात यदि च निर्धर्मितावच्छेदककप्रतियोगिभाने बाधकाभावात् प्रतियोग्यविषयकाभावप्रत्ययो नापादयितुं शक्यते तथापि तादृशबाधग्रहदशायां प्रतियोगिधर्मितावच्छेदकज्ञानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण ग्रहदशायां प्रतियोगिधर्मितावच्छेदकतानापन्नाभावत्वप्रकारकस्य स्वातन्त्र्येण प्रतियोगिविषयकस्य नास्तिघटीयश्चेत्याद्याकारकसमूहालम्बनप्रत्यक्षस्यापत्तिः एवं घटत्वावच्छिन्नप्रतियोगिताकाभावस्य यदा भानं तदा निर्विकल्पकोपस्थितद्रव्यत्वादेर्विशेष्ये विशेषणमितिरीत्या घटांशे भानापत्तिः कारणबाधेन न शक्यते वारयितुं तादृशाभावस्य द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकत्वविरहेण तद्भाने द्रव्यत्वादिप्रकारकज्ञानस्यानपेक्षणात् यदि च यादृशप्रकारता पक्षे धर्मे स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्नधर्म्यन्तरनिरूपितप्रकारतातदन्यप्रकारतानिरूपितविशेषणविषयतानिरूपितसंसर्गतासम्बन्धेन भानं प्रति अभावीयानुयोगिताविशेषभेदस्य कारणतां कल्पयित्वा ईदृशोपपत्तिः प्रतियोगिप्रकारतानिरूपितधर्मितावच्छेदकतापन्नावृत्तिप्रकारतावि·

शेषसम्बन्धेन लौकिकप्रत्यक्षं प्रत्यभावत्वभेदस्य कारणतां कल्पयित्वा च पूर्वोपत्तिर्वार्यते तदा तावतैव सकलापत्तिवारणादलं प्रतियोगिज्ञानहेतुतया । न चैवमपि प्रतियोग्यविषयकस्याभावत्वाप्रकारकप्रत्ययस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न शक्यते वारयितुमिति वाच्यं प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्येदन्त्वादिना ऽभावप्रत्यक्षस्येदन्त्वादिरूपतादृशविशेषणज्ञानासत्त्वे च तादृशाभावनिर्विकल्पकस्येष्टत्वात् अभावनिर्विकल्पकानभ्युपगमे प्रतियोगिज्ञानहेतुतयापि तद्वारणासम्भवात् इदन्त्वादिना ऽभावप्रत्यक्षे व्यभिचारवारणायाभावत्वप्रकारकाभावप्रत्यक्षं प्रत्येव प्रतियोगिज्ञानस्य हेतुताया आवश्यकत्वात् विशेषणानवच्छिन्नविषयतासम्बन्धेन प्रत्यक्षं प्रति अभावभेदस्य हेतुतां स्वीकृत्य तद्वारणे च मयापि तस्य तथैव वारणीयत्वात् । वस्तुतस्तु आपाद्याप्रसिद्धैव तादृशफलापत्त्यनवकाशः प्रसिद्धाया घटो नास्तीत्यादिबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र प्रतियोगितावच्छेदकघटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतुतायाः फलमुखत्वात्तादृशकारणविरहादेव न तच्छून्यकाले तदापत्तिः । यत्तु अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रकारकोपलम्भविरहो विशेष्यीभूतधर्मिप्रत्यासत्तौ ऽभावग्रहे हेतुः तथा च यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारको ऽनाहार्यभ्रमो ऽप्रसिद्धस्तदीयः समवायितया वाच्यत्वं नास्तीत्याकारकप्रत्ययो न व्यधिकरणधर्मावच्छिन्नाभावमवगाहितुमीष्टे तदीयतादृशप्रतियोग्युपलम्भविरहरूपतदीयाभावप्रत्यक्षकारणस्याप्रसिद्धेरिति तत्पुरुषीयतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाद्यभावविषयकत्वावश्यकत्वे सर्वत्रैव तादृशप्रकारत्वमुचितम् । एकाकारप्रतीतेः पुरुषभेदेन विषयतावैचित्र्यानुचितत्वादिति मिश्रोक्तव्यधिकरणधर्मावच्छिन्नाभावनिराकरणपन्थाः सोऽपि न साधीयान् अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्त्वोपलम्भत्वेन एककारणतायाः स्वत्वाननुगमेन दुर्वचतया विशिष्य कल्पनस्यावश्यकत्वे यत्र तादृशोपलम्भप्रसिद्धिः तत्रैव तादृशोपलम्भानन्तरमभावप्रत्ययवारणाय तदभावहेतुत्वोपगमात् व्यधिकरणधर्मावच्छिन्नाभावबु-

ग्री क्वचिदप्रसिद्ध्या तदभावहेतुत्वासम्भवेऽपि सन्निकर्षादिघटितसामग्रीतस्तदुत्पत्तौ बाधकाभावादित्यत आह यदि पुनरिति। स्वरसवाही विवादशून्यः घटत्वेन घटो नास्तीति पाठ घटत्वेन पटो नास्तीति पाठो न साधु, तादृशप्रतीतेः पटाद्यनुयोगिकघटत्वाद्यभावावगाहितया एव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगन्तृभिरुपगमात् प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वं भासत इति नियमस्य तदाकारप्रतीतिबलेनाशक्यवारणत्वात् आनुभविक इत्यस्य व्यधिकरणधर्मस्यावच्छेदकत्वावगाहितया ऽनुभवसिद्ध इत्यर्थकतया वा कथंचित्सङ्गमनीयः गीर्वाणगुरूणामपि न शक्यमित्यनेन प्रतीतिकारणबाधेन तादृशाभावनिराकरणावन्तो मिश्राद्य आक्षिप्ताः यदि तदेत्यनेन तादृशप्रतीतेरानुभविकत्वे विवाद प्रदर्श्य तादृशाभावस्याप्रामाणिकत्वं सूचितम् ॥

इति श्रीगदाधरभट्टाचार्यचक्रवर्तिविरचिता व्यधिकरणधर्मावच्छिन्नाभावदीधितिविवृतिः समाप्ता ॥

अनुमानगादाधर्याम्

पूर्वपक्षप्रकरणम् ।

(चि०) अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामानाधिकरण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति चेन्न ।

(दी०) साध्येति । साध्यस्यासामानाधिकरण्यं येषु तेषामनधिकरणत्वं तदभाववत्त्वमिति यावत् तस्मिन् सति साधिकरणत्वं तदवच्छिन्नाधिकरणताकत्वं सतिसप्तम्यावच्छेदकत्वलाभात् तच्चेहान्यूनवृत्तित्वम् एवं च साध्यवदवृत्तिसकलपदार्थाभाववत्त्वं यदधिकरणताया अन्यूनवृत्ति तत्त्वमिति तु फलितार्थः ।

(गा०) साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वमितिलक्षणे दलयोः सामानाधिकरण्यं सतिसप्तम्यर्थः । तत्र विशेष्यदलमवृत्तिहेतुकातिव्याप्तिवारणपरमिति यथाश्रुतव्याख्यानं न साधु अवृत्तौ साध्याधिकरणावृत्तित्वसत्त्वात् साध्यासामानाधिकरण्यपदस्य साध्यानधिकरणाधिकरणत्वाद्यर्थकतायामेव विशेषणदलस्यावृत्तिसाधारण्यसम्भवात् तथा च सति केवलान्वयिन्यव्याप्तेः अथ साध्यासामानाधिकरण्यं नोकरूपं किं तु साध्याधिकरणानाधिकरणत्वरूपं तदनधिकरणत्वमप्यवृत्तिसाधारणम् अधिकरणाप्रसिद्ध्या तदनधिकरणाप्रसिद्धेरवृत्तौ तदसत्त्वादिति चेदेवमपि केवलान्वयिनीत्यादिग्रन्थवि-

रोध तेन ग्रन्थेन गगनादौ साध्यासामानाधिकरण्यप्रसि
द्धिदर्शनात् साध्याधिकरणयत्किञ्चिदनधिकरणके साध्यन्यून
वृत्तिहेतावव्याप्तिवारणाय साध्याधिकरणसामान्यानधिकरणत्ववि
वक्षणस्यावश्यकतया वृत्तिमत्यपि केवलान्वयिसामाधिकरण्य
प्रसिद्ध्यसम्भवात्तत्साध्यके ऽव्याप्तेः साध्यसमानाधिकरणे व्यभि
चारिणि अतिव्याप्तेश्चेत्यालोच्य लक्षणमन्यथा व्याख्यातुमुपक्रमते
साध्यस्येति । साध्यपदासामानाधिकरण्यपदयोर्बहुव्रीहिबलात्सा
ध्यासमानाधिकरणलाभः तदनाधिकरणत्वं यदि तदधिकरणत्वाभा
वः तदा केवलान्वयिनि अवृत्तेरेव साध्यवद्वृत्तितया तदधि
करणत्वाप्रसिद्ध्याऽव्याप्तिरतो ऽनधिकरणपदमभाववदर्थकतया
व्याचष्टे तदभाववत्त्वमिति । सतिसप्तम्या सामानाधिकरण्यार्थ
कतया तदभाववत्त्वसमानाधिकरणसाधिकरणत्वस्य विवक्षितत्वे
धूमादिहेतौ वह्न्यभावसमानाधिकरणधूमत्वादिसत्त्वादव्याप्तिरत
आह तदवच्छिन्नेति । अवच्छेद्यावच्छेदकभावः कुतो लभ्यत इत्या
शङ्कायामाह सतिसप्तम्येति । अनधिकरणत्वे सतीत्यत्र या सप्तमी
तया इत्यर्थः । अवच्छेदकत्वलाभादिति । तदभाववत्त्वरूपप्रकृत्यर्थ
अधिकरणतानिरूपकत्वरूपसमभिव्याहृतसाधिकरणत्वपदार्थैकदे
शाधिकरणतानिरूपकतावच्छेदकत्वलाभादित्यर्थः अवच्छेदकत्व
घेदनतिरिक्तवृत्तित्वरूपं विवक्ष्यते तदा विषमव्याप्ते धूमा
द्यावव्याप्तिः वह्न्यभावसमानाधिकरणपदार्थाभावस्य हेतुशून्यसा
ध्याधिकरणसाधारणस्य हेत्वनतिरिक्तवृत्तित्वात् साध्यव्यापके
व्यभिचारिण्यतिव्याप्तिश्च तत्र साध्यसमनियतस्य साध्यासमा
धिकरणपदार्थाभावत्वस्य हेत्वनतिरिक्तवृत्तित्वादत आह त
देहेति । अन्यूनवृत्तित्वं व्यापकत्वं समुदितार्थमाह साध्यवद्वृत्ती
ति । साध्यानधिकरणाधिकरणकत्वरूप साध्याधिकरणानधिकरण
कत्वरूपं च साध्यासामानाधिकरण्यं केवलान्वयिसाध्यके न प्र
सिद्धमिति साध्यासामानाधिकरण्यपदस्य साध्यवद्वृत्तित्वार्थ
कता स्फुटीकृता धूमवद्वृत्तिहृदत्वाद्यभावस्य वह्निव्यापकत्वाद
तिव्याप्तिरतः साध्यवद्वृत्तयो ये ये पदार्थास्तदभावकूटलाभाय
मक्तेति । इत्थं च साकल्यानवच्छिन्नावत्पदार्थाभावस्य केवलान्व
यित्वेऽपि न क्षतिः साध्यवद्वृत्तित्वावच्छिन्नप्रतियोगिताकसा

मान्याभावश्च निवेशयितुमशक्यः येन येन सम्बन्धेन यस्य साध्यवद्वृत्तित्वं तत्तत्सम्बन्धावच्छिन्नतदभावस्य निवेशनीयत्वात् प्रतियोगितावच्छेदकसम्बन्धाननुगमेनाभावैक्यासम्भवात् विशेषणताविशेषसम्बन्धानिवेशपक्षे तु तदननुगमविरहात् एक एव सामान्याभावो निवेशनीयः साध्यपदं साध्यतावच्छेदकविशिष्टपरम् अतो विशिष्टसत्तावान् जातेरित्यादौ गुणत्वादेः शुद्धसाध्यवद्वृत्तित्वेऽपि न क्षतिः तद्वत्त्वं च साध्यतावच्छेदकसम्बन्धेन बोध्यं तेन समवायेन वह्नौ साध्ये पर्वतत्वादेर्वह्निसंयोगिवृत्तित्वेऽपि संयोगेन हेतौ धूमे नातिव्याप्तिः यत्पदं हेतुतावच्छेदकविशिष्टपरम् अतो द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः तदधिकरणता हेतुतावच्छेदकसम्बन्धेन बोध्या तेन समवायादिना धूमाधिकरणताया निर्वह्निसाधारण्येऽपि नाव्याप्तिः ॥

ननु हेतुव्यापकतानिवेशेनैवोपपत्तौ तदधिकरणत्वनिवेशवैयर्थ्यमत आह यथासन्निवेश इति ।

(दी०) यथासन्निवेशे अधिकरणत्वस्य न वैयर्थ्यं हेतुतावच्छेदकसम्बन्धलाभाय वा तत् । येन येन सम्बन्धेन यो यः साध्यवद्वृत्तिस्तेन तेन सम्बन्धेन तत्तदभावो बोध्यः । एतेन साध्यवद्वृत्तित्वं यदि साध्यतावच्छेदकसम्बन्धेन विवक्षितं तदा समवायेन साध्यतायां साध्यवदसमवेतस्य सार्वत्रिकत्वात् सकलतच्छून्याप्रसिद्धिः । अथ तदभावोऽपि तादृशेनैवसम्बन्धेन वाच्यस्तदा जातिमान् प्रमेयत्वादित्यादावतिव्याप्तिः जातिमदसमवेतानां समवायेनाभावस्य केवलान्वयित्वादत एव न संयोगेन समवायेन वा इदं न जातिमत् जातित्वादित्यादौ साध्यवत्समवेताप्रसिद्धेश्च । नापि साधनतावच्छेदकेन इदमेतद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तेः । नापि विषयतया घटभिन्नं मेयत्वादित्यत्राप्यतिव्याप्तेः सविषयकमात्रस्यैव घटभिन्नविषयत्वात् । घटनिर्विकल्पकेऽपि घटत्वादिभानात् । नापि

सम्बन्धमात्रेण द्रव्यं सत्त्वादित्यादावतिव्याप्तेः । वृत्तिमन्मात्रस्यैव स्वरूपसम्बन्धेन महाकाले वृत्तेरवृत्तेरभावस्य च केवलान्वयित्वादिति प्रत्युक्तम् । विशेषणताविशेषेण वा साध्यवदवृत्तित्वं वक्तव्यं सर्वत्रैव तत्तद्व्यक्तित्वे तत्तदन्यत्वे तत्प्रकारकप्रमाविषयत्वे वा तत्सुलभम् । तेनैव सम्बन्धेन तदवच्छिन्नसामान्याभावो वाच्य इति ।

(गा०) यथोक्तविशेष्यविशेषणभावक्रमेण निवेश इत्यर्थः। न वैयर्थ्यमिति हेतुविशेषितव्यापकताया प्रकृतलक्षणाघटकतया तद्घटितस्य लक्षणत्वसम्भवेऽपि न वैयर्थ्यावसर प्रकृतलक्षणघटकस्य तथात्वसम्भव एवाधिकांशवैयर्थ्यात् । ननु वैयर्थ्याभावेऽप्यनतिप्रयोजनकत्व दुर्वारमेवेत्यत आह हेतुतावच्छेदकसम्बन्धेनेति । हेतुतावच्छेदकसम्बन्धेन हेतु प्रति व्यापकताया लक्षणघटकत्वसूचनायेत्यर्थः । सम्बन्धसामान्येन हेतु प्रति व्यापकताया निवेशे वह्न्यादेरपि धूमाद्यव्यापकतापत्तेरिति भाव । यत्किञ्चित्सम्बन्धेन साध्यवदवृत्तेर्यत्किञ्चित्सम्बन्धावच्छिन्नाभावनिवेशे धूमाद्यसमानाधिकरणायोगोलकत्वादेर्व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य वह्न्यादिव्यापकत्वादतिव्याप्ति साध्यतावच्छेदकादिसम्बन्धेन साध्यवदवृत्तित्वादिविवक्षणे च वक्ष्यमाणदोषाणा दुर्वारतेत्यालोच्य साध्यवदवृत्तितानिर्वाहकसम्बन्धाभावप्रतियोगितावच्छेदकसम्बन्धयोरैक्य विवक्षति येन येनेति । सयोगादिना ऽयोगोलकत्वादेर्धूमादिमदवृत्तित्वात्तत्सम्बन्धावच्छिन्नतदभावस्य च वह्न्यादिव्यापकत्वादतिव्याप्तिरतो येन येनेति वीप्सा । तत्तदभाव इति सयोगादिसम्बन्धावच्छिन्नसाध्यवदसंयुक्तत्वाद्यवच्छिन्नसामान्याभावा एव यथायथ लक्षणघटका न तु तत्तत्पदार्थाना तत्तद्व्यक्तित्वावच्छिन्नाभावाद्यनन्ताभावनिवेशप्रसङ्गादित्यवधेयम् । एतादृशविवक्षाप्रयोजन दर्शयति एतेनेत्यादिना । साध्यतावच्छेदकसम्बन्धेनेति अस्य वाभावप्रतियोगितया भासमानायां वृत्तावन्वय । समवायेनेति संयोगादीनामप्युपलक्षण साध्यवदसमवेतस्येति । मेयत्वादेरिति

शेषः । असमवेतपदमपि असंयुक्ताद्युपलक्षणं सकलतच्छून्येति साध्यवदवृत्तिसकलपदार्थाभावाप्रसिद्धिरित्यर्थः । एकसम्बन्धेन व्यभिचारनिरूपकाधिकरणवृत्तेरपि अपरसम्बन्धावच्छिन्नाभावस्य हेतुव्यापकतामादायातिव्याप्तिवारणाय साध्यवदवृत्तेः सम्बन्धसामान्येनाभावो ऽवश्यं निवेशनीयः संयोगसमवायस्वरूपादिनिष्ठसम्बन्धताविशेषाणां मिथो भिन्नत्वेऽपि सम्बन्धतात्वेनानुगतानां तावन्निष्ठप्रतियोगितावच्छेदकसम्बन्धतावच्छेदकत्वे मानाभावात् सामान्यविशेषभावेनावच्छेदकीभूतसम्बन्धतयोर्भेदेनात्माश्रयविरहात् प्रत्येकं सकलसम्बन्धावच्छिन्नाभावकूट एव वा निवेश्य इत्यभिप्रायेणेदम् अन्यथा मेयत्वादेरपि समवायादिना ऽभावप्रसिद्ध्या ऽसङ्गत्यापत्तेः । तादृशेनैवेति साध्यतावच्छेदकसम्बन्धेनैवेत्यर्थः । एवकारेण सम्बन्धसामान्यव्यवच्छेदः तावतैव धूमवान् वह्नेरित्यादावतिव्याप्तिवारणसम्भवात् अयोगोलकीयवह्न्यादेः साध्यतावच्छेदकसम्बन्धेनाभावस्य हेत्वव्यूनवृत्तिताविरहादिति भावः । जातिमानिति समवायेन जातित्वावच्छिन्नसाध्यके व्यभिचारिणीत्यर्थः । केवलान्वयित्वादिति व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकत्वेनेत्यादिः केवलान्वयित्वे सुतरामेव हेत्वव्यूनवृत्तित्वमिति तदभिधानम् । विशिष्य समवायादिसम्बन्धनिवेशेन निरस्यति अत एवेति एतादृशातिव्याप्तेरेवेत्यर्थः समवायेन संयोगेन वा साध्यवदवृत्तेस्तेन सम्बन्धेनाभावः शक्यनिवेश इति शेषः । जातिमदसंयुक्तस्य संयोगेनाभावस्यापि केवलान्वयित्वादिति भावः । एतत्पक्षद्वयेऽधिकामव्याप्तिमाह इदमिति । समवेतादीत्यादिना संयुक्तपरिग्रहः । साधनतावच्छेदकेनेति सम्बन्धेनेति शेषः । साध्यवदवृत्तिरित्यादिकमपि पूरणीयम् । एवमग्रेऽपि जात्यादिसाध्यके व्यभिचारिणि स्वरूपसम्बन्धस्यैव साधनतावच्छेदकतया तेन सम्बन्धेन साध्यवदवृत्तिजातित्वादेस्तादृशसम्बन्धावच्छिन्नाभावस्य हेत्वव्यापकत्वात्तत्कल्पे ऽतिव्याप्तिशङ्कावतारः । इदमिति पक्षनिर्देशः एतदित्यस्य पक्षनिर्देशतात्पर्यपरिहाराय तथा सति रूपत्वावच्छिन्नभेदस्य साध्यतालाभेन तादृशसाध्यवदसमवेतरूपत्वादेः प्रसिद्ध्या ऽतिव्याप्त्यनवकाशात् । अतिव्याप्तेरिति एतद्रूपमात्रसमवेताप्रसिद्ध्या एतद्रूपभिन्ना-

समवेतस्य समवायरूपसाधनतावच्छेदकसम्बन्धावच्छिन्नाभावस्य व्यधिकरणसम्बन्धावच्छिन्नाभावतया केवलान्वयित्वादिति भाव । तद्घटादिमात्रसमवेतस्य रूपादे प्रसिद्ध्या गुणरूपैकव्यक्तिकि पक्षानुसरण नापि विषयतयेति व्यभिचारिणि साध्यवद्वि षयकस्य व्यभिचारनिरूपकाधिकरणविषयकज्ञानादेर्विषयतास म्बन्धावच्छिन्नाभावमादायातिव्याप्तिनिराकरणासम्भवात् शङ्का घतार । घटभिन्न मेयत्वादित्यत्रापीत्यपिना पूर्वोक्तस्थलपरि ग्रह घटभेदसाध्यकस्य नानाव्यक्तिविपक्षकस्य द्रव्यविपक्षकत्व च पूर्वकल्पापेक्षया एतत्पक्षस्यातिद्वेयतासूचनायैव तस्याधिकस्य प्रदर्शनमतिव्याप्तिबीज विषयतया साध्यवद्वृत्तेस्तत्सम्बन्धाव च्छिन्नाभावस्य केवलान्वयित्व दर्शयति सविषयकेति । मात्रपद कृत्स्नपर घटभिन्नाविषयकत्वादिति घट इत्याकारस्य घटादिविष यकज्ञानादेरपि विशेषणीभूतघटत्वतत्सम्बन्धविषयकत्वादिति भाव निर्विषयकस्य तादृशसम्बन्धावच्छिन्नाभावस्य च व्यधिकर णसम्बन्धावच्छिन्नाभावत्वादिति शेष । ननु विशिष्टबुद्धौ वि शेषणादिविषयकत्वनियमेऽपि घटभिन्नाविषयक घटनिर्विक ल्पकमेव सम्भवतीत्यत आह घटनिर्विकल्पकेऽपीति । घ टत्वादीत्यादिना रूपादिपरिग्रह तद्भासकसन्निकर्षादिघटितसा मग्र्या अपि तदानीं सत्त्वात् इन्द्रियाणा स्वव्यवस्थापकगुण पुरस्कारेणैव प्रवृत्तेश्चाक्षुषादौ रूपादिभानस्यावश्यकत्वाच्चेति भाव । सम्बन्धमात्रेण साध्यवद्वृत्तित्व साध्यवत्सम्बद्धत्वसामा न्य साध्यवदाधेयत्वसामान्य वा तादृशसम्बन्धेनाभाव स म्बन्धत्वावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धताक एका ऽभाव प्रतियोगितावच्छेदकतया ये ये सम्बन्धास्तदवच्छिन्नाभावकूटो वा स्वरूपसम्बन्धेन कालिकविलक्षणसम्बन्धेन प्रत्युक्तमिति यत्र साध्यवति साध्यतावच्छेदकसम्बन्धेनावर्तमान तेन सम्बन्धेन क्वचिदपि न वर्तते तत्रापि विशेषणताविशेषेण साध्यवद्वृ त्तेस्तेन सम्बन्धेन व्यभिचारनिरूपकाधिकरणवृत्तेर्वस्तुन प्रसि द्धा तस्य तादृशसम्बन्धावच्छिन्नाभावमादायातिव्याप्तिनिराकर णसम्भवादिति भाव । एव सति विशेषणताविशेषस्यैव वि शिष्योपादानमुचित सम्बन्धान्तरनिवेशने प्रयोजनाभावादित्या

शयेनाह विशेषणताविशेषेणेति दैशिकविशेषणतयेत्यर्थः । एवं सति दर्शितातिव्याप्तीनां नावकाश इति सूचयितुं व्यभिचारनिरूपकाधिकरणे तेन सम्बन्धेन वृत्तिमति तेन सम्बन्धेन साध्यवदवृत्तित्वसौलभ्यमाह सर्वत्रैवेति व्यभिचारिहेतुक इति शेषः । तत्तद्व्यक्तित्व इति यद्यक्तौ हेतौ साध्यव्यभिचार इत्यादिः अयोगोलकादिनिष्ठतद्व्यक्तित्वं तन्मात्रवृत्तिरूपाधारमकमेव न तु पदार्थान्तरं तस्य च न विशेषणताविशेषेण वृत्तिरिति केवलान्वयिनं तस्य तादृशसम्बन्धावच्छिन्नाभावमादाय नातिप्रसङ्गनिराकरणसम्भव इति तत्र तत्सौलभ्यमनुपयुक्तमित्याशङ्क्याह तत्तदन्यान्यत्व इति तत्तद्व्यक्तित्वावच्छिन्नभेदावच्छिन्नभेदोऽपि स्वप्रतियोगितावच्छेदकतत्तद्व्यक्तित्वादनातिरिक्त एव तथा च वक्ष्यते न हि घटभिन्नभेदो घटत्वादतिरिच्यते इत्याशङ्क्याह तत्प्रकारकेति तत्तद्व्यक्तित्वादिप्रकारकेत्यर्थः । तत्प्रकारकभ्रमाविषयत्वस्य साधयत्यपि सम्भवात्प्रमेति । तत् तेन सम्बन्धेन साध्यवदवृत्तित्वं विशिष्य समवायादिसम्बन्धनिवेशे जात्यभावादिसाध्यकस्थले तेन सम्बन्धेन साध्यवदवृत्तित्वाप्रसिद्धिरुक्ता विशेषणताविशेषस्य विशिष्य निवेशे तु न तद्दोषावसर इति सूचयितुं सर्वत्र सद्धेतौ साध्यवन्निष्ठतद्व्यक्तित्वादौ तेन सम्बन्धेन साध्यवदवृत्तित्वप्रसिद्धिपरमिति तु न सम्भवति ज्ञेयत्ववाच्यत्वादिष्वेव तत्प्रसिद्धिसम्भवात् तत्तद्व्यक्तित्वाद्यनुधावनस्य वैयर्थ्यापातात् अभावे तत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशे यत्किञ्चित्सम्बन्धावच्छिन्नाभावमादायातिव्याप्तिः सम्बन्धसामान्येनाभावनिवेशे च तेन सम्बन्धेन साध्यवदवृत्तेः साध्यवत्समवेतादेस्तादृशाभावस्य हेतुमत्यसत्त्वादसम्भव इति तन्निवेशयति तेनैवेति । इदानीं प्रतियोगितावच्छेदकसम्बन्धाद्यनुगमेन एक एवाभावो निवेशयितुं शक्यत इत्यभिप्रायेणाह तदवच्छिन्नसामान्याभाव इति । तादृशसाध्यवदवृत्तित्वावच्छिन्नसामान्याभाव इत्यर्थः ।

मिथ्याव्याख्यानमुपन्यस्यति केचित्त्विति ।

(दी०) केचित्तु नञ्द्वयसत्त्वेन प्रमाभ्यामि माध्यविरो-

धीनि साध्यासमानाधिकरणानीति यावत् तानि सामानाधिकरण्यानधिकरणानि यस्य तत्त्वं साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसामानाधिकरण्यसामान्यकत्वमिति फलितार्थः । अत्र च साध्यसामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदकसम्बन्धेन वृत्तिः परं च सामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेतुमति तेनैव वृत्तिः तेन समवायेन पृथिवीत्वादेः साध्यतायां व्यभिचारिणि कालिकसम्बन्धेन हेतौ घटादौ द्रव्यत्वादेश्च समवायेन साध्यतायां समवायेन हेतौ सत्त्वगुणत्वादौ नातिप्रसङ्गः । न वा संयोगेन वह्न्यादौ साध्ये समवायेन तद्व्याप्यस्य रूपविशेषादेः कालिकसम्बन्धेनाधिकरणे काले स्पन्दे च कालपरिमाणस्पन्दत्वादेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि चाप्रसङ्गः । सम्बन्धविशेषेण व्याप्यत्वलाभाय साधिकरणत्वमित्याहुस्तच्चिन्त्यम् ।

(गा०) नञ्व्यत्यासेन साध्यपदानन्तरं श्रूयमाणस्य नञ्पदस्य पूर्वाभिसन्धानेन तथा चासाध्यसामानाधिकरण्येति वक्तव्ये साध्यासामानाधिकरण्येनेत्यभिधानं प्रमादेनेति भावः । असाध्यपदस्य साध्यभिन्नार्थकत्वे एतद्वृत्तिधर्मवान् एतत्त्वादित्याद्यतिरिक्ते सर्वत्र साध्यभिन्नस्य हेतुसमानाधिकरणतया क्वचिच्च साध्यभिन्नाप्रसिद्ध्या ऽव्याप्तिरतो नञ्पदस्य विरोध्यर्थकतामाह साध्यविरोधीनीति विरोधस्य तदभावव्याप्यतारूपत्वे केवलान्वयिनि साध्याभावाप्रसिद्ध्या ऽव्याप्तिरतः साध्यासमानाधिकरणानीति । केवलान्वयिन्यव्याप्तिवारणाय साध्यासामानाधिकरण्यप्रसिद्धिः व्यभिचारिहेतावपि साध्यासमानाधिकरणस्यान्ततो ऽप्रसिद्धेरेव हेत्वसमानाधिकरणतयाऽतिव्याप्तिरिति साध्यासामानाधिकरण्यकपोद्देश्यतावच्छेदकावच्छेदेन हेत्वसामानाधिकरण्यरूपविधेयान्वयो ऽत्र विवक्षित इत्याशयेन व्यापकत्वरूपमपच्छिन्नत्वमन्तर्भावयन्

सामानाधिकरण्याधिकरणत्वाभावे अधिकरणत्वांशमनतिप्रयोजनकतया परित्यजन् फलितार्थमाह साध्येति । साध्यपदं साध्यतावच्छेदकविशिष्टार्थकं तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः व्यापकत्वं तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं न तु तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् अभावत्वादिकमादायातिप्रसङ्गात् गौरवाच्च साध्यादिनिष्ठहेतुसामानाधिकरण्यव्यक्तिविशेषाभावस्य साध्यसामानाधिकरण्याभावव्यापकतामादायातिव्याप्तिवारणाय सामान्यपदं व्यापकाभावप्रतियोगितावच्छेदकस्वविशिष्टसामानाधिकरण्यत्वकधर्मवत्त्वमिति तु निष्कर्षः तेन व्यभिचारिणि हेतुसामानाधिकरण्यसामान्यगगनोभयत्वावच्छिन्नाभावस्य साध्यसामानाधिकरण्याभावव्यापकत्वेऽपि न क्षतिः स्वपदं हेतुतावच्छेदकपरं तद्विशिष्टसामानाधिकरण्यनिवेशात् द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः परं च सामानाधिकरण्यं हेतुसामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धनिवेशनस्य व्यावृत्तिमाह समवायेन पृथिवीत्वादेरिति । व्यभिचारिणि हेतौ घटादौ नातिप्रसङ्ग इत्यग्रिमेण सम्बन्धः । वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन पृथिवीत्वाधिकरणे काले तादृशहेतुतावच्छेदकसम्बन्धेन वृत्तेरवृत्तिमात्रनिष्ठतदभावं प्रति हेतुसामानाधिकरण्याभावस्य व्यापकत्वेऽपि समवायरूपसाध्यतावच्छेदकसम्बन्धेन साध्यवत्पृथिव्यादिनिरूपितकालिकसम्बन्धावच्छिन्नवृत्त्यभावस्य महाकालादौ हेतुसमानाधिकरणे जन्यपृथिव्यसमानकालीने चरमध्वंसादौ सत्त्वेन तं प्रत्यस्याव्यापकत्वादिति भावः । साध्यवद्वृत्तित्वे हेतुतावच्छेदकसम्बन्धनिवेशप्रयोजनमाह द्रव्यत्वादेश्चेत्यादि । समवायेन साध्याधिकरणमहाकाले वृत्तिमन्मात्रस्यैव कालिकसम्बन्धेन वृत्तिः साध्यवति सम्बन्धसामान्येन वृत्तेरभावं प्रति हेतुमद्वृत्तित्वाभावस्य व्यापकत्वेऽपि गुणत्वादिसाधारणं हेतुतावच्छेदकसम्बन्धेन द्रव्यादिवृत्तित्वाभावं प्रति तस्याव्यापकत्वादिति भावः । हेतुमत्त्वे हेतुतावच्छेदकसम्बन्धनिवेशप्रयोजनमाह संयोगेन वह्न्यादौ साध्य इति । वह्निमानेतद्रूपादित्यादावित्यर्थः । समवायेनेति व्याप्यताग्रहे कालपरिमाणस्पन्दत्वादेर्वृत्तावपि ना-

प्रसङ्ग इत्यन्वयः । काले कालपरिमाणादेर्वृत्तिकथनेन साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदकसम्बन्धेन वृत्तेरभाववति न च सम्बन्धसामान्येन हेतुमत्समवेतत्वाभावसत्त्वात्तस्य तादृशाभावव्यापकत्वमित्यव्याप्तिप्रसक्तिर्बीजं दर्शितं महाकालनिष्ठो यो वह्न्यादिसंयोगस्तत्साधारणरूपेण संयोगस्य साध्यतावच्छेदकसम्बन्धत्वे महाकालपरिमाणे सामानाधिकरण्याभावासम्भवात् स्पन्दत्वानुधावनम् । चतुर्थसम्बन्धनिवेशप्रयोजनमाह समवायेनेति । तदधिकरणे रूपविशेषाधिकरणे घटादे संयोगेन वृत्तावपीति । एतेन साध्यवत्समवेतत्वाभाववति घटादौ हेतुसमवायिनि सम्बन्धसामान्येन वृत्तेरभावसत्त्वात्तस्य तादृशाभावाव्यापकत्वं दर्शितं सत्यन्तस्यैवाव्याप्तिव्यावृत्ततया साधिकरणत्वमित्यस्य वैयर्थ्यमाशङ्क्याह सम्बन्धविशेषेणेति । उपदर्शितसम्बन्धनिवेशाभावेत्यर्थः । तथा च साधिकरणत्व लक्षणे न निवेश्यमिति भावः । तच्चिन्त्यमिति चिन्ताबीजम् एतद्रूपमिश्र गुणत्वान्महाकालान्यो घटादित्यादावतिव्याप्तिः हेतुतावच्छेदकसमवायकालिकसम्बन्धेन साध्यवद्वृत्तित्वस्य तेन सम्बन्धेनावृत्तावेव प्रसिद्धेः तादात्म्येन सर्वविषयकज्ञानसाधारण साध्यके विषयितया न हेतावव्याप्तिः तेन सम्बन्धेन साध्यवदसम्बन्धित्वाप्रसिद्धेः यदि च सामानाधिकरण्यद्वयघटक निरूपके हेतुतावच्छेदकसम्बन्धं परित्यज्य सम्बन्धस्य निरूपकतावच्छेदकसम्बन्धो वा निवेश्यते तदा नैतद्दोषावकाश इत्यवधेयम् ।

यथाव्याख्यातलक्षणस्य निर्दोषतया मूलोक्तदूषणासङ्गतिमाशङ्क्याह यथाश्रुतमिति ।

(टी०) यथाश्रुतं यथासम्भवं विकल्प्य दूषयति नेत्यादि ।

(चि०) साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरणत्वं वा केवलान्वयिनि यत्किञ्चित्साध्याधिकरणानधिकरणे धूमे चाव्याप्तेः । नापि स्वसमानाधिकरणात्यन्ताभा

वाप्रतियोगिसाध्यसामानाधिकरण्यं पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् द्रव्यत्वादेरव्याप्यतापत्तेश्च । न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अभावविशेषणं देय संयोगादौ साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात्। न हि प्रतियोगिविरोधी संयोगादेरपरो ऽत्यन्ताभावोऽस्ति अधिकरणभेदेनाभावभेदाभावात् । नापि साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः मूले वृक्षः कपिसंयोगवानित्यबाधितप्रतीतेः तदन्योन्याभावस्यापि तत्र सत्त्वात्। न चैवं भेदाभेदः अवच्छेदकभेदेन तत्सत्त्वाभ्युपगमात् साधनवन्निष्ठान्योन्याभावाप्रतियोगि साध्यवद्यस्येति षष्ठयर्थव्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्याप्तिनिरूप्यत्वात् वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात् । नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यं साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेः महानसादौ समवायितया वह्निवह्निमतोरत्यन्तान्योन्याभावयोः सत्त्वात् धूमादावप्युक्तलक्षणाभावाच्च ।

(दी०) नन्वप्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नं वक्तव्यमत आह द्रव्यत्वादेरिति । प्रतियोगिविरो-

धित्वं प्रतियोगितदधिकरणात्यवृत्तित्वं । व्याप्यवृत्तित्वं स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम् । अधिकरणेति । तथा सत्यभाव एव न सिध्येदिति भावः । संयोगाद्यभावस्य च द्रव्ये प्रतियोगिसामानाधिकरण्यमव्याप्यवृत्तित्वं च प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यन्ताभावप्रतियोगित्वं गुणे च प्रतियोग्यसामानाधिकरण्यं व्याप्यवृत्तित्वं च प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुणनिष्ठात्यन्ताभावाप्रतियोगित्वम् एतानि न च भेदकान्यविरोधात् सामान्यतश्चाव्याप्यवृत्तौ प्रतियोगिसमानाधिकरणे च न तथात्वव्यतिरेक इति भावः । ननु साध्यवान् यस्येति साध्यवति सम्बन्धोऽन्वेष्टव्यः स चाधिकरणत्वं साध्यसाधनयोरपि सामानाधिकरण्यमेवेत्यतो दूषणान्तरमाह साध्येति । साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे । यत्तद्भ्यामेव व्याप्तिर्निर्वक्तव्येत्यत आह वह्निमदिति । ननु यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नं न भवति तद्रूपावच्छिन्नेन समं तस्य सामानाधिकरण्यं व्याप्तिरित्यर्थः । न च धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निः धूमवान् वह्निमानित्यप्रतीतेरत आह-विशेषेति । य एव प्रत्येकं वह्निमद्भेदा धूमसमानाधिकरणास्त एव चैकाधिकरणवृत्तित्वावच्छिन्ना वह्निमत्सामान्यभेदबुद्धिमुपपादयन्ति तत्प्रतियोगितावच्छेदकश्च वह्नित्वावच्छिन्नो वह्निरिति भवत्यव्याप्तिः । साधनेति । वैयधिकरण्यं तदनधिकरणवृत्तित्वं तच्च केवलान्वयिनः साधनस्याप्रसिद्धमतिप्रसञ्जकं च पृथिवी द्रव्यत्वादित्यादौ अतः समानाधिकरणोपादानं धूमादेरपि वह्न्यादि-

समानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्वमतो यावदिति । यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तित्वं द्रव्यत्वादेस्तदनधिकरणमात्रवृत्तित्वं च निखिलघटपटादिरूपादीनां तथापि तादृशधर्मानधिकरणमात्रवृत्तित्वानवच्छेदकसाध्यतावच्छेदकवत्त्वं बोध्यम् । न हि पृथिवीत्वसमानाधिकरणस्तादृशः कश्चिदेको धर्मो यदनधिकरणमात्रवृत्तितावच्छेदकं रूपत्वादि धूमत्वादिकं तु वह्न्यादिसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तितावच्छेदकं तदवच्छेदकत्वं च तदनतिरिक्तवृत्तित्वं तच्च तच्छून्यधर्मावृत्तित्वं तेन मेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तितानधिकरणगगनादिवृत्तित्वेऽपि द्रव्यत्वस्य द्रव्यसाध्यकमेयत्वे नातिप्रसङ्गः ।

(गा०) दूषयतीत्यनेन सम्बन्धः । यथासम्भवमिति विकल्पक्रियाविशेषणं साधनसमानाधिकरणाभावाप्रतियोगित्वघटितलक्षणे नानाव्यक्तिसाध्यस्य विशेषाभावमादाय दत्तं दोषमुद्धृत्य दूषणान्तरमवतारयति नन्विति । प्रतियोगितानवच्छेदकेति । न चैव धूमवान् वह्नेरित्यादौ धूमादेस्तथाविधद्रव्यत्वाद्यवच्छिन्नत्वमादाय दोषः अनवच्छेदको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यं तद्रूपावच्छिन्ननिरूपितव्याप्तिरिति विवक्षणात् प्रतियोगिविरोधित्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं व्याप्यवृत्ति च यत्किञ्चित्स्वाधिकरणनिष्ठाभावाप्रतियोगित्व तदा संयोगी सत्त्वादित्यादौ वक्ष्यमाणातिव्याप्त्यसङ्गतिः हेत्वधिकरणान्तर्भावेन तादृक्लक्षणेऽतिव्याप्तिपरिहारस्यापि सम्भवादित्यग्रिमग्रन्थानुरोधेन तदुभयं व्याचष्टे प्रतियोगिविरोधित्वमिति । तथासतीति । अधिकरणभेदेनाभावभेदस्वीकार इत्यर्थः । अभाव एव अधिकरणस्वरूपातिरिक्ताभाव एव अभावाधिकरणस्याभावरूपत्वे घटादिशून्यानन्ताधिकरणव्यक्तीनां घटाद्यभावत्वं कल्पनीयमिति तदपेक्षया घटाद्यभावत्वस्य एकैकव्यक्तावेव कल्पनमुचितं लाघवादिति युक्त्या तत्सिद्धिः । यदि चाभावा अपि

अधिकरणसमसत्त्वकास्तदा किमपराद्धमधिकरणानामभावत्वरूपनयेति भावः । ननु द्रव्यगुणादिनिष्ठसंयोगाद्यभावस्याभेदे संयोगाभावो द्रव्ये प्रतियोगिसमानाधिकरणो गुणे न तथा गुणे व्याप्यवृत्तिः द्रव्ये न तथेति व्यपदेशो न स्यात्तस्य मिथो विरुद्धधर्मद्वयविषयकत्वादित्याशङ्क्य तादृशाभावव्यवहारविषयाणामविरोधं व्युत्पादयितुं तन्निर्वक्ति संयोगाद्यभावस्य चेति । द्रव्य इति अव्याप्यवृत्तित्वमित्यत्राप्यनुषज्यते यथासत्त्वमुद्दिश्यद्रव्यं विधेयान्वयः एवमग्रेऽपि । गुण इति व्याप्यवृत्तित्वमित्यत्रापि सम्बध्यते । न भेदकानि संयोगाभावस्येत्यादि अविरोधादिति । प्रतियोग्यधिकरणवृत्तित्वतदनधिकरणवृत्तित्वयोर्भावाभावरूपताविरहेण एकत्रापि संभवात् द्रव्यनिष्ठाभावप्रतियोगित्वगुणादिनिष्ठाभावाप्रतियोगित्वयोरपि नीलघटपीतघटाभावसमशीलतया तथात्वादिति भावः । उक्तव्यवहाराः पारिभाषिका एव अवयवव्युत्पत्त्या तादृशार्थालाभादिति ध्येयम् । यादृशयोर्विरोधस्तादृशयोर्न व्यवहारविषयतेत्याह सामान्यत इति तथात्वव्यतिरेक इत्यनेनास्य सम्बन्धः । अव्याप्यवृत्तौ प्रतियोगिसमानाधिकरणे चाति तथात्वेन च व्यवह्रियमाणे संयोगाभाव इत्यर्थः । सामान्यतो न तथात्वव्यतिरेको न स्वाधिकरणनिष्ठाभावप्रतियोगित्वसामान्याभावः प्रतियोग्यधिकरणवृत्तित्वसामान्याभावः व्यपदिश्यत इति शेषः । स्वसमानाधिकरणान्योन्याभावप्रतियोगिसाध्यवत्कत्वमित्यत्र साध्यसाधनयोः सम्बन्धो निविष्टः स च व्याप्यव्यापकभाव इत्यात्माश्रय इति दूषणं दूषणान्तरानवतारायोद्धरति नन्विति । यस्मात्यनेन साध्यवति साधनस्य सम्बन्धोऽन्यएव विवक्षणीयः स चाधिकरणत्व न तु व्याप्यव्यापकभाव इति शेषः । तथा च नात्माश्रय इति भावः । साध्यसाधनयोः सम्बन्धनिवेशेऽपि न क्षतिः तयोरपि सम्बन्धान्तरसम्भवादित्याशयेनाह साध्यसाधनयोरपीति । सामानाधिकरण्यमेव सम्बन्धः सम्भवतीति शेषः । तथा च स एव वा विवक्षणीय इति भावः । मूले साध्यसाधनयो साध्यत्वसाधनत्वयोर्व्याप्तिनिरूप्यत्वात् व्याप्तिघटितत्वात् साध्यत्वसाधनत्वे यदि सिद्धिकर्मत्वतत्करणत्वरूपे तदा तयोर्व्याप्तिघटितत्वाभा-

घात् असङ्गतिरतो दीधितिकारः तदन्यथा निर्वक्ति साध्य-
स्वसाधनत्वे इति। द्वन्द्वादिश्रूयमाणं व्याप्तीत्युभयत्र सम्बध्यते ।
यत्तद्भ्यामिति । यत्समानाधिकरणान्योन्याभावाप्रतियोगी यद्वान्
तत्त्वं तद्व्याप्तिरिति क्रमेण साध्यत्वसाधनत्वेऽनन्तर्भाव्य इत्यर्थः।
तथा च न व्याप्तेर्घटकता यत्तत्पदयोर्धूमत्ववह्नित्वविशेषरूपेण
धूमवह्न्यादिपरत्वात् इत्थं च साधनतावच्छेदकादिभेदेन व्या-
प्तिभेदस्यागत्या स्वीकारादिति भावः । विशेषान्योन्याभावमादाय
उपन्यस्तं दूषणं सामान्याभावखण्डनपरमूलमवतारयितुमुद्धरति
नन्विति। यदिति यादृशरूपावच्छेदेन यत्समानाधिकरणान्योन्याभा-
वप्रतियोगितावच्छेदकत्वाभावस्तादृशरूपावच्छिन्नसामानाधिकरण्यं
तस्य तादृशरूपावच्छिन्ननिरूपिता व्याप्तिरित्यर्थः पर्वतादौ महानसी-
यवह्न्यादिमदन्योन्याभावसत्त्वेऽपि शुद्धवह्नित्वाद्यवच्छेदेन महानसी-
यवह्न्यादावेव तत्प्रतियोगितावच्छेदकत्वाभावः सुलभ इत्याह न चेति।
न हीत्यर्थः। वह्नित्वावच्छिन्नः शुद्धवह्नित्वावच्छिन्नः न चावच्छेदकत्व-
तदभावयोर्विरोधेनैकत्रावस्थानं दुर्घटमिति वाच्यम् विभिन्नावच्छेदेन
भावाभावयोरेकत्र वृत्तावविरोधेनावच्छेदकतानवच्छेदकरूपेणावच्छे-
दकत्वाभावसत्त्वे बाधकाभावात् न च विशिष्टस्यावच्छेदकत्वे एक-
देशस्यावच्छेदकतानवच्छेदकत्वमेव न सम्भवतीति कथं त-
दवच्छेदेन वह्न्यादावेवावच्छेदकत्वाभाव इति वाच्यं यादृश-
स्यावच्छेदकतावच्छेदकत्वपर्याप्त्यनधिकरणत्वं तादृशधर्मावच्छे-
देनावच्छेदकत्वाभावोपगमात् विशिष्टवह्नित्वस्यावच्छेदकत्वेऽपि
केवलस्य तस्य तत्पर्याप्त्यनधिकरणत्वेनानुपपत्त्यभावः। ननु सामा-
न्याभावनिराकरणमनुपयुक्तं तावतापि सामान्यधर्मस्य प्रति-
योगितानवच्छेदकतया उक्ताव्याप्तिपरीहारात् एवं विशेषाभा-
वमात्रेण निर्वाहोऽपि न सामान्याभावानभ्युपगमे यत्किञ्चिद्वि-
शेषाभाववति पर्वतादौ नायं वह्निमानित्यादिप्रतीतिव्यवहारयोः
प्रसङ्गादित्याशङ्क्यातिरिक्तसामान्याभावासत्त्वपक्षे दर्शितातिप्रसङ्गं
परिहरन्नेव लक्षणाव्याप्तिं दृढयति य एवेति । वह्निमद्भेदाः
तत्तद्वह्निवदवच्छिन्नभेदाः एकाधिकरणवृत्तित्वावच्छिन्नाः तादृशया-
वद्भेदाधिकरणैकव्यक्तिवृत्तित्वावच्छिन्नाः वह्निमत्सामान्यभेदबुद्धि
हृदो न वह्निमानित्याकारकबुद्धिम् उत्पादयन्ति विपर्ययो भूयोप-

पादयन्ति तादृशाधिकरणवृत्तित्वावच्छेदेन तादृशबुद्धिविषयताऽवच्छेदकरूपवन्त इत्यर्थः । एतावता ऽतिप्रसङ्गो वारितः। तत्प्रतियोगितावच्छेदकश्चेति चकारो वह्नित्वावच्छिन्न इत्यनन्तरं योज्यः वह्नित्वावच्छिन्नः शुद्धवह्नित्वावच्छिन्नः तस्य तत्प्रतियोगितानवच्छेदकत्वे तेषां न वह्निमानित्याकारकप्रतीतौ तादृशसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेन विषयतां स्वीकृत्य उक्तातिप्रसङ्गवारणानुपपत्तेस्तद्दोषतादवस्थ्यमिति भावः। न च विशेषाभावकूटस्य तादृशप्रतीतिविषयतया यत्किञ्चिद्विशेषाभाववति न तत्प्रसङ्ग इति वाच्यं तत्तद्वह्नित्वेन सकलवह्नीनां युगसहस्रेणापि ज्ञातुमशक्यतया तत्तद्वह्न्यवच्छिन्नभेदसमुदायस्य भानासम्भवात् वह्निमत्प्रतियोगिकभेदत्वेन तावद्भेदभानोपगमे तेन रूपेण यत्किञ्चिद्भेदविषयकज्ञानस्यापि प्रकारगतविशेषाभावेन तदाकारतासम्भवात्पर्वतो न वह्निमानितिप्रतीतेर्दुर्वारत्वात् न हि प्रकारत्वाविशेषे विषयन्यूनाधिक्येन विचित्राकारता बुद्धीनां घटत्वप्रकारेण शतसहस्रादिव्यक्तिविषयकप्रतीतीनां घट इत्येवाकारदर्शनात् अधिकमग्रे वक्ष्यामः । साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यघटितलक्षणे वैयधिकरण्यं यदि तदधिकरणावृत्तित्वं तदा प्रमेयत्वादेर्वैयधिकरण्यस्यावृत्तौ प्रसिद्ध्या प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेरिति मूलविरोध इत्यतो ऽन्यथा व्याचष्टे वैयधिकरण्यमिति । ननु साधनवैयधिकरण्यानाधिकरणत्वमेव कुतो न निवेश्यते इत्यत आह तच्चेति तादृशवैयधिकरण्यं चेत्यर्थः। अप्रसिद्धमिति यद्यपि समानाधिकरणयावद्धर्मोपादानेऽपि केवलान्वयिसाधनके साधनस्यापि तादृशयावद्धर्मान्तर्गततया ऽप्रसिद्धिरस्त्येव व्यतिरेकिसाधनकेऽपि तद्दोषाधिक्यं तथापि समानाधिकरणयावद्धर्मोपादाने व्यतिरेकित्वं धर्मविशेषणमङ्गीकृत्य वक्ष्यमाणप्रकारान्तरेण परिष्कारः सम्भवति नान्यथेत्याशयेनैवं व्यावृत्तिर्दर्शिता व्यावृत्त्यन्तरमप्याह अतिप्रसङ्गकं चेति । पृथिवी द्रव्यत्वादित्यादाविति पृथिवीत्वादेर्द्रव्यत्वादिरूपसाधनानधिकरणवृत्तित्वानाधिकरणत्वादिति भावः । धूमवान् वह्नेरित्यादौ साधनस्य नानाव्यक्तितया ऽप्या

गोलकीयवह्निवैयधिकरण्यं धूमे सम्भवतीति तदुपेक्षितं धूमादेरपीति तथा च यावत्पदानुपादाने द्रव्यत्वमहानसत्वादिरूपयत्किञ्चिद्धर्मवैयधिकरण्यानधिकरणत्वमादाय व्यभिचारिण्यतिप्रसङ्गः स्यादिति भावः । यावत्पदोपादानमिति । यावतां धर्माणां प्रत्येकनिरूपितवैयधिकरण्यानधिकरणत्वं निवेश्यम् । अतो नानाधिकरणसाधनके तादृशयावद्धर्माधिकरणाप्रसिद्धावपि न क्षतिः द्रव्यत्ववैयधिकरण्यमादायातिव्याप्तिश्च समवायेन साध्यतायां न तु संयोगेन तथात्वे तेन सम्बन्धेन तद्वैयधिकरण्याप्रसिद्धेरित्यवधेयम् । पृथिवीत्वादीति तथा च द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः द्रव्यत्वादौ पृथिवीत्वादिसमानाधिकरणयावद्धर्मवैयधिकरण्यानधिकरणताविरहादिति भावः । व्यधिकरणयोर्न व्याप्तिरितिमतावलम्बनेन वह्निमान् धूमादित्यादौ महानसीयवह्न्यादौ पर्वतत्वादिवैयधिकरण्यसत्त्वेऽपि न दोष इत्येकव्यक्तिसाध्यकानुधावनम् । ननु तदनधिकरणमात्रवृत्तित्वमत्र वैयधिकरण्यं घटत्वादेस्तादृशवैयधिकरण्यं च सत्ताधिकरणेऽपि वर्तमानद्रव्यत्वादेरत आह तदनधिकरणमात्रवृत्तित्वं चेति । घटत्वपटत्वाद्यनधिकरणमात्रवृत्तित्वं चेत्यर्थः निखिलघटपटादिरूपाणामिति यथासङ्ख्यमन्वयः तथा च रूपवान् पृथिवीत्वादित्यादावव्याप्तिस्तावतापि दुर्वारैव कुत्रापि रूपे तादृशयावद्धर्मवैयधिकरण्यानधिकरणत्वासत्त्वादिति भावः । तादृशाव्याप्तिं परिजिहीर्षुर्वैयधिकरण्यपदस्य तदनवच्छेदकावच्छिन्नपरत्वमवलम्बते तथापीति अव्याप्त्यभावं स्फुटयति न हीति कश्चिदेको धर्मस्तादृश इत्यन्वयः पृथिवीत्वादिसमानाधिकरणनिखिलधर्माणामेव तद्व्यापकरूपादिसमानाधिकरणतया रूपत्वाद्यवच्छेदेन तादृशधर्मानधिकरणमात्रवृत्तित्वासम्भवादिति भावः । अवच्छेदकाघटितलक्षणे धूमवान् वह्नेरित्यादौ यावद्धर्मान्तर्गतमहानसत्वादिकमादायातिव्याप्तेर्वारणं सम्भवति पर्वतीयधूमादेस्तदनधिकरणमात्रवृत्तित्वात् इतरधर्मे तु न तादृशधर्मतया तद्वारणसम्भवः धूमत्वाद्यवच्छेदेन तदनधिकरणमात्रवृत्तित्वादिति व्यभिचारनिरूपकाधिकरणमात्रवृत्तिधर्ममादाय तत्रातिव्याप्तिं वारयति धूमत्वादिकं त्विति । नन्ववच्छेदकत्व-

मन्यूनानतिरिक्तवृत्तित्वं तच्च धूमत्वादेर्जलादिसाधारणायोगोलकत्वादिवैयधिकरण्यन्यूनवृत्तित्वादित्यत आह अवच्छेदकत्व चेति । तादृशवैयधिकरण्यावच्छेदकत्वं चेत्यर्थः । वक्ष्यमाणप्रयोजनानुरोधेन तच्छून्यावृत्तित्वरूपतदनतिरिक्तवृत्तित्वपदार्थे तच्छून्ये धर्मत्वमधिकं निवेशयति तच्चेति । धर्मत्वं वृत्तिमत्त्वं नाति प्रसङ्ग इति गगनादेर्गगनत्वादिवैयधिकरण्यशून्यत्वेऽपि धर्मत्वविरहेण तादृशधर्मावृत्तित्वस्य द्रव्यत्वादावक्षतत्वादिति भावः । अथ तच्छून्यधर्मावृत्तित्वमित्यत्र साध्यतावच्छेदकताघटकसम्बन्धेन धर्मवृत्तित्वं निवेशनीयमन्यथा धूमत्वादेरपि कालिकादिसम्बन्धेनायोगोलकत्वादिवैयधिकरण्यशून्यवह्न्यादिवृत्तित्वेनावच्छेदकत्वानुपपत्तेः तथा च द्रव्यवान् मेयत्वादित्यत्र गुणत्वादिवैयधिकरण्यशून्ये गुणादिवृत्तिसत्त्वगुणत्वादौ साध्यतावच्छेदकताघटकसमवायसम्बन्धेन वृत्तेरप्रसिद्ध्या द्रव्यत्वादेः गुणत्वादिवैयधिकरण्यावच्छेदकत्वानुपपत्तिः न च समवायेन तस्य साध्यत्वे साधनसमानाधिकरणघटत्वादिवैयधिकरण्यावच्छेदकत्वं द्रव्यत्वस्य सुघटं तद्वैयधिकरण्यशून्ये घटरूपादौ समवायेन वृत्तेः प्रसिद्धेरिति नातिव्याप्तिरिति वाच्यम् । अतिव्याप्तेर्वारणसम्भवेऽपि धर्मपदानुपादाने गुणत्ववैयधिकरण्यावच्छेदकत्वानुपपत्त्या ऽतिव्याप्तिप्रदर्शनात् तत्पदोपादानेऽपि तद्वैयधिकरण्यावच्छेदकत्वानुपपत्त्या सन्दर्भविरोधस्य दुर्वारत्वात् द्रव्यवान् द्रव्यसमवायिगुणान्यतरत्वात् सत्तावद्भिन्नमेयत्वादित्यादावतिव्याप्तेर्दुर्वारत्वाच्च तत्र साध्यतावच्छेदकद्रव्यत्वसत्त्वादौ द्रव्यवृत्तिधर्मवैयधिकरण्यावच्छेदकत्वाप्रसक्तेः द्रव्यावृत्तेर्गुणत्वादिवैयधिकरण्यशून्ये साध्यतावच्छेदकताघटकसमवायेन वृत्तेरप्रसिद्ध्या तद्वैयधिकरण्यावच्छेदकभेदकूटस्याव्याहतत्वादिति चेन्न तच्छून्यधर्मावृत्तित्वमित्यत्र स्वानधिकरणतच्छून्यधर्मसामान्यकत्वस्य तदाश्रयस्याभावधर्मसामान्यकत्वस्य वा विवक्षितत्वात् । एतेन तदनधिकरणमात्रवृत्तित्वं साध्यतावच्छेदकसम्बन्धेन वाच्यम् । अन्यथा धूमादेः कालिकादिसम्बन्धेनायोगोलकवृत्तितया धूमत्वावच्छिन्नस्यायोगोलकाद्यनधिकरणमात्रवृत्तित्वानुपपत्तेः तथा च समवायेन प्रमेयत्वावच्छिन्नसाध्यक वाच्यत्वादिहेतावतिव्याप्तिः तत्र व्यभिचारानि-

रूपकाधिकरणवृत्तिजातित्वाद्यनधिकरणमात्रसमवेतत्वशून्ये ऽभावादौ मेयत्वादेर्वृत्त्यवच्छेदकत्वानुपपत्तेः साध्यतावच्छेदकसम्बन्धेन सम्बन्धत्वरूपधर्मत्वनिवेशेऽपि तद्दोषतादवस्थ्यं जात्यादौ समवायेन वृत्त्यप्रसिद्ध्या जातित्वादिवैयधिकरण्यशून्यसमवेताप्रसिद्धेः जातित्वादिवैयधिकरण्यावच्छेदकत्वस्य साध्यतावच्छेदके दुरुपपादत्वादित्यपि निरस्तं मेयत्वाश्रयीभूतसमवेतसामान्यस्य जातित्वाद्यनधिकरणमात्रसमवेतत्वरूपजातित्वादिवैयधिकरण्याश्रयतया मेयत्वादेस्तदवच्छेदकत्वानिर्वाहात् । केचित्तु साध्यतावच्छेदकसम्बन्धेन यत्सम्बद्धत्वं यश्च तादृशसम्बन्धेन तदनधिकरणमात्रवृत्तित्वस्याभावस्तदुभयाभाववद्यावत्स्वाश्रयकत्व–विवक्षणान्न दोषः सम्बद्धत्वं सम्बन्धप्रतियोगित्वं न तु सम्बन्ध एवातो यत्र संयोगः साध्यतावच्छेदकसम्बन्धस्तत्रापि सम्बद्धत्वं स्वरूपसम्बन्धेनैव वर्तते अतो वैयधिकरण्याभावानुरोधात् स्वरूपसम्बन्धावच्छिन्नाभावनिवेशे संयोगस्य तेन सम्बन्धेनावृत्त्या तदभावतादृशसाध्यतावच्छेदकसम्बद्धत्वोभयस्य स्वरूपसम्बन्धावच्छिन्नाभावः केवलान्वयीति तमादायावच्छेदकलक्षणातिव्याप्तिरिति निरस्तं न च सम्बद्धत्वस्य स्वरूपसम्बन्धेन वृत्तावपि स्वरूपाननुगमेनैकैकस्वरूपसम्बन्धेनोभयाभावस्य केवलान्वयितया तद्दोषतादवस्थ्यमिति वाच्यं स्वरूपाणामननुगमेऽपि अनतिप्रसक्तेन येन केनचिद्रूपेण तदनुगमसंभवात् अन्यथा विषयादिभेदेन विभिन्नस्य प्रमाविषयत्वादेः प्रमेयत्वत्वादिनापि केवलान्वयित्वानुपपत्तिः तद्घटकसम्बन्धाननुगमादित्याहुः ।

अथ तदनधिकरणमात्रवृत्तित्वं तदधिकरणावृत्तित्वे सति तदनधिकरणवृत्तित्वं तत्र सत्यन्तनिवेशादेव सामञ्जस्ये विशेष्यदलवैयर्थ्यं तत्परित्यागे च सत्यन्तस्यावृत्तिसाधारणतया तच्छून्यत्वमात्रस्यैवावृत्तिव्यावृत्ततया धर्मत्वोपादानविरोधः न च तदधिकरणावृत्तित्वमात्रनिवेशे प्रमेयत्वादेरित्यादिमूलासङ्गतिरिति विशेष्यदलनिवेशनमावश्यकं तदधिकरणावृत्तित्वशून्यत्वादन्यस्यावृत्तिसाधारणस्य विशिष्टशून्यत्वस्याभावान्तरतया चावैयर्थ्यमिति वाच्यं वृत्त्यंशमात्रस्यैव विशेष्यविधया निवेशेनैवाभावान्तरस्य घटकत्वात् तदनधिकरणत्वांशस्या-

स्यावर्तकस्य निवेशे व्यर्थविशेषणतया दुर्वारत्वात् वैयर्थ्यभिया
तदंशस्यैव परित्यागे प्रमेयत्वाद्यधिकरणावृत्तिवृत्तिमतो ऽप्रसिद्धा
प्रमेयत्वादेरिति मूलसङ्गतावपि महानसाद्यावृत्ति मूलस्य वाह्नत्वा
दौ सम्बन्धान्तरावच्छिन्नात्यन्ताभावादिघटितवह्न्यादिरूपसाधन,
समानाधिकरणधर्मवैयधिकरण्यावच्छेदकत्वोपपादनपरतया दी
धितिकारव्याख्यानासङ्गतेर्दुर्वारत्वात् । एतेनावृत्तिव्यावृत्ततदधिक
रणताव्यापकभेदप्रतियोगितावच्छेदकत्वमेव तद्वैयधिकरण्यमित्य
पि निरस्तं तथापि साधनसमानाधिकरणधर्मानधिकरण
त्वाप्रवेशे दीधितिकारीयतन्मूलव्याख्यानासङ्गतिरिति चेन्न
तदनधिकरणमात्रवृत्तित्वमित्यनेन स्वव्यापकतदनाधिकरणता
कत्वस्य विवक्षिततया तन्मूलसङ्गतेर्धर्मपदसार्थक्यस्य चो
पपत्ते न च तादृशमूलसङ्गमनस्य तदनाधिकरणेतरावृत्तित्व
निवेशनेनापि सम्भवाति निरुक्तवैयधिकरण्य निवेशे धर्मपदो
पादानमयुक्तमिति वाच्य तदनाधकरणेतरावृत्तित्वमित्यस्य तदनाधि
करणेतरवृत्तित्वप्रतियोगिकाभावार्थकत्वे तादृशव्यक्तिविशेषाय
भावस्य तत्समानाधिकरणसाधारणतया तच्छून्याप्रसिद्ध ताद-
शवृत्तित्वत्वावच्छिन्नाभावार्थकत्वे तादृशवृत्तित्वत्वस्य स्वसमाना
धिकरणतदधिकरणवृत्तित्वत्वापेक्षया गुरुशरीरत्वेनाभावप्रति
योगितानवच्छेदकतया तादृशाभावाप्रसिद्ध्या तस्य तदर्थकत्वा
नुपपत्तेरिति तच्छून्यधर्मावृत्तित्वरूपावच्छेदकत्वनिवेशे प्रकृत
साध्यभिचारिण्युभयसाध्यके विशिष्याव्यभिचारिणि विशिष्टसा
ध्यके च व्यभिचारिण्यतिप्रसङ्गस्याग्रे दर्शनीयतया कल्पान्तरमा
ह वस्तुतस्त्विति ।

(दी०) वस्तुतस्तु तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छिन्ना-
धिकरणतात्वं तदवच्छेदकत्वं वाच्य तेन सत्ताद्रव्यत्वोभयवान्
गुणान्यतरविशिष्टसत्तावान् वा जातिमत्त्वादित्यादौ नातिप्रस
ङ्गः । सत्ताया गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपि उभयत्वाव-
च्छिन्नाधिकरणताया गुणत्वाभाववन्मात्रवृत्तित्वात् । प्रमेय-
त्वादेरिति । ननु व्यतिरेकित्वेन धर्मो विशेषणीयः वस्तुतस्तु

यावत्पदं तादृशस्य कस्यापि न वैयधिकरण्यावच्छेदकमेतावन्मात्रस्फोरणाय तथा च साधनसमानाधिकरणधर्मनिरूपितवैयधिकरण्यावच्छेदकं यद्यत्तद्भिन्नधर्मवत्ता यावत्तादृशावच्छेदकत्वशून्यधर्मवता वा समं सामानाधिकरण्यमिति पर्यवसितमतो दोषान्तरमाह महानसादाविति । तथा च तदनधिकरणत्वं तदभावाधिकरणत्वं तद्भिन्नत्वं वा द्वयमपि दुष्टमित्यर्थः एतेन तदधिकरणावृत्तित्वमत्र वैयधिकरण्यमिति निरस्तं समवायितया महानसवृत्तित्वं वह्नौ नास्तीतिप्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात् सम्बन्धविशेषेण वैयधिकरण्यविवक्षायां तु नोक्त दोष इति ध्येयम् ।

(गा०) यद्यप्यत्रापि तदनधिकरणमात्रवृत्तित्वं स्वव्यापकतदनधिकरणताकत्वमेव न तु तदधिकरणावृत्तित्वे सति तदनधिकरणवृत्तित्व वृत्तिमत्त्व वा तदभावप्रवेशेन उक्तरीत्या विशेष्यसार्थक्यस्योपपादयितुमशक्यत्वात् नापि तदधिकरणावृत्तित्वमात्र तथा सति गगनादौ प्रमेयत्वादेस्तादृशवैयधिकरण्यसत्त्वेन गगनत्वाद्यवच्छिन्नाधिकरणत्वाप्रसिद्ध्या गगनत्वादौ निरुच्यमानवैयधिकरण्यावच्छेदकत्वासम्भवेन प्रमेयत्वादेरिति मूलस्य वैयधिकरण्यावच्छेदकाप्रसिद्ध्यर्थकतया सङ्गमयितु शक्यत्वेऽपि उक्तक्रमेण दीधितिकारीयमूलव्याख्यानासङ्गतेर्दुर्वारत्वात् तदनधिकरणमात्रवृत्तिस्वावच्छिन्नकत्वनिवेशेनैवोपपत्तेरधिकरणतानिवेशो व्यर्थः तदनधिकरणमात्रवृत्तिस्वावच्छिन्नकत्वस्य स्वविशिष्टव्यापकतदनधिकरणताकत्वरूपतया गुणत्वाद्यनधिकरणसत्ताद्रव्यत्वोभयत्वविशिष्टसत्तात्वाश्रयसत्तायाः सत्त्वेऽपि गुणत्वाद्यनधिकरणत्वेऽपि तादृशोभयत्वादिविशिष्टसत्तात्वावच्छिन्नव्यापकताया अनपायेन तादृशोभयत्वादौ तदनधिकरणमात्रवृत्तिस्वावच्छिन्नकत्वरूपवैयधिकरण्यावच्छेदकत्वस्यापि निर्वाहात् । तथापि विशिष्टाधिकरणतागर्भविशिष्टनिरूपितव्यापकतालाभायैवाधिकरणतापद यस्तुतो मूलोक्तदोषाणामनिष्टप्रलक्षणे यथाकथञ्चित् स-

क्षमणीयत्वेन निष्कृष्टलक्षणे तदधिकरणावृत्तित्वरूपवैयधिकर
ण्यमेव प्रवेश्य न तु स्वव्यापकतदनधिकरणताकत्वरूप
मित्याशयेन तत्राधिकरणतापदोपादानं तादृशवैयधिकरण्यशरी
रे स्वविशिष्टाधिकरणत्वे तादृशवैयधिकरण्यमप्रवेश्य वि
शिष्टनिष्ठविशेषणस्योपगमे वक्ष्यमाणातिव्याप्तिरेव दुर्वारा गुण-
त्वाद्यनधिकरणे सत्ताया वृत्तौ उभयत्वविशिष्टसत्तात्वाद्यव
च्छिन्नायामपि तस्यां तदधिकरणावृत्तित्वरूपतदनधिकरणमात्रवृ
त्तित्वस्योपपादयितुमशक्यत्वात् वृत्त्यव्याप्यवृत्तितया भिन्नरूपे
णापि तद्वृत्ति तदभावात् एवमधिकरणतापदानुपादाने स्वविशि
ष्टे साध्यतावच्छेदकसम्बन्धेनैव तदधिकरणावृत्तित्वस्य निवेश
नीयतया जातिमान् मेयत्वादित्यादौ जातित्वाद्यधिकरणे स
मवायादिना वृत्तेरप्रसिद्ध्या जातित्वादौ जातित्वादिवैयधिकर
ण्यावच्छेदकत्वं दुरुपपादम् अधिकरणतापदमधिकरणतासा
मान्यपरम् । अन्यथा द्रव्यगुणादिवृत्तित्वविशिष्टसत्तादिनिरूपि
ताधिकरणताविशेषैरेव तत्र तत्र शुद्धसत्तात्वाद्यवच्छिन्न
वत्ताबुद्ध्युपपत्तेः शुद्धसत्तात्वाद्यवच्छिन्ननिरूपिताखण्डाधिकर
णतान्तरानुपगमेन यत्किञ्चिद्विशिष्टाधिकरणताया गुणत्वा
द्यनधिकरणमात्रवृत्तितामादाय शुद्धसत्तात्वादेरपि गुणत्वादि
वैयधिकरण्यावच्छेदकत्वापत्तिः एवं च धूमादेः कालिकसम्ब
न्धावच्छिन्नाधिकरणताया अयोगोलकादिवृत्तितया धूमत्वादेरयो
गोलकत्वादिवैयधिकरण्यावच्छेदकत्वानुपपत्तिरिति साध्यतावच्छे
दकसम्बन्धावच्छिन्नत्वेनाधिकरणता विशेषणीया न च तादात्म्या
दिवृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः सम्बन्धिताया एव
निवेश्यत्वात् न च सम्बन्धितायाः सम्बन्धरूपतया संयोगेन दण्डा
दे साध्यत्वे समवायेन दण्डसमवेतसंयोगादिहेतावतिव्याप्तिः
स्वस्य स्वानधिकरणत्वेऽपि स्वसमानाधिकरणस्य संयोगाधिकर
णताया दण्डत्वाद्यवच्छिन्नसंयोगस्य साधनसमानाधिकरणतद्दण्
डत्वाद्यधिकरणवृत्तित्वेन तद्वैयधिकरण्यावच्छेदकत्वानुपपत्ते
रेव समवायैक्यमते समवायेन साध्यतायां सद्धेतौ साधनाधि
करणे सर्वत्र समवेतमात्रस्यैव समवायसत्त्वादवच्छेदकाप्रसिद्ध्या
ऽव्याप्तिरिति वाच्यं सम्बन्धानुयोगिताया एव सम्बन्धित्वरूपत्वा

सम्बन्धावच्छिन्नप्रतियोगिताकत्वविशिष्टसाध्यतावच्छेदकसम्बन्धानुयोगितायास्तदनधिकरणमात्रवृत्तित्वं तत्त्वमित्यर्थपर्यवसानेन सर्वसामञ्जस्यात् स्वप्रतियोगिकसंयोगस्य स्वस्मिन् सत्त्वेऽपि तदनुयोगिताया असम्भवात् अन्यथा संयोगेन स्वस्मिन् स्वविशिष्टबुद्धेः प्रमात्वापत्तेः एवं समवायैक्यमते समवायानुयोगिताभेदस्यातिप्रसङ्गभञ्जनायावश्यकतया उक्तानुपपत्त्यनवकाशात् । अथैवमपि महाकाले घटवान् महाकालपरिमाणादित्यादौ साधनसमानाधिकरणमहाकालवृत्तिधर्मवैयधिकरण्यावच्छेदकाप्रसिद्ध्याऽव्याप्तिः अवृत्तिगगनत्वाद्यवच्छिन्नस्य कालिकसम्बन्धेन सम्बन्धित्वाप्रसिद्ध्या गगनादेः कालवृत्तितामते महाकालेऽपि तादृशसम्बन्धित्वसत्त्वात् गगनत्वादेरपि तथात्वायोगात् साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतासामान्ये यद्विशिष्टप्रतियोगिकत्वतदनधिकरणमात्रवृत्तित्वाभावोभयाभावस्तत्त्वं तदित्युक्तौ गगनादेः कालावृत्तितामते गगनत्वादेरुक्तस्थलेऽवच्छेदकत्वोपपत्तावपि विषयितादिसम्बन्धेन घटादिसाध्यकनित्यज्ञानत्वादिहेतुके तदप्रसिद्धिर्दुर्वारैव वस्तुमात्रस्यैव नित्यज्ञानवृत्तिविषयिताप्रतियोगित्वात् विषयितासामान्ये उभयाभावस्य दुर्घटत्वात् न च यद्धर्मावच्छिन्ननिरूपितयत्सम्बन्धावच्छिन्नाधिकरणता साधनसमानाधिकरणयत्किञ्चिद्धर्मानधिकरणमात्रवृत्तिः तद्धर्मावच्छिन्नतत्सम्बन्धावच्छिन्नाधिकरणताभिन्नत्वं साध्यसामानाधिकरण्यघटकप्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतायां निवेश्यं न तु साध्यतावच्छेदकेऽनवच्छेदकत्वम् उक्तस्थले च समवायादिसम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणतानां तथाविधानां भेदस्य कालिकविषयितासम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणतायां सत्त्वाल्लक्षणसमन्वय इति वाच्यम् । उक्तयुक्त्या महानसीयवह्नित्वविशिष्टसत्तात्वाद्यवच्छिन्नाधिकरणताभ्यः शुद्धवह्नित्वशुद्धसत्तात्वाद्यवच्छिन्नाधिकरणताया अनतिरेकितया उक्तरूपावच्छिन्नसाध्यकेऽव्याप्तेः । मैवं साधनसमानाधिकरणयत्किञ्चिद्धर्मानधिकरणमात्रवृत्तितावच्छेदकं यादृशयादृशरूपावच्छिन्नयत्सम्बन्धावच्छिन्नाधिकरणतात्वं तादृशरूपावच्छिन्नतत्सम्बन्धा-

वच्छिन्नाधिकरणतात्वावच्छिन्नभेदकूटसमानाधिकरणं साध्यतावच्छेदकसम्बन्धावच्छिन्नयद्रूपावच्छिन्नाधिकरणतात्वं तद्रूपावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षया सर्वानुपपत्तिपरिहारसम्भवात् शुद्धवह्नित्वावच्छिन्नाधिकरणतात्वे प्रत्येकं महानसीयत्वपर्वतीयत्वादिविशिष्टवह्नित्वाद्यवच्छिन्ननिरूपिताधिकरणतात्वावच्छिन्नभेदकूटसमानाधिकरणत्वात् व्यभिचारिणि साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणतात्वस्यापि व्यभिचारानिरूपकाधिकरणवृत्तितानवच्छेदकतया तदवच्छिन्नभेदस्य निरुक्तभेदकूटान्तर्गतत्वात् तादृशाधिकरणतात्वे च तद्भेदसामानाधिकरण्यविरहेणातिव्याप्त्यनवकाशादिति कृतं विस्तरेण । पूर्वकल्पपरित्यागे बीजमाह तेनेति । तदनधिकरणमात्रवृत्तिताशून्यधर्मावृत्तित्वस्थले तादृशधर्मोपर्याप्तत्वनिवेशे सत्ताद्रव्यत्वोभयत्वादेस्तथाविधसत्तापर्याप्तत्वविरहेणावच्छेदकत्वमुपपद्यत इत्याशयेन विशिष्टसाध्यकानुसरणं गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपीत्यनेन तद्वृत्तितया उभयत्वादेः पूर्वकल्पे ऽवच्छेदकत्वासम्भवः सूचितः महानसादावित्यादिमूलं साधनाधिकरणे वह्नितद्वदत्यन्ताभावान्योन्याभावप्रदर्शकं सिंहगुहावलोकनन्यायेन पूर्वलक्षणद्वयदूषणपरतया साम्प्रदायिका व्याचक्षते स्वयं च तेषामसामर्थ्यसूचनाय प्रकृतलक्षणपरतया तत्सङ्गमयिष्यन् तदाकाङ्क्षामुत्थापयितुं प्रमेयत्वादेरिति दूषणमुद्धरति नन्विति । व्यतिरेकित्वेन साध्यतावच्छेदकसम्बन्धेन किञ्चिदधिकरणे वर्तमानो यो व्यतिरेकस्तत्प्रतियोगित्वेन तेन समवायेन साध्यतायां साधनसमानाधिकरणस्य जात्यादिनिष्ठव्यतिरेकप्रतियोगिनः सत्त्वादेरनधिकरणमात्रे साध्यतावच्छेदकसम्बन्धेनाधिकरणत्वाप्रसिद्धावपि नाव्याप्तिः एतेनाकाशादिरूपव्यतिरेकप्रतियोग्याकाशाभावाद्यनधिकरणाप्रसिद्धिभयेनान्योन्याभावप्रतियोगितावच्छेदकपरतया केषांचिद्व्यतिरेकिपदव्याख्यानमश्रद्धेयम् यद्यपि प्रमेयत्वादेरपि किञ्चित्सम्बन्धावच्छिन्नव्यतिरेकप्रतियोगित्वमक्षतमेव तथापि येन येन सम्बन्धेन यद्यत्साधनसमानाधिकरणं तेन तेन सम्बन्धेन तदनधिकरणमात्रवृत्तितानवच्छेदकत्वे विवक्षणीये स्वनिष्ठव्यतिरेकप्रतियोगितावच्छेदकत्वस्य येन सम्बन्धेनेत्यत्र

सम्बन्धे विशेषणत्वोपगमाच्च दोषः । अत्र चरमनिरुक्तस्यावच्छेदकत्वस्य , स्वत्वगर्भतया तत्तद्व्यक्तिविश्रामात् व्यभिचारिण्येकधर्मवैयधिकरण्यानवच्छेदकस्यापि साध्यतावच्छेदकस्य धर्मान्तरवैयधिकरण्यावच्छेदकत्वेन तत्तद्धर्मवैयधिकरण्यावच्छेदकानामेकैकभेदनिवेशासम्भव इति यावन्तो वैयधिकरण्यावच्छेदकधर्माः प्रातिस्विकरूपेण तावद्भेदकूटवत्त्वनिवेशनस्यावश्यकत्वे साधनसमानाधिकरणधर्मे यावत्त्वविशेषणमनर्थकं व्यभिचारिणि एकधर्मवैयधिकरण्यानवच्छेदकस्यापि साध्यतावच्छेदकस्य धर्मान्तरवैयधिकरण्यावच्छेदकत्वेनातिप्रसङ्गविरहादिति व्यतिरेकित्वस्य धर्मविशेषणत्वमन्तरेणैव सामञ्जस्यं प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धावपि येषां वैयधिकरण्यं प्रसिद्धं तदवच्छेदकभेदकूटमादाय सद्धेतौ लक्षणगमनसम्भवादित्याशयेन धर्मे यावत्त्वोत्कीर्तनं यावदवच्छेदकभेदकलाभार्थकतया व्याचष्टे वस्तुतस्त्विति । तादृशस्य साधनसमानाधिकरणस्य कस्यापि न वैयधिकरण्यावच्छेदकं साध्यतावच्छेदकमिति शेषः । एतावता लक्षण कीदृशमित्याकाङ्क्षायामाह तथा चेति । साधनसमानाधिकरणेति तादृशयत्किञ्चिदेकधर्मवैयधिकरण्यावच्छेदकं यद्यदित्यर्थः तेन साधनसमानाधिकरणधर्मत्वावच्छिन्नानधिकरणाप्रसिद्धावपि न क्षतिः विशिष्टवह्नित्वादिरूपवैयधिकरण्यावच्छेदकधर्मभेदस्य शुद्धवह्नित्वादावसत्त्वादव्याप्तिरसो ऽवच्छेदकानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशनपक्षं परित्यज्यावच्छेदकताव्यक्तीनां तत्तद्व्यक्तित्वेनात्यन्ताभावकूटं निवेशयति यावत्तादृशावच्छेदकत्वशून्येति । तादृशावच्छेदकत्वं यद्यत्तच्छून्येत्यर्थः विशेषणविशेष्यान्तर्भावेन वह्नित्वादौ पर्याप्त यदवच्छेदकत्व तदभावः केवलविशेष्ये ऽक्षत एवेति भावः । न च यद्धर्मावच्छिन्नाधिकरणता तादृशधर्मानधिकरणमात्रवृत्तिस्तद्रूपमवच्छेदकत्वं विशिष्टवह्नित्वादौ विशिष्टवह्नित्वत्वादिरूपमेव यद्यत्पदेन तद्वाव्यासज्यवृत्त्येवेति कथं तदभावः शुद्धवह्नित्वादाविति वाच्यम् यद्रूपावच्छिन्नपर्याप्तावच्छेदकतानिरूपकाधिकरणतासामान्यं तादृशानधिकरणमात्रवृत्ति तादृशधर्मवत्त्वरूपवैयधिकरण्यावच्छेदकतानिवेशान्महानसीयवह्नित्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वस्य महानसीयत्वादि-

समुदाये व्यासज्यवृत्तितया तत्पर्याप्त्यवच्छेदकधर्मस्यापि तथात्वेनानुपपत्त्यभावात् । वस्तुतस्तु यादृशावच्छेदकतानिरूपकाधिकरणतासामान्यं तादृशधर्मानधिकरणमात्रवृत्ति तादृशावच्छेदकतारूपमेव वैयधिकरण्यावच्छेदकत्वं निवेशनीयं महानसीयवह्नित्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकत्वं च महानसीयत्वादौ व्यासज्यवृत्तीति न दोषः तत्तदवच्छेदकतात्यन्ताभावापेक्षया तदवच्छेदकतावच्छिन्नभेदस्य धर्मिनियताधिक्येन गुरुतया न तन्निवेशः तत्र विशिष्टस्यावच्छेदकत्वे शुद्धस्यानवच्छेदकत्वानुपपत्तिभयेन व्यासज्यवृत्तिधर्मावच्छिन्नात्यन्ताभावस्येव तादृशधर्मावच्छिन्नभेदस्यापि एको न द्वावित्यादिप्रतीतिबलेन तद्धर्मवति स्वीकारात् विशिष्टपर्याप्तावच्छेदकत्वावच्छिन्नभेदस्य शुद्धविशेष्येऽक्षतत्वात् महानसादौ वह्नितद्वतोरत्यन्ताभावान्योन्याभावस्त्वेन मन्द तल्लक्षणक्षतिमाविष्करोति तथा चेति । तदनधिकरणत्व वैयधिकरण्यघटक । इयमपि दुष्टमिति साधनसमानाधिकरणस्य वह्नेरिव तादृशोभयाभावतदनधिकरणत्वघटितवैयधिकरण्यावच्छेदकत्वस्य वह्नित्वावच्छिन्ने सत्त्वादिति भावः । न चैव सर्वस्यैव वस्तुनो वह्न्यनधिकरणतया मात्रपदव्यवच्छेद्याप्रसिद्ध्या वह्नित्वावच्छिन्नस्य वैयधिकरण्य दुरुपपादमिति वाच्यं स्वव्यापकतदनधिकरणतावत्त्वरूपतदनधिकरणमात्रवृत्तित्वस्य सूपपादत्वात् तदधिकरणावृत्तित्वरूपवैयधिकरण्यप्रवेशे प्रमेयत्वादेरित्यादिदूषणानवकाशात् स्मूलन्यूनतामङ्गाय तत्पक्षेऽपि दूषणान्तरमाह एतेनेति । सम्बन्धभेदेन वह्न्यादिवैयधिकरण्यस्य वह्नौ सत्त्वेनेत्यर्थः तदेव स्फुटीकरोति समवायितयेति । एतच्च वृत्तिविशेषण तादृशेति यत्किञ्चित्सम्बन्धावच्छिन्नतद्वैयधिकरणवृत्तित्वाभावरूपत्वर्थः तादृशधर्मवत्त्वस्वत्वसामान्याभावनिवेशे च क्वचिद्व्यभिचारिण्यतिव्याप्तिरवच्छेदकाप्रसिद्धा क्वचित्सङ्केतास्त्वाशिरपि द्रष्टव्या । सम्बन्धविशेषेणेति । साधनवति येन सम्बन्धेन यद्वर्तते तेन सम्बन्धेन तदधिकरणत्वगर्भस्य उभयत्र विशेषणताविशेषगर्भस्य वा वैयधिकरण्यस्य विवक्षायामित्यर्थं नोक्तदोषः नात्तोऽपि दोष.। केचित्तु उक्तोभिविशेषणान्महाकालो घटवान् कालपरिमाणादित्यादौ अवच्छेदकाप्रसिद्धिरूपदोषो दुर्वार एवेति सूचितमित्याहुः । तत्र ताद·

दादोषस्यापि पूर्वमुद्धृतत्वात् ।

(दि०) अथानौपाधिकः सम्बन्धो व्याप्तिः उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः व्यापकत्वं तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं व्यभिचारे चावश्यमुपाधिः प्रतियोगित्वं न विरोधित्वं सहानवस्थाननियमलक्षणं गोत्वाश्वत्वयोरतथात्वात् । अन्योन्याभावप्रतियोगिन्यसत्त्वाच्च । किन्तु यथाधिकरणाभावयोः स्वरूपविशेषः सम्बन्धः तथा प्रतियोगित्वमनुयोगित्वमपि अभावविरहात्मत्वं वेति चेत् यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न धूमादौ प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मश्च सिद्ध्यसिद्धिभ्यां न निषेद्धुं शक्यः यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यत इति चेन्न व्यधिकरणत्वात् ।

(दी०) उपाधिपदस्य साध्यसमव्याप्तवचनतया आत्माश्रयप्रसङ्गादाह साध्यव्यापकेति । व्यापकत्वं व्याप्तिनिरूपकत्वमात्माश्रयादिग्रस्तमत आह तद्वन्निष्ठेति । यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रापि व्याप्यवृत्तिरखण्डश्चान्तनस्तद्वन्निष्ठत्वप्रकारकप्रमाविषयत्वाभावादिरेवास्ति यदि च तस्यापि विशेषणान्तरविशिष्टस्य द्वित्वावच्छिन्नस्य वा तत्राभावस्सम्भवस्तदा साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वं तल्लक्षणार्थो बोध्यः । अनवस्थां निरसितुमाह प्रतियोगित्वमिति । सहेति । एकदेशकालावच्छेदेनेति

पूरणीयं तेन नाव्याप्यवृत्तेरभावस्य प्रागभावादेश्च प्रतियोगितायामव्याप्तिः। अन्योन्येति। अत्र समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववति महानसादौ संयोगादिना वह्न्यादेवृत्त्येन सम्बन्धेनाभावः तद्वति तेनावृत्तिर्वक्तव्या इत्यश्च तेन सम्बन्धेनासम्बद्धत्वोक्तौ नायं दोषः अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतया तद्वति तेन सम्बन्धेन प्रतियोगिनोऽसम्बद्धत्वात् परं तु समवायेन सत्ताया अभावस्य प्रतियोगितायामव्याप्तिः तद्वति समवायेन वृत्तेरप्रसिद्धेः तादृशस्वसम्बन्धाधिकरणावृत्तित्वकत्वाभिधाने च व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगितायामव्याप्तिः सिद्धान्तलक्षणवक्ष्यमाणरीत्या च खण्डशः प्रसिद्ध्या तत्परिहारोऽपीति ध्येयम्। अभावविरहात्मत्वमिति। न चान्योन्याभावप्रतियोगितत्त्वावच्छेदकयोरप्रसक्त्यतिप्रसक्तौ प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्ष्यत्वे तु लक्षणेऽत्यन्तपदवैयर्थ्यं सर्वत्र नित्यस्य नित्यसाधारणरूपावच्छिन्नस्य वा उपाधितासम्भवात् इतरथा तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम्। विरहपदस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात्। प्रतिबध्नाति हि तादात्म्येन प्रतियोगिज्ञानमन्योन्याभावबुद्धिं प्रतिबन्धकत्वं चात्रैककालावच्छेदेन एकत्रावर्तमानत्वम् अभावपदस्य च स्वाभावपरत्वात्। वस्तुतस्त्वेकसम्बन्धावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगितया अनवच्छेदकमपि भवत्येव सम्बन्धान्तरावच्छिन्नायास्तस्या अवच्छेदकमतो यत्सम्बन्धावच्छिन्नायाः साध्यसमानाधिकरणाभावप्रतियोगिताया अनवच्छेदकं तत्सम्बन्धावच्छिन्नाया एव साधनसमानाधिकरणाभावप्रतियोगिताया अव-

च्छेदकं तद्वाच्यम् । तथा च संसर्गाभावत्वमनुपादेयमेव । वाशब्दोऽत्रास्वरससूचनाय । स च व्यधिकरणसम्बन्धेन सर्वस्य प्रतियोगिनस्तादृशभ्रमे मानाभावात् स्वाभावसम्बन्धित्वस्य स्वाभावज्ञानविषयत्वस्य वा लघोः सर्वत्र सम्भवित्वात् स्वाभावेत्यादौ षष्ठ्यर्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसम्बन्धस्यैव शरणीकरणीयतया तस्यैवावश्यकत्वेन तथात्वौचित्याच्च । अभावत्वप्रतिबन्धकत्वयोः प्रतियोगिघटितत्वात् तथाविधव्यवहारगोचरस्यापि विना प्रतियोगितां निर्वक्तुमशक्यत्वाच्च ।

(गा०) आत्माश्रयेति साध्यसमव्याप्तत्वघटकसाध्यनिरूपितोपाधिनिष्ठव्याप्तेरप्यनौपाधिकरूपतयाऽनौपाधिकत्वशरीरेऽनौपाधिकत्वनिवेशादिति भावः । यद्यप्यनौपाधिकत्वरूपव्याप्तेः प्रकृतसाधनघटिततया साधनभेदेन भेद आवश्यकः तथा च साध्यसमव्याप्तोपाधिनिष्ठव्याप्तेः प्रकृतसाधननिष्ठव्याप्तिभिन्नत्वान्नात्माश्रयाधकाशः तथापि सिद्धसिद्धिव्याघातपरिहाराय साध्यसमव्याप्तस्य व्यभिचारित्वसम्बन्धावच्छिन्नाभावो विवक्षणीयः तत्र च प्रकृतसाधनाप्रवेशात्साधनभेदेन न व्याप्तेर्भेद इत्यभिप्रायेणेदम् आत्माश्रयादीति यावत्साध्यव्यापकव्यापकत्वरूपानौपाधिकत्वे यावत्साध्यव्यापकान्तर्गतं साध्यमपीति व्याप्तिनिरूपकत्वं यदि व्यापकस्य तदा स्वनिष्ठव्याप्तिनिरूपकप्रकृतसाध्यकत्वघटितं तादृशानौपाधिकत्वं प्रकृतव्याप्तिघटितमित्यात्माश्रयः । यदि च यावत्साधनाव्यापकसाध्यसामानाधिकरण्यमनौपाधिकत्वं तदा प्रकृतसाध्यातिरिक्ते साधनव्यापकतां गृहीत्वापि घटादौ तदव्यापकत्वग्रहस्यानावेन प्रकृतसाधननिष्ठप्रकृतसाध्यव्याप्तिग्रहस्यानौपाधिकत्वग्रहं प्रांपेक्षेति नात्माश्रयःअपि त्वनवस्थैवेत्याभिप्रायेणादिपदमाननु स्वाभावादिनात्यन्ताभावप्रतियोगित्वघटितोपाधिलक्षणस्य एतद्रूपत्वात् प्रत्यादिस्थलीयैतत्संयोगाद्युपाधावव्याप्तिः तेषामव्याप्यवृत्तितया साध्यवति तदभावसत्त्वात् एवं नानाव्यक्तिकादेव्यनाद्युपाधावपि तद्व्यक्तित्वाद्यवच्छिन्नाभावप्रतियोगित्वमादायाव्याप्तिनिरासायाद्धं

व्याप्तिलक्षणघटकानिरुक्तोपाधिविरहस्य सकलोपाधिसाधारणत्वविरहेऽपि सर्वत्र व्यभिचारिणि किञ्चिदुपाधिसाधारण्येनैव व्याप्तिलक्षणानतिप्रसङ्ग इति तदव्याप्तिर्न दोषायेति परिहरति यत्रोपाधिरिति । तद्वद्भिन्नेति । अव्याप्यवृत्तिनानाव्यक्तिकतत्तदुपाधिमद्भिन्नेत्यर्थः तद्वत्त्वप्रकारकप्रमाविषयत्वस्य विषयभेदेन भिन्नतया नाखण्डत्वं संयोगाद्युपाध्यभावप्रकारकप्रमाविषयत्वं केवलान्वयीति तदभावाप्रसिद्धिरतस्तदत्यन्ताभावमुपेक्ष्य तद्वद्भेदानुसरणं तद्भेदाभावस्य प्रतियोगितावच्छेदकात्मकतया स एव दोष इति प्रमाविषयत्वानुधावन साध्यवत्यपि तद्भेदप्रमाविषयतासम्भवाज्ज्ञानसामान्यमुपेक्ष्य प्रमानुधावनम् । आदिपदाद्व्यभिचारनिरूपकाधिकरणभेदादिपरिग्रहः अस्ति निरुक्तोपाधित्वाश्रय इति शेषः । एतावतैव तत्र नानौपाधिकत्वमिति भावः । ननु तादृशाखण्डोपाधेरपि किञ्चिद्देशकालवृत्तित्वविशिष्टस्य द्वित्वावच्छिन्नस्य वाभावः साध्यवत्यपि वर्तत इति तस्याप्युपाधित्वं न घटते यदि चाप्रतियोगिपदं प्रतियोगितानवच्छेदकावच्छिन्नपरं तदा सद्धेतौ साधनाव्यापकस्य घटादेर्द्रव्यत्वप्रमेयत्वादिना साध्यव्यापकतामादायानौपाधिकत्वव्याघात इत्यत आह यदि चेति । केचित्तु विशिष्टाभावस्य विशेष्यविशेषणसम्बन्धप्रतियोगिकत्वमेव स्वीकुर्वन्ति द्वित्वावच्छिन्नाभावं च नाङ्गीकुर्वन्ति अत एव मणिकारेणापि तादृशाभावानभ्युपगमादिति सिद्धान्तग्रन्थे वक्ष्यते इत्यतो यदि सम्भव इत्युक्तदलद्वयार्थ इति तथा च सद्धेतौ घटत्वादिना साधनाव्यापकस्य घटादेः प्रमेयत्वादिना साध्यव्यापकत्वेऽपि साध्यव्यापकतावच्छेदकस्य साधनव्यापकतानवच्छेदकत्वासम्भवान्न निरुक्तधर्मवत्त्वमिति न सोपाधितापत्तिरिति भावः । अत्र सम्बन्धादिविवक्षा स्वयमूह्या । सहानवस्थाननियमरूपविरोधितायाः प्रतियोगित्वस्वरूपत्वखण्डनस्य प्रकृतानुपयुक्तत्वशङ्काव्युदासाय तत्प्रयोजनं दर्शयति अनवस्थामिति । सहानवस्थाननियमस्य व्याप्तिरूपतया अनौपाधिकत्वघटकोपाधिताशरीरनिविष्टप्रतियोगितायामनौपाधिकत्वान्तरस्य निवेशे तद्घटकप्रतियोगित्वान्तरे चानौपाधिकत्वस्येत्येवं क्रमेण व्याप्तिविषयानवस्थामित्यर्थः । यद्यपि सहानवस्थानि-

नियमस्तदधिकरणसामान्यावृत्तित्वं तच्च तदधिकरणवृत्तित्वत्वावच्छिन्नाभावरूपं न व्याप्तिघटितमिति नानवस्थावसरः न च तदभावव्याप्यत्वरूपसहानवस्थाननियमपदार्थाभिप्रायेणानवस्थाप्रदर्शनमिति वाच्यम् एवमप्यग्रे सत्ताभाववत्समवेताप्रसिद्ध्या समवायेन सत्ताभावप्रतियोगितायामव्याप्तिप्रदर्शनस्यासङ्गत्यापत्तेः । तथापि तदधिकरणावृत्तित्वं यथाश्रुतं यदि च सहानवस्था न नियमपदार्थस्तदा विशिष्टसत्ताद्यभावप्रतियोगित्वासङ्ग्रहः विशिष्टस्यानतिरेकेण तत्र विशिष्टाभावाधिकरणावृत्तित्वस्य दुर्लभत्वादिति यदभाववन्निष्ठाधिकरणतासामान्ये यद्धर्मावच्छिन्ननिरूपितत्वाभावस्तद्धत्वमेव विवक्षणीयं घटाभावादिमन्निष्ठान्यदीयाधिकरणतायां पटादिनिरूपितत्वस्याभावसत्त्वादतिप्रसङ्गस्य वारणाय सामान्यपदोपादानं तदर्थश्च व्याप्तिरित्यभिप्रायेणेदं तादृशाधिकरणतायां प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकतया ऽग्रे ऽप्रसिद्धिप्रदर्शनसङ्गतिः कपिसंयोगादेस्तदभावाधिकरणे भिन्नदेशावच्छेदेन घटादेः स्वध्वंसप्रागभावाधिकरणे भिन्नकालावच्छेदेन वृत्त्याऽव्याप्तिमाशङ्क्य पूरयति एकेति । तथा च एकदेशावच्छिन्नं सदेककालावच्छिन्नं यदेकाधिकरणावस्थानं तदभाव इत्यर्थः देशकालावच्छेद्यत्वयोरनुगतैकरूपेण निवेशस्तु न युक्तः कपिसंयोगादितदत्यन्ताभावयोरेककालावच्छेदेन संयोगतत्प्रागभावयोश्चैकदेशावच्छेदेनैकाधिकरणवृत्तितया तद्दोषतादवस्थ्यात् । यद्यप्येकदेशकालावच्छिन्नमित्यादेरभावावच्छेदकदेशावच्छिन्नं तदवच्छेदककालावच्छिन्नं यत्तदधिकरणनिष्ठाधिकरणत्वं तदनिरूपकत्वं तत्सामान्ये यन्निरूपितत्वाभावस्तत्त्वं वा ऽर्थो न सम्भवति वृक्षनिष्ठकपिसंयोगावच्छेदकशाखायामपि तादृशसंयोगानुत्पाददशायां तत्र तदभावावच्छेदकत्वात् तादृशसंयोगावच्छेदककालस्यापि मूलावच्छेदेन तदभाववृत्तौ तथात्वाव्याप्तेर्दुर्वारत्वात् तथापि शाखावच्छेदेन कपिसंयोगसत्त्वदशायामपि इदानीं शाखायां वृक्षो न कपिसंयोगीति प्रतीत्यापत्तिवारणाय तादृशप्रतीत्या कालविशेषावच्छिन्नस्यैव देशस्यावच्छेदकत्वमवगाह्यत इति स्वीकरणीयं तादृशदेशकालयोर्वृक्षे ऽभाववृत्तौ पृथगवच्छेदकत्वसम्भवेऽपि तत्कालाव-

व्याप्तिलक्षणघटकनिरुक्तोपाधित्वस्य सकलोपाधिसाधारणत्वविरहेऽपि सर्वत्र व्यभिचारिणि किञ्चिदुपाधिसाधारण्येनैव व्याप्तिलक्षणानतिप्रसङ्ग इति तदव्याप्तिर्न दोषायेति परिहरति यत्रोपाधिरिति । तद्वद्भिन्नेति । अव्याप्यवृत्तिनानाव्यक्तिकतत्तदुपाधिमद्भिन्नेत्यर्थः तद्वत्त्वप्रकारकप्रमाविषयत्वस्य विषयभेदेन भिन्नतया नाखण्डत्वं संयोगाद्युपाध्यभावप्रकारकप्रमाविषयत्वं केवलान्वयीति तदभावाप्रसिद्धिरतस्तदत्यन्ताभावमुपेक्ष्य तद्भेदानुसरणं तद्भेदाभावस्य प्रतियोगितावच्छेदकात्मकतया स एव दोष इति प्रमाविषयत्वानुधावन साध्यवत्यपि तद्भेदप्रमाविषयतासम्भवाज्ज्ञानसामान्यमुपेक्ष्य प्रमानुधावनम् । आदिपदाद्व्यभिचारनिरूपकाधिकरणभेदादिपरिग्रहः अस्ति निरुक्तोपाधित्वाश्रय इति शेषः । एतावतैव तत्र नानौपाधिकत्वमिति भाव । ननु तादृशाखण्डोपाधेरपि किञ्चिद्देशकालवृत्तित्वविशिष्टस्य द्वित्वावच्छिन्नस्य वाभावः साध्यवत्यपि वर्तत इति तस्याप्युपाधित्वं न घटते यदि चाप्रतियोगिपदं प्रतियोगितानवच्छेदकावच्छिन्नपरं तदा सद्धेतौ साधनाव्यापकस्य घटादेर्द्रव्यत्वमेयत्वादिना साध्यव्यापकतामादायानौपाधिकत्वव्याघात इत्यत आह यदि चेति । केचित्तु विशिष्टाभावस्य विशेष्यविशेषणसम्बन्धप्रतियोगिकत्वमेव स्वीकुर्वन्ति द्वित्वावच्छिन्नाभावं च नाङ्गीकुर्वन्ति अत एव मणिकारेणापि तादृशाभावानभ्युपगमादिति सिद्धान्तग्रन्थे वक्ष्यते इत्यतो यदि सम्भव इत्युक्त इत्यद्ध्यार्थ इति तथा च सद्धेतौ घटत्वादिना साधनाव्यापकस्य घटादेः प्रमेयत्वादिना साध्यव्यापकत्वेऽपि साध्यव्यापकतावच्छेदकस्य साधनव्यापकतानवच्छेदकत्वासम्भवान्न निरुक्तधर्मवत्त्वमिति न सोपाधितापत्तिरिति भाव । अत्र सम्बन्धादिविवक्षा स्वयमूह्या । सहानवस्थाननियमरूपविरोधितायाः प्रतियोगित्वस्वरूपत्वखण्डनस्य प्रकृतानुपयुक्तत्वशङ्काव्युदासाय तत्प्रयोजनं दर्शयति अनवस्थामिति । सहानवस्थाननियमस्य व्याप्तिरूपतया अनौपाधिकत्वघटकोपाधितादात्म्यनिविष्टप्रतियोगितायामनौपाधिकत्वान्तरस्य निवेशे तद्घटकप्रतियोगित्वान्तरे चानौपाधिकत्वस्येत्येवं क्रमेण व्याप्तिविषयानवस्थामित्यर्थः । यद्यपि सहानवस्थानि-

नियमस्तदधिकरणसामान्यावृत्तित्वं तच्च तदधिकरणवृत्तित्वत्वावच्छिन्नाभावरूपं न व्याप्तिघटितमिति नानवस्थावसरः न च तदभावव्याप्यत्वरूपसहानवस्थाननियमपदार्थाभिप्रायेणानवस्थाप्रदर्शनमिति वाच्यम् एवमप्यग्रे सत्ताभाववत्समवेताप्रसिद्ध्या समवायेन सत्ताभावप्रतियोगितायामव्याप्तिप्रदर्शनस्यासङ्गत्यापत्तेः । तथापि तदधिकरणावृत्तित्वं यथाश्रुतं यदि च सहानवस्थान नियमपदार्थस्तदा विशिष्टसत्ताद्यभावप्रतियोगित्वासङ्ग्रहः विशिष्टस्यानतिरेकेण तत्र विशिष्टाभावाधिकरणावृत्तित्वस्य, दुर्लभत्वादिति यदभाववन्निष्ठाधिकरणतासामान्ये यद्धर्मावच्छिन्ननिरूपितत्वाभावस्तद्धत्त्वमेव विवक्षणीयं घटाभावादिमन्निष्ठान्यदीयाधिकरणतायां पटादिनिरूपितत्वस्याभावसत्त्वादतिप्रसङ्गस्य वारणाय सामान्यपदोपादानं तदर्थश्च व्याप्तिरित्यभिप्रायेणेदं तादृशाधिकरणतायां प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकतया ऽग्रे ऽप्रसिद्धिप्रदर्शनसङ्गतिः कपिसंयोगादेस्तदभावाधिकरणे भिन्नदेशावच्छेदेन घटादेः स्वध्वंसप्रागभावाधिकरणे भिन्नकालावच्छेदेन वृत्त्याऽव्याप्तिमाशङ्क्य पूरयति एकेति । तथा च एकदेशावच्छिन्नं सदेककालावच्छिन्नं यदेकाधिकरणावस्थानं तदभाव इत्यर्थः देशकालावच्छेद्यत्वयोरनुगतैकरूपेण निवेशस्तु न युक्तः कपिसंयोगादितदत्यन्ताभावयोरेककालावच्छेदेन संयोगतत्प्रागभावयोश्चैकदेशावच्छेदेनैकाधिकरणवृत्तितया तद्दोषतादवस्थ्यात् । यद्यप्येकदेशकालावच्छिन्नमित्यादेरभावावच्छेदकदेशावच्छिन्नं तदवच्छेदककालावच्छिन्नं यत्तदधिकरणनिष्ठाधिकरणत्वं तदनिरूपकत्वं तत्सामान्ये यन्निरूपितत्वाभावस्तत्त्वं वा ऽर्थो न सम्भवति वृक्षनिष्ठकपिसंयोगावच्छेदकशाखायामपि तादृशसंयोगानुत्पाददशायां तत्र तदभावावच्छेदकत्वात् तादृशसंयोगावच्छेदककालस्यापि मूलावच्छेदेन तदभाववृत्तौ तथात्वाद्व्याप्तेदुर्वारत्वात् तथापि शाखावच्छेदेन कपिसंयोगसत्त्वदशायामपि इदानीं शाखायां वृक्षो न कपिसंयोगीति प्रतीत्यापत्तिवारणाय तादृशप्रतीत्या कालविशेषावच्छिन्नस्यैव देशस्यावच्छेदकत्वमयगम्यत इति स्वीकरणीयं तादृशदेशकालयोर्भिन्ने ऽभाववृत्तौ पृथगवच्छेदकत्वसम्भवेऽपि तत्कालाव-

च्छिन्नतद्देशस्यानवच्छेदकत्वान्नातिप्रसङ्गः तथा च यत्कालावच्छि-
न्नयद्देशस्याभाववृत्त्यनवच्छेदकत्वं तत्कालावच्छिन्नतद्देशावच्छि-
न्नत्वमेकदेशकालावच्छेदेनेत्यस्यार्थं इति न कोऽपि दोषः का-
लपदं क्षणपरं तेन दिवसात्मकस्थूलकालावच्छिन्नशाखादेः सं-
योगतदभावावच्छेदकत्वेऽपि न क्षतिः देशपदमवच्छेदकदेशा-
न्तरानवच्छिन्नदेशपरमतो विभिन्नभागावच्छिन्नस्थूलावयवस्य प्र-
तियोगितदभावोभयावच्छेदकत्वसम्भवेऽपि न क्षतिः । अथैवम-
पि व्याप्यवृत्तेरवच्छेदकानभ्युपगमाद्घटत्वाभावप्रतियोगित्वासंग्रहः
तदवच्छेदकस्यैवाप्रसिद्धेः न चैकदेशकालानवच्छेदेनेत्यस्यानवच्छि-
न्नत्वविशेषणे तात्पर्यान्न दोष इति वाच्यं संयोगाद्यभावस्यानव-
च्छिन्नाधिकरणतावति गुणादौ संयोगादेरवृत्त्या संयोगाद्यभावस्य
प्रतियोगित्वसंग्रहेऽपि संयोगादेरनवच्छिन्नाधिकरणत्वाप्रसिद्ध्या
तत्प्रतियोगित्वासंग्रहात् न चाभावाधिकरणतायां न तद्विशेषण-
मपि तु तन्निष्ठाधिकरणतायामेवेति नायं दोष इति वाच्यमेवमपि
कपिसंयोगादेः स्वसमानाधिकरणगगनाद्यभावप्रतियोगितापत्तेर्दुर्वा-
रत्वात् । यत्तु व्याप्यवृत्तेरवच्छेदकानभ्युपगमे यदधिकरणनिष्ठा-
भावाधिकरणतायां यत्क्षणावच्छिन्नयद्देशानवच्छेद्यत्वं तत्क्षणा-
वच्छिन्नतद्देशानवच्छिन्नतदधिकरणनिष्ठाधिकरणत्वानिरूपकत्वे स-
ति यदधिकरणनिष्ठस्वाधिकरणतायां यत्क्षणावच्छिन्नयद्देशान-
वच्छिन्नत्वं तत्क्षणावच्छिन्नतद्देशानवच्छिन्नतदधिकरणनिष्ठाधिकर-
णत्वानिरूपकतदभावकत्वस्य विवक्षणीयत्वात् व्याप्यवृत्त्यभावप्र-
तियोगिन्यपि तस्याक्षतत्वात् तथाहि घटादौ घटत्वाभा-
वाधिकरणता यद्देशकालानवच्छिन्ना तदनवच्छिन्ना व्याप्यवृ-
त्तिघटत्वाद्यधिकरणताप्रसिद्ध्या तदनिरूपकत्वात् अनवच्छिन्नस्वा-
धिकरणतावद्घटादिनिष्ठतादृशघटत्वाभावाधिकरणत्वनिरूपकघट-
त्वाद्यभावकत्वाच्च व्याप्यवृत्तिघटत्वादेः स्वाभावप्रतियोगित्वनिर्वाहः
घटत्वादेरव्याप्यवृत्तिस्वसमानाधिकरणसंयोगादिप्रतियोगितावार-
णाय सत्यन्तं संयोगादेर्गगनाद्यभावप्रतियोगितावारणाय वि-
शेष्यं विभिन्नक्षणावच्छिन्नस्य संयोगविशेषावच्छेदकमूलादेस्त-
दभावावच्छेदकत्वाद्वृक्षादिनिष्ठतदभावाधिकरणतायां न मूला-
वच्छेद्यत्वं किं तु प्रतियोग्यनाधिकरणघटाद्यवयवानवच्छेद्यत्व-

मेव तदनवच्छिन्ना च वृक्षादिनिष्ठसंयोगविशेषाधिकरणतापीति तत्राव्याप्तिरतः क्षणनिवेशः तन्निवेशे च यत्क्षणावच्छिन्नस्य मूलादेः प्रतियोग्यवच्छेदकत्वं तत्क्षणावच्छिन्नतदनवच्छेद्यत्वमभावाधिकरणतायां तादृशतदनवच्छेद्यत्वं च न प्रतियोग्यधिकरणतायामिति तथाविधाधिकरणत्वान्तरानिरूपकत्वं प्रतियोगिन्यक्षतमेवेति नाव्याप्तिरिति । तदपि न । मूलाग्रादिरूपाविभिन्नावच्छेदेन मध्यभागरूपैकावच्छेदेन च वृक्षादौ वर्तमानयोः संयोगयोरेकस्यापराभावप्रतियोगित्वापत्तेः एकसंयोगाभावाधिकरणतायास्तादृशमध्यभागाद्यनवच्छिन्नत्वात् अपरसंयोगाधिकरणतायास्तदनवच्छिन्नत्वेनापरसंयोगस्यतदनवच्छिन्नाधिकरणतान्तराप्रतियोगित्वेन सत्यन्तदलसत्वात्तत्र संयोगावच्छेदकाग्रादिभागस्यापरसंयोगाभावाधिकरणतावच्छेदकत्वेन विशेष्यदलसत्वात् । मैवं यादृशयादृशावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववद्यन्निष्ठं यदभावाधिकरणत्वं तन्निष्ठं यत्तादृशावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववदधिकरणत्वं तदनिरूपकत्वविवक्षया सामञ्जस्यात् गगनादेः स्वाभावाभाववत्वं नोपेयत इति स्वाभावनिष्ठप्रतियोगित्वासंग्रहो न दोषाय । अन्योन्याभावप्रतियोगिनि मूलोपदर्शितामव्याप्तिमुद्धरति अत्रेति । वह्न्यादेर्वृत्तेरिति सम्बन्धविशेषमनन्तर्भाव्याभावाधिकरणवृत्तित्वसामान्याभावनिवेशे ऽव्याप्तिरिति शेषः । येन सम्बन्धेनाभाव इति यः सम्बन्धो यदभावप्रतियोगितावच्छेदकतया ऽभिमत इत्यर्थः एवमप्यन्योन्याभावप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन वृत्त्यप्रसिद्ध्या तत्र तेन सम्बन्धेन तदधिकरणावृत्तित्वं दुर्घटमत आह तेन सम्बन्धेनासम्बद्धत्वोक्ताविति । स्वयं दूषणान्तरमाह परं त्विति तद्वति सामान्यादाविति शेषः । समवायेन वृत्तेः प्रतियोगितावच्छेदकीभूतसमवायेन स्वसम्बद्धत्वस्य तादृश इति प्रतियोगितावच्छेदकसम्बन्धेन स्वसम्बद्धं यदधिकरणं तद्वृत्तित्वाभावकत्वाभिधाने चेत्यर्थः तथा सति सत्तासमवाय्यवृत्तित्वस्य तदभावे सत्वेन उक्ताव्याप्तिपरिहारासम्भवादिति भावः । व्याधिकरणसम्बन्धेनापि संयोगादिना गुणाद्यभावप्रतियोगितायां तेन सम्बन्धेन गुणादिसम्बद्धाधिकरणाप्रसिद्ध्या ऽव्याप्तिरित्यर्थः । इदमुप-

लक्षणं प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिमत्यपि काले कालिकादिसम्बन्धेनाभावस्य वृत्त्या अनुयोगिताविशेषरूपाभावत्वावच्छेदकसम्बन्धेनावृत्तित्वदयं वाच्या तथा च स्वरूपसम्बन्धेन सत्ताभावस्य यः सत्तादिरूपो ऽभावस्तत्प्रतियोगित्वासंग्रहोऽपि द्रव्यसत्त्वाद्यभावसम्बन्धाधिकरणे सामान्यादौ समवायादिरूपतादृशसम्बन्धेन वृत्तेरप्रसिद्धेः। वक्ष्यमाणरीत्येति यादृशसम्बन्धसामान्ये एकदेशकालावच्छिन्नयदभावाधिकरणानुयोगिकत्वस्य यद्रूपविशिष्टप्रतियोगिकत्वस्य च द्वयोर्व्यतिरेकस्वरूपयत्त्वं तादृशसम्बन्धेन तदभावप्रतियोगित्वमिति रीत्येत्यर्थः न च व्याप्यवृत्तेरवच्छेदकत्वानभ्युपगमे एकदेशकालावच्छिन्नाभावाधिकरणत्वाप्रसिद्ध्या तद्घटितोभयाभावाप्रसिद्धिरिति वाच्यम्। एकदेशकालावच्छिन्नयदभावाधिकरणानुयोगिकत्वस्थले यद्यदधिकरणनिष्ठाभावाधिकरणतायां यद्देशकालानवच्छिन्नत्वावच्छिन्नोभयाभावस्तद्देशकालानवच्छिन्नत्वावच्छिन्नोभयाभावस्तच्छाधिकरणानुयोगिकत्वद्वयं निवेश्य तदुभयप्रतियोगिकत्वे तद्भिन्नत्वावच्छिन्नाभावनिवेशेन सामञ्जस्यात् न चैवमपि समवायैक्यमते समवायेन द्रव्यत्वाभावप्रतियोगित्वासंग्रहः प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नाधिकरणताधर्मिकोभयाभावविवक्षया अधिकरणभेदेनाधिकरणताभेदं व्यवस्थाप्य तत्संग्रहे चान्योन्याभावप्रतियोगिन्यव्याप्तिः तादात्म्यसम्बन्धेनाधिकरणताया अप्रसिद्धेः सम्बन्धिता च सम्बन्ध एवेति तद्धर्मिकोभयाभावविवक्षणे पूर्वोक्त एव दोष इति वाच्यं प्रतियोगितावच्छेदकसम्बन्धनिरूपितानुयोगिताधर्मिकस्य यत्प्रतियोगिकत्वविशिष्टसम्बन्धप्रतियोगिकत्वनिरूढपदभावाधिकरणवृत्तित्वोभयाभावस्य विवक्षया समवायैक्यमते प्रतिप्रसङ्गवारणाय द्रव्यादिनिष्ठद्रव्यत्वादिप्रतियोगिकत्वविशिष्टसमवायप्रतियोगिकत्वविवक्षयानुयोगितातो गुणादिनिष्ठतदनुयोगिताभेदस्याभ्युपेयत्वेन प्रतीकारसम्भवात् अधिकमग्रे वक्ष्यामः अवृत्तिगगनादेस्तदभावनिष्ठं प्रतियोगित्वं नोपेयत एव तत्स्वीकारे च यस्य येन सम्बन्धेनाधिकरणे यस्य येन सम्बन्धेनावच्छिन्ना एकावच्छिन्ना वा वृत्तिस्तत्तदुभयावृत्तिः स्ववृत्तिर्यो धर्मः स्वभिन्नत्वे सति तद्धर्मवत्त्वमेव तत्सम्बन्धावच्छिन्नस्वनिष्ठानुयोगिता-

निरूपकं तत्सम्बन्धावच्छिन्नप्रतियोगित्वमिति विवक्षणीयं तादृशधर्मश्च घटतदभावान्यतरत्वादिकमेव स्वभिन्नत्वानिवेशात् स्वस्य न स्वप्रतियोगित्वम् । अवृत्तिद्वयस्य परस्परप्रतियोगित्ववारणाय वृत्तिमान्निष्ठत्वेन धर्मो विशेषणीयः एवमपि गोत्वादेरश्वत्वादिप्रतियोगिताप्रसङ्गवद् घटत्वादौ द्रव्यत्वाद्यभावप्रतियोगित्वप्रसङ्गतादवस्थ्यमेव स्वाभावविरोधित्वनिवेशो वक्ष्यमाणमत इव स्वाभावेत्यत्र षष्ठ्यर्थप्रतियोगितानिवेशे नात्माश्रयः न च द्रव्यत्वाभावादेर्घटत्वादिप्रतियोगिकत्वमिष्टमेव द्रव्यत्वाद्यभाववति घटत्वं नास्तीत्यादिप्रत्ययस्य द्रव्यत्वाभावादिविषयकत्वे क्षतिविरहात् घटत्वं द्रव्यत्वाभावप्रतियोगीतिव्यवहारश्च समनियताभावैक्यमते द्रव्यत्वाभावद्रव्यसमवेतत्वविशिष्टाभावादीनामभेदवादिनामिवास्मन्मतेऽपीष्ट एव घटत्वत्वेन घटत्वं द्रव्यत्वाभावप्रतियोगीत्यादिव्यवहारोऽपि अधिकरणस्वरूपाभाववादिनां प्राभाकराणामिवास्माकमपीष्ट एव गोत्वादेरश्वत्वप्रतियोगिकत्वोपगमेऽपि क्षतिविरहः अश्वादौ गोत्वादिकं नास्तीतिप्रतीतेरश्वत्वादिविषयताया इष्टत्वात् गोत्वमश्वत्वप्रतियोगीति व्यवहारो घटत्वं पटत्वप्रतियोगीत्यादिव्यवहारश्चाधिकरणवृत्त्यसाधारणधर्मस्वरूपाभाववादिभिरिष्यत एवेति वाच्यम् एवं सति सर्वत्र विरुद्धधर्मेणैवाभावप्रत्ययोपपत्तावतिरिक्ताभावासिद्धिप्रसङ्गात् एवं विरोधिताघटकोभयाभावेऽपि प्रतियोगितान्तरनिवेशादनवस्थेति ध्येयम् । तत्त्वावच्छेदकेति प्रतियोगितावच्छेदकेत्यर्थः अप्रसक्त्यतिप्रसक्ती इति घटाद्यन्योन्याभावाद्यभावस्य तत्प्रतियोगितावच्छेदकघटत्वादिति भावः । ननु नेदं प्रतियोगित्वपदमुख्यार्थनिर्वचनं किं तु व्याप्तिलक्षणप्रविष्टोपाधित्वघटकव्यापकतानिविष्टप्रतियोगितास्वरूपनिरूपणमेव तादृशप्रतियोगिताया भेदप्रतियोगिसाधारण्यविरहेपि न क्षतिः तावतापि व्याप्तिलक्षणस्य निर्दोषत्वादित्यत आह प्रकृतोपयोगीति । अत्यन्तपदवैयर्थ्यमिति धूमवान् वह्नेरित्यादौ चायोगोलकान्यत्वादिरूपोपाधेः साध्यवन्निष्ठभेदप्रतियोगितया व्यापकत्वानुपपत्तिरिति तद्वारणायैवात्यन्तपदोपादानं यदि चाभावाभावत्वरूपमन्योन्याभावप्रतियोगिव्यावृत्तं प्रतियोगित्वमुपाधित्वघटकव्यापकताशरीरे निवेश्यते तदा साध्यवन्निष्ठोपाधिभेदमादाय दोषस्यानकाशाच्चवैयर्थ्यमिति भावः । ननु सा-

ध्यवन्निष्ठध्वंसप्रागभावप्रतियोगिना आर्द्रेन्धनादेरुपाधितानिर्वाहायात्यन्तपदोपादानं तस्यापि तद्ध्वंसाद्यभावरूपत्वादित्यत आह सर्वत्रेति शेषः नित्यस्य व्यभिचारनिरूपकाधिकरणभेदादेः द्वित्वाद्यवच्छिन्नाभावप्रतियोगितामादायासम्भववारणार्थं प्रतियोगितानवच्छेदकरूपावच्छिन्नत्वाविवक्षाया आवश्यकत्वेनार्द्रेन्धनादेरपि ध्वंसादिप्रतियोगितानवच्छेदकार्द्रेन्धनायोगोलकादिभेदान्यतरत्वादिनोपाधित्वसम्भव इत्याशयेनाह नित्यसाधारणेति। न च ध्वंसप्रागभावादीनां सामान्यधर्मो न प्रतियोगितावच्छेदक इति साध्यवन्निष्ठध्वंसप्रागभावादिरूपाभावप्रतियोगितावच्छेदकं नार्द्रेन्धनत्वमिति नित्यसाधारणधर्मपर्यन्तानुधावनमफलमिति वाच्यं स्वसमानाधिकरणार्द्रेन्धनध्वंसासमानकालीनतत्प्रागभावानां तादृशतत्प्रागभावासमानकालीनतद्ध्वंसानामार्द्रेन्धनत्वस्यैव प्रतियोगितावच्छेदकत्वात् अन्यथा ध्वंसप्रागभावयोरत्यन्ताभावातिरिक्तत्वमते तादृशध्वंसप्रागभावाधिकरणे ऽत्रेदानीमार्द्रेन्धनं नास्तीत्यादिप्रत्ययानुपपत्तेः। वस्तुतस्तु पर्वतो धूमवान् वह्नेरित्यादावेतदार्द्रेन्धनादिव्यक्तीनां नोपाधिता सम्भवति तत्तद्व्यक्तित्वादेः साध्यवन्निष्ठध्वंसादिप्रतियोगितावच्छेदकत्वादित्याशङ्कया नित्यस्येत्यनेन तत्तद्व्यक्तीनां व्याप्तिलक्षणाप्रवेशेऽपि न क्षतिरित्युक्त्वा सादृशोपाधीनामपि व्यापकरूपेणोपाधितया व्याप्तिलक्षणे प्रवेश एवेति नित्यसाधारणरूपावच्छिन्नस्य चेत्यनेनाभिहितं नित्यसाधारण्यं चात्र तद्देशनिष्ठध्वंसाद्यप्रतियोगिसाधारण्यात्मकं तेनार्द्रेन्धनत्वादेरपि संग्रहान्न न्यूनतेति ध्येयम्। उपाधित्वसम्भवादिति तथा चार्द्रेन्धनत्वाद्यवच्छिन्नस्य प्रकृतोपाधित्वानुपपत्तावपि न व्याप्तिलक्षणातिव्याप्तिप्रसङ्ग इति भावः। इतरथा भेदप्रतियोगितासाधारणरूपावच्छिन्नप्रतियोगिताया लक्षणघटकत्वे भेदप्रतियोगितेति अयोगोलकभेदादिभेदप्रतियोगितेत्यर्थः। अयोगोलकभेदादेः साध्यवन्निष्ठभेदप्रतियोगितया ऽनुपाधित्वेऽपि अयोगोलकभेदधूमवदन्यतरत्वाद्यवच्छिन्नस्योपाधिता सम्भवाद्व्याप्तिलक्षणातिप्रसक्तिर्निर्वहति न हि तादृशान्यतरत्वावच्छिन्ने धूमवति तत्तदवच्छिन्नभेदो वर्तते येन भेदप्रतियोगितामादाय तदवच्छिन्नस्योपाधित्वं स्यादन्यत्र न चेदं अन्यं पृथिवीत्वादित्यादौ पर-

माणुभेदादेर्जन्यानिष्ठभेदप्रतियोगित्वेन साध्याव्यापकतया अन्य-परमाणुभेदान्यतरत्वावच्छिन्नस्य परमाणुसाधारणत्वेन साधनव्यापकतया उपाधित्वं न सम्भवतीति तत्रानौपाधिकत्ववारकतया ऽत्यन्तपदसार्थक्यमिति वाच्यं साधनाव्यापकतायामत्यन्ताभावत्वनिवेशस्य निष्प्रयोजनकतया तादृशान्यतरत्वावच्छिन्नस्य परमाणुभिन्नस्य साधनाधिकरणपरमाणुनिष्ठभेदप्रतियोगित्वेन साधनाव्यापकतयोपाधित्व न सम्भवतीति तत्रानौपाधिकत्ववारकतया ऽत्यन्तपदसार्थक्यामिति वाच्यं साधनाव्यापकतायामत्यन्ताभावत्वनिवेशस्य निष्प्रयोजनकतया तादृशान्यतरत्वावच्छिन्नस्य परमाणुभिन्नत्वावच्छिन्नस्य च साधनाधिकरणपरमाणुनिष्ठभेदप्रतियोगित्वेन साधनाव्यापकतयोपाधित्वसम्भवात् । यत्तु घटाभावभिन्नत्वाद्यवच्छिन्नस्यापि साध्यवन्निष्ठघटाद्यभावस्वरूपघटाद्यभावनिष्ठस्वभेदप्रतियोगितया साध्यव्यापकत्वासम्भवेनानौपाधिकत्वापत्त्या तद्वारकतया ऽत्यन्तपदसार्थक्यं तत्पदादाने घटाभावभेदादेर्नोपाधित्वसम्भवादिति तन्न । घटाभावभेदात्यन्ताभावस्यापि साध्यवन्निष्ठघटाभावमात्रवृत्तित्वेन तुल्ययुक्त्या घटाभावरूपतया ऽत्यन्तपदोपादानेऽपि तत्रोपाधेर्दुर्लभत्वात् न चात्यन्तपदादानादत्यन्ताभावत्वनिरूपकप्रतियोगित्वलाभादुक्तस्थले घटाभावभिन्नस्य घटाभावात्मकभेदत्वनिरूपकप्रतियोगित्वेपि अत्यन्ताभावत्वनिरूपकप्रतियोगित्वविरहादुपाधित्वं सम्भवत्येवेति वाच्यं घटाभावभिन्नं पटत्वादित्यादावुक्तक्रमेण साध्यव्यापकस्य घटाभावभिन्नस्य साधनसमानाधिकरणघटाभावरूपस्वभेदप्रतियोगितया उपाधितापत्त्या साधनाव्यापकत्वदलेपि अत्यन्ताभावत्वनिरूपकप्रतियोगित्वनिवेशस्यावश्यकत्वेन उक्तस्थले प्रमेयत्वादिरूपसाधनव्यापकतया तस्योपाधित्वासम्भवात् विवक्षान्तरेण घटाभावभेदस्योपाधित्वोपपादने घटाभावभिन्नस्यापि तदुपपादनसम्भवेनात्यन्तपदवैयर्थ्यस्यावश्यकत्वादिति चेन्न अखण्डानित्यायोगोलकभेदरूपोपाधेः साध्यवति कथंचिदपि नात्यन्ताभावः विशिष्टाभावस्य विशेष्यविशेषणसम्बन्धप्रतियोगिकत्वमतावलम्बनात् द्वौ न स्त इत्यादिप्रतीतेः परम्परासम्बन्धेन द्वित्वाद्यभाव एव विषय

इति मताश्रयणाच्च व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं वा प्रतियोगितायां विशेषणं ज्ञेयं तथा चाप्रतियोगित्वगर्भमेव व्यापकत्वं वाच्यं न तु प्रतियोगितानवच्छेदकावच्छिन्नत्वरूपं ग्रन्थकृतापि यदि चेत्यनेनानवच्छेदकावच्छिन्नत्वनिवेशे प्रागनिर्भरो दर्शितः एवं धायोगोलकभेदसाध्यवदन्यतरत्वाद्यवच्छिन्नस्योपाधित्वं दुरुपपादमेव तादृशस्य साध्यवतः साध्यवन्निष्ठात्यन्ताभावप्रतियोगित्वादयोगोलकभेदादेश्च तादृशभेदप्रतियोगित्वादित्यत्यन्तपदसार्थक्यात्। नन्वेवमपि नित्यसंसर्गाभावत्वरूपात्यन्ताभावत्वघटकध्वंसादिवारकनित्यत्वांशस्यानतिप्रयोजनकत्वमेवेत्याशङ्कायां नित्यत्वांशो न निवेश्यत एव केवलं संसर्गाभावत्वलाभायैवात्यन्तपदमिति दर्शयितुं संसर्गाभावेति तस्य अत्यन्तपदस्य अन्योन्याभावप्रतियोग्यव्याप्तिं परिहर्तुमाह विरहपदस्येति तज्ज्ञानेति तदन्वितं अभावान्वितं यज्ज्ञानं तत्प्रतिबन्धकज्ञानविषयार्थकत्वादित्यर्थः अभावान्वय उपलक्षणं ज्ञानप्रभृतीनामेव विरहपदार्थघटकत्वं बोध्यं तेन नाभावपदवैयर्थ्यम्। एवं च तदभावग्रहप्रतिबन्धकग्रहविषयत्वमेव तदभावप्रतियोगित्वमिति फलितम्। एतच्चान्योन्याभावप्रतियोगिसाधारणमेवेत्याह प्रतिबध्नातीति। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिप्रकारकनिश्चयस्याभावधीप्रतिबन्धकत्वादिति भावः। प्रतिबन्धकत्वं यदि कारणीभूताभावप्रतियोगित्वं तदा प्रतियोगित्वान्तर्भावेण तदनवस्थेत्यतस्तदन्यथा निर्वक्ति प्रतिबन्धकत्वं चेति। अत्र प्रतियोगितालक्षणे ऽभावप्रतियोगिमत्ताज्ञानयोरपि भिन्नकालावच्छेदेनैकत्रात्मनि एकक्षणावच्छेदेन च भिन्नात्मनि वर्तमानत्वादेककालावच्छेदेनेति एकत्रेति च। कालपदं क्षणपरं तेन स्थूलकालावच्छेदेन तयोरेकाधिकरणवृत्तित्वेऽपि न क्षतिः अत्रैकत्रेत्यनतिप्रयोजनकम्। अभावज्ञानाधिकरणक्षणावच्छेदेन तच्छून्यात्मनिष्ठप्रतियोगिज्ञानासङ्ग्रहेऽपि तज्ज्ञानाधिकरणक्षणावृत्तियत्किञ्चित्प्रतियोगिज्ञानव्यक्तिमादाय लक्षणगमनसम्भवात्। न च ज्ञानमात्रस्यैव परमेश्वरीयाभावज्ञानाधिकरणक्षणवृत्तितया ऽभावज्ञानाधिकरणक्षणावृत्तिज्ञानाप्रसिद्धिरिति वाच्यम्। अभावज्ञानावच्छेदकक्षणावच्छिन्नवृत्तिकान्यतररूपस्य एककालावच्छेदेनावर्तमानत्वस्य निवेशो नित्यस्य भगवज्ज्ञानस्य काल-

विशेषानवच्छिन्नतया सर्वत्र प्रतियोगिज्ञाने तादृशवृत्तिकत्वानियमात् घटाद्यभावज्ञानावच्छेदकक्षणानवच्छिन्नपटादिज्ञानव्यक्तिमादायाति-प्रसङ्गस्तु एकक्षणावच्छेदेन घटाद्यभावज्ञानाधिकरणावृत्तिपटादिज्ञा-नस्यापि सत्त्वेनातिप्रसङ्गस्तदभावपदस्य स्वाभावपरतयैव वारणीयः एवं सति एकक्षणावच्छिन्नत्वं परित्यज्य एकाधिकरणावृत्तित्वस्य निवेशेनापि निर्वाहसम्भवः एकपुरुषीयघटाद्यभावज्ञानव्यधिकरण पुरुषान्तरीयघटादिज्ञानमादाय घटादौ तदभावप्रतियोगित्वोपपत्ते रिति वाच्यम्। अभावज्ञानस्य हि घटाद्यभावज्ञानत्वेनैव निवेशो न तु तत्तद्व्यक्तित्वादिना तथा च घटाभावज्ञानाधिकरणावृत्तिघट-ज्ञानमेव दुर्घटं। सर्वेषामेवात्मनां कदाचिद्घटाभावज्ञानवत्त्वादित्येक-क्षणावच्छिन्नत्वनिवेशस्यावश्यकत्वात् न च तदधिकरणावृत्तित्वश-रीरे प्रतियोगितायां तदधिकरणवृत्तित्वत्वावच्छिन्नत्वनिवेशनमफलं तदधिकरणवृत्तित्वप्रतियोगिकाभावनिवेशेनाप्युपपत्तेः घटाभाव-ज्ञानवद्वृत्तिपटादिज्ञाने तद्वृत्तित्वप्रतियोगिकतद्विशेषाभावसत्त्वेऽपि स्वाभावस्य निवेशनीयतया ऽतिप्रसङ्गानवकाशात् तथा च घटा-दिज्ञाने घटाभावज्ञानाधिकरणवृत्तित्वसत्त्वेऽपि तत्प्रतियोगिताका-भावसौलभ्यात् घटादेः स्वाभावप्रतियोगित्वमुपपद्यत एवेति वाच्यं तदधिकरणवृत्तित्वनिष्ठप्रतियोगितायाः प्रकारतया निवे-शने प्रतियोगित्वज्ञाने प्रतियोगित्वान्तरज्ञानापेक्षया दुर्ज्ञेयत्वाप-त्त्या ऽभावे तादृशप्रतियोगितायाः सम्बन्धविधयैव निवेश्यतया प्रतियोगितायाः यत्र प्रतियोगिसंसर्गतया प्रवेशस्तत्र प्रतियो-गिप्रकारीभूतधर्मावच्छिन्नत्वमानस्यावश्यकतया तदधिकरणावृत्ति-त्वत्वावच्छिन्नप्रतियोगिताकाभावस्यैव प्रतिबन्धकतारूपतया एक-क्षणावच्छिन्नत्वानिवेशे उक्तानुपपत्तेरनुसारादित्यवधेयम्। अन्यो-न्याभावप्रतियोगितावच्छेदकेति प्रसक्तिं निराकर्तुमाह अभावप-दस्य चेति। स्वाभावपरत्वादिति। तथा च स्वीयो योऽभावः स्वनिष्ठतद्विरहत्वमेव स्वस्य तदभावप्रतियोगित्वं घटान्योन्याभावो न घटत्वाभाव इति घटत्वादिनिष्ठतद्विरहत्वं न तत्प्रतियोगित्वमिति भावः। घट एतदभावप्रतियोगित्यादौ अभावपदं लक्षणया घटा-दिरूपसमभिव्याहृतपदार्थविशेषिताभावपरं प्रतियोगिपदं ज्ञानप्रति-बन्धकज्ञानविषयत्वावच्छिन्नार्थकं तदेकदेशज्ञाने चाभावविषयकत्वा-

न्वय इति स्वत्वाननुगमेऽपि न प्रतियोगिपदस्य शक्त्यानन्त्यप्रसक्तौ न वाभावपदार्थानन्वयापत्तिरिति ध्येयम् । सम्बन्धविशेषावच्छिन्नत्वस्य व्यापकताघटकप्रतियोगितायामवश्यं निवेशनीयतया मेदप्रतियोगितामादाय दोषासंभवेन संसर्गाभावत्वनिवेशवैयर्थ्यमित्यन्तपदं सम्बन्धविशेषावच्छिन्नत्वलाभार्थकतयैव व्याख्येयं तथा च प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्ष्यत्वेऽपि न क्षतिरित्याह वस्तुतस्त्वित्यादिना । एकसम्बन्धावच्छिन्नाया इति तथा च साध्यवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेदकत्वनिवेशे प्रतियोगितावच्छेदकमात्रस्यैव साध्यवन्निष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकतया तादृशप्रतियोगितासामान्यानवच्छेदकसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकाप्रसिद्धिः न वायोगोलकभेदत्वादिकमेव तथा धूमादिमति संयोगादिव्यधिकरणसम्बन्धावच्छिन्नायोगोलकभेदाभावसत्त्वेऽपि तत्प्रतियोगितायां लाघवेन शुद्धभेदत्वादेरवच्छेदकत्वोपगमादिति वाच्यं विषयतासम्बन्धेन कालिकसम्बन्धेन वा अयोगोलकभेदाद्यभावप्रतियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतया तस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वासम्भवात् अयोगोलकभेदाविषयकभेदान्तरविषयकज्ञाने विषयितासम्बन्धेन भेदत्वरूपसामान्यधर्मावच्छिन्नाभावासम्भवेन तत्साधारणतादृशसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य भेदसामान्यानधिकरणदेशाप्रसिद्धा काले कालिकसम्बन्धावच्छिन्नभेदत्वावच्छिन्नाभावासम्भवेनायोगोलकभेदाद्यनधिकरणायोगोलकाद्यवच्छेदेन कालवृत्तेः कालिकसम्बन्धेनायोगोलकभेदाद्यभावस्य च प्रतियोगितायां शुद्धभेदत्वादेरवच्छेदकत्वायोगात् । यदि च यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं निवेश्यायोगोलकभेदत्वादेस्तथात्वमुपपाद्यते तदा वह्निमान् धूमादित्यादौ वह्न्यादिमन्निष्ठसंयोगसमवायदैशिकविशेषणतासम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकधूमादिमन्निष्ठसमवायसंयोगकालिकसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकवह्नित्वद्रव्यत्वतद्व्यक्तिभेदत्वाद्यवच्छिन्नस्योपाधितापत्तिरिति भावः । यत्सम्बन्धावच्छिन्नाया इति । तथा च संयोगादिसम्बन्धावच्छिन्नवह्न्यादिमन्निष्ठाभावप्रतियोगितानवच्छेदक-

यह्नित्यादेः साधनवन्निष्ठतरसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वासम्भवाद्धूमादिमन्निष्ठविशेषणताविशेषादिसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकायोगोलकभेदत्वादेर्वह्न्यादिमन्निष्ठतादृशसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वाच्च न कश्चिद्दोष इति भावः । संसर्गाभावत्वमनुपादेयमेवेति अयोगोलकभेदत्वादेर्धूमवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि विशेषणताविशेषसम्बन्धादिघटितनिरुक्तोपाधितावच्छेदकत्वस्य तत्राक्षतत्वादिति भावः । स च अस्वरसश्च व्यधिकरणसम्बन्धेनेति तथा च यादृशव्यधिकरणसम्बन्धेन संयोगादिना यस्य रूपादेः क्वचिदपि कस्यचिद्भ्रमो न जातस्तस्य तादृशसम्बन्धावच्छिन्नप्रतियोगित्वानुपपत्तिः प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिप्रकारकज्ञानस्याभावधीविरोधित्वात्तादृशाभावधीप्रतिबन्धकज्ञानस्यैवाप्रसिद्धेः । यद्यपि समानधर्मिकयोरेवाभावप्रतियोगिमत्ताज्ञानयोःप्रतिबन्धकभाव इति समानाधिकरणसम्बन्धावच्छिन्नाभावस्थलेऽपि विरोधिनोरभावप्रतियोगिज्ञानयोरेकतरस्य भ्रमत्वनियम इति यादृशाभावस्य तत्प्रतियोगिनो वा भ्रमो न कदाचिदपि प्रसिद्धस्तत्त्वभावप्रतियोगित्वाव्याप्तिसम्भवः तथापि समानविशेष्यताप्रत्यासत्त्या प्रतिबध्यप्रतिबन्धकभावोपगमे भिन्नधर्मिकज्ञानस्यापि प्रतिबन्धकतावच्छेदकाक्रान्ततया तादृशप्रमात्मकज्ञानमादाय लक्षणसमन्वयः सम्भवतीति व्यधिकरणसम्बन्धावच्छिन्नाभावानुधावनम् । ननु प्रतिबन्धकत्वं न कारणीभूताभावप्रतियोगित्वमपि त्वेककालावच्छेदेनैकत्रावर्तमानत्वमिति प्रागेवोक्तमेवं च यादृशव्यधिकरणसम्बन्धेन यस्य प्रतियोगिनो भ्रमो ऽप्रसिद्धस्तादृशसम्बन्धावच्छिन्नतदभावज्ञानासमानकालीनतत्प्रतियोगिविषयकसम्बन्धान्तरावगाहिप्रमामादायैव लक्षणसङ्गतिः सम्भवतीत्यतो दूषणान्तरमाह स्वाभावेति । सम्बन्धत्वस्य नियमघटिततया गौरवादाह स्वाभावज्ञानेति । उभयोरित्यस्य स्वाभावज्ञानप्रतिबन्धकज्ञानविषयत्वापेक्षयेत्यादिः सर्वत्र सम्भवित्वादिति । सर्वत्र प्रतियोगितारूपत्वसम्भवादित्यर्थः तदभावज्ञानविषयोदासीनेऽतिप्रसङ्गस्य स्वांशनिवेशेनैवायोगादिति भावः । ननु तथैवास्त्वित्यत आह स्वाभावेत्यग्रेति । स्वाभावेत्यादावित्ति पाठे य-

याश्रुतविरहत्वनिवेशपक्षे अभावविरहत्वस्याविना परिमदः। षष्ठ्यर्थप्रतियोगितायाः इति स्वस्याभावः स्वाभाव इति षष्ठ्यर्थस्य प्रतियोगित्वातिरिक्तानतिप्रसक्तस्य दुर्वचत्वादिति भावः। तत्र स्वरूपसम्बन्धस्यैवेति अन्यथा आत्माश्रयादिति भावः। यद्यपि स्वाभावेत्यत्र प्रतियोगितायाः सम्बन्धविधया निवेशे सम्बन्धज्ञानस्य विशिष्टबुद्धिहेतुतया स्वाभावेत्यत्र स्वाभावाभावत्वरूपप्रतियोगितानिवेशेऽपि तज्ज्ञानात्पूर्वं न तज्ज्ञानापेक्षेति न दुर्ज्ञेयता तथापि विशिष्टसम्बन्धे सम्बन्धसम्बन्धस्यापि घटकतया सम्बन्धविधया भासमानस्य तस्य शरीरे तस्य सम्बन्धविधया भानं तादृशरीत्या भानान्तर्गतमपि सम्बन्धविधया तज्ज्ञानमिति विषयतानवस्था दुर्वारैव तथात्वौचित्यात् प्रतियोगितात्वौचित्यात् न च स्वाभावे स्वस्य सम्बन्धो ऽनुयोगिता न तु प्रतियोगिता सा च स्वरूपसम्बन्धरूपैवास्तां प्रतियोगिता तु निरुक्तरूपैत्याशङ्क्यम्। अनुयोगितायाः स्वरूपसम्बन्धात्मकत्वेऽपि निरुक्तापेक्षया लघोस्तन्निरूपकत्वस्यैव प्रतियोगितात्वौचित्यात् प्रकारान्तरेण प्रतियोगिताप्रवेशमाह अभावत्वेति। अभावत्वं द्रव्यादिवत्प्रतियोगिकभेदवत्त्वं प्रतिबन्धकत्वं एकत्र वर्तमानत्वादिप्रतियोगिकाभाव इति भावः। नन्वभावादिव्यवहारगोचरत्वमेवाभावत्वं न तु प्रतियोगिताघटितं निरुक्तरूपमित्यत आह तथाविधेति। विना प्रतियोगितामिति प्रतियोगितान्तर्भावमन्तरेणेत्यर्थः तथाविधव्यवहारगोचरत्वम् अभावादिशब्दप्रतिपाद्यत्वं तत्पदशक्तिविषयत्वरूपं वा उभयथापि अन्यताघटितं प्रतिपाद्यत्वस्य तज्जन्यप्रतिपत्तिविषयत्वरूपत्वात् तत्पदशक्तेश्च तत्पदजन्यबोधविषयत्वप्रकारकभगवदिच्छारूपत्वात् जन्यता च व्याप्तिघटिता तस्याश्च प्रतियोगिताघटितत्वादिति भावः। एवं च प्रतियोगिता स्वरूपसम्बन्धविशेष इति पूर्वमत एव मणिकारस्य निर्भर इति सूचितम्। इदं त्ववधेयम् घटो नास्तीत्यभावबुद्धावभावांशे प्रतियोगिन एव प्रकारतया भानाभ्युपगमादेः कारणत्वे प्रतियोगिनो ऽवच्छेदकत्वाच्च अभावनिष्ठः प्रतियोगिनिरूपितो ऽनुयोगिताख्यः स्वरूपसम्बन्धः अवश्यमङ्गीकार्यः प्रतियोगिन्यभावविशिष्टबुद्ध्यात्मको अभावीयो घट इत्यादिप्रत्ययस्तु नानुभवसिद्ध इत्यभावीयप्रतियोगि-

तादृशस्वरूपसम्बन्धे मानाभावः प्रतियोगिव्यवहारस्त्वनुयोगितानिरूपकत्वमेवावलम्बते ध्वंसस्य प्रतियोगिनिष्ठप्रत्यासत्त्या प्रतियोगिजन्यत्वानुरोधेन तस्य प्रतियोगिनि सम्बन्धोपगम आवश्यक इति चेदस्तु तथा तथापि अभावान्तरस्य तादृशसम्बन्धो निष्प्रमाण एव न च जन्यत्वस्य यत्र कार्यतावच्छेदकता तत्र प्रागभावादिनिष्ठानुयोगितानिरूपकत्वापेक्षया प्रतियोगितासम्बन्धेन प्रागभाववत्त्वस्य तथात्वे लाघवात् प्रागभावस्यापि तादृशसम्बन्धः सिध्यतीति वाच्यं तत्र निरूपकतासम्बन्धेनानुयोगिताविशेषरूपप्रागभावत्वस्यैवावच्छेदकत्वोपगमात् अन्यथा प्रागभावनिष्ठात्यन्ताभावादिभेदस्याधिकरणस्वरूपतामते जन्यत्वस्यात्यन्ताभावादिसाधारण्यापत्तेः गौरवाच्चेति ॥

यत्साध्यस्येत्यत्र कर्मधारयसमासे व्याप्तेर्हेतुनिष्ठत्वालाभ इति षष्ठीतत्पुरुषमवलम्ब्य व्याचष्टे यत्समानाधिकरणात्यन्ताभावेत्यादिना ।

(चि०) यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न । सोपाधेरपि तथात्वात् । तथाहि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनं तत् प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्निः ।

(दी०) यत्साध्यस्य यत्समानाधिकरणसाध्यस्य तथाहीत्यादि । यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यावत् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यावत् यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं तत्त्वमित्यर्थे तु नोक्तदोष इति ध्येयम् । प्रतियोगित्वयोः एकसम्बन्धावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा वक्तव्यम् । तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चि-

रसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि एकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः । व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविषयत्ववं विशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसङ्गः । वस्तुतस्तु हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावद्यद्धर्मावच्छिन्नयत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यं साध्यसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं यावत्स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकम् तत्त्वं वा व्याप्तिरिति ध्येयम् ।

(गा०) अत्यन्तपदानि मूले तत्पदमस्तीत्युपात्तानि न तु विवक्षितार्थकानि सम्बन्धविशेषावच्छिन्नत्वेन प्रतियोगिताया अग्रे विशेषणीयतया व्यावृत्त्यभावात् । मोकदोष इति आर्द्रेन्धनायोगोलकान्यत्वादीनां धूमादीनां धूमादिसाध्यवन्निष्ठतत्तद्व्यक्तित्वोभयत्वाद्यवच्छिन्नप्रतियोगितावत्वेऽपि तत्त्वस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात्साधनधर्मस्य महानसीयवह्न्यादिरूपव्यक्तिनिष्ठसाधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेऽपि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभाववत्त्वाभावादिति भावः । एकसम्बन्धावच्छिन्नत्वमिति । साधनसमानाधिकरणाभावीयपदयत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वं यस्य तस्य साध्यवन्निष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वं साध्यवन्निष्ठाभावीयपदयत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं यस्य तस्य साधनवन्निष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदक-

त्वमित्येव विवक्षणीयमित्यर्थः । विशेषणताविशेषसम्बन्धमात्रनिवेशेनैव सामञ्जस्ये सम्बन्धान्तरनिवेशनमफलमित्याशयेनाह विशेषणतेति । प्रथमलक्षणे सम्बन्धविवक्षायाः फलमाह प्रतियोगितावच्छेदकमात्रस्यैवेति । मात्रपदं कृत्स्नार्थकं तथा च सुतरां साधनसमानाधिकरणाभावप्रतियोगितावच्छेदकसामान्ये साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वमिति सम्बन्धाविवक्षणे ऽतिव्याप्तिः स्यादिति भावः । लघुधर्मसमनियतगुरुधर्मस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वासम्भवाद्धर्ममात्रमुपेक्ष्य प्रतियोगितावच्छेदकधर्मानुसरणं । यद्यपि कम्बुग्रीवादिमत्त्वादेरपि विषयितासम्बन्धावच्छिन्नतद्विशिष्टाभावप्रतियोगितावच्छेदकत्वं सम्भवति घटत्वादिविशिष्टविषयकेऽपि कम्बुग्रीवादिमत्त्वाप्रकारके ज्ञानादौ तद्विशिष्टस्य विषयितासम्बन्धावच्छिन्नाभावसत्त्वेन लघुघटत्वादेस्तत्प्रतियोगितावच्छेदकत्वासम्भवात् तथापि विषयिताया वृत्त्यनियामकत्वेनाभावप्रतियोगितावच्छेदकत्वं नास्तीत्यभिप्रायेणेदम् । अयोगोलकभेदत्वादेस्तु धूमादिमन्निष्ठकालिकादिसम्बन्धावच्छिन्नाभावप्रतियोगितायामवच्छेदकत्वमिति बोध्यम् । द्वितीयलक्षणे सम्बन्धविवक्षाफलं दर्शयति एकसम्बन्धेति । तथा च यदि यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यद्यत्र साधनसमानाधिकरणाभावीयप्रतियोगितासामान्यावच्छेदकत्वाभावो विवक्षितस्तदा ऽसम्भवः स्यादिति भावः । यदि साधनसमानाधिकरणाभावीययत्किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वाभावो निवेश्यते उभयदले प्रतियोगितासामान्यं वा तदा पुनरतिव्याप्तिरेवेति हृदयम् । उभयलक्षण एव सम्बन्धविवक्षणे व्यभिचारिण्यतिव्याप्तिवारणप्रकारं दर्शयति व्यभिचारिणि हिवति । तन्निष्ठाभावप्रतियोगितावच्छेदकमिति । तथा च साधनवन्निष्ठाभावप्रतियोगितावच्छेदकेषु साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकेषु वा यावत्सु साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वान्तर्भावात्तत्र च साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसाधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वयोरभावान्न लक्षणद्वयातिव्याप्तिरिति भावः । अत्यन्ताभावघटितत्वेन गुरुतया तद्घटितमन्योन्याभावगर्भलक्ष-

पक्षद्वयमाह वस्तुत इति। यद्यप्यन्योन्याभावगर्भलक्षणेऽपि प्रतियोगितावच्छेदकतयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा निवेशनमावश्यकम्। अन्यथायोगोलकान्यत्वादेरपि धूमाद्यात्मकसाध्यवन्निष्ठस्य विषयितादिसम्बन्धेन स्वावच्छिन्नभेदस्य प्रतियोगितावच्छेदकतयाऽतिप्रसङ्गात्, अत्यन्ताभाववद्वृत्तिलक्षणे च तादृशसम्बन्धेनायोगोलकभेदत्वाद्यवच्छिन्नज्ञानादेर्योऽत्यन्ताभावस्तत्प्रतियोगितावच्छेदकतामादायातिप्रसङ्गो न सम्भवति विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगितायां गुरुभेदत्वादेरेवावच्छेदकत्वसम्भवेन गुरोरयोगोलकभेदत्वादेरनवच्छेदकत्वादिति तत्र प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धानिवेशो नास्ति तथा चान्योन्याभावगर्भव्याप्तौ लाघवानवकाशः तथापि गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते ऽत्यन्ताभावगर्भलक्षणेपि प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धानिवेश आवश्यक एवं भेदत्वादेर्विषयितासम्बन्धेन प्रतियोगितावच्छेदकत्वेऽप्ययोगोलकभेदत्वादेर्न प्रतियोगितानवच्छेदकत्वनिर्वाहः विशेष्ये पर्याप्तस्यापि विशिष्टानुयोगिकाभावानभ्युपगमादिति तादृशधर्मस्य साध्यव्यापकतावच्छेदकत्वनिर्वाहाय द्वितीये ऽत्यन्ताभाववद्वृत्तिलक्षणे तन्निवेशनस्यावश्यकता सर्वथैवेत्यभिप्रायेणेदम्। वस्तुतस्त्वित्यादि भ्रान्तकल्पितः पाठ इत्यपि वदन्ति।

यावदव्यभिचारितदव्यभिचारित्वमुभयत्रैव चतुर्थ्यादिभ्रमनिरासाय व्याचष्टे यावतां तेषामिति।

(चि०) नापि साध्यं यावदव्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वम्। साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात्। तच्च दूषितम्। नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः। एकव्यक्तिके तदभावात्। नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकमग्रहावभावात्। अत एव न कार्त्स्न्येन साध्येन सम्बन्धो व्याप्तिः। विषमव्याप्ते तदभावाच। न च

यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः । साधनाश्रयमहानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात् नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यम् । यावद्धर्मसामानाधिकरण्यं हि यावत्तद्धर्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धम् । साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः । नापि स्वाभाविकः सम्बन्धो व्याप्तिः । स्वभावजन्यत्वे तदाश्रितत्वादौ वाव्याप्त्यतिव्याप्तेः । नाप्यविनाभावः केवलान्वयिन्यभावात् ।

(दी०) साध्यमिति । यावतां तेषामित्यर्थः । दूषितं केवलान्वयिन्यव्याप्त्या । सा च यथोक्तलक्षणेऽपि । गौरवं परमतिरिच्यते इति । कार्त्स्न्यं साधनस्य साध्यस्य साध्याश्रयस्य साध्यसमानाधिकरणस्य वा । आद्ये कृत्स्नसाधनसामानाधिकरण्यं साध्ये कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः । प्रथमे एकेति नानेति च व्याप्तेश्चाहेतुवृत्तित्वं । पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च । अत एव नेतरः । अर्थाभिधानपूर्वकं द्वितीयं निरस्यति अत एवेति । अत एव एकव्यक्तिमात्रकाव्याप्तेरेव विषमव्याप्तेः समव्याप्तेऽपि च संख्यापरिमाणादावेकत्र साधने सकलसाध्यसम्बन्धस्याभावात् भावाच्च शब्दवान् द्रव्यत्वादित्यादौ । तृतीये साध्याश्रययावद्वृत्तित्वं चतुर्थे साध्यसमानाधिकरणयावत्सामानाधिकरण्यमर्थः । तत्र च यथासम्भवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमादावव्याप्तिरतिव्याप्तिश्च सत्त्वादौ । अर्थपरिष्कारपूर्वकं पञ्चमं निरस्यति न चेति । एकमात्रवृत्तिसाधने.

चान्याप्तिश्च । तथैव पष्ठं निरस्यति नापीति । तादृशानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वह्नौ । अथ यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मवत्तादृशसामानाधिकरण्यं विवक्षितमिति चेत् इतोऽपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरितिसिद्धान्तयिष्यते । अविनेति साध्यं विना साध्याभाववति यो भावो वृत्तिस्तद्विरहः । साध्यं विना अभावः साध्याभावव्यापकीभावप्रतियोगित्वमिति वा ।

(गा०) दूषितमित्यत्र केन दोषेणेत्याकाङ्क्षायां हेतुं पूरयति केवलान्वयिन्यव्याप्त्येति । ननु साध्याव्यभिचरितत्वमात्रोक्तौ केवलान्वयिन्यव्याप्तिः प्रसज्यत इत्येत एव शेषसार्थक्यं भविष्यतीत्याशङ्कायामाह सा चेति केवलान्वयिन्यव्याप्तिश्चेत्यर्थः । यथोक्तलक्षणे यावतां साध्यमव्यभिचारि तेषामव्यभिचारित्वरूपे केवलान्वयिसाध्यं व्यतिरेकिणो व्यभिचार्येव केवलान्वयिनश्च व्यभिचार एवाप्रसिद्ध इति तदव्यभिचारित्वमपि तथेति साध्यं यस्याव्यभिचारि तादृशवस्तुनोऽप्रसिद्धेरिति भावः । कात्स्न्र्येन सम्बन्ध इत्यत्र साध्यसाधनाश्रयसाधनसमानाधिकरणधर्मेषु कात्स्न्र्यस्य विशेषणतापक्षा मूलकृता दूषिताः न तु साध्याश्रयतत्समानाधिकरणयोस्तद्विशेषणत्वपक्षौ अतो मूलन्यूनताभङ्गाय स्वयं तौ दूषयितुं तावन्तर्भाव्य वितर्कयति कात्स्न्र्यमित्यादिना । साधनसमानाधिकरणस्य वा विवक्षितमिति शेषः । सकलधूमसम्बन्धस्य प्रत्येकं महानसावयवादित्यभिधानेन साध्यानुयोगिककृत्स्नसाधनसम्बन्धस्य व्याप्तितापक्षदूषणे मूलस्य तात्पर्यं प्रतीयते तथा च कृत्स्नसाधनानुयोगिकसाध्यसम्बन्धस्यादूषणेन न्यूनतां परिहर्तुं तत्पक्षं दूषयिष्यन् साधनस्य कात्स्न्र्यमन्तर्भाव्य वितर्कयति साध इति । प्रथमपक्षे मूलोक्तदूषणद्वयं तद्भ्यस्याधिकं दोषद्वयमाह व्याप्तेर्धीति पृथिवीति पृथिवीत्वविशिष्टत्वपदार्थसकलधर्मा

धिकरणाप्रसिद्धा सकलतत्सामानाधिकरण्याप्रसिद्धिरतः पृथिवीवृत्तित्वमुपेक्ष्य तत्तद्व्यापकत्वानुसरणं पृथिवीत्वव्यापकत्वं पृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमवृत्तिसाधारणमिति तेन रूपेण हेतुत्वेऽवृत्तेरपि सकलसाधनान्तर्गततया तदधिकरणाप्रसिद्धा नातिव्याप्तिरतो जातिपदं समवेतार्थकम् । अत एव एकव्यक्तिसाधनकाव्याप्तिसहितदर्शितातिव्याप्तेरेव इतरः कृत्स्नसाधने साध्यसम्बन्धो व्याप्तिरिति पक्षः द्वितीयं साध्ये कार्त्स्न्यविशेषणपक्षम् । एकव्यक्तिके तदभावादित्यत्र एकव्यक्तिकपदं तादृशसाधनपरं तस्य साधने कार्त्स्न्यविशेषणपक्षदूषणपरत्वात् तथा चात एवेत्यस्य तादृशदूषणपरत्वासम्भवादेकव्यक्तिसाध्यकाव्याप्तिपरतया व्याचष्टे अत एवेति न्यूनताभङ्गाय पूरयति समव्याप्तेऽपि चेति । संख्यापरिमाणादौ संख्यादिसाध्यकपरिमाणादौ शब्दवानिति रूपादेः साध्यत्वे सकलतदधिकरणाप्रसिद्धा नातिव्याप्तिरतः शब्दसाध्यकानुधावनं तत्र गगनस्यैव सकलशब्दाधिकरणत्वात् । तृतीयचतुर्थयोरर्थाभिधानपूर्वकं दूषणमाह तृतीये चेत्यादिना एकमात्रवृत्तिसाध्यके यावत्साध्याश्रयाप्रसिद्धिदोषस्तृतीय एव न चतुर्थे वह्निमान् सत्त्वादित्यादावतिव्याप्तिरपि तत्रैव न चतुर्थे यावत्साध्यसमानाधिकरणपर्वतत्वमहानसत्वाद्यधिकरणाप्रसिद्धा तदनवकाशादतो यथासम्भवमिति धूमादावव्याप्तिरिति सकले वह्निमति प्रत्येकधूमस्यावृत्तेः वह्निसमानाधिकरणयावद्धर्माधिकरणाप्रसिद्धेश्चेति भावः । सत्त्वादावित्यत्र वह्न्यादौ साध्ये इत्यनुपज्यते पञ्चमे यथाश्रुते यावत्साधनाश्रयसम्बन्धः साध्ये लभ्यते तावता व्याप्तेः साधनानन्वानिर्वाह इति तन्निर्वाहाय तादृशसाध्यसामानाधिकरण्यस्याधिकस्य प्रवेशनमर्थपरिष्कारः । स्वयमधिकं दूषणमाह एकमात्रवृत्तिसाधन इति यावत्साधनाश्रयाप्रसिद्धेरिति भावः । तथैव अर्थपरिष्कारपूर्वकमेव अत्रापि यथाश्रुते कृत्स्नसाधनसमानाधिकरणसामानाधिकरण्यं साध्ये लभ्यते अतो व्याप्तेर्हेतुनिष्ठतासम्पादनाय सामानाधिकरण्यस्याधिकस्य निवेशनमेव परिष्कार इति बोध्यम् । ननु साधनसमानाधिकरणानां मिथो विरुद्धानामेकाधिकरणाप्रसिद्धावपि तेषां प्रत्येकसामानाधिकर-

क्षणे साध्याभाववद्वृत्तिभेदो विवक्षितोऽत्र तु तत्त्वात्यन्ताभाव इति भेद इति भावः । सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या ऽव्याप्तिरतो ऽविनाभावमन्यथा व्याचष्टे साध्यं विना ऽभाव इति । तथा च नञ्व्यत्यासः कार्य इति भावः । तथा च विनाशब्दार्थो ऽभाव एव न तु तद्वान् तस्य च निपातार्थतया प्रयुक्तत्वसम्बन्धेनाभावे साक्षादन्वय प्रयुक्तत्वं च व्यापकत्वमेवेत्याशयेनाह साध्याभावव्यापकेति ।

साध्यस्य संयोगादिसम्बन्धो न तदीयव्याप्तिरतो व्याचष्टे सामानाधिकरण्यमिति ।

(चि०) अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशिष्यैव निर्वक्तव्येति । तन्न । लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात् । न च सम्बन्धमात्रं तथा । तद्बोधादनुमित्यनुत्पत्तेः । नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदम् । सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् ।

केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वम् अनुमितिमात्रे पक्षधर्मतैव प्रयोजिका न चातिप्रसङ्गः विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्यजनकत्वनियमादिति केचित् । तदपि न । साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्वतान्यस्मिन् धूमसत्त्वात् न च सकलसाध्यवदन्यावृत्तित्वम् वह्निमतां प्रत्येकं तथात्वात् । सर्वत्र लक्षणे साध्यत्वसाधनत्वतदभिमतत्वा-

नां व्याप्तिनिरूप्यत्वेनात्माश्रयः । साध्यत्वं हि न सिद्धिकर्मत्वं सिषाधयिषाविषयत्वं वा । महानसीयवह्नौ तदभावात् । न च सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणेनासाधकतां साधयेदिति वाच्यम् । स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति ।

(दी०) अथेति । सम्बन्धः सामानाधिकरण्यम् । व्यभिचारिसम्बन्धस्येति केनचित् किञ्चिद्रूपावच्छिन्नेन । धूमादेरपि द्रव्यत्वादिनावह्निव्यापकत्वात् । तद्बोधादिति । न च व्यभिचाराग्रह सहकृतस्तद्बोधस्तथा । व्यभिचार तद्व्यतिरेकयोः अनुपस्थितावपि समानाधिकरण धर्मवत्ताज्ञानमात्रादनुमित्युत्पादस्य सर्वानुभव सिद्धत्वात् । हेत्वन्तरे तत्रैव च रूपान्तरेण व्यभिचारग्रहे हेतुतावच्छेदकाग्रहेऽप्यनुमित्युत्पादाच्च । विवदन्ते च सामानाधिकरण्यज्ञानस्यैव हेतुतायाम् । व्यभिचारज्ञानाभावकारणत्वमपेक्ष्य कारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतावच्छेदकत्वमुचितम् । न च व्यभिचारसंशयेऽनुमित्यनुत्पादादव्यभिचारनिश्चयत्वेन कारणत्वोक्तौ गौरवम् व्यभिचारज्ञानस्य हि भ्रमत्वानिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य विरोधित्वं वाच्यम् । अव्यभिचारनिश्चयस्य च भ्रमत्वशङ्कायामप्यनुमित्यजनकतया भ्रमत्वेनाप्रामाणस्यैव हेतुत्वमिति तत्रैव गौरवात् । नानाविधव्यभिचारज्ञानाभावानां नियतपूर्ववर्तित्वेन घन्तृत्वानामपि हेतुत्वमपेक्ष्य यत्किञ्चिद्रूपेणाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्यप्याहुः । सामानाधिकरण्यविशिष्टधर्मवत्त्वं तु पक्षे साध्यग्रहं विना दुर्ग्रह मिति । केवलान्व-

यित्वस्याग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोऽपि वाच्यः । तच्च वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकमन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा । तथा च सर्वसाधारण्याय लाघवात्साधनवतस्तद्वृत्तित्वस्य वा वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धान्तरहस्यम् । शेषं केवलान्वयिखण्डने वक्ष्यामः ।

(गा०)मूले व्यभिचारिसम्बन्धस्येति तद्व्यभिचारिनिष्ठतदीयसम्बन्धस्येत्यर्थः केनचित्सह व्याप्तत्वादित्यत्रान्यदीयव्याप्तत्वं प्रतीयते तच्च न सम्भवतीति व्याचष्टे किञ्चिद्रूपेति तथा च रूपान्तरावच्छिन्नतद्व्याप्तत्वादित्यर्थः तदेव दर्शयति धूमादेरपीति व्यापकत्वात् व्याप्तिनिरूपकत्वात् तथा च वह्न्यादौ धूमादिव्याप्तिरिष्टैवेति भावः। मूले तद्बोधादिति केवलसाध्यसामानाधिकरण्यप्रकारकहेतुमत्ताज्ञानादित्यर्थः अनुमित्यनुदयादिति अनुमित्युदयोपगमासम्भवादित्यर्थः तथा सति द्रव्यत्वादिहेतुना ह्रदादावप्यभ्रान्तानां वह्न्याद्यनुमानापत्तेः उदाहरणे वीप्सितयत्पदप्रयोगे वैयर्थ्यापत्तेः व्यभिचारस्य हेत्वाभासतानुपपत्तेः सर्वत्र मेयत्वादिना सत्प्रतिपक्षतापत्तेश्चेति भावः। ननु व्यभिचारज्ञानाभावः साक्षादेवानुमितिहेतुर्वाच्यस्तथा च साध्याभावव्यभिचारिमेयत्वादेर्न सत्प्रतिपक्षाधायकत्वप्रसङ्गः न वा व्यभिचारस्य हेत्वाभासतानुपपत्तिः व्यभिचारशङ्कानिवर्तनेनैव च उदाहरणे वीप्सोपयोग इत्याशङ्कते दीधितौ न चेति । तद्बोधः साध्यसामानाधिकरण्यप्रकारकहेतुमत्ताबोधः सर्वानुभवसिद्धत्वादिति तथा च तत्रानुमित्यापत्तिरिति भावः । एवमेतन्मते कोटिद्वयसहचरितधर्मद्वयदर्शनादुभयत्र व्यभिचाराग्रहे संशयानुमितिप्रसङ्गोऽपि दुर्वारः विपरीतकोटिसमानाधिकरणधर्मवत्ताज्ञानस्य विशिष्टबुद्धिविरोधित्वात् अन्यथा साधारणधर्मदर्शनाधीनप्रत्यक्षसंशयस्याप्युच्छेदापत्तेः व्यभिचारज्ञानाभावहेतुत्वं सम्भवदुक्तिकमपि नेत्याह हेत्वन्तरेति । द्रव्यत्वादौ वह्न्यादिव्यभिचारग्रहदशायां धूमादिलिङ्गकवह्न्यनुमितेरुत्पादादित्यर्थः । तथा च सत्साध्यकानुमितेस्तत्साध्यनिरूपितव्यभिचाराग्रहव्यभिचारित्वान्न

ग्रहहेतुतां कल्पयतः सामानाधिकरण्यमात्रस्य व्याप्तित्वं म- न्यमानस्य मते गौरवाभावेऽपि साध्याभाववदवृत्तित्वरूपाव्यभि- चारज्ञानहेतुतावादिनवीनमतापेक्षया कारणताद्वयकल्पने गौरव दुर्वारमेवेति भावः । हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्ति- ज्ञानहेतुतावादिनां सिद्धान्तिनां मतेऽपि तन्मतापेक्षया लाघ- वमाह व्यभिचारज्ञानेति । सिद्धान्तिमते ऽव्यभिचारज्ञानसामा- नाधिकरण्यज्ञानयोः न कारणताद्वयम् अपि तु स्वसमाना- धिकरणाभावप्रतियोगितानवच्छेदकत्वरूपाव्यभिचारविषयतानिरू- पितत्वं साध्यसामानाधिकरण्यज्ञानहेतुतावच्छेदककोटिप्रविष्टसा- ध्यतावच्छेदकविषयतायां निवेश्यते तथा च कारणताया ऐक्याल्लाघवमक्षुण्णमेवेति भावः । इदमत्रावधेयम् पक्षभेदेन साध्य- समानाधिकरणहेतुमत्ताज्ञानहेतुतानामानन्त्यात्तत्राव्यभिचारविषय- तानिवेशे ऽनन्तस्थले ऽवच्छेदकगौरव निरुक्तसाध्यतावच्छेद- कविषयतायां निरुक्ताव्यभिचारविषयतानिरूपितत्वं निरुक्ताव्यभि- चारविषयतायां वा साध्यतावच्छेदकविषयतानिरूपितत्वं नि- वेश्यत इत्यत्र विनिगमनाविरहेणानन्तपक्षभेदेनानन्तकारणताधि- क्यं चेति पक्षविशेषमनन्तर्भाव्य सामान्यतस्तल्लिङ्गकतत्साध्य- कानुमितौ तल्लिङ्गधर्मिकतत्साध्यनिरूपितव्यभिचारज्ञानाभावत्वेनै- ककारणताकल्पनमेव सम्यक् । अत्र केचित् व्यभिचारग्रहस्य शा- रीरनिष्ठप्रत्यासत्त्या आत्मनिष्ठप्रत्यासत्त्या वा प्रतिबन्धकत्वं न स- म्भवति परपुरप्रवेशस्थले तच्छरीरे अभिभाव्यस्य व्यभि- चारज्ञानसत्त्वेऽपि अभिभावकभूतादेरनुमित्युदयात् कायव्यूहस्थले एकशरीरावच्छिन्ने आत्मनि व्यभिचारग्रहसत्त्वेऽपि शरीरान्तरा- वच्छिन्ने तत्रानुमित्युदयादिति शरीरविशेषावच्छिन्नत्वं निवे- श्यात्मनिष्ठप्रत्यासत्त्या व्यभिचारग्रहस्य प्रतिबन्धकता वाच्या तथा च चैत्रमैत्रादिशरीरभेदेन तदभावस्यानन्तहेतुतापेक्षया सामानाधि- करण्यसमानावच्छेदकत्वोभयप्रत्यासत्त्या अवश्यकल्प्यसामाना- धिकरण्यज्ञानहेतुतायामव्यभिचारविषयकत्वनिवेश एव लघीयान् न च समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यव्यभि- चाराग्रहस्य सामानाधिकरण्यसमानावच्छेदकत्वप्रत्यासत्तिभ्यां कारणताकल्पनेनैव सामञ्जस्यात्सद्धेतुतामतेऽपि शरीरभेदनिवे-

ज्ञानं नास्तीति वाच्यं तथा सति तच्छरीरावच्छेदेन तदात्मनि व्यभिचारधीसत्त्वेऽपि तदात्मनि तदभावस्यान्यावच्छेदेनान्यात्मनि तदभावस्य तच्छरीरावच्छेदेन वृत्तेस्तच्छरीरावच्छेदेन तदात्मन्यनुमित्यापत्तेर्दुर्वारत्वात् उभयप्रत्यासत्त्यवच्छिन्नैकहेतुतास्थले एककारणव्यक्तेरुभयाधिकरणप्रत्यासत्तेरुभयाधिकरणप्रत्यासन्नकार्योत्पत्तिप्रयोजकतया ऽव्यभिचारविषयकसामानाधिकरण्यज्ञानं तत्र कायव्यूहस्थले तदात्मनि शरीरान्तरावच्छेदेनैतच्छरीरावच्छेदेन परपुरप्रवेशकर्तर्यात्मान्तरे तन्नैतच्छरीरावच्छेदेनैतदात्मनि अनुमित्यापत्त्यनवकाशः आत्मभेदेन ज्ञानव्यक्तिभेदादिति ज्ञानहेतुतायां शरीरभेदनिवेशमन्तरेणैवोपपत्तिरधिकरणभेदेऽव्यभाव व्यक्तिभेदाभावेन व्यभिचारज्ञानाभावहेतुतामते शरीरभेदनिवेशनं विना ऽतिप्रसङ्गवारणोपपत्तेरयोगात् न च यद्देशावच्छेदेन यदा यदधिकरणे कार्यं तदवच्छेदेन तदव्यवहितपूर्वक्षणे तदधिकरणे कारणमित्येतादृशावच्छेदकीभूतदेशघटितव्यापकताघटितं कारणत्वं व्यभिचारग्रहे स्वीक्रियते तादृशकारणताश्रयस्य तद्देशावच्छेदेन तदधिकरणसत्त्वं तद्देशावच्छिन्नतदधिकरणनिष्ठकार्योत्पादे तन्त्रमिति तच्छरीरावच्छेदेन तदात्मनि व्यभिचारग्रहदशायां तदवच्छेदेन तदात्मनि तद्ग्रहस्य दुर्लभतया नोक्तातिप्रसङ्ग इति वाच्यम् । एवमपि यत्र महाशरीरनाशस्य खण्डशरीरस्य चोत्पाददशायां व्यभिचारग्रहस्तत्र खण्डशरीरोत्पादद्वितीयक्षणे तदवच्छेदेनानुमित्यापत्तेर्व्यभिचाराग्रहहेतुतावादिनां दुर्वारत्वात् तच्छरीरस्य व्यभिचारग्रहपूर्वकाले ऽसत्त्वेन व्यभिचारग्रहानवच्छेदकतया तदवच्छेदेन तद्ग्रहस्यात्मनि सत्त्वात् न च तदा व्यभिचारग्रह एव न सम्भवति शरीररूपकारणविरहादित्याशङ्क्य यत शरीरावयवसाधारणचेष्टावत्त्वस्यैव ज्ञानजननोपयिक्तया शरीरासत्त्वेऽपि तदवयवावच्छेदेनैव ज्ञानोत्पत्तिसम्भवादित्याहुः । व्यभिचाराग्रहस्यानुमितिहेतुतामते अनुमितिसामग्र्या अधिककारणताघटिततया भिन्नविषयकप्रत्यक्षादौ तत्प्रतिबन्धकतायां गौरवमित्यन्ये । अव्यभिचारग्रहहेतुतामते तत्र संशयान्यत्वप्रवेशप्रयुक्तगौरवमाशङ्कते अव्यभिचारीनश्चयत्वेनेति । व्यभिचाप्रकारकाव्यभिचारप्रकारकज्ञानत्वेनेत्यर्थः । गौरवमिति

व्यभिचाराग्रहहेतुतामते व्यभिचारसंशयस्यापि प्रतिबन्धकत्वेन तत्साधारणव्यभिचारग्रहत्वावच्छिन्नाभावहेतुतया व्यभिचारग्रहे संशयभेदानिवेशेन लाघवादिति भावः । व्यभिचारज्ञानप्रतिबन्धकतामते व्यभिचारज्ञाने निश्चयत्वानिवेशेऽपि उत्तेजकीभूतभ्रमत्वज्ञाने निश्चयत्वस्य निवेशनीयतया गौरवमिति समाधत्ते व्यभिचारज्ञानस्येति भ्रमत्वनिश्चयदशायामेवेत्येवकारेण तत्संशयदशायामनुमित्यविरोधित्वव्यवच्छेदः अप्रामाण्यशङ्कया निश्चितस्यापि विपर्यस्य संशयोत्पत्तेः तच्छङ्काकलङ्कितस्य निश्चयकार्यकारित्वमात्रं नास्तीति तथाविधस्य व्यभिचारग्रहस्य तत्संशयान्तरवदनुमितिप्रतिबन्धकताध्रौव्यादिति भावः । भ्रमत्वेनानिश्चीयमानस्य भ्रमत्वनिश्चयत्वावच्छिन्नाभावविशिष्टस्य विरोधित्वं वाच्यं भवता वाच्यं भ्रमत्वशङ्कायामपीति तच्छङ्कास्कन्दितज्ञानस्य विरोध्यप्रकारकज्ञानस्यापि निश्चयकार्यासमर्थत्वादिति भावः । अधिकारात्तन्निश्चयदशासमुच्चयः भ्रमत्वेनागृह्यमाणस्येति भ्रमत्वज्ञानत्वावच्छिन्नाभावविशिष्टस्येत्यर्थः एवकारेण तन्निश्चयत्वावच्छिन्नाभाववैशिष्टयस्य कारणतावच्छेदकत्वव्यवच्छेदः । तवैवेति व्यभिचाराग्रहहेतुतावादिन एवेत्यर्थः । गौरवादिति व्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वज्ञानाभावविशिष्टव्यभिचारप्रकारकाव्यभिचारज्ञानत्वापेक्षया ऽव्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारत्वाभावाप्रकारकाव्यभिचारवद्विशेष्यकत्वावच्छिन्नव्यभिचारप्रकारकत्वप्रकारकज्ञानत्वावच्छिन्नाभावविशिष्टव्यभिचारज्ञानत्वावच्छिन्नाभावत्वरूपकारणतावच्छेदकस्य गुरुशरीरत्वादिति भावः । न च भ्रमत्वज्ञानास्कन्दितस्वविषयकभ्रमत्वज्ञानदशायामव्यभिचारज्ञानस्यानुमितिजनकतया तदवच्छेदकाभावप्रतियोगिनि भ्रमत्वज्ञाने भ्रमत्वान्तरग्रहाभावविशिष्टत्वं निवेश्य तादृशभ्रमत्वग्रहस्य निश्चयत्वेनैवाभावो निवेश्यः भ्रमत्वशङ्कास्कन्दितस्यापि परामर्शीयभ्रमत्वग्रहस्य भ्रमत्वसंशयान्तरवदनुमित्यनुत्पादप्रयोजकत्वादित्यव्यभिचारग्रहहेतुतामते गौरवं व्यभिचारग्रहोत्तेजकीभूतभ्रमत्वनिश्चये भ्रमत्वान्तरग्रहस्य संशयसाधारणतज्ज्ञानत्वेनैवाभावनिवेशादिति वाच्यम् अप्रामाण्यग्रहे ऽप्रामाण्यान्तरग्रहाभावानिवेशे तत्राप्यप्रामाण्यान्तरग्रहाभावस्य नि-

वेद्यतानीयतया तत्र भवतां निश्चयत्वनिवेशेन लाघवविरहात् न चावच्छेदककोटिप्रविष्टाप्रामाण्यग्रहधारायाः एवैक परित्यज्य निश्चयत्वनिवेशनमुभयमते समानम्। अव्यभिचारग्रहहेतुतामते पुनरव्यभिचारग्रहे निश्चयत्वनिवेशनमधिकमिति वाच्यम् अव्यभिचारविशिष्टवैशिष्ट्यज्ञानत्वेनैव हेतुताया वक्तव्यतया तत्सत्त्वे च तद्विशिष्टवैशिष्ट्यावगाहित्वानुपगमेनैवाव्यभिचारसंशयादनुमितिवारणसम्भवे तदंशे निश्चयत्वस्यानिवेशात् अव्यभिचारविषयकाप्रामाण्यग्रहे ऽप्रामाण्यग्रहसत्त्वेऽप्यनुमित्यनुपगमेनाप्रामाण्यग्रहे ऽप्रामाण्यान्तरग्रहाभावस्य न विशेषणत्वमन्यथा विशेषणानवस्थाप्रसङ्गादित्यपि वदन्ति । गौरवान्तरेण व्यभिचारग्रहप्रतिबन्धकतामत दूषयतामन्येषां मतमाह नानाविधेति । हेतुनिष्ठसाध्याभाववद्वृत्तित्वसाध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वतादृशप्रतियोगितानिष्ठसाध्यतावच्छेदकावच्छिन्नत्वादिरूपबहुविधत्वर्थ यत्किञ्चिदेकविधव्यभिचारग्रहदशायामेवानुमित्यनुत्पादस्यानुभविकतया सर्वविधव्यभिचारज्ञानस्यैव पृथक्प्रतिबन्धकताया आवश्यकत्वादिति भाव । नियतपूर्ववर्तित्वेन क्लृप्तानामपीति । अव्यभिचारज्ञानहेतुतामतेऽपि तद्धेतुभूतयावद्व्यभिचारज्ञानाभावानामनुमितौ नियतपूर्ववर्तित्वादिति भाव । एतेन बहुष्वनन्यथासिद्धिकल्पनमपेक्ष्य एकधर्मावच्छिन्ने नियतपूर्ववर्तितासहिततत्कल्पने लाघवमिति ध्वनितम् । वक्ष्यमाणकविधेति । केवलान्वयिखण्डनावसरे साध्याभाववद्वृत्तित्वरूपलघुशरीरव्यभिचारेत्यर्थ तादृशव्यभिचारज्ञानस्यापि सर्वविधव्यभिचारग्रहप्रतिबध्यतया तद्धेतुतयैव सकलव्यभिचारज्ञानदशायामनुमितिवारणसम्भवात् अव्यभिचारान्तरापेक्षया तच्छरीरलाघवस्यैव विनिगमकतया विनिगमनाविरहेण नानाविधाव्यभिचारधियामेव कारणत्वमित्यस्यापि वक्तुमशक्यत्वादिति भाव । आहुरित्यस्वरसोद्भावन तद्बीजं तु असमानाकारतया व्यभिचारान्तरग्रहस्य साक्षादुक्ताव्यभिचारग्रहाप्रतिबन्धकतया व्यभिचारान्तरधीदशायामुक्ताव्यभिचारज्ञानसत्त्वे ऽनुमितिदुर्वारत्वे गुरुशरीरव्यभिचारान्तरग्रहस्यानुमितिविरोधितया तावद्व्यवस्थितत्वादस्मास्वपि लघुशरीर

साध्याभाववद्वृत्तित्वरूपव्यभिचारग्रहाभाव एव हेतुरिति वक्तुं शक्यतया उक्तलाघवानवकाशात् व्यभिचारान्तरग्रहदशाया-मुक्ताव्यभिचारग्रहसत्त्वे ऽनुमित्यनुत्पादो ऽनुभवसिद्ध इति चेत्तर्हि अव्यभिचारग्रहासत्त्व एव तदनुत्पादो ऽनुभवसिद्ध इति उक्तास्मदीययुक्तिरेव जागर्ति किमेतावता प्रयासेनेति । ननु केवलसामानाधिकरण्यस्य व्याप्तित्वे द्रव्यत्वादिना ह्रदादौ वह्न्याद्यनुमानापत्तिरेव बाधिका तद्वारणाय साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्यैवानुमितिहेतुत्वमुपेयतां किमव्यभिचारज्ञानहेतुतया ह्रदादौ वह्निशून्ये वह्निसामानाधिकरण्यविशिष्टवैशिष्ट्यासत्त्वात् व्यभिचारिण्यपि साध्यसामानाधिकरण्यविशिष्टस्य साध्यवत्येव सत्त्वात् पक्षे विशिष्टवैशिष्ट्यग्रहे हेतौ व्यभिचारग्रहेऽप्यनुमितिरिष्टैव सामानाधिकरण्यविशिष्टवैशिष्ट्यस्याव्यभिचारविशिष्टवैशिष्ट्यतुल्यत्वादित्याशङ्कां परिहरति सामानाधिकरण्यविशिष्टपक्षधर्मत्वं त्विति । पक्षे साध्यसामानाधिकरण्यविशिष्टवैशिष्ट्यं त्वित्यर्थः पक्षे साध्यग्रहं विना साध्यनिश्चयं विना दुर्ग्रहं दुर्निश्चयं पक्षे साध्यसन्देहदशायां साध्यसामानाधिकरण्यविशिष्टस्यापि सन्देह औत्सर्गिकः स साध्यनिश्चयेनैव व्यावर्तकधर्मदर्शनाविधया निवर्तनीय इति भावः । तथा चान्योन्याश्रयात्तत्सामानाधिकरण्यविशिष्टवैशिष्ट्यनिश्चयस्य तन्निश्चयहेतुता न सम्भवतीत्याशयः । पर्वते वह्निसन्देहदशायां निश्चितसाध्यकमहानसादिवृत्तितया अगृह्यमाणायां पर्वतीयधूमव्यक्तौ वह्निसामानाधिकरण्यसन्देह औत्सर्गिक इति तदानीं तत्सामानाधिकरण्योपलक्षितधूमवत्तानिश्चयो दुर्घट इति कथमव्यभिचरितसामानाधिकरण्यप्रकारकहेतुमत्ताज्ञानहेतुतापक्ष एव प्रतीकार इति चेन्महानसीयधूमादौ प्रत्यक्षतो वह्निसामानाधिकरण्ये निश्चीयमाने लाघवज्ञानाधीनात् धूमत्वावच्छेदेन वह्निजन्यत्वानिश्चयरूपविशेषदर्शनतस्तदवच्छेदेनैव तन्निर्णयात् धूमत्वदर्शनविषयपर्वतीयधूमेऽपि साध्यसामानाधिकरण्यसंशयायोगात् हेतुव्यापकसाध्यसमानाधिकरणवृत्तित्वोपलक्षितधूमत्वस्य व्याप्तित्वपक्षे तत्प्रकारकहेतुमत्त्वस्य पक्षे साध्यसन्देहदशायामपि निश्चयस्य निष्प्रत्यूहतया ऽनुपपत्त्यनवकाशाच्च । साध्यस्य केवलान्वयित्वज्ञानकालीनायामनुमितौ केवलान्वयिसाध्यसामानाधिकरण्यज्ञानमन्याह-

ह्या च साध्यवदन्यावृत्तित्वज्ञान हेतुरिति मते साध्यवद्भिन्नावृत्तिनिरूपकता नानाधिकरणकसाध्यके हेतावव्याप्तिमूलोक्ता साध्यवदन्यत्वस्य साध्यतावच्छेदकविशिष्टावच्छिन्नभेदरूपत्वे तस्या अनवकाशात्, स्वय सिद्धान्तमतापेक्षया गौरवेण तन्निराकरोति केवलान्वयिवेति । साध्य इत्यादि अनुमित्यनुपपत्तेरिति । साध्यसामानाधिकरण्यमात्रग्रहस्य व्यभिचारग्रहाविरोधित्वादिति भावः । तद्ग्रहाऽपि साध्ये केवलान्वयित्वग्रहोऽपि हेतुर्वाच्यः अनुमितिहेतुर्वाच्य यद्यपि स्वमते अवृत्तिगगनादे स्वाभावाभावत्वविरहात्तदत्यन्ताभावे वृत्तिमद्गमनिरूपयन तदभावसाधारण केवलान्वयित्वं सुवच तथापि साम्प्रदायिकानुमततद्घटितकेवलान्वयित्वशरीरे वृत्तौ साधनवत्मात्रस्य विशेषणत्वापगमनेन व्यापकतापर्यवसान भवति स्वमते पुनरत्यन्ताभावाश साधनवद्वृत्तित्वविशेषणप्रक्षेपेणेति साम्प्रदायिकानुमतमेव केवलान्वयित्व दर्शयति तत्र वृत्तिमदत्यन्तेति । आदिपदाक्षिप्तस्य तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्य परिग्रह अन्योन्याभावघटितव्यापकतापर्यवसानाय तद्घटितमपि केवलान्वयित्वमाह अन्योन्याभावेति । गगनादे स्वात्यन्ताभावप्रतियोगित्वानुरोधेन तदभावत्वस्वीकारेऽपि तद्वदन्योन्याभावत्वमप्रामाणिकमित्यन्योन्याभावे वृत्तिमत्त्वमव्याप्तसंकेततया नोपात्त सर्वसाधारण्याय साध्ये व्याप्तिघटितविग्रहवाली नानुमितिकारणीभूतज्ञानविषयत्वनिर्वाहाय एवात्र साध्यवदन्यावृत्तित्वज्ञान हेतुत्वान्तराकल्पनालाघवात् । साधनेति साधनवतो त्यन्ताभावविशेषणीभूताया वृत्ते साध्यवद्वृत्तिताया अन्योन्याभावस्य या विशेषणत्वमुचित तथा च उच्यत इत्यादिना वक्ष्यमाणसिद्धान्तमत एव पर्यवसानम् अन्यथा कार्यकारणभावद्वयकल्पनागौरवस्य प्रसङ्गादित्यर्थ शापितमितिसाध्ये केवलान्वयित्वग्रहदशाया पक्षे साध्यस्यानुमितावपि न हानि तदानीं केवलान्वयित्वग्रहेन दतुना साध्यपक्षवृत्तित्वानुमितिरेव पक्षे साध्यवत्तानिश्चयकार्यसम्भवात् तथा च साध्यवदन्यावृत्तित्वमेवानुमितौ पक्षे त्युपरितसवादित्यादिकमित्यर्थ ॥

इति श्रीगदाधरभट्टाचार्यविरचिता शिरोमणिकृत-
पूर्वपक्षव्याख्याया विवृति समाप्ता ॥

अनुमानगादाधर्याम्

सिद्धान्तलक्षणप्रकरणम् ।

(चिं०) अत्रोच्यते । प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।

(गा०) प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीति यथाश्रुतमूलाद्यत्पदार्थे साध्ये प्रतियोगितावच्छेदकावच्छिन्नान्यत्वं प्रतीयते ततश्च वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवह्नित्वाद्यवच्छिन्नाभावमादाय दोषो दुर्वारः सर्वेषामेव वह्न्यादीनां तादृशाभावप्रतियोगितावच्छेदकविशिष्टतया तदन्यत्वासम्भवात् यत्पदस्य यद्रूपावच्छिन्नपरतया यद्रूपावच्छिन्नस्य प्रतियोगितावच्छेदका ये ये धर्माः प्रत्येकं तदवच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्यवसिते वह्न्यादिसाध्यकहेतौ वह्नित्वादेर्विभिन्नवह्न्यादिव्यक्त्यन्तर्भावेन महानसीयवह्नित्वाद्यवच्छिन्नभेदैः प्रत्येकं सामानाधिकरण्यसत्त्वेऽप्येकव्यक्तिसत्तादिसाध्यके सत्तात्वादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नभेदसामानाधिकरण्यासत्त्वादव्याप्तिः यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषय इत्यर्थे उक्तदोषोद्धारेऽपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयप्रतीतिविषयो वा इत्यत एव सामञ्जस्ये प्रतियोगितावच्छेदकविशिष्टाविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टे निवेशनमनुचितम् एवं स्वरूपसम्बन्धरूपावच्छिन्नत्वस्य विवक्षया यद्रूपावच्छिन्नं प्रतियोगित्वमुक्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थे शुद्धवह्नित्वरूपसाध्यतावच्छेदकावच्छिन्नप्रतियो-

गित्वे महानसीयत्वादिविशिष्टवह्नित्वाद्यनवच्छेद्यत्वं सुलभमेव यद्रूपावच्छिन्नं प्रतियोगित्वं तादृशप्रतियोगिताभिन्नमित्युक्तौ समवायादिना घटादौ साध्ये संयोगादिना घटादिहेतावतिव्याप्तिः संयोगादिसम्बन्धावच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगितायां हेतुमन्निष्ठाभावप्रतियोगिताभेदसत्त्वात् इदं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिवारणाय हेतुमन्निष्ठाभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया व्यभिचारिमात्रे एव सम्बन्धान्तरावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नभेदोपादानं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं भेदानुयोगिसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां निवेश्यातिव्याप्तिवारणे केवलान्वयिसाध्यके तादृशप्रतियोगित्वाप्रसिद्धिरिति मिश्ररीत्या परिष्कारेऽपि गौरवमित्युपाध्यायोपदिष्टनञ्व्यत्यासपक्षमवलम्ब्य व्याचष्टे प्रतियोग्यसमानाधिकरणेति ।

(दी०) प्रतियोग्यसमानाधिकरणेति । प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः ।

(गा०) न च नञ्व्यत्यासेन साध्यतावच्छेदके प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयं तदपेक्षया साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वे प्रतियोगितावच्छेदकानवच्छेद्यत्वनिवेशपक्षे न गौरवमिति वाच्यं प्रत्येकं घटादौ घटपटोभयत्वावच्छिन्नभेदवत् शुद्धवह्न्यादौ महानसीयत्वाद्यन्तर्भावेन पर्याप्तविशिष्टवह्न्यभावीयप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य सुघटत्वात् अवच्छेदकाविषयकप्रतीतिविषयत्वमन्तरेणैव प्रतीकारात् अवच्छेदकत्वस्य वह्नित्वमहानसीयत्वादिनिष्ठस्य सम्बन्धभेदेन भिन्नत्वेऽपि तत्तत्प्रतियोगितावच्छेदकत्वाद्यनुगतरूपेण व्यासज्यवृत्तितापन्नधर्मलक्षणे वह्न्यादेरवच्छेदकत्वपर्याप्त-

नधिकरणत्वमुपपादितवतो दीधितिकारस्यानुमतत्वात् । सार्वभौमैस्तु विशेषधर्मावच्छिन्नप्रतियोगिताकूटानतिरिक्तसामान्यधर्मावच्छिन्नप्रतियोगितासम्बन्धस्य विशेषरूपेणाव्यासज्यवृत्तेरपि सामान्यधर्मावच्छिन्नप्रतियोगितासम्बन्धत्वेनानुगतेन व्यासज्यवृत्तित्वमिति कण्ठरवेणोक्तम् एवं सति महानसीयवह्निभिन्नवह्निमान् धूमादित्यादौ साध्यतावच्छेदकमहानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकं धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वेऽपि प्रकृतानुमितिविधेयतावच्छेदकता यादृशरूपावच्छिन्ने पर्याप्ता तादृशरूपावच्छिन्नानुयोगिताकतादृशावच्छेदकत्वावच्छिन्नभेदस्यैव व्याप्तिघटकत्वोपगमान्नातिव्याप्तिः उक्तस्थलीयानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकदर्शितधर्मद्वयनिष्ठद्वित्वाद्यवच्छिन्नहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्याप्तिमति विरोधेन तदवच्छिन्नभेदासत्त्वात् साध्यतावच्छेदकवृत्तिमहानसीयवह्निभिन्नत्ववह्नित्वोभयत्वाद्यनुपस्थितिकाले तदवच्छिन्ने ऽनवच्छेदकत्वस्य दुर्ग्रहतया ऽनुमित्यनुत्पादो व्यापकताज्ञानकारणतावादिनामिष्ट एव तेन तेन रूपेणानवच्छेदकत्वग्रहात्तद्रूपावच्छिन्नविधेयतावच्छेदकताकानुमित्यनुपपत्तिश्च केवलान्वयिग्रन्थे ग्रन्थकृतैव वक्ष्यते । यत्तु तत्त्वेन हेतोर्निवेशे हेतुव्यक्तिभेदेन व्याप्तिर्भिद्येत सा च नानुमित्युपयोगिनी पक्षीयधूमादिव्यापकतायाः पूर्वं वह्न्यादावगृहीतत्वादिति यद्रूपविशिष्टेत्युक्तं तथा च धूमत्वादिरूपहेतुतावच्छेदकधर्मेणैव विशिष्य निवेश्य तत्तद्रूपावच्छिन्नहेतुकानुमित्यौपयिकव्याप्तिर्निर्वाच्या तथा च महानसादौ धूमवह्न्यादिव्यभिचाराग्रहाद्वह्नित्वादिना तत्तद्धूमत्वाद्यवच्छिन्ननिरूपिताया इव पक्षीयधूमादिसाधारणधूमत्वाद्यवच्छिन्ननिरूपिताया अपि व्यापकताया ग्रहसम्भवात्तद्घटितव्याप्तेः पक्षधर्मे धूमे ग्रहादनुमितिनिर्वाह इति भावः । न च सामानाधिकरण्यस्य व्याप्तित्वपक्षे हेतुव्यक्तिभेदेन व्याप्तिभेद आवश्यक एवेत्यनुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यं हेतुव्यक्तिभेदेन व्याप्तिभेदेऽपि अनुगतरूपेण हेतुनिवेशे धूमव्यापकवह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यत्वादिना सामानाधिकरण्यव्यक्तीनामनुगमात् सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि

प्रथममनुगतसामानाधिकरण्यत्वरूपव्याप्तित्वेन ग्रहसम्भवेनानु·
मित्युपपत्तेः तत्तद्व्यक्तित्वेन हेतुनिवेशेऽननुगमात् सामान्यप्रत्यास·
त्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतयाऽनुमित्यनुपपत्तेः। हे·
तुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्व·
प्रवेशप्रयोजनमग्रे वक्ष्यते। प्रतियोगितानवच्छेदकत्वमात्रेण साध्य·
तावच्छेदकानिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रति·
योगितानवच्छेदकवत्समानाधिकरणधूमवानितिज्ञानाद्वह्निमानित्यनु·
मितिः स्यात् न चेष्टापत्तिसम्भवः कदाचिद्वह्नित्वेन कदाचिद्द्रव्यत्वादि·
ना वह्न्यनुमितिरितिनियमानुपपत्तेः न चानवच्छेदकत्वेन तत्तद्धर्माव·
गाहित्वमेव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतया तत्तद्धर्मभा·
ननियामकमिति वाच्यम् अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्य·
त्वादिभानस्यापि प्रायशः सम्भवात् एवं तत्तत्साध्यताव·
च्छेदकावच्छिन्नाव्यभिचारितया हेतुमानस्य हेतुसमानाधिकर·
णाभावप्रतियोगितानवच्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकाव·
गाहिव्याप्तिज्ञानाविरोधितया विशिष्य साध्यतावच्छेदकानवगा·
हिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिश्चेति
विशिष्य साध्यतावच्छेदकस्य व्याप्तिघटकतालाभाय प्रतियो·
गितानवच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो
धर्मस्तदवच्छिन्नेनेत्युक्तं यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य
साध्यतावच्छेदकता तत्र तेन रूपेणैव तत्तद्धर्माणां व्याप्तिघ·
टकता यत्र स्वरूपत एव वह्नित्वाद्यखण्डधर्माणां साध्यताव·
च्छेदकत्वं तत्रापि विशेषणावच्छिन्नतत्तद्धर्मघटिततत्तद्धर्मवदि·
तरावृत्तित्वरूपवह्नित्वत्वादिना तन्निवेशो न तु स्वरूपत एव
अनवच्छेदकत्वरूपविशेषणपुरस्कारेण भाने निर्विशेषणकभाना·
त्मकस्य स्वरूपतो भानस्यासम्भवात् वह्न्यादीतरावृत्तित्वस्य वह्न्या·
दिमात्रवृत्तिधर्मान्तरसाधारण्येऽपि तन्मात्रपुरस्कारेण व्यापकता·
वच्छेदकत्वग्रहस्यापि वह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वमु·
पेयते सकलवह्न्यादिवृत्तित्वविधेयतानिवेशे गौरवात् सकलवह्न्या·
दिवृत्तित्वस्य वह्न्यादीतरवृत्तिसाधारणतया तन्मात्रपुरस्कारेण
व्यापकतावच्छेदकत्वग्रहस्य न हेतुतासम्भवः तथा सति इन्धना·
दिहेतुनापि वह्नित्वाद्यवच्छिन्नानुमितिप्रसङ्गात् सकलवह्न्यादिवृत्ति·

द्व्यत्वादौ इन्धनादिव्यापकतावच्छेदकत्वसत्त्वात् वह्नित्वादि-निष्ठतद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादिमात्रवृत्तित्वेऽपि तेन रूपेण व्यापकतावच्छेदकत्वग्रहाद्वह्निमानित्याद्यनुमितिरनुभवविरुद्धा येन रूपेणोपस्थिते वह्नित्वादौ वह्न्यादीतरसाधारण्यसंशयो न जायते तत्पुरस्कारेण व्यापकतावच्छेदकत्वग्रहादेवोक्तानुमित्युत्पादानुभवात् अत एव ज्ञानत्वत्वानुभवत्वव्यापकगुणत्वव्याप्यजातित्वयोरविशेषेण ज्ञानत्वत्वरूपेण व्यापकतावच्छेदकत्वग्रहात् ज्ञानवानयमित्यनुमितिर्न भवितुमर्हतीति दीधितिकारवक्ष्यमाणदूषणं प्रत्युक्तम् अधिकमग्रे वक्ष्यामः । तत्तद्व्यक्तिसामानाधिकरण्यं न तत्तद्व्यक्तिगमकताप्रयोजकं पर्वतीयधूमे महानसीयवह्निसामानाधिकरण्याग्रहेऽपि ततः पर्वते लाघवज्ञानादिवशान्महानसीयवह्न्यनुमितेरिति दर्शयति येन केनापीति यावन्निरूपितेत्याभ्याम । तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरिति तद्रूपावच्छिन्ननिष्ठा तद्धर्मावच्छिन्नयावद्व्यक्तिगमकताप्रयोजिका व्याप्तिरित्यर्थः । यथाश्रुते एकसाध्यव्यक्तिसामानाधिकरण्यस्यापरव्यक्तिप्रतियोगिकत्वासम्भवेनासङ्गतेः ।

यत्रैकैकसाध्यतावच्छेदकव्यक्तिर्न सकलहेतुमद्वृत्तितावच्छेदिका तत्रानुगतरूपावच्छिन्नेनापि तेन रूपेण न तादृशहेतुव्यापकतासम्भवः सकलसाध्यतावच्छेदकव्यक्तीनामेव चालनीन्यायेन हेतुसमानाधिकरणतत्तद्व्यक्त्यवच्छिन्नाभावप्रतियोगितावच्छेदकत्वादित्याशङ्कामिष्टापत्त्या परिहरति दण्ड्यादाविति ॥

(दी०) दण्ड्यादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः ।

(गा०)परम्परासम्बद्धमिति स्वसमवायिसंयोगादिसम्बन्धेन साध्यसम्बद्धमित्यर्थः । एतच्च साध्यावृत्तितया दण्डत्वादेर्न व्यापकतावच्छेदकत्वसम्भव इत्याशङ्कानिराकरणाय साध्यतावच्छेदकं दण्डिसंयोगत्वादिरूपनानाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतुव्यापकतावच्छेदकमित्यर्थः एवकारेण दण्डादिरूपसखण्डधर्मव्यवच्छेदः तथा च तत्र प्रतियोगितानवच्छेदकत्वस्य दुरुपपादत्वेऽपि न क्षतिः

थिव्यादिमति तन्तुकपालादौ विशेषणानवच्छिन्नघटत्वपटत्वाद्यवच्छिन्नाभावस्य सत्त्वात् सर्वास्वेव साध्यतावच्छेदकतादृशजातिषु तथाविधाभावप्रतियोगितावच्छेदकत्वपर्याप्तेस्तासां व्यापकतावच्छेदकत्वासम्भवेन तदनुगमकैकधर्मस्यैव परम्परासम्बन्धेन तथात्वोपगमस्यावश्यकत्वादित्याहुः । अन्ये तु तद्दण्डवान्नास्तीत्यादौ प्रतियोगिविशेषणतया भासमानदण्डादिष्वेव प्रतियोगितावच्छेदकत्वपर्याप्तिर्भासते तद्विशेषणतत्त्वादौ तु तदवच्छेदकतावच्छेदकत्वमेव प्रतियोगिताव्यधिकरणस्य तदवच्छेदकत्वासंभवेन तदन्तर्भावेन तदवच्छेदकतापर्याप्त्यसम्भवात् न चानवच्छिन्नावच्छेदकत्वमेव निवेश्यमिति वाच्यं सखण्डसाध्यतावच्छेदकव्यभिचारिण्यतिव्याप्तेः तथा च दण्डादेरनवच्छेदकत्वं दुर्घटं महानसीयवह्निर्नास्तीत्यादौ च महानसीयत्वादेः प्रतियोगिन्येव विशेषणतया भानात्तदन्तर्भावेनैव प्रतियोगितावच्छेदकत्वपर्याप्तिर्भासत इति विशेषः । अथ वह्नित्वाद्यंश एव सामानाधिकरण्यसम्बन्धेन विशेषणतया महानसीयत्वादिकमवगाहमाना महानसीयत्वविशिष्टवह्नित्ववान्नास्तीत्याकारिका या प्रतीतिस्तस्या उक्तयुक्त्या वह्नित्वादावेव प्रतियोगितावच्छेदकत्वपर्याप्तिविषयकतया वह्नित्वादेरपि अनवच्छेदकत्वं दुर्घटमेव स्यात् यदि च वह्नित्वादेः समवायेन प्रतियोगितायां सामानाधिकरण्यसम्बन्धेन च महानसीयत्वादेस्तदवच्छेदकतायामवच्छेदकत्वे गौरवान्महानसीयत्वादिसहितस्य वह्नित्वादेः प्रतियोगितायामेवावच्छेदकत्वमुक्तप्रतीतिस्तु कम्बुग्रीवादिमान्नास्तीतिप्रतीतिवदवच्छेदकत्वांशे भ्रमरूपैवेत्युच्यते तदा यत्र सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशिष्टस्य वह्नित्वादेः साध्यतावच्छेदकता तत्स्थलीये व्यभिचारिणि धूमादिहेतावतिव्याप्तिरिति स्वविशिष्टसम्बन्धिभिन्नत्वादिना निर्वाच्यपारिभाषिकमेवावच्छेदकत्वं निवेशनीयं तच्च तल्लक्षणे यादृशस्य स्वपदार्थस्य निवेशस्तादृशत्वम् एवं च महानसीयत्वादिविशिष्टस्य वह्नित्वादेस्तत्र स्वपदेनोपादानासम्भवात् विशिष्टवह्नित्वादिकमेव पारिभाषिकमवच्छेदकं तदवच्छिन्नभेदश्च शुद्धवह्नित्वादावपि दुर्घटस्तथा चावच्छेदकं यादृशं स्वं तादृशविषयकप्रतीतिविषयत्वमेवानवच्छेदकत्वपदेन विवक्षणीयं तथा

च सति सखण्डस्य दण्डादेः स्वरूपतोऽभानात् तत्त्वादिविशेषणविशिष्टस्यैवावच्छेदकलक्षणस्थस्वपदेनोपादेयतया तद्विशिष्टविषयकप्रतीतिविषयत्वस्य दण्डत्वादिविशिष्टस्य सुघटत्वाद्व्यापकतावच्छेदकत्वमव्याहतमेवेति चेन्न पारिभाषिकस्यावच्छेदकत्वस्य स्वत्वघटितत्वेनाननुगतस्याभावकूटज्ञानासम्भवेन प्रतियोगितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्यागत्या गुरुधर्मसाधारण्यमङ्गीकृत्य व्याप्तिलक्षणे तदेव निवेशनीयम् एवं च सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशेषणावच्छिन्नस्य, वह्नित्वादेः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि महानसीयत्वादिविशिष्टनिरूपितसमवायादेरेव प्रतियोगितावच्छेदकताघटकसम्बन्धत्वं तत्रोपेयते शुद्धसमवायादिना वह्न्यादेरतिप्रसक्तत्वात् शुद्धसमवायादेस्तदवच्छेदकतावच्छेदकसम्बन्धत्वे महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वाद्यवच्छिन्नाभावात्तद्विशिष्टवह्नित्वाद्यवच्छिन्नाभावस्य वैलक्षण्यानुपपत्तेश्च तथा च साध्यतावच्छेदकताघटकशुद्धसमवायादिनाऽखण्डवह्नित्वादेरनवच्छेदकत्वं न दुर्लभं न च महानसीयत्वादिसामानाधिकरण्यस्य यत्रोपलक्षणता तत्र तस्यावच्छेदककोटौ न प्रवेशः यत्र विशेषणत्वं तत्र तत्प्रवेश इत्यत एव वैलक्षण्यमिति वाच्यम् उपलक्षणीभवत्तत्तद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धावपि तत्तद्रूपस्य प्रतियोगितावच्छेदकांशे प्रकारतया भानात् तत्रावच्छेदकत्वमानस्यावश्यकतयाऽवच्छेदकशरीराप्रवेशरूपोपलक्षणताया उपलक्षणविधयाऽवच्छेदके तत्रासम्भवात् यदुपलक्षितनिरूपितसमवायादेरवच्छेदकताघटकसम्बन्धत्वं तस्योपलक्षणविधयाऽवच्छेदकत्वं यद्विशिष्टनिरूपितसमवायादेरवच्छेदकताघटकसम्बन्धत्वं तस्य विशेषणविधयाऽवच्छेदकत्वमित्यस्यैव विवक्षितत्वात् एवं च एकत्वप्रागभावविशिष्टघटादेः संयोगसम्बन्धेनाभावस्य प्रतियोगितायामप्रसिद्धतया विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासम्भवेनागत्या विशेषणविधया प्रतियोगितावच्छेदकत्वस्यान्यथैव वैलक्षण्यस्योपपादनीयतया शुद्धसमवायादेरेव विशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकसम्बन्धतया तादृशाभावस्य तादृशसम्बन्धेन प्रति-

योगिसमानाधिकरणतया दीधितिकृतां प्रतियोगितावच्छेदकविशिष्टासामानाधिकरण्यपर्यन्तनिवेशस्यावृत्तिसङ्गतिः । मा भूत्ता विशिष्टनिरूपितसमवायत्वादिना प्रतियोगितावच्छेदकताघटकसम्बन्धता तथापि महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वादेस्तद्विशिष्टवह्नित्वादेश्च प्रतियोगितावच्छेदकतयोर्भेदेन वैलक्षण्यम् आद्या तद्धर्मावच्छिन्ना विशेष्यमात्रपर्याप्ता अन्त्या च विशेष्यविशेषणभावापन्नयोर्धर्मधर्मिणोर्द्वयोः पर्याप्तैवं रीत्यैवोपपादनीयं तावतापि अखण्डस्य शुद्धवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमुपपद्यते धर्मान्तरोपलक्षितवह्नित्वाद्यवच्छिन्नाभावस्य धूमादिमत्यवृत्तेर्विशिष्टवह्न्याद्यवच्छिन्नाभावप्रतियोगितावच्छेदकतायाश्च विशेषणान्तर्भावेनैव पर्याप्तेः तत्त्वोपलक्षितदण्डाद्यवच्छिन्नप्रतियोगिताकहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकता च तत्त्वावच्छिन्ना शुद्धविशेष्य एव पर्याप्ता साध्यतावच्छेदकताघटकशुद्धसंयोगसम्बन्धावच्छिन्ना चेति तादृशसम्बन्धेन दण्डादेस्तादृशाभावप्रतियोगितानवच्छेदकत्वं दुरुपपादमिति वदन्ति । वस्तुनो गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे पारिभाषिकावच्छेदकत्वं निवेशनीयं तच्छरीरे यादृशं स्वं निविष्टं तादृशधर्मभेदनिवेशे वह्नित्वादौ विशिष्टवह्नित्वादिभेदासत्त्वेन तादृशधर्माविषयकप्रतीतिविषयत्वं निवेशनीयमिति गौरवमतः प्रतियोगितावच्छेदकं यादृशयादृशरूपं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकतत्कत्वरूपं तत्तदतिरिक्तवृत्तित्वमेवानवच्छेदकान्तेन विवक्षणीयं तथा च सर्वासामेव दण्डादिव्यक्तीनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया कस्याश्चिदपि दण्डादिव्यक्तेर्न यावत्प्रतियोगितावच्छेदकातिरिक्तवृत्तित्वं स्वस्य स्वातिरिक्तवृत्तित्वाविरहादिति अखण्डधर्मस्य व्यापकतावच्छेदकतानुसरणम् । एतच्च एकोक्त्यभिप्रायेण यथाश्रुतमूललक्षणमुपपादयन्तं सार्वभौमप्रभृतिमतमनुसृत्य एकोक्त्यनादरे तु अनुगतरूपेण नानाव्यक्तिविधेयतावच्छेदकानुमित्यौपयिकव्याप्तिर्यद्रूपावच्छिन्नमनवच्छेदकं यद्रूपं वा ऽवच्छेदकतानवच्छेदकं तद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यं तद्रूपविशिष्टावच्छिन्ननिरूपिता व्याप्तिरित्यादिरीत्या निर्वचनीया तथा सति दण्डिसंयोगादिहेतुकापि दण्डिमानयमित्याकारिकानुमितिर्विशेषदर्शिनामपि निर्वहति एवमेको-

च्छा प्रतियोगिताधर्मिकोभयाभावघटिताया ग्रन्थकारेण स्व-यमुपदर्शनीयाया व्याप्तेरपि दण्डत्वादिविशिष्टदण्डाद्यवच्छिन्ननिरूपितत्वनिर्वाहः हेतुसमानाधिकरणविशेषाभावप्रतियोगितायां दण्डत्वपृथिवीत्वव्याप्यजातित्वादिविशिष्टावच्छेदकत्वाभावस्याव्याहतत्वात् दण्ड्यादिसामान्याभावप्रतियोगितायामेव तद्धर्मविशिष्टनिरूपितविलक्षणावच्छेदकत्वसत्त्वादिति ध्येयम् ॥

(दी०) इत्थं च इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेर्नाव्याप्तिः । साधनस्य विशिष्टसत्त्वादेर्गुणादावदृत्तेः ।

(गा०) इत्थं चेति हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यसाधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यनिवेशे चेत्यर्थः नाव्याप्तिरिति न विशिष्टसत्त्वान्यरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमित्यौपयिकव्याप्त्यनिर्वाह इत्यर्थः तेन विशिष्टसत्त्वाद्युपलक्षितहेतुमत्ताज्ञानजन्यानुमित्यौपयिकव्याप्तौ तदुपलक्षितहेतुसामानाधिकरण्यमेव निविष्टमिति लभ्यते यतो द्रव्यत्वाद्यभावे तादृशहेतुसामानाधिकरण्यसत्त्वात्तादृशे हेतौ न द्रव्यत्वादेर्व्याप्तिरित्यभ्रान्तानां गुणा-

समवायादिर्विशेषणसम्बन्धः स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदकसम्बन्ध इतिमताभिप्रायेणेदं तथा चोक्तस्थलेऽपि हेतुतावच्छेदकसम्बन्धः शुद्धसमवाय एवेति हेतुतावच्छेदकसम्बन्धमात्रविवक्षया न प्रतीकार इति वाच्यं हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञाने हेतुतावच्छेदकस्य पक्षे परम्परासम्बन्धेन भाननियमेन व्यापकताशरीरघटकाभावाधिकरणेऽपि तदीयताद्दशसम्बन्धस्य निवेशितत्वात्तन्ते एव हेतुनः पक्षे साध्यानुमितिनिर्वाहे विशिष्टत्वेन सत्तादेर्द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकतापातात् न च दर्शितरीत्या विशिष्टव्यापकताग्रहस्य विशेषणव्यापकतावगाहित्वेऽपि विशिष्टे पक्षधर्मताग्रहस्य विशेषणे तदवगाहित्वेऽपि च विशिष्टहेतुकपरामर्शस्य विशेषणे साध्यसामानाधिकरण्यावगाहित्वानियमान्न विशेषणहेतुकानुमितिसामग्र्या विशिष्टहेतुकानुमितिपूर्वमावश्यकतेति वाच्यं साध्ये विशिष्टहेतोर्व्यापकताग्रहेऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वे ऽनुमित्यनुत्पत्त्या विशिष्टहेतुकस्थले विशिष्टाधिकरणत्वघटितहेतुसाध्यसामानाधिकरण्यविषयकस्यैव परामर्शस्यानुमितिहेतुता वाच्या अन्यथा विरोधस्य जनकज्ञानाविरोधितया हेत्वाभासत्वस्य दुर्घटत्वप्रसङ्गात् तथा च साध्यवति विशिष्टहेत्वधिकरणत्वभाने विशेषणस्य परम्परासम्बन्धस्यापि तत्र भाननियमेन विशिष्टहेतुकपरामर्शस्य नियमतो विशेषणेऽपि साध्यसामानाधिकरण्यावगाहित्वात् । मैवं विशिष्टनिरूपितव्यापकताशरीरे विशेषणस्य धर्मिपारतन्त्र्येणैव विशिष्टाधिकरणविशेषणतया प्रवेशः न तु स्वातन्त्र्येण तथा च तद्ग्रहे न विशेषणव्यापकतावगाहित्वनियमो निर्वहति विशेषणनिरूपितव्यापकतायास्तद्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वपर्याप्तप्रतियोगितावच्छेदकताकाभावघटितत्वात् विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वरूपप्रतियोग्युपरागेणाभावभाने च विशिष्टवत्त्वान्तर्गतविशेष्यवत्त्वपरित्यागेन विशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वे प्रतियोगितावच्छेदकत्वपर्यप्तिभानासम्भवात् अभावप्रतियोगिप्रकारघटकस्य उपलक्षणतया भानाभ्युपगमात् न च परम्परासम्बन्धेन विशेषणनिष्ठव्याप्त्यवगाहि-

त्या प्रतियोगिताधर्मिकोभयाभावघटिताया ग्रन्थकारेण स्वयमुपदर्शनीयाया व्याप्तेरपि दण्डत्वादिविशिष्टदण्डाद्यवच्छिन्ननिरूपितत्वानिर्वाहः हेतुसमानाधिकरणविशेषाभावप्रतियोगितायां दण्डत्वपृथिवीत्वव्याप्यजातित्वादिविशिष्टावच्छेद्यत्वाभावस्याव्याहतत्वात् दण्डत्वादिसामान्याभावप्रतियोगितायामेव तद्धर्मविशिष्टनिरूपितविलक्षणावच्छेद्यत्वसत्त्वादिति ध्येयम् ॥

(दी०) इत्थं च इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेर्नाव्याप्तिः । साधनस्य विशिष्टसत्त्वादेर्गुणादावृत्तेः ।

(गा०) इत्थं चेति हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यसाधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यनिवेशे चेत्यर्थः नाव्याप्तिरिति न विशिष्टसत्तात्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमितीयविषयकव्याप्त्यनिर्वाह इत्यर्थः तेन विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ताज्ञानजन्यानुमितीयविषयकव्याप्तौ तदुपलक्षितहेतुसामानाधिकरण्यमेव निवेश्यमिति लभ्यते अतो द्रव्यत्वाद्यभावे तादृशहेतुसामानाधिकरण्यसत्त्वात्तादृशे हेतौ न द्रव्यत्वादेर्व्याप्तिरित्यभ्रान्तानां गुणादौ विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ताज्ञानसम्भवेऽपि न तत्र द्रव्यत्वाद्यनुमित्यापत्तिः यत्र घटपटवृत्तिसंयोगत्वादिना हेतुना घटपटान्यतरत्वं साध्यं तत्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्या हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यगर्भव्याप्त्यन्तरमवश्यं स्वीकरणीयमन्यथा तद्धेतुकतत्साध्यकानुमित्युच्छेदप्रसङ्गात् ईदृशव्याप्त्यन्तरानभ्युपगमे साध्यवद्धेतुकानुमितिरप्युच्छिद्येत तद्देशसामानाधिकरण्यसहिततद्वृत्तिधर्मस्वरूपसाध्यवत्त्वविशिष्टाधिकरणाप्रसिद्ध्या विशिष्टाधिकरणतागर्भव्याप्त्यसम्भवात् । अथैवं विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्टनिरूपितसमवायस्य सम्बन्धतया तेन सम्बन्धेन व्याप्तिर्हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वस्यापि विवक्षणीयत्वेन निर्वहतीति कथमत्र विशिष्टपदोपादानं न च विशिष्टवैशिष्ट्यबोधे विशिष्टनिरूपितसमवायत्वादिना न विशेषणसम्बन्धता अपि तु शुद्ध एव

क्षीयधूमादिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्यासत्तिं विना पूर्वं ग्रहासम्भवेन तत्स्मरणासम्भवात् पक्षीयधूमे तदुपनयासम्भवेनायोगात् अतोऽतिप्रसङ्गेन च धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासम्भवात् धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरे प्रवेशस्यावश्यकत्वं दर्शयन् व्याप्तेर्भेदमभेदं च दर्शयति वस्तुतस्त्वित्यादिना । प्रथमपक्षप्रदर्शनं तत्पक्षे धूमत्वत्वाद्यप्रवेशेन लाघवेन सामान्यप्रत्यासत्तिपक्षे तज्ज्ञानस्यैवानुमितिहेतुत्वमिति सूचनाय। रासभादिसाधारण्यादिति तत्साधारण्ये च भ्रमं विनापि रासभादिलिङ्गकवह्न्याद्यनुमानापत्तिरिति भावः। अथ व्यापकताप्रविष्टहेतुतावच्छेदकधर्मितावच्छेदककसामानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमान्नायमतिप्रसङ्गः धूमत्वादिप्रकारेण भासमाने रासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वाद्यंशे भ्रमत्वनियमात् वक्ष्यमाणधूमत्वादिमन्निष्ठवह्न्यादिसामानाधिकरण्यस्य व्याप्तित्वेऽपि तद्धर्मितावच्छेदकतापन्नहेतुतावच्छेदकविशिष्टवत्ताज्ञानस्य हेतुताया अवश्योपेयत्वात् अन्यथा विशिष्टसत्ताद्व्यापकद्रव्यत्वादिनिरूपितविशिष्टसत्तादिनिष्ठसामानाधिकरण्योपलक्षितवत्ताज्ञानाद्गुणरूपपक्षे ऽभ्रान्तस्य द्रव्यत्वाद्यनुमानापत्तेः साध्यसामानाधिकरण्यविशिष्टवत्त्वस्य पक्षे साध्यनिश्चयं विना दुर्निश्चेयतया तदुपलक्षितवत्तानिश्चयस्याप्यनुमितिहेतुताया उपगन्तव्यत्वात् केवलसामानाधिकरण्यप्रकारेण पक्षधर्मताज्ञानस्यानुमितिहेतुत्वे धूमाभाववान् पक्ष इत्यसिद्धिग्रहदशायामपि साध्ये धूमादिव्यापकताज्ञानादप्यनुमित्यापत्तेश्च असमानप्रकारकतया धूमाभाववान् पक्ष इत्यादिबुद्धेर्धूमवृत्तिसामानाधिकरण्यवद्वान् पक्ष इत्यादिज्ञानाविरोधित्वादिति चेत् । सत्य धूमत्वादिमति सामानाधिकरण्यमित्यस्य धूमत्वादिविशिष्टविशेषणतापन्नं सामानाधिकरण्यमित्यर्थः । न तु धूमादिवृत्तित्वविशेषितसामानाधिकरण्यमिति तथा च एकधर्मिविशेषणतापन्नधूमत्वादिरूपहेतुतावच्छेदकसामानाधिकरण्योभयं व्याप्तिरिति पर्यवसितं कारणं च धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्यादिरेव परामर्शः तावतोकोभयस्य हेतुविशेषणतया ऽनुमितिजन

परामर्शनिष्ठकारणताया उभयवादिसिद्धत्वाद्विशिष्टहेतुकपरामर्शान्तरकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थले ऽधिकरणे स्वातन्त्र्येण विशेषणवत्त्वमानमुपगम्य विशेषणेऽपि व्याप्तिभानं कल्पनीयमिति वाच्यं शब्दाधीनविशिष्टवत्त्वगर्भव्याप्तिग्रहे स्वातन्त्र्येण विशेषणवत्त्वगर्भव्याप्तिभानानियमात् तादृशव्याप्तिबोधकशब्दस्य स्वातन्त्र्येण विशेषणवत्त्वाभासकत्वात् । अथ तदुत्तरं विशेषणे मानसव्याप्तिग्रह एवानुमित्यर्थं कल्प्यते तत्कारणतायाः क्लृप्तत्वादिति चेन्न । एवं सति दण्डाद्युपलक्षितधर्मिहेतुकानुमितेर्विलयप्रसङ्गात् तद्धेतुकव्याप्तिग्रहस्थले परम्परासम्बन्धेनोपस्थितदण्डादौ व्याप्तिग्रहस्य कल्पनसम्भवात् स्वातन्त्र्येण सकलपरम्परासम्बन्धघटितसकलविशेषणावत्त्वग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वानियमाच्च ।

ननु वह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्य व्याप्तित्वे एकैव हि सा व्याप्तिरिति मूलग्रन्थविरोधः महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरैक्यासम्भवादित्यत आह सामानाधिकरण्यव्यक्तीनामिति ।

(दी०) सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यम् । वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वाद्धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वति धूमत्वादिकं वा व्याप्तिः ।

(गा०) भेदेऽपीति । अधिकरणभेदेन धूमादिभेदेन चेत्यादिः । निरूपकतावच्छेदकं वह्नित्वादिरूपसाध्यतावच्छेदकं अधिकरणतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं तदैक्यात् साध्यहेतुभेदेऽप्यभेदात् तदभेद तात्पर्येण ऐक्यं भाक्त एकत्वव्यवहारः । ननु लक्षणया तद्व्यवहारसमर्थनमसङ्गतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थं व्याप्त्यैक्यकथनात् तन्निर्वाहस्य च सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादेरैक्येऽपि प-

(दी०) अयं कपिसंयोग्येतद्वृक्षत्वादित्यादिसंग्रहायासमानाधिकरणान्तम् । यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत् संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववृत्ताविरोधात् । तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात् परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षे न संयोग इति नाध्यक्षमिति तन्न । द्रव्ये संयोगसामान्याभावे मानाभावात् ।

(गा०) अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपिसंयोगादिव्याप्यतोपगमे कपिसंयोगाद्यनवच्छेदकमूलादेः पक्षतावच्छेदकत्वे तदवच्छेदेनापि एतद्वृक्षादौ कपिसंयोगादेः सिद्धिप्रसङ्गः न चेष्टापत्तिः सल्लिङ्गकपरामर्शस्य भ्रमानुमित्यजनकत्वनियमात् न च तदवच्छेदेन हेतुमत्ताज्ञानस्य तदवच्छेदेन साध्यानुमितिहेतुत्वादेतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किञ्चिदवच्छेदेनावृत्तेर्नातिप्रसङ्ग इति वाच्यं यदि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितावपि तादृशहेतुमत्ताज्ञानत्वेन हेतुत्वमुपेयते तदापि तुल्ययुक्त्या एतद्वृक्षत्वादेरिव मूलाद्यवच्छिन्नसंयोगादिविशेषस्यापि कपिसंयोगादिव्याप्यतया तेन हेतुना मूलाद्यवच्छेदेन कपिसंयोगाद्यनुमितेर्निष्प्रत्यूहत्वादिति चेत् अत्रोपाध्यायाः । साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य पक्षधर्मत्वमनुपपन्नमिति पक्षधर्मताबलात्पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यं सिद्ध्यति न तु तदवच्छेदेनापि प्रमाणाभावादिति तादृशानुमितेरप्रामाणिकतया तत्र परामर्शहेतुताकल्पनमेव नास्तीति न तथापत्तिरिति समादधिरे । मिश्रादयस्तु बाधानवतारे मूलाद्यवच्छेदेन कपिसंयोगादिसिद्धिरिष्टैवेति वदन्ति एतत्तत्त्वं ग्रन्थकृद्व्याप्तिवादे वक्ष्यति । प्राचीनासिद्धव्याप्तिस्थलं दूषयितुमुपन्यस्यति यत्त्विति । तत् असमानाधिकरणान्तम् । ननु द्रव्ये संयोगत्वावच्छिन्नाभावसत्त्व एवावच्छेदकगर्भोक्तलक्षणाव्याप्तिः प्रसज्यते तदेव न विरोधात् वृक्षादौ च संयोगानवच्छेदकीभूतभागाप्रसिद्ध्या तत्सामान्याभावावच्छेदक एव दुर्लभः शाखामूलादीनां सर्वेषां तत्तत्संयोगावच्छेदकत्वादित्यत आह सं-

कज्ञानविषयत्वरूपव्याप्तित्वनिर्वाहः। द्वितीयपक्षे च धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान् पर्वत इति ज्ञानं हेतुं न तु स्वरूपतो धूमत्वाप्रकारकं तादृशधूमत्ववत्त्वात् पक्ष इत्याकारकं तादृशज्ञानस्य धूमाभाववान् पक्ष इत्याकारकधूमत्वत्वाद्यप्रकारकासिद्धिज्ञानाप्रतिबध्यत्वात् एतन्मते च हेतुतावच्छेदकीभूतसाधारणधर्मावच्छिन्ने साध्यसमानाधिकरणावृत्तित्वस्यैव विरोध न तु हेतुतावच्छेदकावच्छिन्ने साध्यासामानाधिकरण्यमुपदर्शितज्ञानस्य हेतुतावच्छेदक धर्मितावच्छेदकीकृत्य सामानाधिकरण्यानवगाहितया तथाविधविरोधज्ञानाप्रतिबध्यत्वात्। यदि विरोधस्यानुमितिं प्रति साक्षाद्विरोधितया हेत्वाभासत्वमुपपादयितुं शक्यते तदा समानाधिकरणवृत्तित्वांशे निर्धर्मितावच्छेदकसमानाधिकरणवृत्तिमद्धूमवान् पर्वत इत्येतादृशमपि ज्ञानं हेतुरुपेयते अन्यथा धूमत्वत्वादिविषयितायाः कारणतावच्छेदककुक्षौ प्रवेशे गौरवात् सामानाधिकरण्यप्रकारकत्वापेक्षया समानाधिकरणवृत्तिप्रकारकत्वस्य गुरुत्वेऽपि सामान्यस्याप्रत्यासत्तित्वे विशिष्टपरामर्शनिर्वाहानुरोधेन तेन रूपेण हेतुताया अगत्योपगमात्। आद्या हेतुतावच्छेदकधर्मसहितसाध्यसामानाधिकरण्यरूपा। भिन्नेति प्रतिधूमादिकमित्यादिः। द्वितीया साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपा अभिन्ना सर्वधूमादिसाधारणी अनुगतरूपावच्छिन्ना। नानाव्यक्तिदण्डादिविशिष्टहेतुकस्थलेऽपि परस्परासम्बद्धदण्डत्वाद्यखण्डधर्म एव हेतुतावच्छेदकतया उपगन्तव्य इति भावः। यद्यपि साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वसामान्याद्व्याप्त्यभिप्रायेणापि एकैव हि सा व्याप्तिरित्यादिग्रन्थः सङ्गच्छते तथापि स्वयं तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वस्य प्रवेशस्य खण्डनीयतया स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणत्वरूपपारिभाषिकावच्छेदकत्वस्यैव च विवक्षणीयतया एतदपेक्षया तादृशी व्याप्तिर्गुरुशरीरेति कथं चिदीदृशव्याप्त्यैक्योपपत्तिसम्भवेन तज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्त्यैक्यमुपपादितम्।

मिश्रादिमतमवलम्ब्य प्रतियोग्यसमानाधिकरणपदप्रयोजनमाह अयं कपिसंयोगीति।

रीतविषयकस्याप्युपनयवशेन सम्भवाद्विनिगमनाविरहेण एकतरस्य प्रामाण्यासिद्धेः शब्दस्याप्तोक्तत्वासिद्ध्या तदव्यवस्थापकत्वात् अनुमानस्य च लिङ्गाभावेनासम्भवादिति भावः।

ननु वृक्षादौ यावत्संयोगविशेषाभाववानामुभयसिद्धतया तत एव हेतोस्तत्राप्रत्यक्षस्यापि तत्सामान्याभावस्य सिद्धिर्निष्प्रत्यूहैवेतिशङ्कां निरस्यति न चेत्यादिना।

(दी०) न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानितिव्याप्तेर्यावत्संयोगाभावा एव मानम्। यत्तदर्थयोरननुगमात् एकावच्छेदेन तदीययावद्विशेषाभाववत्त्वस्योपाधित्वाच्च। एतेनायं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादितिपरास्तम्। व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च। न च प्रतियोग्यनवच्छेदकतयैव वृक्षत्वादेरभावावच्छेदकत्वम्। गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात्। यथा च घटपूर्ववर्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः।

(गा०) यः संयोगीययावद्विशेषाभाववान् स संयोगसामान्याभाववानितिव्याप्तेरेवाग्रे व्यर्थविशेषणत्वाप्रयोजकत्वादिदोषेण निराकरणीयतया प्रथमतः सामान्यमुखीव्याप्तिमनुमानोपष्टम्भकतया दर्शयति योयदीयेति। यद्धर्माश्रयस्य यावद्विशेषाभाववान् यः स तद्धर्मावच्छिन्नाभाववानित्यर्थः संयोगत्वाश्रयस्य विशेषधर्मावच्छिन्नाभावकूटं वृक्षादौ वर्तत इति तत्रोक्तव्याप्तेः संयोगत्वावच्छिन्नाभावसिद्धिः प्रतियोगिनोर्यत्तत्त्वेन निवेशे संयोगवृत्तिकपिसंयोगत्वादिरूपसामान्यधर्मावच्छिन्नाभावमादाय सिद्धसाधनं स्यादिति धर्मस्य यत्तत्त्वेनोपादानं संयोगादिसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नाभावमादाय सिद्धसाधनवारणाय समवायसम्बन्धावच्छिन्नाभाव एव साधनीयः अन्यसम्बन्धा-

योगस्येति। वृक्षत्वावच्छेदेनेति वृक्षत्वादेः प्रत्येकं सकलसंयोगातिप्रसक्तत्वात्तस्य संयोगावच्छेदकत्वासम्भवात् आकाशादिसंयोगस्यापि यावद्वृत्तेरेकस्याभावाद्वृक्षत्वे तत्संयोगानतिप्रसङ्गासम्भवादिति भावः। ननु वृक्षत्वावच्छेदेन वृक्षादौ संयोगसामान्याभावसत्त्वे वृक्षे संयोगो नास्तीत्यादिप्रत्यक्षापत्तिरित्यत आह तत्र चेति। अतीन्द्रियस्येति अतीन्द्रियप्रतियोगिकतया संयोगसामान्याभावस्यातीन्द्रियत्वमिति भावः। प्रतियोगितावच्छेदकयोग्यत्वस्य तन्त्रत्वे त्वाह परित इति। यद्वा ननु संयोगसामान्याभावस्य वृक्षे सत्त्वे महत्त्वोद्भूतरूपवन्मात्रसमवेतसंयोगसामान्याभावोऽप्यावश्यकः तद्व्यापकधर्मावच्छिन्नाभावस्य तद्धर्मावच्छिन्नाभावानियतत्वादिति योग्यमात्रप्रतियोगिको ऽयमभावः कथं वृक्षे साक्षात्क्रियते इत्यत आह परित इति। प्रतियोग्युपलब्धेर्विभिन्नावच्छेदेनाभावग्रहं प्रति विरोधिज्ञानमुद्रया प्रतिबन्धकत्वं न सम्भवतीति तस्य दोषत्वकथनं दोषविधया प्रतिबन्धकत्वलाभाय। अथ यत्र संयोगाविषयकसंयोपनीतभानात्मकं वृक्षादिरूपाधिकरणज्ञानं तदग्रिमक्षणे वृक्षादौ तादृशसंयोगसामान्याभावग्रहप्रसङ्गः तादृशदोषस्य प्रागसत्त्वात् एवं वृक्षे न संयोग इत्यादिलौकिकप्रत्यक्षस्यालीकतया तत्र तादृशप्रतिबन्धकत्वकल्पनमेवाशक्यमिति चेन्न वृक्षादौ संयोगसामान्याभावलौकिकप्रत्यक्षस्याप्रसिद्धत्वेऽपि गुणादौ तत्प्रसिद्ध्या ऽधिकरणीयविषयतासम्बन्धेन संयोगाभावलौकिकत्वावच्छिन्नं प्रति स्वविषयसंयोगवत्त्वसम्बन्धेन प्रत्यक्षत्वेन प्रतिबन्धकत्वकल्पनात्सर्वत्र द्रव्ये तत ईश्वरीयप्रत्यक्षस्यैव सर्वदा तादृशसम्बन्धेन सत्त्वेनातिप्रसङ्गविरहात्। इदमापाततः द्रव्यरूपाधिकरणविषयकसंयोगाभावविषयकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्षसामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसङ्गवारणसम्भवेन तादृशप्रतिबन्धकताकल्पनस्यायुक्तत्वात् कथञ्चिदापत्तिसम्भवेऽपि लाघवात्तादात्म्यसम्बन्धेन द्रव्यत्वेनैव तादृशसम्बन्धेन संयोगाभावलौकिकप्रत्यक्षं प्रति प्रतिबन्धकत्वौचित्यात्। मानाभावादिति लौकिकप्रत्यक्षस्य योग्यानुपलब्धिविरहेणासम्भवादुपनीतमानस्य संयोगाभावो वृक्षावृत्तिरित्याकारकविष-

च्छा तादृशाभाववत्त्वासम्भवेपि न क्षतिः । न च भेदप्रतियोगितावच्छेदकवाच्यत्वघटाद्यन्यतरत्वव्याप्यधर्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववतस्तद्धर्मावच्छिन्नप्रयोगिताकाभाववत्त्वासम्भवादव्यभिचारः वाच्यत्वादेः संयोगादिनावृत्तित्वात् तेन सम्बन्धेन घटादेरेव तादृशाभावविरोधितया घटत्वादेरेव तत्प्रतियोगितावच्छेदकत्वसम्भवेन गुरोरन्यतरत्वस्य तत्प्रतियोगितानवच्छेदकत्वादिति वाच्यं वाच्यत्वादिसाधारणान्यतरनिष्ठप्रतियोगित्वस्य न्यूनवृत्तिघटत्वादिनानवच्छेदादगत्या गुरुणान्यतरत्वादिनैव तदवच्छेदात् । वस्तुतो यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्यहेतुघटकता तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वेनैव सामान्यधर्मस्य विशेषणीयतया उक्तसामान्यधर्मस्य भेदप्रतियोगितावच्छेदकत्वेऽपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतया तत्संम्बन्धावच्छिन्नाभावाप्रसिद्धावपि न व्यभिचारः अत एव भेदप्रतियोगितावच्छेदकजातित्वघटकनित्यत्वादेः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकगर्भे निवेशस्य गौरवेणासंभवेपि न जातित्वादिसामान्यव्याप्तिभङ्गः । वस्तुतस्तु यद्धर्मे प्रतियोगितावच्छेदकत्वविशेषणमनुपादेयमेव कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावनिष्ठभेदप्रतियोगित्वस्य घटत्वादिघटिततादृशधर्मापेक्षया गुरुतया तदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्मे इत्यनेन कम्बुग्रीवादिमत्त्वरूपगुरुधर्मोपादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षे ऽसम्भवेन व्यभिचारानवकाशात् । अभावे यावत्त्वादिविशेषणप्रवेशाद्यत्किञ्चिज्जात्यादिव्यक्त्यभाववति जात्यादिसामान्याभावासत्त्वेपि न सामान्यव्याप्तिभङ्गः । यद्यपि यत्तदर्थघटितसाध्यहेतूनामननुगमेन नैका व्याप्तिरिति संयोगसामान्याभावतद्यावद्विशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशेषणवैयर्थ्यमेव तथापि एतद्दोषस्य स्वयमग्रे वाच्यतया यथाकथंचिच्छङ्कासंगतिः । अथ वृक्षादौ यावत्संयोगाभाववत्त्वमुभयवादिसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वात् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे कालविशे-

वच्छिन्नविशेषाभावकूटस्य तत्सम्बन्धावच्छिन्नसामान्याभावस्य व्यभिचारित्वे समवायसम्बन्धावच्छिन्नविशेषाभावकूटस्यापि तत्सम्बन्धावच्छिन्नसामान्याभावव्यभिचारित्वं तुल्यन्यायेन सम्भाव्येतेति प्रतियोगितावच्छेदकसम्बन्धानामपि यत्वतत्त्वेन व्याप्तावन्तर्भावः अत एव समवायसम्बन्धावच्छिन्नप्रतियोगिताकयावद्विशेषाभावेन हेतुना तत्सम्बन्धावच्छिन्नसंयोगसामान्याभावसिद्धिः यद्धर्माश्रयविशेषाभावश्च उभयावृत्तियद्धर्मसमानाधिकरणधर्मावच्छिन्नाभावः उभयावृत्तित्वं च स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन भेदवदन्यत्वम्। अतः संयोगत्वाद्यपेक्षया वृक्षवृत्तिसंयोगत्वादेः विशेषधर्मत्वेऽपि संयोगसामान्याभावं वृक्षादावनभ्युपगच्छतोऽवयवविशेषरूपावच्छेदकदुर्भिक्षेण वृक्षवृत्तिसंयोगत्वावच्छिन्नाभावस्य वृक्षादावनभ्युपगमेऽपि च न सन्दिग्धासिद्धिः वृक्षवृत्तिसंयोगत्वादीनामुभयवृत्तित्वेन तदवच्छिन्नाभावव्यावृत्तेः न च हेतावुभयावृत्तित्वविशेषणस्यासिद्धिवारकत्वेऽपि व्यभिचारावारकतया वैयर्थ्यं यावत्त्वविशेषस्य धीविशेषविषयत्वरूपस्य परिचायकमेव तादृशधर्मावच्छिन्नप्रतियोगिताकत्व न तु हेतुप्रविष्टमिति तु न सत् तथा सति यत्तत्पदार्थस्य हेतुसाध्यशरीराप्रवेशेन सामान्यव्याप्तित्वानुपपत्तेरिति वाच्यं यावत्पदस्य व्यापकत्वार्थकतया तद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावत्वनिरूपितायाः आधेयत्वसम्बन्धावच्छिन्नव्यापकताया एव हेतुतया विशेषधर्मव्यापकत्वाघटकाभावान्तरस्यैव च सामान्यधर्मव्यापकताघटकतया वैयर्थ्यानवकाशात् न च तादृशाभावत्वव्यापकत्वं तादृशाभावत्ववन्निष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनावच्छेदकमधिकरणमप्रसिद्धमिति तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यम्। आधेयतासम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन प्रतियोगिताया अभावस्यैव प्रतियोगितानवच्छेदकत्वस्थाने निवेशनीयत्वात् उक्तस्थले व्यधिकरणतादृशसम्बन्धावच्छिन्नाभावप्रसिद्धिसौलभ्यात् यद्धर्मसमानाधिकरणोऽयत्र प्रतियोगितावच्छेदकत्वेन धर्मो विशेषणीयः तेन कम्बुग्रीवादिमत्त्वादिव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभाववतस्तद्धर्मावच्छिन्नाभावाप्रसि-

त्वा तादृशाभाववत्त्वासम्भवेऽपि न क्षतिः। न च भेदप्रतियोगितावच्छेदकवाच्यत्वघटाद्यन्यतरत्वन्याय्यधर्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववत्तस्तद्धर्मावच्छिन्नप्रयोगिताकाभाववत्त्वासम्भवाद्व्यभिचारः वाच्यत्वादेः संयोगादिनावृत्तित्वात् तेन सम्बन्धेन घटादेरेव तादृशाभावविरोधितया घटत्वादेरेव तत्प्रतियोगितावच्छेदकत्वसम्भवेन *गुरोरन्यतरत्वस्य तत्प्रतियोगितानवच्छेदकत्वादिति* वाच्यं वाच्यत्वादिसाधारणान्यतरनिष्ठप्रतियोगित्वस्य न्यूनवृत्तिघटत्वादिनानवच्छेदादगतया गुरुणान्यतरत्वादिनैव तदवच्छेदात्। वस्तुतो यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य साध्यहेतुघटकता तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वेनैव सामान्यधर्मस्य विशेषणीयतया उक्तसामान्यधर्मस्य भेदप्रतियोगितावच्छेदकत्वेऽपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतया तत्संबन्धावच्छिन्नाभावाप्रसिद्धावपि न व्यभिचारः अत एव भेदप्रतियोगितावच्छेदकजातित्वघटकनित्यत्वादेः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकगर्भे निवेशस्य गौरवेणासंभवेऽपि न जातित्वादिसामान्यव्याप्तिभङ्गः। वस्तुतस्तु यद्धर्मे प्रतियोगितावच्छेदकत्वविशेषणमनुपादेयमेव कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावनिष्ठभेदप्रतियोगित्वस्य घटत्वादिघटिततादृशधर्मापेक्षया गुरुतया तदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्मे इत्यनेन कम्बुग्रीवादिमत्त्वरूपगुरुधर्मोपादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षे ऽसम्भवेन व्यभिचारानवकाशात्। अभावे यावत्त्वादिविशेषणप्रवेशाधरिकिञ्चिज्जात्यादिव्यक्तत्वमादायाति जात्यादिसामान्याभावासत्त्वेऽपि न सामान्यव्याप्तिभङ्गः। यद्यपि यत्तदर्थघटितसाध्यहेतूनामननुगमेन नैका व्याप्तिरिति संयोगसामान्याभावतदीयविशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशेषणवैयर्थ्यमेव तथापि एतद्दोषस्य स्वयमग्रे वाच्यतया यथाकथंचिच्छङ्कासंगतिः। अथ वृक्षादौ यावत्संयोगाभाववत्त्वमुभयवादिसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वात् ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे कालविशे-

पावच्छेदेनापि तत्र तदभावासंभवात् तयोस्तदविरोधितामते
द्रव्ये संयोगसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्त्यविरो
धात् न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्रमू
लाद्यवच्छेदेनाभावः सुलभ इति वाच्यं तासां भेदस्याप्रामाणिक
त्वात् न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्त
त्संयोगव्यक्तौ तत्तदवयवव्यक्तीनां तादात्म्यसम्बन्धेन कारण·
तया व्यभिचारः इत्यवच्छेदकभेदेन संयोगभेद आवश्यकः,
आवश्यकश्चावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्ति·
षु हेतुताभ्युपगमः अन्यथा मूलादिमात्रावच्छिन्नमूर्तान्तरसं
योगानामग्राद्यवच्छेदेनैतद्वृक्षादिवृत्तिविभुसंयोगानां च वृक्षान्त·
रावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभत्वापातादिति वाच्यं
व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य व्या·
प्यवृत्तितया मूलाद्यवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य
व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतु
ताविरहात् व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपतत्त·
द्भिन्नावच्छेदकताव्यक्तीनामभेदेऽपि व्यभिचारानवकाशात् अन्य·
था मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्रा·
वच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तीनामुत्पत्त्या मूलादेस्तत्र
व्यभिचारस्य दुर्वारत्वात् न च मूलावच्छिन्नसंयोगानामग्राव
च्छिन्नसंयोगादपि भेदः स्वीकर्तुं शक्यते मूले प्राच्यां शरी
रवृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तेरेव मूलप्राच्या
द्यवच्छिन्नत्वावगाहनात् न चाग्रमूलयोः शरीरसंयोग इत्यस्या
इव तादृशप्रतीतेरपि संयोगद्वयावगाहित्वमस्मदनुमतमिति
वाच्यं यत्र मूलप्रतीचीमात्रावच्छिन्न एकशरीरेण संयोगः अग्र·
प्राचीमात्रावच्छिन्नश्च शरीरान्तरसंयोगस्तत्र मूले प्राच्यां शरी
रसंयोग इति प्रत्ययापत्तेः शरीरतद्वृक्षसंयोगव्यक्तीनामैक्ये तासामे·
व शरीरावयवेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि
दर्शितसम्बन्धसङ्कोचमन्तरेण दुर्वारत्वाच्च न हि तत्र शरी
रावयवावच्छिन्नशरीरतद्वृक्षसंयोगमूलावच्छिन्नतदुभयसंयोगयोर्भेदसं
म्भवः तथा सति मूलावच्छिन्नवृक्षसंयोगस्य शरीरे चर·
णावच्छिन्नशरीरसंयोगस्य वृक्षे व्याप्यवृत्तितया तदभावास·

त्वप्रसङ्गात् तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं तत्तदवच्छेदकावच्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं न तु संयोगनिष्ठतत्तद्व्यक्तित्वम् अनन्तकार्यकारणभावप्रसङ्गात् तथा च एकावच्छिन्नसंयोगस्यापरावच्छेदकावच्छिन्नत्वेपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचारशङ्केत्यपि वदन्ति। यत्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धान्तानुरोधेन मूलाद्यवच्छिन्नतरुविभुसंयोगादीनां भेदस्वीकार आवश्यक इति। तदपि न सम्यक् तादृशसंयोगव्यक्तीनां गगनादौ दिग्विशेषरूपावच्छेदकनियमेनैव तादृशसिद्धान्तसङ्गतेः। अत्र वदन्ति। द्रव्यमात्र एव संयोगसामान्याभावस्याप्रामाणिकतायास्तत्रेत्यादिनोक्तेर्न चेत्यादिना गगनादेरेव संयोगसामान्याभावसाधकमनुमानमाशङ्कितं विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिग्विशेषावच्छिन्नतया तत्तद्व्यक्तित्वेन तत्र तदभावसत्त्वे ऽविवादात्तत्सिद्ध्यवकाशः विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगि द्रव्यत्वादित्यादौ व्यावृत्तिसङ्कतेर्वृक्षादावेतद्व्याप्तिबलात्संयोगसामान्याभावासिद्धावपि न क्षतिः प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनियमसत्त्वे वृक्षत्वावच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धेः संभवेन तत्रापि तदभावं साधयतां तादृशनियमवादिनामाशङ्कां न च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यति पूर्वमपि वृक्षत्वावच्छेदेन संयोगसामान्याभाववृत्तिरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वानियमेन वा सेद्धुमर्हतीत्याशयेनैव वृक्षादौ संयोगतत्सामान्याभावयोर्वृत्तौ अवच्छेदकभेद उपपादितः वृक्षे न संयोग इति प्रत्यक्षं च धारितं न तु यो यदीयेत्यादिनियमस्य तत्साधकत्वाशयेनेति न सन्दर्भविरोध इति। यत्र यत्किञ्चिदवयवनाशान्महावृक्षनाशानन्तरं खण्डवृक्षोत्पत्तिस्तत्क्षणे पूर्वोत्पन्नक्रियातो ऽवस्थिततावत्तदवयवैर्गगनादिसंयोगानां विनाशः द्वितीयक्षणे च खण्डवृक्षस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र वृक्षे विभुसंयोगानुत्पत्त्या यावद्विशेषाभावसौलभ्यं न चैवं तादृशवृक्षे मूर्तान्तरेणापि संयोगस्तदवयवसंयोगैस्तत्कर्मणा वा न सम्भवति तदवय-

पावच्छेदेनापि तत्र तदभावासम्भवात् तयोस्तदविरोधितामते
द्रव्ये संयोगसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्तावविरो
धात् न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्रमू
लाद्यवच्छेदेनाभावः सुलभ इति वाच्यं तासां भेदस्याप्रामाणिक
त्वात् न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्त
त्संयोगव्यक्तौ तत्तदवयवव्यक्तीनां तादात्म्यसम्बन्धेन कारण
ताया व्यभिचार इत्यवच्छेदकभेदेन संयोगभेद आवश्यक
आवश्यकश्चावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्ति-
षु हेतुताभ्युपगमः अन्यथा मूलादिमात्रावच्छिन्नमूर्तान्तरसं
योगानामग्राद्यवच्छेदेनैतद्वृक्षादिवृत्तिविभुसंयोगानां च वृक्षान्त-
रावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभत्वापातादिति वाच्यं
व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य व्या
प्यवृत्तितया मूलाद्यवच्छेदकानभ्युपगमेन वृक्षादौ विभुसंयोगस्य
व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतु
ताविरहात् व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपतत्त
द्भिन्नावच्छेदकताव्यक्तीनामभेदेपि व्यभिचारानवकाशात् अन्य
था मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्रा
वच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तीनामुत्पत्त्या मूलादेस्तत्र
व्यभिचारस्य दुर्वारत्वात् न च मूलावच्छिन्नसंयोगानामग्राव
च्छिन्नसंयोगादपि भेदः स्वीकर्तुं शक्यते मूलं प्राच्यां शरी
रवृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तावेव मूलप्राच्या
द्यवच्छिन्नत्वावगाहनात् न चाग्रमूलयोः शरीरसंयोग इत्यस्या
इव तादृशप्रतीतेरपि संयोगद्वयावगाहित्वमस्मदनुमतमिति
वाच्यं यत्र मूलप्रतीचीमात्रावच्छिन्न एकशरीरेण संयोगः अग्र-
प्राचीमात्रावच्छिन्नश्च शरीरान्तरसंयोगस्तत्र मूलं प्राच्यां शरी
रसंयोग इति प्रत्ययापत्तेः शरीरतरुसंयोगव्यक्तीनामैक्ये तासाम
ध शरीरावयवेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि
दर्शितस्य संकोचमन्तरेण दुर्वारत्वाच्च न हि तत्र शरी
रावयवावच्छिन्नशरीरतरुसंयोगमूलावच्छिन्नतदुभयसंयोगयोर्भेदस
म्भवः तथा सति मूलावच्छिन्नवृक्षसंयोगस्य शरीरे चर
णावच्छिन्नशरीरसंयोगस्य वृक्षे व्याप्यवृत्तितया तदभावास

त्वप्रसङ्गात् तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं तत्तदवच्छेदकावच्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं न तु संयोगनिष्ठतत्तद्व्यक्तित्वम् अनन्तकार्यकारणभावप्रसङ्गात् तथा च एकावच्छिन्नसंयोगस्यापरावच्छेदकावच्छिन्नत्वेपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचारशङ्केत्यपि वदन्ति । यत्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धान्तानुरोधेन मूलाग्राद्यवच्छिन्नतरुविभुसंयोगादीनां भेदस्वीकार आवश्यक इति । तदपि न सम्यक् तादृशसंयोगव्यक्तीनां गगनादौ दिग्विशेषरूपावच्छेदकनियमेनैव तादृशसिद्धान्तसङ्गतेः । अत्र वदन्ति । द्रव्यमात्र एव संयोगसामान्याभावस्याप्रामाणिकतायास्तन्नेत्यादिनोक्तेन चेत्यादिना गगनादेरेव संयोगसामान्याभावसाधकमनुमानमाशङ्कितं विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिग्विशेषावच्छिन्नतया तत्तद्व्यक्तित्वेन तत्र तदभावसत्त्वेऽविवादान्नासिद्ध्यवकाशः विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगि द्रव्यत्वादित्यादौ व्यावृत्तिसङ्गतेर्वृक्षादावेतद्व्याप्तिबलात्संयोगसामान्याभावासिद्धावपि न क्षतिः प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वनियमसत्त्वे वृक्षत्वावच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धेः संभवेन तत्रापि तदभावं साधयतां तादृशनियमवादिनामाशङ्कां न च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यति पूर्वमपि वृक्षत्वावच्छेदेन संयोगसामान्याभाववृत्तिरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वनियमेन वा सेद्धुमर्हतीत्याशयेनैव वृक्षादौ संयोगतत्सामान्याभावयोर्वृत्तौ अवच्छेदकभेद उपपादितः वृक्षे न संयोग इति प्रत्यक्षं च वारितं न तु यो यदीयेत्यादिनियमस्य तत्साधकत्वाशयेनेति न सन्दर्भविरोध इति । यत्र यत्किञ्चिदवयवनाशान्महावृक्षनाशानन्तरं खण्डवृक्षोत्पत्तिस्तत्क्षणे पूर्वोत्पन्नक्रियातोऽवस्थितयावत्तदवयवैर्गगनादिसंयोगानां विनाशः द्वितीयक्षणे च खण्डवृक्षस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र वृक्षे विभुसंयोगानुत्पत्त्या यावद्विशेषाभावसौलभ्यं न चैवं तादृशवृक्षे मूर्तान्तरेणापि संयोगस्तदवयवसंयोगैस्तत्कर्मणा वा न सम्भवति तदवय-

चगगनादिसंयोगनाशककर्मणा मूर्तान्तरतदवयवसंयोगानामपि तदुत्पत्तिकाले विनाशादवयवावयविनोः संयोगानभ्युपगमेन तदवयवेष्वेवारम्भकसंयोगसत्त्वे तेन तद्विशिष्टसंयोगजननासम्भवात् उत्पत्तिकाले च द्रव्ये गुणवत्कर्मसत्त्वानुपपत्तेरिति संयोगसाध्यके द्रव्यत्वस्य सद्धेतुतैव न निर्वहतीति वाच्यं तादृशखण्डद्रव्ये तदवयवसंयोगजन्यस्य तत्कर्मजन्यस्य च संयोगस्यासम्भवेऽपि सर्वत्रैव सतां सदागतिशीलपवनादिपरमाणूनां कर्मभिस्तत्संयोगानुत्पत्तौ बाधकविरहेण द्रव्यस्य संयुक्तत्वनियमादित्यपि कश्चित् । यावत्संयोगाभावा एव मानमिति । ज्ञायमान लिङ्गस्यानुमितिकरणत्वमताभिप्रायेण । यत्तदर्थयोरिति साध्यहेतुघटकयत्तच्छब्दार्थयोः संयोगघटत्वाद्योरित्यर्थः । अननुगमादिति । एकरूपेण निवेशासम्भवादित्यर्थ एकव्याप्तेर्निर्वाहयितुमशक्यत्वादिति शेषः । तथा च घटत्वाद्यवच्छिन्नाभावघटादिविशेषाभावकूटयोर्व्याप्तेः संयोगसामान्याभावसिद्धावनुपयोगित्वाद्यावत्संयोग विशेषाभावे संयोगसामान्याभावीयविशेषव्याप्तेश्चाग्रे निराकरिष्यमाणत्वान्नोक्तानुमानसम्भव इति भावः । ननु प्रकृतहेतौ प्रकृतसाध्यव्याप्तेरग्रहेऽपि यथा यो यत्र प्रवर्तते स कार्यतया तज्जानातीत्याकारात् स्तनपानादिप्रवृत्तितद्विषयककार्यताज्ञानयोर्व्याप्तिग्रहात् गवानयनादिप्रवृत्तिलिङ्गेन गवानयनादिकार्यताज्ञानस्य सिद्धिः तथा प्रकृते संयोगीययावद्विशेषाभावे तत्सामान्याभावव्याप्ते र्व्यर्थविशेषणत्वादिना अग्रहेऽपि घटादिविशेषाभावकूटे तत्सामान्याभावव्याप्तिग्रहादेव संयोगीययावद्विशेषाभावे पक्षधर्मताज्ञानाद्गगनादौ संयोगसामान्याभावसिद्धिर्दुर्वारैव व्यतिरेकिहेतुकानुमितावपि सामान्यव्याप्त्यधीनविशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुत्वानुपगमात् न च विशेषाभावान्तरे सामान्याभावान्तरव्याप्तिग्रहात्संयोगविशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्त्वाद्यविशेषितरूपिसंयोगादिप्रतियोगिकाभावे रूपिसंयोगादिसामान्याभाव व्याप्तिग्रहादेव संयोगादिप्रतियोगिकाभावेन तत्सामान्याभावसिद्धिसम्भवाद्यावत्त्वादिविशेषणमनर्थकं प्रकृतहेतुतुल्यानिखिलहेत्वन्तरेषु प्रकृतसाध्यतुल्यसाध्यव्याप्तिग्रहापेक्षायाः स्वीकर्तुमशक्यत्वात् तादृशसकलहेतुसाध्यानां युगसहस्रेणासर्व

ग्रहीतुमशक्यत्वादिति वाच्यम् । उपस्थितयावत्तादृशहेतुषु तादृशतत्तत्साध्यव्याप्तिग्रहापेक्षया सामञ्जस्यात् तावन्मात्रापेक्षायाश्च तत्तत्साधनधर्मिकतत्तत्साध्यव्याप्तिग्रहाभावविशिष्टतत्तत्साध्यसाधनोपस्थितेरनुमितिप्रतिबन्धकतया सूपपादत्वात् एवं सति यावत्त्वविशेषणानुपादाने जात्यादिविशेषवत्त्वाद्यभावे जात्यादिसामान्याभावव्यभिचारोपस्थितिदशायां संयोगादिसामान्याभावसाधनासम्भवेन तादृशविशेषणसार्थक्यात् गगनाद्यवृत्तिस्वसमानाधिकरणनिरुक्तधर्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभावकं यद्यत्स्वं तदन्यो यो धर्मः स तन्निष्ठाभावप्रतियोगितावच्छेदक इत्येतादृशोक्तसामान्यव्याप्तिस्थलाभिषिक्तव्याप्त्यैव वा संयोगत्वादौ गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वं साधनीयं तत्रानुमाने उपाधिमाह एकावच्छेदेनेति । अनवच्छिन्नतदीययावद्विशेषाभावाधिकरणत्वस्य उपाधित्वादित्यर्थः यथाश्रुते गुणादिनिष्ठाया यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तितया ऽवच्छेदकविरहेण उपाधेः साध्यव्यापकत्वानिर्वाहात् । न च गुणादिनिष्ठाया यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तित्वेपि गुणत्वाद्यवच्छिन्नत्वमावश्यकमन्यथा ऽधिकरणतावच्छेदकप्रकारकज्ञानासम्भवेन गुणादौ तदभावग्रहासम्भवादिति वाच्यं द्रव्यनिष्ठयावत्संयोगाभावाधिकरणताया अपि द्रव्यत्वादिरूपैकावच्छिन्नतयोपाधेः साधनाव्यापकतानिर्वाहाय सप्तमीनिर्देश्यं यदव्याप्यवृत्तित्वनिर्वाहकं विलक्षणमवच्छेद्यत्वं तस्यैव विवक्षणीयतया गुणादिनिष्ठसंयोगाद्यभावाधिकरणतायां तादृशावच्छेद्यत्वविरहेण साध्यव्यापकताया यथाश्रुते दुरुपपादत्वात् । अथैवं कपिसंयोगादिसामान्यस्य मूलाद्यवच्छेदेनाभाववति कपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नतदीययावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्न सामान्यव्याप्तिनिर्वाहः । अत्र केचित् अवच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभाववद्यावद्विशेषाभाववत्त्वमिहोपाधित्वेनाभिमतं गुणे यावद्विशेषाभाववत्त्वमवच्छिन्नत्वाभावेनोक्तोभयाभाववत् कपिसंयोगवति वृक्षे कपिसंयोगीययावद्विशेषाभाववत्त्वं मूलाद्येकावच्छेदकावच्छिन्नमिति तदनवच्छि-

त्वाभावादुभयाभाववदिति नोक्तोपाधिसाध्ययो सामान्यव्याप्ति भङ्ग । अथ वृक्षादिनिष्ठाना यावत्कपिसयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्व सम्भवति वृक्षाद्यवृत्तिकपिसयोगादिव्यक्तीना ये ऽभावास्तेषा वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणतानामनवच्छिन्नत्वात् न च व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतया अन्यासां चैकावच्छेदकावच्छिन्नतया सर्वास्वेव तासु उभयाभावो ऽक्षत इति वाच्यम् । एव सति पक्षनिष्ठसयोगव्यक्तीना दिग्दशाविशेषाद्यवच्छिन्नाना यावन्तोऽभावा पक्षनिष्ठतावन्निरूपिताधिकरणताना सर्वासामेकावच्छेदकाविरहेऽपि द्वित्वादीनामवच्छेदकैरूपसम्भवेन सर्वास्वेव तादृशतादृशावच्छेदकमादायैकावच्छेदकावच्छिन्नत्व सम्भवतीत्युभयाभावसत्त्वादुक्तोपाधेर्यावत्सयोगाभावरूपसाधन व्यापकतापत्ते स्वसमानाधिकरण यावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वस्य एकावच्छेदकावच्छिन्नत्वरूपत्वे च वृक्षादिनिष्ठमूलाद्यवच्छिन्नकपिसयोगाभावाधिकरणतास्वपि न तथात्वसम्भवस्तत्समानाधिकरण व्याप्यवृत्तिकपिसयोगाभावाद्यधिकरणतानामपि तादृशयावदधिकरणतान्तर्गततयातदवच्छेदकस्य चाप्रसिद्धत्वादिति चेन्न एकावच्छेदकावच्छिन्नत्वस्य स्वसमानाधिकरणकिञ्चिदवच्छिन्न यावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपस्य विवक्षितत्व नानवच्छिन्नाधिकरणताभि सद्वावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासम्भवेपि क्षतिविरहात् । अथवा यावद्विशेषाभाववत्त्वमित्यनेन यावत्तद्विशेषाभाववत्त्वावच्छिन्ननिरूपितमेकाधिकरणत्व विवक्षित न तु तत्समुदाय एकावच्छेदकावच्छिन्नत्व च एकमात्रवृत्तिधर्मावच्छिन्नावच्छेदकावच्छिन्नत्व न त्वभिन्नावच्छेदकत्व वृक्षावृत्तिसयोगाना वृक्षनिष्ठाभावा यद्यपि व्याप्यवृत्तयस्तथापि अव्याप्यवृत्तिसाधारणयावत्त्वे न तेषामव्याप्यवृत्तित्वात्तत्साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणता एकमात्रवृत्तिनस मूलत्वाद्यवच्छिन्नत्वस्य मूलादिरूपावच्छेदकावच्छिन्नेति तत्रोभयाभावो ऽक्षत इति न साध्योपाध्यो सामान्यव्याप्तिभङ्ग पक्षनिष्ठसयोगसामान्यीयवयावद्विशेषाभावाधिकरणता च न प्रत्येकावच्छेदकावच्छिन्ना मूल वृक्षो यावत्सयोगा

भाववान् इत्यादिप्रतीतिविरहात् अपि त्वनुगतरूपावच्छिन्नतदवच्छेदकावच्छिन्ना यावत्संयोगाभाववद्गगनमितिप्रत्ययात् एकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणतावच्छेदकत्वविरोधात् एकस्यापि विशेषरूपसामान्यरूपाभ्यामुभयावच्छेदकत्वोपगमात् तथा च वृक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्ननिरूपिताधिकरणता न निरुक्तैकावच्छेदकावच्छिन्नत्ववतीति तस्या उक्तोभयवत्त्वादुपाधेः साधनाव्यापकत्वमिति वदन्ति । वस्तुतस्तु अनवच्छिन्नयावद्विशेषाभाववत्त्वमेवोपाधिः तादृशोपाधिना साध्यस्य सामान्यव्याप्तिविरहेपि संयोगसामान्याभावरूपपर्यवसितसाध्यव्यापकतया तादृशोपाधेः सत्प्रतिपक्षोत्थापकत्वमव्याहतं तादात्म्येन साध्यवतोप्युपाधिव्याप्यतया तादृशोपाध्यभावेन संयोगसामान्याभावरूपसाध्यवद्भेदो ऽन्यत्राप्रसिद्धोपि साधयितुं शक्यत एव अभावसाध्यकव्यतिरेकिणि प्रतियोगिमात्रप्रसिद्धेरपेक्षितत्वात् उपाध्यभावेन साध्याभावसाधनं तु न सम्यक् संयोगरूपस्य तस्य साधने सिद्धसाधनात् पक्षावृत्त्युपाधिव्याप्यत्वेन साध्ये पक्षावृत्तित्वसाधनात्सत्प्रतिपक्षनिर्वाह इति केचित् । सिद्धसाधनादितः साध्याभावसाधनासम्भवेपि प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकतया गृह्यमाणोपाधितावच्छेदकावच्छिन्नाभाववत्ताज्ञानात्पक्षे साध्यानुमितिप्रतिरोध एवेति सारम् । अथवा प्रतियोग्यधिकरणत्वरूपपक्षधर्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतया एकावच्छेदेनेत्यादेर्यथाश्रुतस्यैवोपाधितानिर्वाहः यत्र प्रतियोगिमति यस्य सामान्याभावस्तत्रैकावच्छेदेन तस्य यावद्विशेषाभाववत्त्वनियमेन सुग्रहत्वात् गुणादावेकावच्छेदेन यावद्विशेषाभावासत्त्वेपि तत्र प्रतियोगिसत्त्वेनावच्छिन्नसाध्यव्यापकत्वाक्षतेश्च । द्रव्ये च प्रतियोगिमत्त्वविशिष्टयावत्संयोगविशेषाभावाधिकरणे एकावच्छेदेन तदीययावद्विशेषाभावासत्त्वात् प्रतियोगिमत्त्वरूपावच्छेदकविशिष्टसाधनाव्यापकत्वं तस्य वृक्षादिवृत्तिकपिसंयोगादिविशेषाभावाधिकरणताकूटान्तर्गतकतिपयाभावाधिकरणतानामनवच्छिन्नत्वेपि तत्कूटस्य एकावच्छेदकावच्छिन्नत्वं पूर्ववदुपपादनीयम् । अथ एतादृशोपाधेर्व्यभिचारोन्नायकत्वं न सम्भवति प्रकृतसाध्य-

व्यापकस्य एतद्घटत्वावच्छिन्नप्रतियोगिताकयावद्विशेषाभावस्य व्याप्रसिद्धेः द्रव्ये तदीययावद्विशेषाभाववत्त्वावच्छिन्नवृत्ति एतावच्छेदकत्वावच्छिन्नस्याभावात् गुणे च तत्त्वावच्छिन्नस्याप्यभावात् प्रतियोगिमत्त्वविशिष्टवृत्तिसंयोगादिसामान्याभावस्यापक्षस्य तदीयैतावच्छेदकत्वावच्छिन्नयावद्विशेषाभाववत्त्वस्य प्रतिज्ञानेऽपि तद्ग्रहेण प्रकृतसाध्यच्छेदकावच्छेदेन व्याप्तेः अज्ञाताव्याप्यतावच्छेदकत्वात् प्रतियोगिमत्त्वविशिष्टवृत्तिसंयोगादिसामान्याभावपक्षेऽपि कपिसंयोगादिरूपप्रतियोगिनोऽपि हेतुमति साध्यमानो न कपिसंयोगादिसामान्याभावपक्षेऽपर्यवसितार्थी तत्र प्रतियोगिमत्त्वस्याभावात् प्रतियोगिमति एतावच्छेदकत्वावच्छिन्नतदीययावद्विशेषाभाववत्त्वाभावेन तद्व्याप्यभावादिहेतोरसिद्धेरिति न व्यभिचारोपपत्तिरित्याह इति चेत् । मैवं क्वचिद्द्रव्ये उत्पादिसंयोगवति तत्सामान्याभावस्य सत्त्वे एतावच्छिन्नतदीययावद्विशेषाभावस्य तदीयप्रतियोगिमत्त्वविशिष्टसामान्याभाववव्याप्यत्वे एतावच्छेदकत्वावच्छिन्नतदीययावद्विशेषाभाववत्त्वं यत्र च द्रव्ये सर्वावयवावच्छेदेन भिन्नभिन्ना उत्पादिसंयोगा वर्तन्ते यावत्तद्विशेषाभावरूपहेतुमति सर्वैतावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वरूपोपाध्यभावे प्रतियोगिमत्त्वविशिष्टतत्सामान्याभावपक्षेऽस्य सिद्धौ साधनाभावात् प्रतियोगिमति तत्र विशेष्यपक्षेऽप्यपर्यवसानेन व्यभिचारसिद्ध्या सामान्यव्याप्तिग्रहात् संयोगत्वे गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानेऽपि व्यभिचारितव्याप्यतापि एतावच्छेदकावच्छेदस्य समानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकव्याप्यसमानाधिकरणताशून्यगगनादिकः पक्षस्तत्र व्यापकत्वोपाधिरयं बोध्यम् । एतेनेति अनवच्छिन्नयावद्विशेषाभाववत्त्वस्योपाधित्वेनेत्यर्थः । इति विशेषव्याप्त्युपष्टम्भमनुमानं परास्तं दूषणान्तरमप्याह व्यर्थेति तन्मते संयोगसामान्याभावस्य केवलान्वयितया ऽसाधकत्वस्यैव तद्व्याप्यतावच्छेदकत्वेन इतरांशस्य व्यर्थत्वादित्यर्थः नन्वभावादिरेव हेतुरस्त्वित्यत आह अप्रयोजकत्वादिति व्याप्तिग्राहकतर्कशून्यत्वादित्यर्थः । विशेषव्याप्तौ उपाध्यन्तरमपि सुलभमित्याह निर्गुणत्वादेरिति । आदिना निष्परिमाणत्वादेः

परिग्रहः यद्यद्धर्माश्रयानवच्छेदकं तत्तद्धर्मावच्छिन्नाभावावच्छेदकमिति व्याप्त्युपष्टम्भं वृक्षत्वादेः संयोगसामान्याभावावच्छेदकत्वसाधकमनुमानमाशङ्क्य निराकुरुते न चेति । गुणाद्यनवच्छेदकेति । गुणत्वाद्याश्रयानवच्छेदकेत्यर्थः । तदभावेति गुणत्वाद्यवच्छिन्नाभावेत्यर्थः तथा च गुणत्वाद्यवच्छिन्नस्यापि अव्याप्यवृत्तितापसङ्ग इति भावः । घटादौ द्रव्यत्वावच्छेदेन घटत्वाद्यभावप्रसङ्गो घटत्वादेर्व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्ध्या तदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्न सम्भवतीति नाभिहितः । गुणत्वाद्याश्रयस्य संयोगादेरवच्छेदकप्रसिद्ध्या न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः । ननु यद्धर्माश्रयानवच्छेदकमित्यत्र यत्पदेन अव्याप्यवृत्त्यवृत्तिधर्मो विवक्षितः गुणत्वादेश्च व्याप्यवृत्तिरूपादिवृत्तितया तदाश्रयानवच्छेदकत्वस्य न तदवच्छिन्नाभावावच्छेदकत्वापादकता इत्याशङ्क्य वृक्षत्वादौ संयोगत्वाश्रयानवच्छेदकत्वरूपसंयोगत्वावच्छिन्नाभावसाधकहेतोरसिद्धिमाह यथा चेति । दण्डनिष्ठघटकारणताघटकतदव्यवहितपूर्वकालसम्बन्धस्येत्यर्थः । प्रतिदण्डं भिन्नत्वेपीति दण्डत्वं तत्सामान्यावच्छेदकमित्यन्वयः । प्रतिदण्डं भिन्नत्वेपीत्यनेन दण्डत्वं प्रत्येकातिप्रसक्तमिति सूचितमेवमग्रेपि । तत्सामान्येति घटपूर्ववर्तितात्वावच्छिन्नस्येत्यर्थः । प्रत्येकातिप्रसक्तत्वेपि अवच्छेद्यतावच्छेदकानुगतरूपावच्छिन्नानतिप्रसक्ततया तस्यावच्छेदकत्वम् । अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेतिभावः । ननु दण्डत्वस्य घटनियतपूर्ववर्तितावच्छेदकत्वं न घटनियतपूर्ववर्तितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वमपि तु तदव्यवहितपूर्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपपारिभाषिकमेव तच्चातिप्रसक्तेऽपि निराबाधमेव स्वरूपसम्बन्धरूपावच्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियतत्वादिति प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह वह्निसामानाधिकरण्यस्येति । प्रतिधूमं भिन्नत्वेऽपि धूमत्वं तत्सामान्यावच्छेदकमित्यन्वयः । तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः धूमत्वस्य तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्येत न च व्याप्यतावच्छेदकत्वमपि स्वविशि-

व्यापकसाध्यकत्वरूपं पारिभाषिकमेव तथातिप्रसक्तसाधारणमिति न दृष्टान्तसङ्गतिरिति वाच्यं साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वं व्याप्तिस्तत्रावच्छेदकत्वं स्वरूपसम्बन्धविशेष अत एव यत्र व्यथावशापणयाटननाळधूमत्वादिना हेतुता तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैतदभिधानात् अन्यथा पुन स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्मनिष्ठस्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्तविधया वाच्यं संयोगसामान्यस्य संयोगत्वरूपावच्छिन्नतावच्छेदकरूपावच्छिन्नस्य सुवचत्वाघात प्रत्यक्षसंयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वादिति भाव । यद्यप्येवमपि प्रमेयत्वादे संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वाप्रसक्त्या उक्तव्याप्तित्वात्तदवच्छेदेन संयोगसामान्याभावासाद्धन शक्यते वारयितुं तथापि प्रतियोगिमत्सम्बद्धदेशकालयोरेव प्रतियोग्यनवच्छेदकयोरभावावच्छेदकत्वनियमस्तयोरेव तदनुभवात् न तु प्रतियोग्यनवच्छेदकमात्रस्य मानाभावादि यत्र तात्पर्यं द्रव्ये संयोगसामान्याभावस्य कालभेदाद्यवच्छेदेन स्वयमनुपदं व्यवस्थापनीयतया सम्प्रदायविद इत्यनेनास्वरसो दर्शित ।

त्यन्ताभावविरोधितया निराकृतत्वादिति भावः। एतेन तदवच्छेदेन संयोगादिसामान्याभावोऽपि सुतरां वर्तते व्यापकधर्मावच्छिन्नाभाववति व्याप्यधर्मावच्छिन्नाभावसत्त्वनियमादिति सूचितं न चोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव न तु तत्सामान्यात्यन्ताभावोऽपि मानाभावादिति वाच्यं तदा तत्र जन्यैकत्वहेतुभूतस्य एकत्वत्वावच्छिन्नाभावस्यावश्यकतया तस्यैव स्वसमनियतगुणत्वावच्छिन्नाभावरूपतया विवादायोगात् संयोगादिसाध्यकनित्यद्रव्यमात्रवृत्तिहेतुस्थले व्यावृत्तिदानायाह प्रलयेति। महाप्रलयस्य जन्यभावानधिकरणतया तदानीं संयोगाद्यसत्त्वादितिभाव। तदानीं च गगनादौ नित्यैकत्वपरिमाणादिसत्त्वेन गुणसामान्याभावस्यासत्त्वात्संयोगस्येत्युक्तम्। अत्र च प्रमाणं महाप्रलये गगने न संयोग इत्यादिप्रामाणिकव्यवहार एव तादृशव्यवहारस्य ध्वंसावगाहित्वे ऽतिप्रसङ्गाद्व्यवहारानादरे चातीन्द्रियगगनादौ गोत्वाद्यभावस्याप्रामाणिकतापत्तेः प्रत्यक्षासम्भवात् अनुमानस्याप्रयोजकत्वात् वह्निमान् धूमादित्यत्रापि व्यावृत्तिदानायाह तथेति। दहनस्य दहनत्वावच्छिन्नस्य प्रतीतेरित्यन्त द्रव्यस्याव्याप्यवृत्तित्वादित्यत्र हेतुः प्रत्यक्षप्रमाणमुक्त्वा युक्तिमप्याह वृत्तेरिति। सयोगरूपसम्बन्धस्येत्यर्थः। वृत्तिमतो व्याप्यवृत्तित्वस्य संयुक्तस्य तत्सम्बन्धेन व्याप्यवृत्तितायाः असम्भावितत्वादिति। अयमाशयः सम्बन्धिसत्तायाः सम्बन्धाधीनत्वाद्यदवच्छेदेन सम्बन्धो नास्ति तदवच्छेदेन तत्सम्बन्धावच्छिन्नतदभावसत्त्वमावश्यकं संयोगादेः सम्बन्धस्य समवायस्य व्याप्यवृत्तित्वेऽपि न संयोगादेर्व्याप्यवृत्तिता गुणादौ समवायसत्त्वेऽपि संयोगाद्यसत्त्वात्संयोगाद्यनवच्छेदकावच्छिन्ने संयोगादिमति तत्समवायसत्त्वेऽपि तदभावोपपत्तेरिति। केचित्तु वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्ववत् वृत्तेर्व्याप्यवृत्तित्वे वृत्तिमतोऽपि व्याप्यवृत्तित्वं युक्तितौल्यात् संयोगादिप्रतियोगिकत्वविशिष्टसमवायोऽपि न व्याप्यवृत्तिरित्याहुः। वह्निमान् धूमादित्यादौ कालविशेषावच्छेदेन हेतुमति। वर्तमान साध्याभावमादाय घटत्ववान् कालत्वादित्यादौ पटाद्यवच्छेदेन काले वर्तमानं कालिकसम्बन्धावच्छिन्नाभावमादाय च व्यावृत्तिदानायाह

प्यमिति । प्रतियोगिमतो देशस्य प्रतियोग्यनधिकरणकालावच्छेदेन प्रतियोगिमतः कालस्य च प्रतियोग्यनधिकरणदेशावच्छेदेनाभाववत्त्वमित्यर्थः । नन्तत्साध्यकेति गुणत्वाद्यवच्छिन्नसाध्यकद्रव्यत्वाद्यव्याप्तिवारणायेत्यर्थः तत् असमानाधिकरणान्तम् । अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तेरप्रसिद्ध्या तद्घटितैव व्याप्तिः व्याप्यवृत्तिसाध्यके तु प्रतियोगिवैयधिकरण्यानुपस्थितिदशायामपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहादनुमित्युत्पत्त्या प्रतियोगिवैयधिकरण्याघटितापि व्याप्तिरस्ति प्रतियोगिवैयधिकरण्यघटितव्याप्तिद्वयमप्येव प्रसिद्धानुमितिप्रयोजिका चेत्याशयेन मूलकृतस्तदुपादानमित्याह नोपादेयमिति । व्याप्यवृत्तिसाध्यके सार्वत्रिकमुपादानं प्रतिक्षिप्तं न त्वनुपादानस्य सार्वत्रिकत्वमुक्तव्याप्यवृत्तेरपि साध्यस्याव्याप्यवृत्तित्वग्रहदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमात् व्याप्यवृत्तिसाध्यके सर्वत्र तादृशविशेषणोपादानानियमः तदघटितायां अपि व्याप्तेः सर्वत्रानुमित्यौपयिकत्वात् अव्याप्यवृत्तिसाध्यके तु सर्वत्र तदुपादाननियम एव तदघटितव्याप्तेरप्रसिद्धेरिति भावः । व्याप्यवृत्तिसाध्यकस्य च स्वसमानाधिकरणाभावाप्रतियोगिसाध्यकस्य सत्तावान् द्रव्यत्वात् कालिकसम्बन्धावच्छिन्नाकाशाभावाभाववान् आत्मत्वादित्यादिकं च न तथा अतस्तत्र साध्यवति कालात्मादौ कालिकदैशिकविशेषणताभ्यां तदभावसत्त्वात् प्रतियोगिवैयधिकरण्याविशेषितहेतुसमानाधिकरणाभावाप्रतियोगित्वस्य साध्ये ऽसत्त्वेन व्याप्तेः प्रतियोगिवैयधिकरण्याघटितत्वनियमेऽपि न दोषः । केचित्तु व्याप्यवृत्तिसाध्यकस्य यथाश्रुतमेव हेतुमत्यभावस्य न दैशिकविशेषणतया वृत्तिर्विवक्षणीया अतो हेतुमति कालादौ कालिकविशेषणतादिना साध्याभावसत्त्वेऽपि नाव्याप्तिः साध्यस्यापि अभावत्वेन दैशिकविशेषणतया वृत्तिः प्रामाणिकी अतो नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः यादृशप्रतियोगितानिरूपकाभावत्वावच्छिन्नस्य दैशिकविशेषणतया हेतुमति वृत्तिमत्तादृशप्रतियोगितानवच्छेदकत्वविवक्षया कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान्

आत्मत्वादित्यादावव्याप्तेर्निरासः तत्राकाशाभावस्याकाशाभावत्वेनैव देशिकविशेषणतया आत्मनि वृत्तिर्न तु उक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन आत्मनि तादृशाभावाभावो नास्तीत्यप्रतीतेः अव्याप्यवृत्तिसाध्यकेऽपि संयोगाभाववान्नित्यगुणत्वादित्यादावनुत्यौपायिकद्विविधव्याप्तेः सम्भवेन सर्वथैवेत्युक्तं तावताप्यव्याप्यवृत्तिसाध्यकेऽपि क्वचित्तदघटितव्याप्तेः सम्भव इति सूचितमित्याहुः। यत्तु व्याप्यवृत्तिसाध्यके ऽव्याप्यवृत्तित्वग्रहाविषयसाध्यके सर्वथैवासमानाधिकरणान्तस्यानुपादेयतया तत्र लाघवेन प्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानाङ्गतास्वीकारादिति व्याख्यानं तदसत्। तत्रापि शब्दादिना प्रतियोग्यसामानाधिकरण्यघटितव्याप्तेर्यदा ग्रहस्तदा ऽनुमितेरुत्पादाय तादृशव्याप्तेरनुमानाङ्गत्वस्योपगन्तव्यत्वात् अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमः तादृशसाध्यके लाघवेन साध्याभाववदवृत्तित्वमात्रस्यैव व्याप्तित्वोपगमप्रसङ्गात् केवलान्वयिनो यस्य साध्यस्य न व्यतिरेकित्वभ्रमविषयता तत्साध्यके हेतुसामानाधिकरण्यविशेषणपरित्यागस्यापि प्रसङ्गाच्च। यत्तु प्रतियोग्यसामानाधिकरण्येत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरमवश्यं वाच्यम् अन्यथा प्रतियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः तथा च स्वपदस्य तत्तदभावपरतया तत्तदभावप्रतियोग्यसामानाधिकरण्यविशिष्टत्वेन हेतुमद्वृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानम् अनुमितिकारणं वाच्यं तादृशं च ज्ञानमसर्वज्ञस्य दुर्घटम्। अतः प्रतियोगिपदस्य प्रकृतसाध्यार्थकतया साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमदवृत्तिरभाव एवानुगतरूपेण निवेश्यः सद्धेतौ सर्वेषामेव हेतुसमानाधिकरणाभावानां सर्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमदवृत्तित्वं न प्रसिद्ध्यतीति साध्याभावनिष्ठत्वं साध्यसामानाधिकरण्ये विशेषणं सद्धेतौ सर्वत्र साध्याभावभिन्नाभावे तत्प्रसिद्धिसम्भवः व्यभिचारिणि च व्यभिचारनिरूपकाधिकरण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया

हेतुमद्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नाति व्याप्ति सयोगेन प्रमेयसाध्यकसद्धेतौ साध्याभावातिरिक्ताभावाप्रसिद्ध्या हेतुमति साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टाभावासिद्धिरिति साध्यतावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेशनीय एव च व्याप्यवृत्तिसाध्यके साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसामानाधिकरण्याप्रसिद्ध्या ईदृशव्याप्तिर्न प्रसिद्ध्यतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्यघटितैव व्याप्तिरित्युक्तं नोपादेय चेत्यादिनेति । तदपि न सामानाधिकरण्यविशेषणीभूतसाध्याभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वानिवेशे प्रयोजनाभावाद्व्याप्यवृत्तिसाध्यकेऽपि सम्बन्धान्तरावच्छिन्नसाध्याभाव एव साध्यसामानाधिकरण्यप्रसिद्ध्या तत्राप्युक्तव्याप्तिप्रसिद्धेः । परे तु ननु प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तेरनुमितिप्रयोजकत्वे प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां तदसमानाधिकरण्याविषयकादेव हेतुसमानाधिकरणाभावप्रतियोगित्वज्ञानादनुमितिरूपेयत इत्यनुपपन्नमत आह नोपादेयश्चेति । व्याप्यवृत्तिसाध्यके अनुमितिपूर्वमव्याप्यवृत्तित्वज्ञानाविषयसाध्यके सर्वत्र प्रतियोगिवैयधिकरण्यं नापादेयम् । अनुमितिप्रयोजकव्याप्तिशरीरे न निवेशनीयं । तत्र तदघटितव्याप्तिज्ञानमेव हेतु । सर्वथैवेत्यनेन यत्साध्यके पक्षादावनुमितिपूर्वं साध्ये हेतुमत्यव्याप्यवृत्तित्वज्ञानं तत्र तदनुमितिनिर्वाहाय प्रतियोग्यसामानाधिकरण्यमुपादायापि व्याप्तेरनुमितिप्रयोजकत्वमुपेयं वक्ष्यमाणरीत्या व्याप्त्यननुगमान्न व्यभिचार इति सूचितं । साध्यभेदन्युपलक्षणप्रतियोग्यसामानाधिकरण्यानुपस्थितिदशामादायैव साध्यकस्यानुमितिप्रयोजकव्याप्तिभेदापगमोऽपि बोद्धव्य इति ध्येयम् । अव्याप्यवृत्तिसाध्यकस्यैव द्विविधा व्याप्तिर्न त्वव्याप्यवृत्तिसाध्यक इति साध्यभेदेन व्याप्तिभेदमाधाय न समन्वयनीयमत आह साध्यादिभेदेनेति साध्यतावच्छेदकादिभेदेन व्याप्तिघटकतया तद्भेदे तद्भेदस्यावश्यकत्वादित्यर्थः ॥

यद्यपि आत्मादौ गुणकर्मान्यत्वादिसामानाधिकरण्योपलक्षित एव सत्ताद्यभावस्यैव गुणादौ तदुपलक्षितसत्त्वादनुमितेः

प्रमात्वादिति तत्र तादृशानुमित्यौपयिकव्याप्तिस्वीकारे सल्लिङ्गकपरामर्शादपि भ्रमः स्यादिति तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतोर्न स्वीकर्तुं शक्यते ऽतः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तिशरीरे प्रतियोगितावच्छेदकाविशिष्टवैयधिकरण्यपर्यन्तं निवेश्य तत्र तादृशातिव्याप्तिं वारयति प्रतियोग्यसामानाधिकरण्यं चेति ॥

(दी०) प्रतियोग्यसामानाधिकरण्यं च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेनायं गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ नातिप्रसङ्गः । न चोभयत्वमेकविशिष्टापरत्वं विशिष्टं च केवलादन्यदिति तदभावो मनसि सहजत एव प्रतियोग्यसमानाधिकरण इति वाच्यम् उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावः तदवच्छिन्नाभावात् । वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात् । न च तत्र व्याप्तिरेवोभयत्वाधिकरणमूर्तत्वस्य मनसि सत्त्वादिति वाच्यं तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वान्नात्रोभयमिति प्रतीतेर्दुर्वारत्वात् ।

(गा०) न च तथापि व्याप्तिस्वीकारे क्षतिविरहः गुणो गुणान्यत्वविशिष्टसत्तावानित्यादौ तादृशव्याप्तिसत्त्वेऽपि बाधेनैव हेतोर्दुष्टत्वोपपत्तेः द्रव्यपक्षकतादृशसाध्यकजात्यादिहेतोश्च समीचीनताया एवोपगमे क्षतिविरहात् बाधानवतारदशायां च गुणादौ जात्यादिलिङ्गकविशिष्टवैशिष्ट्यानुमितिर्भ्रमरूपा प्रमात्मकसल्लिङ्गकपरामर्शादपि स्वीक्रियते अत एव गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाधानवतारदशायां प्रमात्मकपरामर्शाद्विशिष्टानुयोगिकवैशिष्ट्यावगाहिनो भ्रमानुमितिर्मणिकारेणोपगम्यत इति वाच्यं भ्रमानुमितिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशयात्

गन्धप्रागभाववच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ परामर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या तत्र प्रमात्मकपरामर्शादप्रमानुमितिस्वीकारात् गुणो विशिष्टसत्तावान् जातिमत्त्वादिति विशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गन्धप्रागभाववान् घटो गन्धवानित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलमसिद्धिव्यभिचारासङ्कीर्णबाधोदाहरणत्वेनाभिहितमतामणिकृतो ऽप्युक्तस्थले ऽव्याप्तिर्नास्तीत्याशय उन्नीयते । अथ विशिष्टनिरूपित एव समवायादिर्विशेष्याविरोधिनो विशिष्टाभावस्य प्रतियोगितावच्छेदकसम्बन्धः शुद्धसमवायादेस्तथात्वे दण्डाद्युपलक्षितपुरुषादिमत्त्वविरोधिनाद्दशपुरुषाद्यभावात्तदविरोधितद्विशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वाहात् न च तदुपलक्षितपुरुषाद्यभावस्य स धर्मो न प्रतियोगितावच्छेदकः अपि तु प्रतियोगितासमानाधिकरण एव प्रतियोगितावच्छेदकस्यैव प्रतियोगिनि विशेषणत्वात्तादृशस्यैव चोपलक्षणत्वादिति तादृशाभावयोर्विशेष इति वाच्यम् उपलक्षणेन दण्डादिना व्यावृत्तप्रतियोगिनिष्ठप्रतियोगितायां पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे तदवच्छेदकताया पर्याप्त्यसम्भवेन दण्डादेरपि तदवच्छेदककोटावदश्यमन्तर्भावात् अत एव पुरुषादिमात्रेण दण्डाद्युपलक्षितपुरुषाद्यभावस्य न विरोधः तदवच्छिन्नाभावस्यैव तद्विशिष्टाभावत्वे सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादित्यादौ ग्रन्थकृता कूटघटितलक्षणातिव्याप्तिदानमपि विरुध्येत पृथिवीसमवेतत्वविशिष्टाभावस्य साध्यत्वादौ सत्त्वेन वायुत्वादेस्तत्र साध्ये सद्धेतुत्वात् तथा च प्रतियोगितावच्छेदकावच्छिन्नाभासमानाधिकरण्यविवक्षायामपि नातिव्याप्तिः प्रतियोगितावच्छेदकसम्बन्धेन गुणादेर्विशिष्टसत्तानधिकरणत्वादिति चेन्न विशिष्टनिरूपितसम्बन्धस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्वत्र न सम्भवतीति प्रागुक्तत्वात् अगत्या विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्याप्ता उपलक्षिताभावप्रतियोगिता तु दण्डादिरूपावच्छेदकोपलक्षितविशेष्य एव पर्याप्तेत्युपगम्य तयोर्विशेष्योपपादनीयत्वात् विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावसद्भाव एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यत्वानुसरणं

नातिप्रसङ्ग इति हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिसामानाधिकरण्येपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहेण न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यर्थः व्याप्यवृत्तिसाध्यकेऽपि प्रतियोगिवैयधिकरण्यावगाहिपरामर्शस्यानुमितिहेतुतया उक्तसाध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसङ्गाप्रसक्तिः ।

ननु मूर्तत्वादिहेतौ भूतत्वादिविशिष्टमूर्तत्वत्वादिरूपतदुभयत्वावच्छिन्नस्यैव व्याप्तिर्न तु तदुभयवृत्तिबुद्धिविशेषविषयत्वरूपतदुभयत्वावच्छिन्नस्य तथा च विशिष्टसत्तातिरिक्ततामते विशिष्टसत्तादिसाध्यकजात्यादिहेताविव उक्तोभयसाध्यकमूर्तत्वादिहेतावपि यथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षे नातिव्याप्तिप्रसक्तिरित्याभिमानं न चेत्यादिना निराकरोति न चेति ।

सहजत एव प्रतियोगिपदस्य तत्त्वावच्छेदकविशिष्टपरतां विनैव उभयत्वम् उभयव्यवहारविषयतावच्छेदकं न विशिष्टत्वात् एकविशिष्टापरत्वात् अनतिरिक्तम् अभिन्नम् अतिरिक्तमित्यनुक्त्वा नानतिरिक्तमित्यभिधानम् । उभयपदार्थतावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभाय नञ्पदस्यानुयोगितावच्छेदकावच्छेदेनाभावबोधकत्वव्युत्पत्तेः तावता एकविशिष्टापरत्वमुभयनिष्ठव्यासज्यवृत्तिधर्मश्च उभयपदार्थतावच्छेदकमस्तु न तन्मात्रं वक्ष्यमाणानुपपत्तेः प्रकृते च उभयत्वमेकविशिष्टापरत्वमेवेति शङ्काव्युदासः । अत्र हेतुः वैशिष्ट्यविरहेपि घटत्वपटत्वयोरुभयत्वस्य प्रत्यक्षसिद्धत्वादिति घटत्वपटत्वयोः सामानाधिकरण्यविरहेपि तत्रोभयव्यवहारविषयतावच्छेदकस्य प्रत्यक्षसिद्धत्वादित्यर्थः अन्यथा तत्रोभयव्यवहारानुपपत्तेरिति भावः । यद्यपि घटत्वपटत्वोभयमितिप्रतीतौ कालिकसम्बन्धघटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासम्भवः तथापि वाच्यत्वघटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहेण उभयं समवेतमिति प्रतीतिव्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयतया अभ्युपगन्तव्यतया घटत्वपटत्वोभयं समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्ध्या व्यासज्यवृत्तिधर्म एव विषय इति भावः । तथा च तदनुरोधेन व्यासज्यवृत्तिधर्मविशेषस्य उभयव्यवहारविषयतायां आवश्यकत्वे एकविशिष्टापरत्वस्य तथाव्यवहारविषयत्वमप्रामाणिकमिति न भूतत्वमूर्तत्वोभय-

वान् मूर्तत्वादित्यादावेकविशिष्टापरत्वस्य साध्यतावच्छेदकत्व-प्रसक्तिस्तथा सत्यनुमितेरुभयवानित्याकारकत्वानुपपत्तेरिति निर्य्युदम । ननु मूर्तत्वाधिकरणे मनसि भूतत्वमूर्तत्वोभय नास्तीति बुद्धेरेकविशिष्टपराभावावलम्बनेनैवोपपत्ति मनसि प्रतियोगिसत्त्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्त्वादिति क्वचिदेकविशिष्ट-परत्वस्यापि उभयव्यवहारविषयतावच्छेदकत्वमावश्यकमित्यत आह मनेति। तदवच्छिन्नाभाव प्रत्येकाधिकरणवृत्तिरुभयव्यवहार-विषयतावच्छेदकावच्छिन्नाभाव तदवच्छिन्नाभावात् एकविशिष्ट-परत्वावच्छिन्नाभावात् नानतिरिक्त इति विपरिणतेन सम्बन्ध प्रतियोगितावच्छेदकविशिष्टेनैव प्रतियोगिना ऽभावस्य विरोधादेकस्याधिकरणेऽपि व्यासज्यवृत्तिधर्मावच्छिन्नाभावसत्त्वे बाधकाभावाद् इति भाव । एतेन मूर्तत्वस्य व्यासज्यवृत्त्युभयत्वावच्छिन्न व्यभिचारिताऽपि व्यवस्थापिता आवश्यकश्च एकाधिकरणे व्यासज्यवृत्तिधर्मावच्छिन्नतदभाव अन्यथा समवायघटितसामानाधिकरण्येन घटत्वादिविशिष्टपटत्वाद्यप्रसिद्ध्या घटादौ समवायेन घटत्वपटत्वोभयनास्तीतिप्रतीतेरनुपपत्तेस्तत्र समवायिसमवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैव विषयतायाः स्वीकरणीयत्वात् । अन्यथा एककालीनत्वादिरूपवैशिष्ट्यावच्छिन्नस्य घटत्वाद् समवायेन घटादौ सत्त्वेन तादृशप्रतीत्यनिर्वाहादित्याह वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वेनाभावस्य प्रत्यक्षसिद्धत्वादिति । ननु तथापि व्यासज्यवृत्तिनिरुक्तोभयत्वेन साध्यत्व न मूर्तत्वस्य व्यभिचारिता सम्भवति एकप्रतियोगिनत्यपि अभावस्य प्रतियोगिसमानाधिकरणतया मूर्तत्वाधिकरणे मनसि उभयाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् हेतुमति प्रतियोगिव्यधिकरणस्यैव साध्याभावस्य व्यभिचारत्वात् व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तस्यानिवेशादित्याशङ्कां निरस्यति न च तत्रेत्यादिना व्याप्तिरेव व्याप्तिरेव तथात्वपीति मूर्तत्वस्य मनसि सत्त्वेऽपीत्यर्थ । उभयत्वेनेति उभयत्वविशिष्टवत्तायाः मनस्यसत्त्वादित्यर्थ । तथा च तत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमतया तत्प्रयोजकहेतोर्न सद्धेतुत्वस्वीकारसम्भव अत एव व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तमेव निवेश्यमि-

ति भावः । एकाधिकरणे उभयत्वविशिष्टासत्त्वे मानमाह नात्रो- भयमितीति । अत्रोभयमिति प्रतीत्यभावो न हेतुतयोक्तः उभयत्वे- नैकस्य सत्त्वोपगमेपि उभयत्राधिकरणवृत्तितायास्तादृशप्रतीति- विषयतया एकस्मिन्नधिकरणवृत्तित्वाभावेन तादृशप्रतीतेर्भ्रमत्व- स्यावश्यकत्वात्तादृशप्रमाविरहोपपत्तेः ।

ननु प्रतियोग्यसामानाधिकरण्यस्याभावविशेषणत्वे लक्षणे ऽत्यन्तपदवैयर्थ्यं धूमाद्यधिकरणनिष्ठवह्न्यादिभेदस्य प्रतियोगिस- मानाधिकरणत्वेनैव साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छे- दकताया अकिञ्चित्करत्वात् इत्याशङ्कया साम्प्रदायिकोपदर्शि- तमत्यन्तपदप्रयोजनमाह अत्यन्तपदं चेति ।

(दी०) अत्यन्तपदं चात्यन्ताभावत्वनिरूपकप्रतियोग्यसा- मानाधिकरण्यस्यात्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभा- य अन्यथा सर्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तरभि- न्नत्वात्तद्भेदस्य च स्वस्वरूपानतिरिक्ततया प्रतियोग्यसामाना- धिकरण्यस्यैव दुर्लभत्वापत्तेः । सर्वेषामेवाभावानां हेतुसमाना- धिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणात्यन्ता- भावान्तरात्मकस्य स्वभेदस्य प्रतियोगित्वात् अभावसाध्यका- व्याप्तेश्चेति सम्प्रदायविदः ।

(गा०) अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्येति लाभायेत्यग्रिमेणान्वयः स्वं यस्य प्रतियोगिनो ऽत्यन्ताभावस्तादृ- शप्रतियोग्यसामानाधिकरण्यपर्यन्तस्याभावविशेषणत्वलाभायेत्यर्थः अत्यन्ताभावत्वनिरूपकप्रतियोगिताया इति प्रतियोगितानवच्छे- दकेत्यत्र या प्रतियोगिता निविष्टा तत्रात्यन्ताभावत्वरूपानुयो- गितानिरूपकत्वविशेषणस्य लाभायेत्यर्थः । क्रमेण व्यावृत्तिमाह अन्यथेति सर्वस्यैवाभावस्येति हेतुसमानाधिकरणाभावत्वे- नोपादेयस्य सर्वस्य गोत्वाद्यभावस्येत्यर्थः स्वसमानाधिकरणाभा- वान्तरभिन्नत्वात् स्वं यस्य समानाधिकरणं तादृशघटत्वाभा- वभेदवत्त्वादित्यर्थः । स्वरूपानतिरिक्तत्वात् गोत्वाद्यभावरूपाधि- करणस्वरूपत्वादभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकर-

णीभूताभावस्वरूपतेति सिद्धान्तादिति भावः । प्रतियोग्यसमानाधिकरणाभावस्य दुर्लभत्वापत्तेरिति । गोत्वाद्यभावानामत्यन्ताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेपि स्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वनियमादिति भावः । न च भावस्वरूपस्यैवाभावस्य तादृशत्वं सुलभमिति वाच्यं तस्यापि स्वसमानाधिकरणभेदभिन्नत्वेन तद्दोषतादवस्थ्यात् भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपत्वाङ्गीकारात् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशे सर्वत्र न तादृशाभावाप्रसिद्धिः किन्तु विशेषणताविशेषेण साध्यतास्थले तन्मतेऽभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिकत्वस्य निवेदयत्वात् साध्यतावच्छेदकसम्बन्धस्य तत्र निवेशेऽपि तत्रैव तदप्रसिद्धिर्द्रष्टव्या । अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेपि सर्वेषामेवाभावानां किञ्चिद्विशिष्टस्वाभावादिरूपात्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यनियमात् तदसमानाधिकरणाभावाप्रसिद्धेः । यादृशप्रतियोगितेत्यादिना वक्ष्यमाणरीतेरनुसरणे प्रतियोगिन्यत्यन्ताभावत्वनिरूपकत्वनिवेशवैयर्थ्यमत्रास्वरसबीजमेव । हेतुसमानाधिकरणेति । हेतुसमानाधिकरणस्य भेदत्वनिरूपकाभावान्तररूपप्रतियोगिसमानाधिकरणत्वेपि विवक्षितात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान् गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्य तन्निष्ठस्वभेदाकस्य तस्य प्रतियोगित्वादित्यर्थः । अभावसाध्यकेति घटत्वाभावादिसाध्यकपटत्वादिसाधनेत्यर्थः । अत्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशेपि सम्बन्धान्तरावच्छिन्नसाध्याभावप्रतियोगितावारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशावश्यके एतद्विशेषणमनर्थकं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यं निवेश्य सम्बन्धान्तरावच्छिन्नाभाववारणेपि सर्वधेवाभावेषु उक्तरीत्याऽत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्यापि सत्वेन प्रकृतप्रतियोगितावदसामानाधिकरण्यस्यैव निवेशनीयतया साध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्यस्य सर्द्धत्वाधिकरणद्वाचित्वविशिष्टाभावे ऽसत्त्वेनाव्याप्त्यप्रसक्तिरित्यस्वरसबीजम् ॥

सम्प्रदायानुमतात्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशपक्षे ऽतिव्याप्तिमाशङ्कते अथेत्यादिना।

(दी०) अथ यदा गोत्वं तदा गौरित्यत्रातिव्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात्। संसर्गाभावमात्रोक्तावपि यदा स्पन्दः तदा द्यणुकं यदादृष्टं तदा जन्यं ज्ञानं दुःखं वा यदा तस्यादृष्टं तदा तदीयं ज्ञानमित्यादावतिव्याप्तिः। द्यणुकत्वादेर्द्यणुकादिशून्यखण्डप्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्। न हि तयोः सामान्याभावत्ववादिमतेऽपि एकविशेषप्रागभावविशेषान्तरध्वंसवत्यपि समये तत्सामान्यावच्छिन्नध्वंसप्रागभावयोः सम्भव इति चेन्न प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वेऽविरोधात्। अन्यथात्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गात्। इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्येव कालेऽपि देशस्यावच्छेदकत्वात्। तच्छून्ये च काले तदभावस्य प्रतियोग्यसमानाधिकरणत्वात्।

(गा०) *यदा गोत्वमिति* कालिकसम्बन्धेन गोगोत्वयोर्हेतुसाध्यत्वलाभाय गोमानयं गोत्वादिति प्रतिज्ञाहेतू अनभिधाय कालिकसम्बन्धावच्छिन्नवृत्तिबोधकदाप्रत्ययघटितोदाहरणाभिधानमेवमग्रेपि। *प्रलयस्येति* व्यभिचारनिरूपकहेत्वधिकरणस्येत्यादिः ध्वंसवत्त्वेनात्यन्ताभावानधिकरणत्वादिति प्राचामनुमतं ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वमादृत्य एतदेवाग्रे निराकृत्य समाधेयम्। अथ कालिकसम्बन्धेन ध्वंसादिमत्यपि काले ऽत्यन्ताभाववृत्तावविरोधः महाकालादौ समवायादिसम्बन्धेन रूपात्यन्ताभावस्य सर्वानुमतत्वात् न च कालिकसम्बन्धावच्छिन्नगवात्यन्ताभावस्य तत्सम्बन्धावच्छिन्नगोध्वंसात्यन्ताभावरूपताया अत्यन्ताभावस्य त्रितयप्रतियोगिकत्वमङ्गीकुर्वाणैः प्रा-

चानेरुपगमात् कालिकसम्बन्धरूपप्रतियोगितावच्छेदकसम्बन्धेन
गोध्वंसवति तत्सम्बन्धावच्छिन्नगवाभाववृत्तिर्न तेषामनुमतेति
वाच्यम्। एवमपि कालिकसम्बन्धेन प्रतियोगिमत्यपि तेन सम्ब-
न्धेनात्यन्ताभावस्य कालिकसम्बन्धेन वृत्त्यविरोधात् तेन
सम्बन्धेन प्रलये वर्तमानमत्यन्ताभावमादायातिव्याप्तिवारणसम्भ-
वात् अभावस्य सम्बन्धविशेषनिवेशे प्रयोजनाभावात् न च
प्रतियोग्यसामानाधिकरण्येनाघटितापि व्याप्तिरनुमित्यौपयिकी
तद्विशेषणानुपस्थितिदशायामप्यनुमितेरानुभाविकतया वक्ष्यमा-
णत्वात्। तत्र चाभावस्य सम्बन्धविशेषोऽवश्यं प्रवेश्यः अ-
न्यथा हेतुमति कालिकादिसम्बन्धेन वर्तमानं साध्याभावमादा-
याव्याप्तेरिति तादृशव्याप्तेरेवोक्तस्थले प्रमात्वप्रसङ्गपरोऽयं ग्रन्थ
इति वाच्यं यत्र हेतुमति साध्याभावः कालिकसम्बन्धेन वर्तते तत्र
प्रतियोग्यसामानाधिकरण्यघटितव्याप्त्यैव सद्धेतुतानिर्वाहात् प्रति-
योग्यसामानाधिकरण्यागर्भव्याप्तिग्रहस्य तत्र भ्रमत्वोपगमे क्षतिवि-
रहात्तादृशव्याप्तावप्यभावस्य सम्बन्धविशेषाप्रवेशात्। नैव प्रतियो-
ग्यसामानाधिकरण्यानुपस्थितिदशायां सत्तावान् द्रव्यत्वादित्या-
दावप्यभ्रान्तस्यानुमितिरनुभवसिद्धा तदनुरोधेन भावसाध्यके दै-
शिकविशेषणताविशेषेण हेतुमद्वृत्तित्वगर्भाया अपि व्याप्तेरनुमि-
तिप्रयोजकता वाच्या तथा सति तादृशव्याप्तिभ्रममादायोक्त-
स्थले ऽनुमितिप्रसङ्गपरतया एतद्ग्रन्थस्य सामञ्जस्यात् न च
प्रतियोग्यसामानाधिकरण्यघटितव्याप्त्यभावस्य सम्बन्धविशेषा-
निवेशादभावीयसम्बन्धविशेषागर्भप्रतियोग्यसामानाधिकरण्यगर्भ-
व्यभिचारग्रहविरोधित्वेनैव प्रतियोग्यसामानाधिकरण्यगर्भतदग-
र्भव्याप्त्योः अनुगमश्च तयोरेवानुमित्यौपयिकतया एतद्व्यतया
ऽभावीयसम्बन्धविशेषघटितव्याप्तिग्रहस्य तादृशव्यभिचारग्रहा-
प्रतिबन्धकतया तादृशव्याप्तेर्नानुमित्युपयोगितानिर्वाह इति
वाच्यं तादृशव्याप्तिग्रहीयाभावीयसम्बन्धविशेषघटितप्रति-
योग्यसामानाधिकरण्यघटितव्यभिचारग्रहविरोधित्वेन व्याप्ति-
मात्रमनुगमनीयत्वात् तादृशाभावीयसम्बन्धविशेषाघटितप्रति-
योग्यसामानाधिकरण्याघटितव्याप्ते रुपदर्शनसम्भवात् एव न
स्वपक्षे तत्राभावीयसम्बन्धघटितप्रतियोग्यसामानाधिकरण्यघटि-

तव्याप्तिज्ञानादपि अनुमितिः स्यादितिचेत् । इष्टमेवैतत् एवं सति प्रतियोग्यसामानाधिकरण्यघर्माभावीयसम्बन्धविशेषघटितव्याप्तिप्रमातोऽप्युक्तस्थले ऽनुमितिप्रसङ्गो दुर्वार इति चेत् काक्षतिरस्माकम् । वस्तुतस्तु दीधितिकृता स्वयं निष्कर्षणीयहेतुमति प्रतियोग्यनधिकरणत्वनिवेशकल्पे प्रतियोगिव्यधिकरणत्वघटितव्याप्तावभावीयसम्बन्धविशेषनिवेशस्य निष्प्रयोजनत्वेपि प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य हेतुमद्वृत्तित्वागर्भयथाश्रुतव्याप्तौ तदीयसम्बन्धविशेषनिवेशनमावश्यकम् । अन्यथा संयोगी द्रव्यत्वादित्यादौ प्रतियोग्यनधिकरणगुणादिवृत्तित्वविशिष्टस्यापि संयोगाद्यभावस्य कालिकसम्बन्धेन हेत्वधिकरणकालवृत्तितया अव्याप्तिप्रसङ्गात् एकसम्बन्धेन एकाधिकरणवृत्तित्वविशिष्टस्यान्यसम्बन्धेनाधिकरणान्तरवृत्तित्वात् प्रतियोगिसामानाधिकरण्याभावनिवेशकल्पेपि गुणादौ तद्विशिष्टस्य संयोगाद्यभावस्य कालिकसम्बन्धेन कालवृत्तित्वात् तत्कल्पेप्यव्याप्तेरावश्यकत्वात् न च प्रतियोगिसामानाधिकरण्यविशिष्टस्य तस्य कालवृत्तित्वे प्रतियोगिसामानाधिकरण्याभावविशिष्टस्य न तद्वृत्तित्वसम्भवः भावाभावविशिष्टस्य एकाधिकरणवृत्तित्वे प्रतियोगिसामानाधिकरण्याभावविशिष्टसंयोगाद्यभावस्यैव दैशिकविशेषणतयापि द्रव्यवृत्तित्वप्रसङ्गादिति वाच्यं विरोधिनोर्भावाभावयोः कालिकसम्बन्धेनैकाधिकरणवृत्तितावत् भावाभावविशिष्टस्यापि कालिकसम्बन्धेन एकत्र वृत्तौ विरोधाभावात् । यद्यपि अभावस्य दैशिकविशेषणतासम्बन्धनिवेशे ऽभावसाध्यके व्यभिचारिणि भावस्य दैशिकविशेषणतानभ्युपगमे ऽतिव्याप्त्या साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धनिवेशे समवायसम्बन्धावच्छिन्नजात्यभावसाध्यके जातित्वादिहेतावव्याप्तिर्जात्यादिरूपहेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः तथापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धातिरिक्तसम्बन्धेन या साध्याभावस्य वृत्तिस्तदन्यहेतुमद्वृत्तेः प्रकृतप्रतियोगितानिरूपितानुयोगितावच्छेदकसम्बन्धेन हेतुमति वृत्तेर्वा ऽभावविशेषणत्वोपगमाद्य दोषः उक्तस्थले हेतुमति काले कालविशेषवृत्तित्वविशिष्टानित्यस्यात्यन्ताभावस्य प्रसिद्ध्यातिव्याप्तिसङ्गतिः । अत्यन्ताभावत्वघटकानित्यत्वांशो परित्यज्य ध्वंससाधारणसंस-

गोंभाववत्त्वनिवेशो महाप्रलये गोत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसोपगन्तृमते ध्वंसमादायोक्तस्थलातिव्याप्तिः शक्यते वारयितुमित्याशङ्क्याह संसर्गाभावेति। दैशिकविशेषणतयापि ध्वंसस्य कालवृत्तित्वमित्याशयेनोक्तशङ्कासङ्गतिः अन्यथा ऽभावस्य तादृशसम्बन्धेन वृत्तिनिवेशे ऽत्यन्ताभावमिव ध्वंसमादायातिव्याप्तेर्दुर्वारत्वात् न च प्रतियोग्यधिकरणमहाकाले गोध्वंसस्य दैशिकविशेषणतासत्त्वेऽपि प्रतियोग्यनधिकरणप्रलये तस्य तादृशसम्बन्धो ऽप्रामाणिक इति वाच्यं यदुपाधिविशिष्टस्य प्रतियोग्यधिकरणत्वं तदन्योपाधिविशिष्टस्यैव महाकालस्य तदभावाधिकरणतया महाकालस्य दैशिकविशेषणतया ध्वंसवत्त्वे प्रलयात्मकोपाधेरपि तादृशसम्बन्धेन तदाधारताया आवश्यकत्वात् अन्यथा प्रलये गौर्नास्तीति व्यवहारानुपपत्तेः। अथवा निष्कर्षणीयप्रतियोगिवैयधिकरण्यकल्पाभिप्रायेणेदं तत्कल्पे प्रयोजनाभावादभावे वृत्तिविशेषानिवेशात्। न चाभावे वृत्तिविशेषानिवेशे कालिकसम्बन्धेन गवात्यन्ताभावस्यापि प्रलयवृत्तेः संसर्गाभावमात्रपरत्वोक्तिविरोध इति वाच्यं प्रतियोगितावच्छेदककालिकसम्बन्धेन तत्प्रतियोगिनो ध्वंसस्य हेत्वधिकरणे ऽसत्त्वात् गवात्यन्ताभावस्य प्रतियोगिव्यधिकरणत्वाभावात् ध्वंसस्य तत्प्रतियोगिनो ऽत्यन्ताभावस्य प्रतियोगितावच्छेदकदैशिकविशेषणतासम्बन्धेन काले ऽसत्त्वात् प्रतियोगिवैयधिकरण्यमक्षतमेव। यथा स्पन्द इति। अत्र च व्यभिचारनिरूपकाधिकरणं खण्डप्रलयो ऽन्यद्रव्यानधिकरणे तस्मिन् द्व्यणुकासत्त्वात् पुनर्द्व्यणुकोत्पत्त्यनुरोधेन परमाणूनां स्पन्दस्यावश्यकत्वात् तथा च हेत्वधिकरणे तत्र द्व्यणुकसामान्यध्वंसप्रागभावयोरसत्त्वादतिव्याप्तिरिति भावः। द्व्यणुकनाशानुगुणक्रियाया उत्तरसंयोगनाश्याया अधिकरणे परमाणुसंयोगनाशरूपमहाप्रलयपूर्ववर्तिक्षणे द्व्यणुकसामान्यध्वंससत्त्वादत्राव्याप्तिरित्यभिमतं विचारसहत्वं पदार्थमिति। ज्ञानत्वमात्रेण साध्यतायां प्रलये ईश्वरीयज्ञानसत्त्वादयं सद्धेतुरेवेत्यतो जन्यमिति। नित्यसुखाभिव्यक्तिर्मुक्तिरिति मते खण्डप्रलयेऽपि मुक्तात्मनि जन्यज्ञानसत्त्वात् सद्धेतुत्वं स्यादत आह दुःखेति। जन्यमात्र प्रत्यक्षस्य हेतुतया महाप्रलयापवादितयाऽऽह

न्नेऽपि तज्जनकीभूतादृष्टस्याऽऽवश्यकत्वमिति तदा जन्यज्ञानत्व-सुखदुःखत्वाद्यवच्छिन्नध्वंससत्त्वान्नोपदर्शितस्थलयोरतिव्याप्तिः स-म्भवतीत्यतः स्थलान्तरमाह यदा तस्येति । यदात्मसमवेतादृष्टं न प्रलयजनकं स तत्पदेन विवक्षितः । व्यभिचारश्चाऽत्र खण्डप्रलये सुषु-प्त्यादौ च बोध्यः । खण्डप्रलयनिष्ठद्व्यणुकादिध्वंसस्य द्व्यणुकत्वादिरू-पसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वासम्भवं व्युत्पादयति नहीति । तयोः ध्वंसप्रागभावयोः । सामान्याभावत्वमतेपि सामान्यधर्मा-वच्छिन्नप्रतियोगिताकत्वमतेपि ध्वंसप्रागभावयोरत्यन्ताभावाविरो-धित्वमते न तयोस्तथात्वमित्येतत्सूचयितुं मतेपीति । एकविशेषेति । एकविशेषप्रागभाववति न सामान्यावच्छिन्नध्वंसस्य विशेषान्तर-ध्वंसवति न सामान्यधर्मावच्छिन्नप्रागभावस्य संभव इत्यर्थः अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकतया तत्कालीनध्वंसादि-प्रतियोगिताशून्यानागतादिपदार्थसाधारणस्य तादृशप्रतियो-गितावच्छेदकत्वासंभवादिति भावः । यद्यप्येवं महाप्रलयवृत्त-योपि गोध्वंसाः प्रत्येकमेकैकगोव्यक्तिमात्रवृत्तिप्रतियोगिता-का इति न कस्यापि ध्वंसस्य प्रतियोगितायाः समनियतं गोत्वं तथापि चरमध्वंसस्य यावद्गोप्रतियोगिकत्वोपगमे त-त्प्रतियोगितावच्छेदकत्वं गोत्वस्य संभवतीत्यभिप्रायेण संस-र्गाभावत्वनिवेशे पूर्वोक्तस्थलमुपेक्ष्य द्व्यणुकादिसाध्यकस्पन्दादि-हेतुकस्थले ऽतिव्याप्तिरभिहिता । वस्तुतस्तु ध्वंसप्रागभा-वयोर्व्यधिकरणप्रतियोगिकत्वविरहाच्चरमगोध्वंसस्यापि यावद्गो-प्रतियोगिकत्वं न संभवतीति ध्येयम् । विरोधिनः प्रतियोगि-नो ऽधिकरणे काले एव चेदभावो वर्तते तदा सुतरां ध्वं-सप्रागभाववति काले प्रलयादावसौ वर्तेत इति सूचनाय प्रतियोगिमत इवेति दृष्टान्तः । विरोधाभावात् बाधकाभावात् तथा च हेत्वधिकरणे प्रलयादौ गोत्वाद्यवच्छिन्नाभावसत्त्वाक्त-स्थले ऽतिव्याप्तिरिति भावः । न च प्रलये गोत्वाद्यवच्छिन्नाभा-वो ऽप्रामाणिकः प्रत्यक्षायोगादनुमानस्याऽप्रयोजकत्वादिति वा-च्यं प्रलये गौर्नास्तीति शब्दस्यैव प्रमाणत्वात् न हि तादृ-शवाक्यस्याप्रामाण्यं कश्चिदुपैति न च ध्वंसादिरेव तत्र न-ञर्थो नात्यन्ताभाव इति वाच्यम् अन्वयितावच्छेदकसमानाधिकर-

णप्रतियोगिताकाभावमात्रस्य नञा प्रतिपादने ऽतिप्रसङ्गात्तदवच्छि-न्नप्रतियोगिताकाभावबोधकतया एव तस्य व्युत्पन्नतया ऽत्यन्ताभा-वमात्रस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमते ध्वंसादेर्नञा प्रतिपादनासम्भवात् । अन्यथा–प्रतियोगिमति तद्ध्वंसप्रागभाववति च काले कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्यात्यंताभावस्या-वृत्तौ अत्यन्ताभावस्य तादृशात्यन्ताभावस्य । कालमात्रावृत्तित्वेति दैशिकविशेषणतयेत्यादिः । ननु ध्वंसप्रागभाववति अत्यन्ताभाव-वृत्तौ तस्य तदविरोधितावत् प्रतियोगिमति तद्वृत्त्या तस्य प्रतियो-ग्यविरोधिताप्यापत्त्याविशेषादित्यत आह इयांस्त्वति । एकस्य प्रतियोगिमतः कालस्य । देशभेदावच्छिन्नम् प्रतियोग्यनवच्छेदक-देशावच्छिन्नम्। तथात्वम् दैशिकविशेषणतासम्बन्धेन कालिकसम्ब-न्धावच्छिन्नात्यन्ताभाववत्त्वं तथा च प्रतियोग्यभावयोरेकावच्छेदेन एकत्रावर्तमानत्वरूपविरोधित्वं तावताप्यक्षतमेवेति भावः । अपर-स्य ध्वंसादिमतः । स्वरूपावच्छिन्नम् ध्वंसाद्यधिकरणतावच्छेदक रूपावच्छिन्नम् तथात्वमित्यनुषज्यते । तथा च एकावच्छेदेन एकत्र वर्तमानतया ध्वंसाद्यविरोधित्वमत्यन्ताभावस्येति भावः । ननु काले वृत्तौ देशस्यावच्छेदकत्वे किं मानमत आह देशो कालस्ये-वेति यथा देशे दैशिकसम्बन्धावच्छिन्नाभावस्य वृत्तौ कालस्याव-च्छेदकत्वमिदानीमत्र गौर्नास्तीत्यादिप्रतीतिबलात् तथा कालिकस-म्बन्धावच्छिन्नाभावस्य वृत्तावपि देशविशेषस्यावच्छेदकत्व तथा-विधप्रतीतिबलादेव तादृशप्रतीतेः कालावच्छेदेन देशवृत्तिर्देशाव-च्छेदेन कालवृत्तिर्वा विषय इत्यत्र विनिगमकाभावात् अवच्छेदक-त्वाधिकरणत्वयोरेव सप्तम्यर्थत्वादिति भावः । प्रतियोगिमत्यपि काले गवात्यन्ताभावस्य वृत्तौ तस्यासमानाधिकरणान्तेन वार-णात् कथ तमादायोक्तातिव्याप्तिर्धयेत इत्यत आह तच्छून्येति । प्रतियोगिशून्ये प्रलयादावित्यर्थः तदभावस्य—गवात्यन्ताभावस्य । प्रतियोगिव्यधिकरणत्वात् प्रतियोगिसामानाधिकरण्याभाववत्त्वात् । सामानाधिकरण्यस्याव्याप्यवृत्तितामत एव प्रतियोगिसामानाधिक रण्याभावस्याऽभावविशेषणत्वात् अन्यथा संयोगी सत्त्वादित्यादाव-तिव्याप्तिः तस्य व्याप्यवृत्तितापक्षे च प्रतियोग्यनधिकरणवृत्तित्वस्यै-व निवेशनीयतया प्रलयादिवृत्तिगवात्यन्ताभावस्यान्यत्र प्रतियोगि-

समानाधिकरणत्वेपि लक्षणघटकत्वाऽव्याघातादिति भावः ।

संसर्गाभावत्वतद्घटितात्यन्ताभावत्वयोर्व्याप्तिघटितत्वेनानवस्थामाशङ्क्ते न चेति ।

(दी०) न च संसर्गाभावविशेषोऽत्यन्ताभावः । संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं जन्यताघटकनियमघटितामिति वाच्यम् । तद्वदन्यावृत्तित्वरूपानियमस्य तत्र घटकत्वात् । एवं नियमान्तरस्यात्र प्रवेशेऽपि न क्षतिः वक्ष्यते च नियमाघटितमपि संसर्गाभावादिलक्षणमनुपदमेव च विवेचयिष्यते संसर्गाभावत्वप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च ।

(गा०) संसर्गाभावविशेषः सदातनसंसर्गाभावः । संसर्गारोपः तादात्म्यातिरिक्तसम्बन्धेन प्रतियोग्यारोपः । तद्वदन्यावृत्तित्वेति । स्वाव्यवहितपूर्वक्षणावच्छेदेन तद्वतोऽन्यस्मिन् वर्तते यत्तदन्यत्वेत्यर्थः । तत्र जन्यत्वे । षष्ठ्यर्थे सप्तमी । नियमान्तरस्य विशिष्टधीव्यावृत्तविशिष्टधीनियामकत्वरूपसम्बन्धत्वघटकनियमस्य । अत्र संसर्गाभावत्वशरीरे । न क्षतिरिति । तद्वदन्यावृत्तित्वरूपानियमस्यैव तत्र प्रवेशनीयत्वादितिभावः । स्वमते नियमानन्तर्भावस्यानुपदं वक्ष्यमाणत्वादाहुरित्युक्तम् । नियमाघटितमिति । आरोपस्याभावबुद्धिहेतुताया निर्युक्तिकत्वात्तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वस्यैव संसर्गाभावत्वरूपत्वादितिभावः । प्रयोजनविरह इति । साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य निवेशनीयतया ऽन्योन्याभावत्वादिनिरूपकप्रतियोगितामादाय दोषाप्रसक्तेरितिभावः । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यानिवेशकल्पमभिप्रेत्याह अव्याप्तिश्चेति । तन्मते सम्बन्धान्तरावच्छिन्नसाध्याभावमादाय दोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया एव निवेशनीयतया तादात्म्यसम्बन्धेन यत्र साध्यता तत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नसंसर्गाभावप्रतियोगित्वाप्रसिद्ध्या ऽव्याप्तिरप्यापद्यत इत्यर्थः ।

(दी०) अथ ज्ञानवान् द्रव्यत्वात् विशेषगुणवान् मनोन्यद्रव्यत्वात् जातिमान् भावत्वादित्यादावतिव्याप्तिः साध्यशून्यानामपि हेतुमता विषयत्वविशेषणत्वैकार्थसमवायैः साध्यवत्त्वादिति चेत्। मैवम्। प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं तत्सम्बन्धि वा तद्वृत्तित्वाभावस्योक्तत्वात्। भवति चैवमन्योन्याभावोपि प्रतियोग्यसमानाधिकरणः। तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रह। तद्वृत्तिभिन्नत्वं तु नार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसङ्गात्।

(गा०) ननु विषयतया वृत्त्यनियामकत्वे प्रतियोगिवैयधिकरण्येव सम्बन्धित्वानिवेशपक्षे नातिव्याप्तिरित्यत आह विशेषेति। दिगुपाधीना देशे वृत्त्यवच्छेदकत्वमेव न त्वधिकरणत्वमिति मते मनसो मूर्त्तत्वेपि न दैशिकविशेषणतया ऽधिकरणत्वमिति द्रव्यत्वमात्रस्य हेतुत्वे मनोरूपहेत्वधिकरण एव साध्याभाव. प्रतियोगिन्यधिकरण इति नातिव्याप्तिसम्भव इत्यतो मनोन्येति। दिक्कालौ नेश्वरादतिरिच्येते इति मते सद्धेतुरेवेत्यत स्थलान्तरमाह जातीति। साध्यशून्यानामपीति। साध्यतावच्छेदकसम्बन्धेनेत्यादि। एव-अधिकरणत्वस्थाने सम्बन्धित्वनिवेशे। अन्योन्याभावोपीति। तथा च न तादात्म्यसम्बन्धेन साध्यतायामव्याप्तिरिति भाव। तद्विशिष्टस्य प्रतियोग्यसामानाधिकरण्यावच्छिन्नस्य। तेनेति। कपिसंयोगवान् एतद्वृक्षत्वादित्यादौ कपिसंयोगाभावरूपसाध्याभावस्य गुणादौ प्रतियोगिसामानाधिकरण्याभाववत्त्वेपि हेत्वधिकरणीभूतवृक्षादेर्न कपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभाववत्त्व यत्र सामानाधिकरण्यविशिष्टत्वं तत्र तदभावविशिष्टाधिकरणत्वाप्रत्ययात् अत साध्याभावो न लक्षणघटक इति नाव्याप्तिरिति भाव। हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावनिवेशेनाव्याप्तिवारणस्य सुकरत्वेपि मूलोपात्तहेतुसामानाधिकरण्याद्यनिवेशवैयर्थ्यभिया न

तथा विवक्षितम् । सार्वभौमेनाद्दतं प्रतियोग्यसामानाधिकरण्यघटकीभूताधिकरणावच्छिन्नहेतुसामानाधिकरण्यस्याऽभावविशेषणत्वमुपेक्ष्य उपाध्यायमते प्रतियोग्यसमानाधिकरणत्वरूपविशेषणवैशिष्ट्यावच्छेदेन हेतुसामानाधिकरण्यरूपविशेषणवैशिष्ट्यनिवेशन एव लाघवमित्यालोच्य तदनुयायिना दीधितिकारेण प्रतियोग्यसामानाधिकरण्यावच्छिन्नहेतुसामानाधिकरण्यं निवेशितं यथाश्रुतमूललभ्यो ऽयमेवार्थः प्रतियोग्यसामानाधिकरण्यहेतुसामानाधिकरण्ययोरुद्देश्यतावच्छेदकविधेयभावस्य विवक्षितत्वादुद्देश्यतावच्छेदकविधेययोरवच्छेद्यावच्छेदकभावलाभस्य च व्युत्पत्तिसिद्धत्वात् । प्रतियोग्यसामानाधिकरण्यस्य हेतुसामानाधिकरण्यावच्छेदकत्वे प्रतियोग्यसामानाधिकरण्यरूपहेतुतावच्छेदकावच्छिन्नसंयोगाभावादेः सत्त्वादिव्याप्यत्वप्रसंगः सत्त्वादिसामानाधिकरण्यावच्छेदकरूपवत्त्वस्य सत्त्वादिव्याप्तित्वादिति सार्वभौमोक्तदूषणमेतन्मते निरवकाश ताद्दशव्याप्तावपि पारिभाषिकस्यैवावच्छेदकत्वस्य विवक्षितत्वात् अन्यथा विषयितासम्बन्धेन घटत्वावच्छिन्नस्य ज्ञानत्वादिव्याप्यताया दुर्वारत्वात् ताद्दशसम्बन्धेन ज्ञानत्वादिसामानाधिकरण्ये ज्ञानविषयतारूपे घटत्वादेरवच्छेदकत्वात् । नन्वव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय प्रतियोगिसमानाधिकरणभिन्नत्वरूपप्रतियोग्यसमानाधिकरणत्वमेव निवेश्यतां किमुक्तविवक्षया गुणादौ प्रतियोगिसामानाधिकरण्याभाववतोऽपि कपिसंयोगाभावादेः प्रतियोगिसमानाधिकरणभिन्नत्वविरहात् भेदस्याव्याप्यवृत्तित्वानुपगमादित्यत आह तद्वद्वृत्तीति । प्रतियोगिमद्वृत्तीत्यर्थः नार्थः न प्रतियोग्यसमानाधिकरणपदेन विवक्षितः । अव्याप्यवृत्तीति । कपिसंयोगी सत्त्वादित्यादावित्यर्थः । अतिप्रसङ्गादिति । कपिसंयोगाभावरूपसाध्याभावस्य द्रव्यादौ प्रतियोगिसमानाधिकरणतया तद्भिन्नत्वविरहेण लक्षणाघटकत्वादिति भावः । अत्र च सामानाधिकरण्यस्याव्याप्यवृत्तितायाः प्राक् स्वयं दूषितत्वात्प्रतियोगिसामानाधिकरण्याभावनिवेशपक्षेप्यौतव्याप्तिवारणमशक्यमित्येताद्दशानुपपत्तिमेव यद्वेत्यादिकल्पान्तरानुसरणबीजतया व्याचष्टे अत्र चेति ।

(दी०) अत्र च सामानाधिकरण्यवतो न तदभाववत्त्वं

प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादिविशेषणं वक्ष्यति तच्च हेत्वधिकरणे योऽयं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेति पुनरभावान्तार्थनिष्कर्षः।

(गा०) असामानाधिकरण्यनिवेशकल्पे चेत्यर्थः। इत्यस्वरसादित्यनेनान्वयः। प्रतीते संयोगाभावे गुणे न संयोगसामानाधिकरण्यमित्यादिप्रतीते। अन्यथा गुणादिनिष्ठसामानाधिकरण्याव-च्छेदकत्वाद्यभावविषयकतया। कपिसंयोगी एतत्त्वादित्यादावपि कपिसंयोगाभावादिरूपसाध्याभावस्य प्रतियोगिवैयधिकरण्यावच्छे-दकगुणादिवृत्तित्वाद्यवच्छेद्यतया लक्षणघटकत्वैवेत्यव्याप्तिरत आह तच्चेति। प्रतियोगिवैयधिकरण्य चेत्यर्थः। हेत्वधिकरण हेत्वधिकरणनिरूपित एतत्कल्प च पृथक् हेतुसामानाधिकरण्य न निवेश्य-मेवेति भाव। एव च हेत्वधिकरणनिरूपितप्रतियोग्यनधिकरण वृत्तित्वमेवाभावे विशेषण देय न तु तदवच्छेदकावच्छिन्नत्वमन तिप्रयोजनकत्वात् वृत्तौ प्रतियोग्यनधिकरणनिरूपितत्वहेत्वधि करणनिरूपितत्वयोर्निवेशापेक्षया तत्र हेत्वधिकरणनिरूपितत्वस्य निवेशे च लाघवमित्यालोच्य तथैव निष्कर्षयति प्रतियोग्य नधिकरणीभूतेति। प्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः तेन न दर्शितातिव्याप्तिः।

(दी०) ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्य चित्सामान्यस्य वा प्रतियोगितावच्छेदकरूपवत्किञ्चिदवच्छिन्नस्य वा अनधिकरणत्वमुक्तम् आद्ये ऽव्याप्यवृत्तिसाध्यकाऽव्याप्तिः एकप्रतियोग्यधिकरणस्यापि तत्प्रत्यन्तरानधिकरणत्वात् द्वि-तीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान् वा सत्त्वादि-त्यादावतिव्याप्तिः साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोग-विशेषाभाववत्त्वात् नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकत-त्प्रतियोगिनोऽधिकरणत्वाच्च स्वाभावाभावात्मकस्य विशिष्ट

स्याऽपि द्रव्यत्वस्य द्रव्यत्वाऽनतिरेकात् तृतीये कपिसंयोगाभा-
ववानात्मत्वादित्यत्राऽव्याप्तिः साध्याभाववानां कपिसंयोगानां
गुणानामधिकरणस्यात्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्या-
भावत्वावच्छिन्नाऽनधिकरणत्वात् । मैवम् । यादृशप्रतियोगि-
तावच्छेदकावच्छिन्नाऽनधिकरणत्वं हेतुमतस्तादृशप्रतियोगिता-
ऽनवच्छेदकत्वस्य विवक्षितत्वात् ।

(गा०) यस्य कस्यचिदित्यादिषष्ठ्यन्तानामनधिकरणत्वमित्यनेना-
न्वयः प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरण-
त्वम् स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रतियोगिकभेदमा-
त्रम् तत्सामान्यस्यानधिकरणत्वम् स्वप्रतियोगितावच्छेदकावच्छि-
न्नाधिकरणत्वावच्छिन्नभेदः । प्रतियोगितावच्छेदकयत्किञ्चिदिति ।
प्रतियोगितावच्छेदकं तत्तद्व्यक्तित्वेन निवेश्य तदवच्छिन्नाधिकरण-
त्वावच्छिन्नभेदो वा विवक्षित इत्यर्थः । नव्यमते संयोगसामान्या-
भावस्य केवलान्वयितया तत्र साध्ये सत्त्वादिः सद्धेतुरेवेत्यतो
द्रव्यत्वाभाववान् वेति । तत्प्रतियोगीति संयोगरूपसाध्याभावप्रति-
योगीत्यर्थः तत्तत्संयोगत्वावच्छिन्नाभावाभावस्य तत्तत्संयोगा-
देः संयोगसामान्यानतिरिक्तत्वादिति भावः । द्रव्यत्वरूपाभावस्य
एकव्यक्तिकतया व्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्यं
न घटत इत्यतस्तस्य किञ्चिद्विशिष्टस्याभावरूपप्रतियोगिसा-
मानाधिकरण्यमाह नित्यत्वादीति । आदिना जन्यत्वादिपरिग्रहः ।
ननु विशिष्टाभावो विशिष्टस्यैव द्रव्यत्वस्य प्रतियोगी न तु शुद्ध-
स्य तस्येति कथं शुद्धद्रव्यत्वस्य प्रतियोगिवैयधिकरण्यानुप-
पत्तिरित्यत आह स्वाभावेति । न च सर्वस्यैवाऽभावस्य पूर्व-
क्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणतया प्र-
तियोगिव्यधिकरणाभावाप्रसिद्ध्या व्याप्तिरिति वाच्यम् ।
प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशप-
क्षेऽसम्भवस्य साध्यतावच्छेदकसम्बन्धेन तद्वैयधिकरण्य-
निवेशपक्षे स्वरूपसम्बन्धावच्छिन्नसाध्यकस्थले साध्यतावच्छेदक-
सम्बन्धेन सर्वेषामेवाऽभावानां प्रतियोगिसमानाधिकरणतयाऽव्या-

तिप्रसक्त्या यत्सम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तत्सम्बन्धावच्छिन्नतदभावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभाव एव विवक्षणीयः एवं चोक्तस्थले स्वरूपसम्बन्धेन प्रतियोग्यनधिकरणत्वाप्रसिद्धावपि संयोगादिसम्बन्धेन घटाद्यभावीयप्रतियोग्यनधिकरणीभूतहेतुमन्निष्ठघटाभावीयप्रतियोगितासु स्वरूपसम्बन्धावच्छिन्नत्वद्रव्यत्वाभावत्वावच्छिन्नत्वोभयाभावस्याक्षतत्वादतिव्याप्तिरित्यभिप्रायात् । आत्मनि संयोगसामान्याभावस्य सर्वमतसिद्धत्वविरहादाहकपीति । जन्यद्रव्यवृत्ति हेतुके हेत्वधिकरणजन्यद्रव्ये गुणसामान्याभावस्यापि उत्पत्तिकालावच्छेदेन स्वमते सत्त्वात्तत्र तादृशप्रतियोगिवैयधिकरण्य न घटते अत आत्मत्वहेत्वनुसरणम् । गुणसामान्याभावत्वस्य कपिसंयोगस्वरूपाभावप्रतियोगितावच्छेदकत्वं स्फुटीकर्तुं कपिसंयोगानां गुणत्वकीर्तनम् । तत्प्रतियोगितावच्छेदकेति । तथा च तादृशाभावा अपि यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणा एव तत्प्रतियोगितावच्छेदकत्वात् कपिसंयोगाभावत्वस्येत्यव्याप्तिरिति भावः । यादृशेति । यत्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदवत्त्वमित्यर्थः । कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणसामान्यभेदवत्त्वासम्भवात् स्वपदेन तादृशी प्रतियोगितोपादातुं न शक्यत इति नाव्याप्तिः । द्रव्यत्वाभाववान् सत्त्वादित्यादौ हेतुमतो द्रव्यादेः विशिष्टद्रव्यत्वाद्यभावरूपप्रतियोग्यधिकरणत्वेपि द्रव्यत्वाभावत्वावच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नानधिकरणत्वात् तस्य लक्षण घटकत्वेति नातिव्याप्तिः । कपिसंयोगाभाववानात्मत्वादित्यादौ च कपि संयोगाभावत्वावच्छिन्ना या प्रतियोगिता तदवच्छेदकावच्छिन्नाधिकरणमेव हेतुमत् किन्तु गुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमेव तदनवच्छेदकमेव साध्यतावच्छेदकमिति नाव्याप्तिरिति भावः । न चैवं घटत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं धूमवत्तादृशप्रतियोगितानवच्छेदकं च वह्नित्वमित्याकारकस्याभावकूटावगाहिनः समूहालम्बनज्ञानस्यैवानुमितिहेतुतया विशिष्टपरामर्शस्यानुमितिहेतुत्वमनुपपन्नमापक

टघटिततया व्याप्तेर्दुर्ज्ञेयत्वापत्तिश्चेति वाच्यम् । हेतुमन्निष्ठभेदप्रतियोगितायां स्वावच्छेदकावच्छिन्नवत्त्वसम्बन्धेनाऽवच्छेदिका या प्रतियोगिता तदनवच्छेदकत्वस्य एकसामान्याभावरूपस्य निवेशे तात्पर्यात् । तादृशभेदप्रतियोगितायां स्वावच्छिन्नवत्त्वसम्बन्धेनाऽनवच्छेदकत्वस्य साध्यतावच्छेदकविशेषणतयैव सामञ्जस्येऽपि यथासन्निवेशे न वैयर्थ्यम् । तथाविधसम्बन्धेन तादृशभेदप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पुनरन्योन्याभावघटितलक्षणनिष्कृष्टार्थो बोध्यः ।

सम्बन्धसामान्येन हेतुमत्त्वनिवेशे ऽव्याप्तेर्वक्ष्यमाणत्वात् सम्बन्धविशेषेण हेतुमत्त्वम् प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे चाऽसम्भवस्य वाच्यतया तत्र तत्र निवेशयति । अत्र चेति ।

(दी०) अत्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्टः तेनैव सम्बन्धेन यो हेतुमांस्तत्र वर्तमानत्वमभावस्य, साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगितायाः अनवच्छेदकत्वं बोध्यम् तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगितायाः धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः ॥

यद्वा साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतो वक्तव्यम् । तथा च सम्बन्धभेदेन प्रतियोगिता न विशेषणीया । एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयं न त्वधिकरणत्वम् । तथाच धर्मिणो ऽपि व्याप्यत्वं व्यापकत्वं च निर्वहति । तथाहि तादात्म्येन सम्बन्धेन धूमवतः सम्बन्धिनि महानसे वर्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्ना या प्रतियोगिता तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतस्तादात्म्येन सम्बन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वम् । एवं धर्मिणो धर्मव्याप्यत्वव्यापकत्वे बोध्ये ।

(गा०) ग्राह्यसामानाधिकरण्ये । अनुमितिकारणीभूतज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरे । साध्यस्य चेति । अत्रापि ग्राह्यसामानाधिकरण्य इति प्रविष्ट इति चाऽनुषज्यते । तथा च तत्सम्बन्धेन हेतुमति वर्तते योऽभावस्तदीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदको यो धर्मस्तदवच्छिन्नस्य तेन साध्यतावच्छेदकसम्बन्धेनाऽधिकरणे तत्र हेतुतावच्छेदकसम्बन्धेन वर्तमानत्वं तादृशसाध्यतावच्छेदकसम्बन्धेन साध्यानुमितिप्रयोजकमित्यर्थः । व्यापकताघटकसाध्यीयसम्बन्धेन साध्याधिकरणे तादृशसाधनीयसम्बन्धेन साधनस्याऽवर्तमानत्वग्रहदशायामनुमितिवारणाय सामानाधिकरण्यशरीरे सम्बन्धविशेषनिवेशनम् । वस्तुतस्तु विरुद्धत्वेन ज्ञायमानधर्मवत्ताज्ञानस्याऽनुमितावेव प्रतिबन्धकताया वक्ष्यमाणतया सामानाधिकरण्यशरीरे सम्बन्धविशेषानिवेशेऽपि न क्षति । सामानाधिकरण्यावगाहितायाः प्रयोजकत्वं च विशिष्टपरामर्शनिर्वाहायोपेयते । पर्वतीयधूमव्यापको वह्निरिति व्यापकतापरामर्शस्य हेत्वाभासदूषितत्वात् । न च स्वव्यापकसाध्यकहेतुमानित्याकारक सामानाधिकरण्यानवगाहिविशिष्टपरामर्श एव हेतुरास्तामिति वाच्यम् । बहुव्रीह्यर्थस्य सामानाधिकरण्यपर्यवसितत्वादिति ध्येयम् । प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकसम्बन्धस्थाने साध्यतावच्छेदकसम्बन्धनिवेशेन एव साध्यतावच्छेदकसम्बन्धेन साध्यवद्वृत्त्यधिकरणनिष्ठसम्बन्धान्तरावच्छिन्नसाध्याभावमादाय दूषणस्याऽपि निराकरणसम्भवे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशनमफलमित्याशयेनाह । यद्वेत्यादि । तादात्म्यसम्बन्धेन व्यापकतानिर्वाहाय प्रतियोग्यनधिकरणत्वमनुक्त्वा प्रतियोग्यसम्बन्धित्वमभिहितम् । ननु प्रतियोगिवैयधिकरण्ये सम्बन्धित्वनिवेशेऽपि तादात्म्यसम्बन्धेन व्याप्तिर्निर्वहति, तादृशसाध्यतावच्छेदकसम्बन्धेन साध्याधिकरणाप्रसिद्ध्या तद्घटितसामानाधिकरण्यस्याऽप्रसिद्धेरित्यत आह । एवं स्थित इति । प्रतियोगिवैयधिकरण्यशरीरे सम्बन्धित्वनिवेशे सतीत्यर्थः । सम्बन्धित्वं निवेशनीयमिति । तथा च साध्यसामानाधिकरण्यं साध्यसम्बन्धिसम्बन्धित्वम् । अभावस्य हेतुसामानाधिकरण्यमपि हेतुसम्बन्धिसम्बन्धित्वमादिना ग्राह्यम् । धर्मिण । धूम-

पर्वतादेर्वह्निमदादेश्च । तदेव दर्शयति । तथाहीति । तादात्म्यसम्बन्धावच्छिन्नेति पूर्वकल्पाभिप्रायेण । धूमवद्वह्निमतोर्व्याप्तिमुक्त्वा धर्मिणो धूमवदादेर्वह्न्यादिरूपधर्मव्याप्यत्वं वाह्निमदादिरूपधर्मिणश्च धूमादिधर्मव्यापकत्वं चाह—एवमिति ।

(दी०) अत एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र तत्रोक्तं संगच्छते । यथा च यादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षविशिष्टत्वज्ञाने यादृशेन सम्बन्धेन च साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयोर्विशिष्टानुमितिः । तेन न धूमावयवे संयोगेन नवा समवायेन पर्वते वह्निधीः । तथैवाऽवगतव्यापकताघटकसम्बन्धेन व्यापकस्याऽभावग्रहे गृहीतव्याप्यताघटकसम्बन्धेनैव व्याप्यस्याऽभावः सिद्ध्यतीति । कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन, संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्तते, निवर्तते च संयोगेन वह्निविरहिणि स्वावयवे संयोगेनेति नियम उपपद्यते । तथाच तादात्म्यसम्बन्धेनैव जलादीनां व्याप्यत्वग्रहाद्व्यापकनिवृत्त्या तादात्म्येनैव तेषामभावः सिद्ध्यति, स एव चाऽन्योन्याभावः । इत्यमेव च तादात्म्याद्युक्तशिंशपयोर्व्याप्तिनिश्चय इति संगच्छते ॥

(गा०) अत एव तादात्म्यसम्बन्धेन व्याप्तिव्यवस्थापनादेव । तत्र तत्रोक्तमिति । पृथिवीत्वेनेतरभेदसाधनायेत्यादिः । सङ्गच्छते इति । अन्यथा जलादीनां संयोगादिना पृथिव्यादिवृत्तितया तेन सम्बन्धेन व्याप्तेर्जलादिभेदसाधनानुपयोगितया च तदुक्त्यसंगतेरिति भावः । पृथिवीत्वाभावस्य स्वरूपसम्बन्धावच्छिन्नाभावेन पृथिवीत्वस्वरूपेण जलादिभेदः सिद्ध्यति न तु तस्य कालिकसम्बन्धावच्छिन्नाभावेनेत्यत्र, पृथिवीत्वेन व्याप्यस्य जलादेरन्योन्याभाव एव सिद्ध्यति न त्वत्यन्ताभाव इत्यत्र वा किं नियामकमित्याशङ्कायां व्यतिरेकि-

णि तत्सम्बन्धघटितव्यापकत्वेन गृह्यमाणस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकादेवाऽभावाद्धेतोर्येन सम्बन्धेन यस्य व्याप्यता गृहीता तत्सम्बन्धावच्छिन्नप्रतियोगिताक एव तदभावः सिध्यतीति समाधास्यन् अन्वयिनि व्याप्यताघटकसम्बन्धेन व्याप्यवत्ताज्ञानात् व्यापकताघटकसम्बन्धेनैव व्यापकं सिद्ध्यतीति नियमं दृष्टान्तविधया दर्शयति । यथा चेति । तादृशेनैव विशिष्टज्ञाने । पक्षधर्मिकविशिष्टज्ञाने । विशिष्टानुमितिः । वैशिष्ट्यविषयकानुमितिः । व्याप्यताघटकसम्बन्धेनैव व्याप्यवत्ताज्ञानं हेतुरिति नियमस्य व्यापकताघटकेनैव सम्बन्धेन व्यापकस्यानुमितिनियमस्य च क्रमेण प्रयोजनमाह । तेनेति । अनवतीर्णबाधस्याऽभ्रान्तस्येति शेषः । धूमावयवे न वह्निर्धीरित्यन्वयः । तस्य समवायसम्बन्धेन वह्निव्याप्यधूमवत्त्वेऽपि व्याप्यताघटकेन संयोगेन तद्वत्त्वाभावादिति भावः । नवा समवायेनेति पर्वतवृत्तिहेतुं प्रति समवायेन वह्निरव्यापकत्वादिति भावः । प्रकृतोपयुक्तनियमद्वयमाह । तथैवेति । सम्बन्धेन । सम्बन्धेनैव । एतन्नियमद्वयस्य प्रयोजनान्तरानुरोधेनाप्यावश्यकत्वमिति दर्शयति । कथमन्यथेति । अन्यथा—एतादृशनियमानभ्युपगमे । इति नियमः कथमुपपद्यत इत्यन्वयः । महानसे संयोगेन धूमो न निवर्तेत इत्यन्वयः । महानसधर्मिकसिद्धिविषयसंयोगसम्बन्धावच्छिन्ननिवृत्तिप्रतियोगी नेत्यर्थः । निवर्तते च । धूम इत्यनुषज्यते । प्रकृतमाह । तथा चेति । व्याप्यत्वग्रहात् । स्वरूपसम्बन्धावच्छिन्नपृथिवीत्वाभावनिष्ठव्यापकतानिरूपितव्याप्यताग्रहात् । व्यापकनिवृत्त्या । स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकेनैव पृथिवीत्वाभावाभावेन । तेषाम् । जलादीनाम् । न चैतावताऽपि अत्यन्ताभावसिद्धिः कथं निराकृतेत्यत आह । स एव चेति । स चान्योन्याभाव एवेति योजना । तादात्म्यसम्बन्धावच्छिन्नाभावश्चाऽन्योन्याभाव एव न त्वत्यन्ताभाव इत्यर्थः । अतो नेतरात्यन्ताभावसिद्धिरिति भावः । तादात्म्यसम्बन्धेन व्याप्तौ प्राचां सम्मतिमाह । इत्थमेव चेति । तादात्म्यसम्बन्धेन व्याप्तिस्वीकारेणैव । इति ग्रन्थः सङ्गच्छते इत्यन्वयः । ननु तादात्म्यसम्बन्धेन व्याप्त्यनभ्युपगमे का क्षतिः । जलादिभेदभिन्ने जलादिभेदाभावव्यापकीभूताभावप्रतियोगित्वेन पृथिवीत्वज्ञानादेव सम्भवात् पृथिव्येकदेशे जलादिभेदमसिद्ध्वा तादृशव्याप्तिग्रहसम्भवस्य व्यतिरेकिणि वक्ष्यमाणत्वात् । ता-

दात्म्यसम्बन्धेन धर्मिणोऽनुमितेरप्यनुभवसिद्धत्वे धर्मितादात्म्यनिष्ठव्यापकताज्ञानस्यैव तद्धेतुतायाः स्वीकरणीयत्वात्, असति प्रतिबन्धके तत्तादात्म्यादिविधेयकानुमितौ तादात्म्यसम्बन्धेन तस्य विधेयत्वोपगमे क्षतिविरहादित्यत आह—

(दी०) अत एव गोत्वत्वाद्यग्रहदशायां यत्र सास्नादिः सा गौरिति तादात्म्येन गोर्व्यापकत्वग्रहे सास्नादिना तादात्म्येन गौः, गोर्व्यतिरेकाच्च सास्नादिव्यतिरेकः सिद्ध्यति । एवं च संयोगेन गगनादेरपि द्रव्यत्वव्याप्यत्वम् । वृत्त्यनियामकसंयोगमात्रस्याऽभावप्रतियोगितावच्छेदकत्वे साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपि । तदभाववतोऽपि पृथिव्यादेः संयोगेन तत्सम्बन्धित्वात् । सिद्धिरपि तस्य तथैव न तु वृत्तिनियामकसम्बन्धेन । तेनाऽसम्बन्धित्वादव्यापकत्वाच्च । व्यक्तीभविष्यति चैतदुपरिष्टात् ॥

(गा०) अत एवेति । तादात्म्यसम्बन्धेन व्याप्तिस्वीकारादेव । गोत्वत्वाग्रहदशायां गौः सिद्ध्यतीत्यन्वयः। अन्यथा तत्र गोत्वत्वरूपसाध्यतावच्छेदकानुपस्थित्या गोत्वसाध्यकानुमित्यौपयिकव्याप्तेर्दुर्ग्रहतया गोत्वसाध्यकानुमितेर्गोतादात्म्यस्यापि गोत्वरूपतया तन्निष्ठव्यापकताया अपि गोत्वत्वोपस्थितिमन्तरेण दुर्ग्रहतया तादात्म्यधर्मिकव्यापकताज्ञानाधीनतादात्म्यसंसर्गकगवानुमितेश्चाऽसम्भवेनाऽयं गौरित्याकारकानुमितेरनुभवसिद्धाया अपलापप्रसङ्गादिति भावः। यद्यपि गोत्वांशे गोत्वत्वं धर्मितावच्छेदकीकृत्य व्यापकतावच्छेदकत्वावगाहिग्रह एव गोत्वेन गोसाध्यकानुमितावपि हेतुर्वाच्यः निर्धर्मितावच्छेदककव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारज्ञानाप्रतिबध्यतयाऽनुमित्यजनकत्वादिति तादात्म्येन गोत्वावच्छिन्नसाध्यकानुमितिरपि गोत्वत्वानुपस्थितिदशायां न सम्भवति । तथापि वक्ष्यमाणप्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायेणेदमभिहितं तन्मते स्वरूप-

तः साध्यतावच्छेदकप्रकारिकायामनुमितौ स्वरूपतः साध्यतावच्छेदकप्रकारकस्य साधनवन्निष्ठाभावप्रतियोगित्वत्वावच्छेदेन साध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावावगाहिज्ञानस्य हेतुतया तत्र गोत्वत्वज्ञानानपेक्षणेनाऽनुपपत्त्यभावात्। ईदृशयुक्त्या तादात्म्येन व्यापकतासिद्धिवत् गोत्वत्वाग्रहदशायां या गौस्तत्र सास्नादिरिति व्याप्तिग्रहाधीनगवादिहेतुकसास्नादिसिद्ध्यनुरोधात् तत्सम्बन्धेन व्याप्यतासिद्धिरपि द्रष्टव्या। केचित्तु तादात्म्यसम्बन्धेन व्यापकत्वानुपगमेऽपि गवान्यावृत्तित्वरूपव्याप्तिज्ञानात् गोत्वादिविधेयकानुमितिर्निष्प्रत्यूहैव। तथा सति अयं गौरित्याकारकताऽप्यनुमितेर्निर्वहति स्वरूपतो गोत्वावगाहिनो गवान्यावृत्तित्वज्ञानात्स्वरूपत एव गोत्वविषयिण्यास्तस्याः सम्भवात्। न चानवच्छिन्नविधेयताया अक्लृप्तत्वात्तादात्म्येन गोरेव विधेयत्वमुचितम्। अयं गौरित्याकारक इदन्त्वावच्छिन्नविशेष्यकगोत्वादिप्रकारकप्रत्यक्षे या गोत्वादिप्रकारता तस्या एव विधेयतात्वोपगमेऽनुमितौ तत्कल्पनेऽतिरिक्तविधेयताकल्पनाभावात्। अस्तु वा गवान्यावृत्तित्वरूपव्याप्तिज्ञानादेव तादात्म्येन गवानुमितिः किं तादात्म्येन व्यापकतयेत्याशङ्कानिराचिकीर्षयोक्तं गोत्वत्वाद्यग्रहदशायामिति। गवेतरावृत्तित्वस्य हेतुभूतसास्नाद्यग्रहदशायामित्यर्थ इत्याहुस्तन्न। गवेतरावृत्तित्वमात्रस्य गोत्वत्वशब्दार्थताविरहेणोदक्षरताया दुर्वारत्वात्। गोत्वत्वपदं तद्वृत्तिधर्मपरमिति तु न सम्यक्। गोत्वत्वस्य विशिष्टगोवृत्तित्वस्वरूपस्य स्वरूपतो भानासम्भवेन तज्ज्ञानदशायां तद्वृत्तिधर्मभानस्याऽवश्यकत्वात्। अपरे तु गोत्वत्वाद्यग्रहदशायामपि गौः सिध्यतीत्यन्वयः। यदा गोत्वत्वमनुमितौ न भासते तदापि तत्र गौर्भासत इत्यर्थः स्वरूपतो गोत्वस्यैव सास्नादिलिङ्गकानुमितौ भानस्योपगन्तव्यतया विधेयताया अवच्छिन्नत्वनियमेन स्वरूपतो गोत्वप्रकारकानुमितेरनुभवसिद्धाया अनुपपत्तिरित्युपष्टम्भसंगतिरिति प्राहुः। यत्तु अनवच्छेदकांशे तादात्म्यसम्बन्धेन स्वरूपतः साध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांश आधेयतासम्बन्धेन स्वरूपतस्तत्प्रकारकज्ञानाद्वा स्वरूपतस्तत्प्रकारकानुमितिरित्युपगमेन गोत्वत्वाग्रहदशायामपि तादात्म्येन व्यापकताज्ञानादनुमितिर्निर्वहतीति नोक्तानु-

पपत्तिरिति तदसत् । अयंगौरित्यादिज्ञानानुव्यवसाये स्वरूपतो गोत्वादिविशेषितप्रकारिताप्रकारेण ज्ञानभानात् समवायातिरिक्तेन निरूपितत्वसम्बन्धेन गोत्वादेः स्वरूपतः प्रकारताया आवश्यकत्वेऽपि समवायातिरिक्तेनापरसम्बन्धेन स्वरूपतः प्रकारताया अप्रामाणिकत्वात् अन्यथा व्यापकताज्ञानहेतुतामते स्वरूपतो ज्ञानत्वादेर्विधेयतावच्छेदकत्वानुपपत्त्या केवलान्वयिग्रन्थे तज्ज्ञानस्या ऽनुमितिहेतुताखण्डनं दीधितिकृतां विरुद्धेत उक्तक्रमेणैव तन्निर्वाहात्। न च तथा सति प्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायकतयाऽपि नैतद्ग्रन्थसंगतिरिति वाच्यम्। प्रकारित्वांश इवाऽवच्छेदकत्वांऽशेपि निरूपितत्वसम्बन्धेन जातेः स्वरूपतः प्रकारित्वाभिप्रायेणैतद्ग्रन्थसंगमनात्। तस्याऽप्रामाणिकत्वाभिप्रायेणाऽग्रिमव्यापकताज्ञानहेतुताखण्डनसंगतेः। अपरे तु गोत्वत्वाद्यग्रहदशायामपि स्वरूपतो भासमानगोत्वावच्छिन्ने हेतुमन्निष्ठभेदप्रतियोगितानिरूपिततादात्म्यसम्बन्धावच्छिन्नावच्छेदकत्वाभावरूपान्योन्याभावघटिततादात्म्यसम्बन्धावच्छिन्नव्यापकताज्ञानात्तादात्म्येन स्वरूपतो गोत्वप्रकारिकाऽनुमितिः सम्भवत्येव । एकरूपेणा ऽवच्छेदकेऽपि अवच्छेदकतानवच्छेदकरूपेणा ऽवच्छेदकत्वाभावं स्वीकृत्यैवान्योन्याभावघटितलक्षणस्य ग्रन्थकृता यद्रूपावच्छिन्नमित्यादिना परिष्करणीयत्वात् तदभिप्रायेणैवैतत्संगतेः । केवलान्वयिग्रन्थे च प्रतियोगिनि प्रतियोगितानवच्छेदकरूपेण तत्त्वाभावस्यैवावच्छेदकतानवच्छेदकरूपेणाऽवच्छेदकत्वाभावस्याऽप्रामाणिकतया व्यापकताज्ञाने साध्यतावच्छेदकस्य स्वरूपतो भानं न सम्भवतीत्यभिप्रायेण व्यापकताज्ञानहेतुतामते स्वरूपतो ज्ञानत्वप्रकारकानुमितेरनुपपत्तेर्वक्ष्यमाणतया न पूर्वापरग्रन्थविरोध इति प्राहुः। तादात्म्येन गोर्व्यतिरेकाचेति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकात्तादात्म्यसम्बन्धघटितव्यापकतावच्छेदकगोत्वावच्छिन्नस्य भेदरूपाभावादित्यर्थः । समवायसम्बन्धावच्छिन्नाभावस्य साधकत्वेपि तत्प्रतियोगितावच्छेदकगोत्वत्वाद्यग्रहदशायां तदभावस्य ज्ञानासम्भवेन ततः सास्नाभावसिद्ध्यसम्भवादिति भावः। एवं च । अधिकरणत्वस्थाने सम्बन्धित्वनिवेशे च । गगनादेरपीति । तस्याऽधिकरणाप्रसिद्धावपि संयोगेन तत्सम्बन्धिवृत्तित्वस्याऽभावे तत्र च

साध्यवत्सम्बन्धित्वस्य प्रसिद्ध्या यथोक्तव्याप्तिसत्त्वादिति भावः । वृत्त्यनियामकसंयोगत्वाद्युक्तरूपेण संयोगस्याऽभावप्रतियोगितावच्छेदकसम्बन्धत्वेन साध्यतावच्छेदकसम्बन्धस्य गगनीयसंयोगस्याऽभावप्रतियोगितानवच्छेदकतया प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशरूपे तथाविधप्रतियोगित्वाप्रसिद्ध्या संयोगेन गगनस्य व्यापकता न निर्वहतीत्यत उक्तं वृत्त्यनियामकसंयोगमात्रस्येति । तादृशसंयोगसाधारणसंयोगत्वावच्छिन्नस्येत्यर्थः । यद्वेत्याद्युक्तकल्पे वृत्त्यनियामकसंयोगसाधारणरूपेण तादृशसम्बन्धत्वविरहेऽपि न क्षतिः तन्मते प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशादित्याशयेनाह । साध्यतावच्छेदकसम्बन्धेनेति । पृथिवीत्वादिव्यापकत्वमपीत्यत्र संयोगेन गगनादेरित्यनुषज्यते । ननु प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशे पृथिव्यादिनिष्ठसमवायादिसम्बन्धावच्छिन्नाभावप्रतियोगितया गगनादेर्न पृथिवीत्वादिव्यापकतासम्भव इत्यत आह—तदभाववतोऽपीति । समवायादिना गगनाद्यभाववतोऽपीत्यर्थः । तत्सम्बन्धित्वात् । गगनादिसम्बन्धित्वात् । तथा च तादृशगगनाद्यभावो न साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमन्निष्ठ इत्यभावान्तरमादाय लक्षणसत्त्वं निष्प्रत्यूहमेवेति भावः । ननु संयोगेन गगनस्य व्यापकत्वे याधानवतादृशायामभ्रान्तस्य वृत्तिनियामकसंयोगेनैव कथं न गगनानुमितिरित्यत आह । सिद्धिरपीति । तथैव । वृत्त्यनियामकसंयोगेनैव तेनाऽसम्बन्धित्वादिति । तथा च तत्सम्बन्धावगाहनेऽनुमितेर्भ्रमतया तत्र प्रमात्मकपरामर्शस्याऽपेक्षितत्वादिति भावः । यद्रूपावच्छिन्नयत्सम्बन्धस्य व्यापकताघटकत्वं तद्रूपावच्छिन्नतत्सम्बन्धेनैवाऽनुमितिरिति नियमाभिप्रायेण दोषान्तरमाह । अव्यापकत्वाच्चेति । वृत्त्यनियामकेन सम्बन्धेनैव गगनाद्यभावस्य प्रतियोगिसमानाधिकरणतया वृत्तिनियामकसंयोगेन प्रतियोगिव्यधिकरणाभावप्रतियोगितायाः गगने सत्त्वेन तत्सम्बन्धस्य व्यापकताघटकत्वाभावादित्यर्थः । तथा च व्यापकताघटकसम्बन्धस्याऽनुमित्यवगाहनात् न तेनाऽनुमितिप्रसङ्ग इति भावः । ननु वृत्तिनियामकसंयोगेन गगनादिसम्बन्धिनोऽप्रसिद्ध्या कथं

तेन सम्बन्धेन गगनाद्यभावस्य प्रतियोगिवैयधिकरण्यमित्यत आह । व्यक्तीभविष्यतीति । वक्ष्यमाणोभयाभावघटितप्रतियोगिवैयधिकरण्यं तत्रापि सुलभमिति भावः ।

कालिकविशेषणतया घटादिसाध्यके महाकालत्वादिहेतौ अप्रसिद्धिनिबन्धनाव्याप्तिं शङ्कते नन्वित्यादिना ।

(दी०) नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्मस्य विशेषणताविशेषेणाऽव्याप्यवृत्ति किमपि व्यापकं न स्यात् । स्वावच्छेदकसम्बन्धेन प्रतियोगिनोऽसम्बन्धिनि काले वर्तमानस्याऽभावस्य प्रतियोगितायां तत्सम्बन्धाऽवच्छिन्नत्वस्य तेन सम्बन्धेन यत् प्रतियोगिसम्बन्धि तदन्यत्वस्य च काले ऽसम्भवात् ॥

(गा०) खण्डकालवृत्त्येतत्कालत्वादिहेतुकस्थले ऽतीतानागतव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नतादृशसम्बन्धावच्छिन्नाभाव एव हेतुमति प्रतियोगिव्यधिकरणः प्रसिद्ध इति नाऽव्याप्तिरतो ऽष्टद्रव्यातिरिक्तद्रव्यात्मकेति । जन्यमात्रस्य कालोपाधितामते द्रव्यात्मकस्याऽपि खण्डकालस्य सम्भवान्न महाकालपर्यन्तलाभ इत्यतो ऽतिरिक्तान्तम् । यद्यपि गगनदिगात्ममनसां नित्यतया खण्डकालत्वासम्भवेन चतुर्द्रव्यातिरिक्तेत्युक्तावपि महाकाललाभस्तथापि यत्किञ्चिच्चतुर्द्रव्यातिरिक्तत्वस्य पृथिव्यादावपि सत्त्वात्पृथिव्यादिचतुष्टयातिरिक्तत्वस्य च विविच्याऽभिधान एव तल्लाभः । तान्त्रिकैर्महाकालस्यैवाऽष्टद्रव्यातिरिक्तद्रव्यपदेनाऽभिधानात्तथाऽभिधाने विविच्याऽनभिधानेऽपि नाऽन्यपरत्वशङ्केति तथैवाऽभिहितम् । खण्डकालसाधारणमहाकालवृत्तेर्हेतुत्वे खण्डकालरूपहेत्वधिकरणे एव लक्षणघटकाभावप्रसिद्धिरिति कालमात्रवृत्तीत्यत्र मात्रपदम् । समवायादिना कस्यचित्साध्यत्वे समवायादिना घटाद्यभाव एव महाकाले तेन सम्बन्धेन प्रतियोगिव्यधिकरणः प्रसिध्यतीत्यतो विशेषणताविशेषेणेति । कालिकविशेषणतयेत्यर्थः । अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यानुपादानेन केवलान्वयिव्याप्यत्वादेर्व्यापकतासम्भव इत्यतोऽव्याप्यवृत्तीति । कालिकसम्बन्धे-

नाव्याप्यवृत्तित्वं च व्यतिरेकिमात्रस्यैव, केवलान्वयिनोऽप्यनित्यस्य विदवविषयकजन्यज्ञानविषयत्वादेर्बोध्यम् । एतत्सर्वं घटत्वमभिप्रायेणाऽभिहितम् । महाकालान्यवृत्तिहेतुकेऽन्यसम्बन्धेन साध्यतायां च हेतुमति सर्वत्र साध्यतावच्छेदकसम्बन्धेन वृत्तिमन्मात्रस्यैव तेन सम्बन्धेन वृत्तित्वभ्रमदशायां अनुमितिजनकज्ञानानुपपत्तिरपि द्रष्टव्या । एवं कालिकसम्बन्धेन व्याप्यवृत्तिसाध्यकेऽपि तेन सम्बन्धेन साध्यस्याऽव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितायाः प्रतियोगिवैयधिकरण्याघटितायाश्च व्यापकताया दुर्ग्रहत्वान्महाकालत्वादिहेतुकानुमित्यनुपपत्तिरपि । स्वावच्छेदकसम्बन्धेन स्वावच्छेदकविशिष्टानधिकरणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानिवेशकल्पे तादृशप्रतियोगित्वाप्रसिद्ध्यभिधानेनाऽव्याप्तिं स्फुटीकरोति । स्वावच्छेदकेति । स्वम् । प्रतियोगिता । काले । महाकाले । तत्सम्बन्धावच्छिन्नत्वस्य । कालिकसम्बन्धावच्छिन्नत्वस्य, असम्भवादिति योजना । कालिकसम्बन्धेन वृत्तिमन्मात्रस्यैव महाकाले वृत्तेः, अवृत्तेश्च तेन सम्बन्धेन सम्बन्धिनोऽप्रसिद्ध्या कस्यापि कालिकसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमद्वृत्तित्वासम्भवेन समवायादिसम्बन्धावच्छिन्नघटाद्यभावस्यैव तथात्वात्तत्प्रतियोगितायाश्च समवायादिसम्बन्धेनैवाऽवच्छिन्नत्वादिति भावः । साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमद्वृत्त्यभावीयसम्बन्धावच्छिन्नत्वाविशेषितप्रतियोगितानिवेशकल्पे तादृशसम्बन्धेन प्रतियोग्यसम्बन्धिहेतुमत एवाऽप्रसिद्ध्याऽव्याप्तिरित्याह । तेनेति । तेन सम्बन्धेन । कालिकसम्बन्धेन । गगनाद्यभावप्रतियोगिनस्तेन सम्बन्धेन सम्बन्धिरूपप्रतियोग्यप्रसिद्ध्या तेन सम्बन्धेन प्रतियोग्यसम्बन्धित्वासिद्धिं स्फुटीकर्तुं प्रतियोग्यसम्बन्धित्वमित्यनभिधाय यत्प्रतियोगिसम्बन्धि तदन्यत्वरूपत्वसमासेनाऽभिधानम् ।

अथ कालिकसम्बन्धेन महाकालान्यवृत्तित्वविशिष्टस्य घटस्य तत्सम्बन्धावच्छिन्नाभाव एव महाकाले प्रतियोगितावच्छेदकविशिष्टप्रतियोगित्र्यधिकरणः प्रसिद्धस्तमादायैव च लक्षणसमन्वयात् कथमव्याप्त्यभिधानं न हि महाकालान्यवृत्तित्वविशिष्टघटादिनिरूपितः कालिकसम्बन्धोऽपि महाकाले सम्भवति

तद्धर्मिवृत्तित्वविशिष्टनिरूपितसम्बन्धानुयोगितायास्तद्धर्मिनियतत्वात् अन्यथा सत्त्वादिमति गुणादौ द्रव्यादिवृत्तित्वविशिष्टसत्त्वाद्यभावप्रत्ययानुपपत्तेः। न चैवं ह्रदादिवृत्तित्वविशिष्टवह्न्यभावादेर्विषयितया सम्बन्धित्वं ज्ञाने न स्यात् ज्ञानस्य ह्रदादिवृत्तित्वानिरूपकत्वादिति ह्रदो वह्निमानित्यादौ तादृशविशिष्टस्य बाधादिरूपस्य हेत्वाभासत्वं न स्यात्। ज्ञाननिष्ठं विषयितया यादृशविशिष्टवत्त्वमनुमितिप्रतिबन्धकतावच्छेदकं तादृशविशिष्टस्यैव तथात्वात्। यदि च तत्सम्बन्धेन तद्धर्मिसम्बन्धित्वविशिष्टनिरूपितस्तादृशसम्बन्धो विशेषणकोटिप्रविष्टधर्मिनियत इति सम्बन्धान्तरेण ह्रदादिवृत्तित्वविशिष्टनिरूपितविषयितासम्बन्धो ज्ञाने सम्भवत्येवेत्युच्यते। तदाऽपि इच्छादिविषयत्वविशिष्टघटादिनिरूपितविषयितासम्बन्धस्य ज्ञानेऽसम्भवादिच्छाविषयत्वाभावसाध्यकघटादिपक्षकस्थले तादृशविशिष्टस्य बाधादिरूपस्य हेत्वाभासत्वानुपपत्तिर्दुर्वारैवेति वाच्यम्। विशिष्टनिरूपितविषयितातिरिक्तसम्बन्धस्यैव विशेषणीभूतसम्बन्धितानिरूपकाधिकरणत्वनियतत्वोपगमात्तद्धर्मविशिष्टतानिरूपितविषयितायां तदंशे तद्धर्मप्रकारकत्वमात्रस्याऽपेक्षितत्वात्। इच्छाविषयो घट इत्यादिज्ञाने इच्छाविषयत्वविशिष्टघटादिनिरूपितविषयितासत्त्वेन बाधकाभावात्। न चैतदनुरोधेनैव विशिष्टवृत्तिताघटकसम्बन्धेन विशेषणविशेष्योभयाधिकरणेऽपि विशिष्टाधिकरणत्वं स्वीक्रियते प्रकृते चेच्छाविषयत्वतादृशघटयोर्द्वयोरपि विषयितासम्बन्धेन ज्ञाने सत्त्वात्तादृशविशिष्टाधिकरणत्वं ज्ञानेऽक्षतमेवेति नेच्छाविषयत्वविशिष्टघटादेर्हेत्वाभासत्वानुपपत्तिः। इत्थं च कालिकसम्बन्धेन महाकालान्यत्वस्य महाकाले सत्त्वाद्विशिष्टाधिकरणत्वं महाकाले वर्तत एवेति कथं विशिष्टाभावः प्रतियोगिव्यधिकरण इति वाच्यम्। विशेष्यसम्बन्धेनोभयाधिकरणेऽपि विशिष्टाधिकरणत्वाङ्गीकारे घटपटोभयसंयुक्तभूतले घटसमवायिकपालसंयुक्तत्वविशिष्टपटनिरूपिताधिकरणत्वप्रसङ्गात्। इच्छाविषयत्वं घटश्चेति समूहालम्बनेऽपि तादृशविशिष्टाधिकरणत्वसत्त्वापत्त्या प्रतिबन्धकतातिरिक्तवृत्तितया तस्य हेत्वाभासत्वानुपपत्तितादवस्थ्यादिति। न च महाकाले महाकालान्यवृत्तित्वविशिष्टघटाद्यधिकरणत्वानुपगमे तस्य विश्वाधारत्वव्याघात इति शङ्कनीयम्। ता-

दशाविशिष्टनिरूपिताधिकरणताविशेषस्य महाकालेऽसत्त्वेऽपि घटादेः घटत्वावच्छिन्ननिरूपिताधिकरणतासत्त्वेनैव सर्वाधारत्वोपपत्तेः ।

अत्र केचित् । कालिकसम्बन्धेनाधारता महाकालस्य न तु सूर्यक्रियादेः, इदानीं घट इत्यादिप्रतीत्या क्रियादिरूपकालोपाधीना महाकालनिष्ठाधारताऽवच्छेदकत्वस्यैवाऽवगाहनात् । अत एव तथा कालिकविशेषणतया कालोपाधित्वप्रवादः । तादृशप्रतीतेः क्रियादावेव घटाद्याधारत्वावगाहित्वोपगमे तादृशप्रतीतीनामनुगताधारतावगाहित्वानुभवविरोधात् । कालत्वेनाखण्डोपाधिना सर्वेषां क्रियादीनामनुगमेन तादृशानुभवोपपादने महाकालस्यैवाऽप्रामाणिकतापत्तेरिति प्राचीनमताभिप्रायेणेयमव्याप्त्याशङ्का । तथा च सति कालिकसम्बन्धेन महाकालान्यवृत्तित्वस्यैवाऽप्रसिद्ध्या तद्विशिष्टघटाद्यभावमादाय लक्षणगमनासम्भवात् । न च क्रियादेः कालत्वानभ्युपगमाभिप्रायेण चेदम् ग्रन्थस्तदाऽष्टद्रव्यातिरिक्तद्रव्यात्मकतायाः ग्रन्थावतरणिकयाऽभिधानासङ्गतेरिति वाच्यम् । तादृशद्रव्यात्मक एव काल इति मतविशेषसूचनार्थतया तत्सङ्गतेः । तन्मात्रवृत्तित्वं च हेतोर्लक्ष्यतासम्पादकत्वेनाऽभिहितम्, इतरवृत्तेर्व्यभिचारित्वात् । अथवा भवतु कालोपाधिरपि कालिकसम्बन्धेनाऽधिकरणं तदधिकरणत्वसाधकश्चेदानीं घट इत्यादिप्रत्ययो व्यवहारश्च तस्य चाननुगतोपाधिमात्रविषयकत्वे ऽनुगताधारत्वावगाहित्वानुपपत्त्या क्रियादिरूपोपाधिविशिष्टमहाकालस्य घटाद्याधारतावगाहित्वमावश्यकम्, विशिष्टे घटाद्याधारत्वावगाहित्वे विशिष्टान्तर्गतविशेषणेऽपि तदवगाहित्वमावश्यकमिति खण्डकालस्य कालिकसम्बन्धेनाधारतासिद्धिः । एवं चेदानीं महाकालान्यत्वविशिष्टो घट इति प्रत्यय खण्डकाले विशिष्टाधारतायां मानं न त्वन्य इति तत्साधकप्रत्ययबलादेव महाकालान्यवृत्तित्वानिरूपकस्यापि महाकालस्य विशिष्टाधारत्वसिद्धिर्दुर्वारैव । तथा च महाकाले विशिष्टघटाभावोऽपि विशिष्टनियामकसमाधिकरण तादृशप्रतीत्यनभ्युपगमे खण्डकाले न विशिष्टप्रतियोग्यधिकरणत्वप्रसिद्धिरित्युक्तस्थलेऽव्याप्तिवारणमशक्यमित्याहुः ।

अन्ये तु कालिकसम्बन्धो स्वरूपादनतिरिक्तः तथा च खण्ड

कालमहाकालानुयोगिकताहशसम्बन्धानां तत्तत्स्वरूपाणामनुगमकतावच्छेदकाभावेन प्रत्येकमेव सम्बन्धता । तथा च महाकालस्वरूपसम्बन्धेनैव घटादेः महाकालत्वादिव्यापकता वाच्येति दुरुद्धरैवाव्याप्तिः, तादृशसम्बन्धेन महाकालान्यवृत्तित्वस्याऽप्रसिद्धेरिति वदन्ति । तदसत् । स्वरूपाणां प्रातिस्विकरूपेण सम्बन्धत्वे यत्किञ्चित्खण्डकालनिरूपितस्वरूपसम्बन्धेन साध्यतायां तादृशखण्डकालमात्रवृत्तिहेतुकेऽपि प्रतियोगिव्यधिकरणाभावाप्रसिद्धिसम्भवान्महाकालमात्रवृत्तिहेतुकानुधावनस्य निर्बीजत्वापातात् ।

परे तु साध्यतावच्छेदकावच्छिन्नसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तावेव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैयधिकरण्यप्रवेशो न तु साध्यतावच्छेदकोपलक्षितसाध्यवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तौ, अन्यथा महाकाले पृथिव्यादिवृत्तित्वोपलक्षितजात्यनुमानानुपपत्तेः । तादृशसाध्यतावच्छेदके प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणत्वविशिष्टाभावप्रतियोगितावच्छेदकत्वसत्त्वात् । इत्थं च यत्र साध्यतावच्छेदकोपलक्षितस्य साध्यता तत्रैवाऽव्याप्तिशङ्कापरोऽयं ग्रन्थः, तत्र यथाश्रुतप्रतियोगिवैयधिकरण्यस्यैव निवेशेन महाकालान्यवृत्तित्वविशिष्टघटाभावस्याऽपि लक्षणाघटकत्वादित्याहुः । तदपि न । अग्रिमविशिष्टाद्योपादानतद्व्यावृत्तिप्रदर्शनविरोधात् ।

(दी०) न च तादृशसम्बन्धेन हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसामान्यकत्वमेव वक्तव्यम् । तथा चाऽवृत्तिगगनाद्यभावद्वारिकैव तत्सिद्धिः । सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामान्यस्य संयोगसामान्यस्य चाऽवृत्तेर्नाऽतिप्रसङ्गः । मूर्तत्वमूर्तत्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टसत्तादिकन्तु न मनोगुणादिवृत्ति, संयोगसामान्यं तु न किञ्चिद्द्रव्याऽवृत्तीति वाच्यम् । विशिष्टस्याऽनतिरिक्तत्वात् । समवायेन जातेः साध्यत्वे मेयत्वादावतिप्रसङ्गात् । जातिमन्निष्ठाभावप्रतियोगिता-

या जातित्वेनाऽनवच्छेदात्, जातिशून्ये च तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः । संयोगादिसाध्यकगुणकर्मान्यत्वादौ चाऽतिव्याप्तिः । अद्रव्ये हेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेर्द्रव्ये च संयोगादेरपि वृत्तेः । मैवम् ।

(गा०) तादृशसम्बन्धेन । प्रतियोगितावच्छेदकसम्बन्धेन साध्यतावच्छेदकसम्बन्धेन वा । वक्तव्यम् । अभावविशेषणतया अभावपूर्वप्रतीकेन विवक्षणीयम् । गगनाद्यभावद्वारकैवेति । तत्प्रतियोगिनः कालिकसम्बन्धेनाऽधिकरणाप्रसिद्ध्या तदनधिकरणत्वाप्रसिद्धावपि वृत्तिमति प्रसिद्धायाः कालिकसम्बन्धेन महाकालवृत्तितायाः अभावस्य तत्र प्रसिद्धत्वादिति भावः ।

ज्ञानवान् सत्त्वात् संयोगी सत्त्वादित्यादौ क्रमेण सम्बन्धविशेषनिवेशनयत्किञ्चित्पदोपादानयोर्व्यावृत्तिमाह । सत्ताधिकरणकर्मादाविति । सम्बन्धविशेषानुपादाने कर्मादौ समवायेन ज्ञानाभावप्रतियोगिनोऽवृत्तावपि विषयतासम्बन्धेन ज्ञानस्य वृत्तेस्तादृशाभावो न लक्षणघटकः स्यात्, कर्मादौ संयोगाभावप्रतियोगिनोऽसत्त्वेऽपि हेत्वधिकरणद्रव्यवृत्तितया हेत्वधिकरणवृत्तित्वसामान्याभाववत्त्वासम्भवात् सोऽपि न तथा स्यादित्यभावान्तरमादायाऽतिव्याप्तिप्रसक्तिरिति भावः । यद्यपि यत्किञ्चित्पदस्य व्यावृत्तिर्ज्ञानसाध्यकेऽपि सम्भवति ज्ञानस्य समवायसम्बन्धेनाऽव्याप्यवृत्तितया तत्साध्यकेऽपि प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात् । तथाऽपि प्रसिद्धाव्याप्यवृत्तिसाध्यके व्यभिचारिणि संयोगी सत्त्वादित्यादौ तदनुक्तौ तत्र व्यावृत्तिर्न सम्भवतीति शङ्का स्यात् तन्निरासाय तत्प्रदर्शनम् । केचित्तु संयोगसाध्यके आदिपदग्राह्यगुणान्यत्वविशिष्टसत्ताहेतुके साध्यतावच्छेदकसम्बन्धस्यैव व्यावृत्तिप्रदर्शनपरं संयोगसामान्यस्य चेत्यपि । विषयताया वृत्त्यनियामकत्वे प्रतियोगिवैयधिकरण्ये सम्बन्धित्वानिवेशपक्षे पूर्वस्थलीयव्यावृत्त्यसङ्गतिरित्यस्वरसादेतदनुधावनम् । संयोगाभावस्य कालिकसम्बन्धेनैव सर्वत्र कर्मणि प्रतियोगिसामानाधिकरण्यसत्त्वा-

दतिव्याप्तिप्रसक्तिरिति वदन्ति । तदसत् । उक्तास्वरसेन पूर्वमपि ज्ञानसाध्यकं परित्यज्य स्थलान्तरानुसरणादत्र निर्बीजतादृशस्थलपरित्यागे सन्दर्भविरोधात् । आदिपदेन हेतोः साध्यस्य च विशेषशब्देनोपादानस्याऽयुक्तत्वाच्च ।

प्रतियोगितावच्छेदकविशिष्टत्वोपादानस्य पूर्वोक्तस्थले एव व्यावृत्तिं स्मारयति । भूतत्वेति । यद्यपि पूर्वं विशिष्टसाध्यकेऽतिव्याप्तिप्रदर्शनोत्तरं विशिष्टस्यातिरिक्ततापक्षे तदसङ्गतिरित्यस्वरसादुभयसाध्यकातिव्याप्तिर्दर्शिता तथाऽपि द्वन्द्वेऽल्पाक्षरस्य पूर्वनिपातनियमसत्त्वे उभयत्वविशिष्टान्तस्य प्रागभिधानम् । अत्र पूर्वस्थले द्वित्वाद्यवच्छिन्नप्रतियोगितायाः व्यासज्यवृत्तित्वोपगमे ऽतिव्याप्तिर्न सम्भवतीत्यस्वरसेनैव द्वितीयस्थलातिव्याप्त्यवतरणं पूर्वाभिप्रायविरोधादनुपादेयम् । न मनोगुणादिवृत्तीति । विशेष्ये शुद्धे तदवृत्तित्वसत्त्वेऽपि विशिष्टे तत्र तद्वृत्तित्वाभावोऽक्षत एव । एकरूपावच्छिन्न एव तत्तदभावयोर्विरोधेनावृत्तेरित्यभिमानः । न चैवं विशिष्टान्तानुपादानेऽपि सत्तादौ विशिष्टसत्तात्वादिना गुणाद्यवृत्तित्वसत्त्वेन विशिष्टसत्ताद्यभावस्य लक्षणघटकतयाऽतिव्याप्त्यप्रसक्तेर्न विशिष्टान्तव्यावृत्तिसम्भव इति वाच्यम् । प्रतियोगिनि किञ्चिद्रूपावच्छिन्ने हेत्वधिकरणयत्किञ्चिद्व्यक्तिवृत्तित्वाभावस्य लक्षणघटकत्वे सत्तावान् द्रव्यत्वादित्यादावपि सत्तात्वाद्यवच्छिन्नाभावस्य लक्षणघटकत्वापत्त्याऽव्याप्त्यापत्तेः, हेत्वधिकरणावृत्तित्वस्य तद्वृत्तिभिन्नत्वरूपस्यैव निवेशनीयतया विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्ताद्यभावस्य लक्षणघटकत्वानिर्वाहेणाऽतिव्याप्तिप्रसक्तेः । प्रतियोगितावच्छेदकविशिष्टत्वोपादाने प्रतियोगितावच्छेदकविशिष्टत्वावच्छेदेन हेत्वधिकरणवृत्तित्वात्यन्ताभावस्यैव निवेशनीयतया विशिष्टसत्ताद्यभावस्य लक्षणघटकतानिर्वाहेणाऽतिव्याप्तिवारणसम्भवाद्व्यावृत्तिसङ्गतेः । सामान्यपदप्रयोजनमाह । संयोगसामान्यं चेति । संयोगी द्रव्यत्वादित्यादौ संयोगत्वावच्छिन्नाभावप्रतियोगिन्यां यत्किञ्चित्संयोगव्यक्तौ हेत्वधिकरणयत्किञ्चिद्घटादिव्यक्त्यवृत्तित्वसम्भवेऽपि तत्प्रतियोगिसामान्ये तदसत्त्वेन तादृशाभावस्य लक्षणाघटकतया नाऽव्याप्तिरित्यर्थः ।

विशेष्यवृत्तेर्विशिष्टानुयोगिकत्वाद्यथोऽप्रामाणिक इत्याशयं न दूषयति। विशिष्टस्य ऽनतिरिक्तत्वादिति। तथा चोभयत्वादिविशिष्टस्य मूर्तत्वादेः शुद्धमूर्तत्वानतिरिक्ततया मूर्तत्वादिवृत्तेर्मनोवृत्तित्वादेरभावस्योभयत्वादिविशिष्टेऽपि तस्मिन्नसम्भवात् मूर्तत्वमूर्तत्वाभयवान्मूर्तत्वादित्यादावतिव्याप्तिः विशिष्टान्तोपादानेऽपि दुर्वारैवेतिभाव। न च भूतत्वमूर्तत्वोभय न मनसि, गुणान्यत्वविशिष्टसत्ता न गुणे इत्यादिसर्वानुभवसिद्धप्रतीतिबलादुभयत्वविशिष्टसत्तात्वाद्यवच्छिन्ने मनोगुणादिवृत्तित्वाभावसिद्धेरावश्यकत्वान्नातिव्याप्तिरिति वाच्यम्। तादृशप्रतीत्या मनोगुणाद्यधिकरणकवृत्तिताविच्छिन्नविशिष्टसत्तात्वावच्छिन्नाभावस्यैवावगाहनात्। जातौ न किञ्चित्समवैतीति निश्चयदशायां जातौ न भूतत्वमूर्तत्वोभय न वा विशिष्टसत्तेति प्रतीति वत् मनसि गुणे न किञ्चित्समवैतीति भ्रमदशायामपि तादृशप्रतीतेरनुभविकतया मनोगुणादिसमवेतत्वाभावस्य तद्विषयत्वासम्भवेन मनोगुणाद्यधिकरणकाभावस्य तद्विषयताया आवश्यकत्वात्तादृशभ्रमाभावकालीनतयाकारकप्रतीतावपि तस्यैव विषयत्वौचित्यात्, अन्यथा कल्पनागौरवापत्ते। भूतत्वमूर्तत्वोभय न मनोवृत्ति गुणान्यत्वविशिष्टसत्ता न गुणवृत्तिरित्यादिप्रत्ययश्च तादृशोभयत्वविशिष्टसत्तात्वादौ मनोगुणादिवृत्तित्वावच्छेदकत्वाभाव तादृशवृत्तित्वे तादृशोभयत्वविशिष्टसत्तात्वावच्छेद्यत्वाभाव वाऽवगाहते तादृशाभावस्य क्लृप्तत्वात्। न च यत्किञ्चिद्धेत्वधिकरणवृत्तितानवच्छेदकत्वप्रतियोगितावच्छेदकत्वधर्म एव विवक्षणीयम्, उभयत्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकोभयत्वादेश्च मनोगुणादिवृत्तितानवच्छेदकत्वात्तादृशाभावसग्रहेण नातिव्याप्तिरिति वाच्यम्। गुणान्यत्वविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकस्य वैशिष्ट्यसहितसत्तात्वस्य गुणादिवृत्तितावच्छेदकशुद्धसत्तात्वाद्यनतिरिक्ततया तदनवच्छेदकत्वासम्भवेनोक्तविवक्षयाऽपि तादृशाभावसग्रहासम्भवात्। यदभावीयप्रतियोगितावच्छेदकताया यत्किञ्चिद्धेत्वधिकरणवृत्तितावच्छेदकत्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तताविरहस्तादृशाभावनिवेश दर्शितातिव्याप्तिपरिहार स्यात् इत्याशङ्क्य दूषणान्तरमाह। समवायेनेति। जातिमन्निष्ठतादृशाभावेति। जातिमन्निष्ठ यो घटत्वा-

घटाभावस्तस्यैव पटाद्यसमवेतप्रतियोगिकत्वेन तत्तत्प्रतियोगितायां जातित्वस्याऽनवच्छेदकत्वादिति भावः । जातिमद्वृत्तेर्जातित्वावच्छिन्नाभावस्य तादृशत्वं न सम्भवतीति स्फुटयति । जातिशून्ये चेति । तादृशसम्बन्धेन समवायसम्बन्धेन । अप्रसिद्धेरिति । तथा च जातिमद्वृत्तिर्यो ऽभावस्तत्प्रतियोगिसामान्ये हेतुमद्यत्किञ्चित्पदेन जातिशून्यमेवोपादायाऽवृत्तित्वान्तं घटनीयं तच्च न सम्भवति प्रतियोग्यप्रसिद्धा तदप्रसिद्धिरिति नाऽसौ लक्षणघटक इति भावः । जातेर्व्याप्यवृत्तितया तत्साध्यके प्रतियोगिवैयधिकरण्यस्य प्रयोजनविरहेणाऽप्रवेशेनोक्तदोषानवकाश इत्यव्याप्यवृत्तिसाध्यके पुनरऽतिव्याप्तिमाह । संयोगादीति । अतिव्याप्तिरिति । संयोगत्वावच्छिन्नाभावस्य हेत्वधिकरणयत्किञ्चिद्व्यक्त्यसमवेतप्रतियोगिसामान्यकत्वाभावेन लक्षणाघटकत्वादिति । तदसम्भवमेव स्फुटयति । अद्रव्य इति । हेतुमतीति-सामान्यादावित्यर्थः । अप्रसिद्धेरिति । तथा च यत्किञ्चिद्व्यक्तीत्यनेन न सामान्याद्युपादानसम्भव इति भावः । द्रव्ये च संयोगादेरपीति । तथा च द्रव्यमपि किञ्चित्पदेनोपादाय तादृशाभावस्य तथात्वं न शक्योपपादनमिति भावः ॥

(दी०) साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाऽभावस्य विवक्षितत्वात् । धूमसंयोगे वह्न्यधिकरणायोगोलकानुयोगिकत्वस्य, चैत्रान्यत्वविशिष्टैतद्दण्डसंयोगे एतद्दण्डाधिकरणचैत्रानुयोगिकत्वस्य, गुणकर्मान्यत्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः ॥

(गा०) साध्यतावच्छेदकसम्बन्धसामान्ये उभयाभावस्य विवक्षितत्वादिति योजना । तथा च स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वमभावे, स्वप्रतियोगितावच्छेदकेत्यत्र स्वावच्छेदकत्वं प्रक्षिप्य तादृशोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वं प्रतियोगितायां वा विशे

पण देयमिति भावः । जलादिसंयोगे वह्न्यादिप्रतियोगिकत्वधूमवदनुयोगिकत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गततत्तद्धूमाऽधिकरणानुयोगिकवह्निसंयोगे वह्निप्रतियोगिकत्वतदधिकरणानुयोगिकत्वोभयाभावासत्त्वान्न वह्न्यभावस्य लक्षणघटकतेति घटाभावमादायैव वह्निमान्धूमादित्यादौ लक्षणसमन्वयः । घटवान्महाकालत्वादित्यादौ पुनरवृत्तिगगनादेरभाव एव लक्षणघटकः, कालिकसम्बन्धसामान्ये तत्तत्प्रतियोगिकत्वाभावेनोभयाभावसौलभ्यात् । यत्किञ्चिद्धेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वाभावनिवेशे जातिमान्मेयत्वादित्यादावुक्तातिव्याप्तिवारणमशक्यम् । सामान्यानुयोगिकसमवायाऽप्रसिद्ध्या जात्याश्रयानुयोगिकसमवाये च जात्यादिप्रतियोगिकत्वसत्त्वेन जातित्वावच्छिन्नाभावस्य प्रतियोगिव्यधिकरणत्वानुपपत्तेः । एवं निरुक्तप्रतियोगिप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वाभावनिवेशे घटवान्महाकालत्वादित्यादावव्याप्तिवारणमशक्यम्, गगनत्वविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेर्गगनाभावस्यापि प्रतियोगिव्यधिकरणत्वानुपपत्तेरित्युभयाभावानुसरणम् । यत्किञ्चित्पदप्रयोजनमाह । धूमसंयोग इति । अयोगोलकानुयोगिकत्वस्य विरहादतिप्रसङ्ग इत्यनेनाऽन्वयः । साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतधूमसंयोगे धूमप्रतियोगिकत्ववह्निमदनुयोगिकत्वोभयोरेव सत्त्वेन तत्सामान्ये उभयाभावस्य दुर्घटत्वाद्यत्किञ्चित्पदानुपादाने धूमवान्वह्नेरित्यादावतिव्याप्तिः स्यात् । हेत्वधिकरणस्य हेतुमत्त्वेन न निवेशः किन्तु तत्तद्व्यक्तित्वेन यत्किञ्चिदेकहेतुमद्व्यक्तेर्निवेश इत्येतल्लाभाय तदुपादाने पुनर्हेत्वधिकरणायोगोलकानुयोगिकत्वस्य धूमसंयोगेऽभावादन्यसंयोगे च धूमप्रतियोगिकत्वस्याऽभावात् संयोगसामान्यस्यैवोभयाभाववत्त्वाद्धूमत्वावच्छिन्नाभावोऽपि लक्षणघटक इति नातिप्रसङ्ग इत्यर्थः । प्रतियोगितावच्छेदकविशिष्टार्थकनिरुक्तपदोपादानप्रयोजनं संयोगेन वैशिष्ट्यविशिष्टतद्दण्डत्वेनैव घटादिनिष्ठतद्दण्डसाध्यके एतद्दण्डहेतौ, समवायेन विशिष्टसत्तासाध्यके जातिरूपहेतौ चाऽतिव्याप्तिवारणरूपं दर्शयति । वैशिष्ट्यस्येति । निरुक्तपदानुपादाने

संयोगसामान्यान्तर्गतचैत्रनिष्ठैतद्दण्डसंयोगे हेत्वधिकरणचैत्रानुयोगिकत्वचैत्रान्यत्वविशिष्टैतद्दण्डाभावप्रतियोग्येतद्दण्डप्रतियोगिकत्वयोः, समवायसामान्यान्तर्गतगुणानुयोगिकसत्तासमवाये च हेत्वधिकरणगुणानुयोगिकत्वविशिष्टसत्ताभावप्रयोगिसत्ताप्रतियोगिकत्वयोर्द्वयोरेव सत्त्वेन तादृशाभावस्य लक्षणघटकता न स्यादिति प्रसक्तातिप्रसक्तेस्तदुपादानानावकाशः । चैत्रे गुणादौ च संयोगेन समवायेन च विशिष्टदण्डविशिष्टसत्तावैशिष्ट्यप्रत्ययात्तदनुयोगिकसंयोगसमवाययोर्विशिष्टदण्डत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिकत्वानभ्युपगमेनाऽन्यानुयोगिकयोश्च तयोश्चैत्रगुणाद्यनुयोगिकत्वाभावेनोभयाभावस्याऽक्षततया विशिष्टसाध्याभावस्याऽपि लक्षणघटकत्वादित्यर्थः ।

अथाऽत्र संयोगेन घटादौ साध्ये घटत्वादिहेतावतिव्याप्तिः संयोगसामान्यान्तर्गतघटादिसंयोगे घटाद्यनुयोगिकत्वघटादिप्रतियोगिकत्वोभयसत्त्वेन घटादिनिष्ठघटाद्यभावस्य लक्षणाघटकत्वात् । न च स्वस्मिन् संयोगेन स्वविशिष्टबुद्ध्यनुदयात् अन्यत्र विशिष्टबुद्धिनियामकघटसंयोगे घटप्रतियोगिकत्वमात्रम्, घटे ऽन्यविशिष्टधीमात्रनियामकसंयोगे च तदनुयोगिकत्वमात्रमिति घटानुयोगिकत्वतत्प्रतियोगिकत्वोभयं न कुत्रापि संयोगे ऽस्ति, न हि समवायेन संयोगाधिकरणत्वमेव संयोगानुयोगित्वं येन घटसमवेतसंयोगमात्रस्यैव घटानुयोगिकत्वं स्यात् । तथा सति तत्सम्बन्धानुयोगिताया एव तद्विशिष्टबुद्धिविषयताप्रयोजकत्वेन स्वस्मिन्नपि स्वविशिष्टबुद्ध्यापत्तेर्दुर्वारत्वात्, किन्तु सम्बन्धान्तरमेवेति वाच्यम् । येन सम्बन्धेन घटे ऽन्यविशिष्टधीस्तेन सम्बन्धेना ऽन्यत्र कदाचिद्घटविशिष्टबुद्धिजननादेकत्रैव संयोगे घटानुयोगिकत्वघटप्रतियोगिकत्वयोरुभयोरेवावश्यकत्वात् । यस्मिन्सम्बन्धे यत्प्रतियोगिकत्वविशिष्टे यदनुयोगिकत्वं तत्सम्बन्धेन तस्यैव तद्विशिष्टप्रमितेः । स्वप्रतियोगिकत्वविशिष्टे च संयोगे स्वानुयोगिकत्वानुपगमेन स्वस्मिन् तेन सम्बन्धेन स्वविशिष्टप्रमापत्त्यनवकाशात् इति चेन्न । संयोगेनाऽधिकरणांशे आधेयस्यैव विशिष्टबुद्धिर्जन्यते नत्वाधेयांशे, आधाराधेयभावानापन्नयोर्वृत्त्यनियामकसंयोगिनोश्च संयोगेन वि-

शिष्टबुद्धेरप्रामाणिकत्वात् । आधेयत्वानुपस्थितिकालीने भूतले घट इत्यादिप्रत्यये घटाधारे भूतलादेः प्रकारत्वेऽपि आधेयताया एव संसर्गतोपगमात्, न तु संयोगस्य । एवं सति वृत्त्यनियामकस्य गगनादिसंयोगस्य सम्बन्धत्वानुपपत्तिः विशिष्टबुद्धिनियामकस्यैव तथात्वादिति चेत् का क्षतिः । एवं च येन संयोगेनाऽन्यत्र घटादिविशिष्टबुद्धिर्जन्यते घटस्य तत्संयोगाश्रयानाधारत्वेन घटे न तेन सम्बन्धेनाऽन्यविशिष्टबुद्धिर्जन्यते इति संयोगमात्र एव तत्प्रतियोगिकत्वतदनुयोगिकत्वोभयाभावस्याऽक्षतत्वात् ।

अथ यस्य घटस्याऽधःस्थितपटे येन संयोगेन घटविशिष्टबुद्धिर्जनिता तेनैव च संयोगेन पटेन समं परिवृत्य स्थापिते तद्घटे पटविशिष्टबुद्धिरपि जन्यते तत्र संयोगे घटप्रतियोगिकत्वघटानुयोगिकत्वोभयस्यावश्यकतया संयोगेन घटसाध्यके तद्घटतत्पटान्यतरत्वरूपेण हेतुतायामतिव्याप्तिर्दुर्वारैवेति चेत् । एवं सति साध्यतावच्छेदकसम्बन्धानुयोगितासामान्ये निरुक्तप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभाव एव विवक्षणीयः । स्वस्मिन् स्वविशिष्टबुद्ध्यनुदयेन स्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगितायामसत्त्वात् संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वतद्घटनिष्ठत्वोभयाभावोऽक्षत एवेति । एवं च यद्वेतत्कल्पे समवायस्यमतेऽतिव्याप्तिमुद्भावयिष्यति तद्यथाश्रुताभिप्रायेणेति ध्येयम् ।

अथ द्रव्यत्वादिकं प्रति पर्याप्तिसम्बन्धेन द्वित्वादेर्व्यापकत्वापत्तिः । हेतुमत एकैकद्रव्यस्य पर्याप्तिसम्बन्धेन द्वित्वाद्यनधिकरणत्वेऽपि द्वित्वादिपर्याप्तौ हेत्वधिकरणतत्तद्व्यक्त्यनुयोगिकत्वाभाववत्त्वादिति द्रव्यत्वादिना पर्याप्तिसम्बन्धेन गगनादेः द्वित्वाद्यनुमानापत्तिः । न चेष्टापत्तिः, एकविशेष्यकपर्याप्तिसंसर्गकव्यासज्यवृत्तिधर्मप्रकारकबुद्धेर्भ्रमतया तल्लिङ्गकपरामर्शात्तादृशानुमित्युपगमासम्भवात् । न चैकमात्रवृत्तिधर्मावच्छेदेन द्वित्वादिपर्याप्त्यैकस्मिन्नभ्रमत्वेऽपि उभयादिवृत्तिधर्मावच्छेदेन तत्पर्याप्तिसम्बन्धेन सम्बन्धेन तद्वति तत्प्रकारकत्वरूपप्रमात्वं दुर्वार-

मिति वाच्यम्। तद्व्यावृत्तप्रमालक्षणस्याऽपि कथञ्चिन्निर्वचनसम्भवादिति चेन्मैवम्। उद्देश्यतावच्छेदकानतिरिक्तवृत्तित्वाविशेषितपर्याप्तेः क्वचिदपि सम्बन्धत्वानभ्युपगमेन तादृशपर्याप्तिसंसर्गकानुमितेरापादनासम्भवात्। गगनत्वाद्यनतिरिक्तवृत्तित्वविशेषितपर्याप्तेर्द्वित्वादिप्रतियोगिकत्वाभावेन द्वित्वादिनिष्ठव्यापकत्वाघटकतया तादृशसम्बन्धेनापि तदनुमित्यापत्त्यनवकाशात्।

यत्तु हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वस्थले हेतुमत्त्वपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानुयोगिताकत्वं निवेश्यम्। द्वित्वादिपर्याप्तौ च द्रव्यत्वादिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वविरहान्न तेन सम्बन्धेन द्वित्वादेर्द्रव्यत्वादिरूपप्रत्येकपर्याप्तधर्मव्यापकतापत्तिः। हेतुमद्वृत्तियत्किञ्चिद्धर्मावच्छिन्नानुयोगिताकत्वनिवेशे इमे बहवस्त्रित्वादित्यादौ पर्याप्तिसम्बन्धेन हेतुसाध्यभावेऽव्याप्तिः हेतुमदेकमात्रवृत्तिधर्मावच्छिन्नानुयोगिताकत्वस्य बहुत्वादिपर्याप्तावसत्त्वेन तादृशसाध्याभावे निरुक्तप्रतियोगिवैयधिकरण्यस्य दुर्वारत्वात् अतो हेतुपर्याप्त्यवच्छेदकयत्किञ्चिद्धर्मनिवेश इति। तन्न मनोरमम्। एतादृशरीत्या उक्तकल्पपरिष्कारेऽपि प्रतियोगिमद्भेदे हेतुपर्याप्त्यवच्छेदकावच्छिन्नानुयोगिताकत्वस्याऽग्रिमकल्पे विवक्षणे आकाश आकाशघटोभयत्वादित्यादौ अतिव्याप्तेर्दुर्वारत्वात् आकाशत्वाद्यवच्छिन्नभेदस्य दर्शितहेतुपर्याप्त्यवच्छेदकतदुभयवृत्तिधर्मावच्छिन्ने ऽसत्त्वात्, प्रतियोगिवृत्तिधर्मस्य भेदाधिकरणतानवच्छेदकत्वात्। न च व्यासज्यवृत्तिधर्मसाध्यके ईदृशी रीतिरुपादेया नाऽन्यत्रेति वाच्यम्। आकाशत्वादेराकाशघटादौ व्यासज्यवृत्तित्वभ्रमदशायां तदवच्छिन्नभेदस्य प्रत्येकं हेत्वधिकरणवृत्तित्वग्रहेऽपि आकाशघटोभयत्वादिहेतुना आकाशत्वाद्यनुमित्युत्पत्त्या तन्निर्वाहाय तत्राऽपि साधनपर्याप्त्यवच्छेदकावच्छिन्नाधिकरणताकप्रतियोगिमद्भेदघटितव्याप्तिज्ञानहेतुताया वाच्यतया तत्राप्यनुमितौ विषयिकव्याप्तिप्रसिद्ध्यापत्तेः तस्माद्द्वित्वादिसाध्यकद्रव्यत्वाकाशत्वादिकं सद्धेतुरेव। इमे बहवस्त्रित्वादित्यादावव्याप्तिवारणाय च पर्याप्त्यतिरिक्तस्वरूपसम्बन्धेन प्रतियोग्यधिकरणत्वावच्छिन्नस्य भेद एव हेतुमति निवेशनीयो न तु प्रतियोग्यवच्छिन्नभेदः प्रतियोगिमद्वृत्तिधर्मवत्त्वं वा तेन

प्रत्येकवृत्तिवह्नत्वाद्यवच्छिन्नभेदमादाय न तदभावस्य प्रतियोगिवैयधिकरण्यमित्येव सारम् ।

इदं तु बोध्यम् । साध्यतावच्छेदकावच्छिन्नाभावनिरूपितत्वविशिष्टसाध्यवन्निष्ठाधिकरणताभिन्नहेतुमन्निष्ठाधिकरणताकत्वमेव प्रतियोगिव्यधिकरणहेतुसमानाधिकरणेति प्रतीकार्थः । महाकालो घटवान् महाकालत्वादौ च नैतादृशविशेषणाक्रान्ताभावाप्रसिद्धिः कालिकसम्बन्धावच्छिन्नपदार्थाभावस्यैव तथात्वात् । हेतुमन्निष्ठतदधिकरणताया साध्याभावाधिकरणताभिन्नत्वसत्त्वेन विशिष्टभेदसत्त्वात् इत्युभयाभावघटितप्रतियोगिवैयधिकरण्यानुधावनं दीधितिकृतामफलमेव । एवं च प्रतियोगिवैयधिकरण्यस्य यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत इत्यादिक्रमेण निर्वचने ऽननुगमात् तत्तत्प्रतियोगितावच्छेदकत्वाभावकूटनिवेशने व्याप्तेर्दुर्ज्ञेयतेति दूषणान्तरमनवकाशमिति दिक् ॥

ननु गगनादेरपि कालिकसम्बन्धेन कालवृत्तित्वमावश्यकम्, अन्यथा तेषां परमार्थसत्त्वानुपपत्तिस्तस्य कालवृत्तित्वरूपत्वात् एवं कारणत्वानुपपत्तिश्च तस्य पूर्वकालवृत्तित्वघटितत्वात् अवृत्तित्वप्रवादश्च तत्र कालिकातिरिक्तसम्बन्धेना ऽवृत्तित्वपरः । इत्थं च कालिकसम्बन्धसामान्ये गगनादिप्रतियोगिकत्वमहाकालानुयोगिकत्वोभयाभावोऽपि दुर्लभ इति तदभावेऽपि प्रतियोगिवैयधिकरण्यं दुर्घटम् । एवं स्वरूपसम्बन्धेन गगनादेरवृत्तित्वपक्षेऽपि विषयितया घटादिसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः, विषयितासम्बन्धेन पदार्थमात्रस्यैव हेत्वधिकरणनित्यज्ञानसम्बद्धत्वात् तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरित्यालोच्य कल्पान्तरमाह—स्वरूपेत्यादिना ।

अत्र केचित् । साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वसाध्यप्रतियोगिकत्वैतन्नित्यावच्छिन्नाभावस्य विवक्षणान्न विषयितासम्बन्धेन घटादिसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः, पटाद्यभावस्यैव तेन सम्बन्धेन प्रतियोगिव्यधिकरणत्वात् । घटपटविषयित्वयोर्भिन्नत्वेन विषयितासम्बन्धसामान्ये तादृशत्रित्वावच्छिन्नाभावस्य सत्त्वात् । न चैतत्त्रित्वावच्छिन्नाभावनिवेशो स्व-

रूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वेऽपि न घटादिसाध्यककालत्वादि-हेतावव्याप्तिः, प्रतियोगिभेदेन कालिकसम्बन्धस्यापि विभिन्नतया गगनाद्यभावस्यैव तादृशप्रतियोगिव्यधिकरणत्वादिति वाच्यम् । कालिकसम्बन्धेन प्रमेयसामान्यसाध्यकस्थले ऽव्याप्तेः, तत्र सर्वस्यैव साध्यतया कालिकसम्बन्धसामान्ये एव साध्यप्रतियोगिकत्वसत्त्वेनोपदर्शितत्रित्वावच्छिन्नाभावस्याऽसत्त्वात् । प्रमेयसामान्यस्य व्याप्यवृत्तित्वेऽपि तस्या ऽव्याप्यवृत्तित्वभ्रमदशायामनुमित्युपपत्त्यर्थं तत्र प्रतियोगिव्यधिकरणत्वघटितव्याप्त्युपपादनस्यावश्यकत्वात् । एतत्क्षणवृत्तित्वविशिष्टप्रमेयसामान्यसाध्यकमहाकालत्वादिहेतोरव्याप्यवृत्तिसाध्यकत्वेन तत्राव्याप्तेश्च । न च तथाऽपि विषयितासम्बन्धेन प्रमेयसामान्यसाध्यके नित्यज्ञानत्वादिहेतावव्याप्तिः सम्भवात्कथं त्वदुक्तिसङ्गतिरिति वाच्यम् । साध्यप्रतियोगिकत्वेत्यनेन साध्यतावच्छेदकविशिष्टप्रतियोगिकत्वस्य विवक्षणात् प्रमेयत्वविशिष्टघटविषयितातो घटत्वविशिष्टघटविषयिताया भिन्नत्वेन घटाद्यभावस्य प्रतियोगिव्यधिकरणत्वात् । न चेश्वरज्ञानीयप्रमेयत्वविशिष्टघटविषयितायां तादृशत्रित्वावच्छिन्नस्य सत्त्वेन कथं तत्र घटाद्यभावस्य प्रतियोगिवैयधिकरण्यमिति वाच्यम् । निरुक्तप्रतियोगिप्रतियोगिकत्वेत्यनेन यदभावीयप्रतियोगितावच्छेदकपर्याप्तप्रतियोगितावच्छेदकताकत्वस्य विवक्षणादीश्वरज्ञानीयतादृशविषयितायां प्रमेयत्वस्याऽपि निरूपकतावच्छेदकत्वेन घटत्वपर्याप्तप्रतियोगितावच्छेदकताकत्वाभावेन घटाद्यभावस्य प्रतियोगिव्यधिकरणत्वात् । इत्थं च स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे कालिकसम्बन्धेन घटादिसाध्यकस्थले ऽप्यव्याप्तिः सम्भवति. प्रमेयत्वादिविशिष्टघटनिरूपितकालिकविशेषणतातो घटत्वविशिष्टघटनिरूपितकालिकविशेषणताया अभिन्नत्वेन कालिकसम्बन्धसामान्ये घटत्वपर्याप्तावच्छेदकताकत्वाभावेन घटाद्यभावस्यापि प्रतियोगिव्यधिकरणतया तत्प्रतियोगितावच्छेदकत्वस्य घटत्वे सत्त्वात् इदानीं प्रमेयघटः इदानीं घट इत्यादिप्रत्ययानामेकेनैव कालिकविशेषणत्वेनोपपत्तेर्निरूपकतावच्छेदकभेदेन तादृशसम्बन्धभेदस्या ऽनभ्युपगमादतः कल्पान्तरमनुसरति–स्वरूपसम्बन्धेनेतीत्याहुः । तदसत् । तथा

सति स्वरूपसम्बन्धेन गगनादेरवृत्तित्वेऽपि विषयितासम्बन्धेन घटादिसाध्यके प्रमेयत्वविशिष्टघटादिमात्रविषयकज्ञानमात्रवृत्तिहेतावतिव्याप्तेः । स्वरूपसम्बन्धेन गगनादेरवृत्तित्वेऽपि नित्यज्ञानीयप्रमेयत्वादिशिष्टघटनिरूपितविषयितातो नित्यज्ञानीयघटत्वविशिष्टनिरूपितविषयिताया अभिन्नत्वेऽपि क्षतिविरहेण विषयितासम्बन्धेन घटादिसाध्यके ईश्वरज्ञानमात्रवृत्तिहेतावव्याप्तेर्दुर्वारत्वाच्च ।

एतेन साध्यतावच्छेदकविशिष्टप्रतियोगिकसाध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तोभयाभावस्य विवक्षणान्न घटवान्नित्यज्ञानत्वादित्यादावव्याप्तिः, तत्र घटत्वविशिष्टनिरूपितविषयितासामान्ये पटप्रतियोगिकत्वाभावेन पटाभावस्यापि प्रतियोगिव्यधिकरणत्वात् । स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु घटवान्महाकालत्वादित्यादावुक्तक्रमेण पर्याप्तिनिवेशस्याऽऽवश्यकतया घटाभावस्याऽपि प्रतियोगिव्यधिकरणतयाऽव्याप्तिरतः कल्पान्तरानुसरणमित्यपि परास्तम् । उक्तस्थले साध्यनिरूपितविषयितासम्बन्धसामान्यान्तर्गतप्रमेयत्वविशिष्टघटनिरूपितविषयितायां घटत्वपर्याप्तावच्छेदकताकत्वाभावेन शुद्धघटत्वविशिष्टनिरूपितविषयितया च हेत्वधिकरणानुयोगिकत्वाभावेन साध्यनिरूपितविषयितासामान्ये उभयाभावस्य सत्त्वादव्याप्तेः । तस्मात्प्राचीनमते वृत्त्यनियामकविषयितादिसम्बन्धेन व्याप्त्यनभ्युपगमादुक्तस्थलेऽव्याप्त्यसम्भवात् । कालिकसम्बन्धेन गगनादेरवृत्तित्वे तु घटवान् महाकालत्वादित्यादावव्याप्तिरतः कल्पान्तरमनुसरति ॥

(टी०) स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम् । समवायसम्बन्धेन प्रमेयसामान्याभावस्य सामान्यादौ सत्त्वात्प्रमेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम् ।

(गा०) स्वरूपसम्बन्धेन—कालिकविशेषणतासम्बन्धेन । निरुक्तप्रतियोग्यनधिकरणेति । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छे-

दकावच्छिन्नानधिकरणेत्यर्थः । एवं च स्वावच्छिन्नान्यसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभाववत्तादृशप्रतियोगितासामान्यको यो धर्मस्तदवच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नविधेयकानुमित्यौपयिकी व्याप्तिरिति पर्यवसितम् । घटवान्महाकालत्वादित्यादौ समवायादिना घटाद्यभावीयप्रतियोगितैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिरूपिका प्रसिद्धा, तादृशप्रतियोगितासामान्ये कालिकसम्बन्धावच्छिन्नत्वाभावादेव निरुक्तोभयाभावसत्त्वमक्षतमिति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ संयोगादिना घटाद्यभावप्रतियोगितायां समवायादिना धूमाद्यभावप्रतियोगितायां च धूमत्वाद्यवच्छिन्नान्यसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाभावप्रतियोगिताया अपि निरुक्तप्रतियोगितासामान्यान्तर्गतत्वेन तत्रोभयाभावासत्त्वान्नातिव्याप्तिः । धूमादिसमानाधिकरणस्य समवायादिना वह्न्याद्यभावस्य संयोगादिना घटाद्यभावस्य च प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसम्बन्धावच्छिन्नत्वयोरेकैकस्य सत्त्वेऽप्येकैकाभावेन द्वित्वावच्छिन्नाभावसत्त्वाल्लक्षणसमन्वयः ।

यद्यपि तादृशाभावीयसाध्यतावच्छेदकधर्मावच्छिन्नप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमात्रस्याऽभावनिवेशेऽपि सामञ्जस्यम् । इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वत्वावच्छिन्नभेदादिप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य विरहमादाय, प्रमेयसामान्यसाध्यके संयोगेन जन्यत्वविशिष्टघटादिहेतौ साध्यतावच्छेदकावच्छिन्नभेदस्य संयोगसमवायकालिकविशेषणतासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य च हेतुमत्यसम्भवेऽपि विषयितासम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य, ज्ञानमात्रवृत्तिहेतौ च संयोगसम्बन्धावच्छिन्नतदवच्छिन्नाभावस्य तद्वतिप्रसिद्ध्या तदीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायामुक्तसम्बन्धावच्छिन्नत्वस्य विरहमादाय लक्षणसमन्वयसम्भवः । तथाऽपि हेतुमति सर्वैरेव सम्बन्धैः साध्यं वर्तते न तु कस्यामपि तादृशाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वमिति भ्रमदशायामप्यनुमितेरानुभविकतया तदानीं साध्यतावच्छेदकावच्छिन्नत्वेन तादृशाभा-

यप्रतियोगित्वज्ञानासम्भवात्तद्विशेषितप्रतियोगिताधर्मिकसम्बन्धप्रवि शेषावच्छिन्नस्वाभावज्ञानस्याऽनुमितिहेतुता न सम्भवतीत्युभयाभा- धानुसरणम् ।

वस्तुतस्तु अभावज्ञानज्ञानप्रत्यन्यतमवान्योगिज्ञानत्वादित्यादाव व्याप्तिर्बोध्या । तत्र प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावी यसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वाप्रसिद्धे । एव निरुक्तप्रति- योग्यनधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्न- प्रतियोगितासामान्ये निरुक्तधर्मावच्छिन्नत्वाभाववति वेशे कालो घट- वानित्यादावव्याप्तेरपरिहारो बोध्य इति ।

प्रमेयवाद्यवच्छिन्नसाध्यकस्थले साध्यतावच्छेदकावच्छि- न्नाभावाप्रसिद्धया तदवच्छिन्नत्वमप्यप्रसिद्धमिति शङ्का परिहरति । समवायेनेति । यद्यपि विषयतादावपि तदवच्छिन्नत्वप्रसिद्धिस- म्भवस्तथाऽपि विषयतादिनिष्ठायास्तत्प्रकारकत्वादिरूपतदवच्छे द्यताया प्रतियोगितानिष्ठाया अन्यूनानतिरिक्तवृत्त्यगुरुधर्मनिरूपित विलक्षणावच्छेद्यतायाश्च एकजातीयत्वस्याऽप्रामाणिकत्वेनाऽतिव्या प्तिभयेन प्रतियोगिताया यादृशमवच्छिन्नत्व तस्यैव लक्षण निवेशः कार्य इत्यभिप्रायेण तादृशावच्छिन्नत्वस्यैव प्रसिद्धिर्दर्शिता । अन्य त्सर्वं स्वयमूह्यम् ।

पूर्वकल्पे दोषान्तरमपि दर्शयति । अत एवेति । पूर्वकल्प परित्यज्यैतत्कल्पावलम्बनादेवेत्यर्थ । समवायस्योभयत्वे हेतु, एकत्वेनेति । उभयवत्त्वेपीत्यनेन द्रव्यत्वाभावे हेत्वधिकरणगुणादौ उभयाभावघटितप्रतियोगिवैयधिकरण्यासम्भव. सूचित. । द्रव्य जातेरित्यादावपि । नाऽतिव्याप्तिरित्यग्रिमेणाऽन्वय । यद्यपि प्रति- योगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्व प्रतियोगि- निरूपिततादृशसम्बन्धानुयोगित्वम् । अधिकरणतानिवेशे तादा- त्म्येन साध्यताया व्यभिचारिण्यतिव्याप्ते ,तथा च समवायैक्ये गुणा- देरपि द्रव्यत्वप्रतियोगिकसमवायानुयोगिता निष्प्रत्यूहैवेत्येतत्कल्पे- ऽपि समवायेन द्रव्यत्वाभावस्य लक्षणघटकत्वानिर्वाहः तथा- ऽपि स्वप्रतियोगिप्रतियोगिकत्वविशिष्टतादृशसम्बन्धनिरूपितवि- लक्षणानुयोगिताया एव निवेशनीयतया गुणादिनिष्ठसमवाया नुयोगितायाश्च द्रव्यत्वीयविशिष्टानिरूपितत्वेन न दोष । वस्तुत-

स्वप्रतियोगितावच्छेदकसम्बन्धेन विशिष्टप्रतियोग्यवच्छिन्नभेदो हेतुमद्विशेषणम्। एवं च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व-विशिष्टसम्बन्धानानुयोगिन्येव भेदाभ्युपगमात्समवायैक्यमतेऽपि समवायेन द्रव्यत्वाद्यवच्छिन्नभेदस्य गुणादावक्षतत्वाद् द्रव्यत्वाद्य-भावस्य गुणादौ समवायेन प्रतियोगिवैयधिकरण्यमव्याहतमेवेति।

इदमत्रावधेयम्। समवायकालिकविशेषणताद्युभयसम्बन्धेन यत्र द्रव्यत्वादेः साध्यता केवलसमवायादिना द्रव्यत्वादेर्हेतुता तत्र साध्यतावच्छेदकसम्बन्धसामान्यान्तर्गतगगनानुयोगिकसमवायाद्या-घुक्तोभयाभावासत्त्वेनाऽतिव्याप्तिः समवायभेदमतेऽपि दुर्वारा। साध्यतावच्छेदकसम्बन्धतावच्छेदकरूपाविशिष्टनिरूपितानुयोगिता सामान्ये निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वहेत्वधिक-रणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वोभयाभावविवक्षणेन तादृशदोषवारणे च निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वस्थाने निरुक्त प्रतियोगिप्रतियोगिकत्वविशिष्टसम्बन्धनिरूपितत्वनिवेशेन द्रव्यं जा-तेरित्यादावप्यतिव्याप्तिः शक्यते वारयितुमिति ।

इदं त्ववधेयम् । स्वसमवायिसंयोगादिसम्बन्धेन यत्र लौहि-त्यादेः साध्यता तत्र सद्धेतावेतत्स्फटिकत्वादावुभयाभावघटित-प्रतियोगिवैयधिकरण्यनिवेशपक्षे स्फटिकाद्यनुयोगिकजपादिसंयोगे लौहित्यादिनिरूपितपरम्परासम्बन्धघटकसाक्षाल्लौहित्यप्रतियोगिक-त्वाभावेन हेतुमन्निष्ठसाध्याभावे प्रतियोगिवैयधिकरण्यं दुर्वारम् । साक्षात्परम्परासम्बन्धघटकसाधारणं तत्प्रतियोगिकत्वं चानुगतं दुर्वचम्। तादृशस्य तस्य निवेशे ऽयोगोलकाद्यनुयोगिकवह्निसंयो-गादेरपि धूमादेः परम्परासम्बन्धघटकत्वसम्भवेन धूमादिप्रतियो-गिकतया तन्निष्ठधूमाद्यभावेऽपि प्रतियोगिवैयधिकरण्यानुपपत्तेः। न च तादृशसंयोगे संयोगत्वपुरस्कारेण साक्षाल्लौहित्यप्रतियोगिकत्व-विरहेऽपि साध्यतावच्छेदकसम्बन्धतावच्छेदकस्वसमवायिसंयो-गत्वपुरस्कारेण तत्प्रतियोगिकत्वं स्वीक्रियते इति वाच्यम् । माना-भावात्, समवायस्य तत्प्रतियोगिकतयैव तद्घटितपरम्परायाः सम्बन्धतोपपत्तेः । किञ्चिद्दूरेणाऽपि संयोगादेर्लौहित्यादिप्रतियो-गिकत्वे संयोगादिना किञ्चित्समवायिनिरूपितत्वविशिष्टसंयोगा-दिना वा साक्षात्सम्बन्धात्मकेन स्फटिकादौ लौहित्यादिबुद्धेर्भ्र-

मत्वानुपपत्तेश्च । यादृशसम्बन्धे यत्प्रकारप्रतियोगिकत्वयद्विशेष्यानुयोगिकत्वोभयाभावस्तादृशसम्बन्धेन तत्प्रकारकतद्विशेष्यकज्ञानं भ्रम इति तल्लक्षणात् । स्वसमवायिसंयोगे चोभयसत्त्वेनाभयाभावासत्त्वात् । न च सम्बन्धभेदेन व्यापकताभेदात्स्वसमवायिसंयोगादिरूपपरम्परासम्बन्धेन यत्र साध्यता तत्र परम्पराघटकविशेष्यांशे स्वप्रतियोगिप्रतियोगिकत्वमुपक्ष्य स्वप्रतियोगिप्रतियोगिकपरम्पराघटकविशेषणसमवायादिसम्बन्धप्रतियोगिकत्वस्यैवाऽभावो निवेशनीयः । परम्परानिवृत्तावपि ईदृशरीत्या ग्राह्यमिति नानुपपत्तिरिति वाच्यम् । यत्र कालिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन घटादिकं साध्यं महाकालवृत्तित्वादिकं हेतुस्तत्र कालिकसम्बन्धेन गगनादिवृत्तित्वपक्षे प्रतियोग्यधिकरणाप्रसिद्धेर्दुर्वारत्वात् । गगनादिनिरूपितस्य तादृशसामानाधिकरण्यरूपपरम्परासम्बन्धघटकविशेषणांशस्य कालिकसम्बन्धस्याऽप्रसिद्धेः । विशेषणीभूतसम्बन्धविशिष्यानन्तर्द्वय निरुक्तप्रतियोगिप्रतियोगिकसम्बन्धत्वेन सम्बन्धनिवेशे तद्प्रतियोगिकत्वनिवेशे कालिकविशेषणतावत्समवेतत्वरूपपरम्परासम्बन्धेन द्रव्यत्वादिसाध्यके द्रव्यवृत्तित्वादिहेतावतिव्याप्तिः, तत्र साध्यतावच्छेदकपरम्परासम्बन्धघटकविशेष्यीभूतसमवेतत्वांशे व्यभिचारनिरूपकाधिकरणगगनाद्यनुयोगिकत्वद्रव्यप्रतियोगिकसम्बन्धत्वावच्छिन्नद्रव्यत्वसमवायप्रतियोगिकत्वोभयसत्त्वेन द्रव्यत्वाभावासिद्धेः । हेत्वधिकरणानुयोगिकविशेष्यीभूतसम्बन्धप्रतियोग्यनुयोगिकत्वनिरुक्तप्रतियोगिप्रतियोगिकत्वोभयाभावस्य परम्परासम्बन्धघटकविशेषणादौ निवेशे स्वसमवायिसमवेतत्वसम्बन्धेन जातिसाध्यकमेयत्वादिहेतावतिव्याप्तिः, तत्र तादृशसम्बन्धघटकविशेषणांशे तादृशसम्बन्धेन साध्याधिकरणहेत्वधिकरणद्रव्यस्यानुयोगिकविशेष्यीभूतसम्बन्धप्रतियोग्यनुयोगिकत्वनिरुक्तप्रतियोगिकत्वोभयसत्त्वात् । व्यभिचारनिरूपकाधिकरणहेत्वधिकरणानुयोगिकविशेष्यीभूतसम्बन्धाप्रसिद्धेः साध्याभावस्य लक्षणाघटकत्वेनाभावान्तरस्यैव लक्षणघटकत्वात् । न च परम्परासम्बन्धघटकविशेष्यांशे हेत्वधिकरणवृत्तिविशिष्टत्वानुयोगिकत्वपरम्पराघटकविशेषणीभूतसम्बन्धनिरूपितत्वनिरुक्तप्रतियोगिप्रतियोगिकसम्बन्धनिरूपितत्वानां प्र

पाणामभावनिवेशाच्च दोषः गगनादिनिरूपितकालिकसम्बन्धाप्रसिद्धावपि तन्निरूपिततादात्म्यविषयितादिसम्बन्धवन्निरूपितत्वप्रसिद्ध्या त्रित्वावच्छिन्नाभावसौलभ्यादिति वाच्यम् । स्वरूपकालिकोभयसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन जन्यज्ञानादेः साध्यत्वे व्यभिचारिणि कालवृत्तित्वादावतिव्याप्त्यापत्तेः । व्यभिचारनिरूपकाधिकरणप्रलयत्वादिनिष्ठायामुक्तसम्बन्धघटकाधेयतायां कालिकसम्बन्धवन्निरूपितत्वसाध्यीयविषयतासम्बन्धवन्निरूपितत्वयोः सत्त्वेनाधेयतासामान्ये दर्शितत्रित्वावच्छिन्नाभावासत्त्वेन साध्याभावस्य प्रतियोगिवैयधिकरण्यानिर्वाहात् । प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे च नेयमनुपपत्तिः । हेत्वधिकरणस्फटिकादिनिष्ठस्य समवायादिना प्रतियोगिव्यधिकरणस्याभावस्य समवायादिसम्बन्धावच्छिन्नप्रतियोगितायां स्वसमवायिसंयोगादिरूपपरम्पराया अवच्छेदकत्वाभावेनोभयाभावाक्षतेः । न च स्वसमवायिसमवायसम्बन्धेन घटरूपादिसाध्यके समवायादिना घटादिहेतावव्याप्तिः, तत्र किञ्चित्समवायिनिरूपितत्वविशिष्टस्वसमवायादिसम्बन्धावच्छिन्नायां हेतुमत्कपालादिनिष्ठसाध्याभावप्रतियोगितायां समवायिसमवायरूपसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसत्त्वात् । न हि तत्र दर्शितप्रतियोगितावच्छेदकसम्बन्धसाध्यतावच्छेदकसम्बन्धयोः शरीरवैलक्षण्यं किमपि शक्यते वक्तुम्, स्वांशस्य सम्बन्धाप्रवेशादितरांशस्याविशेषात् । इयाँस्तु विशेषः, दर्शितसाध्यतावच्छेदकसम्बन्धस्य सम्बन्धतया भाने प्रथमसमवायविषयता प्रकारतानिरूपिता द्वितीयसमवायविषयता विशेष्यतानिरूपिता, उक्तप्रतियोगितावच्छेदकसम्बन्धस्य सम्बन्धतया भाने द्वितीयसमवायविषयतैव प्रकारताविशेष्यतोभयनिरूपितेति, स चानुपयुक्त एवेति वाच्यम् । परम्परासम्बन्धावच्छिन्नाभावस्य हि प्रतियोगितावच्छेदकसम्बन्धता परम्पराघटकयावद्वस्तुषु विशेष्यविशेषणभावापन्नेषु पर्याप्ता, विशिष्टसाक्षात्सम्बन्धावच्छिन्नाभावस्य तु तादृशसम्बन्धता विशेष्य एव पर्याप्ता, विशेषणं तु सम्बन्धविधयाऽवच्छेदकतायामवच्छेदकमेव, न तु तदन्तर्भावेण सम्बन्धविधया प्रतियोगितावच्छेदकत्वस्य पर्याप्तिः, ईदृशरीत्यैवाभाववैलक्षण्यनिर्वाहात् । तथा च परम्परासम्बन्धेन

यत्र साध्यता तत्र परम्परापर्याप्तावच्छेदकताकत्वरूप साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व निवेशनीयम्, उक्तस्थले चाधिकरणविशेषणीभूतसमवायस्य प्रतियोगितावच्छेदकतायामेवावच्छेदकतया प्रतियोगितायां तदन्तर्भावेण पर्याप्तावच्छेदकताकत्वाभावादिति दिक् ।

अथैतल्लक्षणे विषयितादिवृत्त्यनियामकसम्बन्धेन साध्यतायामव्याप्तिः, तादृशसम्बन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नत्वस्याप्रसिद्धत्वात् । न च तादृशसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेऽपि प्रतियोगितावच्छेदकतायामेव तत्सम्बन्धावच्छिन्नत्वप्रसिद्धिः प्रतियोगित्वतदवच्छेदकत्वनिष्ठावच्छेद्यत्वयोर्भिन्नत्वेऽपि एकजातीयतया तादृशानुगतरूपेण निवेशादिति वाच्यम् । तथा सति तादृशसम्बन्धेन साध्यतायां व्यभिचारिण्यतिव्याप्तिः प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावीयान्यसम्बन्धावच्छिन्नप्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वाभावेन तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्य चाऽप्रसिद्धत्वेन तादृशप्रतियोगितासामान्ये तदुभयाभावस्याऽक्षतत्वात् । मैवम् । वृत्त्यनियामकसम्बन्धेन व्यापकतास्वीकारे तादृशसम्बन्धस्याऽभावप्रतियोगितानवच्छेदकत्वे प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणकाभावप्रतियोगितावच्छेदकतासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वतादृशरूपावच्छिन्नत्वोभयाभावस्यैव विवक्षणीयतया सामञ्जस्यात् । तथा हि विषयितासम्बन्धेन साध्यतायां सद्धेतौ तत्सम्बन्धावच्छिन्नावच्छेदकताकसाध्यवदभावो न प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकानधिकरणहेत्वधिकरणकः, अतोऽन्यसम्बन्धेन साध्यादिमदभाव तत्सम्बन्धेनान्याद्यवच्छिन्नाभावो वा तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वाल्लक्षणसमन्वयः । तत्सम्बन्धावच्छिन्नसाध्यके व्यभिचारिण्यपि तादृशसम्बन्धेन साध्यवदभावोऽपि तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयसत्त्वेन नातिव्याप्तिः । वह्निमान् धूमादित्यादौ संयोगादिना घटादिमदभाव समवायादिना वह्न्यादिमदभावश्च लक्षणघटकः । तत्प्रतियोगितावच्छेदकतायामुभयाभावस

स्वाल्लक्षणसमन्वयः । धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकसम्बन्धेन साध्यवतोऽभाव एव तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयस्यैव सत्त्वान्नातिव्याप्तिरिति ।

(दी०) अत एव समवायस्यैकत्वेन द्रव्यत्वप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयसत्त्वेऽपि द्रव्यं जातेरित्यादौ, वह्निधूमोभयवान्वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नाऽतिव्याप्तिरित्यपि वदन्ति ॥

(गा०) संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि वह्निधूमोभयवान् वह्नेरित्यादौ नातिव्याप्तिरिति योजना । अयं भावः । प्रत्येकं संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेण वह्निधूमोभयवान् धूमादित्यत्र संयोगसम्बन्धसामान्ये वह्निधूमोभयत्वावच्छिन्नप्रतियोगिकत्वहेत्वधिकरणानुयोगिकत्वोभयाभाववत्त्वात्तादृशोभयत्वावच्छिन्नाभावोऽपि संयोगेन प्रतियोगितावच्छेदकावच्छिन्नत्वधिकरणतया लक्षणघटक इत्यव्याप्तिः स्यादतः संयोगेनोभयसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नत्व परित्यज्य प्रतियोगिताश्रयप्रतियोगिकत्वमेव निवेशनीयं तथा च वह्निधूमोभयवान्वह्नेरित्यादावपि वह्निधूमोभयत्वावच्छिन्नाभावस्य लक्षणाघटकतया पूर्वकल्पेऽतिव्याप्तिः स्यादिति ।

अथ साध्यतावच्छेदकभेदेन व्याप्तिपदार्थभेदस्तदैव प्रतियोगितावच्छेदकावच्छिन्नत्वपरित्यागः स्थलविशेषे सम्भवति तथा च साधनभेदेनापि तुल्ययुक्त्या तद्भेदाद् धूमरूपहेतुकवह्निधूमोभयात्मकसाध्यघटितव्याप्तिपदार्थप्रसिद्धिनिर्वाहाय तच्छरीरे प्रतियोगिताश्रयवैयधिकरण्यनिवेशनस्य वह्निहेतुके तदुभयसाध्यकस्थले कथमतिव्याप्तिप्रसञ्जकत्वमिति चेत् ? यथा संयोगसामान्ये द्वित्वावच्छिन्नप्रतियोगिकत्वाभावनिश्चयदशायामपि धूमेन वह्निधूमोभयानुमितिर्भवतीति प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानं धूमलिङ्गकतादृशोभयानुमितिजनकमङ्गीक्रियते, तथा तादृशनिश्चयदशायां सकलवह्निमतामेव धूमवत्त्वमिति भ्रान्तानां वह्निहेतुकतदुभयानुमितिरप्यनुभवसिद्धा । तत्राऽपि प्रतियोगिताश्रयप्रतियोगिकत्वघटितोभयाभावविषयकज्ञानमेवाऽनुमितिजनकं वा-

त्वम्, तथा च तद्धेतुकतत्साध्यकानुमितिजनकज्ञानस्य प्रमात्वप्रसङ्ग इत्येवातिव्याप्त्यर्थं । एवं यथा वह्निधूमोभयत्वेन उभयं धूमव्यापकमिति वाक्यार्थयोक्तनिश्चयदशायां शाब्दबोधो जायते तथा वह्निधूमोभयत्वेनोभयं वह्निव्यापकमित्यनाकाङ्क्षवाक्यादपि यावत्प्रमाच्छाब्दबोधः सर्वानुभवसिद्ध इति प्रतियोगितावच्छेदकप्रतियोगिकत्वमेव तत्र शाब्दधीविषयः स्वीकरणीयः । तथा च तद्विषयधियः प्रमात्वेन तादृशवाक्यस्य प्रमाणतापत्तिरित्यपीति । वह्निरित्यत्र धूमादिति नातिव्याप्तिरित्यनन्तरमव्याप्तिश्चेति पाठं केचित्कल्पयन्ति, यथासङ्ख्येन च स्थलद्वयेऽतिव्याप्त्यव्याप्ती योजयन्ति ।

इदमत्रावधेयम् । घटद्वयवद्भूतलमित्यादौ द्वित्वोपलक्षितघटादिवैशिष्ट्यं तद्विशिष्टवैशिष्ट्यं वा भासते । आद्ये एकघटादिमत्यपि तत्प्रसङ्गः । न च द्वित्वोपलक्षितस्यापि व्यक्तिद्वयस्यैव वैशिष्ट्यद्वयं तत्र भासते इति नातिप्रसङ्ग इति वाच्यम् । एकस्मिन्नपि भेदाग्रहेण द्वित्वप्रमासत्प्रकारकप्रतीतावुभयभानानियमात् । तादृशबुद्धेर्द्वित्वविशिष्टाभावज्ञानविरोधित्वानुपपत्तिश्च विशिष्टवैशिष्ट्यावगाहिन्या एव विशिष्टाभावबुद्धिविरोधित्वात् । द्वितीये संयोगसंसर्गकतादृशज्ञानमात्रस्यैव भ्रमत्वापत्तिः, संयोगरूपवैशिष्ट्ये द्वित्वादिविशिष्टप्रतियोगिकत्वस्य बाधात् । तस्माद्द्वयादिविशिष्टप्रतीतौ संयोगमात्रं न सम्बन्धोऽपि तु द्वित्वावच्छिन्ननिरूपिता संयोगावच्छिन्नाधिकरणतैव । अधिकरणता च पदार्थान्तरम् अधिकरणस्वरूपा वा उभयथैव निरूपकभेदेऽपि निरूपकतावच्छेदकद्वित्वस्यैक्याद् ऐक्यमिति संयोगप्रतियोगितावच्छेदकस्य तत्र प्रतियोगितावच्छेदकताया द्वित्वेऽनुपपत्तिरित्युपगम्यम् । एवं च वह्निधूमोभयत्वावच्छिन्नसाध्यके संयोगावच्छिन्नाधिकरणताया एव साध्यतावच्छेदकसम्बन्धत्वात्तत्र चोभयत्वावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्याऽतिव्याप्तिप्रसक्तिः । अन्यथा द्वितीयकल्पेऽपि प्रतियोगितावच्छेदकतावच्छिन्ननिरूपितप्रतियोगितावच्छेदकसम्बन्धानुयोगित्वनियमादुभयत्वावच्छिन्नप्रतियोगिकसंयोगाप्रसिद्ध्या संयोगेनोभयत्वावच्छिन्नसाध्यकव्यभिचारीति संयोगसम्बन्धावच्छिन्नसाध्यतावच्छेदकतावच्छिन्नप्रतियोगिताया लक्षणघटकत्वेनाऽतिव्याप्तेरसम्भवात् ।

वस्तुतस्तु पर्वतो वह्निमानित्यादावपि संयोगावच्छिन्नाधिकरणतैव सम्बन्धो न तु संयोगमात्रम् । अन्यथा पर्वतो वह्निमानित्यत्रेव पर्वते वह्निरित्यत्रापि संयोगमात्रस्यैव तथात्वापत्त्या अविशेषप्रसङ्गात् । तादृशप्रतीत्योर्विशेषाय प्रथमायां संयोगो द्वितीयायां तदवच्छिन्नाधेयता संसर्ग इत्युपेयते, किंवा प्रथमायां संयोगावच्छिन्नाधिकरणता द्वितीयायां संयोगस्तथेत्यत्र विनिगमकस्य दुर्लभत्वात् । न च तादृशप्रतीत्योः संसर्गांशेऽविलक्षणत्वेऽपि विशेष्यविशेषणभावभेदाद्वैलक्षण्योपपत्तिसम्भव इत्युभयत्रैव संयोगमात्रस्य सम्बन्धतास्त्विति वाच्यम् । तावतापि पर्वतो वह्निमान् वह्नौ पर्वत इत्यनयोः, पर्वते वह्निः पर्वतवान्वह्निरित्यनयोश्च प्रतीत्योर्विशेषानिर्वाहात् । न चैवं रूपवानित्यादावपि समवायावच्छिन्नाधारतैव सम्बन्धः स्यान्न तु समवाय उक्तयुक्तेरविशेषादिति वाच्यम् । समवायातिरिक्तायाः समवायावच्छिन्नाधारताया अनभ्युपगमात् ।

अथ समवायावच्छिन्नाधारतायाः समवायरूपत्वे समवायावच्छिन्नाधेयताऽप्यवश्यमतिरिक्ता स्वीकरणीया, अन्यथा रूपवान्घटो घटे रूपमिति प्रतीत्योः संसर्गवैलक्षण्यानुपपत्तेः । तथा च समवायावच्छिन्नाधेयता आधारता वाऽतिरिक्तेत्यत्र विनिगमकं दुर्लभमिति समवायातिरिक्तसमवायावच्छिन्नाधारतासिद्धिर्निष्प्रत्यूहैवेति चेन्न । घटानुयोगिकरूपप्रतियोगिकसम्बन्धो रूपानुयोगिकघटप्रतियोगिकसम्बन्धः परस्परं विलक्षण एव, अन्यथा दर्शितस्थले संसर्गवैलक्षण्यानिर्वाहादिति सत्यम्, तत्र चाधारानुयोगिकः सम्बन्ध एव समवाय इति परिभाषितो न त्वाधेयानुयोगिकः, स त्वाधेयतेत्येव परिभाष्यते तत्र को विनिगमकानुयोगः ? न चैवं संयोगिन्यपि संयोग एवाधारताऽस्तु स चाऽनुयोगितासम्बन्धेनाऽऽधारपदप्रवृत्तिनिमित्तमिति संयोगस्य द्विष्ठत्वेऽपि नाधेये तद्व्यवहार इति वाच्यम् । संयोगीयसमवायातिरिक्ताया आधेयव्यावृत्तानुयोगितायाः स्वीकारे तस्या एव संयोगिनिरूपिताधारतात्वोपगमेनाऽतिरिक्ताधारताया निष्प्रत्यूहत्वात् । न चाधारतायां संयोगिप्रतियोगिकत्वं कल्पनीयमिति गौरवम् । भवन्मतेऽपि संयोगे तत्समवेतत्वातिरिक्तस्य तत्प्रतियोगिकत्वस्य कल्पनीयतया

साम्यात् । अन्यथा भूतलादेः स्वसमवेतघटादिसंयोगानुयोगितया स्वाधारतापत्तेः । एतेन संयोगिन्याधेयताऽपि संयोग एव । प्रतियोगितासम्बन्धेन तस्याधेयपदप्रवृत्तिनिमित्ततया नाधारे तद्व्यवहार इत्यपि निरस्तम् । आधेयनिष्ठाधारत्वव्यावृत्तपदार्थान्तरकल्पनाया आवश्यकत्वात् । आधाराधेययोः संयोगानुयोगित्वप्रतियोगित्वकल्पने विपरीतकल्पनायामपि बाधकाभावाच्चेति दिक् ।

एकानुयोगिकसंयोगद्वयप्रतियोगितयोः प्रत्येकमुभयत्वावच्छिन्नत्वविरहेऽपि तदुभयत्वावच्छेदेनोभयत्वावच्छिन्नत्वोपगमाच्च संयोगेनोभयसाध्यकेऽतिव्याप्तिरित्यप्याहुः । प्रतियोगित्वावच्छेदकत्वादेः स्वरूपसम्बन्धरूपतया सम्बन्धत्वेन तन्निवेशे सम्बन्धत्वस्य नियमघटिततयाऽनवस्थेत्याशङ्कां निरस्यति ।

(दी०) प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्धत्वेन निविष्टः । सामानाधिकरण्येऽपि सम्बन्धः संयोगत्वादिनैव निविशते । दर्शितञ्च नियमाघटितमपि सम्बन्धत्वम् ।

(गा०) प्रतियोगित्वादिश्चेति । सम्बन्धविशेषोऽपि न सम्बन्धत्वेन लक्षणघटकोऽपि तु प्रतियोगित्वत्वादिना, कुत्रचित्सम्बन्धविधया स्वरूपत एवेत्यर्थः ।

ननु सामानाधिकरण्ये तत्सम्बन्धिसम्बन्धित्वे तत्र सम्बन्धत्वेनैव सम्बन्धनिवेश इत्याशङ्कायामाह । सामानाधिकरण्येऽपीति । संयोगत्वादिनैवेति । साधनतावच्छेदकादिभेदेनेव सम्बन्धादिभेदेनाऽपि व्याप्तिभेदस्येष्टत्वादिति भावः । साध्यसामानाधिकरण्यघटिते साध्यवत्संयुक्तत्वादिरूपे हेतौ सम्बन्धस्य प्रकारतया तस्यैव संयोगत्वादिना निवेशः, साध्यसम्बन्धस्य च घटकत्वे तत्संसर्गविधयैव लाघवेन निवेशात्तस्य स्वरूपत एव निवेशः सम्भवति, व्याप्तिनिरूपकस्याऽपि संसर्गतया भाने स्वरूपेणाऽपि तदुपगमादेरुपपत्तेः । सम्बन्धत्वनिवेशेऽपि न क्षतिरित्याह । दर्शितं चेति । नियमाघटितमिति । तत्प्रतियोगित्वादिविशेष एव तत्सम्बन्धत्वं न तु तद्विशिष्टबुद्धिनियामकत्वम्, सर्वांशे तत्सम्बन्धे अनवच्छिन्ननियामकत्वासम्भवात् । तत्प्रतीतिविषयत्वस्वरूपनियामकत्वनिवेशे व्याप्तौ यानन्तर्भावात् प्रमेयत्वाद्यभावेऽतिप्रसङ्गाच्च । न च विशेषणतावच्छेदकप्रकार-

तानिरूपितविषयताया विवक्षणीयतया नाऽतिप्रसङ्ग इति वाच्यम् । एवमपि संयोगादिना द्रव्यत्वादिप्रमाविषयतामादाय तस्यापि तत्सम्बन्धत्वापातात् । न च विषयतायां प्रमाप्रतियोगिकत्वनिवेशान्नायमतिप्रसङ्ग इति वाच्यम् । प्रमात्वस्य तत्सम्बन्धानुयोगिविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपतया सम्बन्धत्वघटितत्वात् । एवं तदनुयोगिकत्वविशेष एव तत्र सम्बन्धत्वमिति भावः । इत्थं च सामान्यतस्सम्बन्धघटितं साध्यवत्सम्बद्धत्वरूपसाध्यसामानाधिकरण्यं साध्यवदनुयोगिकप्रतियोगित्वं प्रतियोगितासम्बन्धेन साध्यवदनुयोगिकवत्त्वं वा, तच्च संयोगत्वादिना तद्घटितात्साध्यवदनुयोगिकसंयोगप्रतियोगिकत्वरूपाल्लघुशरीरमिति तदेव व्याप्तिघटकं वाच्यम्, अतिप्रसङ्गस्य व्यापकतायां विशिष्य सम्बन्धनिवेशेनैव वारणसम्भवात् । इत्थं साध्यवदसंयुक्तत्वादिनिश्चयदशायां संयोगादिना पक्षे हेतुमत्तानिश्चयस्य साक्षादनुमितिप्रतिबन्धकताया अग्रे वक्तव्यतया तत्राऽनुमित्यापत्त्यनवकाशादिति सूचितम् ।

अभावत्वं चेदत्र भावभिन्नत्वन्तदा प्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वतादृशसम्बन्धावच्छिन्नत्वोभयाभावनिवेशपक्षे दैशिकविशेषणतया घटत्वाभावादिसाध्यके व्यभिचारिण्यतिप्रसङ्गः, तादृशसम्बन्धावच्छिन्नतदभावस्य घटत्वादिरूपतया भावभिन्ननिरूपितप्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वघटत्वाभावत्वावच्छिन्नत्वोभयाभावस्याऽक्षतत्वादित्याशङ्कां निरस्यति ।

(दी०) अभावत्वं चेदमिह नास्ति, इदमिदं न भवतीति प्रतीतिनियामको भावाभावसाधारणः स्वरूपसम्बन्धविशेषः । अतो नाऽभावसाध्यकव्यभिचारिण्यतिप्रसङ्गः । तदपि वा नोपादेयं प्रयोजनविरहात् । विषयतात्वादिवत् प्रतियोगित्वाधिकरणत्वनञ्त्वसम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्येकदेशिनः ॥

(गा०) अभावत्वं चेति । इदमिह नाऽस्तीदमिदं न भवतीति द्विविधप्रतीतिकथनेनाऽभावत्वस्य संसर्गाभावान्योन्याभावोभयसाधारण्ये प्रमाणमुपदर्शितम्, तस्यान्योन्याभावसाधारण्यविरहेऽभावान्तरप्रतियोगितासामान्ये तादात्म्यसम्बन्धावच्छिन्नत्वविरहेण तेन स-

म्बन्धेन साध्यतायां व्यभिचारिण्यतिप्रसङ्गात्। भावाभावसाधारण इति। भावेनाऽपि घटे घटत्वाभावो नास्ति घटो न घटाभाव इति प्रतीतेर्जननादिति भावः। तदवच्छिन्ने चाभावपदस्य रूढिशक्तिः परिभाषैव वा, अतो न भावोऽभाव इत्यधयवव्युत्पत्त्या तद्धर्माश्रयत्वेऽपि न क्षतिः। स्वरूपसम्बन्धविशेष इति। अभावे तत्प्रतियोगिस्वरूपनिरूपितानुयोगित्वनामा सम्बन्धविशेष इत्यर्थः। न चाऽभावत्वस्य स्वरूपसम्बन्धरूपत्वेऽननुगमादनुगतप्रत्ययानुपपत्तिः, तदनुगमकरूपान्तराभ्युपगमात्। पदार्थान्तरत्वेऽपि निरूपकभेदेन सम्बन्धान्तरवत्तद्भेदस्याऽऽवश्यकतयाऽनुगमकरूपान्तरापेक्षणात्।

यत्तु प्रतियोगिनिरूपितसम्बन्धानामननुगमेऽपि प्रतियोगिधर्मितावच्छेदकस्य नञ्पदप्रवृत्तिनिमित्ताखण्डधर्मान्तरस्य सत्त्वाद्घटो नाऽस्ति घटो नास्तीत्याद्यनुगतप्रमितिनिर्वाह इति। तन्न साधीयः। घटादौ घटाभावादेः कालिकादिसम्बन्धस्याऽपि स्वरूपतया तत्संसर्गकप्रतीतितो घटाभावो नास्तीत्याद्यनुयोगितासंसर्गकप्रतीतेर्वैलक्षण्याय संसर्गतावैलक्षण्यस्याऽऽवश्यकतया संसर्गतावच्छेदकधर्मविशेषस्वीकारस्य तन्निर्वाहकस्याऽवश्यकत्वात्, तेनानुगतीकृतानुयोगिताया एव संसर्गतावद्धर्मितावच्छेदकताया अपि सम्भवेनाऽभावनिष्ठाखण्डधर्मान्तरे मानाभावात्। नञ्पदप्रवृत्तिनिमित्ततया अपि तस्यामेवोपगमात्।

अथ नास्तीत्याद्यनुयोगितारूपसम्बन्धविशेषप्रकारेणाऽभावभानोपगमे तदंशे एव स्वनिरूपितत्वसम्बन्धेन प्रतियोगिनः प्रकारत्वसम्भवादभावांशे तत्सम्बन्धेन प्रतियोगिनो भाने मानाभावादनुयोगितायाः सम्बन्धत्वमेव न सिध्येदिति चेन्न। मण्याद्यभावस्य दाहादिहेतुतायां मण्यादिरूपप्रतियोग्यवच्छिन्नानुयोगिताविशेषस्याऽवच्छेदकत्वापेक्षयाऽनुयोगितासम्बन्धेन मण्यादेस्तथात्वे लाघवेन तत्सम्बन्धतासिद्धेः। न चोभयाभावादिवारणाय मणित्वाद्यवच्छिन्ननिरूपितानुयोगिता मण्यादेः सम्बन्धो वाच्यः, तथा च तादृशानुयोगितायाः स्वाश्रयतासम्बन्धेनावच्छेदकत्वेऽपि न गौरवमिति वाच्यम्। उभयत्वाद्यवच्छिन्ननिरूपितानुयोगिताया मणित्वादिविशिष्टसम्बन्धताविरहात्, शुद्धानुयोगितासम्बन्धेनैव मणित्वादिविशिष्टस्य उभयत्वाद्यवच्छिन्नाभावपर्याप्तिकतासम्भवेन तादृशानु-

योगितात्वेन सम्बन्धतानुपगमात्। न च तादृशस्य विशिष्टमणित्वाद्यवच्छिन्नाभावव्यावर्तकता न सम्भवति, विशिष्टमणित्वाद्यवच्छिन्ननिरूपितानुयोगितायामप्यधिकं त्वित्यादिन्यायेन मणित्वादिविशिष्टनिरूपितत्वसत्त्वेन तस्या अपि तत्सम्बन्धत्वादिति वाच्यम्। कारणतावच्छेदकतापर्याप्त्यधिकरणपरिसमाप्तप्रतियोगिताकसम्बन्धिन एव कारणतया मणिर्नास्तीत्याकारकशुद्धमणित्वावच्छिन्नप्रकारकप्रतीत्यविषयविशेषणान्तरसहितमणित्वाद्यवच्छिन्नाभावनिष्ठतादृशमणित्वाद्यवच्छिन्ननिरूपितत्वसम्बन्धे च शुद्धमणित्वादिविशिष्टपरिसमाप्तप्रतियोगिताकत्वविरहेण तादृशाभावव्यावर्तनसम्भवात्।

एतेन विशिष्टमणित्वाद्यवच्छिन्नाभाववारणाय शुद्धमणित्वाद्यवच्छिन्नप्रतियोगिताकत्वेन हेतुता वाच्या, शुद्धमणित्वाद्यवच्छिन्नत्वं च मणित्वान्यधर्मानवच्छिन्नत्वम्, तदपि यदि तादृशधर्मावच्छेद्यत्वत्वाद्यवच्छिन्नाभावस्तदा किञ्चिद्विशिष्टतादृशावच्छेद्यत्वत्वावच्छिन्नाभावमादायातिप्रसङ्ग इति शुद्धतादृशावच्छेद्यत्वत्वावच्छिन्नाभाव एव निवेशनीयः। शुद्धतादृशावच्छेद्यत्वत्वाद्यवच्छेद्यत्वमपि तदतिरिक्तानवच्छिन्नत्वमिति विशेषणानवस्थाप्रसङ्ग इत्यपि निरस्तम्। इत्यलमप्रस्तुताधिकजल्पनया।

तदपि । तादृशाभावत्वमपि । नोपादेयम्। हेतुसामानाधिकरण्यांशे विशेषणतया न निवेशनीयम्। प्रयोजनाभावादिति। स्वावच्छेदकविशिष्टानधिकरणहेतुमन्निष्ठत्वमात्रपुरस्कारेणाभावं निवेश्य तदीयत्वेन प्रतियोगितानिवेशादेव सर्वसामञ्जस्यादिति भावः।

प्रसङ्गात्प्रतियोगित्वादीनामपि पदार्थान्तरत्वं व्यवस्थापयति। विषयतेति। तत्त्वम् विषयतात्वम्। प्राचीनैकदेशिभिर्विषयताया अतिरिक्तपदार्थत्वोपगमाद् दृष्टान्तत्वेन तदुपन्यासः। यथा विषयताया विषयरूपत्वे द्रव्यत्वावच्छिन्नघटविषयकज्ञानाद्धटत्वावच्छिन्नतद्विषयकज्ञानस्य विषयतावैलक्षण्यविरहाद्वैलक्षण्यापत्तिः। न च द्रव्यत्वघटत्वयोरपि तत्र विषयतया तद्वैलक्षण्यादेव वैलक्षण्यमिति वाच्यम्। तावताऽपि द्रव्यत्वेन घटविषयकाद्घटत्वेन च पटविषयकाज्ज्ञानाद्घटत्वेन घटं द्रव्यत्वेन पटमवगाहमानस्य ज्ञानस्य वैलक्षण्यानुपपादनस्याशक्यत्वात्। ज्ञानस्वरूपत्वे घटपटावित्यादिसमूहालम्बनीयघटपटादिविषयतानामभिन्नतापत्त्या तादृशज्ञानस्य घट-

त्वाद्यवच्छिन्नघटादिनिष्ठविषयताशालितया भ्रमत्वापत्तिः । ज्ञानविषयोभयरूपत्वे च जातिमान् घट इत्यादिज्ञानीयघटत्वादिविषयताया द्वैविध्यानुपपत्तिः ज्ञानविषययोरविशेषादिति जातिमानित्याद्याकारकैकविधघटत्वादिविषयताशालिज्ञानात्तादृशबुद्धेर्विलक्षणाकारता न स्यादित्यादियुक्त्या विषयतायाः विषयादिभेदभिन्नविषयतानामनुगमकतया च विषयतात्वस्यातिरिक्ततासिद्धिः, तथा प्रतियोगितायाः प्रतियोगिस्वरूपत्वे घटादिनिष्ठानां घटत्वद्रव्यत्वादिरूपविभिन्नधर्मावच्छिन्नानां संयोगसमवायादिरूपविभिन्नसम्बन्धावच्छिन्नप्रतियोगितानामवैलक्षण्येनाऽभाववैलक्षण्यानुपपत्तिः । अभावस्वरूपत्वे घटाद्यभावीयघटत्वाद्यवच्छिन्नप्रतियोगित्वकीश्चिद्विशिष्टघटाभावाभावत्वाद्यवच्छिन्नप्रतियोगितानामवैलक्षण्यापत्तेः । घटत्वादेः प्रतियोगित्वन्यूनवृत्तितया तदवच्छेदकत्वानुपपत्तिः, घटाद्यभावस्य पटादिसाधारण्येन पटादेरपि तत्प्रतियोगितापत्तेश्चेत्यादियुक्त्या प्रतियोगित्वमप्यतिरिक्तं सिध्यति । एवमधिकरणत्वमाधिकरणस्वरूपमाधेयस्वरूपं वा, भूतले घटसंयोगदशायामिव परस्परासंयुक्तघटभूतलसत्त्वदशायामपीदानीं भूतलं घटवदिति प्रत्ययप्रसङ्गात् । संयोगरूपत्वे आधेयत्वस्यापि तुल्ययुक्त्या तद्रूपतया आधारत्वाधेयत्वयोरभेदप्रसङ्गेन वैपरीत्येनाधाराधेयभावप्रत्ययप्रसङ्गादिति तदप्यतिरिक्तः पदार्थः। सम्बन्धत्वमपि क्लृप्तपदार्थान्तर्भावेण दुर्वचमिति पदार्थान्तरमेवेति भावः । आदिपदादभावत्वादिपरिग्रहः।

इदं तु बोध्यम् । अभावत्वं प्रतियोगित्वान्नातिरिच्यते तदभावत्वस्य तत्प्रतियोगित्वनियमात् । न चैवं घटादेर्घटभेदाभावत्वापत्त्या घटादिमति भूतले घटभेदो नास्तीत्यादिप्रतीत्यापत्तिरिति वाच्यम् । संसर्गावच्छिन्नप्रतियोगिताया एवाभावत्वरूपतोपगमात् । घटादिभेदस्य घटत्वाद्यत्यन्ताभावसमनियतत्वेन तदभिन्नतया घटत्वादौ तदीयसंसर्गावच्छिन्नप्रतियोगितासत्त्वात्तेनैव तदभावप्रत्यायनात् । न चैवमपि घटभेदादेर्घटाद्यभावत्वानुपपत्तिस्तत्प्रतियोगित्वादिति वाच्यम् । अत्यन्ताभावत्वात्मकानुयोगिताविशेषस्यैव प्रतियोगितानतिरिक्तत्वोपगमादिति ।

इति-अनुमानगादाधर्यां सिद्धान्तलक्षणम् ॥

अवच्छेदकत्वनिरुक्तिप्रकरणम् ।

प्रतियोगितानवच्छेदकेत्यत्र पारिभाषिकावच्छेदकत्वं निवेशयितुमवच्छेदकपदस्य स्वरूपसम्बन्धरूपावच्छेदकत्वपरतामाक्षिपति । नन्वित्यादिना ।

(दी०) नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः । सम्भवति लघौ धर्मे गुरौ तदभावात्, प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेरतथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् । नाऽप्यनतिरिक्तवृत्तित्वम् । प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् ।

(गा०) इह । एतल्लक्षणे, घटकत्वं सतम्यर्थः । तथा च घटत्वेन घटोऽभावप्रतियोगीत्यादिप्रतीतिसाक्षिको यो घटादिनिष्ठप्रतियोगितया सह घटत्वादेरवच्छेदकभावरूपः स्वरूपानतिरिक्तः पदार्थान्तरात्मको वा सम्बन्धविशेषः स इह लक्षणे न शक्यनिवेशन इत्यर्थः । स्वरूपसम्बन्धविशेषात्मकावच्छेदकत्वाभावघटितं निरुक्तरूपं न व्याप्तिरूपमिति यावत् । तेन रूपेण साध्यतायां व्यभिचारिण्यतिव्याप्तेरित्यग्रिममत्रैव हेतुः । प्रमेयधूमत्वाद्यवच्छिन्नसाध्यकव्यभिचारिसाधारणत्वादिति तदर्थः । प्रमेयधूमत्वेत्यादिकमतथात्वेनेत्यन्तं तत्र हेतुः । स्वसमानाधिकरणाभावप्रतियोगितानिरूपिततादृशावच्छेदकत्वाभाववत्तादृशसाध्यतावच्छेदककत्वेनेति तदर्थः । संभवत्तादृशप्रतियोगितावच्छेदकताकधर्मापेक्षया गुरुत्वं प्रमेयधूमत्वादेस्तादृशप्रतियोगितावच्छेदकत्वाभावसाधकम् ।

तस्य तत्साधकत्वोपष्टम्भकव्याप्तिमाह–सम्भवतीति । तस्मिन्निति पूरणीयम् । तथा च लघुधर्मे तादृशावच्छेदकत्वस्य सम्भवे इत्यर्थः । गुरौ तदभावात्–तादृशावच्छेदकत्वाभावनियमात् । तथा च सम्भवत्तदवच्छेदकताकधर्मापेक्षया यो गुरु. स न तदवच्छेदक

द्यानुपगमेन नानाव्यक्तिदण्डाद्यवच्छिन्नस्य व्यापकतानिर्वाहाय प्रतियोगितावच्छेदकापर्याप्तविषयतापर्याप्तिरनवच्छेदकत्वान्तार्थं इत्याशयेनैव तदभिधानात् । कम्बुग्रीवादिमत्त्वं च घटत्वव्यञ्जकसंस्थानविशेषः । घटत्वापेक्षया तस्य गौरवं संस्थानस्य विजातीयावयवसंयोगरूपस्यानन्तत्वात्, अनुगमकजातिविशेषसापेक्षत्वाच्च । घटत्वस्य चैकस्य जातिरूपस्य निर्विशेषणकस्यावच्छेदकत्वे लाघवादिति ।

न च घटसामान्याभावप्रतियोगितायां संस्थानविशेषस्यानवच्छेदकत्वेऽपि तत्तत्संस्थानवदभावकूटप्रतियोगितासु प्रत्येकं तेषामवच्छेदकत्वमावश्यकम्, तत्राऽतिप्रसक्तघटत्वस्याऽवच्छेदकत्वासम्भवादित्यनुगतरूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्वं दुर्घटमिति तदवच्छिन्नसाध्यके नातिव्याप्त्यवकाश इति वाच्यम् । तत्तत्संस्थानवत्तत्तद्घटाभावप्रतियोगितायामपि घटनिष्ठतत्तद्व्यक्तित्वस्यैव साक्षात्सम्बन्धेनावच्छेदकत्वसम्भवात्परम्परासम्बन्धेन स्वसमवायिसमवेतत्वात्मकेन तत्तत्संयोगानां गौरवेणानवच्छेदकतया तादृशसम्बन्धेन संस्थानविशेषावच्छिन्नघटादिसाध्यके व्यभिचारिहेतावतिव्याप्तेर्दुर्वारत्वात् ।

ननु मृत्पाषाणादिघटसाधारणं घटत्वं नैकम्, मृत्त्वपाषाणत्वादिना सङ्करप्रसङ्गादिति तत्तज्जातिव्याप्यं नानैव, तथा च तथाविधसकलघटानुगमकसंस्थानविशेषावच्छिन्नप्रतियोगितायां न स्वरूपतो घटत्वस्यावच्छेदकतासम्भवः, न्यूनवृत्तित्वात् । नाप्यनुगतरूपान्तरावच्छिन्नस्य, तादृशरूपान्तरप्रवेशेन गौरवादित्यरुचेर्घ्राणग्राह्यगुणत्वानुधावनम् । घ्राणग्राह्यत्वं घ्राणग्रहणयोग्यता गुणत्वन्यूनवृत्तिघ्राणग्राह्यजातिरूपा, सा चातीन्द्रियेऽपि गन्धे इति न गन्धत्वस्य दर्शितरूपवत्सामान्याभावप्रतियोगितासमनैयत्यानुपपत्तिः । तादृशयोग्यतामात्रस्योपादाने गन्धत्वसुरभित्वादिरूपायास्तस्याः स्वरूपतो हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया तादृशजातित्वाद्यवच्छिन्नाया अप्यनवच्छेदकत्वं दुर्लभमिति तद्विशेष्यतया गुणत्वनिवेशनम् । द्रव्यत्वादिहेतुकस्थले च गुणत्वस्य शुद्धस्यापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वासम्भवाद्विशिष्टगुणत्वस्य गन्धत्वसमनियतस्य

महानसीयवह्नित्वावच्छिन्नसाध्यके धूमादौ वह्नित्वादेर्महानसीयवह्न्याद्यभावप्रतियोगिताशून्यवह्न्यन्तरवृत्तितया विशिष्टेऽपि तत्र तच्छून्यावृत्तित्वस्य दुर्घटतयाऽतिप्रसङ्गाच्च । स्वव्यापकतत्कत्वनिवेशने च विशिष्टस्याऽविशिष्टस्य वा यादृशस्यावच्छेदकत्वमभिप्रेतं तादृशस्यैव स्वपदेनोपादेयतया विशिष्टवह्नित्वादिकं प्रति विशिष्टवह्न्याद्यभावप्रतियोगिताया व्यापकत्वस्याऽक्षतत्वेन तादृशस्यावच्छेदकत्वोपपत्तेः । ईदृशं यत्स्वं तत्त्वाभावकूटस्य च साध्यतावच्छेदकविशेषणता बोध्या, अतः स्वत्वाननुगमेनैकसामान्याभावनिवेशासम्भवात् यत्किञ्चिदेकावच्छेदकनिष्ठावच्छेदकत्वमादायातिप्रसङ्गानवकाशः ।

न च स्वपदस्य तत्तद्व्यक्तिपरतयाऽवच्छेदकनिष्ठं तत्तद्व्यक्तित्वमेव पर्यवसितमवच्छेदकत्वम्, तथा च विशेषणावच्छिन्ननिष्ठतत्तद्व्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादेरवच्छेदकत्वे शुद्धस्यापि अनवच्छेदकतादुर्भिक्षमिति वाच्यम् । शुद्धस्य विशेषणान्तरसहितस्य वा यादृशस्याधिकरणता अभावप्रतियोगितानिष्ठव्यापकताशरीरे निविष्टा तादृशरूपपर्याप्तावच्छेदकतापर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदकविशेषणत्वोपगमात् । मेयधूमत्वादिपर्याप्ताया अभावप्रतियोगितावच्छेदकताया अप्रसिद्धावपि तथाविधाया विपक्षतावच्छेदकतायाः प्रसिद्ध्याऽतिव्याप्त्यनवकाशात् । महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छेदकतायाः शुद्धवह्नित्वाद्यपर्याप्तत्वाद्विशिष्टवह्न्याद्यभावमादाय दोषानवकाशात् ।

अत्र यदि हेतुसमानाधिकरणाभावप्रतियोगितासामान्यानतिरिक्तवृत्तित्वं निवेश्यते तदा निखिलवह्न्यादेरेव धूमादिसमानाधिकरणविशेषाभावप्रतियोगितया वह्नित्वादेरपि स्वव्यापकतावच्छेदकतादृशप्रतियोगितात्वकत्वरूपतादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वेन तथाविधप्रतियोगितानवच्छेदकत्वानुपपत्तिरिति तादृशयत्किञ्चिदेकप्रतियोगितानतिरिक्तवृत्तित्वं स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकतादृशप्रतियोगिताकत्वरूपं निवेशनीयम् । तथा सति धूमवान् वह्नेरित्यादौ धूमत्वादेरपि तादृशावच्छेदकत्वं न स्यात्, धूमादिसामान्याभावप्रतियोगिताया अपि धूमादिस्वरूपतया प्रतिधूमादिकं भिन्नत्वेन प्र-

स्यैक धूमत्वादिसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वादिति तत्तद्धूमत्वादेरेव तथात्वादतिव्याप्तिरित्याह । प्रतियोगिताया इति । स्वरूपसम्बन्धात्मिकाया इति । प्रतिव्यक्तिभेदप्रयोजकहेतुगर्भविशेषणम् । अतिरिक्तपदार्थरूपप्रतियोगिताया सिद्धान्तविरुद्धत्वादिति भाव । तादृशप्रतियोगितासामान्यानतिरिक्तवृत्तित्वनिवेशेऽपि हेतुसमानाधिकरणाभावत्वेन तादृशाभावनिवेश एव पूर्वोक्तदोष, न तु तादृशाभावस्य प्रातिस्विकरूपेण निवेशने, तत्तद्विशेषाभावप्रतियोगितात्वस्य वह्नित्वादिव्यापकतानवच्छेदकत्वादित्याशयेनाशङ्कते—

(दी०) न च तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वं तत् । अत एवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि साधु सङ्गच्छते इति वाच्यम् । वह्निघटवृत्तिद्वित्वतार्णतार्णदहनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावतिप्रसङ्गात् ।

(गा०) न चेति । तथाविधेति । प्रतियोग्यनधिकरणहेतुमद्वृत्तीत्यर्थः । यत्किञ्चित्पदं तत्सामान्यनिष्ठत्वेनाऽभावनिवेशलाभाय । प्रत्येकनिविष्टस्याऽपि तथाविधाभावस्य सकलस्य नैकभावच्छेदकताघटकता । किन्तु एकस्यैवेति वारणार्थकपदम् । तादृशप्रतियोगितासामान्यशून्यावृत्तित्व स्वव्यापकतावच्छेदकतादृशप्रतियोगितात्वकत्वम्, अतो न पूर्वोक्तदोष । अत एव । ईदृशावच्छेदकत्वस्य मूलाभिप्रेतत्वादेव । अतिरिक्तेति । सामान्याभावस्य विशेषाभावकूटातिरिक्तत्वानभ्युपगमे इत्यर्थः । धूमत्वादेरपीति । विशेषाभावकूटान्तर्गतमेकमभावमुपादाय धूमत्वादौ तदवच्छेदकत्वोपपादनासम्भवादिति भाव । तत्साधनमिति । सामान्याभावस्याऽतिरिक्तत्वस्य साधनमित्यर्थः । सङ्गच्छते इति । अन्यथा स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशे विशेषाभावकूटातिरिक्तसामान्याभावानभ्युपगमेऽपि विशेषाभावीयप्रतियोगितादृश्यैव सामान्यधर्मावच्छिन्नया धूमत्वादावपि वह्न्यादि

(गा०) एतेनेति । तार्णातार्णदहनोभयाभावप्रतियोगितायाऽतिप्रसक्ततादवस्थ्येनेत्यर्थः । अन्यूनवृत्तित्वविशेषितम्, अनतिरिक्तवृत्तित्वमपि । अत एव । दर्शितोभयाभावमादाय वह्नित्वादावतिप्रसङ्गाच्च । नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपीति । तथा सति यत्किञ्चिदेकाभावप्रतियोगितासामान्यपर्यन्तानिवेशेऽपि धूमत्वादेर्धूमादिसामान्याभावप्रतियोगितावच्छेदकत्वोपपादनसम्भवादिति भावः । उभयत्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगितायाः प्रत्येकमपि प्रतीतेर्व्यासज्यवृत्तितया स्वपर्याप्त्यधिकरणपर्याप्तत्व प्रतियोगितायां निवेश्याऽपि वह्नित्वादावतिप्रसङ्गवारणासम्भव इति ध्येयम् । प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिपक्षे मेयधूमवान् वह्नेरित्यादावतिव्याप्तिर्न सम्भवति साध्यतावच्छेदकमेयधूमत्वादिरूपगुरुधर्मावच्छेदेनास्य कुत्रापि प्रसिद्धिविरहेण तद्घटितोभयाभावाप्रसिद्धेरिति तन्मते मेयवह्निमान् धूमादित्यादावव्याप्तिमाह । लघुरूपेति । तादृशतदवच्छेदकत्वाप्रसिद्धेरिति । तादृशसाध्यतावच्छेदकावच्छिन्नत्वस्याऽप्रसिद्धेरित्यर्थः । विषयितासम्बन्धस्य वृत्त्यनियामकत्वेनाभावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभावप्रतियोगिताया अप्रसिद्धिरित्यस्य वक्तुमशक्यत्वात् । अन्यथा मेयधूमवान् वह्नेरित्यादावतिव्याप्तेरेव तादवस्थ्यादिति भावः । प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्येति । तथा च धूमादिसामान्याभावप्रतियोगितायाः प्रतिधूमादिकं भिन्नत्वेऽपि तत्प्रतियोगितावच्छेदकधूमत्वादेरैक्येन स्वसमानाधिकरणान्याभावप्रतियोगितानवच्छेदकतावच्छेदकव्यापकताघटकरूपतदनतिरिक्तवृत्तित्व धूमत्वादावक्षतमेवेति भावः ।

न च प्रतियोगितायाः प्रतियोगिस्वरूपतामते सामान्याभावप्रतियोगितायां विशेषाभावप्रतियोगितातो न भेदः, प्रतियोगिनामभेदात्, तथा च वह्निमान् धूमादित्यादावव्याप्तिर्दुर्वारा, धूमसमानाधिकरणविशेषाभावप्रतियोगितावृत्तेः वह्नित्वादेरवच्छेदकत्वात्तस्य च तदनतिरिक्तवृत्तित्वादिति वाच्यम् । सामान्याभावविशेषाभावयोः प्रतियोगिन्यभेदेऽपि सामान्याभावीयप्रतियोगितात्वेनैव सामान्यधर्मावच्छेद्यत्वादेरनुगमाधिकरणाभावप

नियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्वविवक्षणेनाऽव्याप्तिनिरासात् ।

स्वव्यापकतत्कत्वमित्यत्र स्वस्य व्याप्यता साध्यतावच्छेदकताघटकसम्बन्धेन, प्रतियोगितावच्छेदकस्य व्यापकता प्रतियोगितावच्छेदकताघटकसम्बन्धेन च बोध्या, तेन सम्बन्धसामान्येन धूमत्वादिकं प्रति समवायादिना धूमत्वादेरव्यापकत्वेऽपि समवायादिना वह्नित्वादिकं प्रति कालिकादिसम्बन्धेन घटत्वादेर्व्यापकत्वेऽपि च न क्षतिः । दण्डिमान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकदण्डादौ दण्डान्तरसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वेऽपि तत्तद्दण्डादौ तत्तद्दण्डादिसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वस्याऽक्षततया सर्वत्रैव दण्डादिव्यक्तौ प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमक्षतमेवेति नातिव्याप्तिः । दण्डाद्यवच्छिन्नसाध्यकसद्धेतावपीदृशरीत्याऽव्याप्तिरिति तु नाशङ्कनीयम् । दण्डवादौ साध्ये परम्परासम्बन्धेनाऽखण्डस्य दण्डत्वादेरेव साध्यतावच्छेदकतायाः स्वीकृतत्वात् ।

नन्वेवमपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निघटोभयत्वानतिरिक्तवृत्तितया वह्नित्वादेरवच्छेदकत्वं दुर्वारमेव । न चोभयत्वादेरुभयादिपर्याप्ततया प्रत्येकं तदत्यन्ताभावस्तदवच्छिन्नभेदश्च वर्तते, अयमेको न द्वाविति सर्वजनसाधारणानुभवस्य दुरपह्नवत्वात् । तादृशप्रतीतेरेकत्वादौ द्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमे मूलावच्छिन्नो वृक्षो न कपिसंयोगीत्यादिप्रतीतेरपि मूलादौ कपिसंयोगावच्छेदकत्वाभावावगाहितास्वीकारापत्तेः । यदि च तत्र बाधकाभावाद्वृक्षाद्यधिकरणककपिसंयोगाभावो विषयस्तदा प्रकृतेऽपि एकत्वाद्यवच्छिन्नाधिकरणकद्वित्वाभावादिविषयकत्वं दुर्वारमेव । एकत्वाद्यवच्छिन्ने द्वित्वादिमत्त्वप्रत्ययानुदयेन बाधकविरहस्य तुल्यत्वात् । प्रत्येकमुभयादौ द्वित्वाभावादिसत्त्वेऽपि द्वित्वाभावानुयोगितानवच्छेदकतया द्वौ न द्वाविति प्रतीतेर्दुरुपपादत्वात् । द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्ययस्येष्टत्वात् । नञ्पदेनाऽन्वयितावच्छेदकावच्छेदेनाभावबोधनात् द्वित्वादिसामानाधिकरण्यमात्रावगाहिन्या अभावप्रतीतेर्द्वौ न द्वावित्याकारकताविरहात् । तदाकारकप्रतीतेरेव चाऽनुभवविरुद्धत्वात् ।

तथा च द्वित्वाद्यनतिरिक्तवृत्तिता कथं वह्नित्वादेरिति वाच्यम्। एवं सति वह्निघटोभयवान् धूमादित्यादौ साध्यतावच्छेदकद्वित्वादिरवच्छेदकताया दुरुपपादत्वात्। प्रतियोगितावच्छेदकतादृशद्वित्वादिकमुपादायैव तस्याऽवच्छेदकानतिरिक्तवृत्तित्वस्य सम्पादनात्, तस्य चोक्तरीत्याऽसम्भवादिति स्वव्यापकतत्तत्स्वरूपतदनतिरिक्तवृत्तित्वघटकव्यापकतायां प्रतियोगिताव्यधिकरणत्वस्य भेदे निवेशनीयतया उभयत्वादावपि वह्नित्वनिरूपिततादृशव्यापकताया अक्षतत्वेन तदवच्छेदकत्वाप्रसङ्गस्य दुर्वारत्वात्। न हि प्रत्येकवृत्तिरुभयत्वाद्यवच्छिन्नभेदः प्रतियोगिताव्यधिकरणः। उभयत्वादेर्व्यासज्यवृत्तित्वेऽपि तदवच्छिन्नप्रतियोगिताया अव्यासज्यवृत्तितया प्रत्येकमुभयत्वाद्यनधिकरणतावच्छेदकावच्छिन्नभेदप्रतियोगितानधिकरणत्वस्याऽसम्भवादित्याशङ्क्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वघटकमवच्छेदकं स्वसमानवृत्तिकत्वेन विशेषयति-

(दी०) स्वसमानवृत्तिकं चाऽवच्छेदकं ग्राह्यम्। तत्त्वं च स्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वम्। यावत्त्वादिकं तु न तथा। पर्याप्तिश्चायमेको घट इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एव। त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यताया नाव्याप्तिः। घटकं चाऽवच्छेदकत्व स्वरूपसम्बन्धविशेषः। एवं च यद्धर्मावच्छिन्ने यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नमिति वक्तव्यम्, तेनोक्ताव्याप्तिनिरासः।

(गा०) स्वेति। तथा च वह्निघटोभयत्वादेर्वह्नित्वादिसमानवृत्तिकताविरहाद्वह्नित्वादेस्तदनतिरिक्तवृत्तित्वेऽपि न पारिभाषिकावच्छेदकतापत्तिरिति भावः।

अत्र व्यापकताशरीरे स्वसमानाधिकरणत्वस्य स्वाधिकरणतावच्छेदकावच्छिन्नाधिकरणतानिरूपकत्वार्थविशेषणस्योपगमे तु द्वित्वाद्यधिकरणस्य प्रत्येकं द्वित्वाद्यवच्छिन्नभेदाद्यधिकरणत्वेऽपि द्वित्वादेर्द्वित्वादिव्यापकस्य भेदे प्रतियोगितावैयधिकरण्यमनिवेशयेयो

पपादयितुं शक्यमिति स्वसमानवृत्तिकत्वनिवेशनमयुक्तम् । न चा-व्याप्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्याऽव्याप्यवृत्तितामते संयोगेन दण्डादेर्यत्र साध्यतावच्छेदकता तत्र व्यभिचारिणि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं दण्डादिकमादाय दण्डादिरूपसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वं व्यापकताशरीरे प्रतियोगितावैयधिकरण्याप्रवेशे न स्यादिति वाच्यम् । अव्याप्यवृत्तिदण्डादिकमादाय पारिभाषिकावच्छेदकत्वासम्भवेऽपि व्यभिचारनिरूपकाधिकरणयत्किञ्चिद्द्रव्यत्वव्याप्यवृत्तित्वरूपहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमुपादाय दण्डादेः साध्यतावच्छेदकस्य तथात्वोपपादनसम्भवात् । तदवृत्तौ साध्ये तदवृत्तित्वावच्छिन्नभेदस्य कथमप्यसम्भवादिति तु चिन्तनीयम् ।

ननु किमिदं समानवृत्तिकत्वम् ? यद्यन्यूनानतिरिक्तवृत्तित्वं तदाऽनतिरिक्तवृत्तित्वान्तनिवेशवैफल्यम्, स्वान्यूनवृत्ति यत्तदनतिरिक्तवृत्तित्वस्य स्वस्मिन्नियतत्वात् । तार्णातार्णदहनोभयत्वादिकमादाय दहनत्वादेरवच्छेदकत्वापत्तेश्च दुर्वारता । यदि चैकजातीयवृत्तिकत्वमेव तत्, तच्च स्वनिष्ठव्याप्यवृत्तित्वाव्याप्यवृत्तित्वान्यतररूपवत्त्वम्, द्वित्वादौ च वह्नित्वादेर्नैतादृशसमानवृत्तिकत्वं वह्नित्वादेरव्याप्यवृत्तित्वादित्युच्यते तदाऽपि वह्निधूमोभयवान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकवह्निधूमघटत्रित्वाद्यनतिरिक्तवृत्तितया साध्यतावच्छेदकस्य तथात्वापत्तेः । द्वित्वत्रित्वादावुभयोरेव व्याप्यवृत्तितया निरुक्तसमानवृत्तिकताया दुरुपपादत्वादित्यत आह । तत्त्वं चेति । स्वसमानवृत्तिकत्वं चेत्यर्थः ।

वह्निनिष्ठयावत्त्वतार्णातार्णोभयत्वादिकमादाय वह्नित्वादावतिप्रसङ्गाभावं स्फुटयति । यावत्त्वादिकमिति । आदिना दर्शितद्वित्वादिपरिग्रहः । न तथा । न स्वपर्याप्त्यधिकरणपर्याप्तत्वरूपवह्नित्वादिनिरूपितसमानवृत्तिकत्ववत् । वह्नित्वादेः प्रत्येकरूपतृणादौ पर्याप्तत्वाभावस्य चाऽतथात्वादिति भावः । तथा च यावत्त्वादेः धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि वह्नित्वाद्यन्यूनानतिरिक्तवृत्तित्वेऽपि च न क्षतिरिति भावः ।

ननु पर्याप्तिराश्रयत्वमेव वह्नित्वादिसमानाधिकरणयावत्त्वादेर्य-द्वित्वादिपर्याप्त्यधिकरणपर्याप्तत्वमक्षतमेवेत्यत आह । पर्याप्तिश्चेति ।

अयमेको घट इत्यनेनाऽव्यासज्यवृत्तिघटत्ववह्नित्वादीनां प्रत्येकमेव पर्याप्तिरिति दर्शितम् । इमौ द्वाविति प्रतीतिकथनेन व्यासज्यवृत्तिद्वित्वादीनां न प्रत्येकपर्याप्तिस्तथा सति अयमेको द्वावित्यादिप्रतीत्यापत्तेरिति दर्शितम् ।

यद्यपि समुदायपर्याप्तत्वेऽपि तदेकदेशप्रत्येकपर्याप्तत्वमनपायम्, समुदायस्यैकदेशानतिरिक्तत्वादिति यावत्त्वादेर्वह्नित्वादिपर्याप्त्यधिकरणप्रत्येकवृत्तिपर्याप्तत्वं दुर्वारम् । तथाऽपि स्वपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिकत्वमत्र विवक्षितमिति न दोषः । व्यासज्याव्यासज्यवृत्त्योः समानजातीयवृत्तिकधर्मावच्छिन्नपर्याप्तयोरेकधर्मिणि पर्याप्तिसत्त्वेऽप्येकधर्मावच्छिन्नेऽपर्याप्तेः । अन्यथाऽयमेको वह्निरितिवदयमेको द्वाविति प्रतीत्यापत्तेर्दुर्वारत्वात् ।

अथ घटावित्यादौ यदि घटत्वादिसामानाधिकरण्यमात्रेण द्वित्वादिपर्याप्तिर्भासते तदा आकाशावित्याकारकप्रतीतेरपि प्रमात्वापत्तिः, आकाशत्वादिसामानाधिकरण्येनाऽऽत्माकाशोभयत्वादेः पर्याप्तत्वादतस्तत्र धर्मितावच्छेदकघटत्वाद्यवच्छिन्नपर्याप्तेरेव विषयत्वमङ्गीकार्यम् । तथा चाऽव्यासज्यवृत्तेरपि द्वित्वावच्छेदकत्वमायातमिति व्यासज्यवृत्तेरव्यासज्यवृत्तिसमानवृत्तिकत्वं दुर्वारमेव । न चानेकवृत्तेरव्यासज्यवृत्तेरपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकत्वमास्तां नाम तादृशधर्मस्य च नाऽव्यासज्यवृत्तिपर्याप्त्यवच्छेदकत्वं किं त्वेकमात्रवृत्तेरेवेति न व्यासज्यवृत्त्यव्यासज्यवृत्त्योरेकधर्मावच्छिन्नपर्याप्तिः प्रसक्तेति वाच्यम् । घटो द्रव्यमित्यादिप्रतीत्या तथाविधघटत्वाद्यवच्छेदेन द्रव्यत्वादिपर्याप्त्यवगाहनादेकमात्रवृत्तेरप्यव्यासज्यवृत्तिपर्याप्त्यवच्छेदकत्वमित्युक्तप्रसङ्गात् । तत्र घटत्वादिसामानाधिकरण्यमात्रेण द्रव्यत्वादिपर्याप्तिर्भासते न तु तदवच्छेदेनेत्युक्तावयमेको घट इत्यादावपि इत्यादौ घटत्वादिपर्याप्त्यवच्छेदकताभाने विवादप्रसङ्गेनाऽव्यासज्यवृत्तिधर्मपर्याप्त्यवच्छिन्नत्वस्य प्रामाण्यसिद्धिप्रसङ्गात् । धूमत्वादिपर्याप्त्यवच्छेदकताविरहे तथाऽवच्छेदकत्वलक्षणाव्याप्तिप्रसङ्गात् । न च स्वपर्याप्त्यवच्छेदकत्वनाव्यापकपर्याप्त्यवच्छेदकत्वमेव विवक्षणीयम्, अव्यासज्यवृत्तिपर्याप्त्यवच्छेदकत्वमात्रस्यापि व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताविरहाद्

तस्या व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताव्यापकत्वमिति व्यासज्याव्यासज्यवृत्त्योर्न समानवृत्तिकताप्रसङ्ग इति वाच्यम् । एवं सति अनतिरिक्तवृत्तित्वनिवेशवैफल्यापत्तेः । न्यूनवृत्तिमहानसीयवह्नित्वादिपर्याप्त्यवच्छेदकतायाः वह्नित्वादिपर्याप्त्यवच्छेदकताव्यापकताविरहेणैव तादृशधर्ममुपादाय वह्नित्वादेरवच्छेदकतापत्त्यसम्भवादिति चेन्न । अनेकवृत्तिघटत्वादेर्हि तत्तद्घटत्वादिरूपैकैकमात्रवृत्तिधर्मावच्छिन्नपर्याप्तिकूटस्य घटनिष्ठपर्याप्तित्वादिरूपानुगतधर्मावच्छिन्नस्याऽवच्छेदकत्वमेवोपेयते न तु घटत्वावच्छिन्ने द्रव्यत्वादेर्यावद्घटादिषु पर्याप्त्यन्तरम्, मानाभावात् । एवं चैकमात्रवृत्तिधर्मावच्छिन्नायाः पर्याप्तेरवच्छेदकत्वस्यैव विवक्षणीयतयानुगतरूपावच्छिन्नपर्याप्तिकूटावच्छेदकानेकवृत्तिधर्मावच्छिन्नपर्याप्तिमादाय व्यासज्यवृत्तेर्नाव्यासज्यवृत्तिसमानवृत्तिकतापत्तिरिति ।

न च कालाकाशावित्यादिप्रतीत्या एकमात्रवृत्तिकालत्वादेरपि द्वित्वादिपर्याप्त्यवच्छेदकत्वावगाहनादेकमात्रवृत्तिधर्माणामपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकतया तस्याव्यासज्यवृत्तिधर्मसमानवृत्तिकत्वं दुर्वारमिति वाच्यम् । तादृशप्रतीत्या तथाविधधर्मद्वयादौ व्यासज्यवृत्तेरेव द्वित्वादिपर्याप्त्यवच्छेदकताया अवगाहनात् । प्रकृते चाव्यासज्यवृत्त्यवच्छेकदताया एव निवेशेनातिप्रसङ्गविरहात् ।

अत्राऽऽहुः । अव्यासज्यवृत्तिघटत्वादीनां पर्याप्त्याख्यसम्बन्धान्तरे मानाभावः समवायादिसम्बन्धेनैवोपपत्तेः । न च समवायस्यैक्येन पटादावपि घटत्वादिविशिष्टबुद्धिप्रसङ्ग इति प्रतिनियतप्रतियोगिकपर्याप्तिसम्बन्धस्वीकार इति वाच्यम् । प्रतिनियतप्रतियोगिकैकविधसम्बन्धेनैवोपपत्तेर्द्विविधसम्बन्धसिद्धेः कथमप्यसम्भवात् । एवं द्वित्वादेरपि पर्याप्तिसमवायादिरूपसम्बन्धद्वयकल्पनमयुक्तम्, अनेकवृत्तिधर्मावच्छिन्नैकविधसम्बन्धेनैव निर्वाहात् ।

न चायमेको द्वित्वसम्बन्धीति प्रतीतेरेकमात्रवृत्तिधर्मावच्छेदेनाऽपि द्वित्वादेः सम्बन्धान्तरस्वीकार आवश्यक इति वाच्यम् । तादृशप्रतीतावपि एकत्वसामानाधिकरण्येनानेकवृत्तिधर्मावच्छिन्नसम्बन्धस्यैव भानोपगमात् । द्वित्वादिप्रकारकतत्सम्बन्धसंसर्गकबुद्धावेव तत्सम्बन्धांशे धर्मितावच्छेदकावच्छिन्नत्वभाननियमात् ।

सम्बन्धप्रकारकोक्तबुद्धौ धर्मितावच्छेदकसामानाधिकरण्यमानावगाहितासम्भवादिति । तथा च समवायातिरिक्तस्य संसर्गकोटावनन्तर्भावेऽप्यतिप्रसङ्गवारणसम्भव । स्वाधिकरणतावच्छेदकावच्छिन्नाधिकरणताकत्वरूपस्य समानवृत्तिकत्वस्य लक्षणे निवेशनीयत्वात् ।

व्याप्यव्यासज्यावृत्तित्वान्यतररूपेण सजातीयत्वरूपसमानवृत्तिकत्वमुपेक्ष्य स्वपर्याप्त्यधिकरणपर्याप्तत्वनिवेशस्य प्रयोजनं सूचयति । त्रित्वादिकमिति । द्वित्वादिसमानवृत्तिकम् । द्वित्वादिपर्याप्त्यधिकरणपर्याप्तवृत्तिकम् । त्रयो द्वावित्यादिप्रत्ययविरहादिति भावः द्वित्वादिना । वह्निधूमोभयत्वादिना साध्यतायाम् । नाऽव्याप्तिः । न धूमादावव्याप्तिः । द्रव्ये द्रव्याणीत्यादिप्रतीत्या द्रव्यत्वाद्येकैकधर्मस्य । द्रव्यत्रित्वादिन्यूनाधिकवृत्तिसंख्यापर्याप्त्यवच्छेदकत्वेऽपि तादृशधर्मस्य प्रत्येकतत्पर्याप्त्यतिप्रसक्तत्वेनाऽनुगमकत्वात्किञ्चिद्रूपावच्छिन्नपर्याप्तिकूटे प्रत्येकाऽवच्छेदकतया पूर्वविवक्षया सामञ्जस्यमिति ध्येयम् ।

आत्माश्रयशङ्कां निरस्यति । घटक चेति । स्वरूपसम्बन्धविशेष इति । तादृशावच्छेदकताश्रयसमनियतलघुधर्मानतिरिक्तवृत्तित्वमादायैव कम्बुग्रीवादिमत्त्वादावनवच्छेदकत्वोपपादनसम्भवादिति भावः । प्रतियोगिताधर्मिकाभयाभावघटनापक्षे गुरुधर्मावच्छिन्नसाध्यकसद्धेतौ साध्यतावच्छेदकावच्छिन्नत्वाप्रसिद्धिनिबन्धनामव्याप्तिं परिहरति । एवमिति । यद्धर्मान्यूनवृत्तीति । तदन्यूनवृत्तित्वं तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वम्, तत्र पूर्वोक्तयुक्त्या भेदे प्रतियोगितावच्छेदकपर्याप्त्यधिकरणनिवेशाद्वह्निघटोभयत्वादेर्वह्नित्वाद्यन्यूनवृत्तित्वमक्षतमेवेति यद्धर्मपर्याप्त्यधिकरणपर्याप्तत्वमपि निवेश्यमतो धूमसमानाधिकरणाभावप्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽपि न क्षतिः । प्रतियोगितायाः प्रतियोगिभेदेन भेदे धूमादिसामान्याभावप्रतियोगितायाः प्रत्येकं धूमत्वाद्यन्यूनवृत्तित्वविरहेणाव्याप्तिः । नानाप्रतियोगिवृत्तिप्रतियोगितायाः ऐक्ये वह्निघटोभयत्वाद्यवच्छिन्नप्रतियोगितायां प्रत्येकपर्याप्तायां वह्नित्वादिपर्याप्त्यधिकरणपर्याप्तत्वसहितवह्नित्वाद्यन्यूनवृत्तित्वसत्त्वादव्याप्तिरतस्तदन्यूनवृत्तित्वमात्रमुपेक्ष्याऽन्यूनवृत्तिधर्माव-

च्छिन्नत्वपर्यन्तेस्योभयाभावप्रतियोगितायां निवेशः ।

अथात्र दण्डादिनानाव्यक्तिसाध्यतावच्छेदकके व्यभिचारि॰ विशेषेऽतिव्याप्तिः, निखिलानामेव दण्डादिव्यक्तीनां दण्डा॰ दिरूपसाध्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितावच्छेदकतया हेतुसमानाधिकरणदण्डाद्यवच्छिन्नाभावप्रतियोगितायां तादृ॰ शभेदप्रतियोगितानवच्छेदकावच्छिन्नत्वाभावसत्वात् । तादृशभेद॰ प्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपं तद्रूपविशिष्टावच्छेद्य॰ त्वाभावनिवेशे दण्डयादिभिन्नभेदप्रतियोगितावच्छेदकतानवच्छेद॰ कदण्डत्वादिविशिष्टाद्यवच्छेद्यत्वस्य दण्ड्यादिसामान्याभावप्रतियोगि॰ तायां सत्त्वेन तत्रातिव्याप्तिपरिहारेऽपि धूमवान् वह्नेरित्यादा॰ वतिव्याप्तिः, धूमाद्यभावप्रतियोगितायां लाघवेन स्वरूपेण एव धूमत्वादेरवच्छेदकतया विशेषणान्तरविशिष्टधूमत्वाद्यवच्छेद्यत्वा॰ भावसत्त्वात् । न च विशेषणान्तरविशिष्टधूमत्वाद्यवच्छेद्यत्वा॰ प्रसिद्ध्या नातिव्याप्तिरिति वाच्यम् । घटावृत्तिजातिमत्सामान्या॰ भावप्रतियोगितायामेव तत्प्रसिद्धेरिति चेन्न । दण्डाद्यात्मकसाध्य॰ तावच्छेदकस्य साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वासम्भवे॰ ऽपि व्यभिचारानिरूपकाधिकरणं यत्तद्वृत्त्यन्यत्वस्याखण्डस्य तथा॰ त्वात्तदवच्छेद्यत्वाभावस्यापि हेतुसमानाधिकरणाभावप्रतियोगि॰ तासामान्येऽसत्त्वेन दण्ड्यादिसाध्यके ऽनतिप्रसङ्गात् ।

अथ वा साध्यतावच्छेदकवन्निष्ठभेदप्रतियोगितायां यादृशरूपा॰ वच्छिन्नत्वं नास्ति तादृशरूपावच्छिन्नत्वाभावस्य विवक्षणीयत्वाद् द॰ ण्डादिसाध्यतावच्छेदकके व्यभिचारिणि दण्ड्यादिनिष्ठभेदप्रतियोगि॰ तायां तत्ताविशिष्टदण्डाद्यवच्छिन्नायां दण्डत्वादिविशिष्टावच्छेद्यत्वा॰ भावसत्त्वाद्दण्ड्यादिसामान्याभावप्रतियोगितायां च तादृशाभावास॰ त्त्वेनातिव्याप्त्यनवकाशात् । अवच्छेदकतयोरेकसम्बन्धावच्छिन्नत्वं निवेश्य सम्बन्धभेदनिबन्धनो दोषो निरस्यः।

सत्तावान् जातेरित्यादौ सत्तात्वादेर्हेतुसमानाधिकरणाभाव॰ प्रतियोगितावच्छेदकाविशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितयाऽव्याप्तिरि॰ ति प्रतियोगितावच्छेदकाव्यभिचारित्वरूपस्य स्वव्यापकतत्कत्व॰ रूपस्य च तदनतिरिक्तवृत्तित्वस्य निवेशो न सम्भवतीति यद्ध॰ र्मविशिष्टस्य प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाव्यभिचा॰

रिता, प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नस्य वा यद्रूपविशिष्टव्यापकता तत्त्वरूप प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव निवेशनीयम्, तावतैव च वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदकमादाय वह्नित्वादेः पारिभाषिकावच्छेदकत्वनिरासः सम्भवति, वह्नित्वादिविशिष्टस्य तादृशोभयत्वाद्यवच्छिन्नव्यभिचारित्वात्, तादृशोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्वविशेषणनिवेशं विनैव निर्वाहः, एवं यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नत्वाभावस्य प्रतियोगिताधर्मिकस्य व्याप्तिघटकतापक्षेऽपि तदन्यूनवृत्तित्वं यदि तद्व्यापकत्वं तदा सत्तात्वव्यापकविशिष्टसत्तात्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादुक्तस्थले एवाव्याप्तिरिति तद्विशिष्टव्यापकतावच्छेदकत्वरूपं तदन्यूनवृत्तित्वमेव निवेश्यम्, तावतैव वह्निघटोभयत्वादेर्वह्नित्वादिविशिष्टव्यापकतानवच्छेदकतया धूमादिसमानाधिकरणाभावप्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽप्यव्याप्त्यनवकाशात्। यद्धर्मान्यूनवृत्तिधर्मे यद्धर्मसमानवृत्तिकत्वविशेषणप्रक्षेपमन्तरेणैव सामञ्जस्यमित्याशयेनाह। वस्तुतस्त्वित्यादि।

(टी०) वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वम्, स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वकत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यम्।

(गा०) तदवच्छिन्नेति। तत्पदमनतिरिक्तवृत्तित्वप्रतियोगिभूतहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणपरम्। स्वपदमनतिरिक्तवृत्तित्वेनाभिमतपरम्। धूमत्वाद्यवच्छिन्नाभाववति मेयधूमत्वादिविशिष्टस्यासम्बद्धतया मेयधूमत्वादेरवच्छेदकतानिर्वाहः। धूमत्वावच्छिन्नाश्रयमहानसीयधूमाभाववति धूमत्वादिविशिष्टस्य सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या तद्धूमत्वादिरूपावच्छेदकभेदमादायातिव्याप्तिरिति तदाश्रयप्रतियोगिकत्वं परित्यज्य तदवच्छिन्नप्रतियोगिताकत्वमभावविशेषणमुपात्तम्। हेतुसमानाधिकरणाभावप्रतियोगितायां यस्य येन सम्बन्धेनावच्छेदकता तेन सम्बन्धेन तदवच्छिन्नत्वं निवेशनीयम्, तेन विषयितया धूमत्वाद्यवच्छिन्नस्य ज्ञानादेर

भाववति धूमत्वादिविशिष्टधूमादेः सम्बद्धत्वेऽपि न धूमत्वादेरवच्छेदकत्वानुपपत्तिः । उत्पत्तिकालावच्छेदेन धूमत्वाद्यवच्छिन्नाभाववति धूमत्वादिविशिष्टस्य संयोगरूपसाध्यतावच्छेदकसम्बन्धेन सम्बद्धतया तादृशं स्वं *गुणत्वादिकमेवेति संयोगेन धूमादिसाध्यके व्यभिचारिण्यतिप्रसङ्गस्य वारणाय प्रतियोगिवैयधिकरण्यमभावे* विशेषणं देयम् । धूमाद्यभावस्यापि ह्रदादौ प्रतियोगिव्यधिकरणतया तदभाववारणासम्भवात् । साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिमद्वृत्तिर्यो यस्तद्भिन्नत्वनिवेशे संयोगेनावृत्तेर्गुणादेरेवाभावस्य प्रसिद्ध्या तद्वति धूमत्वादिविशिष्टस्य संयोगेन सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या पूर्ववद् गुणत्वादेरेवावच्छेदकत्वादतिव्याप्तितादवस्थ्यम् । स्वपदेनानुयोगिभूताभावोपादाने संयोगेन साध्यतायां सद्धेतौ तादृशसम्बन्धेन गुणाभावप्रतियोगिनोऽधिकरणाप्रसिद्ध्या तादृशाभावाप्रसिद्धेरव्याप्तितः *प्रतियोगिवैयधिकरण्यविशिष्टाभावाधिकरणासम्बद्धत्वं* विवक्षणीयम् । द्रव्यं गुणादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वाद्यवच्छिन्नाभावप्रतियोग्यनधिकरणगुणादौ द्रव्यत्वत्वादिविशिष्टस्यासम्बद्धतया द्रव्यत्वत्वादेरवच्छेदकत्वापत्तिरिति प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव प्रवेश्यम् । तद्धर्मस्य तद्धर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेनोपादानं शिरोवेष्टनेन नासिकास्पर्शमनुकरोतीति तद्धर्मावच्छिन्नवैयधिकरण्यविशिष्टत्वमेव *निवेशनीयम्* । तद्धर्मावच्छिन्नानधिकरणासम्बद्धस्वविशिष्टसामान्यकत्वं तु फलितार्थः। तद्धर्मावच्छिन्नानधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन तदसम्बन्धित्वम् । तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणसमवायसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकगुणादिविषयकज्ञानत्वाद्यवच्छिन्नस्य विषयतया द्रव्यादिसम्बद्धस्य सम्बन्धसामान्येनानधिकरणे नित्यगुणादौ गुणत्वादिविशिष्टस्यासमवेतत्वेऽपि न गुणत्वादेरवच्छेदकताप्रसङ्गः । एवं *च महाकालो घटवान् कालपरिमाणादित्यादौ उभयाभावघटितप्रतियोगिवैयधिकरण्यशालिहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकगग*नत्वादिविशिष्टस्य साध्यतावच्छेदकसम्बन्धेन सम्बन्धिनोऽप्रसिद्ध्याऽव्याप्तिर्वारणाय साध्यतावच्छेदकसम्बन्धसामान्ये तद्-

वच्छिन्नप्रतियोगिकत्वयद्यदधिकरणानुयोगिकत्वोभयाभाववत्तत्तदधिकरणासम्बद्धत्वविशिष्टसामान्यकत्वं विवक्षणीयम् । ईदृशं च स्वत्वं गगनत्वादिकमेव प्रसिद्धमिति नाऽव्याप्तिः । तदसम्बद्धत्वं च तदनुयोगिकसाध्यतावच्छेदकसम्बन्धाप्रतियोगित्वं तेन संयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नाभाववति ज्ञाने कपालादौ विषयित्वसमवायादिना घटत्वादिविशिष्टस्य सम्बद्धत्वेऽपि वह्निमान् धूमादित्यादौ नावच्छेदकाप्रसिद्धिः । तादात्म्येन साध्यतायां साध्यतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तिः स्यादित्यवृत्तित्वमुपेक्ष्यासम्बद्धत्वानुधावनम् । विशिष्टसत्तावान् जातेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाभाववति गुणादौ विशिष्टसत्तात्वावच्छिन्नसत्तादेः सम्बद्धतया विशिष्टसत्तात्वादेरवच्छेदकत्वानुपपत्तिरिति स्वाश्रयासम्बद्धत्वमनिवेश्य स्वविशिष्टे तन्निवेशनम् ।

यद्यपि विशेष्यस्य तत्सम्बन्धित्वे विशिष्टे तदसम्बन्धित्वं दुर्घटम्, तथापि स्वविशिष्टप्रतियोगिकत्वाभाववत्तदवच्छिन्नाभाववदनुयोगिकसाध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य तदवच्छिन्नाभाववदनुयोगिकसाध्यतावच्छेदकसम्बन्धप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणपर्याप्तविषयतापर्याप्त्यधिकरणत्वस्य वा विवक्षणीयतया न दोषः । स्वविशिष्टप्रतियोगिकत्वानि च विशिष्याऽऽपादाय तदभावकूटमेव निवेशनीयम् । तेन मेयधूमत्वादिविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावस्य शुद्धधूमत्वाभावप्रतियोगितानवच्छेदकत्वेनाऽप्रसिद्धावपि न क्षतिः ।

वस्तुतो मेयधूमत्वादिविशिष्टप्रतियोगिकत्वाभावस्य शुद्धधूमत्वादिप्रकारकज्ञाननिष्ठविषयितासम्बन्धेनाधारणत्वात् धूमत्वादिविशिष्टप्रतियोगिकत्वत्वस्य लघुधर्मस्य न तत्प्रतियोगितावच्छेदकत्वसम्भव इति न मेयधूमत्वादिविशिष्टप्रतियोगिकत्वत्वावच्छिन्नाभावाप्रसिद्धिरिति सामान्यत एवाभावनिवेशोऽपि सम्भवतीति ध्येयम् ।

येन रूपेण यस्य यद्धर्मिसम्बन्धिता तद्रूपावच्छिन्न तस्य नासम्बद्धत्वाभाववत्त्वमनुगतं वा पक्षलक्षणम् । द्वितीयलक्षणं च तदनुगुणमेव । धूमादिसमानाधिकरणाभावप्रतियोगितावच्छेदकमदनीयवह्नित्वावच्छिन्नाभाववति वह्न्यादिवि-

शिष्टमहानसीयवह्न्यादेरसम्बद्धतया वह्नित्वादावतिप्रसङ्गवारणाय सामान्यपदम् ।

अथ साध्यतावच्छेदकसंयोगादिसम्बन्धेन घटत्वाद्यवच्छिन्नाभाववति कालिकादिसम्बन्धेन घटत्वादिविशिष्टस्य पटादेः संयोगादिसम्बन्धेन सम्बद्धत्वादवच्छेदकाप्रसिद्धिः । साध्यतावच्छेदकताघटकसम्बन्धेन स्वविशिष्टत्वनिवेशेऽपि कालिकसम्बन्धेन घटत्वादिविशिष्टस्य कालिकसम्बन्धेन साध्यतायां महाकालपरिमाणादिहेतुके ऽवच्छेदकाप्रसिद्धिर्दुर्वारैव गगनत्वाद्यवच्छिन्नाभाववति काले कालिकसम्बन्धेन गगनत्वादिविशिष्टस्य स्पन्दादेः कालिकसम्बन्धेन सम्बद्धत्वात् । प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धेन वैशिष्ट्यनिवेशे घटत्वादिसमनियतासमवेतगुरुधर्मस्य यत्र साध्यतावच्छेदकता तत्र तादृशधर्मस्य घटत्वादिकमादायावच्छेदकत्वानुपपत्तिः । घटत्वादेः समवायेन घटाद्यभावप्रतियोगिनावच्छेदकत्वात्तत्सम्बन्धेन च तद्धर्मविशिष्टाप्रसिद्धेरिति चेन्न । यत्किञ्चित्सम्बन्धेन स्वविशिष्टसामान्ये ऽसम्बद्धत्वनिवेशनेन सामञ्जस्यात् ।

न चैवं वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नाभाववति विषयितासम्बन्धेन वह्नित्वविशिष्टस्य साध्यतावच्छेदकसंयोगेनाऽसम्बद्धत्वाद्वह्नित्वादेर्गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकसविषयकत्वाद्यवच्छिन्नाभाववति घटादौ विषयितया गुणत्वादिविशिष्टस्याऽसमवेतत्वात् गुणत्वादेरवच्छेदकत्वापत्त्याऽव्याप्तिरिति वाच्यम् । साध्यतावच्छेदके तादृशपारिभाषिकावच्छेदकताशून्यत्वमनिवेश्य साध्यतावच्छेदकताघटकसम्बन्धेन साध्यतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वांशे साध्यसामानाधिकरण्यघटके पारिभाषिकावच्छेदकताघटकसम्बन्धेन तादृशावच्छेदकावच्छिन्नानिरूपितत्वस्य निवेशनीयतया विषयितया वह्नित्वादेरवच्छेदकत्वेऽपि समवायरूपसाध्यतावच्छेदकताघटकसम्बन्धेन वह्नित्वाद्यवच्छिन्ननिरूपितायामधिकरणतायां विषयितासम्बन्धेन वह्नित्वाद्यवच्छिन्ननिरूपितत्वाभावसत्त्वेन लक्षणसमन्वयात् । गुरुधर्मस्यापि प्रतीतिबलेनाधिकरणतानिरूपकतावच्छेदकत्वोपगमाच्च गुरुधर्मावच्छिन्नसाध्यकस्थले साध्यतावच्छेदकावच्छिन्नाधिकरणत्वाप्रसिद्धिः ।

अथ साध्यतावच्छेदकताघटकसम्बन्धेनावच्छेदकविशिष्टवृत्तिविषयिताकस्य साध्यतावच्छेदकतावच्छेदकसम्बन्धेन साध्यतावच्छेदकविशिष्टविशेषणमङ्गीकार्यम् । समवायसम्बन्धेन वह्नित्वादिविशिष्टस्य या विषयता तस्याः सम्बन्धान्तरेण वह्नित्वादिविशिष्टनिष्ठविषयतान्यतया नाव्याप्त्यवकाशः । स्वरूपसम्बन्धरूपावच्छेदकताप्रवेशमतेऽपि ईदृशी रीतिरेवादरणीया, अन्यथा वह्नित्वादिधर्मिकानवच्छेदकत्वादिग्रहस्य वह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वे धर्मितावच्छेदकतया वह्नित्वत्वादिविषयताया हेतुतावच्छेदककोटौ निवेशाद् गौरवस्य वह्नित्वत्वाद्यनुपस्थितिदशायां वह्निमानित्याद्याकारकानुमित्यनुपपत्तेश्च दुर्वारत्वात् ।

अत्र च यत्किञ्चिद्धेत्वधिकरणासम्बद्धत्वविशिष्टसामान्यकत्वस्य लघोरवच्छेदकान्तार्थत्वसम्भवे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नाभाववदसम्बद्धत्वविशिष्टसामान्यकत्वस्य गुरुतरस्य निवेशात् मूलोपात्तप्रतियोगितान्तस्य यथाश्रुतार्थकत्वानुरोधेन । अन्यथाऽवच्छेदकान्तमुपात्तस्य पारिभाषिकत्वापत्तेः । यथा नियतावच्छेदकतानिवेशेऽवच्छेदकपदस्यैवावच्छेदकावच्छिन्नाभाववदसम्बद्धत्वविशिष्टसामान्यकत्वे पारिभाषिकत्वं तद्वत् ।

अत्र च जातिमान् मेयत्वादित्यादौ जातित्वादेरवच्छेदकत्वानुपपत्तिः, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूतयद्धर्मावच्छिन्नाभाववति साध्यतावच्छेदकसमवायसम्बन्धेन सम्बद्धत्वप्रसिद्धिस्तद्धर्मावच्छिन्नाभाववति जातित्वादिविशिष्टस्यापि समवेतत्वात् । जातित्वाद्यवच्छिन्नाभाववति च समवेतत्वस्यैवाप्रसिद्ध्या तदभाववदसमवेतत्वस्य जातित्वादिविशिष्टादौ दुर्निरूपत्वात् । एवं यथाश्रुते विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वादेरप्यवच्छेदकत्वानुपपत्तिरतोऽन्यथानतिरिक्तवृत्तित्वं निर्वक्ति । स्वविशिष्टेति । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकगुरुधूमत्वादौ मेयधूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतया मेयधूमत्वादेरवच्छेदकत्वोपपत्तिः । जातिमान् मेयत्वादित्यादौ मेयत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकजातित्वादौ जातित्वविशिष्टसमवायिनिष्ठाभावप्रतियोगितानवच्छेदकतया तस्य तथात्वोपपत्तिः । विशिष्ट-

सत्तावान् जातेरित्यादौ द्रव्यत्वत्वविशिष्टसत्तात्वादेर्विशिष्टसत्ताया-श्रयसम्बन्धिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि विशिष्टस-त्तात्वादिविशिष्टसम्बन्धिद्रव्यादिनिष्ठाभावप्रतियोगितानवच्छेदक-त्वाद्विशिष्टसत्तात्वादेरवच्छेदकतानिर्वाहः । सम्बन्धित्वं साध्यता-वच्छेदकसम्बन्धेन बोध्यं तेन घटत्वादेर्विषयितादिसम्बन्धेन घट-त्वादिविशिष्टसम्बन्धिज्ञानादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि नावच्छेदकाप्रसिद्धिः ।

अथैवं महाकालो घटवान् कालपरिमाणादित्यादाववच्छेद-काप्रसिद्धिः । साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्ब-न्धिनोऽप्रसिद्धा स्वपदेन गगनत्वाद्युपादानासम्भवात् ।

न च सम्बन्धसामान्येन स्वविशिष्टसम्बन्धिनिष्ठः सम्बन्ध-सामान्येन प्रतियोगिव्यधिकरणाभावो निवेश्यः । विषयितया ग-गनत्वादिविशिष्टसम्बन्धिनि तद्विषयकज्ञानादौ सम्बन्धसामान्येन प्रतियोगिव्यधिकरणस्य तादृशज्ञानासमानकालिकतत्तद्घटाभावादेः प्रतियोगितायां गगनत्वादेरनवच्छेदकत्वादुक्तस्थले गगनत्वादिकमव-च्छेदकं प्रसिद्ध्यति, तादृशज्ञानादौ कालिकसम्बन्धेन गगनादेरभाव-सत्त्वेऽपि तस्य विषयितासम्बन्धेनैव प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् । वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छे-दकज्ञानत्वादेर्वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकतया वह्नित्वा-देरवच्छेदकत्वापातात् । ज्ञानत्वाद्यवच्छिन्नाभावस्य विषयतासम्ब-न्धेन प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वात् ।

न च तादात्म्यसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठभेदप्रतियो-गितानवच्छेदकत्वं विवक्षणीयम्, कालो घटवान् कालपरिमाणा-दित्यादौ गगनत्वादिविशिष्टाभिन्ननिष्ठभेदप्रतियोगितानवच्छेदक-त्वाद् गगनत्वादिकमवच्छेदकमिति वाच्यम् । सत्तावान् जातेरित्यादौ तादात्म्येन सत्तात्वादिविशिष्टसम्बन्धिनि सत्तादौ यो भेदस्तत्प्र-तियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वादौ सत्त्वेन सत्तात्वादे-रवच्छेदकत्वापातात् । तादात्म्यसाध्यतावच्छेदकान्यतरसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणा-

भावस्य निवेशेऽपि घटत्वाभाववान् घटान्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटत्वाभावान्यवृत्तित्वविशिष्टघटत्वाभावत्वादेरन्यतरसम्बन्धेन घटत्वाभावत्वादिविशिष्टसम्बन्धिनिष्ठस्यान्यतरसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वादव्याप्त्यापत्तेः। घटत्वाभावत्वादिविशिष्टसम्बन्धिनि पटादौ घटत्वाभावान्यवृत्तित्वविशिष्टघटत्वाभावत्वाद्यवच्छिन्नस्य साध्यतावच्छेदकसम्बन्धेन सत्त्वात्, घटत्वाभावे च तदवच्छिन्नस्य तादात्म्यसम्बन्धेन सत्त्वात्तन्निष्ठतदभावस्याऽन्यतरसम्बन्धेन प्रतियोगिसमानाधिकरणत्वात्।

एतेन यत्किञ्चित्सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठो यस्तेन सम्बन्धेन प्रतियोगिव्यधिकरणोऽभावस्तत्प्रतियोगितानवच्छेदकत्वविवक्षापि निरस्ता। तादात्म्येन सत्तात्वाद्यवच्छिन्नं प्रति तत्सम्बन्धेन विशिष्टसत्तात्वाद्यवच्छिन्नस्य व्यापकतयोक्तस्थले सत्तात्वादेरवच्छेदकताया दुर्वारत्वात्। कालिकसम्बन्धेन वह्नित्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वाद्यवच्छिन्नस्य व्यापकतया वह्निमान् धूमादित्यादौ वह्नित्वादेरवच्छेदकत्वापाताच्च।

न च येन येन सम्बन्धेन यो यः स्वविशिष्टसम्बन्धी तेन तेन सम्बन्धेन प्रतियोगिव्यधिकरणो यस्तन्निष्ठोऽभावस्तत्प्रतियोगितानवच्छेदकत्वं विवक्षणीयम्, संयोगसमवायादिना वह्नित्वसत्तात्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वविशिष्टसत्तात्वाद्यवच्छिन्नस्याऽव्यापकतया च नोक्तदोषावकाश इति वाच्यम्। एवं सति विषयितासम्बन्धेन कम्बुग्रीवादिमत्त्वादिविशिष्टसम्बन्धिनि तेन रूपेण घटावगाहिनि घटत्वाद्यप्रकारकज्ञानादौ विषयितया घटत्वादिविशिष्टस्यासत्त्वेन घटत्वादेस्तेन सम्बन्धेन प्रतियोगितानवच्छेदकावच्छिन्नव्यधिकरणाभावप्रतियोगितावच्छेदकतया घटत्वादिकमादाय कम्बुग्रीवादिमत्त्वादेरवच्छेदकत्वनिर्वाहासम्भवात्।

न च हेतुसमानाधिकरणाभावीययत्सम्बन्धावच्छिन्नयत्किञ्चित्प्रतियोगितायां यदवच्छेदकं तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वं तस्य वाच्यम्, घटवान् कालपरिमाणादित्यादौ तादात्म्यं वि-

यिनां च तादृशसम्बन्धमादाय गगनत्वादेरवच्छेदकत्वं सङ्गमनीयम् । विशिष्टसत्तात्वादेर्गुणादिनिष्ठभेदप्रतियोगितायां गौरवेण नावच्छेदकत्वमपि तु शुद्धसत्तात्वादेरेवेति हेतुसमानाधिकरणतादृशभेदस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेन तदुपादानासम्भवात् । सत्तावान् जातेरित्यादौ यत्सम्बन्धेत्यनेन तादात्म्यसम्बन्धमुपादाय सत्तात्वादेर्नावच्छेदकताप्रसङ्गः । वह्निमान् धूमादित्यादौ संयोगरूपसाध्यतावच्छेदकसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालिन उत्पत्तिकालावच्छेदेन धूमाधिकरणवृत्तेः समवायसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदकं रूपत्वादिकं *वह्नित्वादिविशिष्टसमवायिनिष्ठस्य* समवायेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकमतो वह्नित्वादेरवच्छेदकत्वापत्तिरिति प्रतियोगितावच्छेदकसम्बन्धं *परित्यज्य साध्यतावच्छेदकसम्बन्धः प्रतियोगिवैयधिकर*ण्यशरीरे निवेशितः । तथा च सति संयोगसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालिनो रूपत्वाद्यवच्छिन्नाभा*वस्य वह्नित्वादिविशिष्टसम्बन्धिनि सत्त्वान्नायं दोष इति वाच्यम् ।* वह्निमणुकत्वादेर्यत्र संयोगेन साध्यतायामवच्छेदकता तत्र तदवच्छिन्नसमवायितेजःपरमाणौ समवायसम्बन्धावच्छिन्नरूपत्वाद्यवच्छिन्नाभावासत्त्वेन *तत्सम्बन्धावच्छिन्नाभावप्रतियोगितानव*च्छेदकत्वस्य कालविशेषावच्छेदेन हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकरूपत्वादौ सत्त्वेन साध्यतावच्छेदकस्यावच्छेदकताप्रसङ्गात् ।

यत्तु स्वविशिष्टप्रतियोगिकत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य विवक्षणीय*तया न कश्चिद्दोषः । जातिमान् मेयत्वादित्यादौ जातित्वाव*च्छिन्नाभाववत्समवेतत्वाप्रसिद्धावपि जातित्वादिविशिष्टप्रतियोगिकत्वतादृशाभाववदनुयोगिकत्वोभयाभावस्य समवायसामान्ये सत्त्वेन *जातित्वादेरवच्छेदकत्वोपपत्तेः । कालो घटवान् कालपरिमा*णादित्यादौ कालिकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धप्रसिद्धावपि तादृशसम्बन्धसामान्ये गगनत्वादिविशिष्टप्रतियोगिकत्वतदवच्छिन्नाभाववदनुयोगिकत्वोभयाभावसत्त्वेन गगनत्वादेरवच्छे-

दकतानिर्वाहादिति तन्न । तावता प्रथमलक्षणस्यैव परिष्कारेण द्वितीयलक्षणानुसरणानुपपत्तेः ।

अत्र वदन्ति साध्यतावच्छेदकसम्बन्धेन यदवच्छेदकविशिष्ट-सम्बन्धिनः प्रसिद्धिर्यत्र तदवच्छिन्नाभाववदसम्बद्धस्वविशिष्ट-सामान्यकत्वमेव तत्र तदवच्छेदकत्वम्, तेन घटवान् कालपरिमाणा-दित्यादौ गगनत्वादावच्छेदकत्वप्रसिद्धिः, यदवच्छेदकविशिष्टे तदवच्छिन्नाभाववति साध्यतावच्छेदकसम्बन्धेन सम्बद्धत्वाप्र-सिद्धा तदभावो दुर्निरूपः तत्रावच्छेदकत्वं स्वविशिष्टेत्यादिरूपम्, तेन जातिमान् मेयत्वादित्यादौ जातित्वादेरवच्छेदकत्वोपपत्तिः । सर्वसाधारणस्यैकविधावच्छेदकत्वस्य दुर्वचत्वेऽपि न क्षतिर्वा-कारो व्यवस्थितविकल्पार्थक इति ।

अत्रेदं चिन्त्यते । ईदृशावच्छेदकत्वयोरभावद्वयाविषयकज्ञानमनु-मितिहेतुः, प्रत्येकाभावस्य वा वैकल्पिकी कारणता ? आद्ये, कालो घटवान् कालपरिमाणादित्यादौ भ्रमं विनानुमित्यनुपपत्तिः, द्वि-तीयस्यावच्छेदकत्वस्याऽसिद्धेः । द्वितीये, जातिमान् मेयत्वादि-त्यादौ प्रथमनिरुक्तावच्छेदकत्वाभावस्य जातित्वेऽबाधितत्वात्तज्ज्ञा-नाद्भ्रमं विनैवानुमित्यापत्तिः ।

न च साध्यसाधनभेदेन कार्यकारणभावभेदस्याऽऽवश्यकत्वात् कालिकसम्बन्धेन घटादिसाध्यककालपरिमाणादिहेतुकानुमितौ प्रथमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव, मेयत्वादिलिङ्गकजात्याद्यनु-मितौ च चरमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव हेतुतास्वीकाराद्यो-क्तदूषणद्वयानवकाश इति वाच्यम् । साध्यसाधनभेदेनानुमितिव्याप्ति-ज्ञानयोः कार्यकारणभावभेदेऽपि एकसाध्यसाधनस्थले यादृशज्ञाना-दनुमितिस्तादृशज्ञानसत्त्वेऽन्यथानुमित्यनुत्पादस्यानुभवविरुद्धतया प्रथमनिरुक्तावच्छेदकत्वाभावज्ञानात्कालो घटवान् कालपरिमाणादि-त्यत्राऽनुमितिस्वीकारे तादृशज्ञानान्मेयत्वादिलिङ्गकजात्याद्यनुमि-तेरवश्यस्वीकरणीयतापातात् । अन्यथा सद्धेतुकानुमितावतिव्या-प्तिवारणायोपात्तप्रतियोगितावच्छेदकावच्छिन्नत्वाद्यविषयकतज्ज्ञान-स्यैव लाघवेन हेतुत्वापत्तिः । मेयत्वादिलिङ्गकजात्याद्यनुमितौ चरमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव हेतुत्वे समवेतमात्रमेव स-कलं द्रव्यमपि समवेतमिति भ्रमदशायामनुमित्युपपादनासम्भवाच्च ।

तदानीं समवेतवृत्तितया गृहीतघटत्वादिविशिष्टव्यापकतावच्छेदके हेतुव्यापकतावच्छेदकत्वग्रहादसमवेतवृत्तितया गृहीतगगनत्वादिविशिष्टस्य च समवायेन सम्बन्धिताया दुर्ग्रहत्वात् स्वविशिष्टेत्यादिरूपावच्छेदकत्वस्य क्वचिदपि गृहीतुमशक्यत्वात् । वृत्तिमन्मात्रमेव महाकाले कालिकसम्बन्धेन वर्तते इति निश्चयदशायां महाकालत्वादिहेतुकघटाद्यनुमितेरपि तदानीं मेयत्वादिलिङ्गकजात्याद्यनुमितेर्दुरपह्नवत्वादिति ।

इदं तु तत्त्वम् । यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं तेन सम्बन्धेन तद्रूपावच्छिन्नविशिष्टावृत्तिविषयतावान् यः साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नविशिष्टस्तद्वृत्तित्वं व्याप्तिः । धूमवान् वह्नेरित्यादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं धूमत्वादिकं संयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नसम्बन्धिनिष्ठस्य तत्सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं साध्यतावच्छेदकीभूततादृशसम्बन्धेन धूमत्वाद्यवच्छिन्नविशिष्टनिष्ठविषयता च न तेन सम्बन्धेन धूमत्वाद्यात्मकतद्रूपावच्छिन्नविशिष्टावृत्तिरिति नातिप्रसङ्गः । महाकालो घटवान् कालपरिमाणादित्यादौ साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकं गगनत्वादिकमेव तादात्म्यादिना तद्विशिष्टसम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं तेन सम्बन्धेन तदवच्छिन्नविशिष्टावृत्तित्वं च कालिकसम्बन्धेन घटत्वाद्यवच्छिन्नविशिष्टनिष्ठविषयताया इति लक्षणसमन्वयः । धूमादिसमानाधिकरणस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितावच्छेदकं ज्ञानत्वादिकं *वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन* प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं ज्ञानाद्यभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणत्वादिति वह्नित्वादेरवच्छेदकत्वप्रसङ्ग इत्यतस्तेन सम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशनम् । संयोगादिना वह्न्यादिमन्निष्ठो ज्ञानाद्यभा-

वच्छ संयोगादिसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्याश्रय इति न दोषः । साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशे कालः सर्ववान् महत्त्वादित्यादौ सर्वत्वस्यावच्छेदकत्वोपपत्तेश्च उभयाभावघटितस्यैव प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया तादात्म्यादिना गगनादिसम्बन्धिगगनादिनिष्ठगगनाभावस्य कालिकसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालितया कालो घटवान् महाकालत्वादित्यादाववच्छेदकाप्रसिद्धितादवस्थ्यमिति तादृशसम्बन्धेन तन्निवेशितम् । सत्तावान् जातेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेः सत्तात्वादिविशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया सत्तात्वादेरवच्छेदकत्वापत्तिरत प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यमेव निवेशनीयम् ।

न च सर्वत्वावच्छिन्नस्य यत्र विषयितासम्बन्धेन साध्यता ज्ञानत्वादिकं हेतुस्तत्र सर्वत्वस्य पारिभाषिकावच्छेदकत्वानुपपत्तिर्घटत्वविशिष्टस्य विषयितासम्बन्धेन सम्बन्धिनि सर्वविषयकज्ञाने तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरिति वाच्यम् । घटत्वाद्यवच्छिन्नाविषयके सर्वत्वावच्छिन्नविषयकेऽस्मदादिज्ञाने घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकघटत्वावच्छिन्नव्यधिकरणतया सर्वत्वस्य तादृशाभावप्रतियोगितानवच्छेदकत्वेन सर्वत्वस्यावच्छेदकत्वोपपत्तेः ।

न चैवमपि यत्र नित्यत्वविशिष्टसर्वत्वं साध्यतावच्छेदकं तत्र जन्यज्ञानस्य साध्यतावच्छेदकीभूतस्वविशिष्टसम्बन्धित्वान्नित्यज्ञाने चाभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्याऽप्यसम्भवात्तादृशसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वानुपपत्तिरिति वाच्यम् । नित्यत्वानिरूपणे नित्यत्वविशिष्टसर्वमिति ज्ञाने विषयितया नित्यत्वविशिष्टसम्बन्धिताया अनपायात् तत्र तद्वत्त्वस्य सुवचत्वात् अन्यथाविशिष्टस्य घटादेरपि ईश्वरज्ञानासम्बन्धितया तादृशविशिष्टाभावस्यैव ईश्वरज्ञाने विशिष्टप्रतियोगिव्यधिकरणस्य सुलभत्वसम्भवात् । अन्यत् सर्वं पूर्ववद्बोध्यम् ।

यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्सम्बन्धिनिष्ठतद्रूपावच्छिन्नप्रतियोगिकत्वाभिन्नं यत्साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वं तद्वत्साध्यतावच्छेदकसम्बन्धिसम्बन्धो वा व्याप्तिः । प्रतियोगित्वाद्यन्तर्भावासहिष्णुतायां यद्रूपावच्छिन्नस्य यादृशसम्बन्धेनाऽसम्बन्धित्वं हेतुमतस्तादृशसम्बन्धनिष्ठतद्रूपावच्छिन्नप्रतियोगिताकत्वाभिन्नत्वमेव साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वे निवेशनीयमिति दिक् ।

यथाश्रुतानतिरिक्तवृत्तित्वपदार्थपरित्यागप्रयोजनं स्वयमेव दर्शयति ।

(दी०) अत एव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य न क्षतिः । एवं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यम् ।

(गा०) अत एवेति । ईदृशानतिरिक्तवृत्तित्वनिवेशादेवेत्यर्थः । विशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपीति । स्वव्यापकत्वपर्याप्त्यधिकरणपर्याप्तविशिष्टसत्तात्वकत्वेऽपीत्यर्थः । न क्षतिः । न सत्तात्वादेरवच्छेदकत्वापत्तिः । प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिपक्षे विशिष्टसत्तात्वादेः सत्तात्वाद्यन्यूनवृत्तितामादायाऽव्याप्तिवारणाय व्यापकत्वं परित्यज्याऽन्यादृशमन्यूनवृत्तित्वं निवेशयति । एवमिति । स्वविशिष्टेति । स्वपदं साध्यतावच्छेदकपरम्, तथा च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्यवृत्तितत्सम्बन्धावच्छेद्यत्वस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वोभयाभावकत्वं तेन सम्बन्धेन व्यापकतावच्छेदकत्वं बोध्यमित्यर्थः । विशिष्टसत्तात्वादेर्विशिष्टसत्तात्वाश्रयसम्बन्धिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकतया तदनवच्छेदकसत्तात्वावच्छेद्यत्वाभावस्य जात्यादिसमानाधिकरणाभावप्रतियोगितायां सत्त्वेन विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरतः स्वविशिष्टेति । स्वविशिष्टत्वं च साध्यतावच्छे-

वृत्ति संयोगादिसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्याश्रय इति न दोषः। साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशे कालः सर्ववान् मेयत्वादित्यादौ सर्वत्वस्यावच्छेदकत्वोपपत्तये उभयाभावघटितस्यैव प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया तादात्म्यादिना गगनादिसम्बन्धिगगनादिनिष्ठगगनाद्यभावस्य कालिकसम्बन्धधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यशालितया कालो घटवान् महाकालत्वादित्यादावव्वच्छेदकाप्रसिद्धितादवस्थ्यमिति तादृशसम्बन्धेन तन्निवेशितम्। सत्तावान् जातेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकाविशिष्टसत्तात्वादेः सत्तात्वादिविशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया सत्तात्वादेरवच्छेदकत्वापत्तिरतः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यमेव निवेशनीयम्।

न च सर्वत्वावच्छिन्नस्य यत्र विषयितासम्बन्धेन साध्यता ज्ञानत्वादिकं हेतुस्तत्र सर्वत्वस्य पारिभाषिकावच्छेदकत्वानुपपत्तिः सर्वत्वविशिष्टस्य विषयितासम्बन्धेन सम्बन्धिनि सर्वविषयकज्ञाने तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरिति वाच्यम्। घटत्वाद्यवच्छिन्नाविषयके सर्वत्वावच्छिन्नविषयकेऽस्मदादिज्ञाने घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नव्यधिकरणतया सर्वत्वस्य तादृशाभावप्रतियोगितानवच्छेदकत्वेन सर्वत्वस्यावच्छेदकत्वोपपत्तेः।

न चैवमपि यत्र नित्यत्वविशिष्टसर्वत्वं साध्यतावच्छेदकं तत्र जन्यज्ञानस्य साध्यतावच्छेदकीभूतस्वविशिष्टसम्बन्धित्वान्नित्यज्ञाने चाभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्याऽप्यसम्भवात्तादृशसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वानुपपत्तिरिति वाच्यम्। नित्यत्वानधिकरणे नित्यत्वविशिष्टसर्वमिति ज्ञाने विषयितया नित्यत्वविशिष्टसम्बन्धितापा अनवायात् तत्र तद्वत्त्वे तुल्ययुक्त्या जन्यत्वविशिष्टस्य घटादेरपि ईश्वरज्ञानासम्बन्धितया तादृशविशिष्टाभावस्यैव ईश्वरज्ञाने विशिष्टप्रतियोगिव्यधिकरणस्य सुलभत्वसम्भवात्। अन्यत् सर्वं पूर्ववद्बोध्यम्।

यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्सम्बन्धिनिष्ठतद्रूपावच्छिन्नप्रतियोगिकत्वाभिन्नं यत्साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वं तद्वत्साध्यतावच्छेदकसम्बन्धिसम्बन्धो वा व्याप्तिः । प्रतियोगित्वाद्यन्तर्भावासहिष्णुतायां यद्रूपावच्छिन्नस्य यादृशसम्बन्धेनाऽसम्बन्धित्वं हेतुमतस्तादृशसम्बन्धनिष्ठतद्रूपावच्छिन्नप्रतियोगिताकत्वाभिन्नत्वमेव साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वे निवेशनीयमिति दिक् ।

यथाश्रुतानतिरिक्तवृत्तित्वपदार्थपरित्यागप्रयोजनं स्वयमेव दर्शयति ।

(दी०) अत एव सत्तावान् जातेरित्यत्रापि जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य न क्षतिः । एवं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यम् ।

(गा०) अत एवेति । ईदृशानतिरिक्तवृत्तित्वनिवेशादेवेत्यर्थः । विशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपीति । स्वव्यापकस्वपर्याप्त्यधिकरणपर्याप्तविशिष्टसत्तात्वकत्वेऽपीत्यर्थः । न क्षतिः । न सत्तात्वादेरवच्छेदकत्वापत्तिः । प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिपक्षे विशिष्टसत्तात्वादेः सत्तात्वाद्यन्यूनवृत्तितामादायाऽव्याप्तिवारणाय व्यापकत्वं परित्यज्याऽन्यादृशमन्यूनवृत्तित्वं निवेशयति । एवमिति । स्वविशिष्टेति । स्वपदं साध्यतावच्छेदकपरम्, तथा च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्यवृत्तित्वसम्बन्धावच्छेद्यत्वस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वोभयाभाववत्त्वं तेन सम्बन्धेन व्यापकतावच्छेदकत्वं बोध्यमित्यर्थः । विशिष्टसत्तात्वाद्वैशिष्टसत्तात्वाश्रयसम्बन्धिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकतया तदनवच्छेदकसत्तात्वावच्छेद्यत्वाभावस्य जात्यादिसमानाधिकरणाभावप्रतियोगितायां सत्त्वेन विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरतः स्वविशिष्टेति । स्ववैशिष्ट्यं च साध्यतावच्छे-

दकताघटकसम्बन्धेन बोध्यम्, अन्यथा धूमवान् वह्नेरित्यादौ कालिकादिसम्बन्धेन धूमत्वादिविशिष्टवह्न्यादिसंयोगिनिष्ठाभावप्रतियोगितायां धूमत्वादेरवच्छेदकतया तदनवच्छेदकद्रव्यत्वाद्यवच्छेद्यत्वाभावस्य हेतुसमानाधिकरणाभावप्रतियोगितासामान्ये सत्त्वेनाऽतिव्याप्त्यापत्तेः। सम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेनात्र विवक्षणीयम्, अन्यथा कालिकादिसम्बन्धेन धूमादिमति संयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नाभावसत्त्वात् सम्बन्धसामान्येन धूमादिमन्निष्ठाभावीयसंयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं तादृशसम्बन्धावच्छिन्नप्रतियोगितासामान्यानवच्छेदकघटाभावत्वादिकमेव, अभावत्वादेः केवलस्यैव संयोगादिसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेन तादृशगुरुधर्मस्याऽतथात्वात्, भेदप्रतियोगितायां प्रसिद्धस्य तदवच्छेद्यत्वस्योभयाभावमादाय उक्तस्थले एवातिव्याप्तिः। संयोगेन धूमत्वाद्यवच्छिन्नाभावस्योपलक्षणावच्छेदेन धूमत्वादिविशिष्टसम्बन्धिनिष्ठतया तादृशाभावप्रतियोगितानवच्छेदकघटाभावत्वावच्छेद्यत्वाभावमादाय तत्रातिव्याप्तिवारणाय प्रतियोगिव्यधिकरणत्वेनाऽप्यभावो विशेषणीयः। तत्र च प्रतियोगिपदं प्रतियोगितावच्छेदकावच्छिन्नपरमेव, अन्यथा सत्तावान् जातेरित्यादौ सत्तात्वविशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकविशिष्टसत्ताद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वेनाव्याप्त्यापत्तेः। वह्न्यादिमन्निष्ठस्य घटाद्यभावस्य कालिकादिसम्बन्धेन प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणतन्निष्ठाभावप्रतियोगितावच्छेदकं तदसमानकालीनघटादिव्यक्तिनिष्ठतद्व्यक्तित्वादिकमेवेति तदनवच्छेदकघटत्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादव्याप्तिरतः प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वं निवेश्यं न तु साध्यतावच्छेदकसम्बन्धेन, काले घटवान् कालपरिमाणादित्यादौ कालिकसम्बन्धेन साध्यतावच्छेदकविशिष्टसम्बन्धिनि खण्डकाले तेन सम्बन्धेन प्रतियोगिव्यधिकरणस्याभावस्य सुलभत्वेऽपि सर्ववान् कालपरिमाणादित्यादौ महाकालस्यैव कालिकसम्बन्धेन सर्वत्वविशिष्टसम्बन्धितया तत्र तादृशसम्बन्धेन

प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽव्याप्त्यापत्तेः । कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वपक्षे प्रतियोगिताधर्मिकोभयाभावघटितलक्षणकरणात्तन्मते उभयाभावघटनयाऽपि गगनाद्यभावे कालिकसम्बन्धेन वैयधिकरण्यस्य निर्वाहयितुमशक्यत्वात् ।

न च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वमप्यभावप्रतियोगितायां निवेशयिष्यति, एवं च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशोऽपि सर्वत्वावच्छिन्नसाध्यके तदवच्छिन्नसम्बन्धिमहाकालनिष्ठस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धिः । कालिकातिरिक्तसम्बन्धावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वात् तत्प्रतियोगितायां च कालिकसम्बन्धावच्छिन्नत्वविरहादित्यव्याप्तितादवस्थ्यमिति वाच्यम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो यः स्वविशिष्टसम्बन्धिनिष्ठाभावस्तत्प्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तत्सम्बन्धावच्छिन्नत्वतद्धर्मावच्छिन्नत्वोभयाभाववत्तादृशहेतुसमानाधिकरणाभावप्रतियोगितासामान्यक यत्त्वं तद्धर्मवत्त्वं तेन सम्बन्धेन व्यापकत्वमिति विवक्षया सर्वसामञ्जस्यात् । सर्वत्वविशिष्टसम्बन्धिनि महाकाले समवायादिना प्रतियोगिव्यधिकरणस्य तत्सम्बन्धावच्छिन्नघटाद्यभावस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्वसर्वत्वावच्छिन्नत्वोभयाभावस्य सत्त्वात् साधनसमानाधिकरणतथाविधघटाद्यभावप्रतियोगितायामपि तथाविधोभयाभावसत्त्वेन कालिकसम्बन्धेन सर्वत्वावच्छिन्नस्य कालपरिमाणादिव्यापकत्वोपपत्तेः ।

न चैवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगित्वाविशेषणतया प्रतियोगित्व साध्यतावच्छेदकसम्बन्धेन वाच्यमित्यग्रिमग्रन्थविरोध इति वाच्यम् । तादृशग्रन्थस्याप्युक्तोभयाभावविशेषणतायामेव तात्पर्यात् ।

वस्तुतस्तु साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषितप्रतियोगितासामान्ये प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्वविशिष्टसम्बन्धिनिष्ठाभावीयत्वयद्धर्मावच्छिन्नत्वोभयाभाव-

स्तादृशधर्मे यथानवच्छेदकान्तार्थ इति नाग्रिमग्रन्थविरोधो न वा महाकालः सर्ववान् महाकालपरिमाणादित्यादावप्रसिद्धिः, प्रसिद्धायां कालिकसम्बन्धावच्छिन्नघटाद्यभावीयप्रतियोगितायां सर्वस्वविशिष्टसम्बन्धिमहाकालनिष्ठो यः समवायसम्बन्धेन प्रतियोगिव्यधिकरणस्तत्सम्बन्धावच्छिन्नघटाद्यभावस्तदीयत्वसर्वत्वावच्छिन्नघटोभयाभावस्य सुलभत्वात् ।

ननु स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तादृशावच्छेदकत्वावच्छिन्नप्रतियोगिताको भेदः, यत्किञ्चित्प्रतियोगिकभेदस्य तादृशावच्छेदकयत्किञ्चिद्भिन्नतादृशावच्छेदकसाधारणत्वात् । तथा च लघुरूपसमनियत यद् गुरु रूपं तद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य तादृशलघुरूपविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वात्मकत्वसमानयतधर्मापेक्षया गुरुत्वेन प्रतियोगितानवच्छेदकतया तादृशावच्छेदकत्वावच्छिन्नभेदाप्रसिद्ध्या द्वितीयावच्छेदकलक्षणस्य प्रमेयधूमत्वादौ प्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिलक्षणस्य प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः, प्रतियोगिताधर्मिकोभयाभावघटितलक्षणेऽनवच्छेदकान्तेन स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितासामान्ये यद्रूपावच्छिन्नत्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोभयाभावस्तद्रूपविलक्षणे स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदाप्रवेशेऽपि सामान्यपदार्थघटकतया स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानिष्ठभेदप्रतियोगितावच्छेदकत्वावच्छिन्नभेदरूपस्य तादृशप्रतियोगितात्वव्यापकत्वस्योभयाभावविशेषणतया प्रवेशात् प्रमेयवह्नित्वावच्छिन्नसाध्यके तद्रूपविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानिष्ठभेदप्रतियोगितावच्छेदकत्वावच्छिन्नभेदाप्रसिद्धेरव्याप्तिः । साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासामान्ये स्वविशिष्टसम्बन्धिनिष्ठाभावीयत्वयद्रूपावच्छिन्नत्वोभयाभावस्तद्रूपस्यानवच्छेदकान्तार्थत्वे प्रमेयवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावीयत्वघटितोभयत्वावच्छिन्नाभावाप्रसिद्धेरव्याप्तिरित्याशङ्क्याह ।

(टी०) तादृशप्रतियोगिताश्च विशिष्योपादेयाः, नातो

गुरोरवच्छेदकत्वं विना दुर्वचत्वम् । प्रतियोगित्वं सम्बन्धित्वं च साध्यतावच्छेदकसम्बन्धेन बोध्यम्, अतो न सम्बन्धभेदमादाय दोषः । कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमनित्यतत्तद्व्यक्तित्वे प्रसिद्धम् । अभावश्च प्रतियोगिव्यधिकरणो बोध्यः ।

(गा०) तादृशप्रतियोगिताश्चेति । स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितास्त्वित्यर्थः । विशिष्य । तत्तद्व्यक्तित्वेनैवेत्यर्थः । तथा च वस्तुगत्या या याः स्वविशिष्टसम्बन्धिनिष्ठाभावनिरूपिताः प्रतियोगितास्तत्तदवच्छेदकत्वावच्छिन्नभेदकूटवत्त्वमेवानवच्छेदकान्तार्थ इति गुरुधर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेऽपि न क्षति. ।

यद्यपि घटत्वावच्छिन्नाभावीया या प्रतियोगिता तदवच्छेदकत्वं घटत्वादिनिष्ठतत्तद्व्यक्तित्वादिसमनियतमिति तदपेक्षया गुरुत्वेन न प्रतियोगितावच्छेदकमिति तादृशप्रतियोगिता विशिष्योपादायाऽनवच्छेदकत्वादिकं दुर्वचम् । तथाऽपि यत्र प्रतियोगितायां समशरीरनानाधर्मसमनैयत्यं तत्र नानाधर्माणामेवैकप्रतियोगितायामवच्छेदकतयावच्छेदकनिष्ठतत्तद्व्यक्तित्वानां लघुत्वेऽपि तत्प्रतियोगितावच्छेदकत्वन्यूनवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमव्याहतमेवेति तादृशप्रतियोगितानां विशिष्य निवेशाभिप्रायको ऽयं ग्रन्थः, अन्यादृशप्रतियोगितावच्छेदकानां च तत्तद्व्यक्तित्वेनैव भेदो निवेश्यः ।

न चावच्छेदकभेदेन प्रतियोगिताभेदान्नानाधर्मावच्छिन्नैकप्रतियोगित्वासम्भव इति वाच्यम् । अवच्छेदकासमनैयत्यस्यैव प्रतियोगिताभेदकत्वात्, समनियतनानाधर्मावच्छिन्नप्रतियोगितैक्ये बाधकविरहात् । एवं यत्रानुगतैकरूपावच्छिन्ननानाव्यक्तीनामेकप्रतियोगितावच्छेदकत्वं तत्राऽप्यवच्छेदकनिष्ठतत्तद्व्यक्तित्वानां न्यूनवृत्तितया तत्राऽपि तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमक्षतम् ।

न च तत्राऽपि तत्प्रतियोगितानिरूपितावच्छेदकत्वस्यनुगत-

रूपावच्छिन्नैकावच्छेदकताकतद्व्यक्तित्वेन भेदप्रतियोगितायामव-च्छेदकत्वसम्भवात्, तत्प्रतियोगितावच्छेदकत्वविशिष्टावच्छिन्न-भेदाऽप्रसिद्ध्या निवेशयितुमशक्य एवेति वाच्यम्। तादृशभेद-निवेशासम्भवेऽपि अवच्छेदकतासम्बन्धेन तत्प्रतियोगितावच्छि-न्नभेदनिवेशाऽविरोधेन प्रतियोगितायां विशिष्य निवेशोक्तसङ्ग-तेः। न हि आश्रयतासम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नावच्छेदक-तायाः अवच्छेदकत्वापेक्षयाऽवच्छेदकतासम्बन्धेन तत्तद्व्यक्तित्वा-वच्छिन्नप्रतियोगितायाः अवच्छेदकत्वे गौरवं येनोक्तभेदस्याऽप्र-सिद्धिः स्यात्। एवं धूमत्वादेरपि धूमत्वादिविशिष्टसम्बन्धि-निष्ठाभावप्रतियोगितायां महानसीयत्वादिसहितस्याऽवच्छेदकतया धर्मान्तरसहितरूपावच्छिन्नप्रतियोगितावच्छेदकानां तत्तद्व्यक्तित्वेन भेदनिवेशो न सम्भवतीति धूमत्वादेर्धूमत्वादिविशिष्टसम्बन्धिनिष्ठा-भावप्रतियोगितानवच्छेदकत्वानुपपत्तिः। विशेषणावच्छिन्नधूमत्वा-दिनिष्ठतद्व्यक्तित्वस्यापि विशेष्यीभूतधूमत्वादिपर्याप्ततया तदव-च्छिन्नभेदस्य विशेष्यीभूतधूमत्वादावसम्भवादिति तत्प्रतियो-गितावच्छेदकस्य तादृशावच्छेदकत्वावच्छिन्नभेद एव निवेश्य। तथा सति तादृशप्रतियोगितावच्छेदकतायाः व्यासज्यवृत्तितया धूमत्वादौ प्रत्येकं तदवच्छिन्नभेदसत्त्वेनोक्तानुपपत्त्यनवकाशात्।

न च तत्रावच्छेदकतायास्तत्तद्व्यक्तित्वेन भेदप्रतियोगितावच्छेदकत्वं सम्भवतीति दर्शितरूपावच्छिन्नभेदाप्रसिद्धिरिति शङ्का-स्पदमपि। महानसीयत्वधूमत्वादिनिष्ठावच्छेदकतानामवच्छेदक-सम्बन्धादिभेदेन भिन्नतया तत्तद्व्यक्तित्वेन तासामव्यासज्यवृ-त्तितया धूमत्वादिनिष्ठभेदप्रतियोगितावच्छेदकत्वासम्भवात्, त-त्प्रतियोगितावच्छेदकतात्वेन च व्यासज्यवृत्तितया तेनैव रूपेण तादृशभेदप्रतियोगितावच्छेदकत्वात्। दुर्वचत्वामिति। पारिभाषिकावच्छेद्यावच्छेदकभावस्येति शेषः। प्रतियोगिता-धर्मिकोभयाभावघटितलक्षणे स्वविशिष्टसम्बन्धिनिष्ठाभावप्रति-योगितायां यदि सम्बन्धविशेषावच्छिन्नत्वं न निवेश्यते तदा प्रतियोगितावच्छेदकमात्रस्यैव वह्नित्वादिविशिष्टसम्बन्धि-निष्ठकिञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् तादृ-शप्रतियोगितानवच्छेदकावच्छेद्यत्वाप्रसिद्ध्याऽसम्भव, महानसादि-

निष्ठसमवायसम्बन्धावच्छिन्नवह्न्यभावस्य साध्यतावच्छेदकसंयोगादिसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेऽपि एतल्लक्षणे प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यैव निवेशेन तादृशाभावाव्यावर्तनात् ।

न चाकाशाभावत्वादिकमेव तादृशाभावप्रतियोगितानवच्छेदकम्, संयोगसमवायादिसम्बन्धावच्छिन्नाकाशाभावादिनिष्ठप्रतियोगितायां शुद्धस्याभावत्वादेरेव लघोरवच्छेदकत्वात् । तादृशधर्मावच्छेद्यस्य च स्वरूपसम्बन्धावच्छिन्नाकाशाभावाभावात्मकाकाशादिनिरूपितप्रतियोगितायां प्रसिद्धमिति वाच्यम् । आकाशाभावत्वादेरपि साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् । आकाशाभाववह्निमदन्यतरत्वादेर्वह्न्यादिमन्निष्ठभेदप्रतियोगितानवच्छेदकत्वेऽपि विषयितादिसम्बन्धावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकत्वं दुर्वारमेव तदुभयैकतरमात्रविषयकज्ञानादौ विषयितासम्बन्धेनान्यतरत्वावच्छिन्नाभावासत्त्वात्, अभावत्ववह्निमत्त्वाद्यवच्छिन्नाभावस्य च खरवदभावत्ववह्निमत्त्वादेस्तादृशसम्बन्धावच्छिन्नान्यतराभावप्रतियोगितावच्छेदकत्वासम्भवात् । विषयित्वादेर्वृत्त्यनियामकतयाऽभावप्रतियोगितावच्छेदकसम्बन्धत्वानुपगमे तु धूमवान् वह्नेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितायामाकाशाभावधूमवदन्यतरत्वादिरूपधूमादिमन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वस्योभयाभावमादायातिव्याप्तिरित्येतल्लक्षणे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वम्, दर्शितप्रयोजनानुरोधेन द्वितीयावच्छेदकलक्षणे च साध्यतावच्छेदकसम्बन्धात्मकस्वविशिष्टसम्बन्धित्वं च निवेशयति । प्रतियोगित्वमित्यादिना । कालो घटवान् कालपरिमाणादित्यादौ घटत्वादिविशिष्टसम्बन्धिनि महाकाले प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणे योऽभावस्तदीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि यथाश्रुतस्य प्रतियोगिताघटितोभयाभावघटितलक्षणस्य न तत्राऽव्याप्तिप्रसक्तिः । खण्डकालस्यापि तद्विशिष्टसम्बन्धितया तन्निष्ठस्यातीतानागतव्यक्तीनामिव तादृशाभावस्य तथाविधप्रतियोगिताप्रसिद्धेरित्याह । कालिकेति । कल्पद्वये एवाऽभावे प्रतियोगिवैयधिकरण्यं निवेशयति । अभा-

पक्षेति। बोध्य इति। अन्यथाऽव्याप्यवृत्तिसाध्यके व्यभिचारिण्यतिव्याप्तिरिति शेषः।

अव्याप्यवृत्तिसंयोगादिसाध्यकव्यभिचारिण्यतिव्याप्तिमवच्छेदकलक्षणघटकाभावप्रतियोगिवैयधिकरण्यविशेषणप्रक्षेपमन्तरेणाऽप्युद्धर्तुं तादृशविशेषणस्य तदसत्त्वे हेतुसमानाधिकरणाभाव तादृशविशेषणस्यापि दर्शितव्याप्त्यसङ्गतेस्तस्य चानुपादेयत्वमाशङ्कते। न चेत्यादिना।

(दी०) न च मौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयम्, संयोगत्वावच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाववति चाऽवृत्तेरव्याप्यवृत्तिव्याप्योरनवकाशादिति वाच्यम्।

स्यात् । संयोगत्वादौ संयोगत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वविरहेऽपि तादृशप्रतियोगितानवच्छेदकद्रव्यत्वत्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वेन तत्र निरुक्तोभयाभावासत्त्वाच्चेति भावः । समवायादिनाऽव्याप्यवृत्तिसाध्यके तेन सम्बन्धेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकस्य व्याप्यवृत्तितावच्छेदकधर्मान्तरस्य साधननिष्ठव्यभिचारनिरूपकतावच्छेदकस्य सम्भवेनातिव्याप्त्युद्धारेऽपि संयोगेनाव्याप्यवृत्तेः साध्यतायामतिव्याप्तिर्दुर्वारैव संयोगेन किञ्चिद्रूपावच्छिन्नस्य व्याप्यवृत्तिताविरहात् साधनवन्निष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकस्य साध्यवन्निष्ठतत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वनियमेन तत्सम्बन्धावच्छिन्नतदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वस्यासंयुक्तमात्रवृत्तिगुणत्वादावेव प्रसिद्धेरिति इद्धर्मीयप्रतियोगिवैयधिकरण्यविशेषणोपादानमावश्यकम्, तदावश्यकत्वे च हेतुसमानाधिकरणाभावे तद्विशेषणस्याप्यावश्यकताऽन्यथा संयोगि द्रव्यत्वादित्यादावेवाऽव्याप्तेरिति समाधत्ते धूमवानेति ।

(दी०) धूमवान् वह्नेरित्यादावतिव्याप्तेः । न ह्युत्पत्तिकालावच्छेदेनाऽपि महानसादौ संयोगेन किञ्चिद्वर्तते, येन वह्निमदयोगोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वावच्छिन्नाभाववद्वृत्तित्वं धूमत्वादिविशिष्टस्य सम्भाव्येत ।

(गा०) ननु धूमादिमत्यपि पर्वतादौ शिखरावच्छेदेन धूमत्वाद्यवच्छिन्नाभावसत्त्वात्तेन रूपेण धूमादीनां व्याप्यवृत्तिताविरहेऽपि अयोगोलकावृत्तिद्रव्यत्वादिना तेषां तथात्वमव्याहतमेव, शिखराद्यवच्छेदेनाऽपि तदवच्छिन्नद्रव्यान्तरसत्त्वादिति साधनाव्यापकतावच्छेदकतादृशधर्मावच्छिन्नाभाववत्त्वमयोगोलकादेरेव, धूमत्वादिविशिष्टस्य तदसम्बद्धत्वान्नातिव्याप्तिरित्याशङ्कां निराकरोति । न हीति । उत्पत्तिकालेति । तथा च धूमवति किञ्चिद्देशावच्छेदेनायोगोलकावृत्तिद्रव्यत्वाद्यवच्छिन्नाभावासत्त्वेऽपि कालविशेषावच्छेदेन तदवच्छिन्नाभावस्य तत्र सत्त्वाद्धूमत्वादेरवच्छेदकत्वं दुर्घटमेवेति भावः । द्वितीयकल्पेऽवच्छेदकाप्रसिद्ध्याऽतिव्याप्तिविरहेऽपि प्रथम-

कल्पे प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे च धूमत्वादिविशिष्टसम्बन्धिनिष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकघटाभावत्वाद्यवच्छेद्यत्वसंयोगसम्बन्धावच्छिन्नत्वोभयाभावमादायाऽतिव्याप्तिर्बोध्या ।

वस्तुतो *द्वितीयावच्छेदकलक्षणेऽपि प्रतियोगिवैयधिकरण्याप्रवेशे* संयोगेन साध्यतायां सद्धेतौ तादृशावच्छेदकाप्रसिद्ध्याऽव्याप्तिः स्यादिति साध्यतावच्छेदके स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं यद्यत्सद्धेदस्थाने स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकतादृशप्रतियोगितानवच्छेदकसामान्यकत्वं निवेश्यैव तादृशाव्याप्तिर्वारणीयेति तथैवाऽतिव्याप्तिरसद्धेतौ स्यादित्यत्र तात्पर्यम् ।

अथैवमपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्यन्तविशेषणमकिञ्चित्करमेव, हेतुसमानाधिकरणाभावे यथाश्रुतप्रतियोगिवैयधिकरण्यनिवेशनेऽपि गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकगुणासमवेतत्वाद्यनतिरिक्तवृत्तित्वस्य साध्यतावच्छेदके सत्त्वेनाऽतिव्याप्त्यनवकाशात्। हेतुसमानाधिकरणाभावविशेषणप्रतियोगिवैयधिकरण्यशरीरे *प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशने* द्रव्यं गुणादित्यादौ पृथिव्यन्यत्वविशिष्टद्रव्यत्वाद्यभावस्य प्रतियोगिताश्रयानधिकरणहेत्वधिकरणकत्वाभावेन लक्षणाघटकतया विशिष्टद्रव्यत्वत्वे द्रव्यत्वत्वविशिष्टसम्बन्धिनिष्ठस्वप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेऽपि अव्याप्त्यनवकाशेन इदमीयप्रतियोगिवैयधिकरण्यशरीरेऽपि तन्निवेशनस्याव्यसम्भवात् ।

यत्तु प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे यत्प्रतियोगिताश्रयानधिकरणत्वं हेतुमत इत्यादिक्रमेण व्याप्तिर्निर्वाच्या, तथा च प्रतियोगितायाः प्रतियोगिस्वरूपत्वे वह्न्यादिव्यक्तिभेदेन तन्निष्ठप्रतियोगितानां भेदाद्वह्नित्वाद्यवच्छिन्नमहानसीयवह्न्यादिनिष्ठप्रतियोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिरिति । तदसत् । *प्रतियोगितायाः* प्रतियोगिस्वरूपत्वे महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताया वह्नित्वाद्यवच्छिन्नमहानसीयवह्न्यादिनिष्ठप्रतियोगित्वाभिन्नतया प्रतियोगितावच्छे-

दकावच्छिन्नानधिकरणत्वनिवेशेऽपि वह्नित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नानधिकरणत्वमादाय तद्दोषतादवस्थ्यात् । द्रव्यत्वादेरपि धूमादिस्वरूपधूमत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकत्वेन प्रतियोगितावच्छेदकसामान्यावच्छिन्नानधिकरणत्वनिवेशेऽयोगोलकादावपि धूमत्वाद्यवच्छिन्नप्रतियोगितावच्छेदकसामान्यावच्छिन्नानधिकरणत्वस्य दुर्लभतया तथा विवक्षणासम्भवात् ।

यदि च यादृशरूपावच्छिन्नप्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया महानसीयवह्नित्वादेर्वह्नित्वाद्यवच्छेद्यतावच्छेदकवह्निवृत्तिप्रतियोगित्वत्वावच्छिन्नानवच्छेदकत्वान्न दोष इत्युच्यते, तदा यद्रूपावच्छिन्नप्रतियोगिताश्रयानधिकरणत्वं हेतुमतस्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशेऽपि सामञ्जस्यात् ।

मैवम् । प्रतियोगितावच्छेदकावच्छिन्नत्वानुपादाने एतद्रूपान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेर्दुर्वारत्वात् । तत्र हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य एतद्रूपासमवेतत्वादेरेतद्रूपविजातीयरूपान्तरसाधारणमेतद्रूपान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नं प्रति समवायेन व्यापकतानवच्छेदकत्वात् ।

सम्बन्धभेदनिबन्धनदोषवारणाय हेतुसमानाधिकरणाभावप्रतियोगित्वतदवच्छेदकानतिरिक्तवृत्तित्वघटकप्रतियोगितयोर्यदि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्यते तदैव प्रतियोगिवैयधिकरण्यद्वयानुपादाने संयोगेन साध्यतायां व्यभिचारिणि दर्शितरीत्याऽतिव्याप्तिरापद्यते । यदि च तद्दोषवारणाय हेतुमन्निष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितायां यदवच्छेदकं तत्सम्बन्धावच्छिन्नतदवच्छिन्नाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतत्कत्वं वा निवेश्यते, उभयत्र विशिष्य विशेषणताविशेषसम्बन्ध एव वा, तदा धूमवान् वह्नेरित्यादौ सम्बन्धान्तरेण विशेषणताविशेषेण वा प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतायामवच्छेदकस्य तत्सम्बन्धघटितहेत्वव्यापकतावच्छेदकायो-

गोलकभेदत्वादेः प्रसिद्ध्या धूमत्वादेरवच्छेदकत्वोपपत्तेरतिव्याप्त्यनवकाश इत्यालोच्य साध्यतावच्छेदकसम्बन्धानिवेशपक्षे प्रतियोगिवैयधिकरण्यद्वयस्याऽनुपादेयतामाह । प्रतियोगितयोरिति ।

(दी०) प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम् ।

(गा०) यद्यपि वह्निधूमादिनिरूपितसंयोगसम्बन्धघटितव्यापकताविशिष्य समवायादिसम्बन्धावच्छिन्नप्रतियोगिताद्वयघटितपारिभाषिकावच्छेदकत्वमन्तर्भाव्याऽपि निर्वक्तुं शक्यते तथा सत्यप्यनतिप्रसङ्गात् । तादृशहेतुसमानाधिकरणाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकस्य वह्निविशिष्टसंयोगिनिष्ठतत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्व तदन्यत्वस्य वह्नित्वव्यापकतावच्छेदकसाधारण्याभावात् । यत्राऽधिकरणे तदवच्छिन्नस्य व्यभिचारस्तद्समवेत वस्य हेतुमन्निष्ठसमवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकस्य संयोगेन तद्धर्मविशिष्टं प्रति समवायेन व्यापकतायामनवच्छेदकतया तादृशधर्माणां पारिभाषिकावच्छेदकताविरहात् । तथापि विशेषणतादिघटितव्यापकताया समवायादिसम्बन्धावच्छिन्नप्रतियोगिताद्वयघटितावच्छेदकत्वानिवेशे महानसभेदत्वादिविशिष्टस्य विशेषणताविशेषादिना च सम्बन्धेन सामान्यादिसन्निष्ठाभावीयसमवायादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य वह्न्यादिसमानाधिकरणाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकाऽसम्भावितत्वान्महानसभेदत्वादेरपि वह्न्यादिव्यापकतावच्छेदकताप्रसङ्गात् । तत्र विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताद्वयघटितावच्छेदकत्वाभावरूपव्यापकतावच्छेदकत्वमेवाऽनुमित्यौपयिक वाच्यम् । तथा च सर्वत्र तादृशावच्छेदकत्वाभावज्ञानस्यैवानुमितिहेतुत्वमुचितम्, एकजातीयावच्छेदकत्वाभावसत्त्वानुरोधादित्याशयेनाह । विशेषणताविशेषेति । अनुपादेयमिति । तथा च साध्यतावच्छेदकसम्बन्धादिनियमाभिप्रायेण मूलकृता प्रतियोगिवैयधिकरण्यमुपात्तमिति भावः । अतिव्याप्तिवारणप्रकारं दर्शयति ।

(दी०) यत्राधिकरणे व्यभिचारस्तदन्यत्ववत्त्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्त्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्धेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् । तथा च विशेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्सम्बन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः । यत्र सद्धेतौ साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति ॥

(गा०) यत्राधिकरण इति । साध्यतावच्छेदकस्यापि कालिकसम्बन्धेन साध्यवद्वृत्तेरभावस्य प्रतियोगितावच्छेदकतया येन सम्बन्धेन हेतुमद्वृत्तित्वमभावस्य तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठत्वं वाच्यम्, उभयत्र विशेषणताविशेष एव वाभावस्य सम्बन्धः । एतत्कल्पे च घटभिन्नं मेयत्वादित्यादौ घटादिभेदाभावस्य घटत्वादिरूपस्य तद्व्यक्तिभेदाभावस्य तदीयासाधारणधर्मरूपाद्यात्मकतद्व्यक्तित्वस्य च विशेषणताविशेषेणावृत्तेर्घटभेदत्वादेर्लक्षणघटकत्वासम्भवः । एतद्घटतद्घटान्यतरत्वाद्यवच्छिन्नभेदाभावस्य तादृशान्यतरत्वस्य भेदविशेषात्मकतया तादृशसम्बन्धेन वृत्तावपि तादृशभेदत्वानुसरणे प्रयासगौरवम् । गगनभिन्नं मेयत्वादित्यादौ व्यभिचारनिरूपकाधिकरणगगनभेदाभावस्य शब्दात्मकस्य गगननिष्ठान्त्यविशेषरूपस्य वा समवायेनैव गगनवृत्तेस्तद्भेदत्वस्य लक्षणघटकत्वासम्भवाद्व्यभिचारनिरूपकाधिकरणं यत्तदन्यत्वमादायाऽतिव्याप्तिनिराकरणायोगश्चेति तदन्यत्वप्रकारकप्रमाविषयत्वत्वानुधावनम् ।

यत्तु अयं घटो घटतद्भेदान्यतरत्वादित्यादौ व्यभिचारनिरूपकाधिकरणघटादिभेदस्य यो भेदस्तस्य भेदधारानवस्थाभयेनाऽधिकरणरूपस्य साध्यवति घटादौ न विशेषणतया वृत्तिर्द्रव्या-

दिरूपाभावस्य विशेषणतानभ्युपगमादिति तदन्यत्र न तस्य सम्बन्धेन व्यापकतायामवच्छेदकमिति प्रमाविषयत्वानुधावनमिति। तदसत्। घटादिरूपभेदस्य घटादौ वृत्तिनियामकसम्बन्धान्तराभावेन भेदस्वरूपेण वृत्तिनियामकस्वरूपसम्बन्धस्यावश्यापेयत्वात्।

अयोगोलकान्यत्वप्रकारकप्रमाविषयत्वत्वापेक्षया धूमादिप्रकारकप्रमाविषयत्वत्वे धूमादिव्यापकतावच्छेदकत्वमाशु ग्राह्यमित्याशयेन तदेवानुसरति। साध्यत्वप्रकारकेति। साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः। प्रतियोगितेति। अभावीयविशेषणतासम्बन्धावच्छिन्नप्रतियोगितेत्यर्थः। अतिव्याप्तिरिति। अवच्छेदकताघटकाभावे प्रतियोगिवैयधिकरण्यानिवेशेऽपि धूमवान् वह्नेरित्यादावित्यादि। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वोक्तेरर्थतः स्वविशिष्टसामान्ये तदवच्छिन्नाभाववदसम्बन्धित्वं लभ्यत इति कल्पद्वये एवाऽतिव्याप्तिनिरासो लभ्यते।

अथानवच्छेदकत्वघटितव्याप्तिलक्षणे यथाश्रुतप्रथमनिरुक्तावच्छेदकताया निवेशे जातिमान् मेयत्वादित्यादौ सामान्यादिसमवेतत्वाप्रसिद्ध्या जातित्वादेरवच्छेदकताया दुरुपपादत्वेनाऽतिव्याप्तिः। अवच्छेदकलक्षणे स्वविशिष्टप्रतियोगिकसाध्यतावच्छेदकसम्बन्धे तदवच्छिन्नाभाववदनुयोगिकत्वनिवेशेन कालो घटवान् कालपरिमाणादित्यादौ अवच्छेदकाप्रसिद्धिः, गगनत्वादिविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेः। एवं चरमनिरुक्तावच्छेदकतानिवेशपक्षेऽपि तत्रावच्छेदकाप्रसिद्धिः, साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनाऽप्रसिद्धेर्दीधितिरीत्यनुसरणे च गौरवमिति कालिकसम्बन्धेन गगनादेरवृत्तित्वपक्षेऽपि प्रतियोगितावधर्मिकपारिभाषिकावच्छेदकत्वाभावघटितव्याप्तिरेवाऽवलम्बनीया इत्याशयेन तत्पक्षमालम्ब्यैव निष्कृष्टार्थमाह। तथा चेति।

प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशपक्षे तस्यावच्छेदकत्वाभावानुयोगिविशेषणता न सम्भवति, स्वावच्छेद-

कसम्बन्धेन प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताया दर्शितस्थलेऽप्रसिद्धेरिति तत्पक्षे प्रतियोगिदिशि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्योभयाभावो निवेशितः । विशेषणताविशेषरूपसम्बन्धनिवेशे च हेतुसमानाधिकरणकालभेदाद्यभावस्यैव तत्सम्बन्धावच्छिन्नप्रतियोगित्वप्रसिद्ध्या तत्सम्बन्धावच्छिन्नप्रतियोगिताधर्मिकतादृशावच्छेद्यत्वमात्राभावनिवेशोऽपि सम्भवतीत्युभयाभावोपेक्षा ।

यद्यपि हेतुसमानाधिकरणाभावप्रतियोगितासामान्ये साध्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छेद्यत्वानिवेशेनैवोपपत्तावभावद्वयनिवेशनमनतिप्रयोजनकम् । तथापि तदनिवेशे प्रतियोगितायां पारिभाषिकसाध्यतावच्छेदकावच्छेद्यत्वाभावस्य लक्षणाघटकतया लक्षणान्तरमेवेदं स्यान्न मूलोक्तलक्षणार्थ इति तदुपादानम् । यथासन्निवेशे चावैयर्थ्यम् । अन्यथा साधनसमानाधिकरणाभावप्रतियोगितासामान्ये साधनसमानाधिकरणसामान्ये वा यद्धर्मावच्छिन्नसम्बन्धिनिष्ठाभावीयत्वं यद्धर्मविशिष्टसम्बन्धिनिष्ठत्वं वा तद्धर्मविशिष्टसामानाधिकरण्यस्यैव व्याप्तित्वसम्भवेन भागान्तरस्याप्यनुपादानापत्तेः । वक्ष्यते च मूलमननुरुध्य स्वसमानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यं व्याप्तिरिति व्याप्तिग्रहोपायशेषे दीधितिकृतैव ।

केचित्तु सामान्यपदस्य व्यापकतार्थकतया हेतुसमानाधिकरणाभावप्रतियोगितानिष्ठाभावप्रतियोगितानवच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावत्वं, तादृशप्रतियोगितानिष्ठभेदप्रतियोगितानवच्छेदको वा यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभाव इत्येव फलितार्थः । तत्र चाऽभावद्वयानुपादाने तादृशप्रतियोगितानिष्ठाभावप्रतियोगितानवच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वमित्यर्थपर्यवसाने मेयधूमवान् वह्नेरित्यादावतिव्याप्तिः, मेयधूमत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकावच्छेद्यतात्वस्य गुरुतयाऽयोगोलकभेदाभावप्रतियोगितानिष्ठतादृशावच्छेदकावच्छेद्यत्वाभावप्रतियोगितायामप्यनवच्छेदकत्वा-

त्व। विशिष्य तत्तत्प्रतियोगितावच्छेदकावच्छिन्नत्वरूपेण च व्यापकत्वमशक्यनिवेशनम्, वह्न्यादिसमानाधिकरणह्रदत्वाद्यभावीया या प्रतियोगिता तत्तदवच्छेदकावच्छिन्नत्वरूपेण धूमादिसमानाधिकरणाभावान्तरप्रतियोगितासाधारणनिरुक्तप्रतियोगितात्वव्यापकत्वाभावादसम्भवापत्तेः। अभावद्वयोपादाने च तत्तत्प्रतियोगितावच्छेदकभेदकूटवन्तो ये ह्रदभेदत्वादयो धर्मास्तदवच्छेद्यत्वाभावानां प्रत्येकं तथाविधसकलाभावप्रतियोगितासाधारणतया तादृशावच्छेद्यत्वाभावकूटस्य प्रातिस्विकरूपेण व्यापकतानिवेशादतिव्याप्त्यनवकाश इत्याहुः।

अन्ये तु अभावद्वयानुपादाने प्रतियोगितायाः प्रतियोगिस्वरूपत्वमते धूमवान् वह्नेरित्यादावतिव्याप्तिः वह्निसमानाधिकरणायोगोलकभेदाद्यभावप्रतियोगिताया अयोगोलकभेदादिरूपाया धूमत्वादिविशिष्टसर्वान्यानिष्ठाभावप्रतियोगितावच्छेदकमहानसवृत्तित्वादिविशिष्टायोगोलकभेदत्वाद्यनवच्छेद्यत्वसत्त्वात्। विशिष्टभेदत्वाद्यवच्छिन्नविशिष्टभेदरूपप्रतियोगितायाः शुद्धायोगोलकभेदादिरूपप्रतियोगिताया अनतिरेकात्। अभावद्वयोपादाने चायोगोलकभेदत्वाद्यवच्छिन्नप्रतियोगिताया धूमत्वादिविशिष्टवन्निष्ठो योऽभावस्तन्निरूपितप्रतियोगितात्वावच्छिन्नानवच्छेदकशुद्धायोगोलकभेदत्वाद्यवच्छिन्नत्वाभावासत्त्वान्नातिव्याप्तिः।

न चैव वह्निमान् धूमादित्यादौ धूमादिसमानाधिकरणपर्वतादिवृत्तित्वविशिष्टह्रदभेदाद्यभावीयविशिष्टह्रदभेदात्मकप्रतियोगिताया वह्न्यादिसमानाधिकरणाभावप्रतियोगितानवच्छेदकशुद्धह्रदभेदत्वाद्यवच्छिन्नत्वमप्यक्षतम्। शुद्धह्रदभेदादिरूपतदभावप्रतियोगितातो विशिष्टह्रदभेदादिरूपप्रतियोगिताया अनतिरेकादित्यव्याप्तिरसम्भवो वेति वाच्यम् ह्रदभेदाद्यात्मकप्रतियोगिताया शुद्धह्रदत्वावच्छिन्नत्व सत्त्वेऽपि निरूपणवैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावोपगमादिति।

तदसत्। निरूपणवैशिष्ट्यावच्छेदेनावच्छेद्यत्वाभावोपगमे धूमवान् वह्नेरित्यादावतिव्याप्तिवारणस्याऽशक्यत्वात्। अयोगोलकभेदादिरूपाया शुद्धायोगोलकभेदत्वाद्यवच्छिन्नायामपि प्रतियोगिताया किञ्चिन्निरूपणवैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावसम्भवात्।

न च यादृशयादृशरूपेण प्रतियोगिनां हेतुसमानाधिकरणा

भावयितव्यं तादृशतादृशरूपावच्छेदेन तथाविधावच्छेद्यत्वाभावविवक्षणान्न दोष इति वाच्यम् । एवं सत्यभावद्वयानुपादानेऽपि सामञ्जस्यात् शुद्धे विशिष्टायोगोलकभेदत्वाद्यवच्छेद्यत्वासत्त्वात् । विशिष्टे तत्सत्त्वेनैव शुद्धे तत्सत्त्वे विशिष्टेऽयोगोलकभेदत्वाद्यवच्छेद्यत्वाभावसत्त्वात् शुद्धेऽप्ययोगोलकभेदादिरूपप्रतियोगित्वे तादृशाभावसत्ताया दुर्वारत्वादभावद्वयोपादानेऽप्यतिव्याप्तितादवस्थ्यात् । प्रतियोगिताधर्मिकावच्छेद्यत्वाभावघटितव्याप्तिपक्षे प्रमेयवह्निमान् धूमादित्यादौ साध्यतावच्छेदकनिरूपितस्वरूपसम्बन्धरूपावच्छेद्यत्वाप्रसिद्ध्या तत्र तदभावघटितलक्षणासम्भवात्, निरुक्तपारिभाषिकावच्छेद्यत्वाभावघटितलक्षणस्याऽऽदरणीयत्वेऽपि वह्निमान् धूमादित्यादौ लाघवात्स्वरूपसम्बन्धरूपावच्छेद्यत्वाभावघटितव्याप्तिरेवोचिता, साध्यतावच्छेदकभेदेन व्याप्तिभेदात् ।

न चैवमनवच्छेदकत्वघटितव्याप्तिपक्षेऽपि धूमवति क्वचिद्द्रव्यभावसत्त्वेऽपि प्रमेयवह्नित्वं गौरवाद्धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति भ्रमदशायामनुमितिवारणाय गुरुधर्मावच्छिन्नसाध्यकव्याप्तिशरीरे पारिभाषिकावच्छेदकत्वाभावस्यैव निवेशेऽपि वह्नित्वाद्यवच्छिन्नसाध्यकव्याप्तिशरीरे स्वरूपसम्बन्धरूपावच्छेदकत्वाभाव एव लाघवान्निवेशयितुमुचित इति वाच्यम् । धूमादिसमानाधिकरणाभावप्रतियोगितीयस्वरूपसम्बन्धरूपावच्छेदकत्वाभावस्य धूमादिव्यापकतानवच्छेदककम्बुग्रीवादिमत्त्वादिसाधारणतया व्यापकतावच्छेदकतानात्मकत्वेन वह्नित्वादिधर्मिकानवच्छेदकत्वज्ञानस्याऽप्यहेतुत्वादिति केषाञ्चिन्मतमाह । यत्रेति । यद्रूपावच्छिन्नसाध्यके इत्यर्थः । प्रमेयवह्नित्वादौ गौरवप्रयुक्तानवच्छेदकत्वग्रहदशायां भ्रान्तानां द्रव्यत्वादिव्यभिचारिलिङ्गेन तद्रूपावच्छिन्नसाध्यकानुमितेरनुरोधेन सालिङ्गकलघुरूपसमानियतगुरुधर्मावच्छिन्नसाध्यकानुमितावप्यवच्छेद्यत्वाभावघटितव्याप्तिपक्षे पारिभाषिकावच्छेद्यत्वाभावज्ञानमेव यद्यपि हेतुस्तथाऽपि वास्तविकी व्याप्तिः सद्धेताववेत्यभिप्रायेण सद्धेतावित्युक्तम् ।

वदन्तीत्यस्वरसः सूचितः । तद्बीजं च यदि गुरुधर्मावच्छिन्नसाध्यकस्थले पारिभाषिकावच्छेद्यत्वाभावज्ञानादनुमितिस्तदा वह्नित्वावच्छिन्नसाध्यकस्थले तज्ज्ञानान्नानुमितिरित्युक्तेरनुभवविरोधे-

नाऽसम्भवात् । एकजातीयपरामर्शसत्त्वे विपर्ययस्याभावात् क्वचि देवानुमिति क्वचिन्नेत्यननुभवात् । अन्यथा यत्र व्यतिरेकिणि के वलान्वयित्वभ्रमदशायां नानुमितिस्तादृशव्यतिरेकिसाध्यके सा ध्यवदन्यावृत्तित्वमेव व्याप्तिर्न तु व्यापकसामानाधिकरण्य गौ रवादित्युक्तिसम्भवेन मूलकृतो व्यापकसामानाधिकरण्यमात्र स्य सिद्धान्तप्रणयनविरोधापातात् । एवं समवायेन भेदप्रति- योगितावच्छेदकजातित्वाद्यवच्छिन्नसाध्यकानुमितौ स्वरूपसम्बन्ध रूपावच्छेद्यत्वाभावज्ञानस्य हेतुत्वे हेतुसमानाधिकरणात्यन्ताभा- वप्रतियोगितायां नित्यत्वादेर्वैयर्थ्येन समवेतत्वादिकमेवाऽवच्छे दकं न तु तद्घटितजातित्वादिकमिति ज्ञानदशायां हेतौ त दवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यग्रहेऽपि व्यभिचारिहेतुनाऽभ्रान्तानां जातित्वाद्यवच्छिन्नसाध्यकानुमित्या पत्ति, भेदप्रतियोगितायां जातित्वाद्यवच्छेद्यत्वप्रसिद्ध्या तदभाव ज्ञानस्य प्रमात्वात् । एवमभावप्रतियोगितावच्छेदकमहानसीयवह्नि- त्वादेर्वह्नित्वादिसमनियतत्वभ्रमेण गौरवप्रयुक्तानवच्छेदकत्वभ्रमदशायां हेतौ तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकर ण्यग्रहेऽपि महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकानुमितिप्रसङ्ग इति तद्रूपावच्छिन्नसाध्यकानुमितावपि स्वरूपसम्बन्धरूपावच्छेद्यत्वा भावज्ञानस्य हेतुत्वासम्भव । वस्तुतो भेदप्रतियोगितायां प्रसिद्ध स्य स्वरूपसम्बन्धरूपमहानसावृत्तिद्रव्यत्वाद्यवच्छिन्नत्वस्य संयो गसम्बन्धावच्छिन्नत्वस्य च द्वयोर्व्यतिरेको धूमादिसमानाधिक- रणाभावप्रतियोगितासामान्ये वर्तते, संयोगादिसम्बन्धावच्छि- न्नप्रतियोगितायां शुद्धमहानसावृत्तित्वादिर्नवाऽवच्छेदादिति स्वावच्छेद्यत्वघटिताभयाभाववद्धूमादिसमानाधिकरणाभावप्रति योगितासामान्यकत्वं धूमादिव्यापकतानवच्छेदकमहानसावृत्ति द्रव्यत्वादिसाधारणतया न व्यापकतावच्छेदकतास्वरूपमिति व- ह्नित्वादावपि तज्ज्ञानं नानुमितिजनकम् । अवच्छेदकत्वाभावघ- टितव्याप्तिपक्षेऽपि वह्नित्वाद्यवच्छिन्नसाध्यकस्थले स्वरूपसम्ब न्धरूपावच्छेदकत्वाभावस्य हेतुतायां एतादृशयुक्त्यैवाऽनवका शात्—इत्यादिकं बोध्यम् ।

कश्चित्तु पारिभाषिकावच्छेद्यावच्छेदकभावघटितव्याप्त्यायुक्त

रीत्या प्रतियोगिवैयधिकरण्यानिवेशेन लाघवात् सर्वत्रैव तद्-घटितव्याप्त्यादर उचित इत्यस्वरसबीजमाचक्षते ।

गुरुधर्मस्याऽपि स्वरूपसम्बन्धरूपमवच्छेदकत्वं व्यवस्थाप्य तद्घटितव्याप्तिं परिष्कुर्वतो मतमाह ।

(दी०) गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्ना-स्तीति प्रतीतिबलाद् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः । न चास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनम्, तथाविधय-त्किञ्चिद्व्यक्तिसत्त्वे एव तादृशप्रतीतेरनुदयात् । अत एव एक-घटवति भूतले कम्बुग्रीवादिमान्नास्तीति शब्दो न प्रमाणम्, प्र-माणं च घटसामान्यशून्ये ।

(गा०) गौरवप्रतिसन्धानदशायामिति । घटत्वाद्यपेक्षया कम्बु-ग्रीवादिमत्त्वादौ गुरुत्वज्ञानदशायामित्यर्थः । इति प्रतीतिबलादिति । इत्याकारिकायाः कम्बुग्रीवादिमत्त्वाद्यात्मकप्रतियोगिविशेषणांशे प्रतियोगितावच्छेदकत्वावगाहिन्याः प्रतीतेर्बलादित्यर्थः । भवति चेति शेषः । गौरवस्याऽवच्छेदकताव्यावर्तकत्वे गौरवज्ञानस्या-ऽवच्छेदकताग्रहविरोधितापसङ्गेन तद्दशायां तादृशप्रतीत्यनुपप-त्तेरिति भावः । उक्तप्रतीतेरवच्छेदकतांशे प्रमात्वस्य सविवाद-तया तादृशप्रतीतेरवच्छेदकतासाधकत्वमुपेक्ष्य गौरवज्ञानकाली-नतादृशप्रतीत्यनुपपत्तिः साधकतयोपन्यस्तेति ध्येयम् ।

न च कम्बुग्रीवादिमान्नास्तीति प्रतीतावच्छेदकत्वं न प्रकारः, अपि तु संसर्ग एवेति तदंशे सम्बन्धविशेषावगाहित्वतत्प्रकारकत्व-घटितभ्रमत्वमप्रसक्तमिति वाच्यम् । भ्रमत्ववत्प्रमात्वस्याऽपि प्रका-रतादिघटितत्वेन प्रमात्वविवादानपायात् ।

वस्तुतस्तु कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वमभावे प्रतियोगिसम्बन्धः । कम्बुग्रीवादिमत्त्वावच्छिन्नत्वाप्रसिद्धिपक्षेऽपि विशेष्यविशेषणभावापन्नानां प्रतियोगित्वावच्छिन्नत्वैक्यकम्बुग्रीवादि-मत्त्वानां सम्बन्धघटकता, एवं च तेषां परस्परसम्बन्धमानमप्या-वश्यकम्, तेन विना विशेष्यविशेषणभावानिर्वाहात् । संसर्गसं-सर्गो न विशिष्टधीविषय इति प्रवादस्य च संसर्गघटकवस्त्व-

न्तराविशेषणत्वेन यस्य ससर्गता तत्ससर्गो न भासते इत्यर्थः । तथा चोक्तप्रतीतेरवच्छिन्नत्वे कम्बुग्रीवादिमत्त्वप्रमत्व गुरुधर्मस्याऽनवच्छेदकत्ववादिनां निष्प्रत्यूहमेव, ससर्गताविशेषसाधारणससर्गविशेषावच्छिन्नाविषयतास्वरूपेणैव प्रकारतया भ्रमत्वघटकत्वोपगमात् । प्रकारतात्व पुनरखण्डधर्मान्तर ससर्गताव्यावृत्तमेवातः न ससर्गविशेषभाने तज्ज्ञानापेक्षा, तादृशधर्मपुरस्कारेणैव विषयताविशेषस्य विशेषणज्ञानजन्यतावच्छेदकत्वात् । इत्थ च नोक्तप्रतीतेः प्रतियोगिताया गुरुधर्मावच्छिन्नत्वसाधकतेत्यवधेयम् ।

गौरवप्रतिसन्धानकालीनायां कम्बुग्रीवादिमान्नास्तीत्याकारिकायामपि प्रतीतौ कम्बुग्रीवादिमत्त्वादे प्रतियोगितावच्छेदकत्व न भासते, अपि तु तत्सामानाधिकरण्यमात्रमित्याशङ्कते । न चेति । तत्प्रतियोगिकेति । कम्बुग्रीवादिमत्त्वाद्याश्रयप्रतियोगिकेत्यर्थः । अवलम्बनम् । विषय । तथाविधेति । कम्बुग्रीवादिमत्त्वाश्रय इत्यर्थ । तादृशप्रतीतेरनुदयादिति । तथा च तस्यास्तत्प्रतियोगिकाभावमात्रावलम्बनत्वे यत्किञ्चिद्घटादिमत्यपि तथाविधघटाद्यभावस्याबाधेन तादृशप्रतीति स्यादेवति भाव । अत एवेति । यत एव कम्बुग्रीवादिमान्नास्तीत्यादिप्रतीतौ कम्बुग्रीवादिमत्त्वादे प्रतियोगितावच्छेदकत्व नियमतो भासते, गुरुरपि च धर्म प्रतियोगितावच्छेदकोऽन एवेत्यर्थ । एकघटवतीति । प्रतिपादकत्व शब्दान्वयितया सप्तम्यर्थ । भूतले इति ज्ञानाकारान्तर्गतम् । एवघटवति, भूतले, इत्यनयोर्मिथोऽन्वये तदुत्तरसप्तमीति ज्ञानाकारान्तर्गत पूरणीयम् । न प्रमाणमिति । तादृशप्रतीतेरवच्छेदकत्वावगाहित्वानियमे एतादृशशाब्दजन्यतादृशप्रतीतेः प्रमात्वस्याऽपि सम्भवेन प्रमाणमपि स्यादित्युपष्टम्भसङ्गतिः । प्रमाण चेति । गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे बाधितावच्छेदकत्वग्राहकतया तादृशशब्दोऽपि प्रमाण न स्यादित्युपष्टम्भ ।

एतेन गुरुधर्मस्यावच्छेदकतायां युक्त्यन्तरमपि दर्शितम् । न च कम्बुग्रीवादिमान्नास्तीति प्रतीतौ कम्बुग्रीवादिमत्त्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमेव ससर्गतया भासते इत्युपपद्यम्, तथा च गुरोरनवच्छेदकत्वेऽपि नोक्तदोषावसर इति वाच्यम् । तत्प्रतियोगितावच्छेदकभेदानामनन्तानां

सम्बन्धघटकत्वे मानाभावात्, गौरवाच्च । गुरुधर्मस्यानवच्छेदकत्वे द्रव्यं गुणाद् गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वस्य द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वरूपसमनियतधर्मापेक्षया गुरोः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिरपीत्याह । न चेदिति ।

(दी०) न चेदेवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः, गुणादिगुणकर्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायाः लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात् । तत्तदवच्छेदकत्वव्यक्तीनां च प्रातिस्विकरूपेणाभावानां युगसहस्रेणाऽपि ज्ञातुमशक्यत्वात् ।

(गा०) एवम् । गुरोरवच्छेदकत्वम् । लघुरूपेति । विशेषणानवच्छिन्नद्रव्यत्वादीत्यर्थः । अधिकगौरवप्रदर्शनाय विशिष्टसत्तारूपहेत्वनुसरणम् । लाघवेनेति । गुणत्वाद्यवच्छिन्नप्रकारेण हेतुमन्निवेशापेक्षया निर्विशेषणकद्रव्यत्वादिपुरस्कारेण तन्निवेशे लाघवादित्यर्थः।

ननु हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वानां तादृशावच्छेदकत्वत्वेन नाऽभावो व्याप्तौ निवेशनीयः किन्तु तत्तद्व्यक्तित्वेन सर्वेषामभावकूट एवेति तादृशावच्छेदकतात्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेऽपि न क्षतिरित्यत आह। तत्तदवच्छेदकत्वेति। प्रातिस्विकेति । तत्तद्व्यक्तित्वेनेत्यर्थः । ज्ञातुमशक्यत्वादिति । अनन्तानां तादृशावच्छेदकत्वरूपप्रतियोगिनां प्रतियोगितावच्छेदकतत्तद्व्यक्तित्वेन ज्ञानासम्भवादिति भावः। निर्विशेषणकस्वघटितधर्मापेक्षया विशिष्टस्वघटितस्य गौरवेणानवच्छेदकत्वनिबन्धनामव्यव्याप्तिमाह ।

(दी०) एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेरव्याप्यताप्रसङ्गोऽनुसन्धेयः । उपदर्शितप्रकारस्यापि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् । अत एव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि सङ्गच्छते इत्यपि केचिदिति कृतं पल्लवितेन ॥

(गा०) एवमिति । रीत्येति शेषः । अव्याप्यत्वप्रसङ्गोऽनुसन्धेय

इति । अतो गुरोरवच्छेदकत्वमावश्यकमेवेति शेषः । अत्रैव हेत्वन्तरमप्याह । उपदर्शितप्रकारस्याऽपीति । अपिर्दुर्ज्ञेयत्वादित्यनन्तरं योज्यः । उपदर्शितप्रकारस्य । मेयधूमवान् वह्नेरित्यादावतिव्याप्तिवारणायानुसृतस्य पारिभाषिकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य । स्वत्वादीत्यादिना प्रातिस्विकरूपावच्छिन्नतत्तत्प्रतियोगिनां परिग्रहः । दुर्ज्ञेयत्वादिति । तथा च गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे गुरुधर्मावच्छिन्नसाध्यकव्यभिचारिण्यावृत्तत्वघटितव्याप्तिनिर्वचनमप्यशक्यं स्यादिति भावः । उक्तस्थले हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वस्य गुरुतया स्वरूपसम्बन्धरूपप्रतियोगितावच्छेदकत्वासम्भवेऽपि उक्तरीत्या पारिभाषिकतदीयप्रतियोगितावच्छेदकत्वस्यैव व्याप्तौ निवेशनीयतया न तदवच्छिन्नाभावाप्रसिद्धिनिबन्धनाव्याप्तिरित्याशङ्क्य उपदर्शितेत्यादिग्रन्थावतरणं तु न सम्भवति । तादृशावच्छेदकत्वस्य निष्ठताख्यावच्छेदकतया स्वपदेन तन्मात्रस्योपादानात् । तादृशावच्छेदकत्वत्वविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावनिवेशस्य पर्यवसितत्वात् । व्यभिचारित्वमपि सङ्गच्छते इति । व्यभिचारस्य साध्यतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वरूपत्वाद् गुरुधर्मस्यानवच्छेदकत्वे घ्राणग्राह्यगुणत्वावच्छिन्नप्रतियोगिकाप्रसिद्ध्या तदनुपपत्तेरिति भावः ।

न च साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यमेव व्यभिचार इत्युक्तस्थले गन्धत्वाद्यवच्छिन्नाभावमादाय व्यभिचार उपपादनीय इति वाच्यम् । व्यापकतावच्छेदकताशरीरे साध्यतावच्छेदकविशिष्टसम्बन्धिताविष्टाभावप्रतियोगितानां विशिष्योपादेयतया तत्तत्प्रतियोगितावच्छेदकभेदकूटस्यान्तर्भावनीयत्वेन व्यभिचारज्ञानस्याऽशक्यतया ऽनुमितिविरोधित्वासम्भवेन व्यभिचारस्य हेत्वाभासत्वानुपपत्तेः ।

एतेन व्यभिचारज्ञानाभावसहकृतसामानाधिकरण्यज्ञानस्य साक्षादनुमितिहेतुतामतावलम्बनासम्भवोऽपि दर्शितः । इदमुपलक्षणम् । जले घ्राणग्राह्यगुणवत् उत्पत्तिकालावच्छिन्नो घटः घ्राणग्राह्यगुणवानित्यादौ व्याप्त्यनुपपत्तिरपि द्रष्टव्या ॥

इति अनुमानगादाधर्यामवच्छेदकत्वनिरुक्तिप्रकरणम् ॥

अथ सामान्याभावप्रकरणम् ।

व्याप्तिलक्षणावसरे सामान्याभावपार्थक्यव्यवस्थापनमुक्तलक्षणाव्याप्त्यतिव्याप्तिशङ्कानिराकरणपरतया सङ्गमयति । नन्विति ।

(दी०) ननु ये एव मिलिता वह्न्यभावा जलह्रदादौ वह्निर्नास्तीति बुद्धिं जनयन्ति, त एव प्रत्येकं धूमवति महानसादौ वर्तन्ते, तत्र च तेषां स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपिका याः प्रतियोगितास्तदवच्छेदकमेव वह्नित्वमतोऽव्याप्तिः ।

(गा०) अनुगतधर्मस्य वह्नित्वादेस्तदभावप्रतियोगितावच्छेदकताया आवश्यकत्वप्रदर्शनाय तादृशाभावानां वह्निर्नास्तीति धीविषयत्वकथनम् । तादृशप्रतीत्या प्रतियोगिविशेषणवह्नित्वांशे प्रतियोगितावच्छेदकत्वावगाहनात् । अन्यथा प्रतियोगितायामवच्छिन्नत्वस्यैवासिद्धेरिति भावः । विशेषाभावानां तादृशबुद्धिविषयत्वे एकविशेषवत्यपि महानसादौ विशेषान्तराभावमादाय तादृशधीप्रसङ्ग इत्याशङ्कावारणाय मिलिता इति । समुदिता इत्यर्थकम् । तथा च महानसादौ वह्निप्रतियोगिकयावदभाववत्त्वविरहान्नातिप्रसङ्ग इति भावः ।

अथ तथाविधयावदभावत्वेनाभावानां नोक्तप्रतीतिविषयतासम्भवः, यावत्त्वस्य बुद्धिविशेषविषयत्वरूपस्याऽनुपस्थितावपि तादृशप्रतीत्युदयात् । नापि वह्न्यभावत्वमात्रेण यावतां वह्न्यभावानाम्, प्रकारावैलक्षण्येन पर्वतीयवह्निर्नास्तीति प्रत्ययात्तद्वैलक्षण्यानुपपत्तेः । वह्न्यभावानवगाहिनस्तत्त्वेनाभावान्तरभ्रमस्य वह्निर्नास्तीत्याकारकतानुपपत्तेश्चेति चेन्न । वह्नित्वावच्छिन्नप्रतियोगिताकत्वेन तादृशसम्बन्धेन वह्निप्रकारेण वाऽभावानां तादृशप्रतीतिविषयत्वोपगमात् । न चैवं महानसे वह्निर्नास्तीत्याद्याकारिकाऽपि प्रतीतिरबाधितयत्किञ्चिद्विशेषाभावमवलम्बमाना प्रमा

स्यादिति वाच्यम् । ईदृशातिप्रसङ्गस्य ग्रन्थकृतैवाग्रे समाधास्यमानत्वात् । धूमवति महानसादाविति । यथाश्रुतमूललभ्यमभावे हेतुसामानाधिकरण्यमुपपादयितुमुक्तम् ।

ननु सामान्यधर्मस्य विशेषाभावप्रतियोगितावच्छेदकत्वे हेतुमत्तस्तदवच्छिन्नाधिकरणत्वनियमेन स्वावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणकाभावीयत्वरूपविशेषणाक्रान्तत्व न विशेषाभावप्रतियोगितानामिति कथ ता उपादायाव्याप्तिप्रसक्तिरित्याशङ्काया माह । नच चेति । तत्र । धूमवति महानसादौ । वैयधिकरण्यान्वयि घटितत्व सप्तम्यर्थ । तेषाम् । अभावानाम्, एतत् प्रतियोगिता इत्यत्र सम्बध्यते । स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्य निरूपिका । स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नानधिकरणधूमाधिकरणिका । तथा च स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नानधिकरणधूमाधिकरणवृत्तितत्तद्वह्न्यभावीया या प्रतियोगिता इति समुदितार्थ । स्व प्रतियोगिता । सामान्याभावानतिरिक्तनामते तत्तद्वह्नित्वावच्छिन्नवन्द्भेदातिरिक्तस्य वह्नित्वादिसाधारणतत्प्रतियोगितावच्छेदकत्वविशिष्टावच्छिन्नवन्द्भेदस्याभावात् प्रतियोगिवैयधिकरण्य शरीरे तादृशभेदनिवेशेऽपि तत्तद्वह्नित्वावच्छिन्नवन्द्भेदमादाय विशेषाभावेषु प्रतियोगिवैयधिकरण्यस्य शक्योपपादनत्वादिति भाव ।

एतच्च सामान्याभावस्य विशेषाभावकूटानतिरिक्तत्ववत् सामान्यधर्मावच्छिन्नप्रतियोगिताया अपि विशेषधर्मावच्छिन्नप्रतियोगिताकूटानतिरिक्तत्वमित्यभिप्रायेणाभिहितम् । यदि पुनरभाव एव नातिरिच्यत प्रतियोगिता त्वतिरिच्यते एव, अन्यथा सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तितामुपगम्याति प्रसङ्गवारणसम्भवादिति मतम्, तदाऽपि तत्तद्वह्नित्वावच्छिन्नवद्भेदानभ्युपगमेन हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नत्वरूप प्रतियोगिवैयधिकरण्यनिरूपकस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमक्षतमेवेत्यव्याप्तिर्द्रष्टव्या । एतद्रूपज्ञानतद्रसादित्यादावेकवृत्तिसाध्यक लक्षणगमनाय्रासम्भव उक्त । नानाधिकरण वृत्त्येकव्यक्तिसत्तादिसाध्यकेऽपि सत्तात्वाद्यवच्छिन्नाभावस्य तत्तदधिकरणवृत्तित्वविशिष्टतदभावकूटानतिरिक्ततयाऽव्याप्तिर्द्रष्टव्या ।

अथ स्वावच्छेदकविशिष्टवन्द्भेदसमुदायत्वरूप स्वावच्छेदक

त्वविशिष्टावच्छिन्नप्रतियोगितावच्छेदकनाकत्वविशिष्टप्रतियोगिता- कत्वविशिष्टभेदवत्त्वं वाऽनधिकरणान्तार्थ. प्रतियोगिवैयधिकरण्य शरीरे निवेश्यः। धूमवति महानसादौ च तादृशसमुदायान्तर्गतमहा- नसादिभेदस्यासत्त्वान्न तत्र वह्न्यभावस्य प्रतियोगिवैयधिकरण्यमि- त्याशङ्कते । न चैवमिति ।

(दी०) न चैवं वह्नित्वावच्छिन्नस्य तद्वृत्तित्वान्न तथात्वम् । तथा सति ह्रदवृत्तिधूमाभावप्रतियोगितावच्छेदकह्रदावृत्तित्वाव- च्छिन्नस्य वह्निमदयोगोलकवृत्तित्वादतिव्याप्तेः ।

(गा०) एवम् । वह्नित्वादेर्विशेषाभावप्रतियोगितावच्छेदकत्वे । तद्वृत्तित्वात् । महानसादिवृत्तित्वात् । न तथात्वम् । न विशेषाभाव प्रतियोगितानां महानसादौ प्रतियोगितावच्छेदकावच्छिन्नवैयधि- करण्यनिरूपकत्वम् । तथा च नोक्ताव्याप्तिरिति भावः । तथा सतीति । तदधिकरणे स्वावच्छेदकयत्किञ्चिद्धर्मावच्छिन्न- सत्त्वे एव प्रतियोगितायास्तदधिकरणे स्वावच्छेदकावच्छिन्नवैय- धिकरण्यानिरूपकत्वमित्यर्थः । ह्रदवृत्तीति धूमाभावान्वयि । तदुक्तिश्च ह्रदे ह्रदावृत्तिर्नास्तीति धीविषयह्रदनिष्ठह्रदावृत्तितत्तप- दार्थविशेषाभावकूटस्य धूमाभावघटितत्वलाभाय, तावता ह्रदा- वृत्तित्वस्य तत्प्रतियोगितावच्छेदकत्वे कथन्तानिवृत्तिः । अतिव्या- प्त्यापत्तेरिति । धूमवान् वह्नेरित्यत्रेत्यादिः । इदमपि विशेषधर्माव- च्छिन्नप्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नत्वमित्यभिप्राये- ण । अन्यथा ह्रदावृत्तित्वादेर्धूमत्वाद्यवच्छिन्नप्रतियोगितातवच्छेदक- तया धूमत्वाद्यवच्छिन्नप्रतियोगितायाः स्वावच्छेदकावच्छिन्नवैय- धिकरण्यानिरूपकत्वोपपत्ते. ।

न च धूमाभावस्येव घटजलाद्यभावस्यापि घटजलादिनिष्ठह्र- दपर्वताद्यवृत्तित्वं प्रतियोगितावच्छेदकमित्ययोगोलके प्रतियोगिता- वच्छेदकावच्छिन्नान्यधिकरणाभावाप्रसिद्ध्या अतिव्याप्त्यसङ्गतिरिति वाच्यम् । संयोगेन गोत्वाभावादावेव उभयाभावघटितस्य साध्यता- वच्छेदकसंयोगसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य प्रसिद्धेः ।

न च गोत्वादेरपि ह्रदावृत्तितया ह्रदाद्यवृत्तित्वरूपतत्प्रतियोगि- तावच्छेदकावच्छिन्नस्य वह्न्यादेः संयोगेनायोगोलकवृत्तित्वान्न

संयोगेन प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यमिति वाच्यम् । संयोगसम्बन्धावच्छिन्नप्रतियोगिताकस्य गोत्वाद्यभावस्य केवलान्वयितयाऽव्याप्यवर्त्तकत्वेन तस्य हृदावृत्तिसामान्याभावप्रतीतिविषयताया निर्युक्तिकत्वात् । धूमाद्यभावशून्ये महानसादौ तादृशसामान्याभावप्रतीतेः प्रमात्ववारणाय संयोगेन वृत्तिमतां धूमादीनामेव तादृशसम्बन्धावच्छिन्नाभावानां तादृशसम्बन्धावच्छिन्नहृदावृत्तिसामान्याभावघटकत्वोपगमात् ।

केचित्तु वह्निमान् धूमादित्यादावप्युक्तक्रमेण प्रतियोगिव्यधिकरणाभावाप्रसिद्धिभयेन प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेतुमन्निष्ठाभावप्रतियोगिताधर्मिकसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकधर्मावच्छिन्नत्वोभयाभावघटितव्याप्तिरेवाऽऽदरणीया । तथा च येन सम्बन्धेन हेत्वधिकरणे पर्वतादौ किमपि वस्तु न वर्तते तादृशेन विषयितासम्बन्धेन, अन्यमात्रस्य कालोपाधित्वानभ्युपगमे कालिकसम्बन्धेन च घटाद्यभाव एव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणः प्रसिद्ध इति तत्प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाभावेन वह्निमान् धूमादित्यादाविव धूमवान् वह्नेरित्यादावपि लक्षणसङ्गमनं सम्भवतीत्याशयेन तदभिधानम् ।

न चैवमनुगतरूपस्य विशेषाभावप्रतियोगितानवच्छेदकत्वे तस्याभावप्रतियोगितामात्रे एवानवच्छेदकतया तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यप्यतिव्याप्त्यभिधानविरोधः, तद्रूपस्य प्रतियोगितासामान्यानवच्छेदकत्वे तद्रूपावच्छिन्नत्वस्याप्रसिद्ध्या प्रतियोगिताधर्मिकोभयाभावघटितलक्षणगमनासम्भवादिति वाच्यम् । अनुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वे तद्रूपावच्छिन्नत्वस्याप्रसिद्ध्या तदवच्छिन्नसाध्यकेऽव्याप्तिरिति तन्मते साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वघटितमेव लक्षणमादरणीयम्, तन्मते पदार्थादेः कथंचिदपि घटाद्यभावप्रतियोगितावच्छेदकावच्छिन्नत्वासम्भवेन घटाद्यभावस्यैव तदवच्छिन्नव्यधिकरणस्य प्रसिद्धेः अत्याप्यन्वयकाशादित्याद्येनाग्रे तादृशातिव्याप्त्यभिधानादिति वदन्ति ।

(चि०) सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव । अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चाऽवगते वायौ रूपं न वा, वायू रूपवान्नवेति संशयो न स्यात् । विशेषाभावकूटस्य निश्चितत्वात् ॥

(दी०) अथानुगतं रूपं तत्तदभावप्रतियोगितानां नावच्छेदकम् । अनवच्छेदकमेव तदभावप्रतियोगितायाः, अभावान्तरे मानाभावात् । तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह । सामान्येति । संशयान्यथानुपपत्तिं प्रमाणयति । अन्यथेति ।

(गा०) अथ वह्नित्वादेरनुगतधर्मस्य प्रत्येकं तत्तद्वह्न्यभावप्रतियोगिताकूटातिप्रसक्ततया तदवच्छेदकत्वं न सम्भवतीति प्रोक्तक्रमेण वह्निमान् धूमादित्याद्यावव्याप्तिरित्याशङ्कते—अथेति ।

अभावप्रतियोगितायाः । अभावप्रतियोगितासामान्यस्य । अभावान्तरे । तत्तद्विशेषाभावातिरिक्ताभावे । मानाभावादिति । वह्निर्नास्तीति बुद्धेर्वह्निप्रतियोगिकयावदभावत्वेन तत्तद्वह्न्यभावसमुदाय एव विषय इत्यभिमानः । तद्रूपावच्छिन्नसाध्यके । अनुगतरूपावच्छिन्नसाध्यके । उक्तसाध्ये प्रमाणमनुपन्यस्य तर्कमात्रप्रदर्शने न्यूनता स्यादिति कथमन्यथेत्यादिग्रन्थस्य सामान्याभावो यदि विशेषाभावेभ्यो नातिरिच्यते तदा विशेषाभावकूटनिश्चयदशायां सामान्यसंशयो न स्यादिति विषयपरिशोधकतर्कपरस्यापि प्रमाणसूचकतामाह । संशयान्यथानुपपत्तिमिति । संशयस्य । सामान्याभावरूपपक्षनिष्ठविशेषाभावकूटनिश्चयकालीनसामान्यधर्मावच्छिन्नकोटिकसंशयकोटित्वस्य । अन्यथानुपपत्तिम् । विशेषाभावपार्थक्याभाववति असत्त्वरूपां पार्थक्यसाधकव्याप्तिमित्यर्थः । प्रमाणयति । प्रमाणमाचष्टे । कृदन्तादाख्यानात् कल्लुक् प्रकृतिप्रत्ययापत्तिः, प्रकृतिवच्च कारकमित्यत्र कृदन्तपदं भावकृदन्तपरमिति प्रकृते प्रमाणपदस्य करणकृदन्ततया कल्लुक्प्रकृतिप्रत्ययापत्तिभ्यां प्रमापयतीत्येवं स्यादिति शङ्कानवकाशः । विषयपरिशोधकतर्क-

प्रदर्शनात्तत्प्रयोजकत्वासिद्धिलाभः । अन्यथानुपपत्त्यभिधाने पृथक् प्रमाणताविरहेऽपि तज्ज्ञानस्य व्याप्तिज्ञानरूपानुमानविधया प्रमाणत्वाभ्यासङ्गतिः । अनुपपत्तिपदस्य तज्ज्ञानपरत्वात् । अनुमाने च रूपत्वाद्यवच्छिन्नाभावो रूपत्वादिन्यूनवृत्तिधर्मावच्छिन्ना-भावेभ्यस्तदवच्छिन्नन्यूनवृत्तिनावच्छेदकधर्मावच्छिन्नाभावेभ्यो वा भिन्नः तादृशयावदभावनिश्चयकालीनतत्समानधर्मितावच्छेदक-समानाधिकरणसंशयकोटित्वात्, घटाद्यभाववदित्यनादृशं बोध्यम् । व्याप्तिश्च यत्तद्भ्यां रूपत्वादिकमुपादाय सामान्यतो विशेषत एव वा, तथा सत्यपि घटाभावादिदृष्टान्तसंलाभात् । अत्र च सामान्याभावो विशेषाभावानतिरिक्तोऽपि तन्निश्चयकालीन-संशयकोटिः स्यादित्यप्रयोजकत्वशङ्काया नावकाशः । सामान्या-भावबुद्धेर्विशेषाभावकूटविषयकत्वव्यवादिना पूर्वपक्षिणा विशेषा-भावेष्वेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य स्वीकरणीय-तया सामान्यधर्मावच्छिन्नाभावविषयकनिश्चयत्वरूपस्य तादृशयाव-दभावनिश्चयत्वरूपस्य वा सामान्यधर्मावच्छिन्नविशिष्टबुद्धिप्रति-बन्धकतावच्छेदकस्य वायौ रूपं नास्तीति बुद्धाविव वायौ पार्थिवत्वादिरूपं नास्तीति बुद्धावपि तन्मते सत्त्वेन तादृशबुद्धेरि-वेदृशबुद्धेरपि वायौ रूपं न वेत्यादिसंशयविरोधिताया दुर्वारत्वात् । वायौ पार्थिवरूपं नास्तीति निश्चयकालीनसंशयकोटिजलीयरूपा-द्यभावे व्यभिचारवारणाय हेतावभावे यावत्त्वविशेषणम् । सामान्या-भावस्य पार्थक्येऽपि विशेषाभावकूटनिश्चयदशायां घटाभावत्व-रूपसामान्याभावत्वादिना रूपविशेषाभावकोटिकसंशयोत्पत्त्या व्यभिचार इति व्यधिकरणधर्मानवच्छिन्नत्वेन कोटित्वं विशेषणीयम् । अथवा तादृशनिश्चयकालीनसंशय स्वप्रतियोगितावच्छेदकावच्छिन्न-कोटित्वेन विशेषणीय । विशेषाभावनिश्चयकालीनस्य सामान्या-भावत्वेन तद्विशेषाभावसंशयस्य सामान्यधर्मपुरस्कारेणैव प्रति-योगिकोटिकतया सामान्यधर्मस्य विशेषाभावप्रतियोगितानवच्छे-दकतया विशेषाभावस्य स्वपदेनोपादानासम्भवान्न व्यभिचारः ।

एतेन विशेषाभावाधिकरणकसामान्याभावस्याधिकरणस्व-रूपत्वे सामान्याभावत्वेन विशेषाभावनिष्ठकोटितायाः व्यधिकर-णधर्मानवच्छिन्नतया तादृशकोटितामादाय व्यभिचारस्य पूर्वकल्पे

दुर्वारत्वेऽपि न क्षतिः । द्वितीयकल्पे स्वप्रतियोगितावच्छेदकत्वेनेन यद्रूपावच्छिन्नप्रतियोगिताकत्वेन स्वस्य स्वभिन्नवृत्तिता तद्रूपस्य विवक्षितत्वाद्रूपत्वस्य विशेषाभावात्मकतन्निष्ठसामान्याभावप्रतियोगितावच्छेदकत्वेऽपि निरुक्तरूपत्वाभावेन तत्कल्पे उक्तदोषाभावात् ।

न चाभावे स्वभिन्नाभावानुपगमे विशेषाभावाधिकरणकसामान्याभावानामपि पक्षतावच्छेदकाक्रान्ततया अंशतो बाध इति वाच्यम् । रूपसामान्याभावत्वेन स्वभिन्नवृत्तेरभावस्य पक्षतया सामान्याभावपार्थक्यमते विशेषाभावानां सामान्याभावत्वेन स्वास्मिन्नेव वृत्तेरपक्षत्वात् । सामानाधिकरण्यमात्रेण साध्यसिद्धेरुद्देश्यत्वे अंशतो बाधस्यादोषत्वाच्च । न चैवमपि सामान्याभावाधिकरणकविशेषाभावस्य तदात्मकतया सामान्याभावे विशेषाभावभेदो बाधित इति वाच्यम् । रूपवद्वृत्तिविशेषाभावानां भेदस्य साधनीयत्वात् । सामान्याभावात्मकविशेषाभावस्य च रूपवदवृत्तित्वात् । रूपवद्वृत्तित्वं रूपविशिष्टवृत्तित्वम्, अतो रूपसामान्याभावस्य समयभेदावच्छेदेन रूपोपलक्षितधर्मिवृत्तित्वेऽपि न क्षतिः । न च स्वनिष्ठरूपसामान्याभावाभिन्नो द्रव्यत्वाद्यभावस्तत्तदधिकरणवृत्तित्वविशिष्टद्रव्यत्वाद्यभावकूटातिरिक्तो रूपसामान्याभावत्वेन, स्वभिन्नवृत्तिरभ्युपगम्यतां तस्य च तावता स्वनिष्ठरूपसामान्याभावात्मकतया पक्षतावच्छेदकाक्रान्ततया रूपवन्निष्ठाभावभिन्नतया च अंशतोऽर्थान्तरमिति वाच्यम् । अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् । वायुवृत्तित्वस्य रूपोपलक्षितधर्मिवृत्तित्वस्य वा पक्षतावच्छेदकनिवेशेनापि तद्वारणसम्भवात् । घटाभावत्वादिना रूपविशेषाभावकूटनिश्चयकालीनसंशयकोटित्वमादाय विशेषाभावे व्यभिचारवारणाय स्वभिन्नत्वेन हेतुघटकनिश्चयो विशेषणीयः ।

वस्तुतोऽभावेऽनुयोगितासम्बन्धेन प्रतियोगिभ्रमोऽप्रामाणिक एवेत्याशयेनेदमनुमानम् । अन्यथा घटाभावत्वादिना रूपाभावनिश्चयदशायां रूपसंशयोपपादकरीत्यैव पार्थिवत्वादिना रूपाभावकूटनिश्चयदशायामपि रूपसामान्याभावसंशयोपपत्तेरप्रयोजकोऽयं हेतुः स्यात् । न च प्रमात्वेन प्रतिबन्धकत्वमादृत्य प्रमात्वघटितहेतोरप्रयोजकत्वं निरसनीयमिति वाच्यम् । तथा सति रूपाभावत्वेन घटाभावादिभ्रमस्य रूपसंशयाविरोधित्वप्रसङ्गात् । तथा च

निश्चये भ्रमाभिन्नत्वविशेषणमनुपादेयमेव । परं तु शुद्धाभावत्वादिना अभावकूटनिश्चयकालीनसंशयकोटितामादाय व्यभिचारवारणाय प्रतियोगिधर्मितावच्छेदकतापन्नाभावत्वप्रकारको निश्चयो निवेश्यः । तादृशयावद्विशेषाभावनिश्चयत्वेन सामान्यधर्मावच्छिन्नकोटिकसंशयविरोधितया नाप्रयोजकत्वशङ्कावसरः ।

अथैवं सिद्धान्तिमते पार्थिवं जलीयं तैजसं च रूपं वायौ नास्तीत्याकारकोऽनुयोगितासम्बन्धेनाऽभावांशे प्रतियोगिप्रकारकनिश्चयो न रूपत्वव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभावविषयकः, अभावविशेषणे प्रतियोगिनि प्रकारतया भासमानधर्मे प्रतियोगितावच्छेदकत्वभानस्याऽऽवश्यकतया तद्विषयस्य पार्थिवरूपत्वादिसामान्यधर्मावच्छिन्नाभावस्य तत्तद्रूपत्वावच्छिन्नाभावानात्मकत्वात् । प्रतियोगिविशेषिततत्तद्व्यक्तित्वाद्यनन्तधर्मावच्छिन्नाभावकूटविषयकश्च प्रत्ययो नासर्वज्ञस्य सम्भवति, तावद्रूपेण प्रतियोगितानामनुपस्थितेः, सर्वज्ञस्य च न संशय इति हेतुरयमसिद्धः ।

न चैकैकशस्तत्तद्धर्मावच्छिन्नाभावनिश्चयकालीनसंशयकोटित्वेन तत्तद्धर्मावच्छिन्नाभावभेदः सामान्यधर्मावच्छिन्नाभावे साधनीयः । अवच्छेदकावच्छेदेन साध्यस्य साधनीयतया पूर्वपक्षिणां एकविशेषाभावात्मकसामान्याभावे अपरविशेषाभावभेदसत्त्वेनांशतः सिद्धसाधनं न दोषायेति वाच्यम् । सिद्धान्तिमते सकलविशेषाभावनिश्चयकाले सामान्यसंशयस्याप्रामाणिकतया यादृशविशेषाभावव्यक्तिनिश्चयकाले न सामान्यसंशयस्तद्भेदसाधकहेतोरप्रसिद्ध्या तद्भेदस्य सामान्याभावे साधनासम्भवात् । पूर्वपक्षिणा सामान्यसंशये रूपादिप्रतियोगिकयावदभावनिश्चयत्वेनैव प्रतिबन्धकता स्वीकर्तव्या, न तु रूपत्वादिसामान्यधर्मावच्छिन्नाभावनिश्चयत्वेनैव । तथा च सामान्याभावस्यापार्थक्येऽपि एकैकविशेषाभावनिश्चयकाले सामान्यसंशयोपपत्त्यैकैकाभावनिश्चयकालीनसंशयकोटित्वहेतोरप्रयोजकताया दुर्वारत्वाच्च ।

एतेन विशेषाभावं पक्षीकृत्य सामान्यसंशयाव्यवहितपूर्ववर्तित्वसमानधर्मितावच्छेदककसमानाधिकरणनिश्चयप्रकारत्वेन हेतुना सामान्याभावभेदः साधनीयः, संशयानुपपत्तिमित्यनेनापि विशेषा-

भावस्य तादृशानिश्चयप्रकारत्वानुपपत्तिरेव विवक्षितेत्यपि प्रत्युक्तम् । उक्तयुक्त्या सामान्याभावभेदस्य विशेषाभावे सत्त्वेऽपि एकैकाभावप्रकारकनिश्चयमादाय तन्नोक्तहेतोरुपपत्तेरप्रयोजकत्वस्य दुर्वारत्वात् ।

यत्तु रूपत्वावच्छिन्नाभावं पक्षीकृत्य पार्थिवजलीयतैजसरूपत्वावच्छिन्नप्रतियोगिविशेषिताभावनिश्चयकालीनतत्समानधर्मितावच्छेदककसमानाधिकरणसंशयकोटित्वेन हेतुना रूपवृत्त्युभयावृत्तिधर्मावच्छिन्नाभावभेदः साधनीयः । वायुः पार्थिवजलीयतैजसरूपाभाववानित्यादिनिश्चयकालीनं नीलरूपवान्न वा वायुरित्यादिसंशयमादाय नीलत्वाद्यवच्छिन्नाभावे व्यभिचारवारणाय उभयावृत्तित्वमेव धर्मे निवेशितं न तु रूपत्वव्याप्यत्वमिति । तदपि न । उक्तनिश्चयकालीनं तद्रूपवान्न वा वायुरित्यादिसंशयमादाय तद्रूपत्वावच्छिन्नाभावे व्यभिचारस्य दुर्वारत्वात् ।

उच्यते । रूपत्वावच्छिन्नकोटिकसंशयाव्यवहितप्राक्कालीनतत्समानधर्मितावच्छेदककसमानाधिकरणनिश्चयत्वावच्छेदेन धर्मितावच्छेदकविशिष्टे प्रतियोगिविशेषितरूपत्वावच्छिन्नाभावाविषयकत्वं साधनीयं हेतुश्च रूपत्वावच्छिन्नकोटिकसंशयाविरोधिनिश्चयत्वम् । तत्समानधर्मितावच्छेदककत्वं च तद्धर्मितावच्छेदकताव्याप्यधर्मितावच्छेदकताकत्वं तेन वायू रूपवान्न वेत्यादिसंशयपूर्वकालीने वायौ पार्थिवरूपं नास्ति गगने च रूपं नास्तीति समूहालम्बननिश्चये न बाधासिद्धी । व्याप्तिश्च यत्तद्भ्यां सामान्यतो विशेषतश्च सुग्रहा । सामान्याभावपार्थक्यमन्तरेण उक्तपक्षतावच्छेदकाक्रान्तवायौ पार्थिवादिरूपं नास्तीत्यादिनिश्चये तद्रूपं नास्तीति निश्चये च रूपत्वावच्छिन्नाभावाविषयकत्वानिर्वाहादतिरिक्तसामान्याभावपर्यवसानम् । संशयान्यथानुपपत्तिमित्यस्य विशेषाभावकूटनिश्चयस्य सामान्यसंशयाविरोधित्वानुपपत्तिमित्यर्थः । अभावेष्वतिरिक्ताभावः स्वीक्रियते इत्यभिप्रायको मूलग्रन्थ इति विशेषाभावस्य स्वनिष्ठसामान्याभावरूपतया बाधस्यानवकाशः । अन्यथा सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वावगाहितायाः सामान्यसंशयप्रतिबन्धकतानवच्छेदकत्वे सामान्याभावस्य पार्थक्येऽपि विशेषाभावस्यापि स्ववृत्तिसामान्याभावात्मकतया तन्निश्चये सामान्यसंशयानुपपत्तेर्दुर्वारत्वात् । तदवगाहितायाः सामान्यसंशयप्रतिबन्धकतावच्छेदकत्वे च सामा-

न्याभावापार्थक्येऽपि संशयोपपत्तेर्वक्ष्यमाणत्वात् ।

न च सामान्याभावपार्थक्ये तद्‌ग्राहित्वमनिवेश्यापि रूपवद्वृत्तिरूपाभावनिश्चयत्वेन प्रतिबन्धकत्वोपगमे स्वनिष्ठसामान्याभावात्मकविशेषाभावनिश्चयस्य सामान्यसंशयविरोधित्वमुपपद्यते इति वाच्यम् । तादृशरूपेण प्रतिबन्धकत्वे विशेषाभावे धर्मिणि सामान्याभावत्वेन तन्निश्चयस्य सामान्यसंशयाविरोधित्वप्रसङ्गात् ।

अस्तु वा विशेषाभावस्य स्वनिष्ठसामान्याभावरूपता, तथापि रूपसामान्याभावत्वेन वायुवृत्तिर्योऽभावस्तदविषयत्वस्य साध्यतया बाधवारणं सम्भवतीति । वस्तुतः पार्थिवादिरूपाभाववान् वायुरित्याकारकनिश्चयव्यक्तिं विशिष्योपादाय तदनन्तरोत्पन्नसंशयकोटित्वेन तन्निश्चयविषयाभावभेदः सामान्याभाव साधनीयः, भावकोटिरेव सुलभो दृष्टान्तः । यन्निश्चयव्यक्त्यनन्तरक्षणोत्पन्नसंशये विशेषाभावस्य न विषयता सैव व्यक्तिरुपादेया अतो न बाधः, न वा व्यभिचारः । सामान्यधर्मावच्छिन्नकोटिकसंशये यावद्विशेषाभावनिश्चयत्वादिना प्रतिबन्धकत्वे सामान्याभावस्य तन्निश्चयविषयत्वमन्तरेण रूपत्वावच्छिन्नकोटिकत्वनियततदवच्छिन्नाभावकोटिकसंशयत्वानिर्वाहात्तत्राप्रयोजकत्वशङ्कावकाश इति दिक् ।

(दी०) वायाविति । यद्यप्ययं संशयो न वायुविशेष्यकः, तस्य विशेषणत्वेनोल्लेखात् । न वा रूपविशेष्यकः, तथा सति रूपतदभावयोर्विरोधिनोरकोटितायां प्रकृतानुपयोगप्रसङ्गात् । तथाऽपि वायू रूपवान् तदभाववान् वेति रूपतदभावकोटिकसंशये तात्पर्यम् । अन्त्यस्तु रूपवत्तदन्योन्याभावकोटिक इति नाभेद इति सम्प्रदायविदः ।

(गा०) अयम् । संशयः । वायौ रूपं न वेत्याकारकः प्रथमोक्तसंशयः । वायुविशेष्यक इति । रूपतदभावात्मकविरोधिप्रकारद्वयावच्छिन्नवायुनिष्ठविशेष्यताक इत्यर्थः । तस्य । वायोः । विशेषणत्वेनोल्लेखादिति । रूपांशे परम्परया स्वाधिशेषणकबोधजनकेनैव शब्देनाभिलापादित्यर्थः । सप्तम्यन्तवायुपदेन रूपाद्यन्वितसप्तम्यर्थ-

वायोर्विशेषणतया प्रतिपादनादिति भावः । रूपविशेष्यक इति । वायुवृत्तित्वतदभावरूपप्रकारद्वयावच्छिन्नरूपविशेष्यताक इत्यर्थः । अकोटितायामिति । कोटितायाः प्रकारताविशेषरूपत्वादित्याशयः । प्रकृतानुपयोगः । अतिरिक्तसामान्याभावासाधकत्वम् । तत्साधकोक्तहेतौ रूपाभावनिश्चयप्रतिबध्यस्य रूपकोटिकसंशयस्यैव प्रवेशादिति भावः । मूलोक्तसंशयद्वयस्यैव वायुविशेष्यकत्वेनाभेदमाशङ्क्य निराकुरुते । अन्यस्त्विति । रूपवत्तदन्योन्याभावेति । तादात्म्यविशेषणताभ्यामित्यादिः । अत एव मूले प्रसिद्धरूपवद्भेदनिश्चयोपदर्शनमपि सङ्गच्छते इति भावः ।

यथाश्रुतपरित्यागेनास्वरसः सम्प्रदायविद् इत्यनेन दर्शितः । वायौ रूपं रूपाभावो वेति धर्मिविशेषणककोटिद्वयविशेष्यकसंशय एवायम्, विधेयताया इव कोटिताया अपि प्रकारत्वानियतत्वात् । न चैवमस्य रूपविशिष्टबुद्ध्यनात्मकतया रूपाभावनिश्चयाप्रतिबध्यतया पूर्ववत्प्रकृतानुपयोगप्रसङ्ग इति वाच्यम् । धर्मिणि रूपविशिष्टबुद्धेरिव रूपांशे धर्मिविशिष्टबुद्धेरपि रूपाभावनिश्चयप्रतिबध्यत्वात् । धर्मधर्मिसम्बन्धावगाहिताया एव विपरीतज्ञानप्रतिबध्यतायां बीजतया विशेष्यविशेषणभावविपर्यासेऽपि तादृशबुद्धेरेकस्याः प्रतिबध्यता नान्यस्या इत्यत्र विनिगमकाभावात् ।

न च वायू रूपवानित्यत्र समवायो रूपसम्बन्धः, तदपेक्षया च गुरुतरोऽसमवायप्रतियोगित्वरूपं समवेतत्वं वायौ रूपमित्यत्र वायुसम्बन्ध इति विनिगमना सम्भवतीति वाच्यम् । अधिकविषयतया अप्रतिबध्यत्वे तदभावनिश्चयापेक्षया अधिकविषयकस्य तदभावव्याप्यवत्तानिश्चयादेस्तद्वत्ताग्रहाप्रतिबन्धकत्वापातात् । उभयत्रैव समवायस्य सम्बन्धतोपगमाच्च । एकत्रानुयोगिता सम्बन्धतावच्छेदकसम्बन्धः, अन्यत्र तु प्रतियोगितेत्यभ्युपगमेन रूपवान् वायुः वायौ रूपमिति प्रतीत्योर्विशेषात् ।

न च विशेषणे प्रकारतावच्छेदकसम्बन्धप्रतियोगिताया विशेष्ये च तादृशसम्बन्धानुयोगिताया वास्तवसत्त्वं प्रतीतेः प्रमात्वप्रयोजकम् । तथा च घटे रूपमित्यादौ समवायस्य संसर्गत्वे प्रमात्वानुपपत्तिः । रूपे घटप्रतियोगिकसमवायानुयोगित्वासत्त्वादिति वाच्यम् । यत्रानुयोगिता सम्बन्धतावच्छेदकसम्बन्ध-

स्तत्रैवोक्तस्य प्रमात्वनियामकताया यत्र च प्रतियोगिता तादृशसम्बन्धस्तत्र विपरीतस्य तन्नियामकतायाः स्वीकरणीयत्वात्। न चैवं सम्बन्धसम्बन्धो न विशिष्टधीविषय इति सिद्धान्तभङ्गप्रसङ्ग इति वाच्यम्। अनुयोगित्वप्रतियोगित्वयोरविषयत्वेऽपि सम्बन्धतावच्छेदकत्वसम्भवात्।

वस्तुतो धर्मिणि धर्मस्येव धर्मे धर्मिण सम्बन्धान्तरमेव न तु धर्म्यनुयोगिको यः सम्बन्धस्तत्प्रतियोगित्वम्, एवं सति विपरीतस्यापि वक्तुं शक्यत्वात्। तथा चोभयत्र समशरीर एव सम्बन्ध, एवं सति विशिष्य सम्बन्धभेदनिवेशस्याऽऽवश्यकतया उपदर्शितोभयविधबुद्ध्योरेकरूपेण प्रतिबध्यत्वासम्भवेऽपि न क्षति। प्रतिबध्यप्रतिबन्धकभावद्वयस्यैवोपगन्तव्यत्वात्। एवं धर्मिणि तदभावप्रकारकस्येव तदंशे धर्मिप्रकारकस्यापि निश्चयस्य उक्तज्ञानविरोधिता बोध्या। एवं च दर्शितकोटिद्वयविशेष्यकज्ञानस्य स्वनिष्ठकोटिविषयितावटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदककोटिप्रविष्टापरकोटिविषयितावत्त्वरूपसंशयलक्षणमपि निष्प्रत्यूहमिति नवीनमतमाह। विरुद्धयोरिति।

(दी०) विरुद्धयोरेकधर्मिसंसर्गावगाहिज्ञानमेव संशयो न तु तदुभयप्रकारताऽपि नियता, तथा च रूपतदभावविशेष्यको वायुविशेषणकोऽसाविति तु नव्याः।

(गा०) विरुद्धोभयांशे एकधर्मिनिरूपितधर्मतावगाहित्वस्य, एकस्मिन् तादृशोभयनिरूपितधर्मितावगाहित्वस्य च द्वयोरेकतरसत्त्वमेव संशयत्वप्रयोजकमित्यर्थः। तदुभयेति। विरुद्धोभयेत्यर्थः। नियता। संशयत्वव्यापिका। असौ। प्रथमोक्तसंशय।

न च कोटिद्वयविशेष्यकसंशये मानाभावः। प्रत्येककोटिद्वयविशेष्यकधर्मिविशेषणकज्ञानसामग्रीद्वयसमाजात्तादृशज्ञानोत्पत्तौ बाधकाभावात्। विरोधिद्वयनिश्चयस्य चैकदाऽनभ्युपगमेन तस्य संशयतायां निष्प्रत्यूहत्वात्। न चैकसामग्र्या अपरकार्यप्रतिबन्धकत्वान्न तादृशज्ञानमिति वाच्यम्। तुल्यबलसामग्र्या अतधारवात्।

अथैवमेककोटौ धर्मिविशेषणको धर्मिणि चापरकोटिप्रकारको वायौ रूपं रूपाभाववान्वायुरित्याकारकोऽपि संशयः स्यादिति चेत् ? स्यादेव । न चैवं *आधेयतासम्बन्धेन एकधर्मिसाध्यककोटिद्वयपक्षकलिङ्गपरामर्शसंवलनदशायां* कोटिद्वयविशेष्यकधर्मिविशेषणकानुमितेर्ग्राह्याभावव्याप्यवत्तानिश्चयप्रतिबन्धकतया वारणासम्भवेनानुमितिरपि संशयाकारा स्यादिति वाच्यम् । आधेयतासंसर्गकानुमित्यनभ्युपगमसम्भवेन तादृशपरामर्शघटितानुमितिसामग्र्या एवासिद्धेः । धर्मिणि विपरीतकोटिसम्बन्धानिश्चायकत्वाविशेषेण धर्मिणि विपरीतकोटिव्याप्यवत्तानिश्चयस्येव विपरीतकोटौ धर्मिव्याप्यवत्तानिश्चयस्यापि धर्मधर्मिभावावगाहिप्रत्यक्षविशेषादिविरोधितया फलतः प्रतिबन्धकतयैव तादृशानुमितिवारणसम्भवाच्च ।

धर्मधर्मिभावसंसर्गकस्येव धर्मधर्मिभावप्रकारकस्यापि ज्ञानस्यानुभवबलेन *धर्मिणि धर्माभावनिश्चयप्रतिबध्यतां व्यवस्थाप्य* रूपधर्मिकवायुवृत्तित्वकोटिकसंशयस्य प्रकृतोपयोगित्वमुपपादयतामपरेषां मतमाह ।

(दी०) वायुवृत्तित्वतदभावकोटिको रूपधर्मिक एवायं संशयः, अधिकरणे तत्तदभावान्यतरनिश्चयस्यापि तत्राधिकरणवृत्तित्वसंशयविरोधित्वात् । अन्यथा भूतले घटतदभावान्यतरनिर्णयेऽपि घटो भूतलवृत्तिर्न वेति संशयप्रसङ्गादित्यपरे ।

(गा०) वायुवृत्तित्वेति । तत्तदभावान्यतरेति । तद्धर्मतद्धर्माभावान्यतरेत्यर्थः । तत्राधिकरणवृत्तित्वविशिष्टबुद्धौ अधिकरणे तदभावनिश्चयस्य विरोधित्वे तत्र अधिकरणवृत्तित्वाभावबुद्धावप्यधिकरणे तद्वत्तानिश्चयस्य प्रतिबन्धकता स्यादिति प्रतिबन्दिनिराकरणाय तत्र तत्प्रतिबन्धकतायामिष्टापत्तिं दर्शयितुमधिकरणे तद्वत्तानिश्चयस्य तत्राधिकरणवृत्तित्वसंशयविरोधित्वाभिधानमिति न तस्य प्रकृतानुपयोगिता । अपिकारोऽधिकरणवृत्तित्वादिनिश्चयस्य समुच्चयपरः । तत्प्रतिबन्धकतायाः प्रकृतानुपयोगित्वेऽपि अवधारणपरत्वशङ्कानिराकरणाय तच्छब्दोपादानम् । विरोधित्वात् । प्रतिबन्धकत्वात् । अन्यथा । तत्र तदविरोधित्वे ।

थपरे इत्यस्वरससूचनाय। तदुक्तं च तत्सम्बन्धसम्बन्धादिप्रकारक इव तत्सम्बन्धाद्यप्रकारकज्ञानेऽपि तदभावनिश्चयस्य स्वतो विरोधित्वे मानाभावः । विरोधिज्ञानान्तरसम्पादनद्वारैव तद्विरोधित्वोपगमादिति ।

(दी०) अथैतावन्त्येव रूपाणीत्यनिर्णयाद्यावद्रूपाभावानिर्णये संशयो न विरुध्यते इति चेत् ? यावद्रूपाभावानिर्णय इत्यस्य यावन्तो रूपाभावास्तेषाम्, यावत्त्वेन रूपेण तेषाम्, यावन्ति रूपाणि तावदभावानाम्, यावद्रूपत्वेन तदभावानां वाऽनिर्णय इत्यर्थः ? न प्रथमतृतीयौ, तथा निर्णीतत्वात् । नेतरौ, प्रतियोगितदभावयोर्यावत्त्वानुल्लेखेऽपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयमात्रादेव घटतदभावसंशयोच्छेददर्शनेन तस्याकिञ्चित्करत्वात् ।

(गा०) एतावन्त्येव रूपाणीति । सर्वाणि रूपाणि आप्यतैजसपार्थिवरूपानतिरिक्तानीत्यर्थः । इत्यनिर्णयात् । संशयस्थलेऽतिरिक्तसम्भावनाविरोधिनस्तादृशनिश्चयस्यासत्त्वात् । यावद्रूपाभावानिर्णय इति । यावत्त्वेन रूपविषयके तदभावविषयके वा रूपाभावनिश्चये चासतीत्यर्थः । रूपे तत्तद्रूपातिरिक्तत्वसम्भावनायां वायुनिष्ठाभावप्रतियोगितायां रूपत्वव्यापकतायाः, रूपाभावे तद्भिन्नयाभावातिरिक्तत्वसम्भावनायां च वायुवृत्तित्वे रूपाभावत्वव्यापकताया दुर्निश्चेयत्वादिति भावः । संशयो न विरुध्यते इति । सामान्यधर्मावच्छिन्नप्रकारकज्ञाने प्रतियोगिन्यभावे वा यावत्त्वावगाहिन एव विशेषाभावनिश्चयस्य प्रतिबन्धकत्वादिति भावः ।

यावद्रूपाभावानिश्चय इत्यत्र यावत्त्वस्य उपलक्षणतायाः शङ्कितुमशक्यत्वेऽपि तस्योपलक्षणविशेषणभावभेदेन यावन्तोऽर्थाः सम्भवन्ति तावत एव विकल्प्य दूषयति । यावदिति । अभावे प्रतियोगिनि च यावत्त्वस्यान्वयसम्भवात् प्रत्येकमुभयत्रैवोपलक्षणत्वस्य विशेषणत्वस्य च सम्भवात् विकल्पचतुष्टयम् । तेषां मध्ये केनापि रूपेणानिर्णय इत्येकः पक्षः । यावत्त्वेन तेषां यावदनिर्णय

इति द्वितीयः । रूपाभावत्वावच्छेदेन वायुवृत्तित्वानिश्चयस्तदर्थः । यावन्ति रूपाणि येन केनापि रूपेण विशेषितानां तेषां वायावभावनिश्चय इति तृतीयः । यावद्रूपत्वेन विशेषितानां तेषां वायावभावनिश्चय इति चतुर्थः । रूपत्वावच्छेदेन वायुवृत्त्यभावप्रतियोगित्वानिश्चयस्तदर्थः । तथा निर्णीतत्वादेवेति । पार्थिवरूपत्वावच्छिन्नाभावत्वादिना केनापि रूपेण सर्वेषां रूपाभावानां पार्थिवरूपत्वादिना केनचिद्रूपेण भासमानसकलरूपाणामभावानां च निश्चितत्वादेवेत्यर्थः । प्रतियोगीति । प्रतियोगिनि घटे तदभावे च यावत्त्वाभानेऽपीत्यर्थः । घटत्वावच्छेदेनाभावप्रतियोगिताया घटाभावत्वावच्छेदेन भूतलवृत्तितायाश्चानवगाहनेऽपीति यावत् । यावद्विशेषाभावलिङ्गकसामान्याभावानुमितिस्थले यावत्त्वावगाहिविशेषाभावकूटनिश्चयस्याऽऽवश्यकत्वात् । योग्यानुपलब्ध्येति । तस्य । पार्थिवादिरूपाभाववान् वायुरिति निश्चयेऽभावांशे यावत्त्वानवगाहनस्य । अकिञ्चित्करत्वात् । रूपसामान्यसंशयानुपपादकत्वात् ।

विशेषाभावकूटनिश्चयस्य सामान्यसंशयप्रतिबन्धकतायां अतिरिक्तसम्भावनाया उत्तेजकतया संशयोपपत्तिमाशङ्कते ।

(दी०) न चातिरिक्तसम्भावनाविरहसहकृत एव तद्बोधस्तथा। सम्भावना च रूपं पार्थिवादित्रितयभिन्नं न वेत्याकारा। निवर्तते चेयं रूपत्वावच्छेदेनैतत्त्रितयभिन्नत्वाभावनिश्चयादेवेति वाच्यम् । गौरवात् । विनाऽपि अतिरिक्तसम्भावनां विशेषाभावनिश्चये सामान्यसंशयदर्शनाच्च ।

(गा०) न चेति । सहकृतत्वं सामानाधिकरण्यसम्बन्धेन तद्विशिष्टत्वम् । तद्बोधः । यावद्रूपाभावनिश्चयः । तथा । रूपत्वावच्छिन्नकोटिकसंशयविरोधी । नन्वातिरिक्तरूपाप्रसिद्ध्या तद्विषयकसम्भावना न सम्भवतीति कथमतिरिक्तसम्भावनया संशयोपपादनमत आह । सम्भावना चेति । संशयोपपादिकेति शेषः । रूपमिति । तथा च पार्थिवादित्रितयभिन्नरूपाप्रसिद्धावपि प्रसिद्धरूपे रूपत्वेन स्पर्शादौ प्रसिद्धस्य पार्थिवादिभिन्नत्वस्य सम्भावना सम्भवत्येवेति भाव.। ननु

प्रसिद्धरूपे पार्थिवाद्यनतिरिक्तत्वनिश्चयेन तद्धर्मिकातिरिक्तत्वसंशयो न युज्यते इत्यत आह । नियतेनेति । इयम् । रूपत्वसामानाधिकरण्येनातिरिक्तत्वावगाहिनी सम्भावना । निश्चयादेवेत्येवकारेण रूपत्वसामानाधिकरण्यमात्रावगाह्यनतिरिक्तत्वनिश्चयव्यवच्छेदः । तथा च रूपत्वसामानाधिकरण्येन सकलप्रसिद्धरूपेऽप्यनतिरिक्तत्वनिश्चयेऽपि तत्सामानाधिकरण्यमात्रावगाहिन्या अतिरिक्तत्वसम्भावनायाः सम्भवात् प्रकृतसंशयोपपत्तिरिति भाव ।

गौरवादिति । अतिरिक्तसामान्याभाववादिमते तन्निश्चयस्य सामान्यसंशयप्रतिबन्धकतायामतिरिक्तसम्भावनाविरहनिवेशात्तदनभ्युपगमे च विशेषाभावकूटनिश्चयस्य तत्प्रतिबन्धकतायां तादृशाभावनिवेशाधिक्यादिति भाव. । अतिरिक्तसम्भावनाया उत्तेजकत्वेऽपि न संशयनिर्वाह इत्याह । विनापीति । सामान्यसंशयदर्शनात् । सामान्यसंशयस्याऽऽनुभविकत्वात् । इदमुपलक्षणम् । रूपसामान्यसंशयं प्रति तदभावनिश्चयप्रतिबन्धकतायां रूपे पार्थिवादिवृत्तिभिन्नत्वसम्भावनाया उत्तेजकत्वे वायौ रूपं नास्तीत्याकारकनिश्चयदशायामपि तादृशसम्भावनया वायौ रूपं न वेति संशयापत्तिश्चेत्यपि द्रष्टव्यम् ।

प्रकारान्तरेण संशयमुपपाद्य सामान्याभाववैयर्थ्यमाक्षिपति अथेत्यादिना ।

(दी०) अथाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एव तादृशसंशयविरोधी । अन्यथा तत्राप्यतिप्रसङ्गात् । स च न प्रकृते । अभावस्य च यावद्विशेषाभावाधिकरणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा सामान्यावच्छिन्नप्रतियोगिताकत्वम् । सम्भवति चेदम्, तादृशाभावप्रतियोगिताया अतिरिक्तत्वात् । तेन नैकविशेषवतो विशेषान्तराभाववत्त्वेन सामान्याभाववत्त्वप्रसङ्गः ।

(गा०) अभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एवेति । रूपं नास्तीत्याद्याकारको धर्मिणि सामान्यावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रतियोगिविशिष्टाभावावगाहिनिश्चय एवेत्यर्थः ।

एवकारेण विशेषधर्मावच्छिन्नप्रतियोगिताकत्वविषयकनिश्चयस्य व्यवच्छेदः। तादृशसंशयविरोधीति। सामान्यधर्मावच्छिन्नकोटिकसंशयप्रतिबन्धक इत्यर्थः। तादृशनिश्चयत्वस्यैव तत्प्रतिबन्धकतावच्छेदकत्वादिति भावः। अन्यथा। सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वीयविषयताविशेषस्य प्रतिबन्धकतावच्छेदककुक्षावनिवेशे। तथापि। अतिरिक्तसामान्याभाववादिनोऽपि। अतिप्रसङ्गात्। तद्रूपाभाववत्यादिना रूपसामान्याभावावगाहिनो भ्रमात्मकनिश्चयस्य रूपसामान्यसंशयविरोधिताप्रसङ्गात्। तस्यापि वास्तवरूपत्वावच्छिन्नाभावविषयकत्वात्। न च। तादृशनिश्चयश्च। प्रकृते। प्रकृतसंशयाव्यवहितपूर्वकाले। तादृशस्य रूपं नास्तीत्याकारकनिश्चयस्य सत्त्वे रूपवत्त्वं वेति संशयस्य केनाप्यनभ्युपगमात्। तथा च यावद्विशेषाभावानां तादृशनिश्चयविषयतामतेऽपि नोक्तसंशयानुपपत्तिरिति किमतिरिक्तसामान्याभावेनेति भावः।

ननु विशेषाभावानामेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे पृथिव्यादावपि रूपविशेषाभावसत्त्वाद्रूपं नास्तीति प्रतीतिप्रसङ्गः। तादृशप्रतीतेरभावे यावत्त्वावगाहितया निराकृतत्वात् पृथिव्यादौ यावद्रूपाभावासत्त्वस्याकिञ्चित्करत्वादित्यत आह। अभावस्य चेति। विशेषाभावस्य चेत्यर्थः। विशिष्टस्येति। सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमित्यग्रिमेणान्वितम्। तथा च तादृशविशेषणान्तर्भावेणाभावे तादृशप्रतियोगिताकत्वपर्याप्तिरित्यर्थः। एवं च वायौ रूपं नास्तीत्यादिप्रत्ययो वाय्वादिवृत्तित्वविशिष्टाभावे रूपत्वावच्छिन्नप्रतियोगिताकत्वपर्याप्तिमवगाहते पृथिव्यादिवृत्तित्वविशिष्टे च तत्पर्याप्तिर्बाधान्न पृथिव्यां रूपं नास्तीत्यादिप्रत्ययः।

ननु विशेषणांशे भावरूपे सामान्यावच्छिन्नप्रतियोगिताकत्वासत्त्वात्तदन्तर्भावेण तत्पर्याप्तिर्न सम्भवति। न चैवं दण्डी नास्तीत्याद्यभावप्रतियोगिताव्यधिकरणदण्डत्वादेस्तदवच्छेदकत्वासम्भवात्तादृशविशेषणविशिष्टेऽवच्छेदकत्वपर्याप्तिर्न स्यादिति वाच्यम्। इष्टत्वात्। तत्र दण्डत्वादिरूपविशेषणस्याप्यवच्छेदकतायामेवावच्छेदकत्वोपगमात्। एवमन्यत्रापि कुत्रचिद्विशिष्टे पर्याप्तिर्नास्त्वेवेत्याशयेनाह। तदवच्छेदेन वेति। तादृशाधिकरणवृत्तित्वावच्छेदेनेत्यर्थः। एवं च वायौ रूपं नास्तीत्यादौ प्रत्यये वाय्वादि-

वृत्तित्वावच्छिन्न रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वं भासते इति पृथिव्यादिवृत्तित्वस्य तदनवच्छेदकत्वान्न पृथिव्यां रूपं नास्तीत्यादिप्रतीतिरिति भावः ।

विशेषधर्मावच्छिन्नप्रतियोगिताकूटातिरिक्तसामान्यधर्मावच्छिन्नप्रतियोगितानभ्युपगमे विशेषधर्मावच्छिन्नप्रतियोगिताकत्वावच्छेदकपृथिव्यादिवृत्तित्वस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानवच्छेदकत्वं न सम्भवतीत्याशयेन सामान्यधर्मावच्छिन्नप्रतियोगितायास्तत्तत्प्रतियोगिताकूटातिरिक्तत्वमभ्युपेत्यैतदुपपादयति । सम्भवतीति । इदम् । एकविशेषाभाववद्वृत्तित्वस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानवच्छेदकत्वम् । अतिरिक्तत्वात् । विशेषरूपावच्छिन्नप्रतियोगिताभ्यो भिन्नत्वोपगमात् । सामान्याभावस्यातिरिक्तत्वेऽपि तथात्वस्याऽऽवश्यकत्वात् । अन्यथा सामान्याभावत्वस्य विशेषाभावसाधारण्येनातिप्रसङ्गस्य दुर्वारत्वादिति भावः । एकविशेषवत । पृथिव्यादेः । सामान्याभाववत्त्वप्रसङ्ग । वस्तुगत्या रूपत्वाद्यवच्छिन्नप्रतियोगिताकस्याभावस्याश्रयत्वेऽपि न रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वविशिष्टाभाववत्त्वाप्रसङ्ग । अतो न पृथिव्यां रूपं नास्तीत्यादिप्रत्ययप्रसङ्ग इति भावः ।

अथ चाभ्युपगमवाद । वस्तुतः सामान्यधर्मावच्छिन्नत्वस्य विशेषधर्मावच्छिन्नप्रतियोगितासु स्वीकारेऽपि सामान्यधर्मावच्छिन्नत्वविशिष्टताद्दशप्रतियोगितानिरूपकत्वे पृथिव्यादिवृत्तित्वस्यानवच्छेदकत्वसम्भवेनातिप्रसङ्गवारणसम्भवात् ।

सामान्याभावविशेषाभावप्रतियोगितावच्छेदकसामान्यधर्मविशेषधर्मयोर्भेदात्ताद्दशाभावयोर्भेद इति मिथ्यानुमानमाशङ्कते । न चेति ।

(दी०) न च प्रतियोगितावच्छेदकभेदस्याभावभेदानियामकतया भेदासिद्धिः । प्रतियोगिभेदस्य तत्त्वे एकघटप्रतियोगिकस्य प्रागभावादिचतुष्कस्याभेदप्रसङ्गात् । अवच्छेदस्य तु भिद्यत एव तत्र, क्वचित् तादात्म्यस्य क्वचित् संसर्गस्य क्वचित्पूर्वापरकालीनत्वस्यादेश्च तथात्वादिति वाच्यम् । संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात्, पूर्वा

परकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे मानाभावाच्च ।

(गा०) विशेषधर्मावच्छिन्नप्रतियोगिताकूटस्य सामान्यधर्मावच्छिन्नत्वोपगमे प्रतियोगिताभेदस्याभावभेदनियामकत्वेऽपि न समीहितसिद्धिरिति प्रतियोगितावच्छेदकभेदपर्यन्तानुधावनम् । न चैवं दण्डत्वाद्यनुगतरूपावच्छिन्ननानादण्डाद्यवच्छिन्नप्रतियोगिताकाभावस्यैक्यानुपपत्तिरिति वाच्यम् । अवच्छेदकताभेदस्यैव विवक्षितत्वात् तत्रानुगतरूपावच्छिन्नासु नानाव्यक्तिषु अवच्छेदकताया एकस्या एवोपगमात् । अत एव महानसीयवह्नित्वशुद्धवह्नित्वाद्योरभेदेऽपि न तदवच्छिन्नाभावभेदाप्रसिद्धिप्रसङ्गः ।

अथ घाऽवच्छेदकभेदोऽवच्छेदकतापर्याप्त्यधिकरणवैलक्षण्यम । तथा च यादृशधर्मे यदभावीयप्रतियोगितावच्छेदकता न पर्याप्ता सोऽभावस्तादृशधर्मपर्याप्तप्रतियोगितावच्छेदकताकाभावभिन्न इति पर्यवसितम् । संसर्गप्रतियोगिविशेषणसाधारणमवच्छेदकत्वमेकमेवातो नैकाभावस्य तदुभयावच्छिन्नप्रतियोगिताकत्वानुपपत्तिरित्यभिमानः ।

ननु प्रतियोगितावच्छेदकभेदो नाभावभेदकः, अपि तु प्रतियोगिभेद एव । विशेषाभावप्रतियोगिनामेव च सामान्याभावप्रतियोगित्वान्न तयोर्भेदः । न च प्रतियोगिभेदस्य तथात्वेऽपि एतद्रूपाभिन्नरूपप्रतियोगिकतया विशेषान्तराभावस्यैव सामान्याभावस्याप्येतद्रूपत्वावच्छिन्नाभावभेदसिद्धिर्दुर्वारैवेति वाच्यम् । रूपान्तरविशेषाभावस्यापि सामान्याभावतया सिद्धसाधनात् । रूपत्वावच्छिन्नाभावत्वावच्छेदेन च नैतद्रूपत्वावच्छिन्नाभावभेदसिद्धिसम्भव, एतद्रूपत्वावच्छिन्नाभावस्यापि सामान्याभावत्वोपगमेन भागासिद्धिसन्देहादित्यत आह । प्रतियोगीति । अभेदप्रसङ्गादिति । भेदकविरहेण भेदानुपपत्तेरित्यर्थः । तत्र भेदकान्तरानुसरणे च तदपेक्षया सर्वत्रावच्छेदकभेदस्यैव भेदकत्वमुचितमिति भावः ।

प्रागभावादिचतुष्कस्य प्रतियोगितावच्छेदकभेदं व्यवस्थापयन् स्वमते तदभेदमुपपादयति । अवच्छेदकं त्विति । तत्रेत्यत्रैव छेदः । क्वचित् । *अन्योन्याभावप्रतियोगितायाम्* । क्वचित् । अत्य-

न्ताभावादिप्रतियोगितायाम्। संसर्गस्य। संयोगादेः। क्वचित्। ध्वंसप्रागभावप्रतियोगितयोः। पूर्वापरेति। स्वपूर्वकालीनतद्घटत्वस्वोत्तरकालीनतद्घटत्वाद्योरित्यर्थः। यथासङ्ख्यमन्वयः। पूर्वापरकालीनघटादिसामान्यं न कस्यापि ध्वंसादेः प्रतियोगि अतस्तद्द्वयानुधावनम्। प्रतियोगिताभेदस्य नियामकत्वं तु न निष्टङ्कितम्। अवच्छेदकभेदेन प्रतियोगिताभेदे तावताऽपि सामान्याभावपार्थक्यसिद्धेः, अवच्छेदकभेदेन तद्भेदेऽपि ध्वंसप्रागभावादिप्रतियोगिताया अप्यभेदसम्भवेन प्रतियोगिभेदपक्षोक्तदूषणप्रसरात्। दुर्वचत्वादिति। संयोगेन घटो नास्तीत्यादौ संयोगी घटो नास्तीत्यादौ विलक्षणप्रत्यये च संयोगादिनिष्ठविलक्षणावच्छेदकत्वयोरेव भानस्याऽऽनुभविकत्वादित्यर्थः। एवं च प्रकृतनियमे एकविधावच्छेदकत्वान्तर्भावे यद्विधावच्छेदकभेदाद् भेदानुपपत्तिः। कथञ्चिदवच्छेदकताद्वयानुगमे एकाभावस्यापि संसर्गप्रतियोगिविशेषणरूपावच्छेदकयोर्भेदाद् भेदापत्तिरिति भावः।

अवच्छेदकताया सजातीयावच्छेदकताभेदस्याभावभेदकत्वे नोक्तदोषावसर इत्यतो दोषान्तरमाह। पूर्वेति। मानाभावादिति। अत्याप्रसक्तत्वादिति भावः।

ननु ध्वंसप्रागभावयोर्भेदकमन्यदेवोभयसिद्धम्, सदातनाभावभेदकं प्रतियोगितावच्छेदकभेदं एवापेक्षणीयः। प्रतियोगिभेदस्य च न तथात्वसम्भवः, एकप्रतियोगिकान्योन्यात्यन्ताभावयोः संयोगसमवायादिनानासम्बन्धावच्छिन्नैकप्रतियोगिकात्यन्ताभावानां चाभेदापत्तेरित्यत आह। किञ्चेति।

(दी०) किञ्चावच्छेदकभेदस्याभावभेदनियामकत्वं न तज्जनकत्वम्, अत्यन्ताभावादिस्वरूपस्य तस्याजन्यत्वात्। नापि तद्व्याप्यत्वमपि, वैयधिकरण्यात्। अत एव न तद्व्यापकत्वमपि, अभेदेऽप्यविरोधाच्च।

(गा०) तज्जनकत्वम्। अभावभेदजनकत्वम्। अत्यन्ताभावादीत्यादिना प्रागभावान्योन्याभावयोः परिग्रहः। तस्य। अत्यन्ताभावादीनां परस्परभेदस्य। अजन्यत्वादिति। तथा च तज्जनकत्वमप्रसिद्धमिति भावः। वैयधिकरण्यादिति। अवच्छेदक

निष्ठस्य मिथस्तद्भेदस्य व्यापकत्वाभिमताभावपरस्परभेदवैयधिकरण्यादित्यर्थः । यद्यपि अभावप्रतियोगितावच्छेदकयोरपि मिथो भिन्नतया प्रतियोगितावच्छेदकानिष्ठे अभावप्रतियोगितावच्छेदकभेदे नाभावनिष्ठाभावभेदवैयधिकरण्यम् । तथापि अभावान्तरप्रतियोगितावच्छेदकानिष्ठस्वप्रतियोगितावच्छेदकभेदस्य स्वभेदानधिकरणे स्वस्मिन्नपि सत्त्वेन व्यभिचारात् । साध्यानधिकरणवृत्तित्वरूपव्यभिचार एव चात्र वैयधिकरण्यपदेन विवक्षितः । प्रतियोगितावच्छेदकवृत्तित्वविशिष्टस्य भेदस्य व्याप्यत्वविवक्षणे च तादृशस्वाभावावृत्तित्वेन तत्राभावभेदासाधकत्वं द्रष्टव्यम् । अत एव । वैयधिकरण्यादेव । अभावभेदस्य प्रतियोगितावच्छेदकभेदानधिकरणवृत्तित्वादेवेति यावत् ।

व्यापकतापक्षे दोषान्तरमाह । अभेदेऽपीति । सामान्याभावस्य विशेषाभावाभेदेऽपीत्यर्थः । अविरोधात् । प्रतियोगितावच्छेदकभेदाविरोधात् । व्यापकव्यभिचारस्यादोषत्वादिति भावः । तथा च तस्य व्यापकत्वानुरोधान्न सामान्याभावपार्थक्यमिति भावः ।

व्याप्यतापक्षमेव परिष्कृत्य शङ्कते । न चेति ।

(दी०) न च तदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यम् । मानाभावात् । अत एव च समनियतसुखदुःखादितत्तत्संख्यापरिमाणव्यक्त्यादिनानाधर्मावच्छिन्नोऽप्यभिन्न एवाभावः । भेदसिद्धिस्तु भाववदभावस्यापि विरुद्धधर्माध्यासादेव ।

(गा०) तदितरधर्मावच्छिन्नप्रतियोगिताकत्वम् । तदवच्छेदकताभिन्नप्रतियोगितावच्छेदकताकत्वम् । तद्धर्मावच्छिन्नप्रतियोगिताकान्यत्वं च तदवच्छेदकतानिरूपकप्रतियोगिताकान्यत्वम् । सामान्याभावत्वावच्छेदेन च उक्तहेतुना विशेषाभावभेदः साधनीय । अतो विशेषाभावान्तरे सामान्याभावत्वेनाभ्युपगते विशेषाभावभेदसत्त्वेऽपि न दोषः । मानाभावात् । विपक्षबाधकतर्काभावात् । अत एवेति । प्रतियोगितावच्छेदकभेदस्याभावभेदाव्याप्यत्वादेवेत्यर्थः । संख्यादिसामान्यस्याभावप्रतियोगितावच्छेदकत्वं न सम्भवति

तत्समनियतस्य लघोर्द्रव्यत्वस्यैव तथात्वादिति तत्तत्संख्ये-त्युक्तम्। आत्मत्वजातेरीश्वरसाधारण्येन न सुखादिसमनैयत्यमिति सुखादिसामान्यस्य प्रतियोगितावच्छेदकत्वसम्भवः। वस्तुतोऽव-च्छेदकतासम्बन्धेन सुखाद्यवच्छिन्नाभावो विवक्षितः, शरीरनिष्ठस्य च सुखादिसमनियतलघुधर्मान्तरस्यासम्भवात् तत्सामान्य-स्य तथात्वमक्षतमिति सुखादिसामान्यमेवोपात्तम्। अभिन्न एवा भावः। स्वीक्रियते इति शेषः। अतः प्रतियोगितावच्छेदकभेदे-नाभावभेदमते तादृशाभावानामपि भेदादुपष्टम्भासङ्गतिरिति दूष-णमनवकाशम्।

ननु प्रतियोगितावच्छेदकभेदस्याभावभेदासाधकत्वे घटत्व-पटत्वाद्यवच्छिन्नाभावानामपि भेदो न सिद्ध्येदित्यत आह। भे-दसिद्धिस्त्विति। भाववदिति। भावस्य घटपटादेर्यथा घटत्वपट-त्वादिविरुद्धधर्मसम्बन्धाद् भेदसिद्धिस्तथा घटपटाद्यभावानामपि एकदेशकालावच्छिन्नघटपटाद्यधिकरणवृत्तित्ववत्तदभावादिरूपधर्मस-म्बन्धान्मिथो भेदसिद्धिरित्यर्थः। घटाभावादेः घटाद्यधिकरणा-वृत्तित्वं च घटवति पटो नास्तीतिवद् घटो नास्तीत्यादिप्रतीति-विरहात् सिद्ध्यतीति भावः। सामान्यधर्मावच्छिन्नाभावस्य विशे-षधर्माश्रययत्किञ्चिद्यक्त्यधिकरणवृत्तित्वेऽपि तत्र तादृशाभावप्रका-रकप्रतीतिविरह इव पटादिमति पटाद्यभाववृत्तावपि पटाद्यभावप्र-कारकप्रतीतिविरहस्तुल्यन्यायेन शक्यापपादन इति प्रतिबन्दिस्तु सिद्धान्तग्रन्थे स्वयमेव दर्शयिष्यते इति प्रतियोगितावच्छेदकभेदव त्सिद्धिरपि ऽप्यभावभेदाप्रयोजक इति दर्शयति। अत एव चेति।

(दी०) अत एव गगनादीनामवृत्तीनां समनियतानां वा धर्माणामेक एवात्यन्ताभावः। युगपदुत्पन्नविनष्टानां समान-देशानामसति बाधके एक एव ध्वंसः प्रागभावो वेति। व्यधि-करणधर्मावच्छिन्नप्रतियोगिताकोऽपि चेदभावः प्रामाणिकस्तदा तदेकस्यैव प्रतियोगिनाः सर्वैरेव व्यधिकरणैर्धर्मैः सर्वैश्च समानासमानाधिकरणैः सम्बन्धैरवच्छिद्यन्ताम्, आकाशाभाव एव वा तथाऽस्तामिति। मैवम्।

(गा०) गगनादीनाम् । गगनत्वाद्यवच्छिन्नानाम् । समनियतानाम् । परस्पराभावासमानाधिकरणानाम्, संख्यात्वपरिमाणत्वाद्यवच्छिन्नानाम् । एक एवेति । समनियतानामभावानामभेदे बाधकविरहादिति भावः । प्रतियोगिनामवृत्तित्वे समनैयत्ये वा नान्योन्याभावस्य समनैयत्यसम्भव इत्यत आह । अत्यन्तेति । अग्रे इत्यत्राप्यसति बाधके इति बोध्यम् । अग्रेतनमेव वा योज्यम् । तेनैतद्रूपरसाद्यभावानां भिन्नेन्द्रियग्राह्याणामभेदे एतद्रूपं नास्तीत्यादिवदेतद्रसो नास्तीति चाक्षुषाद्यापत्तेर्बाधकतया तेषां भेद एवेति लभ्यते ।

न चाभावानामभेदेऽपि रूपत्वरसत्वाद्यवच्छिन्नप्रतियोगिताकत्वानां प्रतिनियतेन्द्रियग्रहणयोग्यत्वोपगमान्नोक्तातिप्रसङ्गः । समनियतरूपरसादीनामभेदस्तु नैवमापादयितुं शक्यते, शुक्लत्वमधुरत्वादिजातीनां सङ्करापत्तेः । नापि रसगुरुत्वादीनाम्, समनैयत्यप्रसङ्गेन रसत्वगुरुत्वत्वादिजातीनामभेदप्रसङ्गादिति वाच्यम् । रसाद्यभावस्य चक्षुरादिग्रहणयोग्यत्वे तद्धर्मानुयोगिताविशेषादीनामपि तद्योग्यताया दुर्वारत्वात् । आश्रययोग्यताया एव तद्योग्यताप्रयोजकत्वात् । चाक्षुषादिविषयविशेषणताया इन्द्रियप्रत्यासत्तिघटकीभूतायाः सत्त्वे चाक्षुषादिसामग्रीसत्त्वेन चक्षुराद्ययोग्यताया दुर्निर्वाहत्वाच्च ।

एतेनाभावानामिव तन्निष्ठानुयोगिताविशेषादीनामपि प्रतियोगितावच्छेदकयोग्यताधीन योग्यत्वमिति निरस्तमिति केचित् ।

वस्तुतस्तूक्ताभावानामभेदेऽपि न क्षतिः । भेदेऽपि रसाभावादेश्चक्षुःसंयुक्तविशेषणताबलाच्चाक्षुषादिवारणायाभावचाक्षुषप्रत्यक्षं प्रति चाक्षुषधर्मावच्छिन्नप्रतियोगिताया निरूपकत्वसम्बन्धेन हेतुताया आवश्यकत्वादनुयोगिताप्रत्यक्षेऽपि तद्धेतुतां स्वीकृत्यैव रसत्वाद्यवच्छिन्ननिरूपितानुयोगितानामपि चाक्षुषादिविषयत्ववारणसम्भवात् । रसादिसामान्याभावानां चक्षुरादियोग्याभावान्तरासमनियतत्वेन उभयमते चक्षुराद्ययोग्यतया अभावचाक्षुषादावुक्तहेतुताया उभयानुमतत्वेऽपि नानुयोगिताचाक्षुषादौ कारणान्तरकल्पनाधिक्यम् । अभावतदीयानुयोगित्वयोश्च प्रतियोगितानिरूपकत्वेनानुगमसम्भवेनाभावप्रत्यक्षस्थलीयकारणतयैव निर्वाहात् ।

युगपदिति । युगपद्विनष्टानां समानदेशानामेको ध्वंसः, युग-

पद्युत्पन्नानां समानदेशानामेक प्रागभाव इति योजना। व्यधिकरणानामेकनाशाभ्युपगमे तदनधिकरणदेशान्तरेऽपि तन्नाशादिप्रत्ययप्रसङ्ग इत्यत समानदेशत्वानुसरणम्। समानदेशत्वं च देशत समनैयत्यम्। रूपादिध्वंसादीनां समानाधिकरणानामपि एकनाशाभ्युपगमे तद्रूपाद्यनधिकरणतद्ध्वंसाद्यधिकरणव्यक्त्यन्तरे तद्रूपनाशप्रत्ययप्रसङ्गात्। विभिन्नावच्छेदकानवच्छिन्नत्वमपि समानदेशत्वघटकं बोध्यम्। तेन युगपद्विनष्टानामुत्पन्नानां च मूलाग्रावच्छिन्नशरीरमहीरुहादिसमवेतविभिन्नसंयोगविभागानां व्युदासः। तद्ध्वंसप्रागभावानामभेदे स्वानवच्छेदकावच्छेदेनापि स्वध्वंसादिप्रतीतिप्रसङ्गात्। तुल्यप्रागभावेतरसकलकारणानां पाकजरूपरसादीनां प्रागभावैक्ये सामग्रीभेदेन कार्यभेदानुपपत्तिरतस्तत्र प्रागभावभेदस्यावश्यकतया तद्व्यावर्तनायासति बाधके इति दर्शितबाधकाभावपरं न तु बाधकसामान्याभावपरम्। क्रमविनष्टक्रमोत्पन्नानां समानदेशानामपि ध्वंसाद्यैक्ये प्रत्ययातिप्रसङ्गरूपबाधकसत्त्वेन युगपद्विनष्टत्वादिरूपविशेषणवैयर्थ्यप्रसङ्गात्। एवं सति अवयवरूपरसाद्यात्मककारणभेदेनैव विभिन्नसामग्रीकानामपाकजरूपरसादीनां युगपदुत्पन्नानां प्रागभावैक्यमिति ध्येयम्।

अभावसमनैयत्ये प्रतियोगितावच्छेदकभेदादेर्भेदाप्रयोजकत्वे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकपटत्वघटत्वाद्यवच्छिन्नघटपटाभावादीनामपि न भेद इत्यभिप्रायेण इत्याह। व्यधिकरणेति। प्रतियोगिविशेषणतानापन्नस्य प्रतियोगितावच्छेदकत्वं नाभावबुद्धौ भासते इति नियमानभ्युपगमे एव व्यधिकरणधर्मावच्छिन्नाभावस्य प्रामाणिकतेति मनसि कृत्वा चेत् प्रामाणिक इत्युक्तम्। प्रतियोगिता। घटपटादिनिष्ठा विभिन्नप्रतियोगिता। व्यधिकरणौ। पटत्वघटत्वादिधर्मौ। अवच्छिन्नत्वाभिमतेनान्वयः। धर्मैरिति तु येन सम्बन्धेन यस्य प्रतियोग्यवृत्तित्वं तेन सम्बन्धेन तस्यावच्छेदकत्वलाभाय, न तु धर्मत्वं विवक्षितम्, गगनादीनामप्यवच्छेदकत्वोपगमात्। प्रतियोगितावच्छेदकसम्बन्धभेदेनापि न व्यधिकरणधर्मावच्छिन्नाभावभेद इत्याह। सर्वथेति। समानासमानाधिकरणौ। प्रतियोगिनिरूपिते तदनिरूपिते। सम्बन्धे। व्यधिकरणधर्मावच्छिन्नाभावप्रति

योगिता अवच्छिद्यन्ताम् । तथा च संयोगसमवायादिसम्बन्धावच्छिन्नघटत्वाद्यवच्छिन्नपटगुणाद्यभावोऽभिन्न एवेति फलितम् । व्यधिकरणसम्बन्धावच्छिन्नव्यधिकरणधर्मावच्छिन्नाभावयोरपि न भेद इत्याह । आकाशाभाव इति । समवायादिना आकाशत्वाद्यवच्छिन्नाकाशाद्यभाव इत्यर्थः । तथा । व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः । एवं च व्यधिकरणधर्मावच्छिन्नाभाववादिनां नाभावकल्पनाधिक्यम्, अपि तु प्रतियोगिताकल्पनाधिक्यमेवेति ध्येयम् ।

पूर्वपक्षिमुखेनैव समाधानं प्रकाशयितुं प्रथमतः प्रतिबन्दिमाह । एवं हीति ।

(दी०) एवं हि तत्तद्देशकालाद्यवच्छिन्नानवच्छिन्नतत्तदधिकरणवृत्तित्वेन विशिष्टस्य तत्तदवच्छेदेन वा एकस्यैवाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगिकत्वसम्भवेन तत्तद्भेदोऽपि विलुप्येत । तत्तत्प्रतियोगिकत्वं तत्तत्स्वभावो न च तत्राधिकरणविशेषवृत्तित्वस्यान्तर्भावोऽवच्छेदकत्वं चेति तु समानम् ।

(गा०) एवम् । सामान्याभावस्य विशेषाभावाभेदेऽपि । एकविशेषाभाववत्यपरविशेषाधिकरणे सामान्याभावत्वविशिष्टवत्ताप्रत्ययस्य कथितरीत्या वारणसम्भवेन तत्तदिति । यत्राधिकरणे यद्देशकालावच्छेदेन न घटादिसत्त्वं तद्देशकालावच्छिन्नं यत्तदधिकरणवृत्तित्वं तद्विशिष्टे तदवच्छेदेन वा एकस्मिन्नेवाभावे देशतः कालतश्चाव्याप्यवृत्तिघटपटादिप्रतियोगिकत्वस्य कल्पनया यत्राधिकरणे न गोत्वाश्वत्वादिकं अवच्छेदकविशेषानवच्छिन्नतद्वृत्तित्वविशिष्टे तदवच्छेदेन वा तत्रैवाभावे व्याप्यवृत्तिगोत्वाश्वत्वादिप्रतियोगिकत्वस्य कल्पनया घटादिमति तदवच्छेदकदेशकालावच्छिन्ने पटो नास्तीत्यादिप्रतीतिवद् घटो नास्तीत्यादिप्रतीतेः, गवादावश्वत्वं नास्तीतिवद्गोत्वं नास्तीत्यादिप्रतीतेश्च वारणसम्भवेन अभावमात्रभेद एवोच्छिद्येतेत्यर्थः । अवच्छिन्नानवच्छिन्नवृत्तिकत्वरूपाव्याप्यवृत्तित्वव्याप्यवृत्तित्वयोरेकस्मिन्नप्यभावे विभिन्नप्रतियोगिकत्वावच्छेदकविधया स्वीकारे विरोधविरहादिति

भाव । घटपटाद्यभावभेदव्यवस्थापकयुक्ते प्रकृते तुल्यतामाह । तदिति । तत्प्रतियोगिकत्वमिति । अभावनिष्ठं घटादिप्रतियोगिकत्वमित्यर्थ । तत्तत्स्वभाव । तत्तदभावस्वरूपम् । अधिकरणविशेषवृत्तित्वस्य । तत्तद्देशकालावच्छिन्नानवच्छिन्नतद्देशवृत्तित्वस्य । अन्तर्भाव । स्वाश्रये विशेषणतया प्रवेशः । अवच्छेदकत्वं वा सम्भवतीति शेष । अभावस्य विशेषणादिकमनन्तर्भाव्यैव स्वरूपमन्यर्था सेऽर्थ्यव्यवृत्तित्वाच्चेति भाव । प्रकृतेऽपीति । सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेऽपीत्यर्थ । समानमिति । तस्यापि अभावस्वरूपानतिरिक्तत्वादिति भाव । धर्मविशेषावच्छिन्नप्रतियोगिताकत्वस्य अभावस्वरूपानतिरिक्तत्वे सामान्याभावस्यानतिरिक्तत्वमते विशेषधर्मावच्छिन्नप्रतियोगिताकत्वेभ्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यातिरिक्ततायां अप्यनिर्वाहेन एकविशेषवति विशेषान्तराभाववत्त्वेनेव सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेनाप्यभाववत्ताप्रत्ययप्रसङ्गो बोध्य ।

यदि चाभावविशेषणस्यापि सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तत्त्वेनाधिकरणविशेषवृत्तित्वावच्छिन्नत्व स्वीकृत्यातिप्रसङ्गो वारयितु शक्यते । तदा घटपटादिप्रतियोगिकत्वस्यापि तत्त्वेन तथात्वमुपगम्यातिप्रसङ्गवारणसम्भवाद् घटपटाद्यभावानामपि भेदो न सिद्ध्येत्तस्माद् घटपटाभावभेदवादिना सामान्याभावविशेषाभावभेद आवश्यक एवेति ।

सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वादिक मुपगम्य सामान्याभावपार्थक्यनिराकरण उक्तप्रतिबन्दुर्दुरुद्धरतामालोक्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं यावद्विशेषाभावेषु व्यासज्यवृत्ति य मन्यन्ते तन्मतमपि निराकरोति ।

(दी०) अत एव सामान्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि मत्युक्तम् । अव्यासज्यवृत्तेस्ततस्वभावस्य तत्त्वानुपपत्तेः, अतिरिक्तकल्पने च किमपराद्धमतिरिक्ताभावेन ।

(गा०) अत एवेति । सामान्याभावत्वस्य धर्मिस्वरूपानतिरिक्तत्वादेवेत्यर्थ । व्यासज्यवृत्तीति । तथा च यत्किञ्चिद्विशेषवति या-

यदाश्रयसन्निकर्षविरहेण सामान्यधर्मावच्छिन्नाभावत्वग्राहकाभावान्न तेन रूपेणाभावग्रहप्रसङ्ग इति भावः । अव्यासज्यवृत्तेः प्रत्येकस्वरूपस्य प्रत्येकविश्रान्तत्वेनासम्भवद्व्यासज्यवृत्तिताकस्य तथात्वानुपपत्तेर्व्यासज्यवृत्तित्वस्वीकारायोगात् ।

ननु सामान्यावच्छिन्नप्रतियोगिताकत्वमतिरिक्तमेवोपगन्तव्यमतो न तद्व्यासज्यवृत्तित्वानुपपत्तिरित्यत आह । अतिरिक्तेति । अतिरिक्ताभावेनेति । अभावस्यातिरिक्तत्वे सामान्यावच्छिन्नप्रतियोगिताकत्वं तत्स्वरूपमेव न त्वतिरिक्तमिति हृदयम् ।

ननूक्तयुक्त्या सामान्यावच्छिन्नप्रतियोगिताकत्वमतिरिक्तसामान्याभावत्वादिनाऽप्यतिरिक्तमेवोपेयम्, तथा चालमतिरिक्ताभावेन, फलतो विशेषाभावकूटे तादृशधर्मस्य व्यासज्यवृत्तितयैवोपपत्तेः । अभावविशेषणस्यापि गुणादिनिष्ठबुद्धिविशेषविषयतात्मकद्वित्वादिवत् कथञ्चिद् व्यासज्यवृत्तिनासम्भवश्चेत्यत आह । किञ्चेति ।

(दी०) किञ्च व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद् व्यधिकरणानामपि विशेषाभावानां युगपदिन्द्रियसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोऽपि स्यात् ।

(गा०)व्यासज्यवृत्तिधर्मग्रहे एकाधिकरणघटितयावदाश्रयसन्निकर्षो यदि हेतुरुपेयते तदा वक्ष्यमाणातिप्रसङ्गानवकाशात्, तन्निराकरणाय व्यधिकरणयोरित्यादिदृष्टान्तप्रदर्शनम् । व्यधिकरणयोः । एकाश्रयघटितसन्निकर्षरहितयोः । व्यधिकरणानाम् । पृथिवीजलादिरूपनानाविशेषाधिकरणे सन्निकृष्टानाम् । सामान्यावच्छिन्नेति । रूपत्वाद्यवच्छिन्नेत्यर्थः ।

अथ रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वविशिष्टाभाववत्तानवगाहितप्रत्यक्षमलीकम्, पृथिव्यादौ च तद्विशिष्टवत्त्वविरहेण तदवगाहिप्रत्यक्षापादनासम्भव इति चेन्न । पृथिव्यादिघटितसन्निकर्षदशायां सामग्रीबलाद्रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वे विषयतया प्रत्यक्षसामान्यस्यान्यत्र प्रसिद्धस्याऽऽपत्तेर्दुर्वारत्वात् । यावद्विशेषाभावानां सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टानां विशेषाधिकरणव्यावृत्तविलक्षणाधिकरणतोपगमे अतिरिक्ताभावादिमतेऽप्यगौरवात् ।

नन्वभाववृत्तिधर्मग्रहे प्रत्यासत्त्यन्तरमिन्द्रियसंयुक्तविशेषणविशेषणतारूपं वाच्यम्, तत्र इन्द्रियसंयुक्तवृत्तितावच्छेदकत्वमेव प्रत्यासत्तिरुपेयते । रूपत्वाद्यवच्छिन्नानुरूपितानुयोगितायां च न पृथिव्यादिवृत्तितावच्छेदकत्वमिति यावद्विशेषाभावानामेकाश्रयघटितसन्निकर्षो व्यासज्यवृत्तितादृशधर्मप्रत्यक्षेऽप्यपेक्षित इत्यत आह । अपि चेति ।

(दी०) अपि च रूपान्तरेण सम्बन्धविधया वा व्यासज्यवृत्तिधर्मस्य ज्ञाने न यावदाश्रयसन्निकर्षापेक्षा, मानाभावात् । एवं चैकाभावसन्निकर्षेऽपि सामान्याभावबुद्धिप्रसङ्ग । यादृशे च तस्य ज्ञाने यावदाश्रयाणां सन्निकर्षोऽपेक्ष्यते तत्र तेषां तद्भेदस्य च ज्ञानमपि । तदज्ञाने तद्भेदज्ञाने च तदग्रहात्, आश्रयभेदभ्रमेण तद्भ्रमदर्शनाच्च । न चात्र यावद्विशेषाभावानां प्रथममुपस्थितिः सम्भवति, तत्प्रतियोगिनां विशेषतोऽनुपस्थितेरिति दिक् ।

(गा०) रूपान्तरेण । मेयत्वादिसामान्यप्रत्यासत्त्या । सम्बन्धविधया वेति । असन्निकृष्टस्यापि संयोगादेः संसर्गतया भानोपगमादिति भावः । मानाभावादिति । सम्बन्धसामान्यप्रत्यासत्त्याद्युपनीतव्यावृत्तविलक्षणैव विषयता यावदाश्रयसन्निकर्षजन्यतावच्छेदिकेति शेषः । सामान्याभावबुद्धिप्रसङ्ग । सामान्यावच्छिन्नप्रतियोगिताकत्वसंसर्गकाभावसाक्षात्कारप्रसङ्ग ।

नन्वनुयोगिताविशेषसंसर्गकाभावलौकिकत्वस्य तादृशसंसर्गांशे उक्तसन्निकर्षविशेषजन्यतावच्छेदकलौकिकत्वनिरूपकविषयताविशेषशालित्वनियतत्वोपगमाच्च तादृशसन्निकर्षं विना उक्तापत्तिरित्यत आह । यादृशेति । तस्य । व्यासज्यवृत्तिधर्मस्य । तेषाम् । यावदाश्रयाणाम् ।

यद्यपि तेषां परस्परं भेदज्ञानापेक्षयैव तज्ज्ञानापेक्षालाभः, तथाऽप्याश्रयाणां लौकिकप्रत्यक्षापेक्षालाभाय स्वातन्त्र्येण स्वाश्रयज्ञानापेक्षोक्तिः । ज्ञानमप्यपेक्ष्यते इत्यनुषङ्गेणान्वयः । तदपेक्षायां प्रमाणभू

तावन्ययव्यतिरेकावाह तदज्ञाने इत्यादिना । तदज्ञाने । यावदाश्रय-सन्निकर्षसत्त्वेऽपि दोषादिवशात्तत्तत्साक्षात्कारविरहदशायाम् । तद्भेदज्ञाने । दूरत्वादिवशादाश्रयाणामभेदभ्रमे । तदग्रहात् । द्वित्वाद्यग्रहात् । आश्रयभेदभ्रमेण । एकस्मिन्नेव मध्वपिहितदीर्घदण्डादौ भेदभ्रमेण । एतावता प्रकृते किमायातमित्यत आह । न चाग्रेति । विशिष्य । तत्तद्रूपत्वादिरूपप्रतियोगितावच्छेदकधर्मेण । अनुपस्थितेरिति । यावद्रूपादीनां युगपदसन्निकर्षादिति भावः । प्रतियोगितावच्छेदकावच्छिन्नानुपरागेणाभावसाक्षात्कारानुपगमादिति शेषः ।

यद्यप्यनेनेदन्त्वादिनाप्यभावप्रत्यक्षमङ्गीकरिष्यते । तथाप्यनुभवानुरोधेन तमस एव तथा भानं नाभावान्तरस्य । अस्तु वा इदन्त्वेन यावद्रूपाद्यभावज्ञानं तथापि प्रतियोगितावच्छेदकपुरस्कारेणानुपस्थितानामभावानां न भेदग्रहः । अनुभवविरोधादिति । तद्गतव्यासज्यवृत्तिधर्मग्रहोऽशक्य एवेति भावः । अत्र च द्वित्वादिप्रत्यक्षेऽनुभवानुरोधाद्यावदाश्रयप्रत्यक्षादेर्हेतुत्वेऽपि प्रकृते तद्धेतुत्वमप्रामाणिकम् । एकधर्माश्रयप्रत्यक्षादितोऽन्यस्याग्रहात् स्वाश्रयप्रत्यक्षादिहेतुत्वे ऽनुगतकार्यकारणभावासम्भवात् । सम्भवेऽप्यनेकसमवेतसङ्ख्याप्रत्यक्षत्वस्यैव तत्र जन्यतावच्छेदकत्वोपगमात् । एवमतीन्द्रियसामान्याभावस्य विशेषाभावभेदो निर्युक्तिक एव, तत्रोपदर्शितामेदे बाधकाभावकाशादित्यालोच्य दिगित्युक्तम् ।

दिग्धर्षस्तु यथाऽनन्ताधिकरणेऽभावो नाधिकरणस्वरूपः, तत्राभावत्वकल्पनापेक्षया लाघवात्तदाश्रयैकाभावकल्पनमुचितम् । तथानन्तविशेषाभावे सामान्यावच्छिन्नप्रतियोगिताकत्वाविकल्पनापेक्षया लाघवात्तदाश्रयैकाभावकल्पनमुचितमिति । एवं रूपं नास्तीति प्रतीतिविषयतया सामान्यावच्छिन्नप्रतियोगिताकत्वेन यावद्विशेषाभावनिरूपितातिरिक्तैकाधिकरणताऽवश्यं कल्पनीया । अन्यथा रूपादिमति तादृशप्रतीतेः प्रमात्वापत्तेरिति किं लाघवम् ।

न च रूपवति तत्तद्रूपाभावरूपविषयबाधेनैव तादृशप्रतीतेरप्रमात्वमिति वाच्यम् । घटवद्भूतलमित्यादौ घटत्वादिना यावद्घटादिमानानियमवदुक्तप्रत्ययेऽपि रूपाभावत्वादिना यावद्रूपाभावादिभानानियमात् । योग्यतादिवशाच्छब्दादिजन्यतादृशज्ञानेऽबाधिताभावमात्रभानसम्भवात् । न च शब्दविरोधादेर्यावदभावाव-

गाहित्वं कार्यतावच्छेदकं कल्पयितुं शक्यते, येन नियमः स्यात्। तथा सति गौरवात्। सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे व्यासज्यवृत्तित्वकल्पनवैयर्थ्याच्च।

अतिरिक्ताधिकरणतानभ्युपगमे प्रतिबन्धकसमवहितेऽपि प्रतिबन्धकतावच्छेदकधर्मावच्छिन्नाभावत्वरूपकारणतावच्छेदकावच्छिन्नविशेषाभावसम्बन्धस्य कार्योत्पत्तिप्रयोजकस्याक्षतत्वात्तदापत्तिरिति केचित्। तन्न। सामान्याभावपार्थक्येऽपि यावद्रूपाभावत्वावच्छिन्ननिरूपिताधिकरणताविशेषकल्पनमावश्यकम्, रूपवति यावत्सादृशाभावप्रतीतेरप्रमात्वात्। सैव चाधिकरणता सामान्यावच्छिन्नप्रतियोगिताकत्वविशिष्टनिरूपिता न त्वतिरिक्तेति सामान्याभावपार्थक्यवादिभिरभ्युपगमात्। घटपटाद्यभावानामभेदे घटाभावत्वपटाभावत्वावच्छिन्नाधिकरणतानामतिरिक्तानां कल्पनमावश्यकम्। क्लृप्ताधिकरणतान्तर्भावेण निर्वाहासम्भवादिति दर्शितप्रतिबन्धनवकाशात्।

वस्तुतः कारणतावच्छेदकोपलक्षितकारणसत्त्वं सर्वत्र कार्योत्पत्तौ तन्त्रं न तु विशिष्टसत्त्वं गौरवादिति परामर्शे स्वयं वक्ष्यते। एवं च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य विशेषाभावेष्वभ्युपगमे तद्विशिष्टाधिकरणताया विलक्षणत्वेऽपि प्रतिबन्धकविशेषाभावात् कार्योत्पत्तिप्रसङ्गो दुर्वार एव इत्यादियुक्तिरेव दिगित्यनेन दर्शिता।

सार्वभौममतमाह। केचित्त्विति।

(दी०) केचित्तु अनन्तविशेषाभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तत्रासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात् सामान्यावच्छिन्नप्रतियोगिताकत्वेनैक एवाभावः कल्प्यते। कल्पनीयशरीरस्योभयत्र तुल्यत्वेऽपि एतदपेक्ष्य तस्य गुरुत्वात्। विनिगमकाभावेऽपि च सामान्याभावसिद्धिरस्त्वेव। धर्मकल्पनातो धर्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तम्।

(गा०) ननु सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविशिष्टाभावस्यातिरिक्तस्य कल्पनापक्षेऽप्यतिरिक्तयोर्विशेष्यविशेषणयोः कल्पनी-

यतया कल्पनीयांशसाम्यमित्याशङ्क्याह । कल्पनीयेति । शरीरस्य । अंशस्य । एतदपेक्षया । अतिरिक्तसामान्याभाववादिमतापेक्षया । तस्य । तदनतिरिक्ताभाववादिमतस्य । गुरुत्वादिति । सामान्याभावत्वकल्पनायां धर्मिणामानन्त्यादिति भावः । अभ्युपेत्याह । विनिगमकेति । अप्रत्यूहैवेति । सिद्धिविरोधिनो गौरवस्यानवकाशादिति भावः ।

ननु धर्मकल्पनातो धर्मिकल्पना गरीयसीति प्रवादादतिरिक्ताभावरूपधर्मिकल्पनङ्गौरवपराहतमित्यत आह । धर्मेति । कल्पनीयानेकत्वेति । धर्मकल्पनापक्षे क्वचित्तन्मात्रकल्पना, धर्मिकल्पनापक्षे तु धर्मस्यापि कल्पनीयत्वात्तदुभयकल्पने कल्पनीयाधिक्यप्रयुक्तमेव, न तु धर्मिकल्पनामात्रप्रयुक्तमित्यर्थः । तथा च प्रकृते कल्पनीयाधिक्यविरहादतिरिक्तसामान्याभावपक्षे न गौरवमिति भावः ।

गौरवान्तरमाशङ्कते । न चेति ।

(दी०) न चातिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्यानन्तवाय्वाद्यधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य क्लृप्तानन्तवाय्वाद्यधिकरणवृत्तित्वानां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तत्रासत्त्ववृत्तित्वस्य च कल्पनैव लघीयसीति वाच्यम् । एवं सत्यभावमात्रासिद्धिप्रसङ्गादित्याहुः ॥

(गा०) लघीयसीति । न च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे ऽप्यनन्ताभाववृत्तित्वकल्पनासाम्यमिति वाच्यम् । विशेषाभावानामपि सामान्याभावाधिकरणतया सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे यावद्धर्मिवृत्तित्वं कल्पनीयं तदपेक्षयाऽतिरिक्तसामान्याभावे यद्वृत्तित्वकल्पना तेषां भूयस्त्वेन साम्यानवकाशात् । एवं सतीति । एवम् । कल्पनीयेऽभावेऽनन्ताधिकरणवृत्तित्वकल्पनागौरवस्यातिरिक्ताभावसिद्धिविरोधित्वे । अभावमात्रेति । अधिकरणादावभावत्वकल्पनादेवोपपत्तेर्भावातिरिक्तः कोऽप्यभावो न सिद्ध्येदित्यर्थः । अतिरिक्ताभावस्य तत्रानन्ताधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य अभावत्वेऽनन्ताधिकरणादिवृत्तित्वकल्पनाया लघुत्वादिति भावः ॥

इति अनुमानगादाधर्यां सामान्याभावप्रकरणं समाप्तम् ॥

अथ विशेषव्याप्तिप्रकरणम् ।

(चि०) यत्र प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यम् ।

(दी०) यद्वेत्यादि । अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः । न च तत्र रूपवत्त्वादिकमेव साध्यम्, तच्च परम्परासम्बन्धेन रूपत्वादिकमेव, तेन च सम्बन्धेन न तदभावः क्वापि पृथिव्यादाविति वाच्यम् । रूपादेरसाध्यतापत्तेः ।

(गा०) व्यधिकरणवह्निधूमयोर्व्याप्त्यनभ्युपगमेन वह्निमान् धूमादित्यादौ तत्तद्वह्नयाद्यभावमादाय दोषासंस्पर्शाद्विशेषलक्षणेऽन्यथाऽव्याप्तिमाशङ्कते । अथात्रेति ।

नानाव्यक्तिरूपादिसाध्यकेति । यद्यप्यवच्छेदकत्वाघटितप्रकृतलक्षणे यथा यावद्धेत्वधिकरणवृत्तिसाध्यैक्यविरहेण सकलसाध्यव्यक्तीनामेव हेतुसमानाधिकरणतत्तद्व्यक्तित्वाद्यवच्छिन्नाभावप्रतियोगितया हेतुसमानाधिकरणाभावाप्रतियोगिसाध्यदुर्भिक्षम् । तथा साध्यैक्येऽपि प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणहेतुमद्भिन्नत्वाद्यवच्छिन्नाभावप्रतियोगिनायाः साध्येऽक्षततया ऽव्याप्तिर्दुर्वारैव । उभयाभावघटितप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशपक्षे च एतद्रूपवानेतद्रूसादित्यादावपि, एतद्रूपतद्रूपोभयत्वाद्यवच्छिन्नाभावेऽपि तस्य सत्त्वेन लक्षणगमनाभावादसम्भव एव । तथापि यथाश्रुतप्रतियोगिवैयधिकरण्यनिवेशपीत्यस्याऽऽदौ पूरणीयतया नासङ्गतिः ।

तन्निवेशाभिप्रायेणैवोपाध्यायस्यैतद्दोषोद्धरणप्रकारमाशङ्कते । न चेति । तत्र । पृथिवीत्वादिहेतुके । रूपवत्त्वादिकमेव साध्यमिति । तथा च रूपव्याप्तेस्तत्रानभ्युपगमान्नाव्याप्तिरिति भावः । ननु रूपवत्त्वं रूपसमवायः तस्य च समवायस्यैकत्वेन साध्यतानिर्वाहेऽपि तन्मते द्रव्यत्वादिनापि शब्दसाधनस्य व्याप्ता-

द्विसाधारणस्य तस्य सिद्धावपि रूपत्वासिद्धा तत्सिद्ध्यनुरोधेन पृथिवीत्वादेः रूपव्याप्तेरावश्यकत्वेवेत्यत आह । तथेति । तथ । प्रकृतसाध्य रूपवत्त्वादिकं च । परम्परासम्बन्धेन । साध्यमानमिति शेषः । परम्परासम्बन्धेन स्वसमवायिरूपाद्यात्मकेन रूपत्वादेः पक्षे सिद्धावत्र रूपादेस्तत्र सिद्धिनिर्वाह इति भाव ।

ननु रूपत्वादेरपि समवायादिना हेतुमन्निष्ठाभावप्रतियोगित्वात् कथ व्यापकत्वनिर्वाह इत्यत आह । तेन चेति । तेन । स्वसमवायिरूपात्मकेन । न तदभाव इति । तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायास्तादृशसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य वा निवेशाद्नानुपपत्तिरिति भाव । असाध्यतापत्तेरिति । पृथिवीत्वादिलिङ्गकप्रमापरामर्शजन्यानुमितौ समवायादिना विधेयतानुपपत्तेरित्यर्थः । तथा चानुभविकतदुपपत्तय रूपादिव्याप्तेरावश्यकत्वाद्व्याप्तिर्ध्रुवैवेति भावः ।

नन्ववच्छेदकत्वघटितलक्षणपक्षेऽपि नानाव्यक्तिदण्डाद्यवच्छिन्नसाध्यकव्याप्त्यनिर्वाहेण प्रातिस्विकरूपावच्छिन्नसकलदण्डाद्यवच्छिन्नव्यभिचारिहेतुकानुमितौ दण्डादेर्विधेयतावच्छेदकत्व यथाऽपलप्यते तथतल्लक्षणपक्षेऽपि पृथिवीत्वादिलिङ्गकानुमितौ रूपादेर्विधेयताऽप्यपलपनीयेत्यत. प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशावश्यकत्वाभिप्रायेण दोषान्तरमाह । द्रव्यान्यत्वादीति ।

(दी०) द्रव्यान्यत्वादिविशिष्टसत्ताद्यभावस्य द्रव्यादिवृत्तित्वात् सत्तादिसाध्यकद्रव्यत्वादावव्याप्तेश्च । अन्यथा विशिष्टतया सत्तादेः साध्यत्वे व्यभिचारिणि जातिमत्त्वादावतिप्रसङ्गात् । व्युत्पादयिष्यते च विशिष्टाभावस्य विशेष्यप्रतियोगिकत्वम् । द्वित्वाद्यवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च ।

(गा०) सत्तादीत्यादिना गुणान्यत्वादिविशिष्टसत्तादिसाध्यकपरिग्रहः । विशिष्टप्रतियोगिवैयधिकरण्यप्रवेशप्रयोजनं प्रकाशयति । अन्यथेति । विशिष्टतया । द्रव्यान्यत्वादिविशिष्टतया । सत्त्वादेः साध्यत्वे । व्यभिचारिणि । समनियतयैव तत्साध्यके अतिप्रसङ्गात् । स्रम विनाऽपि गुणत्वादिना गुणादाविव विशिष्टविशिष्टसाधकताप्र-

सत्त्वात् । न च द्रव्यादौ द्रव्यान्यत्वादिविशिष्टसत्तादिसिद्धिर्बाधादेवा-शक्यापादनेति वाच्यम् । बाधानवतारदशायामापत्तेर्दुर्वारत्वात् । अन्यथा सामानाधिकरण्यमात्रस्य व्याप्तित्वापत्तेः । बाधादेव घात्वादौ द्रव्यत्वादिना रूपाद्यनुमानोपपत्तेः ।

ननु विशेष्यवति विशिष्टाभावप्रतीतिर्विशेषणाभावं सर्वत्र विशेषणविशेष्योभयसम्बन्धाभावं वाऽवगाहते, न तु विशेष्यप्रतियोगिकाभावम्, प्रतियोगिमति विरोधेनाभावासत्त्वात्तत्कथं विशिष्टाभावमादाय सत्तादिसाध्यकेऽव्याप्तिः । न चैवं विशिष्टसत्तादिसाध्यके जात्यादिहेतावतिव्याप्तिः, जातिमद्विशिष्टाभावप्रतियोगितायाः सत्तात्मकसाध्येऽसत्त्वादिति वाच्यम् । गुणाद्यन्यत्वविशिष्टत्वादिनाऽपि सत्तादेः साध्यत्वे जात्यादिहेतौ व्याप्यत्वोपगमात् । *विशेषणविशेष्यसम्बन्धस्य साध्यतायामेव तादृशहेतोरलक्ष्यतोपगमादित्यत आह* । व्युत्पादयिष्यते चेति । विशिष्टाभावोऽतिरिक्तो विशेषणाद्यभावस्वरूपो वा भवतु तस्य विशेषणावच्छिन्नविशेष्यप्रतियोगिकत्वमावश्यकम्, विशेषणावच्छिन्नविशेष्यज्ञानं विनाऽसम्भवन्त्यास्तत्प्रतीतेस्तादृशविशेष्यांशे तत्प्रतियोगितावगाहितायां दुरपह्नवत्वादिति भावः ।

ननु विशिष्टस्यातिरिक्ततामते विशिष्टाभावमादाय न दूषणावसर इति एकव्यक्तिसाध्यकेऽपि द्वित्वाद्यवच्छिन्नमाध्याभावमादाय दूषणमाह । *द्वित्वेति । तत्र । हेतुमति । न च विशिष्टस्यातिरिक्तत्वे* प्रतियोगितावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोग्यसामानाधिकरण्यमेव निवेशनीयमिति नोभयाभावादिकमादायाव्याप्तिप्रसक्तिरिति वाच्यम् । *सत्तागुणत्वोभयवान् द्रव्यत्वादित्यादावतिव्याप्तिवारणाय* विशिष्टस्यातिरिक्ततामतेऽपि प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनस्याऽऽवश्यकत्वात् ।

न च द्रव्यत्वादौ सत्तादिव्याप्तिरिष्टैव, *गुणत्वादेश्च तत्समानाधिकरणप्रतियोगिव्यधिकरणाभावान्तरप्रतियोगित्वान्न* तद्व्यापकतापत्तिरिति किं तद्विवक्षयेति वाच्यम् । गुणत्वस्य *तादृशाभावप्रतियोगित्वेऽपि सत्तागुणत्वोभयत्वसामानाधिकरण्येन* तादृशाभावप्रतियोगित्वाभावसत्त्वात् । भ्रम विनैव द्रव्यत्वहेतुकाया द्रव्यं सत्तागुणत्वोभयवदित्यनुमितेर्वारणायाभावे प्रतियोगि-

तावच्छेदकावच्छिन्नवैयधिकरण्यस्यावश्यं निवेशनीयत्वात्। वह्नि-त्वाद्यवच्छेदेन किञ्चिद्धूमादिव्यक्तिसमानाधिकरणाभावाप्रतियोगि-त्वासत्त्वेन विधेयतावच्छेदकसामानाधिकरण्येन तादृशाभावाप्र-तियोगित्वज्ञानस्यैवानुमितिहेतुतायाः प्रतियोगित्वाभावघटितल-क्षणघादिना स्वीकरणीयत्वात्।

अत्र यथा अवच्छेदकदेशकालावच्छिन्नपक्षकस्थलेऽपि शुद्धस-मवायादिना व्यापकताग्रहाय तद्विशिष्टानुयोगिकवैशिष्ट्यानुमिति-रुपाध्यायैरङ्गीक्रियते । तथा विशेषणान्तरवैशिष्ट्यावच्छिन्नस-त्तादिसाध्यकेऽपि विशिष्टप्रतियोगिकसमवायादिना व्यापकताग्रह-मन्तरेण न विशिष्टवैशिष्ट्यानुमितिरस्तैरुपगन्तव्येति साध्यताव-च्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नाविशेषितप्रतियो-गिवैयधिकरण्यानिवेशोऽपि नातिप्रसङ्ग इति न विशिष्टाभावमा-दाय द्वित्वाद्यवच्छिन्नाभावमादाय वा सद्धेतावव्याप्तिः। साध्यता-वच्छेदकविशिष्टनिरूपितसमवायादिना प्रतियोग्यनधिकरणहेत्व-धिकरणस्य सद्धेतावप्रसिद्धावपि न क्षतिः, उभयाभावघटितप्रति-योगिवैयधिकरण्यस्य प्रवेशनीयत्वात् । विशिष्टवैशिष्ट्यसाध्यक-स्थले एव वा विशिष्टवैशिष्ट्यानुमितिरुपेयते।

न च विशिष्टप्रतियोग्यसामानाधिकरण्यानिवेशे द्रव्यं सत्ता-गुणत्वोभयवद् द्रव्यत्वादित्यादावतिप्रसङ्गो दुर्वार इति वाच्यम् । तत्रोभयत्वोपलक्षितवत्तानुमितेः प्रमारूपतया इष्टत्वात्। विशिष्ट-वैशिष्ट्यानुमितेश्चोक्तरीत्या वारणसम्भवादिति यथाश्रुतलक्षणपरि-ष्कारप्रकारो ज्ञेयः। तथापि धूमादिना पर्वतादौ अपूर्ववह्न्याद्यनुमाना-नुपपत्तेर्दुर्वारत्वात्। क्वचिदपि वह्नौ धूमसमानाधिकरणाभावाप्रति-योगित्वासत्त्वात्। पर्वतीयधूमसमानाधिकरणाभावाप्रतियोगित्वस्या-प्यवह्नावसत्त्वात्। पर्वतीयवह्नेरसन्निकर्षेण तत्र दुर्ग्रहत्वात् । महा-नसीयधूमसमानाधिकरणाभावाप्रतियोगित्वस्य तादृशवह्नौ गृहीत-त्वेऽपि तद्ग्रहस्य तादृशधूमे पक्षधर्मताग्रहविरहेणाकिञ्चित्करत्वात्।

न च व्याप्तिपदार्थनिर्वचनमिदं न त्वनुमित्यौपयिकव्याप्तिस्व-रूपकथनमिति वाच्यम् । अर्थान्तरप्रसङ्गात् । धूमो वह्निव्याप्य इत्यादौ तत्तद्धूमत्वादिप्रकारेण हेत्वनुपस्थितेः, तत्तद्धूमादिसमा-नाधिकरणाभावाप्रतियोगित्वस्य शब्देन बोधयितुमशक्यत्वाच्च ।

यत्तु सामानाधिकरण्यस्याव्याप्यवृत्तितामभ्युपेत्यैतल्लक्षणम्, तथा च साध्याभावनिष्ठं यत् साध्यसामानाधिकरण्यं हेतुमति तच्छून्योऽभावोऽभावान्तरार्थः । केवलान्वयिसाध्यके द्वित्वाद्यवच्छिन्नसम्बन्धान्तरावच्छिन्नप्रतियोगिताक एव साध्याभावः प्रसिद्धः । न च स्वरूपसम्बन्धेन प्रमेयमात्रसाध्यकस्थलेऽभावमात्रस्यैव साध्याभावतया साध्याभावनिष्ठसाध्यसामानाधिकरण्यशून्याभावाप्रसिद्धिरिति वाच्यम् । अभावप्रतियोगिसाध्यस्य वृत्तिमत्त्वेन विशेषणीयतया अवृत्तेरभावस्य तादृशस्य प्रसिद्धेः । तत्प्रतियोगिनोऽवृत्तेरननुमेयत्वाद्व्यापकताविरहे क्षतिविरहादिति । तदपि न । तादात्म्येन प्रमेयमात्रसाध्यकस्थले वस्तुमात्रे एव व्यापकताया उपपादनीयतया उक्तप्रसिद्धिप्रकारासम्भवात् ।

प्रकृतमसमाधानमाशङ्कते । अथेति ।

(दी०) अथाप्रतियोगित्वं प्रतियोगित्वाभावः, स च येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हेतौ । अस्ति चायं रूपादौ, रूपत्वादिना न पृथिवीनिष्ठाभावप्रतियोगित्वमिति प्रत्ययादिति चेन्न ।

(गा०) प्रतियोगित्वस्याव्याप्यवृत्तित्वेऽपि प्रतियोगिनि तद्भेदस्य दुर्घटतया नञोऽत्यन्ताभावार्थकत्वमाह । अप्रतियोगित्वमिति । प्रतियोगिनि प्रतियोगित्वाभावस्वीकारे व्यभिचारिण्यतिव्याप्तिमाशङ्क्याह । स चेति । येन रूपेणेति । यद्रूपावच्छिन्नसाध्ये इत्यर्थः । तद्रूपावच्छिन्नव्याप्यत्वमिति । तथा च धूमत्वादिना वह्न्यादिमन्निष्ठाभावप्रतियोगिनो धूमादेर्द्रव्यत्वादिना तत्त्वाभाववत्त्वेऽपि न यद्रूपादेर्धूमत्वाद्यवच्छिन्नव्याप्यतापत्तिः । द्रव्यत्वाद्यवच्छिन्नव्याप्यत्वं त्विष्टमेवेति भावः ।

ननु तत्तद्व्यक्तित्वादिना पृथिव्यादिनिष्ठाभावप्रतियोगिनि रूपादौ प्रतियोगितानवच्छेदकरूपस्यावच्छेदेन तदभावसत्त्वे मानाभाव इत्यत आह । अस्ति चेति । अयम् । पृथिव्यादिनिष्ठाभावप्रतियोगित्वाभावः । इति प्रत्ययात् । इत्याकारकप्रतियोगित्वाभावावगाहिप्रत्ययस्याऽनुभविकत्वात् ।

(दी०) तादृशप्रतीत्या हि रूपत्वादौ प्रतियोगिताया अ-

वच्छेदकत्वाभावो गृह्यते, न तु तदभावावच्छेदकत्वम्, सर्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न तु कुत्रापि रूपे तदभाव इत्यबाधितप्रत्ययात् । अन्यथा यो यो धर्मो यस्य यस्य नावच्छेदकस्तत्तदवच्छेदेन नत्तदभावोऽप्युक्तरीत्या सिद्ध्येत् । प्रमेयधूमत्वेन न वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात्तदवच्छेदेन तादृशप्रतियोगित्वाभावस्यापि सुवचत्वाच्च ।

(गा०) अग्रिमनञ्पदस्य प्रतियोगितापरत्वं स्फुटयितुं प्रतियोगितायां इत्यसमासाभिधानम् । ननु शब्दव्युत्पत्तिबललभ्यं रूपत्वावच्छिन्नप्रतियोगित्वाभावं परित्यज्य रूपत्वादिनिष्ठतदवच्छेदकत्वाभावावगाहित्वं कुतः स्वीक्रियते इत्यत आह । सर्वत्रैवेति । तद्धर्मे स्वरूपसम्बन्धात्मकतदवच्छेदकतासिद्धौ तद्धर्मविरोधिसामानाधिकरण्यमात्रावगाहिप्रतीतेरबाधकतया रूपत्वे पृथिवीनिष्ठाभावप्रतियोगितात्वरूपानुगतरूपावच्छिन्नप्रतियोगितावच्छेदकत्वावगाहित्वसूचनाय सर्वत्रेत्युक्तम् ।

ननूक्तप्रतीत्या रूपत्वेऽनतिरिक्तवृत्तित्वरूपं तादृशप्रतियोगितात्वावच्छिन्ननिरूपितावच्छेदकत्वमेवावगाह्यते, न तावतापि बाधकतानिर्वाहः । स्वरूपसम्बन्धरूपयोरेव विरोधिद्वयावच्छेदकत्वयोर्विरोधादतो बाधकप्रत्ययान्तरमाह । न त्विति । तादृशप्रतियोगित्वाभावो रूपसामान्यावृत्तिरित्यर्थः ।

ननु तादृशाभावे रूपावृत्तित्वप्रत्ययोऽसिद्धः, स्वयमेव संयोग्यन्योन्याभावे वृक्षावृत्तित्वप्रत्ययस्यासिद्धिमुद्भाव्यान्योन्याभावस्याव्याप्यवृत्तिताया व्यवस्थापनीयत्वात्, तत्प्रत्ययात् प्रकृतप्रत्ययस्याविशेषात् । न च रूपत्वेन न रूपे प्रतियोगित्वमिति शब्दाद् रूपत्वावच्छिन्नप्रतियोगित्वाभाव इव प्रतियोगितानिष्ठो रूपत्वावच्छिन्नत्वाभावोऽपि कृतव्युत्पत्तितः प्रतीयते, अवच्छिन्नत्वान्तस्य तृतीयान्तेनोपस्थितस्य नञर्थाभावेन प्रथमान्तपदार्थान्वितेन प्रतियोगितयाऽन्वयेऽविरोधात् । एवं च बाधकप्रत्ययस्य विवादग्रस्तत्वेऽपि प्रतियोगित्वे रूपत्वावच्छिन्नत्वाभाव एव उभयसिद्धत्वानुरोधादुक्तप्रत्ययविषयः स्वीकार्यः, न तु रूपे प्रतियोगित्वाभावोऽप्रसक्त-

त्वेन गौरवस्यैव बाधकत्वादिति वाच्यम् । एवं सति वृक्षे मूले न संयोग इति प्रत्ययस्यापि वृक्षवृत्तिसंयोगे सप्तम्यन्तार्थमूलावच्छिन्नत्वाभावावगाहितापत्त्या संयोगादेरव्याप्यवृत्तित्वानुपपत्तेः ।

न च संयोगवत् प्रतियोगित्वस्याप्यव्याप्यवृत्तित्वे वृक्षे मूले न संयोग इतिवद्रूपे रूपत्वे न रूपाभावप्रतियोगित्वमिति अवच्छेदकपदोत्तरसप्तम्युल्लिखितप्रत्ययापत्तिरिति वाच्यम् । प्रतियोगिताया अव्याप्यवृत्तिताविरहेऽपि रूपत्वादेस्तदवच्छेदकत्वेन रूपत्वे रूपाभावप्रतियोगित्वमिति प्रतीतिव्यवहारापत्तेर्देशकालादेर्विलक्षणमेवावच्छेदकत्वं सप्तम्यर्थो न स्वावच्छेदकत्वमात्रमिति समाधानस्यात्रापि तुल्यत्वात् । तादृशावच्छेदकतानिरूपकमेवाव्याप्यवृत्तीति नियमस्याप्रामाणिकत्वात् ।

युज्यते च साध्यतावच्छेदकावच्छेदेन साध्ये प्रतियोगित्वाभावावगाहिज्ञानस्यैवानुमितिहेतुत्वम्, न तु साध्यतावच्छेदकधर्मिकानवच्छेदकत्वग्रहस्य, धर्मितावच्छेदकतया साध्यतावच्छेदकानिष्ठवह्नित्वत्वादिविषयताया अवच्छेदककोटौ प्रवेशनीयतया गौरवात् । कदाचिद्वह्नित्वत्वादिना कदाचिच्च स्वरूपतो वह्नित्वादेर्विधेयतावच्छेदकतया भानमिति नियमस्य कष्टनिर्वाह्यत्वात् । दण्डिसंयोगादिहेतुकानुमितौ दण्डादेर्विधेयतावच्छेदकत्वानुपपत्तेः । एतन्मते च तत्तद्दण्डत्वादिविशिष्टावच्छिन्ने विशेषाभावप्रतियोगित्वसत्त्वेऽपि अवच्छेदकतावच्छेदकभेदेन एकावच्छेदेनापि विरुद्धधर्मसत्त्वोपगमाद्दण्डत्वादिविशिष्टावच्छिन्ने तदभावसत्त्वेऽविरोधेनैव तदुपपत्तेः सुकरत्वादित्याशङ्का प्रतियोगितानवच्छेदकरूपेण प्रतियोगित्वाभावोपगमे प्रतिबन्दिमाह । अन्यथेति । यस्य । कारणत्वकार्यत्वादेः । उक्तरीत्येति । दण्डे द्रव्यत्वेन न घटजनकत्वमिति प्रतीतिबलेनेत्यर्थः । अत्रापीष्टापत्तिसम्भवेन लक्षणे दूषणान्तरमाह । प्रमेयेति । इति प्रत्ययादिति । अतिप्रसक्ततया द्रव्यत्वादेरिव प्रमेयधूमत्वादेर्गुरुतया धूमाभावप्रतियोगितानवच्छेदकत्वेऽपि दोषादिति भावः । सुवचत्वाच्चेति । तथा च प्रमेयधूमवान् वह्नेरित्यादावतिव्याप्तिरिति भावः ।

एतदतिव्याप्त्युद्धाराभावादाह । अथेति ।

च्छेदकधर्मवत्त्वम् । न चैवं पूर्वस्मादभेदः, तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य, अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्यात् । घटकयोस्तादृशप्रतियोगितावच्छेदकतत्त्वान्योन्यात्यन्ताभावयोर्भेदेन भेद इत्यपि कश्चित् ।

(गा०) साध्यजातीयेति । सजातीयत्वं साध्यतावच्छेदकसाधनतावच्छेदकाभ्याम्, तेन अनवच्छेदकवह्नित्वाद्यवच्छिन्नसमानाधिकरणवृत्तिधूमत्वादेरित्यर्थः । अत एव व्यधिकरणयोरपि सामान्यतो व्याप्तिनिर्वाहात् सामान्यलक्षणानुपगमेऽप्यनुमानोपपत्तिः । साध्यसाधनसामानाधिकरण्यस्य अनवच्छेदकरूपावच्छिन्नस्वसमानाधिकरण्यसाधनतावच्छेदकोभयस्य युक्त्यन्तरेण सामान्यप्रत्यासत्तौ व्यवस्थापितायां साध्यसाधनव्यक्तिभेदेन भिन्नानामपि व्याप्तीनां तथा युगपज्ज्ञानसम्भवेन सर्वसाधारणैकव्याप्त्यावाग्रहविरहादिति भावः ।

कश्चिदित्यस्वरसबीजम् । व्यधिकरणयोर्न व्याप्तिरिति ग्रन्थकृतैवानाभिधानादुक्तरीत्या भेदस्याऽऽवश्यकत्वम् ।

(चि०) यत्समानाधिकरणान्योन्याभावप्रतियोगि यन्न भवति तेन समं तस्य सामानाधिकरण्यं वा, स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्धटकत्वं वा ।

अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वात् व्यधिकरणवह्निधूमयोर्न व्याप्तिः, किं तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना । न चैवं धूममात्रे न व्याप्तिरिति वाच्यम् । सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् । धूमस्वन्धिवह्निस्तद्व्याप्य एव । युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव । कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः । यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणम् । कर्मणि

(दी०) अथ प्रमेयधूमत्वं न गौरवेण सामानाधिकरण्यप्रतियोगितावच्छेदकम्, विवक्षितं चात्र तथेति चेत्? असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्वमपि न तदवच्छेदकम्, कम्बुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति बहुव्याकोपश्च। अत एव प्रमेयधूमत्वं गौरवेण प्रतियोगिताया इव तच्छून्यताया अपि नावच्छेदकमित्युक्तावपि न निस्तारः।

(गा०) अत्र। लक्षणे। तथा। साध्यतावच्छेदकस्य हेतुनिष्ठसामानाधिकरण्यप्रतियोगित्वावच्छेदकत्वम्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसामानाधिकरण्यस्यैव व्याप्तित्वोपगमादिति भावः। चेदित्यनन्तरं नहीति पूरणीयम्। असमानाधिकरणधूमकेति। असमानाधिकरणो धूमो यस्येति व्युत्पत्त्या धूमनिष्ठसामानाधिकरण्यप्रतियोगिताशून्येत्यर्थकम्। न तदवच्छेदकमिति। अनतिप्रसक्त एव स्वरूपसम्बन्धरूपावच्छेदकत्वोपगमादिति भावः। तथा च वह्निमान् धूमादित्यादावेवाव्याप्तिरिति भावः।

धूमनिष्ठसामानाधिकरण्यप्रतियोगितात्वावच्छिन्नातिप्रसक्तत्वेऽपि वह्निवृत्तिप्रतियोगितात्वावच्छिन्नानतिप्रसक्ततया तादृशप्रतियोगितावच्छेदकत्वं वह्नित्वादेर्दुर्वारमित्याशङ्क्याह। कम्बुग्रीवेति। इदं तु गुरुधर्मावच्छिन्नसाध्यके व्यभिचारिण्यतिप्रसङ्गवारणाय गुरुधर्मस्य सम्बन्धप्रतियोगितानवच्छेदकत्वमभ्युपगतमिति तन्मतमनुसृत्यैवाव्याप्त्यभिधानम्। वस्तुतः सम्बन्धप्रतियोगितावच्छेदकत्वं गुरोरपि, अत एव स्वविशिष्टसम्बन्धित्वादिपारिभाषिकावच्छेदकत्वनिरुक्तिरपि सङ्गच्छते। अन्यथा स्वविशिष्टसम्बन्धस्य स्वावच्छिन्नप्रतियोगिकसम्बन्धरूपतया गुरुधर्मे तादृशावच्छेदकताया अप्यनिर्वाहादित्यवधेयम्। अत एव। कम्बुग्रीवादिमत्त्वादिना घटादेरसाध्यतापत्तेरेव। तच्छून्यताया अपीति। गौरवरूपबाधकासत्त्वे एव प्रतियोगितानवच्छेदकस्य तदभावावच्छेदकत्वनियमादिति भावः। इत्युक्तावपि। इत्युक्त्या उक्ताव्याप्तिविरहेऽपि। न निस्तारः। न लक्षणस्यादोषता।

(दी०) अत्र वदन्ति। अप्रतियोगित्वं प्रतियोगितानव-

च्छेदकधर्मवत्त्वम् । न चैवं पूर्वस्मादभेदः, तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य, अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्यात् । घटकयोस्तादृशप्रतियोगितावच्छेदकतत्त्वान्योन्याभावात्यन्ताभावयोर्भेदेन भेद इत्यपि कश्चित् ।

(गा०) साध्यजातीयेति । सजातीयत्वं साध्यतावच्छेदकसाधनतावच्छेदकाभ्याम्, तेन अनवच्छेदकवह्नित्वाद्यवच्छिन्नसमानाधिकरणवृत्तिधूमत्वादेरित्यर्थः । अत एव व्यधिकरणयोरपि सामान्यतो व्याप्तिनिर्वाहात् सामान्यलक्षणानुपगमेऽप्यनुमानोपपत्तिः । साध्यसाधनसामानाधिकरण्यस्य अनवच्छेदकरूपावच्छिन्नत्वसामानाधिकरण्यसाधनतावच्छेदकोभयस्य युक्त्यन्तरेण सामान्यमत्यासत्तौ व्यवस्थापितायां साध्यसाधनव्यक्तिभेदेन भिन्नानामपि व्याप्तीनां तथा युगपज्ज्ञानसम्भवेन सर्वसाधारणैकव्याप्त्यभावाग्रहविरहादिति भावः ।

कश्चिदित्यस्वरसबीजम् । व्यधिकरणयोर्न व्याप्तिरिति ग्रन्थकृतैवानभिधानात्तुकरीत्या भेदस्याऽऽवश्यकत्वम् ।

(चि०) यत्समानाधिकरणान्योन्याभावप्रतियोगि यन्न भवति तेन समं तस्य सामानाधिकरण्यं वा, स्वसमानाधिकरणान्योन्याभावाप्रतियोगियद्वत्कत्वं वा ।

अन्यवृत्तिवह्निमद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वाद् व्यधिकरणवह्निधूमयोर्न व्याप्तिः, किं तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना । न चैवं धूममात्रे न व्याप्तिरिति वाच्यम् । सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् । धूमसम्बन्धिवह्निस्तद्व्याप्य एव । युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव । कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः । यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नात्यन्ताभावविशेषणम् । कर्मणि

च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वम्। न चान्योन्याभावस्याव्याप्यवृत्तित्वम्, अभेदस्याबाधितप्रत्यभिज्ञानात्।

(दी०) अत्यन्ताभावगर्भवत्सामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिद्वयमाह यत्समानाधिकरणेत्यादिलक्षणद्वयेन।

(गा०) अन्योन्याभावगर्भव्याप्तिद्वयाभेदमाशङ्क्याऽऽह। अत्यन्तेति। अत्यन्ताभावगर्भवदिति। अत्यन्ताभावगर्भव्याप्तिद्वयं यथा सामान्यविशेषभेदेनोक्तमित्यर्थः। एतेन सामान्यविशेषभेदेन भेदगर्भव्याप्तिद्वयानभिधाने न्यूनतेति सूचयित्वा उक्तरीत्यैव भेदे ग्रन्थकारस्वरस इति दर्शितम्।

नन्वत्यन्ताभावगर्भलक्षणयोः प्रतियोगितानवच्छेदकावच्छिन्नत्वाप्रतियोगित्वमात्राभिधानेन सामान्यविशेषभावः सूचित इत्यत्रापि तथा भेदेऽभिप्रेते तथाभिधीयेतेति शङ्कया अन्यथा भेदमाह। प्रथमे इति।

(दी०) प्रथमे एकस्य साध्याधिकरणा-शस्याऽऽधिक्याद्द्वितीयलक्षणम्। अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवतस्तत्तत्साध्यवत्त्वस्य च साधनसमानाधिकरणान्योन्याभावप्रतियोगित्वात्तदवच्छेदकत्वाच्चाव्याप्तिः। तथापि यद्रूपावच्छिन्नं तादृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्यम्।

(गा०) आधिक्यादिति। यद्वत्प्रतियोगित्वं तद्वृत्तित्वरूपे प्रथमे साध्यवतोऽप्रतियोगितया सामानाधिकरण्यघटकतया च पृथङ्निवेशः। द्वितीये च अप्रतियोगिसाध्यवद्वृत्तित्वरूपे अप्रतियोगित्वविशेष्यतापन्नस्यैव वृत्तिविशेषणत्वमित्येकधैव तन्निवेश इत्याशयः। इदमुपलक्षणम्। प्रथमे विशिष्टपरामर्शानिर्वाहोऽपि द्रष्टव्यः।

अत्राप्यवच्छेदकत्वमन्तर्भावयितुं यथाश्रुतमाक्षिपति। अत्रेति। नानाव्यक्तिसाध्यकस्थले इति। नानासाधनाधिकरणे यत्र विभिन्न

साध्यं तत्रेत्यर्थः। प्रतियोगित्वावच्छेदकत्वाभावेत्यस्य साध्यवत्साध्यवत्त्वयोर्यथासङ्ख्यमन्वयः। साध्येऽवच्छेदकभेदनिवेशोऽपि न निस्तार इति सूचनाय साध्ये प्रतियोगितावच्छेदकत्वाभिधानम्। अव्याप्तिरिति। यद्यपि एकाधिकरणसाध्यके एतद्रूपवानेतद्रसादित्यादावपि उभयत्वावच्छिन्नभेदप्रतियोगित्वमादाय प्रतियोगित्वघटितलक्षणे यथाश्रुतेऽसम्भव एव सम्भवति। तथापि प्रतियोग्यवृत्तित्वस्य भेदविशेषणत्वोपगमेन तत्र लक्षणसमन्वय सम्भवतीत्याशयः। यद्रूपावच्छिन्नमिति। यत्पदं साध्यतावच्छेदकपरम्। अनवच्छेदकम्। अवच्छेदकत्वात्यन्ताभाववत्। तत्तद्वह्नित्वादिना विशेषान्योन्याभावप्रतियोगितावच्छेदकस्यापि वह्न्यादेरवच्छेदकतानवच्छेदकसामान्यरूपावच्छेदेनावच्छेदकत्वात्यन्ताभाववत्त्वमित्याशयः।

न चावच्छेद्यानवच्छेदकरूपावच्छिन्नेऽवच्छेद्याभावस्योपगमे यद्रूपविशिष्टावच्छिन्ने प्रतियोगित्वाभाव इति विवक्षया यथाश्रुतप्रतियोगित्वाभावघटितलक्षणमेव सुपरिष्कृतमिति कथं तदुपेक्षेति वाच्यम्। अवच्छेदकताया व्यासज्यवृत्तित्वस्य सिद्धान्तसिद्धतया तस्याः स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपमव्याप्यवृत्तित्वमपि सिद्धान्तसिद्धम्। अवच्छेदकैकदेशे पर्याप्तिसम्बन्धेन तदभावसत्त्वादित्यवच्छेदकतापर्याप्त्यनवच्छेदकरूपावच्छिन्नेऽप्यवच्छेदकत्वाभाव स्वीक्रियते इति। प्रतियोगिताया अव्याप्यवृत्तित्वस्यापसिद्धान्त इत्याशयात्।

ननु वह्निसंयोगवान् धूमादित्यादौ साध्यतावच्छेदकवह्न्याद्यवच्छिन्ने तत्तद्वह्निसंयोगादिमदन्योन्याभावप्रतियोगितावच्छेदकत्वसत्त्वादव्याप्तिः। न च तत्तद्वह्नित्वादिविशिष्टवह्न्याद्यवच्छिन्ने तत्सत्त्वेऽपि वह्नित्वविशिष्टवह्न्याद्यवच्छिन्ने तदभाव सुलभ। एकस्यापि विभिन्नविशेषणावच्छिन्नस्य विरोधिद्वयावच्छेदकत्वोपगमादिति वाच्यम्। एवं सति तद्वह्निसंयोगवान् धूमादित्यादावतिव्याप्तेः। तद्वारणाय विशेषितसाध्यतावच्छेदकावच्छिन्नेऽवच्छेदकत्वाभावस्य विवक्षणे उक्ताव्याप्तेर्दुर्वारत्वात्। साध्यतावच्छेदकतावच्छेदकविशिष्टावच्छिन्नस्यानवच्छेदकत्वविवक्षणे चानवच्छिन्नवह्न्यादिसाध्यतावच्छेदककस्थलेऽव्याप्तिरित्यत आह। वह्न्यादाविति।

(दी०) वह्न्यादौ तत्संयोगादौ तद्वदादौ वा साध्ये सर्वत्र साक्षात् परम्परया वा अनुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकम्, तदवच्छिन्नवत्त्वस्य च न तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वमिति । यद्वा यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथायथं वक्तव्यम् । शब्दैक्यस्यानुपादेयत्वात् ।

(गा०) वह्न्यादिसाध्यकस्थले वह्नित्वादेः साक्षादवच्छेदकत्वाभिधानं दृष्टान्तविधया । वह्निसंयोगादौ साध्ये स्वाश्रयप्रतियोगिकत्वरूपपरम्परासम्बन्धो वह्नित्वादेः साध्यतावच्छेदकताघटकः, वह्निसंयोगवत्त्वानित्यादौ च स्वाश्रयप्रतियोगिकसंयोगवत्त्वादिरूप इति नानाविधपरम्परायास्तथात्वसूचनाय तद्वदादावित्युक्तम् । वह्नित्वादेरनुगमकत्वाभिधानेन च तस्य विशेषान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकत्वं तदवच्छिन्ने तादृशप्रतियोगितावच्छेदकत्वाभावोपपादकं दर्शितम् । तादृशेति । हेतुमन्निष्ठेत्यर्थः । अवच्छेदकत्वमितीति । अविशेषिततदवच्छिन्ने एव अवच्छेदकत्वाभावसौलभ्यमिति शेषः । वह्न्यादेर्विधेयतावच्छेदकतया अनुमितौ भानमनुरुध्य कल्पान्तरमाह । यदिति । एकव्यक्तिवह्नित्वादिसाध्यकस्थले एकाधिकरणकहेतुकस्थले च यदनवच्छेदकमिति वक्तव्यम् ।

न च वह्निद्रव्यत्वादित्यादौ जातित्वाद्यवच्छिन्नवह्नित्वादेरवच्छेदकत्वाभावमादाय यथाश्रुतेऽतिप्रसङ्गः । अविशेषितसाध्येऽनवच्छेदकत्वग्रहश्च निर्धर्मितावच्छेदककतया नानुमितिहेतुरिति वाच्यम् । यतोऽविशेषितस्यानवच्छेदकत्वमित्यस्यानवच्छिन्नोऽवच्छेदकत्वाभावोऽर्थः, तस्य च साध्यतावच्छेदकप्रकारेण भासमानेऽपि ग्रहसम्भवः । वस्तुतो यदनवच्छेदकमित्यत्रावच्छेदकभेदस्यैव विवक्षणाप्रोक्तातिव्याप्तिरिति तत्त्वम् । यद्रूपावच्छिन्नम् । अनवच्छिन्नयद्रूपावच्छिन्नम । अनवच्छेदकमिति । अनुगतरूपेण नानाव्यक्तिसाध्यके वह्निमान् धूमादित्यादौ वक्तव्यम् । साध्यतावच्छेदकेऽनवच्छिन्नत्वप्रवेशाज्जातित्वादिविशिष्टवह्नित्वाद्यवच्छिन्नस्यान-

च्छेदकत्वमादाय वह्निमान् द्रव्यत्वादित्यादौ नातिप्रसङ्गः । महानसीयत्वादिसहितवह्नित्वादेर्यंशावच्छेदकतायामवच्छेदकता तत्रापि तत्पर्याप्त्यनधिकरणकेवलवह्नित्वाद्यवच्छिन्नेऽपच्छेदकत्वाभाववृत्तावविरोध इति नाव्याप्तिः । यत्रानुगतैकरूपाविशिष्टनानाव्यक्त्यवच्छिन्नानां साध्यता तत्र यद्रूपविशिष्टसाध्यतावच्छेदकावच्छिन्नस्यानवच्छेदकत्वं तद्रूपविशिष्टावच्छिन्नं व्यापकम् । यत्र च साध्यतावच्छेदकविशेषणमप्यननुगतं तद्विशेषणं त्वनुगतं तत्र यद्रूपावच्छिन्नविशिष्टावच्छिन्नस्यैवानवच्छेदकत्वं तद्रूपावच्छिन्नविशिष्टावच्छिन्नं व्यापकमित्यादिकं यादृशरूपेत्यादिना दर्शितम् । सर्वत्रापि सर्वत्रानवच्छिन्नत्वेन यद्रूपं विशेषणीयम् । तेन नोक्तदोषावकाशः । शब्दैक्यस्येति । साध्यसाधनभेदेन कार्यकारणभावभेदस्याऽऽवश्यकतयेत्यादिः । व्यधिकरणयोर्व्याप्यव्यापकभावविरहे प्रतियोगित्वादित्यन्तहेत्वसङ्गतिमाशङ्कते । यद्यपीति ।

(दी०) अन्येत्यादि । यद्यप्युक्तरीत्या सर्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्यन्तानुधावनस्याऽऽवश्यकत्वेनाकिञ्चित्करमेव तादृशाभावप्रतियोगित्वम् । तथापि विशिष्टसामानाधिकरण्यरूपाया व्याप्तेर्व्यधिकरणासम्भवित्वमात्रे तात्पर्यम् । व्याप्तिरेवेत्यस्य कालिकीत्यादिः ।

(गा०) उक्तरीत्येति । रूपादिनानाव्यक्तिसाध्यके पृथिवीत्वाद्येकव्यक्तिहेतावव्याप्तिवारणानुरोधेनेत्यर्थः । सर्वत्र । लक्षणे । अकिञ्चित्करम् । व्यधिकरणयोर्व्याप्तिघटकसाध्यविशेषणदलविरहाप्रयोजकम् । विशिष्टेति । तादृशप्रतियोगितानवच्छेदकरूपविशिष्टेत्यर्थः । सामानाधिकरण्यरूपाया इत्यन्तं हेतुगर्भविशेषणम् । तथा च यतो न व्याप्तिः साध्यसमानाधिकरणवृत्तिधूमत्वादिरूपा अपि तु साध्यसामानाधिकरण्यरूपैव अतो व्यधिकरणपर्वतीयधूममहानसीयवह्न्योस्तदसम्भवः । सामानाधिकरण्यदलविरहादित्येतावन्मात्रे तात्पर्यम्, सामानाधिकरण्यविरहस्यैव प्रतियोगित्वादित्यन्तेन सूचनात्र तु साध्यविशेषणदलविरहस्य तत्र व्याप्तिविरहप्रयोजकत्वमित्यर्थः ।

दैशिकव्याप्तौ व्याप्यव्यापकयोरुत्पत्तिविनाशयोर्यौगपद्यमप्रयोजकमतः पूरयति । व्याप्तिरेवेत्यस्येति । एवं परस्परमित्यपि पूरणीयम् । व्यापकानन्तरमुत्पन्नस्य तत्सत्त्व एव विनष्टस्यापि व्याप्यत्वादेकदेशि व्याप्यतायामुक्तस्याप्रयोजकत्वात् ।

भेदस्याव्याप्यवृत्तितानिराकरणं प्रकृते सङ्गमयति । अन्योन्याभावेति ।

(दी०) अन्योन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिं निरस्यति । न चेति । अभेदस्येति । तथा च मूले महीरुहो विहङ्गमसंयोगी नेति प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखी विनष्ट इति प्रतीतिवद्विशेषणाभावविषयतामात्रं कल्प्यते, बाधकबलात् । यत्र च विशिष्टभेदे न बाधकं तत्र तथा प्रतीतिबलात्तत्सिद्धिरभ्युपेयैवेति नातिप्रसङ्गः ।

(गा०) अव्याप्तिम् । हेतुसमानाधिकरणभेदे विशेषणान्तरासत्त्वे भेदाव्याप्यवृत्तित्वशङ्काधीनामव्याप्तिशङ्काम् । न्यूनताभङ्गायाव्याप्यवृत्तित्वसाधकतया पूर्वपक्षग्रन्थोपदर्शितां प्रतीतिमन्यथोपपादयति । तथा चेति । अनुभूयमानो विशिष्टभेदोल्लेखो विशिष्टभेदबोधकशब्दाभिलप्यमानविषयकत्वम्, वाक्यार्थज्ञानविधया तादृशवाक्यप्रयोजकत्वं वा यस्यास्तादृश्या इत्यर्थः । विशिष्टाभावोल्लेखिप्रत्ययस्य विशेषणाभावविषयकत्वे दृष्टान्तमाह । शिखीति । इत्यादिप्रतीतिवदिति । इत्याकारिकाया विशिष्टध्वंसोल्लेखिन्या विशेष्याविनाशप्रत्ययस्थलीयप्रतीतिस्तद्वदित्यर्थः । शिखी विनष्ट इत्यादिशब्दोल्लेखिप्रतीतिस्तच्छब्दमुख्यार्थविषयकत्वपरित्यागे बीजमाह । बाधकबलादिति । तच्छब्दमुख्यार्थविरोधिविषयकप्रतीतिबलादित्यर्थः । अत एव गुणो न संयोगीत्यादिप्रतीतेर्विशेषणाभावविषयकत्वप्रतिपन्थनप्रकारो इत्याह । यत्रेति । यत्र यद्धर्मिकप्रतीतौ । विशिष्टभेदे । विशिष्टभेदविषयकत्वे । न बाधकम् । न प्रतीत्यन्तरविरोधः । तथा प्रतीतिबलात् । विशिष्टभेदोल्लेखिप्रतीतिबलात् । तत्सिद्धिः । विशिष्टभेदसिद्धिः । अत्रापि तत्रेत्यनुषञ्जनीयम् । नातिप्रसङ्ग । न गुणादौ विशिष्टभेदासिद्धिप्रसङ्ग ।

भेदस्याव्याप्यवृत्तित्वव्यवस्थापनाय मूलोक्तबाधकं निराकुरुते अभेदस्येतिना ।

(दी०) अत्र वदन्ति । अभेदस्य भेदाभावस्य ज्ञानं न बाधकम्, भेदवत् तत्प्रतियोगितावच्छेदकस्य संयोगात्मनस्तदभावस्याप्यव्याप्यवृत्तित्वेन तदुपपत्तेः । यथा हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञाने तदत्यन्ताभावस्याग्रहादभावव्यवहाराच्च स एव तदभाव इति कल्प्यते; तथा प्रतियोगितावच्छेदकधर्मग्रहे तद्वदन्योन्याभावस्याग्रहादभावव्यवहाराच्च स एव तस्याभाव इति निश्चीयते । आधिक्येऽपि चाव्याप्यवृत्तित्वात् ।

(गा०) अभेदपदेन भेदात्यन्ताभावो भेदस्य वृक्षावृत्तित्वं भिन्नभेदो वा विवक्ष्यते ? तत्राद्यं दूषयति । अभेदस्येति । भेदवत् । भेदस्येव प्रतियोगिनोऽव्याप्यवृत्तित्वे तदभावस्यापि तथात्वे संयोगादिरूपत्वे च न बाधकमिति सूचयितुमेतद्दृष्टान्ताभिधानं स्वमतेन । तदुपपत्तेः । उभयप्रतीत्योरविरोधोपपत्तेः । संयोगिभेदाभावस्य संयोगरूपत्वव्यवस्थापनामाह । यथा हीति । प्रतियोगिनोऽभावाभावत्वविरहेऽपि प्रतियोग्यभावज्ञानयोस्तत्तद्रूपेण परस्परप्रतिबध्यप्रतिबन्धकभावः सम्भवत्येव ग्राह्यभेदेन विपरीतज्ञानप्रतिबन्धकताभेदस्य स्वत्वाननुगमेनाऽऽवश्यकत्वादित्यवधेयमाह । अभावव्यवहाराच्चेति । स एव । प्रतियोग्येव । स एव । प्रतियोगितावच्छेदकधर्म एव । अभावाभावस्यातिरिक्तत्वेऽपि प्रतियोग्यादिज्ञाने तेन हेतुना क्वचित् प्रत्यक्षतया तादृशाभावस्य ज्ञानसम्भवादभावव्यवहारोपपत्तेरभावमात्राभावस्यातिरिक्तत्वमपि सम्भवतीत्याशयेनाह । आधिक्येऽपिचेति । आधिक्ये संयोगिभेदाभावस्य संयोगातिरिक्तत्वे । अव्याप्यवृत्तित्वादिति । संयोगादिरूपप्रतियोगितावच्छेदकधर्मावच्छेदकमात्रावच्छिन्नवृत्तिकत्वोपगमादित्यर्थः ।

(दी०) अत एव न मूलावच्छेदेन कपिसंयोगिभेदाभावज्ञानं तथा । असम्भवादसिद्धेश्च । नापि कपिसंयोगिभेदस्य तत्रासत्त्वज्ञानम् । असिद्धेः, तद्वृत्तित्वस्यैव ग्रहात् । नापि

कपिसंयोगिभिन्नभेदज्ञानम् । कपिसंयोगिभेदवत्तद्भेदस्याप्य-व्याप्यवृत्तित्वेनाविरोधात् । नापि मूलावच्छेदेन तज्ज्ञानम् । असिद्धेः । तद्धर्मवद्भिन्नभेदस्य तद्धर्ममात्रपर्यवसिततया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे विरोधाच्च । न हि घटभिन्नभेदो घटत्वादतिरिच्यते, अवश्यक्लृप्तघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात् । अन्यथा सर्वत्राभावस्याभावो अतिरिक्त एव कल्प्येत ।

(गा०) अतएव । कपिसंयोगिभेदाभावस्य कपिसंयोगावच्छेदकमात्रावच्छिन्नकपिसंयोगाद्विरूपत्वादेव । न तथा । न एकावच्छेदेनाभावविषयकत्वेन बाधकतया वक्तुं शक्यम् । संयोगरूपत्वपक्षेऽसम्भवादिति । मूलावच्छेदेन कपिसंयोगस्याध्वृत्तेर्भवन्मतेऽपि तादृशज्ञानासम्भवादित्यर्थः । अतिरिक्ततामते आह । असिद्धेश्चेति । मयाऽनभ्युपगमादित्यर्थः । द्वितीयं दूषयति । नापीति । असिद्धिं विवृणोति । तद्वृत्तित्वस्येति । प्रह्वात् । प्रह्वोपगमात् । तृतीयं दूषयति । नापीति । अव्याप्यवृत्तित्वेन । अव्याप्यवृत्तित्वोपगमेन । अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्येवास्माकमप्यव्याप्यवृत्तित्वादिति भावः ।

तज्ज्ञानम् । भिन्नभेदज्ञानम् । असिद्धेरिति । कपिसंयोगावच्छेदकमात्रावच्छेदेन तदुपगमादिति भावः । तस्य कपिसंयोगरूपतया भवतोऽपि मूलावच्छेदेन तज्ज्ञानासम्भव इत्याह । तद्धर्मेति । तद्धर्ममात्रपर्यवसिततया । तद्धर्मात्मकतानियमेन । एतच्च कपिसंयोगिभिन्नभेदकपिसंयोगयोरतादात्म्ये हेतुः । मूलवृत्तित्वविरोधात् । मूलावच्छिन्नत्वविरहात् । उपदर्शितसामान्यनियममेव दृष्टान्तेन द्रढयति । न हीति । एतदेवासिद्धमित्यत आह । आवश्यकेति । भावेन कथमभावव्यवहाराद्युपपत्तिरित्याशङ्कामपाकर्तुमाह । अन्यथेति । अत्यन्तान्योन्याभावयोरभावावपि प्रतियोगितत्वावच्छेदकाभ्यामतिरिच्येयातामित्यर्थः । तथा चाभावाभावस्यानतिरिक्ततावादिनां सिद्धान्तानुरोधिनामभावत्वं न भावभिन्नत्वं तन्नियतं वा, किं तु भावसाधारणः स्वरूपसम्बन्धविशेष एवेति भेदावच्छिन्नभेदस्य भेदप्रतियो-

गितावच्छेदकरूपत्वे न किञ्चिद्बाधकमिति भावः ।

भेदस्याव्याप्यवृत्तिता प्रकारान्तरेण निराकुर्वाणस्य यस्य कस्य-चिन्मतमाशङ्क्य निराकरोति । अत एवेति ।

(दी०) अत एवात्यन्ताभावप्रतियोगिनोरन्योन्याभावप्रतियोगितावच्छेदकयोः सामान्यत एव क्लृप्तो विरोधः । तत्र कपिसंयोगवत्यपि वृक्षे मूले न कपिसंयोग इति प्रतीतेरन्यथानुपपत्त्या तावदाश्रययोः स सङ्कोच्यताम्, न ह्येषा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुं शक्या, नियमतः संयोगत्वेन प्रतियोगिनोऽनुपस्थितेः, प्रतियोगिकोटौ तदनुल्लेखाच्च । मूले न कपिसंयोगीति प्रतीतेस्तु शिखी विनष्ट इतिवद्भासमानविशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वाच्चान्तिमयोरपीति परास्तम् ।

(गा०) अत एव । वक्ष्यमाणदूषणादेव । सामान्यत । सकलात्यन्ताभावान्योन्याभावसाधारणरूपेण । तत्र । तयोर्विरोधयोर्मध्ये । अन्यथानुपपत्त्या । अन्यविषयकतयोपपादनासम्भवेन । आश्रययो । अत्यन्ताभावप्रतियोगिनो । स । विरोध । सङ्कोच्यताम् । संयोगाद्यभावव्यावर्त्तकविशेषगर्भोऽस्त्वित्यादि । एतेन संयोगात्यन्ताभावव्याप्यवृत्तित्वप्रतिपादिनिरासः कृत । अन्यथोपपत्तिमाशङ्कते । न हीति । नियमत इति । तादृशप्रतीतिपूर्वमिति शेष । संयोगत्वेनेति । तथा चाभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकबुद्धहेतुतया संयोगप्रकारकोपस्थितेः प्रागसत्त्वेन जायमानायास्तादृशप्रतीतेर्न तदवच्छिन्नभेदविषयकत्वसम्भव इति भाव । तस्योपस्थितिविरहदशायां तादृशप्रतीतेरपलाप सम्भवतीत्याशङ्क्य दूषणान्तरमाह । प्रतियोगिकोटाविति । तदनुल्लेखात् । संयोगवतोऽभानात् । तथा च न तद्दश अभावप्रतियोगित्वावगाहन सम्भवतीति भाव । भासमानविशेषणस्येति । प्रतियोगिकोटौ भासमानस्य संयोगस्येत्यर्थं । भासमानेत्यनेन पूर्वत्र विशेषो दर्शितः । अन्तिमयोरपि । अन्योन्याभावप्रतियोगितावच्छेदकयोर-

पि । न सङ्कोच्यतामित्यनुपज्यते । तथा च बाधकप्रतीतिविरहे- ऽपि विरोधसङ्कोचे प्रथमावधारणस्य भ्रमत्वकल्पनप्रसङ्गरूपबाध- कबलादेव दर्शितप्रतीतेर्विशेषणात्यन्ताभावविषयकत्वमिति न तद्व- त्त्वादन्योन्याभावाव्याप्यवृत्तित्वमिति भावः ।

सामान्यतो विरोधस्य क्लृप्तत्वमेव निराकुरुते ।

(दी०) अन्योन्याभावान्तरस्य प्रतियोगितावच्छेदकान्तर- समानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकासामानाधि- करण्यपर्यवसायिनो विरोधस्य स्वस्वघटितत्वेन विशेषे एव विश्रामात् । अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियो- गितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेन प्रतिरुद्धतया तथाविधविरोधकल्पनाया अनवकाशाच्च ।

(गा०) अन्योन्याभावान्तरस्येति । एकस्यान्योन्याभावस्या- न्यदीयप्रतियोगितावच्छेदकसमानाधिकरणतया तत्तदन्योन्याभावे तत्तत्प्रतियोगितावच्छेदकासामानाधिकरण्यरूप एव विरोधः क्लृप्तः । तथा च तत्तदभावत्वरूपाननुगतधर्माणामेव विरोधितावच्छेद- कत्वम्, न तु घटभेदत्वयोगिभेदादिसाधारणैकधर्मस्येत्यर्थः । तथा च न प्राथमिकनियमावधारणस्य भ्रमत्वप्रसङ्ग इति भावः ।

नन्ववच्छिन्नप्रतियोगिताकत्वविशिष्टसामानाधिकरण्यसम्बन्धेन धर्मविशिष्टान्यत्वमेव भेदस्य सामान्यतः प्रतियोगितावच्छेदक- विरोधः सुवच । न च सामानाधिकरण्यघटकसम्बन्धद्वयनि- वेशस्याऽऽवश्यकत्वादिदमपि न सर्वसाधारणमिति वाच्यम् । स्वनिरूपकत्वस्वावच्छेदकताघटकसम्बन्धावच्छिन्नस्वावच्छेदका- धिकरणतावच्छेदकावच्छिन्ना या स्वावच्छेदकवत्ताग्राहविरोधिता- वच्छेदकसम्बन्धेन वृत्तिस्तदवच्छेदकत्वोभयसम्बन्धेन प्रतियो- गिताविशिष्टान्यानुयोगितात्वमेवानुगतम् अन्योन्याभावनिष्ठ विरो- धित्वम् । द्वित्वावच्छिन्नप्रतियोगितानिरूपितभेदनिष्ठानुयोगितायां द्वित्वावच्छिन्नप्रतियोगितावैशिष्ट्यसत्त्वाद्विरोधानुपपत्तिवारणाय 'स्वाधिकरणवृत्तितावच्छेदकत्वमुपेक्ष्य स्वावच्छेदकाधिकरणताव- च्छेदकत्वनिवेशः। गोत्वाभावाधिकरणकगोत्वाभावस्वरूपघटभेदस्य

मत्त्वृत्तित्वाद्विरोधानुपपत्तिवारणायाभावे प्रतियोगितावच्छेदकाधिकरणवृत्तित्वमुपेक्ष्य अनुयोगितायां तदवच्छेदकत्वं निवेशितमित्यवच्छेदकविरोधानुभवप्रतिरोधेन सामान्यतो विरोधकल्पनैव न सम्भवतीत्याह । अत्यन्ताभावेति ।

बाधकसत्त्वमभ्युपेत्यापि दृष्टान्तवैधर्म्यं प्रदर्शयन् संयोगीति प्रतीतेर्विशेषणसंसर्गाभावविषयकत्वं निराकरोति । किञ्चेति ।

(दी०) किञ्च शिखी विनष्ट इति प्रतीतेर्विशिष्टध्वंसोल्लेखिन्या विशेष्ये तद्बाधादास्तां विशेषणध्वंसविषयता, न संयोगीति प्रतीतेर्विशिष्टभेदमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयकत्वेनोपपत्तिः । न खलु सहस्रेणापि बाधकैरिदं रजतमिति प्रतीतेरङ्गत्वावलम्बनं व्यवस्थापयितुं शक्यते । न च विशेषणभेद एव तस्या विषयः । अग्रेऽपि न कपिसंयोगीति प्रतीत्यापत्तेः ।

(गा०) तद्बाधात् । ध्वंसप्रतियोगित्वबाधात् । आस्तां विशेषणध्वंसविषयतेति । तावतापि ध्वंसविषयकत्वमव्याहतमेवेति भावः । ननु तावतापि ध्वंसे विशिष्टधर्मिप्रतियोगिकत्वस्य बाधितस्यावगाहनात्तादृशप्रतीतेर्न प्रमात्वोपपत्तिः, तदवगाहित्वानुभवापलापे च मूले न संयोगीति प्रतीतेर्भेदावगाहित्वानुभवापलापः किं पाणिपिहित इत्यत आह । न खल्विति । इति प्रतीतेः । इत्याकारिकाया रङ्गविषयकप्रतीतेः । शक्यते इति । अपि तु तस्या भ्रमत्वमेव कल्प्यते इति शेषः ।

अयं भावः । यादृशप्रतीतेर्यादृशव्यवहारजनकत्वं तस्या एव तदाकारता रङ्गत्वविषयकप्रतीतितश्च न रजतमिदमिति व्यवहारः, अपि त्विदं रङ्गमित्येव, अतो रङ्गे इदं रजतमिति प्रतीते रजतत्वावगाहितामन्तरेण इदं रजतमिति व्यवहारजनकत्वासम्भवात् तस्यास्तदवगाहित्ववद् वृक्षो न कपिसंयोगीति व्यवहारजनकप्रतीतेस्तादृशवाक्यप्रतिपाद्यसंयोगिभेदविषयकत्वमावश्यकम् । तादृशवाक्यस्यानुयोगिवाचकपदोत्तरसप्तमीविरहेण संयोगसंसर्गाभावाबोधकत्वात्, संयोगिभेदावगाहनमन्तरेण प्रतीतेः संयोगिभेदबोधक-

वाक्यप्रयोजकत्वासम्भवात् । शिखी विनष्ट इत्यादिशब्दाच्च शिखायामपि नाशप्रतियोगित्वस्य मत्वर्थीयार्थाविवक्षयान्वयोपपादनस्य शक्यतया तदाकारकप्रतीतेः शिखाप्रतियोगिकनाशविषयकत्वसम्भवः । विशेषणसंसर्गाभावविषयकत्वासम्भवेऽपि शिखी विनष्ट इत्यादिप्रतीतेर्विशेषणनाशविषयकत्ववत् प्रकृतप्रतीतेर्विशेषणभेदविषयकत्वं सम्भवति बाधकबलादिति न विशिष्टभेदस्याव्याप्यवृत्तितासिद्धिस्तत्रेति शङ्कते । न चेति ।

प्रत्यक्षादिप्रतीतेरपि तन्मूलकव्यवहारबलेन विषयव्यवस्थापकतेत्यालोच्य व्यवहारबलेनैवान्योन्याभावस्याव्याप्यवृत्तितां साधयितुमुपक्रमते । युज्यते चेति ।

(दी०) युज्यते चान्योन्याभावोऽव्याप्यवृत्तिः, कथमन्यथा पक्वतादशायां घटादावयं न श्यामो, दण्डादिविनाशसमये चैत्रादौ नायं सदण्डवानित्यादयो व्यवहाराः । न च तत्र विशेषणसंसर्गाभाव एव प्रतीयते, अनुयोगिनि सप्तमीं विना तदनुपपत्तेः । न खलु भूतलं न घट इत्यादीनि वाक्यानि कदाचिदपि घटसंसर्गाभावं बोधयन्ति । तथात्वे वा घटो न घट इत्यादेरपि प्रसङ्गात् ।

(गा०) पक्वतादशायामित्यादिसप्तमीद्वयं व्यवहारान्वयिविषयत्वार्थकं न त्वधिकरणत्वार्थकम्, अन्यकालीनतथाविधव्यवहाराणामपि प्रकृतसाधकत्वात् । एवं च व्यवहाराकारे उभयत्रावच्छेदककालबोधकपदं पूरणीयम् । इत्यादय इत्यादिपदाद्देशिकाव्याप्यवृत्तित्वसाधकानां मूले नायं कपिसंयोगीत्यादिव्यवहाराणां परिग्रहः । इदानीमयं न श्याम इत्यादौ इदानीं यः श्यामस्तद्भेदः प्रतीयते इत्युक्तिसम्भवात् स्थलान्तरानुधावनम् । तद्दण्डनाशसमये च तद्दण्डवतोऽप्रसिद्ध्या तत्र नाय प्रकारः सम्भवतीति भावः । अत एव च तद्दण्डपरित्यागमुपेक्ष्य तन्नाशानुधावनं तद्दण्डपर्यन्तानुसरणं च । अनुयोगिनीति । अनुयोगिबोधकपदे इत्यर्थः । तदनुपपत्तेः । संसर्गाभावप्रतीत्यनुपपत्तेः । नञ्पदजन्यत-

वनुयोगिकससर्गाभावबोधे तेन सम संसर्गाभावस्याऽऽधाराधेय-भावः प्रकारतयैव भासते इति नियमेन तदुपस्थापकविभक्तेरपे-क्षितत्वादिति भावः ।

ननु नञर्थसंसर्गाभावे आधाराधेयत्वस्य प्रकारतानियमस्यां-सिद्धा सप्तमीं विनापि प्रकृते श्यामरूपादिसंसर्गाभावस्य घटा-दौ सम्बन्ध संसर्गमर्यादया ऽवगाह्य प्रत्ययः स्यादित्येत आह । न चेति । तथा च तादृशनियमानङ्गीकारे भूतलं न घट इत्या-दितोऽपि आधाराधेयभावसंसर्गकाभावबोधः स्यादिति भावः । न च तादृशनियमस्वीकारे ऽपि न कथमियमापत्ति, सामग्रीसत्वे नियमभङ्गापत्तेः कार्योत्पत्तिविरोधित्वासम्भवादिति वाच्यम् । तादृशनियमवादिनां फलाभावेन नञ्समभिव्याहारज्ञानघटिता-याम्तादृशबोधसामग्र्या एवाकल्पनत्वात् । उक्तस्थले विशेषणस-सर्गाभावप्रतीतिमङ्गीकुर्वतैव नञ्पदघटितसामग्र्यास्तादृशबोधेत्प-त्तिप्रयोजकताया वाच्यत्वात् ।

ननु प्रामाणिकैर्भूतल न घट इत्यादिवाक्यं प्रयुज्यते एव, ततश्च तात्पर्यसत्वे संसर्गाभावप्रतीतिरिष्टैवेत्यत आह । तथात्वे चेति । तथात्वे । तत्र संसर्गाभावबोधकत्वोपगमे । प्रसङ्गात् । प्रामाणिक-प्रयोगप्रसङ्गात् । घटादौ घटादिसंसर्गाभावस्याबाधितत्वात्तस्य च प्रागुक्तवाक्येन बोधसम्भवादिति भावः ।

ननु आधाराधेयभावसंसर्गकसंसर्गाभावबोधने इतरविशेषण-तया स्वार्थान्वयपरपदजन्यप्रतियोग्युपस्थितिरपेक्ष्यते, भूतलं न घट इत्यादौ च तदभावान्नापत्तिः । न चैवमपि नाय तद्दण्डवानित्यादौ धर्मिणोऽनन्वयन तद्विशेषणतया स्वार्थान्वयबोधपरस्य प्रतियोगि-वाचकपदस्य न सम्भवतीति कथं प्रकृतोपपत्तिरिति वाच्यम् । तत्र तद्दण्डवानयमिदानीं तद्दण्डाभाववानित्येव बोधोपगमेन धर्मिणोऽपि प्रवेशात् । यत्र धर्मिणि तद्दण्डस्तत्र न कदापि तत्र विशिष्टभेदबोध-स्यैव स्वीकारात् तावता अन्योन्याभावस्याव्याप्यवृत्तित्वासिद्धि-रित्याशङ्क्याह । अपि चेति ।

(दी०) अपि च विशिष्टवाचकदण्ड्यादिपदेभ्यो धर्म्युपस्थ-जनतयोपस्थितस्य दण्डादेः कथं प्रतियोगित्वेनाभावेऽन्वयः ? इ-

तरविशेषणतयोपस्थापितस्य निराकाङ्क्षतयाऽन्यत्र विशेषणत्वेनान्वयायोगात् ।

(गा०) विशिष्टेति । विशिष्टपरदण्ड्यादिपदान्तर्गतदण्डादिपदेभ्यो धर्मिविशेषणतया स्वार्थान्वयपरेभ्य उपस्थितस्येत्यर्थः । एतेन पदार्थोपस्थितौ पदार्थस्य प्राधान्येन भानेऽपि नासङ्गतिः । प्रतियोगित्वेन प्रतियोगिविधया । अनुयोगितासम्बन्धेन विशेषणविधयेति यावत् । इतरविशेषणतयोपस्थापितस्य । एकपदार्थविशेषणतया स्वार्थान्वयपरपदभिन्नपदानुपस्थापितस्य । अन्यत्र । तत्पदानुपस्थितांशे । विशेषणतयाऽन्वयस्य निराकाङ्क्षतयाऽयोगादित्यर्थः ।

अथैतादृशव्युत्पत्तिकल्पनं निरर्थकम् । न च दण्डिनो रूपमित्यादौ सम्बन्धिविशेषणतया भासमानदण्डादेर्विभक्त्यर्थविशेषणतया भानवारणाय उक्तव्युत्पत्तिकल्पनमावश्यकमिति वाच्यम् । प्रकृत्यर्थैकदेशे न प्रत्ययार्थस्यान्वय इति व्युत्पत्त्यन्तरविरोधेन तादृशातिप्रसङ्गस्याप्यनवकाशात् । दण्डिनावित्यादौ दण्डादेर्द्वित्वाद्यन्वयवारणाय तादृशव्युत्पत्तेरावश्यकत्वात् । न च तदकल्पने वह्निमानास्तीत्यादौ वह्न्यादेरभावविशेषणतयाऽन्वयापत्तिरिति वाच्यम् । प्रतियोगिपदादन्ययदन्यत्कारकादपि । वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते । इति व्युत्पत्त्यन्तरविरोधेनैव तादृशान्वयबोधाप्रसक्तेः । समासस्येव तद्धितान्तस्यापि वृत्तिशब्दत्वात् । पर्वतस्य वह्निमानित्यादौ पर्वतसम्बन्धादेर्वह्न्यादावन्वयवारणाय तादृशव्युत्पत्त्यन्तरकल्पनस्याऽऽवश्यकत्वादिति चेत् ? राज्ञः पुत्रधनमित्यादौ धनांशविशेषणपुत्रादिविशेषणतया विवक्षितस्य राजसम्बन्धादेर्धनादिविशेषणतयाऽन्वयवारणायोक्तव्युत्पत्तिकल्पनमावश्यकम् । एवं राजपुरुषादिपदानां यत्र द्वन्द्वस्तत्र समासघटकपूर्वपदार्थेऽपि प्रत्ययार्थान्वयात् प्रकृतित्वघटकमव्यवधानं प्रत्ययान्तरव्यवधानाभावरूपं वाच्यम् । तथा च तत्पुरुषस्थपूर्वपदोपस्थाप्येऽपि समुदायोत्तरषष्ठ्याद्यर्थस्यान्वयवारणाय तदावश्यकत्वम् । न च प्रतियोगिपदादित्यादिव्युत्पत्तिविरोधेनैव न तदन्वयप्रसक्तिरिति वाच्यम् । समस्यमानपदार्थान्वये एकदेशान्वयित्वविरहात् । अन्यथा द्वन्द्वोपस्थापितसकलपदार्थानां विभक्त्यर्थान्वयानुपपत्तेरिति भावः ।

अथ घटपटावित्यादौ घटादिविशेषणतया स्वार्थान्वयपरद्विवचनाद्युपस्थाप्यसंख्यादेः, चैत्रस्य घटपटावित्यादौ तथाविधचैत्रसम्बन्धादेश्च पदार्थे विशेषणतयाऽन्वयो निर्विवाद इति कथमुक्तव्युत्पत्तिकल्पनम्? न च स्वविशेषणविशेषणतयोपस्थापितस्य साक्षात्स्वविशेषणतयाऽनन्वय इत्येव व्युत्पत्तिः। अत्राप्युपस्थापितार्थः पूर्ववन्निष्कर्षणीयः। इत्थं च चैत्रस्य घटपटौ पश्यतीत्यादौ कर्मत्वादिविशेषणतया भासमानघटादिविशेषणस्य द्वित्वचैत्रसम्बन्धादेः घटादिविशेषणत्वे न बाधकं घटादेः पदार्थविशेषणत्वात् प्राथमिकविशेषणद्वयं साक्षात्परम्परासाधारणमिति वाच्यम्। एवं सति नाथ तद्दण्डवानित्यादौ अभावांशे दण्डिनो विशेषणत्वानुपगमे दण्डस्य तद्विशेषणतया अन्वये बाधकविरहादुक्तव्युत्पत्तेः प्रकृतानुपयोगप्रसङ्ग इति चेत्। न। एकविशेषणतया स्वार्थबोधकपदमन्यत्र पृथग् विशेषणतया न तद्बोधकमित्येव व्युत्पत्त्यङ्गीकारात्। घटपटावित्यादौ विभक्त्यर्थद्वित्वादेरेकधर्मावच्छिन्नविशेषणतया भानेनाविरोधात्। राज्ञः पुत्रधनमित्यादौ तत्पुरुषे च पुत्रधनाद्योरेकधा राजसम्बन्धादेर्नान्वयबोधप्रसङ्गः। तादृशान्वयबोधे तयोरेकांशे अपरविशेषणकबोधपरत्वग्रहस्य विरोधित्वादिति। आकाङ्क्षा जिज्ञासारूपाऽन्वयबोधाङ्गम्, तत्र च पदविशेषजन्योपस्थितिः कारणमिति मतानुसारेण निराकाङ्क्षत्वमभिहितम्। आनुपूर्वीविशेषस्याऽऽकाङ्क्षात्वपक्षे तु निरुक्तपदभिन्नपदजन्योपस्थितिरूपकारणविरहो हेतुर्बोध्यः।

यत्तु न दण्ड इत्यानुपूर्वीविरह एव तत्र निराकाङ्क्षतेति। तदसत्। तथा सतीतरविशेषणतयोपस्थितिकथनस्यानुपयोगित्वापत्तेः। तादृशानुपूर्व्या दण्डादिसंसर्गाभावबोधप्रयोजकत्वे दण्डादिपदस्य मत्वर्थविवक्षया दण्डादिपरत्वेऽपि दण्डादिसंसर्गाभावबोधनिर्वाहेणाप्रसङ्गानुपस्थितेः।

दण्डादिपदस्य विशेषणमात्रपरत्वे आधाराधेयभावस्य प्रकारतानुरोधेन संसर्गापेक्षामनवद्यान शङ्कते। न चेति।

(२१०) न चात्र विशिष्टोपस्थापकं पदं विशेषणमात्रपरम्। तथा सति चैत्रो न दण्डो घटो न श्यामं रूपमित्यादावपि दण्डा-

दिसंसर्गाभावप्रतीत्यापत्तेर्दुर्वारत्वात् । एतेन नञोऽभाववल्लाक्षणिकतया विनैव सप्तमीमन्वयबोधसमर्थनं प्रत्युक्तम् । एवं च चैत्रो न पचतीत्यादावाख्यातार्थकृत्या लक्षणया वोपस्थितस्य कर्त्तुरेव भेदो भासते इत्यस्तु ।

(गा०) विशेषणमात्रपरमिति । तथा च दण्डादेर्निरूकस्यैतद्विशेषणतयोपस्थितत्वस्याभावान्न तत्र संसर्गाभावबोधे दर्शितव्युत्पत्तिविरोध इति भावः । एवं च सति सप्तम्यपेक्षां स्मारयति । तथा सतीति । तथा सति, अधिकरणसंसर्गाभावयोः संसर्गस्य संसर्गतया भानोपगमे इत्यर्थः । संसर्गाभावबोधप्रसङ्गादिति । विशेषणमात्रपरदण्डचादिपदेभ्यो दण्डादिपदस्याविशेषादिति भावः । इदमुपलक्षणम् । मत्वर्थाविवक्षायां मतुपोऽसाधुत्वापत्तिरित्यादि दूषणमपि द्रष्टव्यम् ।

एतेन । चैत्रो न दण्ड इत्यादौ दण्डादिसंसर्गाभावबोधप्रसङ्गेन । विनैव सप्तमीमिति । नञर्थसंसर्गाभावेन सममनुयोगिन्याधाराधेयभावबोधे एव सप्तम्यपेक्षा नञर्थेन संसर्गाभावेन सममाधाराधेयभावस्य प्रकारतयैव भाननियमात् । नञर्थसंसर्गाभाववता ऽभेदान्वयबोधे तु न इत्याद्यर्थेनेति भावः । प्रत्युक्तमिति । न दण्डीत्यादौ मत्वर्थविवक्षायामितरविशेषणतयेत्यादिव्युत्पत्तिविरोधेन दण्डादेरभावान्वयासम्भवात् । तदविवक्षायां नञः संसर्गाभावप्रदर्थकत्वेऽपि प्रतियोगिवाचकपदसमानविभक्तिकानुयोगिवाचकपदेन नाभावबोधोपयिकाकाङ्क्षाकल्पनं तत्र सम्भवति उक्तातिप्रसङ्गस्य दुर्वारत्वादिति भावः । यद्यपि न दण्डीत्यत्र मत्वर्थाधिकरणानुयोगिकप्रकृत्यर्थदण्डादिप्रतियोगिकसंसर्गाभावस्यापि नञा बोधनं सम्भवति, न कलञ्जं भक्षयेदित्यादौ नानुपसृत्य प्रादुर्भावादित्यादौ च प्रकृतिप्रत्ययार्थयोरन्तरा नञर्थप्रवेशस्य दृष्टचरत्वात् । तथापि न श्याम इत्यादावगतेरित्येति ध्येयम् ।

ननु न पचति चैत्र इत्यादौ पाककृत्यादिसंसर्गाभावस्याऽऽश्रयताख्यसम्बन्धेनान्वयान्नञर्थसंसर्गाभावे आधाराधेयभावः प्रकारतयैव भासते इति नियमासिद्धा सप्तम्यपेक्षा कथं प्रकृते इत्यत आह । एवं चेति । एवं च, उक्तातिप्रसङ्गवारणाय संसर्गाभावबोधे सप्त-

ष्या नियमेनापेक्षितत्वे च । शास्त्रेति वैयाकरणमते, लक्षणयेति स्वमते । कर्तुरेवेत्येवकारेण कृतिसंसर्गाभावो व्यवच्छेद्यः । लक्षणां विनापि स्वमतं उपपादयति । वस्तुत इति

(दी०) वस्तुतो न पचति चैत्रो नेदं चैत्रस्येत्यादौ विभक्त्यर्थस्य कृतिसम्बन्धादेरभावान्वयबोधे नञा सप्तमी नापेक्ष्यते, अपेक्ष्यते च प्रातिपदिकार्थस्येति निपुणतरमुपपादयिष्यामः ।

(गा०) द्विविधविभक्त्यर्थाभावबोधे एव सप्तम्यपेक्षा नास्तीति दर्शयितुं न पचतीत्यादिस्थलद्वयकथनम् । आदिपदाभ्यां पटो न, दण्डादित्यादिस्थलीयजन्यत्वाद्यभावबोधपरिग्रहः । प्रातिपदिकार्थस्य अभावबोधने इत्यनुषज्यते इति । उपपादयिष्याम इत्यनुवादे प्रतियोग्यभावौ तुल्ययोगक्षेमावित्यादिना । तदुपपत्तिप्रकारश्च यत्र नञोऽसत्त्वे प्रतियोग्यनुयोगिनोः सम्बन्धः प्रकारतयैव भासते तत्र तदुपस्थापकविभक्त्यपेक्षानियमः । प्रथमान्तपदाद्युपस्थापिते आख्यातार्थस्य सम्बन्धः संसर्गतया भासते इति तदभावस्यापि तथा भासत इति न तदुपस्थापकविभक्त्यपेक्षेति ।

अन्योन्याभावस्य व्याप्यवृत्तितानियममुपपादयतां मतमाह । नञ इति ।

(दी०) नञो वैधर्म्यपरतया न श्याम इत्यादेः श्यामादिविधर्मेत्यर्थः । वैधर्म्यं च रक्तत्वादिकमेव । यदाहुराचार्याः—श्यामाद्रक्तो विधर्मा, न तु पृथगित्यपि वदन्तीति कृतं पल्लवितेन ।

(गा०) वैधर्म्यपरतयेति । वैधर्म्यं तदवृत्तिधर्मवत्त्वम्, तत्र च शक्तिर्लक्षणा वेत्यन्यदेतत् । वैधर्म्यप्रतियोगिनोऽन्वलम्यतया तदन्तर्भावेणाऽऽधेयत्वप्रतियोगिकाभाववति अतिप्रसङ्गनाधेयत्वसामान्याभाववति च श्यामादिवृत्तित्वाभावस्याप्रत्ययप्रसङ्गेन नञो वृत्त्यनुपपत्तावपि न क्षतिः । वृत्त्यभाववति च गगनादौ वृत्तित्वयोग्यताभावात् । ननु पक्वनाशदशायां श्यामरूपाभाववत्यपि घटे न श्यामवैधर्म्यमस्त्येव स्वस्मिन् स्ववैधर्म्याभावात् । वैधर्म्यस्य भेदनियतत्वादिति शङ्कायां विशिष्टवैधर्म्यं न भेदनियतमिति समाधत्ते । वै-

धर्म्यं चेति । श्यामादिवैधर्म्यं चेत्यर्थः । रक्तत्वादिकमेवेति । रक्तत्वादेः श्यामरूपानुपलक्षितवृत्तित्वेऽपि तद्विशिष्टवृत्तित्वादिति भावः । न च श्यामरूपविशिष्टवृत्तित्वं श्यामरूपावच्छिन्नाधिकरणताकत्वाभाववत्त्वं तल्लाभश्च न न श्याम इत्यतः सम्भवति, पदार्थैकदेशस्य धर्म्युपसर्जनतया च उपस्थितस्य श्यामरूपस्याधिकरणत्वे विशेषणतया अन्वयासम्भवादिति वाच्यम् । धर्मिणः श्यामरूपावच्छिन्नत्वसम्बन्धेनान्वयोपगमादेव तल्लाभसम्भवात् ।

स्वस्मिन् विशिष्टवैधर्म्यमाचार्याणामनुमतमित्याह । यदाहुरिति । एवं च मूले न कपिसंयोगी वृक्ष इत्यादिप्रतीतेरपि संयोगादिविशिष्टवैधर्म्यमेव विषयः तच्च कपिसंयोगाद्यभाव एव तस्य कपिसंयोगाद्यवच्छिन्नावृत्तित्वात् । विभिन्नकालावच्छेदेनैव विभिन्नदेशावच्छेदेनापि वर्तमानयोरेकाधिकरणतायामपरस्यानवच्छेदकत्वादिति नोक्तप्रतीतिबलाद्दैशिकमव्याप्यवृत्तित्वं भेदस्येत्यवधेयम् ।

(चि०) व्याप्यव्यापकभावाज्ञानेऽपि वस्तुसतस्तथात्वेनाज्ञायमानस्य सम्बन्धत्वेनैव भानस्य षष्ठ्यर्थत्वम् । न चैवमननुगमो दोषाय, कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात् । अथ धूमवति वह्निह्रदौ न स्तः, धूमवान् वह्निमद्ध्रदौ न भवतीति प्रतीतिर्व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योन्याभावौ धूमवति विषयौ इति कथमेते लक्षणे इति चेन्न । तादृशाभावानभ्युपगमात् । अभ्युपगमे वा तत्र तदुभयं प्रतियोगि न वह्निवह्निमन्तौ ।

(गा०) मूले व्याप्यव्यापकभावाज्ञानेऽपीति । निरुक्तव्याप्तित्वव्यापकत्वाभ्यां व्याप्तिव्यापकत्वयोरज्ञानेऽपीत्यर्थः । वस्तुसतः । वस्तुगत्या यो व्याप्यव्यापकभावस्तस्य । तथात्वेन । व्याप्तित्वादिना । अज्ञायमानस्य । अविशेषितस्य । षष्ठ्यर्थत्वम् । समासविवरणवाक्यस्थषष्ठ्या प्रतिपत्तिः । सम्भवतीति शेषः । व्याप्यव्यापकभावस्य विशेषणानवच्छिन्नस्य शब्दात् प्रतिपत्तिः सम्भवयन्नाह ।

सम्बन्धत्वेनैवेति । भातस्य । अवच्छिन्नस्य । अतो निरुक्तव्याप्त्यादिना व्याप्त्यादिज्ञाने तेन रूपेण तज्ज्ञानापेक्षाविरहादात्माश्रयादिरिति भावः ।

सम्बन्धत्वस्य नियमघटितत्वमाशङ्क्याऽऽह । निरूपितेति ।

(दी०) सम्बन्धत्वेनेति । निरूपितत्वमेतत् । कस्येति । इत्थं चाननुगताया अपि व्याप्तेर्ज्ञानं यथाऽनुमितिहेतुस्तथा वक्ष्यते । एते । अन्योन्याभावात्यन्ताभावगर्भे ।

(गा०) सम्बन्धत्वं विशेष्यत्वादिभिन्नविषयताकं पदार्थान्तरं वा तच्च नियमाघटितमेवेति भावः । तत्त्वमस्य निरूपितमित्यर्थः । मूले न चैवमननुगम इति । एवम् । साध्यादिविशेषघटितनिरुक्तधर्मस्य व्याप्तिलक्षणत्वे । अननुगमः । प्रत्येकं सकलव्याप्तिसाधारण्यविरहः । दोषाय । अव्याप्त्यै । कस्य । साध्यादेः । का व्याप्तिरिति प्रश्ने । अननुगतस्यैव । तत्तत्साध्यादिनिरूपितव्याप्तिस्वरूपाननुगतलक्ष्यतावच्छेदकावच्छिन्नस्यैव । लक्ष्यत्वात् । निरुक्ताननुगतलक्षणत्वस्येन प्रतिपादनीयत्वात् । तथा च लक्ष्यतावच्छेदकैक्याभावान्नाव्याप्तिरिति भावः ।

ननु लक्ष्याननुगमान्माभूल्लक्षणाव्याप्तिदोषः, तथाप्यनुमितौ व्याप्तिज्ञानहेतुतायाः अननुगतव्याप्तिघटितरूपावच्छिन्नाया व्यभिचारवारणासम्भव इत्याशङ्कायां दीधितिकृदाह । इत्थं चेति । इत्थम् । साध्यादिविशेषघटितत्वेन । अननुगतायाः । अनातिप्रसक्तैकरूपेण कारणतावच्छेदककोटौ निवेशयितुमशक्यायाः । तथा वक्ष्यते इति । सामान्यतोऽनुमितित्वावच्छिन्नं प्रति व्याप्तिज्ञानत्वेन न हेतुता अपि तु अभावज्ञानत्वेन ज्ञानत्वेन वा, हेतुता विशेषसामग्र्यैवानतिप्रसङ्गात् । तत्तत्साध्यादिविषयकतत्तल्लिङ्गकानुमितित्वमेवाननुगततत्तत्साध्यलिङ्गादिघटितव्याप्तिज्ञानजन्यतावच्छेदकमतो न व्यभिचार इत्याशयः । वक्ष्यमाणावच्छेदकत्वांशे लक्षणद्वये यथाऽऽक्षेपसङ्गतेरेते लक्षणे इत्यस्याव्यवहितान्योन्याभावगर्भलक्षणद्वयपरत्वभ्रमं निराकुरुते । एते इति । अत्यन्तान्योन्येति । अन्योन्याभावगर्भत्वेन लक्षणयोरैक्यमिति द्विवचनमसङ्गतमिति भावः ।

तादृशाभावानभ्युपगमादिति समाधानस्याभिप्रायवितर्केण वि-चारासहत्वं प्रदर्श्याभ्युपगमे चेत्यादिसमाधानमवतारयति । नन्वि-त्यादिना ।

(दी०) तादृशेति । ननु किं द्वित्वादिकं प्रतियोगितावच्छे-दकमेव न भवति, किं वा भवत्येव, परं तु क्लृप्तानामेव स्वसमा-नाधिकरणतद्धर्मावच्छिन्नप्रतियोगिताकानामभावानां लाघवा-दित्यभिप्रायः ? नाद्यः, एकैकाभावप्रतीतितो द्वौ न स्त इति प्रतीतेर्विलक्षणत्वात् । शब्दादिना द्वौ न स्त इति निश्चयेऽप्ये-कैकाभावसंशयाच्च । विषयानुगमं विना अनुगताकारप्रत्यया-योगात् ।

(गा०) क्लृप्तानामेवेति । घटो नास्ति पटो नास्तीत्याद्यन-न्यथासिद्धप्रतीतिविषयाणामित्यर्थः । इत्यभिप्राय इति । समाधा-तुरभिप्रायः । एकैकाभावप्रतीतितः । घटो नास्तीत्यादिप्रतीतितः । द्वौ न स्त इतीति । तत्र घटपटौ न स्त इतीत्यर्थः । प्रत्ययमेऽपि । विलक्षणत्वादिति । तथा च तादृशप्रतीतिवैलक्षण्यानुरोधेन घटत्वा-द्यवच्छिन्नप्रतियोगिताकत्वं न तद्विषयः, अपि तु घटपटोभयत्वाद्य-वच्छिन्नप्रतियोगिताकत्वमेवेति स्वीकरणीयमिति भावः ।

ननु घटो नास्ति पटो नास्तीत्यत्रेव घटपटौ न स्त इत्यत्रापि घटपटत्वाद्यवच्छिन्नप्रतियोगिताकत्वेनाभावद्वयं भासते । घटपटांशेऽपि अधिकस्य द्वित्वस्योपलक्षणतया भानेनैव प्रतीतिवै-लक्षण्यमित्यत आह । शब्दादिनेत्यादि । प्रत्यक्षे घटपटौ न स्त इति निश्चयस्थले घटादिद्वये प्रत्येकघटत्वाद्यवच्छिन्नाभावस्यापि निश्चयसम्भवात् प्रत्येकाभावे संशयो न भवत्येवेत्यत आह । शब्दादि-नेति । एकैकाभावसंशयात् । अत्र घटो न वेत्यादिसंशयात् । उक्तप्रत्य-यस्योक्तरूपेण प्रत्येकाभावविषयकत्वे तस्य एतादृशसंशयप्रतिबन्ध-कतायावश्यकत्वादिति भावः । तत्र तादृशसंशयानुत्पादे कदाचिदिष्टाप-त्तिः सम्भवतीत्यतो दूषणान्तरमप्याह । विषयानुगमं विनेति । अभावद्वयरूपविषयस्यानुगतरूपेण भानं विनेत्यर्थः ।

अभावद्वयमनुगतरूपेणैव भासते इति शङ्कते । न चेति ।

(दी०) न चाभावस्य द्वित्वाधिकरणप्रतियोगिकत्वमात्रं द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः । तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि तथाविधोभयशालिनि तादृशौ द्वौ न स्त इत्यप्रत्ययात् । द्वित्वसामानाधिकरण्याभानेऽपि प्रतीतेरनुगताकारत्वाच्च ।

(गा०) प्रतियोगिकत्वमात्रमित्यनेन विशिष्य घटत्वादेः प्रतियोगितावच्छेदकत्वविषयत्वव्यवच्छेदः । एतावतैकसंशयानुपपत्तिरपि परिहृता । तदवच्छिन्नकोटिकसंशये तद्धर्मे प्रतियोगितावच्छेदकत्वावगाहिन एवाभावनिश्चयस्य प्रतिबन्धकत्वात् । द्वित्वसमानाधिकरणेति । द्वित्वसामानाधिकरण्योपलक्षितेत्यर्थः । तेन प्रत्येकाभावप्रतियोगितावच्छेदकघटत्वादौ द्वित्वसामानाधिकरण्यस्य विशेषणत्वविरहेऽपि न क्षतिः । प्रतियोगिताप्रकारकज्ञाने च उपलक्षणस्यापि प्रतियोगितावच्छेदकादौ प्रकारत्वोपगमात् ।

यद्यपि द्वित्वसामानाधिकरण्यं घटपटद्वित्वसामानाधिकरण्यं च तद्घटत्वादिसाधारणमिति तदवच्छिन्नाभावमादाय घटपटोभयवत्यपि घटपटौ न स्त इति प्रत्ययापत्तिरेतत्कल्पेऽपि यथाश्रुते ऽवतरति । तथापि घटपटद्वित्वसामानाधिकरण्यं तत्सामान्यनिष्ठसामानाधिकरण्यप्रतियोगित्वं वा विवक्षितम् । प्रथमपक्षे दोषमाह । तादृशेति । तादृशौ घटपटादिरूपौ यो द्वित्वाधिकरणव्यक्तिविशेषस्तद्विरहिणि तथाविधोभयशालिनि घटपटाद्युभयवति घटपटादिरूपौ द्वौ न स्त इत्यप्रत्ययात्, तथा च तादृशप्रत्ययापत्तिरिति भावः । द्वितीये दोषमाह । द्वित्वसामानाधिकरण्येति । द्वित्वसामानाधिकरण्येन रूपेण घटत्वाद्यनवगाहनेऽपि घटपटौ न स्त इत्याद्याकारकानुगतप्रतीत्युदयादित्यर्थः ।

(दी०) अत एव न तादृशप्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयकत्वम् । अन्यतरत्वानुल्लेखेऽपि घटपटौ न स्त इत्यनुगतप्रत्ययाच्च । न च परम्परासम्बन्धेन तादृशद्वित्व-

सामान्याभाव एव द्वौ न स्त इति प्रतीतेर्विषयः। द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखात्। द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अन्ततः शब्देनापि घटपटौ न स्त इत्यादिप्रत्ययाच्च।

(गा०) अत एव। वक्ष्यमाणतादृशदोषादेव। अन्यतरावच्छिन्नेति। अन्यतरत्वोपलक्षितावच्छिन्नेत्यर्थः। अभावविषयकत्वमित्यन्तस्य तादृशाभावत्वप्रकारकमित्यर्थः। अन्यतरत्वानुल्लेखेऽपि। अन्यतरत्वाप्रदर्शायामपि। परम्परासम्बन्धेन। स्वावच्छिन्नाश्रयत्वसम्बन्धेन। द्वित्वसामान्याभावः। घटपटवृत्तिद्वित्वत्वावच्छिन्नाभावः। द्वौ न स्त इतीति। घटपटौ न स्त इत्यर्थः। द्वित्वाधिकरणयोः। घटपटयोः। प्रतियोगित्वोल्लेखात्। प्रतियोगित्वबोधकशब्देन विषयाभिलापात्।

ननु घटपटौ न स्त इत्यादिवाक्यतो विशेषणीभूतद्वित्वस्यापि प्रतियोगित्वप्रत्ययः शिखी विनष्ट इत्यादौ शिखादेरिव कथंचित्सम्भवतीत्यत आह। द्वित्वादेरिति।

(दी०) अत एवैकविशिष्टापराभावोऽपि न तदालम्बनम्। विरुद्धयोरपि जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्रत्यय इत्युक्तत्वाच्च। नान्त्यः, तथात्वेऽपि साध्यतद्वतोस्तादृशाभावप्रतियोगित्वनिश्चयात्।

(गा०) अत एव। एकविशिष्टापरत्वेनानुपस्थितावपि तादृशप्रत्ययस्याऽऽनुभविकत्वादेव। वैशिष्ट्याप्रसिद्धस्थले प्रतीत्यनुपपत्तिमुक्त्वा वैशिष्ट्याभावस्थले तामाह। विरुद्धयोरपीति। उक्तत्वाच्चेति। मयेत्यादिः।

इदमत्रावधेयम्। घटपटौ न स्त इत्यादिप्रतीत्या घटत्वपटत्वयोस्तदवच्छिन्नधर्मिविशेषणतापन्नद्वित्वे च प्रतियोगितावच्छेदकत्वपर्याप्तिरवगाह्यते न तु द्वित्वमात्रे केवलघटत्वादौ च, यत्किञ्चिदुभयपर्याप्त प्रत्येकघटादिमति च तादृशप्रतीतेरनुदयापातात्। नापि घटपटवृत्तित्वविशिष्टद्वित्वेऽपि, तादृशविशिष्टानुपस्थितावपि तथाप्रत्ययात्। न च नियतधर्मद्वयस्यैकत्र प्रतियोगित्वाधिकरणे वृत्तः कथमवच्छेदकतापर्याप्तिसम्भवः, अवच्छेद्याधिकरण-

१ (गा०) एकैकघटत्वेनेति ज्ञायमानाया इत्यनेन घटत्वावच्छिन्नाभावावगाहित्वं निराकृतम्। अनुत्पद्यमानाया इत्यन्तेन च घटप्रतियोगिकाभावमात्रावगाहित्वनिराकरणम्। तत्र तदुभयं प्रतियोगीत्यादिग्रन्थो यथाश्रुतो न सङ्गच्छते उभयस्य प्रतियोगित्वे प्रत्येकमप्रतियोगित्वस्य दुर्घटत्वादतो व्याचष्टे। तदुभयत्वमेवेत्यादिना। नन्वेवमप्यवच्छेदकत्वाघटितलक्षणस्यैवाऽऽश्रिततयाऽनुपपत्तिस्तदवस्थैवेत्यत आह। अश्रूयमाणेति।

यावत्साधनाव्यापकमव्यापकं यत्समानाधिकरणसाध्यस्य तत्त्वमनौपाधिकत्वमाशङ्क्य स्वयं पूर्वपक्षग्रन्थे सोपाधावतिव्याप्त्या दूषितम्, तच्च दूषणं प्रतियोगिनावच्छेदकधर्मघटिताव्यापकत्वनिवेशे न सम्भवतीति तादृशमेव निवेश्य तदनौपाधिकत्वं मूलकृत् प्रथमं परिष्करोति। यावत्स्वसमानाधिकरणेति।

(चि०) अथवाऽनौपाधिकत्वं व्याप्तिः। तच्च यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम्। न चैवं सोपाधिः, तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगिनि आर्द्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात्, उपाधेः साध्यव्यापकत्वात्।

(दी०) तत्रेति। स्वम्, साधनत्वाभिमतम्। तथा च साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका यावन्तो धर्मा यद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकास्तद्धर्मावच्छिन्नसामानाधिकरण्यमित्यर्थः।

(गा०) अत्र च स्वपदस्य साध्यपरत्वे यत्पदस्य च साधनपरत्वे यावत्साध्याव्यापकं यत् साधनाव्यापकमित्यर्थकतया अव्याप्त्यतिव्याप्ती भवत इति तयोरन्यतरत्वभ्रमं दीधितिकृन्निराकुरुते। स्व-

प्रतियोगिताकएवाभावो विवक्षणीयः, तादृशस्याप्रसिद्धिरित्यर्थः।

द्वितीयाभावे यावत्त्वस्य विशेषणतां मूलस्थसमासान्तर्गतयावत्पदाद्लाभेऽप्युक्तिसम्भवमात्रेण प्रसक्तां तां निराकुरुते। तादृशेति। अवच्छेदकविशिष्टत्वस्य न प्रतियोगिविशेषणत्वं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकह्रदवृत्तित्वादिविशिष्टद्रव्यत्वत्वादिनाभावस्यापि यावदभावान्तर्गततया तत्र वह्न्यादिसामानाधिकरण्याभावेनाव्याप्तिरिति प्रतियोगितायां तदवच्छिन्नत्वस्य तथात्वं निवेशितम्। प्रायशः। अनेकाधिकरणकहेतुके। तथा। अप्रसिद्धिः। वह्निमत्पर्वतादीनां धूमवन्महानसादिनिष्ठाभावप्रतियोगितावच्छेदकपर्वतत्वत्वमहानसावृत्तित्वाद्यवच्छिन्नाभावानधिकरणत्वादिति भावः। एकवृत्तिहेतुके तद्धेत्वधिकरणस्यैव तादृशयावदभाववत्त्वात्प्रायश इत्युक्तम्।

यावतामभावानां प्रत्येकनिरूपितसामानाधिकरण्यनिवेशेऽपि न निस्तार इत्याह। रूपादीति। अव्याप्तौ हेतुमाह। क्वापीति। असम्भवादिति। घटीयरूपादौ तादृशघटत्वाद्यभावासामानाधिकरण्यादिति भावः। साध्यतावच्छेदके तत्तदभावसामानाधिकरण्यावच्छेदकत्वनिवेशे नानाव्यक्तिसाध्यतावच्छेदककस्थले ऽव्याप्तिर्दुष्प्रा।

ननु आर्द्रेन्धनाद्युपाधेस्तत्तदार्द्रेन्धनत्वादिना धूमादिमन्निष्ठाभावप्रतियोगित्वेऽपि अयोगोलकान्यत्वादेरुपाधेरतथात्वादवच्छेदकानुसरणं व्यर्थमित्यत आह। सर्वेति।

(दी०) सर्वत्र सोपाधौ एकव्यक्तिकस्य सम्भवतोऽप्युपाधेर्धर्मान्तरविशिष्टत्वादिना अभावो भवत्येव साध्यसमानाधिकरण इत्यवच्छेदकानुसरणम्।

(गा०) धर्मान्तरम्। ह्रदवृत्तित्वादिकम्। आदिना द्वित्वादिपरिग्रहः। अभावसमानाधिकरणं यत् इत्यत्र अभावाः समानाधिकरणा यस्य साध्यस्येति बहुव्रीहिमवलम्ब्य द्वितीयाभावे यावत्त्वस्य विशेषणत्वमुपगम्य उक्तविशेषणविशेष्यभाववैपरीत्य विनैव मूलं वर्णयतामन्येषां मतमाह साधनेति।

(दी०) साधनसमानाधिकरणात्यन्ताभावप्रतियोगिताव-

जलान्यत्वविशिष्टसत्ताभावतेजोऽन्यत्वविशिष्टसत्ताभावान्यतराभावोऽपि जलतेजोऽन्यतरान्यत्वविशिष्टसत्तैव तदभाव एव तादृशान्यतराभावाभावो न तु जलान्यत्वविशिष्टसत्ताभावादिरिति प्रतियोगितायां भाववृत्तित्वनिवेशमन्तरेणापि उपपत्तेस्तदक्षरत्वघोकमन्यस्य तस्य तत्परत्वाभावाच्च । भावभिन्नत्वं च प्रथमाभावे न विशेषणम्, तत्र तस्य विशेषणत्वेऽपि द्वितीयाभावे तस्यातथात्वे हेतुसमानाधिकरणरूपप्रागभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकनिखिलरूपेषु साध्यसामानाधिकरण्यविरहादव्याप्तेर्द्वितीयाभावे तद्विशेषणस्यावश्यकतया तत्र तद्विशेषणस्य निष्प्रयोजनकत्वात् ।

न च प्रथमाभावे सदातनत्वनिवेशो प्रागभावस्य चालयात्वाघेयमव्याप्तिरिति वाच्यम् । प्रथमाभावे सदातनत्वनिवेशेऽपि द्वितीयस्यातथात्वे हेतुसमानाधिकरणतत्तद्रूपात्यन्ताभावमादाय दर्शितदोषस्य दुर्वारतया द्वितीयेतद्विशेषणस्यावश्यकत्वे प्रथमे तद्विशेषणस्य प्रयोजनान्तरविरहेणानुपादानात् । द्वितीयाभावे सदातनत्वविशेषणेन जन्यरूपव्यावर्त्तनेऽपि तेजःपरमाणुरूपेषु जलत्वसामानाधिकरण्यविरहेण उक्ताव्याप्तेस्तत्र भावभिन्नत्वविशेषणेनैव वारणीयत्वादिति ।

केचित्तु हेतुसमानाधिकरणैतज्जलत्वरूपाभावप्रतियोगितावच्छेदकैतज्जलत्वजलत्वाभावान्यतराभावत्वावच्छिन्नप्रतियोगिताकजलत्वाभावे जलत्वसामानाधिकरण्यविरहेणाव्याप्तिवारणाय प्रथमाभावे हेतुमन्निष्ठतेजस्त्वाभावप्रतियोगितावच्छेदकैतत्तेजस्त्वतेजस्त्वाभावान्यतराभावत्वावच्छिन्नप्रतियोगिताकैतत्तेजस्त्वरूपाभावे जलत्वसामानाधिकरण्यविरहादव्याप्तेर्वारणाय द्वितीयाभावेऽपि भावभिन्नत्वविशेषणमित्याहुः । तन्न । एतज्जलत्वजलत्वाभावान्यतराभाव एतज्जलान्यजलत्वमेवेति तदवच्छिन्नाभावस्यैतज्जलान्यजलत्वाभावरूपस्यैतज्जलत्वस्यातथात्वात् ।

वस्तुत उक्तदोषवारणार्थं द्वितीयाभावे इव प्रथमाभावेऽपि सदातनत्वविशेषणमावश्यकम् । अन्यथा जलनिष्ठरूपप्रागभावप्रतियोगितावच्छेदकरूपत्वावच्छिन्नात्यन्ताभावे जलत्वसामानाधिकरण्यविरहेणाव्याप्तिवारणासम्भवात् ।

तस्य धूमादिमत्यप्यनवच्छिन्नवृत्तिकद्रव्यत्वादिरूपाभावप्रतियोगित्वात्। यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वविशिष्टत्वं हेतुमतस्तद्रूपावच्छिन्नाभावे साध्यसामानाधिकरण्यविवक्षया हेतुसमानाधिकरणतैजसत्वाभावप्रतियोगितावच्छेदकजलत्वाभावतैजसत्वाभावोभयाभावत्वावच्छिन्नप्रतियोगिताके जलत्वाभावे जलत्वसामानाधिकरण्यविरहेऽपि न क्षतिः। तज्जलावृत्तित्वाद्यवच्छिन्नाभावाभावस्तज्जलत्वाभाव एव न तु तज्जलावृत्तिर्जलत्वाभावादिरपि, तज्जलत्वाभावेऽपि तथात्वस्यावश्यकतया तत एवाजले तादृशाभावप्रत्ययोपपत्तेरिति हेतुसमानाधिकरणतज्जलावृत्तित्वरूपाभावमादाय नाव्याप्तिः। एवं तज्जलत्वाभावजलत्वाभावान्यतराभावत्वाद्यवच्छिन्नाभावोऽपि तज्जलत्वाद्यभाव एव। एवं भूतत्वाभावमूर्तत्वाभावान्यतराभावत्वाद्यवच्छिन्नाभावोऽपि न भूतत्वाभावमूर्तत्वाभावौ किं त्वतिरिक्त एको भूतत्वविशिष्टमूर्तत्वाद्यभाव एव इति मूर्तं मनस्त्वादित्यादौ मनोनिष्ठभूतत्वाद्यभावमादाय शुद्धमूर्तत्वाद्यभावो न लक्षणघटक इति।

यद्यपि भावभिन्नत्वविशेषणेऽपि स्नेहसमानाधिकरणाभावप्रतियोगितावच्छेदकरूपत्वावच्छिन्नाभावत्वावच्छिन्नप्रतियोगिताकानां निखिलरूपध्वंसप्रागभावानां जलत्वासमानाधिकरणतयाऽव्याप्तिर्दुर्वारैव। तथापि सदातनत्वेनाप्यभावस्य विशेषणीयतया न दोषः।

न च स्नेहसमानाधिकरणजलान्यत्वविशिष्टसत्ताभावप्रतियोगितावच्छेदकं यज्जलान्यत्वविशिष्टसत्ताभावतेजोन्यत्वादिविशिष्टसत्ताभावान्यतराभावत्वं तदवच्छिन्नप्रतियोगिताके तेजोन्यत्वविशिष्टसत्ताभावे जलत्वसामानाधिकरण्यविरहादव्याप्तिरभावे भावभिन्नत्वं निवेश्यापि न शक्यते वारयितुमिति प्रतियोगितायां भाववृत्तित्वमेव निवेश्यम्। अभावभेत्यादिफक्किकाऽपि कथञ्चित् तत्परतया व्याख्येया। एवं चाभावांशे सदातनत्वविशेषणमनर्थकमिति वाच्यम्। प्रतियोगितायां भाववृत्तित्वनिवेशेऽपि स्नेहसमानाधिकरणपार्थिवादितत्तद्रूपात्यन्ताभावप्रतियोगितावच्छेदकतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकतत्तद्रूपप्रागभावध्वंसेषु जलत्वसामानाधिकरण्यविरहेणाभावे सदातनत्वनिवेशस्यावश्यकत्वात्।

गमुकसम्बन्धेन साध्यसामानाधिकरण्यस्याक्षतत्वात् । घटध्वंसान्यत्वतत्प्रकारकप्रमाविषयत्वाद्यभावश्च स्वाधिकरणघटध्वंसादिरूपोऽसदातनतया लक्षणाघटकः ।

न च यावत्त्वस्यानुयोगिताविशेषणत्वेऽनुयोगितायां सदातनवृत्तित्वविशेषणमफलम्, हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतत्तद्रूपत्वावच्छिन्ननिरूपितध्वंसत्वरूपानुयोगितायां सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वस्य निष्प्रमाणकतया सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वविशेषणेनैव वारणात् । ध्वंसादिसाधारणसम्बन्धविशेषावच्छिन्नतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववृत्तितया उक्ताव्याप्त्यनवकाशात् । तथा च घटध्वंसान्यत्वाभावमादायैवातिव्याप्तिवारणसम्भव इति वाच्यम् । अभावप्रतियोगितामात्रस्यैव किञ्चिद्धर्मावच्छिन्नत्वनियमवत्सम्बन्धावच्छिन्नत्वनियमः सिद्धान्तसिद्ध इति तद्रूपनिरूपितध्वंसादिरूपानुयोगितामादायाव्याप्तेर्दुर्वारतया यावदनुयोगितानिवेशमतेऽपि सदातनवृत्तित्वस्य अवश्यं निवेशनीयत्वात् इत्यत आह । घटध्वंस इति ।

(दी०) घटध्वंसो ध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविशेष्यत्वादेर्वा भावाभाववृत्तिरतिरिक्तोऽभावस्तादृशो न घटध्वंसत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति ।

(गा०) भावाभाववृत्तिरित्यतिरिक्तत्वे हेतुगर्भविशेषणम् । तथा चाभाववृत्तिप्रतियोगिकाभावाधिकरणकाभावत्वं नाधिकरणस्वरूपत्वे तन्त्रमपि तु अभावमात्राधिकरणकत्वमेवेति भावः । अनधिकरणीभूताभावान्तरादतिरिक्तत्वं व्यवस्थाप्य तदेव साध्यासामानाधिकरण्यप्रयोजकतयोपदर्शयति । तादृश इति ।

यद्यपि घटध्वंसत्वाद्यभावस्य गोत्वाद्यभावरूपत्वेऽपि घटध्वंसान्यत्वविशिष्टाभावत्वाद्यभावस्य गोत्वाभावावृत्तितया गोत्वाभावानात्मकस्य साध्यासमानाधिकरणतयैव नातिव्याप्त्यवकाशस्तथापि सर्वाधिसौकर्येण साध्याभावस्यातिरिक्तत्वं व्यवस्थाप्य तमादायातिव्याप्तिर्वारिता ।

केचित्तु समवायाभावत्वं यन्मते प्रतियोगित्वं तन्मते तद्धटत्वाभावघटत्वाभावान्यतरत्वसमवायाभावो घटत्वाभावादिरपि, अन्य-

न च प्रागभावस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वविरहात्सत्प्रतियोगितावच्छेदकतद्रूपत्वावच्छिन्नात्यन्ताभावस्य च साध्यसामानाधिकरण्याभावाव्याप्तिप्रसक्तिरिति वाच्यम् । ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते द्रव्योत्पत्तिकाले तत्र रूपं नास्तीति सामान्याभावबुद्धेः प्रागभावविषयकतया तत्रापि सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यावश्योपेयत्वात् । अन्तराश्यामे रक्तं रूपं नास्तीतिवत् पूर्वापररक्तिमध्वसप्रागभाववति रक्तेऽपि तादृशप्रतीतेः कालविशेषावच्छिन्नत्वस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे क्वचित् स्वीकारेण वारणसम्भवात् । एवं च समुपदर्शितदोषवारणाय द्वितीयेऽपि तद्विशेषणमावश्यकम् । एवं च हेतुसमानाधिकरणजलपरमाणुरूपात्मकाभावप्रतियोगितावच्छेदकरूपसामान्याभावत्वावच्छिन्नप्रतियोगिताकं तेजःपरमाणुरूपमादायाव्याप्तिवारणाय भावभिन्नत्वं प्रथमे द्वितीये चाऽभावे विशेषणमिति ।

ननु घटध्वंसो ध्वंसत्वादित्यादावतिव्याप्तिः, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकघटध्वंसत्वत्वाद्यवच्छिन्नप्रतियोगिताकाभावानां गोत्वाद्यभावाधिकरणकाणां अभावाधिकरणकाभावधर्मप्रतियोगिकतयाऽधिकरणीभूततत्तदभावात्मकानां साध्यसामानाधिकरण्याद् भावेषु तदभावत्वेन फलतगोत्वाभावादिभिरेव घटध्वंसत्वं नास्तीति बुद्ध्युपपत्तेस्तत्राप्यतिरिक्तनदभावाकल्पनात्, घटध्वंसादिनिष्ठतदभावस्य घटध्वंसादिरूपत्वेऽपि सदातनत्वाभावेन घटध्वंसादेर्लक्षणाघटकत्वात् । भाववृत्तिघटध्वंसत्वाभावस्य गोत्वाभावाद्यतिरिक्तत्वेऽपि वह्निमान् धूमादित्यादौ साध्यासमानाधिकरणद्रव्यत्वाभावरूपतदधिकरणध्वंसत्वाद्यभावे साध्यसामानाधिकरण्यविरहेणाव्याप्तेः । एवं जलान्यत्वविशिष्टसत्ताभावतेजोन्यत्वविशिष्टसत्ताभावान्यतराभावाभावस्य तेजोन्यत्वविशिष्टसत्ताभावादिरूपत्वे अभावे भावभिन्नत्वविशेषणत्वप्रक्षेपेऽप्यगतेस्तत् परित्यज्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकयावदनुयोगितास्वेष स्वाश्रयघटितपरस्परासम्बन्धेन साध्यवद्वृत्तित्वस्य विवक्षणीयतया प्रतियोगितावच्छेदकैक्ये अभावव्यक्तिभेदेनानुयोगिताभेदानभ्युपगमेन भावादिवृत्त्यभावानां साध्यासामानाधिकरण्येऽपि घटध्वंसत्वत्वाद्यवच्छिन्ननिरूपितानां यावदनुयोगिता-

वामुक्तसम्बन्धेन साध्यसामानाधिकरण्यस्याक्षतत्वात् । घटध्वंसान्यत्वतरप्रकारकप्रमाविषयत्वाद्यभावश्च स्वाधिकरणघटध्वंसादिरूपोऽसदातनत्वा लक्षणाघटकः ।

न च यावत्त्वस्यानुयोगिताविशेषणत्वे ऽनुयोगितायां सदातनवृत्तित्वविशेषणमफलम्, हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतत्तद्रूपावच्छिन्ननिरूपितध्वंसत्वरूपानुयोगितायां सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वस्य निष्प्रमाणकतया सम्बन्धविशेषावच्छिन्नप्रतियोगिताकत्वविशेषणेनैव वारणात् । ध्वंसादिसाधारणसम्बन्धविशेषावच्छिन्नतत्तद्रूपत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववृत्तितया उक्ताव्याप्त्यनवकाशात् । तथा च घटध्वंसान्यत्वाभावमादायैवातिव्याप्तिवारणसम्भव इति वाच्यम् । अभावप्रतियोगितामात्रस्यैव किञ्चिद्धर्मावच्छिन्नत्वनियमवत्सम्बन्धावच्छिन्नत्वनियमः सिद्धान्तसिद्ध इति तद्रूपनिरूपितध्वंसादिरूपानुयोगितामादायाव्याप्तेर्दुर्वारतया यावदनुयोगितानिवेशमतेऽपि सदातनवृत्तित्वस्य अवश्यं निवेशनीयत्वात् इत्यत आह । घटध्वंस इति ।

(दी०) घटध्वंसो ध्वंसत्वादित्यादौ च घटध्वंसत्वादेस्तत्प्रकारकप्रमाविशेष्यत्वादेर्वा भावाभाववृत्तिरतिरिक्तोऽभावस्तादृशो न घटध्वंसत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति ।

(गा०) भावाभाववृत्तिरित्यतिरिक्तत्वे हेतुधर्मविशेषणम् । तथा चाभाववृत्तिप्रतियोगिकाभावाधिकरणकाभावत्वं नाधिकरणस्वरूपत्वे तन्त्रमपि तु अभावमात्राधिकरणकत्वमेवेति भावः । अधिकरणीभूताभावान्तरादतिरिक्तत्वं व्यवस्थाप्य तदेव साध्यासामानाधिकरण्यप्रयोजकतयोपदर्शयति । तादृश इति ।

यद्यपि घटध्वंसत्वाद्यभावस्य गोत्वाद्यभावरूपत्वेऽपि घटध्वंसान्यत्वविशिष्टाभावत्वाद्यभावस्य गोत्वाभावावृत्तितया गोत्वाभावानात्मकस्य साध्यासमानाधिकरणतयैव नातिव्याप्त्यवकाशस्तथापि समाधिसौकर्येण साध्याभावस्यातिरिक्तत्वं व्यवस्थाप्य तमादायातिव्याप्तिर्वारिता ।

केचित्तु यमावाभावत्वं यन्मते प्रतियोगित्वं तन्मते तद्घटत्वाघटत्वाभावान्यतराद्यभावाभावो घटत्वाभावादिरपि, अन्व-

या तस्य सामान्यतस्तत्प्रतियोगित्वानुपपत्तेः । तथा चाभावे भावभिन्नत्वनिवेशेऽपि दर्शिताव्याप्तिर्दुर्वारैवेति अनुयोगिताया मुभयावृत्तित्वमेव तन्मते विशेषणं प्रक्षिप्य तादृशानुयोगितावद्या-वदभावे साध्यसामानाधिकरण्यं निवेश्यमिति दर्शितविशिष्टाभावो लक्षणघटक इत्यभिप्रायकतया फक्किकामेतां सङ्गमयन्ति ।

परे तु नन्वयमभावो ध्वंसत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं ध्वंसान्यत्वविशिष्टाभावत्वं तदवच्छिन्नप्रतियोगिताको ध्वंसवृत्तिरभावोऽभावाधिकरणकाभाववृत्तिधर्मप्रतियोगिकाभावतयाऽधिकरणीभूतध्वंसरूप इति भाववृत्तित्वाभावभावत्वाभाव एव । तत्र च निरुक्तयावदभावान्तर्गते साध्यसामानाधिकरण्यविरहादव्याप्तिरिति सदातनत्वमभावविशेषणं परित्यज्यानुयोगितायामेव कादाचित्कावृत्तित्वं निवेश्य तादृशानुयोगितावद्यावदभावे साध्यसामानाधिकरण्यं विवक्षणीयम् । उक्तविशिष्टनिरूपिता च ध्वंससाधारणी एवैवानुयोगितेति नाव्याप्तिः ।

वस्तुतस्तु प्रथमाभावे स्वाभिन्नहेतुमन्निष्ठत्वमेव प्रवेश्य दर्शिताव्याप्तिर्वारणीया उक्तस्यानुयोगिताविशेषस्य निवेशेऽयमभावोऽत्यन्ताभाववानित्यादौ घटात्यन्ताभावभेदविशिष्टाभावत्वाभावमादायोक्तरीत्याऽव्याप्तेर्दुर्वारत्वात् । एवं च घटध्वंसो ध्वंसत्वादित्यादावतिव्याप्तिः, हेतुसमानाधिकरणस्याभाववृत्तिधर्माभावस्य तदधिकरणस्वरूपत्वेन लक्षणाघटकत्वात् । अभाववृत्तिधर्माभावस्य च साध्यसमानाधिकरणत्वादित्याशङ्कायां घटध्वंस इत्यादिफक्किकामवतारयन्ति ।

(चि०) एतदेव यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमसौपाधिकत्वं गीयते ।

यद्वा यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वम् । सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावप्रतियोगिन उपाधेर्योऽत्यन्ताभावस्तेन

समं हेतोः सामानाधिकरण्यम् । उपाधेः साधनाव्यापकत्वात् ।

(दी०) यावदिति स्वं व्यभिचारि येषां तेषां यावतां व्यभिचारिणा साध्येन सामानाधिकरण्यमित्यर्थः ।

(गा०) यावत्स्वव्यभिचारीत्यादिलक्षणे स्वस्य व्यभिचारीति तत्पुरुषे विषमव्याप्ते हेतुव्यभिचारिसाध्यादेः साध्याव्यभिचारित्वाद्व्याप्तिः, साध्यव्यापके व्यभिचारिण्यतिव्याप्तिश्च । व्यापकव्यभिचारिणां यावतां व्याप्यव्यभिचारित्वात् अतो बहुव्रीहिमवलम्बते । स्वमिति । यावन्तः स्वव्यभिचारिणो व्यभिचारिणो यस्येति बहुव्रीहौ धूमाद्यव्यापकमहानसत्वादीनां वह्न्याद्यव्यभिचारितया वह्निमान् धूमादित्यादावव्याप्तिरिति व्यभिचारिव्यभिचारीत्यत्र तत्पुरुषमाश्रयते । तेषामिति । यावत्त्वं स्वस्मिन् साध्ये वा न विशेषणमिति स्फुटयति । यावतामिति । एवं च निरुक्तयावत्साधनाव्यापकाव्यापकसाध्यसामानाधिकरण्यं पर्यवस्यतीति भावः ।

यत्समानाधिकरणेत्यत्र यत्पदस्य साधनपरत्वे यस्येति यत्पदस्य च साध्यपरत्वे साध्यस्य यावत्साधनव्यापकव्याप्यत्वं लभ्यते तच्च विषमव्याप्तसद्धेत्वादावव्याप्तिकवलितमिति प्रथमयत्पदस्य साध्यपरतामाह । यत्पदमिति ।

(दी०) यावदिति । यत्पदं साध्यत्वाभिमतपरम् । सोपाधिवारणाय यावदिति लुप्तसप्तमीकस्य द्वितीयात्यन्ताभावस्य विशेषणम् । तथा च साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वव्यापकस्वसामानाधिकरण्यसामान्याभाववत्त्वमर्थः । केवलान्वयिस्थले त्वाकाशादिरेव तथाविधोऽभावः प्रसिद्ध इति सम्प्रदायः ।

(गा०) एतेनैवाग्रिमयत्पदस्य साधनपरतालाभाच्च सा वर्णिता । तदेवानौपाधिकत्वमिति मूले तदेवेत्यनन्तरं तत्साध्यनिरूपितमिति पूरणीयम् । प्रथमाभावादौ यावत्त्वविशेषणे यावदभावप्रतियोग्यप्रसिद्ध्यासम्भवः । यावतां प्रत्येकप्रतियोगित्वनिवेशने ऽपि

साध्यव्यापकयत्किञ्चिद्धर्मव्याप्यत्वमादाय व्यभिचारिण्यतिव्याप्तेरतो द्वितीयाभावे तस्य विशेषणतामाह लुप्तेति । अभावस्यासामानाधिकरण्यनिवेशे केवलान्वयिनि साध्यव्यापकाभावस्य गगनादेः सामानाधिकरण्याप्रसिद्ध्याऽव्याप्तेरतोऽभावे यस्यासामानाधिकरण्यमित्यर्थं स्पष्टयितुं लुप्तसप्तमीकस्येति । अप्रतियोगिप्रतियोगिकस्य यथाश्रुतस्याप्रसिद्ध्यादिग्रस्ततया तस्य प्रतियोगितानवच्छेदकावच्छिन्नप्रतियोगिताकार्थकता दर्शयन् यावत्पदार्थव्यापकतामन्तर्भाव्य व्याप्तेर्विशिष्टैकार्थरूपतामुपपादयति । तथा चेति । गगनादेर्गगनाद्यभावाभावत्वं स्वयं निराकरिष्यति अत सम्प्रदाय इति ।

(दी०) केचित्तु तादृशयावदभावशून्यत्वं यदधिकरणताया व्यापकं तत्त्वमर्थः । न च तादृशप्रतियोगितानवच्छेदकवन्तमेव यावत्त्वेन विशिष्य यावत्तादृशाश्रयत्वं यदधिकरणताया व्यापकं तत्त्वमित्यर्थलाभादेव सामञ्जस्येऽभावद्वयोपादानमनतिप्रयोजनकमिति वाच्यम् । यावतां तादृशानामिन्धनादीनामेकाधिकरण्यस्याप्रसिद्धेः । न चावच्छेदकानामपहाय अप्रतियोग्येव यावत्त्वेन विशिष्यताम् । साध्यव्यापकस्यापि रूपान्तरेण साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः ।

(गा०) तादृशयावदभावशून्यत्वमिति । साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावा प्रत्येकं तच्छून्यत्वमित्यर्थः । तेन धूमवान् वह्नेरित्यादौ सर्वत्र वह्न्याद्यधिकरणे धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नाभावाभावेन यावत्त्वावच्छिन्नतावदभावाभावसत्त्वेऽपि न क्षतिः । यावत्तादृशाश्रयत्वमिति । यद्यत्सम्बन्धघटितव्यापकतावच्छेदकं यद्यत् तेन सम्बन्धेन तद्दाश्रयत्वमित्यर्थः । साध्यतावच्छेदकसम्बन्धघटितव्यापकतावच्छेदकाश्रयत्वानां यावत्त्वावच्छिन्ननिरूपितं साध्यतावच्छेदकसम्बन्धेनाश्रयत्वमिति यावत् । यथा सन्निवेशे वैयर्थ्यादनतिप्रयोजनकमिति । तादृशानाम् । व्यापकतावच्छेदकरूपवताम् । ऐकाधिकरण्याप्रसिद्धेरिति । तथा

च न तावतामेकं प्रति व्यापकत्वप्रसिद्धिरिति । अप्रतियोग्येवेति । तथा च इन्धनादीनां न तथात्वं अपि त्वखण्डजलत्वाभावादीनामिव विशेषणताविशेषसम्बन्धेनैव व्यापकत्वस्य विवक्षणात् तेन सम्बन्धेनैव चाश्रयत्वविवक्षया यावत्तादृशाश्रयत्वमेकस्यापीति नाप्रसिद्धिरिति भावः । रूपान्तरेण । द्वित्वादिना । प्रतियोगित्वेनैतदन्वयः । साध्यव्यापकतावच्छेदकावच्छिन्नाभावान् प्रातिस्विकरूपेणोपादाय तदभावत्वेन हेतुव्यापकत्वनिवेशापेक्षया यावद्व्यापकतावच्छेदकधर्मान् विशिष्योपादाय तेन रूपेण व्यापकतानिवेशनमेवोचितमिति एतन्मते ऽस्वरसबीजं बोध्यम् ।

(चि०) यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । तथा हि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकम्, धूममात्रस्य वह्निसम्बन्धित्वात् । वह्नेस्तु धूमसम्बन्धे न वह्नित्वमवच्छेदकं धूमासम्बन्धिनि गतत्वात् । न व्यतिप्रसक्तमवच्छेदकम्, संयोगादौ तथात्वादर्शनात् । किं तु वह्न्यार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृशं च व्याप्यमेव ।

अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यम् । वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना ।

(दी०) अवच्छिन्नं सामानाधिकरण्यं सामानाधिकरण्यावच्छेदकरूपं वा व्याप्तिः । इत्थं च धूमत्वद्रव्यत्वत्वादेर्व्याप्यतावच्छेदकत्वं दण्डत्वादेर्नियतपूर्ववर्तितावच्छेदकधर्मात्मककारणतावच्छेदकत्ववदभेदे ऽपि उपहितानुपहितभेदाद्वा समर्थनीयम् । तत्र आद्यमभिप्रेत्याह । यत्सम्बन्धितेति ।

(गा०) यत्सम्बन्धितेत्यादिलक्षणयोर्भेदं स्फुटीचिकीर्षुः प्रागेव

लोको धूमो वेत्यादौ विशिष्य सन्देहेऽपि सामान्यतोऽवच्छेदकरूपवत्त्वनिर्णयः सम्भवत्येवेति हृदयम् ।

(गा०) विशेषानुसरणस्य फलं स्वयमेवाह । जनकत्वादीति । व्यावृत्ता । भिन्ना । तथा च तदादाय नातिप्रसङ्ग इति भावः । प्रथमेऽनुपपत्तेः सत्त्वात् तामेव पक्षान्तरानुसरणबीजतया दर्शयति । अत्र चेति । परामर्शात् । गुणकर्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नसामानाधिकरण्यप्रकारेण प्रमारूपादेव ज्ञानात् । न चेष्टापत्तिः शङ्क्या । परामर्शभ्रमं विना भ्रमानुमितेरनुभवविरुद्धत्वात् । एतत्प्रदर्शनायैव परामर्शस्य प्रमात्वसम्पादकं सत्त्वादिहेतौ तादृशव्याप्तिसत्त्वमभिहितम् । सामानाधिकरण्यावच्छेदकरूपस्य व्याप्तितापक्षे च तद्विशिष्टस्य पक्षेऽसत्त्वात्तद्विशिष्टवैशिष्ट्यावगाहिपरामर्शो भ्रम एवेति नातिप्रसङ्ग इति भावः ।

ननु गुणादौ विशिष्टसत्तात्वादिविशिष्टस्यैव गुणादिसामानाधिकरण्यविशिष्टस्याप्यसत्त्वात् प्रथमपक्षेऽपि नातिप्रसङ्ग इत्याशङ्कां निरस्यति । साध्येति । असम्भवीति । तथा च सामानाधिकरण्यव्याप्तिपक्षे व्याप्त्युपलक्षितहेतुवैशिष्ट्यस्यैव ज्ञानं कारणं वाच्यम्, गुणादिसामानाधिकरण्योपलक्षितसत्तादिवैशिष्ट्यं च कर्मादावपीत्यतिप्रसङ्गो दुर्वार एवेति भाव । न च सामानाधिकरण्यव्याप्तिपक्षे तद्धर्मितावच्छेदकतापन्नतदवच्छेदकतद्धर्मविशिष्टवैशिष्ट्यज्ञानस्य हेतुतयाऽतिप्रसङ्गवारणं सम्भवतीति वाच्यम् । गौरवात् । एतत्कल्पे पक्षवृत्त्यधिकरणतानिरूपकतावच्छेदकावच्छिन्नं सामानाधिकरण्यमिति ज्ञानस्यैव कारणत्वे तु न कोऽपि दोषः ।

ननु साध्यसामानाधिकरण्यावच्छेदकधूमत्वादेर्व्याप्तित्वे यत्र पक्षवृत्तौ धूमत्वालोकत्वयोर्विशिष्य संशयो व्यर्थविशेषणतया साध्यसम्बन्धितानवच्छेदकस्य धूमालोकान्यतरत्वस्यैव चाऽवधारण *तत्रानुभवसिद्धाया अनुमितेरनुपपत्तिः । तत्र विशेषणसन्देहेन* धूमत्वादिरूपव्याप्तिविशिष्टस्यापि पक्षे सन्दिग्धत्वात् । धर्मिवृत्तौ यस्य विशेषणस्य निश्चयस्तद्विशेषणवत्त्वावृत्तिकत्वरूपतद्विशिष्टाभावव्याप्तकधर्मस्यापि धर्मिणि निश्चयसम्भवात् विशिष्टसंशयो न सम्भवतीति धर्मिवृत्तौ विशेषणनिश्चयविघटकत-

या तत्र विशेषणसद्भावस्य धर्मिणि विशिष्टसद्भावनिर्णायकत्वादित्यत आह। अयमिति। अयम्। पक्षवृत्तिः। इत्यादौ। इत्यादिसंशयस्थले। विशिष्य। धूमत्वादिना। सन्देहेऽपि। सामान्यतः। साध्यसामानाधिकरण्यावच्छेदकतारूपसामान्यधर्मपुरस्कारेण। अवच्छेदकरूपवत्तानिर्णय। अवच्छेदकप्रकारकः पक्षे हेतुनिश्चय। सम्भवत्येवेति। इदं च स्वरूपसम्बन्धरूपावच्छेदकत्व प्रविष्टमित्यभिप्रायेण। वक्ष्यमाणानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य स्वत्वघटिततया धूमत्वालोकत्वादिसाधारणसामान्यधर्मत्वासम्भवात् तन्निवेशनासङ्गते। तन्मते च धूमालोकान्यतरत्वादेरेवावच्छेदकतया तत्प्रकारकनिश्चयादेवानुमित्युपपत्तिर्द्रष्टव्या।

अवच्छिन्नसामानाधिकरण्यादेर्व्याप्तित्वेऽपि अतिप्रसङ्गवारणाय सामानाधिकरण्यधर्मितावच्छेदकतापन्नसामानाधिकरण्यावच्छेदकतत्तद्धर्मप्रकारकहेतुमत्तानिश्चयस्य हेतुतयाऽन्यतरत्वादिप्रकारकहेतुमत्तानिश्चयादेवोक्तस्थलेऽनुमितेरुपपादनात्।

न चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशपक्षे नीलधूमत्वादिवारणाय स्वसमानाधिकरणतादृशधर्मान्तराघटितत्वं यदि निवेश्यते तदा धूमत्वादिघटितधूमालोकान्यतरत्वस्यावच्छेदकत्वासम्भवात् कथं तत्प्रकारकज्ञानादनुमितिरिति वाच्यम्। तन्मतेऽपि धूमत्वालोकत्वान्यतरत्वादिशरीरे ऽवच्छेदकताघटकसमवायेन धूमत्वादेरप्रवेशात्तस्यावच्छेदकत्वसम्भवेन तत्प्रकारकपक्षधर्मताज्ञानादेवानुमित्युपपत्ते।

(दी०) अत्रावच्छेदकत्वं नान्यूनवृत्तित्वम्, अन्यूनानतिरिक्तवृत्तित्वं वा। वह्न्यादौ साध्ये मेयत्वादावतिप्रसङ्गात्, धूमत्वादावप्रसङ्गाच्च। किं तु अनतिरिक्तवृत्तित्वम्। तच्च यद्यपि न तदभाववदवृत्तित्वम्। गुणवान् सत्त्वादित्यत्र सत्त्वात्वेऽतिप्रसङ्गात्। न च कर्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकरण्याभाववत्या सत्तायां वर्तमानत्वान्न तथा। तथा सति विशिष्टसत्त्वे प्रागुक्तदिशा च धूमत्वादावव्याप्तिप्रसङ्गात्।

(गा०) अन्यूनवृत्तित्वमित्यादिपक्षयोराद्ये दोषमाह । वह्न्यादाविति । उभयत्र तमाह । धूमत्वादाविति । अत्रापि वह्न्यादौ साध्ये इत्यनुपज्यते । अप्रसङ्गादिति । तस्य वह्न्यादिसामानाधिकरण्यन्यूनवृत्तित्वादिति भावः । सत्तात्वेऽतिप्रसङ्गादिति । सत्तायां गुणसामानाधिकरण्याभावविरहादिति भावः । सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षमालम्ब्य शङ्कते । न चेति । न तथा । न उक्तस्थले सत्तात्वेऽतिप्रसङ्गः । तथा सति । सामानाधिकरण्यस्याव्याप्यवृत्तित्वे सति । प्रागुक्तादिशा । स्वावयवावच्छेदेन धूमादावपि वह्निसामानाधिकरण्याभावसत्त्वेन । अव्याप्तिप्रसङ्गात् । गुणादिवह्न्यादिसामानाधिकरण्यानवच्छेदकत्वप्रसङ्गात् ।

(दी०) तथापि अतिरिक्ते यद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्तते तत्त्वम् । साध्यासमानाधिकरणावृत्तिस्वविशिष्टाधिकरणवृत्तित्वसामान्यकत्वम्, स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वमिति तु फलितार्थः । सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृत्तित्वस्य साध्यासमानाधिकरणे कर्मत्वादौ सत्त्वान्नातिप्रसङ्गः । कर्माद्यन्यत्वविशिष्टसत्ताश्रयश्च न कर्मादिरिति नाप्रसङ्गः । एवं च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वोपपत्तिः ।

(गा०) अतिरिक्ते । साध्यासमानाधिकरणे । न वर्तते इत्यनेनान्वय । तथा च यद्धर्मविशिष्टाधिकरणवृत्तित्व साध्यासमानाधिकरणावृत्तीत्यर्थः । यद्धर्मघटकमुपेक्ष्य यद्धर्मविशिष्टत्वस्य निवेशाद् गुणवद् विशिष्टसत्त्वादित्यादौ नाव्याप्तिरित्यग्रे स्वयमेव वक्ष्यते । सम्बन्धविशेषलाभाय हेतुपदम । साध्यसमानाधिकरणवृत्तिहेतुसामानाधिकरण्यव्यक्तिविशेषे साध्यासमानाधिकरणावृत्तित्वमादायातिप्रसङ्गवारणाय सामानाधिकरण्यसामान्यमन्तर्भाव्य एतल्लक्षणार्थमेव समासघटितैकवाक्येनाह । साध्यासमानाधिकरणेति ।

अनेकवृत्तेरधिकाया निवेशादितो लघुलक्षणान्तरमाह । स्वविशिष्टेति । गुणवत् सत्त्वादित्यत्र सत्तात्वे लक्षणत्रयस्यैवातिप्रस-

कमुद्धरति । सत्त्वाच्चेति । इदं चाव्य मेयत्वादित्यादौ वाच्यत्वादिसामानाधिकरण्यशून्ये हेतुतावच्छेदकसम्बन्धेनावृत्तौ मेयत्वादावृत्त्या अतिप्रसक्ततया तस्य सामानाधिकरण्यावच्छेदकत्वानुपपत्तिरिति दूषणस्यापि यथोक्तानतिरिक्तवृत्तित्वविवक्षया नावकाश इत्याह । एवं चेति । केवलान्वयीति । हेतुतावच्छेदकसम्बन्धेन किञ्चिद्वस्तुनोऽधिकरणे वर्तमानस्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताशून्यत्वमेव केवलान्वयित्वं तेन समवायादिना द्रव्यत्वसत्त्वादिसाध्यकस्य संयोगादिना हेतोर्मेयत्वावच्छिन्नस्य व्याप्यतोपपत्तेरपि संग्रहः । उपपत्तिरिति । साध्यासमानाधिकरणमात्रस्यैव मेयत्वादिविशिष्टासमानाधिकरणत्वादिति भावः ।

(दी०) यत्तु वृत्तिमत्त्वादिकमेव तत्र व्याप्तिः, तद्ग्रहश्च मेयत्वादिनेति । तन्न । व्याप्तिविरहिवृत्तितया गृह्यमाणेन रूपेण व्याप्तिग्रहासम्भवात् । अन्यथा अतिप्रसङ्गात् ।

(गा०) वृत्तिमत्त्वादिकमिति । वृत्तिमत्त्वं हेतुतावच्छेदकसम्बन्धेन बोध्यम्, केवलस्य हेतुतावच्छेदकसम्बन्धघटितसाध्यसामानाधिकरण्यातिप्रसक्तत्वात् । आदिपदात् संयोगेन मेयत्वावच्छिन्नहेतुकस्थले द्रव्यत्वस्य परिग्रहः । तन्न व्याप्तिरिति । तथा च मेयत्वादेरतिप्रसक्तत्वं न क्षतिमावहतीति भावः ।

ननु धूमवान्वह्नेरित्यादिप्रयोगविरहात् पञ्चम्याः प्रकृत्यर्थतावच्छेदकावच्छेदेन गमकताबोधकत्वं व्युत्पन्नम् । गमकतावच्छेदकं च व्याप्यतावच्छेदकरूपम्, सामानाधिकरण्यावच्छेदकरूपस्य व्याप्तित्वमते तदेव रूपं तथा, अभेदेऽप्यवच्छेद्यावच्छेदकभावसमर्थनात् । व्यापकसामानाधिकरण्यरूपव्याप्तिपक्षे व्यापकतानिरूपकतावच्छेदकम् । एवं चोक्तस्थले मेयत्वादेर्गमकतानवच्छेदकतया मेयादिति हेतुप्रयोगानुपपत्तिरित्यत आह । तद्ग्रहश्चेति । तद्ग्रहः । तादृशावच्छेदकवृत्तिमत्त्वादिरूपव्याप्तिग्रहः । मेयत्वादिना । धर्मितावच्छेदकमेयत्वादिप्रकारेण । अनुमितिहेतुरिति शेषः । अयमाशयः । व्याप्यता यदि गमकतात्मिका पञ्चम्यर्थः स्यात्तदा व्याप्यतावच्छेदकत्वमेव गमकतावच्छेदकत्वम्, तदेव च न, तथा सति पञ्चम्यैव

हेतौ व्याप्यताबोधनादुदाहरणाकाङ्क्षानिवृत्तेः । अपि तु साध्यानुमित्यौपयिकव्याप्तिपक्षधर्मताज्ञानविषयता साध्यगमकता पञ्चम्यर्थः । तदवच्छेदकं च रूपं यदवच्छिन्ने धर्मिणि व्याप्त्यादिग्रहः तादृशं च रूपं व्यापकसामानाधिकरण्यस्य व्याप्तित्वे व्यापकत्वनिरूपकतावच्छेदकधर्म एव । धूमव्यापकवह्निसमानाधिकरणद्रव्यत्वानित्यादिज्ञानादनुमित्यनुत्पत्त्या तद्रूपावच्छिन्ने व्यापकसामानाधिकरण्यग्रहस्यैवानुमितिहेतुत्वोपगमात् । साध्यसम्बन्धितावच्छेदकरूपव्याप्तिपक्षे साध्यसम्बन्धितावच्छेदकवत्त्वानित्याकारकनिर्धर्मितावच्छेदककव्याप्तिज्ञानादनुमित्यनुत्पत्त्या मेयत्वाद्यवच्छिन्नधर्मिकतादृशज्ञानस्याप्यनुमित्युत्पादकतया मेयत्वादेरपि वाच्यत्वादिगमकतावच्छेदकत्वमिति । तद्धर्मविशिष्टबोधकपदोत्तरपञ्चम्या च तद्धर्मावच्छिन्ने निरुक्तं गमकत्वं प्रत्याय्यताम्, तद्धर्मावच्छिन्नविषयकव्याप्त्यादिप्रमाधीनानुमितिविधेयत्वरूपं गम्यत्वं वा साध्ये प्रत्याय्यतामित्यन्यदेतत् ।

धर्मितावच्छेदकावच्छेदेन तत्सामानाधिकरण्यमात्रेण वा व्याप्तिधीरनुमितिहेतुः? तत्र न प्रथमः, तथा सति मेयत्वादेर्वाच्यत्वादिगमकतावच्छेदकत्वानुपपत्तिरित्याह । व्याप्तिविरहीति । गृह्यमाणेन रूपेण । गृह्यमाणरूपावच्छेदेन । व्याप्तिग्रहासम्भवादिति । तादृशमेयत्वादिरूपधर्मावच्छेदेन व्याप्तिग्रहस्य प्रमात्मकत्वग्रहासम्भवादित्यर्थः । तथा च विशेषदर्शिनस्तद्रूपेण गमकतावच्छेदकत्वग्रहासम्भवेन प्रमेयादिति हेतुवाक्यादर्थबोधानुपपत्तेरिति भावः । न द्वितीयः । तथा सति वह्नित्वादेरपि धूमादिगमकतावच्छेदकत्वप्रसङ्गात् । सामानाधिकरण्येन धूमादिसम्बन्धितावच्छेदकार्द्रेन्धनप्रभववह्नित्वादिप्रमासम्भवादित्याशयेनाह । अन्यथेति ।

अधिकरणे साध्यस्य सम्बन्धविशेषानिवेशने अयमात्मा आत्ममहाकालान्यतरत्वादित्यादावतिव्याप्तिः । कालस्य कालिकसम्बन्धेन साध्यवत्त्वात् साधनसमानाधिकरणत्वस्य साध्यसामानाधिकरण्यनियतत्वात् । एवं हेतोः सम्बन्धविशेषानिवेशे वह्निमान् धूमादित्यादौ साध्यासमानाधिकरणधूमावयवत्वादेः समवायादिना धूमादिमति वृत्तेरव्याप्तिः । साध्यवति सम्बन्धसामान्येनावृत्तित्वनिवेशे द्रव्यं सत्त्वादित्यादौ वृत्तिमन्मात्रस्यैव साध्यवति काले वृत्तेरवृत्तेश्च हे-

स्वसमानाधिकरणत्वनियमादित्यतः सम्बन्धविशेषं निवेशयति । साध्यतेति ।

(दी०) साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणे येन येन सम्बन्धेन अवर्तमानत्वं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणेऽपि तेन तेन तथात्वं बोध्यम् ।

(गा०) नन्वनतिप्रसक्तत्वरूपावच्छेदकत्वविवक्षणे व्यर्थविशेषणघटितनीलधूमत्वादावपि तस्याक्षतत्वात्तदवच्छिन्नस्यापि व्याप्यतया व्याप्यत्वासिद्धिरूपहेत्वाभासविरहेण नीलधूमादिति वाक्यप्रयोक्ता न निगृह्येतेत्यत आह । नीलेति ।

(दी०) नीलधूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणताद्दशधर्मान्तराघटितत्वेन विशेषणीयम् । सामानाधिकरण्योपादानाद् धूमप्रागभावत्वादिसङ्ग्रहः । तदघटितत्वं च तद्विषयकप्रतीतिविषयत्वम् ।

(गा०) वारणीयत्वे त्वित्यनेन तद्वारणेऽपि न क्षतिः । तत्र हेत्वाभासविरहेऽपि आधिक्येन निग्रहोपपत्तेरिति हेत्वाभासे वक्ष्यमाणं सूचितम् । स्वेति । स्वम्, अवच्छेदकत्वेनाभिमतम् । याद्दशं रूपं विशिष्टमविशिष्टं वा स्वसमानाधिकरणं यत्ताद्दशं साध्यसम्बन्धितानतिरिक्तवृत्ति धर्मान्तरं तदघटितत्वेनेत्यर्थः । विशेषणीयम् । सामानाधिकरण्यानतिरिक्तवृत्तित्वमिति शेषः । नीलधूमत्वादेर्वह्न्यादिसामानाधिकरण्यानतिप्रसक्तत्वरूपविशेषणदलघटकत्वेऽपि तस्य तथाविधधूमत्वादिघटितत्वाद्विशेषणदलेन तन्निरास इति भावः ।

स्वस्य स्वाविषयकप्रतीतिविषयत्वरूपस्वाघटितत्वासत्त्वाद्धर्मान्तरेति । तदर्थश्च न स्वाभिन्नं धूमत्वादेर्नीलधूमत्वाद्यभिन्नत्वात्, किं तु स्वाविषयकप्रतीतिविषयत्वं स्वावृत्तिविषयताश्रयत्वपर्यवसितम् । शुद्धधूमत्वपर्याप्तविषयतायाः नीलादिसहितधूमत्वादिपर्याप्तविषयताभिन्नत्वेनादोषात् ।

सामानाधिकरण्यपदप्रयोजनमाह । सामानाधिकरण्येति । धूमप्रागभावत्वादेर्धूमत्वादिरूपसामानाधिकरण्यावच्छेदकधर्मान्तरघटितस्यापि सङ्ग्रह इत्यर्थः । तत्सङ्ग्राहत्वं च धर्मिभेदे न धैयर्थ्यमिति

प्रमादानुरोधेन । अवच्छेदकताघटकसम्बन्धेन स्वाधिकरणे तेन सम्बन्धेन वृत्तिः स्वसामानाधिकरण्यम्, तेन धूमत्वधूमप्रागभावत्वयोः स्वाश्रयप्रतियोगिकत्वस्वाश्रयप्रतियोगित्वाभ्यां प्रागभावधूमयोर्वर्तमानत्वेऽपि च क्षतिः । येन सम्बन्धेन यस्य धर्मान्तरस्यावच्छेदकत्वं तेन सम्बन्धेन तद्घटितत्वं तेन सम्बन्धेन तत्प्रकारकत्वशून्यप्रतीतौ स्वीयावच्छेदकताघटकसम्बन्धेन प्रकारत्वपर्यवसितं विवक्षणीयम्, तेन संयोगादिना वह्न्यादौ साध्ये न तत्सम्बन्धावच्छिन्नवह्निप्रमावत्त्वप्रमाविषयत्वाभावावच्छिन्नस्य तादात्म्येन व्याप्यताऽनिर्वाहः । तादृशाभावादिप्रकारकप्रतीतौ वह्निमत्तत्तादात्म्येन व्याप्यतायां संयोगादिना अवच्छेदकस्य वह्न्यादेः संयोगादिना प्रकारकत्वानियमात् ।

यथैतादृशविशेषणप्रवेशे वह्नित्वादिरूपसाध्यतावच्छेदकघटितवह्निमदन्यावृत्तित्वावच्छिन्नस्य वह्न्यादिव्याप्यत्वानुपपत्तिः । तत्र चाधिकांशस्य प्रकाशकत्वाद्वैयर्थ्येन दोषापत्तेरयोगात् । न च धर्मान्तरस्य विशेष्यविधया घटकत्वविवक्षा सम्भवति । धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तेः । सामानाधिकरण्यस्थाने व्यापकत्वं निवेशयामीत्यपि न युज्यते । धूमालोकान्यतरत्वादेर्व्याप्यतावच्छेदकत्वापातात्, तद्घटकधूमत्वादेस्तद्व्यापकत्वादिति । मैवम् । स्वघटकसाध्यसम्बन्धितावच्छेदकधर्मान्तरत्वेन यादृशधर्मं प्रति व्यापकता अतादृशत्वस्य तादृशधर्मापर्याप्तविषयतापर्याप्तिपर्यवसितस्य विवक्षया प्रतीकारात् ।

घटितत्व तद्विषयकप्रतीत्यविषयत्वरूपं तदभावस्य तादृशप्रतीतिविषयत्वरूपस्य तदभावत्वेन निवेशोऽप्रघटत्वादनुचित इत्याशयेनाह । तद्घटितत्वमिति ।

मिश्रादिमतमाह । स्वरूपसम्बन्धविशेष इति ।

(दी०) स्वरूपसम्बन्धविशेष एवावच्छेदकत्वम् । अत एव नं नातिप्रसक्तमवच्छेदकमित्यादिकमपि सङ्गच्छते । अन्यथाऽतिप्रसक्ते ऽनतिप्रसक्तत्वस्याप्रसक्तत्वेन तन्निराकरणायोगात् । विरुद्धयोश्च भावाभावयोरधिकरणे एकरूपेण सम्बन्धेन वृत्तिर्विरुध्यते, अतस्तत्रावच्छेदकभेदापेक्षा ।

(गा०) अन्यथा। अनतिप्रसक्तत्वस्य विवक्षणे। अतिप्रसक्ते। अतिप्रसक्तत्वेनोपस्थिते। अप्रसक्तत्वेन। शङ्कानास्पदत्वेन। निराकरणायोगात्। निराकरणवैयर्थ्यप्रसङ्गात्। सत्तात्वादेर्गुणादिसामानाधिकरण्यावच्छेदकत्वं निराकुरुते। विरुद्धयोश्चेति। चस्त्वर्थः। भावाभावयोरिति स्वरूपकीर्तनम्। एकस्य। एकरूपावच्छिन्नस्य। वृत्तिर्विरुध्यते इति। तत्सामानाधिकरण्यावच्छेदकं न तद्विरुद्धसामानाधिकरण्यावच्छेदकमिति नियम इति पर्यवसितसमुदायार्थः।

यद्यपि धूमत्वादेर्वह्न्यादिसामानाधिकरण्यावच्छेदकत्वे विरुद्धपर्वतत्वपर्वतत्वाभावादिसामानाधिकरण्यावच्छेदकत्वमवर्जनीयम्, पर्वतत्वादिसामानाधिकरण्यस्य तदभावसामानाधिकरण्यस्य च वह्न्यादिसामानाधिकरण्यरूपत्वादिति दर्शितनियमो न सम्भवति। तथापि तत्सामानाधिकरण्यत्वतद्विरुद्धसामानाधिकरण्यत्वावच्छिन्नयोर्नैकावच्छेद्यत्वमिति नियमोपगमान्न दोषः। वह्न्यादिसामानाधिकरण्यत्वरूपेणैव पर्वतत्वतदभावसामानाधिकरण्यस्य धूमत्वाद्यवच्छेद्यत्वात्, लक्षणे ऽपि साध्यसामानाधिकरण्यत्वावच्छिन्ननिरूपितमवच्छेदकत्वं निविष्टम्। अन्यथा द्रव्यसामानाधिकरण्यत्वादिना धूमादिसामानाधिकरण्यस्य वह्नित्वाद्यवच्छिन्नतया व्यभिचारित्वप्रसङ्गात्। अत उक्तनियमबलेन सत्तात्वादेर्गुणादिसामानाधिकरण्यत्वावच्छिन्नानवच्छेदकत्वसिद्ध्यैव समीहितसिद्धिः। अत इति। तत्र। तत्तद्विरुद्धसामानाधिकरण्ययोः। अवच्छेदकभेदापेक्षा। विभिन्नधर्मावच्छिन्नत्वस्यावश्यकता। सामानाधिकरण्यस्यावच्छिन्नत्वनियमादिति भावः।

(दी०) अत एव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्याः। सत्तात्वं तु गुणाद्यभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकम्। विरोधात्। अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ तदभावस्य संयोगेन च वह्नेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात्, वह्निमति च संयोगेन वर्तमानस्य

धूमादेर्वह्न्यभाववति स्वावयवे संयोगेनावर्तमानत्वाच्च तद्वृत्तित्व-त्वधूमत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोधः ।

(गा०) अत एव । विरुद्धसामानाधिकरण्ययोर्भिन्नावच्छेद्यत्वस्यावश्यकत्वादेव । व्यभिचारिणि । सपक्षविपक्षवृत्तिहेतौ । विरुद्धयोः । असम्भवदेकावच्छेद्यताकयोः । उपपादनाय । अवच्छिन्नत्वनियमनिर्वाहाय । अवच्छेदकौ । यथा क्रमेणावच्छेदककोटिप्रविष्टौ । अनुमन्यन्ते । स्वीकुर्वन्ति । एतावता किमायातमित्यत आह । सत्तात्वं त्विति । विरोधात् । तत्सामानाधिकरण्यावच्छेदकत्वस्यैव तदभावसामानाधिकरण्यावच्छेदकत्वस्यापि प्रसङ्गात्, विनिगमकस्य दुर्लभत्वादित्याशयः । एवं च सत्तात्वं न गुणसामानाधिकरण्यावच्छेदकं तद्विरोधिसामानाधिकरण्यानतिप्रसक्तत्वात् इत्यनुमानेनानवच्छेदकत्वसिद्धिर्द्रष्टव्या, तादृशानुमाने च दर्शितप्रतिवन्दिरेव विपक्षबाधिका । उक्तनियमे भावत्वाभावत्वमेव विवक्षणीयं किं विरुद्धत्वनिवेशेनेत्याकाङ्क्षायां तत्प्रयोजनमाह । अव्याप्यवृत्तेश्चेति । कपिसंयोगादेरधिकरणे तदभावस्य सत्त्वेनाविरुद्धत्वादेतद्वृक्षत्वत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोध इत्यन्वयः । विरुद्धत्वं तदनधिकरणवृत्तित्वविशिष्टत्वम् । तादृशश्च विरोधः कपिसंयोगाभावादौ कपिसंयोगादेर्गुणादौ, अतस्तादृशविरोधविशिष्टतदभावाधिकरणगुणादिवृत्तित्ववत्यां सत्तायां संयोगसामानाधिकरण्यस्यावच्छेदकं न सत्तात्वं विरोधादिति नातिप्रसङ्गः । अथ वा संयोगतदभावयोरविरोधेऽपि, द्रव्यत्वाद्यभावस्य संयोगविरुद्धतया सत्तात्वस्य संयोगसामानाधिकरण्यावच्छेदकत्वे द्रव्यत्वाद्यभावसामानाधिकरण्यावच्छेदकत्वस्यापि प्रसक्त्योक्तविरोधेन तदुभयसामानाधिकरण्यावच्छेदकत्वासम्भवान्न कस्यापि सामानाधिकरण्यस्यावच्छेदकं तदिति नातिप्रसङ्गः ।

द्रव्ये संयोगाद्यभावस्याव्याप्यवृत्तितया व्याप्यवृत्त्यभावमन्तर्भाव्याप्यव्याप्तिशरणसम्भवाद्विरोधनिवेशस्य प्रयोजनान्तरमाह । संयोगेन चेति । तदभावस्य । वह्न्यभावस्य । सत्त्वेनाविरुद्धत्वाद् धूमत्वादेर्नावच्छेदकत्वविरोध इत्यन्वयः । तत्सम्बन्धेन तद्वति वृत्ते-

स्तत्सम्बन्धेन तद्वृत्त्यविरोध्यधिकरणवृत्तित्वेनैव समं विरोधि-त्वाद्वह्निसमवायिवृत्तिधूमनिष्ठवह्निसंयोगिवृत्तित्वस्य धूमत्वावच्छि-न्नत्वाविरोध इत्यर्थः ।

एतेन सम्बन्धेनेत्यस्य प्रयोजनमाह । वह्निमति च संयोगेनेति । संयोगेनावर्तमानत्वात् । विरुद्धस्य संयुक्तत्वस्यासत्त्वात् । तत्र स-मवेतत्वस्य च विरुद्धत्वादिति शेषः । अत्रापि धूमत्वादेर्न वह्नि-संयुक्तत्वावच्छेदकत्वविरोध इत्यन्वयः ।

नन्वेवं साध्यानधिकरणवृत्तित्वादिरूपव्यभिचारस्य हेत्वाभा-सतानुपपत्तिर्ग्राह्याभावावगाहित्वेन तज्ज्ञानस्येदृशव्याप्तिज्ञाना-विरोधित्वादित्यत आह । व्यभिचारधीरिति ।

(दी०) व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव । तद्धर्मविशिष्टस्य साध्यानधिकरणवृत्तित्वग्रहे तदवच्छेदेन सा-ध्याधिकरणवृत्तित्वग्रहायोगात् । अस्तु वा एतन्मते हेतुवृत्ति-धर्मस्य साध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः । तद्धीरेव साक्षाद्विरोधिनी, व्यभिचारान्तरधीस्तु परम्परयेति ।

(गा०) व्यभिचारधीः । साध्यानधिकरणवृत्तित्वधीः । ग्रहा-योगात् । ग्रहानुत्पत्तेरानुभविकत्वात् । यद्धर्मविशिष्टस्य तदनधि-करणवृत्तित्वं तत्त्वस्य तद्वद्वृत्तितावच्छेदकताविरुद्धत्वेन विष-यविरोधादिति भावः । वस्तुतो विरुद्धस्यापि विरुद्धत्वानवगाहिधि-यो ऽविरोधित्वादाह । अस्तु वेति । हेतुवृत्तिधर्मस्य । हेतुता-वच्छेदकतया ऽभिमतस्य । व्यभिचारः । व्यभिचाररूपहेत्वाभासः । सधर्मितावच्छेदकक एवावच्छेदकत्वग्रहो हेतुरित्याशयेनेदम् ।

ननु तथाप्यनुमितिजनकज्ञाने व्यभिचारान्तरधियो ऽनुमवासि-द्धं विरोधित्वं भज्येतैवेत्यत आह । तद्धीरेवेति । तद्धीः । हेतुवृत्ति-धर्मे तादृशानवच्छेदकत्वरूपव्यभिचारधीः । परम्परया । उक्त-व्यभिचारधीद्वारा ।

एतन्मते नीलधूमत्वादिवारणाय विशेषणान्तरमपि न प्रवे-श्यमित्याह । नीलेति ।

(दी०) नीलधूमत्वादिकं तु गौरवान्नावच्छेदकम् । एवं च लघुघटत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः, न तु तत्सहचरितकम्बुग्रीवादिमत्त्वादिकम् । तेन च, गुरुणा ऽपि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वाऽनुयोगः प्रकारान्तरव्याप्तिवादिनामपि समानः

(गा०) गौरवात् । सम्भवदवच्छेदकताकधूमत्वाद्यपेक्षया गुरुशरीरत्वात् । अवच्छेदकम् । वह्न्यादिसामानाधिकरण्यनिरूपितस्वरूपसम्बन्धात्मकावच्छेदकत्ववत् ।

नन्वेवं तादृशधर्मान्तराघटितघटत्वादिसमनियतकम्बुग्रीवादिमत्त्वाद्यवच्छिन्नस्यापि व्याप्यत्वानुपपत्तिरित्यत आह । एवं चेति ।

ननु द्रव्यवान् कम्बुग्रीवादिमत इत्यादौ घटत्वादेर्व्याप्तित्वेऽपि सामानाधिकरण्ये इव तदवच्छेदकघटत्वादिरूपव्याप्तावपि गौरवेण कम्बुग्रीवादिमत्त्वादेरनवच्छेदकतया तदवच्छेदेन व्याप्तिग्रहानुपपत्तिः, तथा च सति तस्य गमकतानवच्छेदकतया तद्विशिष्टबोधकपदेन हेतूपन्यासानुपपत्तिश्च । न च तस्यानतिरिक्तवृत्तित्वरूपव्याप्यत्वच्छेदकतयैवोभयोपपत्तिरिति वाच्यम् । एवं सति नीलधूमत्वादेरपि अवच्छेदकधूमत्वादिरूपव्याप्यनतिरिक्तवृत्तितया नीलधूमत्वाद्यवच्छेदेनापि व्याप्तिग्रहसम्भवान्नीलधूमादित्यपि प्रयुज्येतेत्यत आह । तेन चेति । अनुयोगः । कथन्ता । प्रकारान्तरव्याप्तिवादिनाम् । धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तिवादिनाम् । समान इति । तन्मतेऽपि नीलधूमादित्यादिप्रयोगवारणाय स्वरूपसम्बन्धरूपावच्छेदकत्वग्रहविषयताया एव गमकतावच्छेदकतानिर्वाहकत्वस्योपेयत्वादिति भावः । तथा प्रयोगोऽपि नेष्यते एव यदुपस्थितिनियता स्वस्योपस्थितिस्तदपेक्षया गौरवमेवं व्याप्याद्यवच्छेदकत्वविरोधीति समाधानमपि तुल्यमेवेति द्रष्टव्यम् ।

व्यक्तियाहुल्यकृतगौरवेण रूपत्वरसत्वादीनां द्रव्यत्वादिसाध्यसामानाधिकरण्यावच्छेदकत्वमेव न स्यादित्यशपीडापत्तिमाह । एवमिति ।

(दी०) एवं द्रव्यं रूपात् रसादित्यादौ सकलगुणसाधारणस्य गुणत्वस्य द्रव्यत्वादिसाधारणस्य गुणासमवेतत्वे सति द्रव्यसमवेतत्वस्य वैकस्यावच्छेदकत्वसम्भवे बहूनां रूपत्वादीनां न तत्त्वम् । विरुद्धधर्मद्वयाधिकरणयोश्च एकस्यैकेन सम्बन्धेन वृत्तौ कथं विरोधः ? कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्य रूपादेः प्रयोगः ? तथा परामर्शाद्वा अनुमितिरिति विभावनीयम् ।

(गा०) द्रव्यादीति । जन्यद्रव्यादीत्यर्थः । आदिपदात् कर्मद्रव्यत्वादिपरिग्रहः । द्रव्यसमवेतेत्यत्र कर्मत्वादिवारणाय द्रव्यपदम् । अत्र कल्पेऽस्वरसं प्रकाशयति । विरुद्धधर्मद्वयेति । कथं विरोधः । किंप्रमाणको विरोधः । विशिष्य । रूपत्वादिविशिष्टबोधकपदेन । तथा परामर्शात् । विशिष्य रूपादिमत्त्वपरामर्शात् । अनुमितिरिति । कथमित्यनुषज्यते ।

न च प्रकारान्तरव्याप्तिवादिनामप्ययमनुयोगः समान इति प्रागेवोक्तमिति वाच्यम् । व्याप्त्यन्तरवादिमते पक्षधर्मताग्रहप्रकारीभूतधर्मे तदवच्छेदकत्वमानस्यानपेक्षितत्वात्, नीलधूमादिति प्रयोक्तुरविवेकेनैव निग्रहात् । एतन्मते तन्मार्गानुसरणे स्वरूपसम्बन्धरूपावच्छेदकत्वस्य लघुत्वेऽपि सविवादतया निर्वचनानौचित्यात् ।

न च कारणत्वादेरिवाऽऽधेयत्वादेरपि स्वरूपसम्बन्धरूपमवच्छेदकत्वं प्रतीतिसिद्धतया दुरपह्नवमिति वाच्यम् । वह्निमति धूमइति प्रतीत्या धूमत्वे वह्निसामानाधिकरण्यावच्छेदकत्वावगाहनवत् धूमवति वह्निरिति प्रतीत्यानिप्रसक्तेऽपि वह्नित्वे धूमसामानाधिकरण्यावच्छेदकत्वमानस्याविशेषेण सिद्धेरित्यभिप्रायः ।

सार्वभौममतमाह । अपरेत्विति ।

(दी०) अपरे तु यद्धर्मविशिष्टहेत्वधिकरणत्वं साध्याधिकरणताया अवच्छेदकं स धर्मो व्याप्तिः । ग्रन्थस्तु धूमस्य धूमवत्त्वः, धूमत्वम्, धूमवत्त्वं वह्नेस्तु वह्निमत्त्वमित्यादिप्रकारेण

व्याख्येयः । अत्र चावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः । विरुद्धदिकालावच्छिन्नवृत्तिकस्य न्यूनदेशकालवृत्तिकादेश्चाधिकरणतायां तदसम्भवात्, तुल्यवृत्तिकधर्मद्वयाधिकरणत्वयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य च नियन्तुमशक्यत्वात् । नाप्यन्यूनवृत्तिकत्वम् । न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः । किं त्वनतिरिक्तवृत्तित्वम्, स्वान्यूनवृत्तितत्कत्वमिति यावत् । अतो न केवलान्वयिन्यव्याप्तिः । अत्र च यदन्यूनवृत्ति साध्यं तत्त्वं स्वव्यापकसाध्यसम्बन्धित्वपर्यवसन्नमपेक्ष्य गौरवं परमवशिष्यते । तच्च ग्रन्थकार एवाग्रे विवेचयिष्यते इत्याहुः ।

(गा०) यद्धर्मविशिष्टेति । गुणवत् सत्त्वाश्रयादौ सत्तात्वादिविशिष्टसत्ताद्यधिकरणत्वं गुणाद्यवृत्तिप्रसक्तत्वेन न साध्याधिकरणतावच्छेदकमिति नातिप्रसङ्ग इति । एतत्कल्पे ह्रदादिस्फूर्तिकं धूमस्य वह्निसम्बन्धं इत्यादिमूलविरोधमवच्छेदकत्वमानदव्यैवोद्धरति । ग्रन्थस्त्विति । विरुद्धेति । एकस्मिन्नेव गृहादौ प्राचीप्रतीच्यवच्छेदेन वर्तमानस्य व्यक्तिद्वयस्य एकस्मिन्नेव घटादौ स्थित्युत्पत्तिक्षणावच्छिन्नगन्धतत्प्रागभावादेश्च एकस्मिन् साध्ये हेतुभूतस्यापरस्येत्यर्थः । न्यूनदेशकालेति । वह्न्यादौ साध्ये धूमादेरित्यर्थः । तदसम्भवात् । तादृशावच्छेदकत्वासम्भवात् । तत्र तद्प्रत्ययादिति भावः । तुल्यवृत्तिकेति । तद्रूपतद्रसादीत्यर्थः । नियन्तुमशक्यत्वादिति । तथा च विनिगमनाविरहेण द्वयोरेव परस्परावच्छेदकत्वेन अन्योन्याश्रयादुभयोरेवानवच्छेदकत्वमिति भावः । एवं च लक्षणेऽसम्भव इति द्रष्टव्यम् । केवलान्वयिसाध्यकं साध्याधिकरणताशून्यावृत्तित्वरूपतदनतिरिक्तवृत्तित्वाप्रसिद्ध्या तदसङ्ग्रहात् । स्वान्यूनवृत्तीति । स्वव्यापकसाध्याधिकरणताकत्वमित्यर्थः । अन्यूनानतिरिक्तवृत्तिकाधिकरणताद्वयप्रवेशेन गौरवम्, तत्परित्यागे च प्राथमिकसिद्धान्तलक्षणाभेद इत्यत आह । अत्र चेति । अग्रे । उक्तव्याप्त्यादौ । अत्रांशे ह्यरस्यास्वरसबीजम् ।

(दी०) उपाधिनेति । विशेषणतामापन्नेनोपाध्यनुप्रवेशेनेति यावत् । यद्वाऽऽर्द्रेन्धनप्रभववह्नित्वेन रासभार्द्रेन्धनादौ च तथाविधवह्निविशिष्टत्वेन धूमसम्बन्धेऽवच्छिद्यमाने तथाविधवह्नेरप्यनुप्रवेशात् । रासभत्वादिकं तु निविशते न वेत्यन्यदेतत् ।

(गा०) ननु सोपाधिहेताववृत्तिना उपाधिना तन्निष्ठसाध्यसम्बन्धितायाः अवच्छेदासम्भवादुपाधिनेत्यसङ्गतमत आह । विशेषणेनेति । अवच्छेदकविशेषणतापन्नेनेत्यर्थः । तथा चावच्छेदकविशेषणतापन्नीभूयावच्छेदकत्वे पक्षावच्छेद्यसामानाधिकरण्यं तन्त्रमिति उपाधिविशिष्टयावच्छिन्नसाध्यतावच्छेदकादिना साध्यसम्बन्धेऽवच्छिद्यमाने ऽवच्छेदकविशेषणकोटिप्रविष्टतया साधनावृत्तेरप्युपाधेरवच्छेदकत्वं दुरपवादमिति भावः ।

ननु धूमवान् वह्नेरित्यादावार्द्रेन्धनप्रभववह्नित्वं सामानाधिकरण्यावच्छेदकं तच्चार्द्रेन्धनप्रभवत्वविशिष्टवह्नित्वं तत्र च वैशिष्ट्यघटकतयाऽऽर्द्रेन्धनप्रभववह्नेः प्रवेशो न तु विशेषणतयेत्यत आह । उपाध्यनुप्रवेशेनेति । उपाधिघटितधर्मेणेत्यर्थः । विशेषणवत् सम्बन्धस्यापि घटकत्वान्न दोष इति भावः । सम्बन्धविधया विशेषणविधया च घटकत्वं स्थलभेदेन दर्शयति । यद्वावेति । ननु वह्निहेतुके यथा साधनतावच्छेदकस्यावच्छेदकघटकत्वं न तथा रासभार्द्रेन्धनहेतुके इत्यत आह । रासभत्वादीति । अन्यदेतदिति । तदनिवेशेऽप्युपाध्यनुप्रवेशस्याक्षततत्वाद् उपाध्यनुप्रवेशेन साधनतावच्छेदकस्यावच्छेदकतायाः अविवक्षणादिति भावः ।

सोपाधौ तु उपाधिनेत्यत्रैवकारपूरणेन नियमपरतया केषांचिद्व्याख्यानं नियमासम्भवेन दूषयति । अत्र चेति ।

(दी०) अत्र चेदं सस्नेहं निःस्नेहं वा स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वा स्वयमनुपाधिना केवलेन विशेषणीभूय वा शीतान्यस्पर्शत्वेन चोपाधिना स्वत एव स्पर्शे साध्यसम्बन्धोऽवच्छिद्यते इत्युपाधिनैवेति नियमे न तात्पर्यम् ।

परं तु शुद्धस्य साधनतावच्छेदकस्यानवच्छेदकतामात्रे ।

(गा०) नियमे न तात्पर्यमित्यग्रिमेणान्वयः । स्नेहवत् स्पर्शादित्यत्र विनाप्युपाधिप्रवेशनं साध्यासमानाधिकरणतया स्वयमनुपाधिना शीतत्वेन केवलेन स्पर्शे साध्यसम्बन्धोऽवच्छिद्यते इत्यंकोऽन्वयः । सर्वत्र शीतपदं शीतस्पर्शपरम् । केवलेन । किञ्चिदवच्छेदकविशेषणतानापन्नेन । एतेन उपाधिपदस्योपाधिघटितपरत्वलभ्ये सोपाधिनिष्ठसाध्यसम्बन्धितायां उपाधिघटितधर्म एव स्वतोऽवच्छेदक इति नियमे तस्य पदस्य यथाश्रुतार्थपरत्वलभ्ये तादृशसाध्यसम्बन्धेऽनुपाधिरेव स्वतोऽवच्छेदक इति नियमे च व्यभिचारो दर्शितः । अवच्छिद्यते इत्यस्य विशेषणतयाऽवच्छेदकत्वपरतालभ्ये उपाधिभिन्नस्य तदघटितस्य च तादृशावच्छेदकत्वाभावनियमे व्यभिचारं दर्शयति । निःस्नेहमित्यादिना । निःस्नेहं स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं साधनव्यापकतया स्वयमनुपाधिना शीतान्यत्वेन विशेषणीभूय स्पर्शे साध्यसम्बन्धोऽवच्छिद्यते इत्यन्वयः । विशेषणीभूय । अवच्छेदकीभूते स्पर्शत्वे सामानाधिकरण्यसम्बन्धेन विशेषणीभूय । व्यभिचारपदोदृशनियमे प्रकृतानुपयोगोऽपि बोध्यः । विशेषणतापन्नेनेति पूरणलभ्ये उपाधेः स्वतोऽनवच्छेदकत्वनियमे व्यभिचारं दर्शयति । शीतान्यस्पर्शत्वेन चेति । अस्य च शुद्धनिःस्नेहत्वाव्यापकत्वेऽपि पक्षधर्मजलोष्णस्पर्शान्यतरत्वावच्छिन्नसाध्यव्यापकतयोपाधित्वम् । अत्रापि नियमे प्रकृतानुपयोगो द्रष्टव्यः ।

ननु नियमस्यानभिमतत्वे प्रकृतानुपयोगितेत्याशङ्कां परिहरति । परं त्विति । अनवच्छेदकतामात्रे इति । वह्न्यादिपदस्य साध्यादिसामान्यपरतया पूर्वोक्तस्य साधनतावच्छेदके साध्यसम्बन्धितावच्छेदकत्वस्य सोपाधौ तुकारेण व्यवच्छेदादिति भावः ।

उपाधिपदस्य साधनतावच्छेदकातिरिक्तपरतया तुकारस्य चैवकारार्थतया उपाधिनैवेति नियमपरत्वमपि सम्भवतीत्यपि केचित् ।

इति अनुमानगादाधर्यां विशेषव्याप्तिप्रकरणम् ॥

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यया समलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः । ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामणि श्रीरघुनाथतार्किकशिरोमणिविरचितदीधितिव्याख्यागर्भिता । ६

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपादः । ९

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य बालम्भट्टाभ्यां विरचितकुञ्चिकाकलाटीकाद्वयसमलङ्कृता । १०

(४७) व्याकरणसिद्धान्तसुधानिधिः । पर्वतीय विश्वेश्वरसूरिविरचितः । ८

(४८) वीरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(४९) बृहदारण्यकवार्त्तिकसारः । श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतलघुसङ्ग्रहाख्यया टीकया समलङ्कृतः । ८

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसाधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकटिप्पण्या परिष्कृता । १

(५२) प्रशस्तपादभाष्यटीकासङ्ग्रहः । तत्र कणादरहस्यम् । श्रीशङ्करमिश्रविरचितम् २

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्यायकाश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता ६

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) साङ्ख्यसङ्ग्रहः । तत्र साङ्ख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । साङ्ख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । १

(५६) न्यायामृताद्वैतसिद्धी । श्रीमधुसूदन य श्रीव्यासाचार्यसंदिता । श्रीनिवासाचार्यविरचित न्यायसंसमाख्यया टीकया युता । २

द्रव्यादिप्रेषणस्थानम् । } जयकृष्णदास गुप्तः, सेक्रेटरी, चौखम्बा संस्कृत सीरीज आफिस, बनारस सिटी ।

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता (वेदान्तः) १

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि-मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) २

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवर-श्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्याय श्रीकर्काचार्यविरचितभाष्यसहितम् । १२

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचित सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीत खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीति प्रसिद्धया समेतम् । (वेदान्त.) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् । ८

(२४) ब्रह्मसूत्रवृत्ति मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्त) २

(२५) क्रोडपत्रसंग्रह । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्या अन्यथानुमानगादाधर्या अन्यथानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकाया कुसुमाञ्जलेश्च क्रोडपत्राणि ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचित सिद्धान्तसेतुकाऽभिधटीकासहित श्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चय । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहित । हरिभद्रसूरिकृत । १

(२८) शुद्धाद्वैतमार्तण्ड प्रकाशाख्यव्याख्यासहित प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । ११

(३०) वीरमित्रोदय । महामहोपाध्यायश्रीमित्रमिश्रविरचित परिभाषा—संस्कारप्रकाशात्मक । सापिण्ड्यदीपकश्च ... ११

(३१) वीरमित्रोदय । महामहोपाध्यायश्रीमित्रमिश्रविरचित आह्निकप्रकाश ६

(३२) स्मृतिसारोद्धार । विद्वद्वरविश्वम्भरत्रिपाठिसङ्कलित । ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकर । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचित २

(३५) वेदान्तपारिजातसौरभ नाम ब्रह्ममीमांसाभाष्य श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया समलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृतब्रह्मामृतवर्षिणीसमाख्यव्याख्यासवलितम् । ४

(३८) विश्वप्रकाश । कोश । विद्वद्वरश्रीमहेश्वरसूरिविरचित । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकरणं श्रीसुबोधिनीटिप्पण्योः-प्रकाशः गोस्वामि श्रीश्रीपुरुषोत्तमजीमहाराज विरचित २

(४०) वीरमित्रोदय । महामहोपाध्यायश्रीमित्रमिश्रविरचित पूजाप्रकाश । ... ४

(४१) वेदान्तसिद्धान्तसंग्रह । श्रुतिसिद्धान्तपरनामक । श्रीब्रह्मचारिवनमालिमिश्रविरचित । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्मकृता अध्यात्मसुधातरङ्गिण्याख्य टीकया सहिता । ३

(४२) स्वानुभवादर्श । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । २

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्यव्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचित-तत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ९

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपादः । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्ट-विरचिता । श्रीमद्दुर्बलाचार्य-बालम्भट्टाभ्यां विरचितकुञ्चिकाकलाटीकाद्वयसंवलिता । ११

(४७) व्याकरणसिद्धान्तसुधानिधिः । पर्वतीय विश्वेश्वरसूरिविरचितः । ८

(४८) वीरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ०

(४९) बृहदारण्यकवार्तिकसारः श्रीमाधवारण्यस्वामिविरचितः । महेश्वरतीर्थकृतलघुसंग्रहाख्यया टीकया समलङ्कृतः । ८

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृता १

(५२) प्रशस्तपादभाष्यटीकासङ्ग्रहः । तत्र कणादरहस्यम् । श्रीशङ्करमिश्रविरचितम् २

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणेन १

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । १

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रणीता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युता । २

पत्रादिप्रेषणस्थानम् । } जयकृष्णदास गुप्तः, सेक्रेटरी,
चौखम्बा संस्कृत सिरीज आफिस,
बनारस सिटी ।

